निर्वंधं भङ्क्त्वा कदेत श्रवणावतस्यावसरशङ्का मनुवंशस्य मनुं विशिनष्टि पुण्यकीर्तेः पुण्या श्रवणतां पुण्या पवित्रा कीर्तिर्यस्य तत्र हेतुः हरेरंशांशजन्मनः स्मरणमात्रेण आश्रितदुरितापहारिणो भगवतः अंशो ब्रह्मा तस्य अंशात् स्वशरीराज्जन्म यस्य तस्य हरेर्यदंशांशभूतत्वाच्च हरिचरित्रवन्मनुपुत्रान्वयकथनश्रवणादिकमपि दुरितविनाशनद्वारा पुण्यसंपादकमित्यर्थः ॥ प्रतिज्ञामनुवंशं वर्णयति प्रियव्रतोत्तानपादाविति द्वाभ्यां सवर्णनात् ॥ प्रियव्रतो ध्रुवोत्तानपादश्चेतौ इमन्वर्थनामनी प्रियं भगवत्सेवेति करव्रतं यस्य सः प्रियव्रतः उत्तानेउ त्तानेऽपरे पयोस्तौ पादौ यस्येति उत्तानपादः शतरूपापतेर्मनोः सुतौ वासुदेवस्य कलया सर्वान्तरात्मभगवद्गुणविशेषाविर्भावेन जगतोर

अधर्मोपि ब्रह्मपुत्रः तस्य वंशमाह । मृषेति चतुर्भिः अधर्मस्य भार्या मृषा दंभः परं प्रतारणं माया तत्र द्वितीया चेष्टा एतद्दंभयात्मकं मिथुनं प्रसूतवती हे
शत्रुहन् तयोरत्योरपि मायादंभयोर्हीनपसे अधर्मा शांतया एवमुपयेपिद्द एवं तच्चेदंभमायात्मकं मिथुनं अप्रजोऽपुत्रो निर्ऋतिर्जग्राह गृ
हीतवान् पुत्रौ दंभाभिमाने मायायां सुषाभिमानं च कृतवानित्यर्थः ॥ २ ॥ हे महामते तयोर्मायादंभयोर्लोभः निकृतिश्च तथा च सममभवतां ता
भ्यां निकृतिलोभाभ्यां क्रोधो मर्षो हिंसा च सममभवदित्यनुषंगः यत्ताभ्यां क्रोधहिंसाभ्यां कलिश्च तत्स्वसा भगिनी दुरुक्तिश्च सममभवत्

मृषाधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥ तयोः समभवल्लोभो निकृतिश्च
महामते ॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ ३ ॥ दुरुक्तौ कलिराधत्त भियं मृत्युं च सत्तम ॥ तयोश्च मिथुनं
जज्ञे यातना निरयस्तथा ॥ ४ ॥ संग्रहेण मयाख्यातः प्रतिसर्गस्तवानघ ॥ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं ॥ ५ ॥

दुरुक्तौ कलिर्भियं भीतिं मृत्युं च आधत्त उत्पादयामास हे सत्तम ताभ्यां भीतिमृत्युभ्यां यातना स्त्री निरयः पुमान् एतद्द्भयात्मकं मिथुनं ज
ज्ञे ॥ ४ ॥ अधर्मवंशमुपसंहरन् तस्य संसृतिहेतुत्वान्मुमुक्षुभिरसेव्यतामाह एतदिति ॥ अधर्म एव हृत् तस्य वंशः । वसंभवेः शास्त्राह
पारतिभावः हि यस्मात् संसृतिहेतवः अतः श्रेयस्कामः स्वर्गापवर्गकामः न सेवते अधर्मवशान् इति विशेषः विभक्तिविपरि
णामेनानुषंगो वा आश्रयो तमः उत्तमः आश्रयो यस्य सः चतुर्थः अहिनाम्माहिताद्राश्य यस्य शादस्य पूर्वं निपातनं न सेवत

६

तं मया कुलेन गृहीतस्त्वमद्र मेव न वेत्सि अपितु भावान पि वेदेत्याह । बालोऽसीति ॥ भवान् बालोऽप्यात्मानं मम स्त्रीगर्भे संभृतं मत्त पत्नीगर्भे धृतं
न वेद त्वं तन्न वेद किं अपितु वेदेवेत्यर्थः ॥ ननमिति निश्चये । यद्वा बालोऽप्यात्मानं मम स्त्रीगर्भसंभृतं मत्त पत्नीगर्भे धृतं न वेद त्वं तन्न वे
द किं अपितु वेदेवेत्यर्थः ननमिति निश्चये । यद्वा बालो भवान् न जानाति अहं तु वेद्मीत्याह ॥ बाल इति ॥ अपि स्वर्थे कः भवानित्यनेन र
सं बुध्यते बाल इति हेतुगर्भं भवांस्तु बालत्वादात्मानं मम स्त्रीगर्भसंभृतं न वेद अहं तु वेद्मीत्यभिप्रायः ॥ अतो यस्तव दुर्लभे लब्धं
मयोग्ये अर्थे नृपासनारोहणरूपे मनोरथ आसीदित्यर्थः वृते मां श्रये ॥ १२ ॥ यदि ते दुर्लभो योऽभि मया समद्य इतित वाग्रहः तर्हि एवं साध

तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे । गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥ १३ ॥ श्रीमैत्रेय उवाच ॥ मातुः सप
त्न्याः सुदुरुक्तिविद्धः ॥ श्वसन् रुषा दंडहतो यथाहिः ॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशं ॥ १४ ॥
तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं । निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्याः ॥ १५ ॥

येत्याह ॥ तपसेति । यदि त्वं नृपासनमिच्छसि तर्हि तपसा पुरुषं परमपुरुषं आराध्य तस्याराधितस्य परमपुरुषस्यानुग्रहेणैव नन्न
पायां न रेणोत्यर्थः ॥ मे मम गर्भे आत्मानं साधय आत्मनो मद्गर्भे उत्पत्तिं साधयेत्यर्थः ॥ १४ ॥ मातुरिति । सपत्न्या मातुः दुरुक्तेन दु
र्वचसा भावेन विद्धः ताडितो ध्रुवः दंडेन हतः सर्प इव यथा तद्वा श्वसन् श्वासं मुंचन् मिषंतं पश्यंतं शान्नवाचं कुंचितवाचं पितरं
हित्वा प्ररुदन् निनरोमश्रूणि विमुंचन् मातुर्जनन्याः सुनीतेः समीपं जगाम ॥ १५ ॥

तयोर्मध्येयोऽग्रजउत्तानपादस्तस्यसुनीतिसुरुचिश्चजायेभार्येतयोःसुनीतिसुरुच्योर्मध्येसुरुचिःयत्सुतउत्तानपादस्यप्रेयसीनितरांप्रीतिविष
याइतरासुनीतिस्तुनप्रेयसीयत्सुतःयस्याअप्रेयस्याःसुनीतेःसुतःध्रुवः॥९॥तत्रसुनीत्याअप्रेयस्त्वमेवप्रपंचयन्तत्सुतध्रुवचरित
माह॥एकदेत्यादिनापंचभिरध्यायैःएकदाकदाचित्राजाउत्तानपादःसुरुचेःपुत्रमुत्तमसंज्ञमारुरुक्षंतंअंकमारोढमिच्छंतंअंकमा
रोप्यउत्संगेनिधायलालयन्तथाचिकीर्षमाणंअंकारोहादिकर्तुमिच्छंतंसपत्न्याःसुनीतेःतनयंतंध्रुवंनाभ्यनंदत्यथाउत्तमसं

तथाचिकीर्षमाणंतंसपत्न्यास्तनयंध्रुवं॥सुरुचिःशृण्वतोराज्ञःसेर्ष्यमाहातिगर्विता १०॥जः
नंवत्सनृपतेर्धिष्ण्यंभवानारोढुमर्हति॥नगृहीतोमयायत्त्वंकुक्षावपिनृपात्मजः॥ ११॥बालो
पिवततनात्मानमन्यस्त्रीगर्भसंभृतम्॥नूनंवेदभवान्यस्यदुर्लभमस्त्येमनोरथः॥ १२॥

कमारोप्यलालयन्॥अंकमारुरुक्षंतंध्रुवंनाभ्यनंदद्वेतिसंबंधःसुरुचिःराज्ञोभिप्रायज्ञातथाचिकीर्षमाणंध्रुवंप्रतिराज्ञःशृण्वतः
सतः।अतिगर्वितासतीअतएवसेर्ष्यंअसूयासहितंयथाभवतितथाहउवाच॥१०॥गर्वोक्तिमेवाहनवत्सेतित्रिभिःहेवत्सनृपते
र्धिष्ण्यमासनमारोढुंभवान्नार्हतिनृपात्मजोहमारोढएवनत्राह त्वंनृपात्मजोपियद्यस्मात्मयाकुक्षौनगृहीतःनधृतःमद्गर्भज

श्रीभागवतटीकास्कं०४॥ ८२॥

हे नीनन तस्मात्त्वं विमत्सरः विगतमत्सरः सम्मा त्रासमाताया मातुः सपत्नीनयापि यदुक्तं तत्र पसाराध्य पुरुषमित्यादि तव्यलीकं निर्देषं यथा भवति तथा आतिष्ठ कुलसमात्रायदुक्तमिति मामाम्येनोक्तं विशेषनिष्ठं करोति उत्तमोयथा नयात्वमप्यधासनं न्नपासनं इच्छसि तर्हि अधोक्षजपादपद्ममाराधय ॥१९॥ किं कश्चिद् अधोक्षजपादपद्ममाराध्य यामनादि स्वाभिलषितमवापेसत्र ब्रह्माणं मनुं च निर्दिशयति यस्येति द्वाभ्यां विश्वविभावनाय विश्वस्य पालनाय आत्तगुणाभिपत्तेः गुणानां कल्याणानामभिपत्तिर्येन यस्मा आत्ता स्वीकृता गुणाभिः पतिः कल्याणगुणाश्रय

यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोध्यतिष्ठत्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यम ॥२०॥ तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ॥ इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम ॥२१॥ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम ॥२२॥ ७

दिव्यमंगलमूर्तिर्येन तस्य यस्याधोक्षजस्य जितः ॥ आत्मा मनः श्वसनः प्राणवायुर्यैस्तैरभिवंद्यं अंघ्रिपद्मं परिचर्य आराध्य अजो ब्रह्मा पारमेष्ठ्यं पदं चतुर्दशभुवनानां मध्ये उत्कृष्टं सर्वोपरि वर्तमानं सत्यलोकरूपं स्थानमध्यतिष्ठद् अधिष्ठितवान् खलु ॥२१ तथा वः युष्माकं पितामहः पितुः पिता भगवान् मनुरपि एकमत्या अव्यभिचरितमत्या पुरुदक्षिणैर्मखैः क्रतुभिः यं भगवंतमिष्ट्वा आराध्य अन्यतः अस्मेदुरापं दिव्यं दिविभवं स्वर्गं भौमसुखं अपवर्ग्यं मोक्षसुखं चाभिपदे अनेनाधोक्षजस्य कुलदैवतत्वमुक्तं अन्यतः एकमतिव्यतिरिक्तोपायांतरे

एदुःखापंयमितितासंबंधः ॥ अन्यस्माद्दुर्लभमहाहेः
दुःखापं सुखत्रयमितिवा ॥२२॥

तं स्वकाशमागतं निश्वसंतं स्फुरितः कुपितः अधरोष्ठो येन तं बालं ध्रुवं सपत्न्यागदितं सा सुनीतिः उत्संगमुद्दृह्य अंके आरोप्य पौरमुख्यादंतःपुरजनमुखा
त्तन्निशाम्य श्रुत्वा निश्वसंतं विनिन्नं विषये व्यथितवती ॥ १४ ॥ अग्यामेवाह ॥ सेति ॥ सा सुनीतिर्धैर्यमुत्सृज्य हित्वा विललाप शोक एव दावाग्निस्तेन दावा
ग्निना दवाभात्लतेव स्थिता सा बाला सुनीतिः सपत्न्या वाक्यं स्मरन् सरोजश्रिया सरोजसमश्रीः शोभा यस्य तया दृशा बाष्पकलां अश्रुकणिका
मुवाह दधार ॥ १५ ॥ सपत्नीगदितं यथयाहीर्घं यया श्वासं मुञ्चती असनमः दुःखस्य पारमवधिमपश्यंती अपारदुःखाक्रांते समर्थः बाला सुनी

सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥ वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह
॥ १६ ॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला ॥ मामंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् ॥ १७ ॥
सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः ॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥ १८ ॥
आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकं ॥ आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥ १९ ॥

निर्वालकं ध्रुवमाह हे तात अमंगलमपराधं परेषु मामंस्थाः मा स्मार्षीः यतः यस्मात् यो जनः परदुःखदः परेभ्यो दुःखं ददातीति परदुःखदः
सः तद्दुःखमेव भुंक्ते अनुभवति ॥ १८ ॥ सुरुच्याभिहितं सोपालंभमनुवदन् आत्मजं तपसे चोदयति ॥ सत्यमिति ॥ सुरुच्याः यदभिहितं तत्सत्यमि
ति संबंधः किमभिहितं तत्राह दुर्भगायाः मे मया उदरे भवान् गृहीतः मदुदरे जात इत्यर्थः ॥ न केवलं जातमात्रमेव अपि तु स्तन्ये एव समम
स्तन्येन स्तनयोर्मध्वं तस्मिन्नेव वृद्धिं प्राप्तः दुर्भगत्वमेवाह ॥ इडाम्पतिः इलायाः भूमेः स्वामी राजा हित्वा तत्सुदृढ्स्वो नद्रडस्पतिर्भर्पति मांभा

भा·च·

॥५३॥

सुनीतिस्तमुपसंहरन्ध्रुवस्य चेष्टामाह। सुनिः एवमिति मातुः संजल्पितं विलापवंतं तत् अर्थीगमं अर्थस्य स्वाभिलषितस्यार्थस्यागमो यस्मा
त्तथाभूतं वचः आकर्ण्य आत्मनास्त्वैवात्मनो मनः सन्नियम्य समाधाय पितुरुत्तानपादस्य पुरात् निष्क्रामन्निर्गतः ॥२५॥ तन्निष्क्राम
णमुपाकर्ण्य आश्रुत्य त्रैकालज्ञो नारदः अस्य ध्रुवस्य चिकीर्षितं ज्ञात्वा चागमत् इति शेषः ॥ अघघ्नेन दुरितहारिणा पाणिना शिरसि
संस्पृशन् विस्मितः प्राह ॥२६॥ विस्मितत्वमुक्तं तदेवाह ॥ अहो इति। मानभंगं अभिमानविहितं अमृष्यतां असहमानानां क्षत्रिया

नारदस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितं ॥ स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥२५॥ अहो तेजः
क्षत्रियाणां मानभंगममृष्यताम् ॥ बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥२६॥ श्रीनारद उवा
च ॥ नाधुनाप्यवमानं ते सन्मानं चापि पुत्रक ॥ लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥२७॥
विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः ॥ पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥२८॥

णां तेजः प्रभावः अहो विस्मयनीयः यत् यस्मात् अयं ध्रुवः बालोपि समातुः सपत्न्या असद्वचः दुष्टवाक्यं यत् हृदया हृदये
न धत्ते मनसि स्थितिं स्थापयतीत्यर्थः ॥२७॥ नारदो क्रमेवाह ॥ केति हे वत्स भगवान् ऋद्धिमत्स्वग्रहित्वा एव असहायः क्व यासि अंग हे
ध्रुव त्वां स्वजनाद्दुस्त्यजात् अस्मत्त्वया अवमत्यापराभूत्वा सेतं मंनितं गतं प्रमाल्लक्षये उप्रेक्षये ॥२८॥

॥५३॥

मजेतमपिमां राजदेवाद्यमनुग्रहस्यापेक्षेतेत्यत आह। तमिति। हे वत्स भक्तवत्सलं भक्तेषु वत्सलं स्नेहवन्तं स्वपि दोषेषु तानन्ताहृत्य भोग्यतां बुद्धि
मसंवात्सल्यं तमेवाश्रय अनेनाश्रयणीयो वर्यपादकगुणसंपत्तिरुक्ता आश्रितकार्योपादकगुणसंपत्तिमाह। मुमुक्षुभिः संसारबंधनान्मो
क्षमिच्छुभिर्मृग्या अन्वेषणीया चिंतनीयेति यावत् पद्धाब्जयोः पद्धतिर्मार्गो यस्य तं मुक्तिप्रदमिति भावः॥ अनेन निःसंसारिणं निस्पृह
परिग्रहं घटनोपयोगित्वरूपाघटितघटनासामर्थ्यरूपाश्रितकार्योपादकसंपत्तिरुक्ता कथमाश्रयणीयमत्र स्ववर्णाश्रमधर्मानुगृही
तभक्तियोगेनाश्रयेमाह॥ अनन्यभावेन विद्यतेऽन्यस्मिन् भावो यस्मिन् विजातीयप्रत्ययानन्तरव्यवहितैतैलधारावदविच्छिन्नस्मृतिरूपादि
भक्तिः अवस्थाप्य विषयीकृत्य पूरुषं पूःसंज्ञकशरीरांतःस्थितं दहकुहरे वसंतं परमपुरुषं भजस्व॥२२॥ तमेवेत्यनेन नष्टचित्तं सर्वोत्तमत्वं

नान्यं ततः पद्मपलाशलोचनात् दुःखच्छिदं ते मृगयामि किंचन। यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमा
णया॥२३॥ श्रीमैत्रेय उवाच॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः। संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात्॥२४

सुपत्रयप्रदत्वं च कथयति नान्यमिति। ततस्तस्मात् पद्मपलाशायते पलाशालोचनात् पुंडरीकाक्षादन्यं पुरुषं तव दुःखच्छिदं दुःखनिवा
रकं न मृगयामि अन्विष्यामि तिपश्यामीति भावः॥ अनेन तापत्रयनिरसनद्वारा सुखत्रयप्रदो भगवानेवेत्युक्तं भवति। सर्वोत्तमत्वमाह
यो भगवानितरैर्ब्रह्मादिभिः स्वाभिलषितसिद्धये विमृग्यमाणया मानःप्रणिधानेन चिंत्यमानयाहस्तेन गृहीतं पद्मं यया तया महा
लक्ष्म्या अंग हे ध्रुव मृग्यते अनेन लक्ष्मीपतित्वमुक्तं तेन च सर्वेश्वरत्वं च सामर्थ्यादुक्तं भवति॥२४॥

स्यदेहात्माभिमानाधीनत्वेहेतुमाह भिन्नायदिति । अत्रलोकइतिप्रथमांतपाठस्तुगमः लोकश्चेतनवर्गः ॥ तस्मिन्निजकर्मभिरेवभिन्नाःकर्मकृत
देवादिदेहभिन्नाइतियत ॥ अतोदेहेसतितत्रात्मभ्रमएवावमानद्वारासंतोषहेतुः ॥ असंतुष्टस्यचेतनस्यदेहात्माभिमानानत्वादिस्पर्शः ॥ यद्वासप्त
म्यंतपाठः भिन्नेतिभावेक्तः भिदेस्पर्शः देवादिदेहभेदेकोहेतुस्तत्राह लोकेज्ञानेकाकारेचेतनवर्गेभिन्नादेवमनुष्यादिभिदायतः यदाकर्म
भिर्भवति अनेनकर्मकृतादेवादिदेहभेदस्तत्कृतोमानावमानस्तोदेहात्मभ्रमस्ततोसंतोषपुरुषंदुःखमित्यभिप्रेतम ॥२९॥ उपशमोपदेशे
नविवर्तयति ॥ ततोदेहात्मभ्रमस्यैवासंतोषहेतुत्वाद्बुधःदेहविलक्षणात्मज्ञानीपुरुषः ॥ ईश्वरगतिंवीक्ष्यईश्वरानुकूल्यंविनानोद्यमाःफ

अयमात्रोपदिष्टेनयोगेनावरुरुत्ससि ॥ यत्प्रसादंसवैपुंसांदुराराध्योमतोमम ॥३०॥ मुनयःपद
वींयस्यनिःसंगेनोरुजन्मभिः ॥ नविदुर्मृगयंतोपितीव्रयोगसमाधिना ॥३१॥ अतोनिवर्तताम
षनिर्बंधस्तवनिःफलः ॥ यतिष्यतिभवान्कालेश्रेयसांसमुपस्थिते ॥३२॥

लहेतवः ॥ इतिज्ञात्वायावत्सुखंदैवेनोपसादितंप्रापितंतावन्मात्रेणपरितुष्येत्नाधिकंलिप्सेत । अतोधिकसुखार्थंनोद्यमःकार्यइतिभावः
॥३०॥ दुष्करश्चतवायमुद्यमः इत्याह ॥ अयेति ॥ द्वाभ्यां ॥ अयमनुमात्रोपदिष्टेनभक्तियोगेनयस्यभगवतःप्रसादंअवरोद्धुंप्राप्तुमिच्छसि स
वैभगवान्पुंसांदुःखेनाप्याराधयितुमशक्यइतिमेममयाज्ञातोमतः ॥३१॥ निस्संगेनदेहतदनुबंधिसंगान्निर्गतेनतीव्रयोगःविद्यानु
पदतोज्ञानयोगः कर्मयोगस्तदुद्युक्तेनसमाधिनायस्यभगवतःपदवींमार्गंमृगयंतोपिबहुजन्मभिरपिनविदुःसएवभगवान्दुरारा
ध्योममततइतिपूर्वेणसंबंधः ॥३२॥

अत्र वक्ष्यति मुक्तके पुंकिमेतद्भगवद्ध्यानाद्दृष्टं न द्योगमधुसानोस्मिहे सुरुचेर्वाक्सा समाधातुं मनः तन्न मित्यधिकः श्लोकः पठ्यते तत्रायं ध्रुवो नारदेन व्या
ख्येयः हे भगवन्नारद एतन्मनः स्वजनोत्थपराभवसंतापादिकं योगराधसा योगप्रभावेन ध्यानसर्ववस्तुसाक्षात्कारात्मायादिकं तस्मात् दृष्टं किं त्वयो
निरोधः॥ अहं तु सुरुचेर्वाग्बाणक्षतत्वाथितं मनः समाधातुं नोत्सहे न शक्नोमि॥ एवमुक्तो नारदः पुनराह॥ नाधुनाप्यवमानमिति एतत् श्लोकाभावे
सर्वो ग्रन्थो नारदोक्तिपरत्वेन व्याख्येयः हे पुत्रक कुमारस्य अनेन वक्रीडनादिष्वासक्तस्य तव अधुना बाल्यदशायां अवमानं सन्मानं वा न प
श्यामि बालो हि मानावमानावनादृत्य परं क्रीडासक्तः अतस्त्वयापि मानावमानो न स्तइतिपश्यामीत्यभिप्रायः यदि ब्रूया अहं वयसा बालो न
बुध्येति तत्राह॥ विकल्पइति॥ विकल्पे मानावमानावनादृत्य परं समपि मोहं विना भिन्नाव्यतिरिक्तः॥ असंतोषहेतवो न संति किं तु मोह एव सं

परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः॥ दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः॥ २९॥

तोषहेतुरित्यर्थः॥ कुतः यत्सुखं दुःखं वा लोके तन्नास्ति निजकर्मभिरेव भवति यथा अहं बालोपि मानावमानबुद्धिमानिति ब्रूयास्तर्हीयं अ
संतोषमत्तो देहात्मभ्रममत्तान्न तात्विकी त्याह विकल्पइति॥ सर्वत्र ज्ञानैकाकारतया एकरूपे आत्मनि विकल्पे देवमनुष्यादिभेदे अविद्या
मानेइति छेदः असत्यपि देहमनुष्यादिभेदानामात्माकारत्वाभावेपीत्यर्थः॥ पुंसां जीवानां मोहमृते देवादिशरीरेष्वात्माभिमानं विना असं
तोषहेतवो न संति देहात्मभ्रमएवासंतोषहेतुरित्यर्थः॥ विद्यमानइतिवा छेदः अपिशब्द उक्तसमुच्चयार्थः॥ विकल्पइत्यनेन संबध्यते वि
कल्पे देवमनुष्यादिभेदे अपिशब्दात् तत्प्रयुक्तमानावमनादिके च संतिमोहं देहात्माभिमानमृते असंतोषहेतुरन्यो नास्तीत्यर्थः असंतोष

अथापि त्वयोपदिष्टः शमस्तथापि मम घोरं क्षात्रं स्वभावं उपेयुषः प्राप्तवतः एवाविनीतस्य सुहृद्भ्याः दुर्वचांस्येव बाणैस्तैर्भिन्ने हृदि न स्प्रयते शमइत्यनु
षंगः शमो न तिष्ठतीत्यर्थः ॥३७॥ अतो मन्मनीषानुसारेणैव मामनुगृह्य मनीषितोपायप्रकारं ब्रूहीत्याह । पदमिति ॥ अस्मत्पितृभिस्तथा
न्यैरप्यनधिष्ठितं त्रिभुवनोत्कृष्टं पदं जेतुमिच्छोर्मे साधुवर्त्म मार्गं ब्रूहि स्वोपदेशोक्तं यथा नान्यानिग्रह्यादित्याशंक्यतं प्रसादयति ॥३८॥ नूनर
मिति ॥ भवान्परमेष्ठिनो ब्रह्मणः जगद्धितकारिणोंगजः देहजः अंकज इति पाठे उत्संगाज्जातः वीणां वितुदन् ध्वनयन् जगतो हिताय सू

पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥३७॥ नूनं भवान्
भगवतो योंगजः परमेष्ठिनः ॥ वितुदन्नटते वीणां हितार्थं जगतोर्कवत् ॥३८॥ मैत्रेय उवाच ॥ इत्युदा
हृतमाकर्ण्य भगवान्नारदस्तदा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया ॥३९॥ नारद उवाच ॥
जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते ॥ भगवान्वासुदेवस्तं भजतं प्रवणात्मना ॥४०॥

र्यवदटति चरति अतो मन्मनीषापारनमेव जगद्धितकारित्वं तवोचितमिति भावः ॥३९॥ एवं दृढसंकल्पस्य ध्रुवस्य वचः आश्रुत्य त
दनुग्रहं कृत्वाह ॥ नारद इत्याह मैत्रेयः इति उक्तप्रकारेण उदीरितं गदितमाकर्ण्य भगवन्नारदः दृढसंकल्पदर्शनेन नितरां प्रीतः
तं बालकं प्रति कृपया सद्वाक्यं हितं वाक्यमाह ॥४०॥

अतोदैवस्यापिदुरत्ययत्वाद्धेतोः निवर्तनीयं ग्रहान् प्रतिघातुं भवान् तत्रैव न निर्बन्धं न ग्रमरूपो निर्बन्धो निष्फल अनर्थः ॥ अयतमानस्य मम कथं श्रेयः प्रा
प्तिर्भविष्यति आशंकमानं प्रत्याह ॥ यतिष्यतीति । दैवात् श्रेयसा काले समुपस्थिते भवान् यतिष्यतीय यत्नं करिष्यतीति अधुना तद्यमो निष्फल इतिभा
वः ॥ ३२ ॥ किंच यस्य पुंसः यत्सुखं दुःखं वा दैवेनेश्वरेण विहितं स पुमान् दैवविहितयोः सुखदुःखयोर्मध्ये तेन सुखेन दुःखेन आत्मानं तोषयन् सु
खे सति पुण्यं क्षीयते असुखे त्वपुण्यमतः पुण्यापुण्यक्षयेन संसृतेर्मोक्षामीत्यात्मानं तोषयन्नित्यर्थः देही देहवान् तमसः पारं प्रकृतिमंडला
तीतं विष्णोः पदं गच्छति यातिः ॥ ३३ ॥ अपि च यः पुमान् गुणैरधिकः स्यात् तयाधिकस्तस्माद्दियं तस्य ज्ञापे पंचमी गुणाधिकं दृष्ट्वेत्यर्थः मुदं

यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन् देही तमसः पारमृच्छति ॥ ३३ ॥ गुणाधिकान्मुदं लिप्सेदनुक्रोशं गु
णाधमात् । मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥ ३४ ॥ ध्रुव उवाच ॥ सोयं शमो भगवता सुखदुःखहतात्मनां ॥ दर्शि
तः कृपया पुंसां दुर्दर्शोस्मद्विधैस्तु यः ॥ ३५ ॥ अथापि मेविनीतस्य क्षात्रं घोरमुपेयुषः ॥ सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृ
दि ॥ ३६ ॥

लिप्सेत लब्धुमिच्छेत् प्रीतिं कुर्यात् न त्वसूयामित्यर्थः ॥ गुणाधमात् गुणाधमं वीक्ष्य अनुक्रोशं कृपां लिप्सेन्न तु तिरस्कारं । समानान्मैत्री
मेव तु स्पर्द्धां स तापैराध्यात्मिकादितापैः नाभिभूयते तापत्रयाभिहतो न भवतीत्यर्थः ॥ ३४ ॥ एवं नारदेनोपदिष्टक्रमो ध्रुवः स्वमनीषितं वि
वोस्य मतिलदर्शनं तदुक्तिं चाभिवदन् प्रत्याह ॥ सोयमिति चतुर्भिः भगवता तया सुखदुःखाभ्यां हतः पराभूतं आत्मामनो येषां तेषां
पुंसामस्माकं सोयं शमः मनः प्रशमोपायः कृपया दर्शितः ज्ञापितः यो भगवांस्त्वमस्मद्विधैर्माहृशैर्दुर्दृशः द्रष्टुमशक्यः यद्वा यः श

कालिंद्याय मुनायाः शिवे मंगले सलिले निषेवणं स्नात्वा तान त्रवने आत्मनः स्वस्य उचितानि योग्यानि देवतानमस्कारादीनि कृत्वा कुशादिभिः स्वस्तिका
दिभिश्च कल्पितमासनं यस्य सः निविशान उपाविशन् त्रिवृता त्रयाणां रेचकपूरककुंभकानां वृत्तं वर्तनं यस्मिन् तेन प्राणायामेन त्रिवृता प्रणावे
न प्रसादानुसंधानपूर्वकमिति वार्थः प्राणानामिंद्रियाणां मनसश्च मलं चांचल्यं शनैर्व्युदस्य अपोह्य गुरुणा श्रेष्ठेन प्राणायामैर्निर्मलेनेत्यर्थः
मनसा गुरुं भगवंतं ध्यायेत ॥ अत्र उचितानि कृत्वेति यमनियमा उक्ताः कल्पितासन इत्यासनं मलं व्युदस्येति प्राणायामप्रत्याहारौ ध्यायेदिति ध्या

प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलम ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम ॥४४॥ प्र
सादाभिमुखं शश्वत्प्रसन्नवदनेक्षणम ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरम ॥४५॥ तरुणं र
मणीयांगमरुणोष्ठेक्षणाधरम ॥ प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम ॥४६॥ श्रीवत्सां
कं घनश्यामं पुरुषं वनमालिनम ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजम ॥४७॥

नं ॥ धारणाप्येवं चैवोक्ता धारणापूर्वकत्वाद्ध्यानस्य एवमष्टांगयुक्तो योगः उपदिष्टः ॥४४॥ ध्येयं गुरुं विशिनष्टि प्रसादेति शश्वत्सदा प्रसा
दे अनुग्रहे अभिमुखं प्रसन्ने वदनं ईक्षणे च यस्य तं शोभना नासिका यस्य शोभने भ्रुवौ यस्य चारू सुंदरौ कपोलौ यस्य सुंदरं देवेषु सुंदरं ॥
सुरेष्वपि सुंदरमिति वा ॥४५॥ तरुणं बालं रमणीयान्यंगानि यस्य तं अधरोष्ठे ईक्षणे अरुणे आश्रयणीयं नृम्णं सुखरूपं यद्वा नृम्णं धनं सर्व ॥४६॥
पुरुषार्थनिधिमित्यर्थः ॥ शरण्यं समीहितोपायत्वेनाध्यवसनीयं करुणानिधिम ॥४७॥

उक्तमेवाह ॥ नवेनाद्दत्यादिना विरक्तस्यैंद्रियरताविस्मंतेनेनत त्तावङ्गवानेवभक्त्याप्रसन्नोधर्मादिपुरुषार्थचतुष्टयप्रदस्ततस्तद्भक्तिरेवकार्येति
वरस्तदुपासनोपयुक्तं देशमाचारंयस्यभगवतोध्यानप्रकारंजप्यंमंत्रंभगवत्सपर्याप्रकारमाहारनियमंचकथयन्नेवमाराधितोभगवानेवत्व
त्समीहितमभिनिरवर्तयत्याह ॥ जनन्यामुनीत्याउक्तः यः पंथाउपायः सवैसएवतेनतवनिश्रेयसायनिश्रितंश्रेयः निश्रेयसंतस्मैभवतिज
नन्याभिहितोपायत्वदृष्टिप्रेतार्थसाधनमित्यर्थः कोसौजनन्याभिहितः पंथास्तत्राह ॥ भगवान्वासुदेवएव अतस्तत्स्रवणात्मनाभगवत्स

धर्मार्थकाममोक्षाख्यंयइच्छेच्छ्रेयआत्मनः ॥ एकंह्येवहरेस्तत्रकारणंपादसेवनम् ॥४१॥ तत्तातगच्छ
भद्रंतेयमुनायास्तटंशुचिः ॥ पुण्यंमधुवनंयत्रसानिध्यंनित्यदाहरेः ॥४२॥ स्नात्वानु
सवनंतस्मिन्कालिंद्याःसलिलेशिवे ॥ कृत्वोचितानिनिवसन् आत्मनस्सागुरुतणगुरुं ॥४३॥

वणचितेनतंभगवंतंभज ॥४१॥ वासुदेवएवइत्येतदेवप्रपंचयतिधर्मेत्यादि यः पुमान्धर्माद्यमतमंश्रेयः आत्मनः स्वस्यइच्छेत्तत्रहरे
पादसेवनमेवैकमेवकारणमुपायः ॥४२॥ तत्तस्माद्भगवत्पादसेवनस्यैवधर्मादिसाधनत्वात्हेतातयमुनायाः शुचिः शुद्धंतटंतीरंगच्छतेन
तवभद्रंमंगलमस्तुतटंविशिनष्टियत्रतटेपुण्यंपुण्यावहंमधुवनमस्तिकथंभूतंमधुवनंसर्वदाहरेर्भगवतः सानिध्यंसानिध्यवत्तत्तट
गतस्यभगवान्तटस्थितमधुवनेलक्षणावानतकथंभूतंमधुवनंयत्रमधुवनेहरेः सानिध्यमस्ति ॥४३॥

भा.स.

॥ ५७ ॥

त्वसमर्चनायपुरुषभक्तियोगमभिधायतदनुग्राहिकांद्रव्यमयींसपर्यामभिधास्यंस्तदुपयुक्तंजप्यमंत्रंसप्रभावमाह जप्यश्चेतिहेनृपात्मजपरमोनिरतिश
यः ॥ अंतरायगुह्योगोपनीयः मंत्रः सेमंत्रः श्रूयतां यंमंत्रंपुमान्सप्तरात्रंप्रपठन्जपन्खेचरान्पश्यति ॥ ५४ ॥ कोसौमनुरित्यतआह ॥ ॐ मितिओं
पंवासुदेवद्वादशाक्षरोमंत्रः अस्यार्थस्तुसंप्रदायतोवगंतव्यः एतन्मंत्रपूर्वकंद्रव्यमयीमर्चामाह ॥ मंत्रेणेति ॥ देवस्यअनेनमंत्रेणनानाविधैर्द्रव्यैः
द्रव्यमयींद्रव्यप्रचुरांसपर्यांदेसकालयोः सपर्योपयुक्तदेशकालयोर्विभागंवेत्तीतिदेशकालविभागवित्कुर्यात्सपर्योपयुक्तोदेशः चंडाल
पतितपवनाद्यसेवितः कालस्तुप्रातर्मध्यंदिनसायाह्नादिरूपः तदितरावनिपयुक्तौदेशकालौ ॥ ५५ ॥ द्रव्याण्याहसलिलैरितिशुचिभिर

मंत्रेणानेनदेवस्यकुर्याद्द्रव्यमयींबुधः ॥ सपर्यांविविधैर्द्रव्यैर्देशकालविभागवित् ॥ ५४ ॥ सलिलैः शुचिभिर्माल्यैर्वन्यैः पुष्प
फलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्याप्रिययाप्रभुं ॥ ५५ ॥ लब्ध्वाद्रव्यमयीमर्चांक्षित्यंब्वादिषुवार्चयेत् ॥ आभृतात्मामु
निः शांतोयतवाक्मितवन्यभुक् ॥ ५६ ॥ स्वेच्छावतारचरितैरचिंत्यनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तंध्यायेद्धृदयंगमं ॥ ५७

निसलिलादिभिः मर्व्यैः स्वेतिवन्यैः वनेषुभवैः शस्तांकुरांशुकैः प्रशस्तैर्दूर्वाद्यंकुरैः वल्कैरेवांशुकैः भूर्जत्वगादिभिः प्रिययाभगवतःप्री
तिविषयातुलस्याहरिंअर्चयेत् ॥ आराधयेत् ॥ ५६ ॥ एवंद्रव्यमयीअर्चांलब्ध्वसंपाद्यक्षित्यंब्वादिषुचक्राब्जमंडलादिभिरलंकृतायांक्षितौ
गंगायांजलादिषुआदिशब्दाद्विप्रादिषुअर्चयेत्पूजासाकुण्यहेतनाह ॥ साधीम्या ॥ आहृतात्मा आहृतचित्तः मुनिः ध्यानानुपयुक्तदशा
सुष्वाश्रयंसमीस्मनपरःशांतः जितेंद्रियः यतवाक् मितभाषणः मितंयथाभवतितथावन्यंभुंक्तइतितथा ॥ ५७ ॥

॥ ५७ ॥

श्रीवत्समंकेचिह्नंयस्यघनश्यामंनीलंवादूरश्यामंपुरुषंपुरुषलक्षणयुक्तंवनमालाअस्यास्तीतिवनमालीतंशंखादिभिर्व्यक्ताःशोभमानाश्चतुरोभु
जायस्यतं॥४६॥किरीटमस्यास्तीतितंकुंडलेस्तःअस्यइतितं॥केयूराभ्यांचयुक्तंकौस्तुभाख्यमाभरणंग्रीवायांयस्यतं।पीतंकौशेयंवासोवस्त्रंयस्य
तं॥४७॥कांचीकलापेनपर्यस्तंपर्यवेष्टितंलसत्॥कांचनेनूपुरेयस्यतम्॥अतिशयेनद्रष्टुंयोग्यंप्रशांतं॥अनुग्रध्यानात्नृणांमनसोनयनयोश्चव
र्द्धनंहर्षकरम्॥४८॥नखाग्राण्येवमणयस्तेषांश्रेणीपंक्तयोविलसद्भ्यांपद्भ्यांयुक्तम्॥समर्चतांहृत्पद्मकर्णिकाधिष्ण्यंमध्यस्थानंतदाक्रम्यअर्चतां२

किरीटिनंकुंडलिनंकेयूरवनमालिनं॥कौस्तुभाभरणग्रीवंपीतकौशेयवाससम्॥४८॥कांचीकलापपर्यस्तं
लसत्कांचननूपुरम्॥दर्शनीयतमंशांतंमनोनयनवर्द्धनम्॥४९॥पद्भ्यांनखमणिश्रेण्याविलसद्भ्यां
समर्चताम्॥हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्॥५०॥स्मयमानमभिध्यायेत्सानुरागावलोक
नम्॥नियतेनैकभूतेनमनसावरदर्षभम्॥५१॥एवंभगवतोरूपंसुभद्रंध्यायतोमनः॥निर्वृत्यापरयातूर्णंसंपन्नं
ननिवर्तते॥५२॥जपश्चपरमोगुह्यःश्रूयतांमेनृपात्मज॥यंसप्तरात्रंप्रपठन्पुमान्पश्यतिखेचरान्॥५३॥

आत्मनिस्थितंतम्॥५०॥स्मयमानमीषद्धसंतंअनुरागयुक्तोऽवलोकोयस्यपुरुषोत्तमंनियतेनविजातीयप्रत्ययरहितेनएकभूतेनएकाग्रेणमनसा
अभिध्यायेत्॥अभितःपादादिशिरःप्रभृतिध्यायेत॥५१॥एवंध्येयमाकारमभिधायेदृशशुभाश्रयध्यानसुखितंमनस्तत्क्षणान्ननिवर्त
येदित्याह॥एवमिति॥सुभद्रंनिरतिशयमंगलंगुणाकरंध्यानविषयंभगवतोरूपमभिध्यायेदितिशेषः।परयानिर्वृत्यानिरतिशयेनसुखेनसं
पन्नयुक्तंमनइतिशेषःतूर्णंननिवर्तते।यद्वापरयानिर्वृत्यासंपन्नंमनस्तूर्णंयथाननिवर्ततेतथाभगवतोरूपंध्यायेदितिक्रियाविशेषणत्वा

नाप्रीतिपूर्वमनुध्यानंभक्तिःतस्मिन्धीयतेइतिहिस्मृतिः॥अचिराद्विरक्तइतिविमोकोनामसाधनसम्पत्कंविवक्षितंभयमेतस्मिन्ज्ञानयोगशमदमवात्सल्यपौरुषम
मौनारप्यौविवक्षिताः एवंभूतेनभक्तियोगेनविमुक्तयेनंभगवंतमहात्मास्नाप्रजेत॥अदृश्येनेनसहहारकोपासनंव्याववर्णितं॥६३॥एवमुपदिष्टभगवद्दा
रोधनप्रकारोध्रुवोमधुवनंगतवानितिवदन्नन्तरान्नारदोराजानपारयोःसंवादमाह॥इतीत्यादिनाइत्युक्तौरीत्याःउक्तःनृपार्भकोध्रुवःतंनारदंपरिक्र
म्यप्रदक्षिणीकृत्यप्रणम्यचहरेर्भगवतश्चरणाभ्यांचर्चितंअतएवपुण्यंमधुवनंययौ॥६४॥तस्मिन्ध्रुवेतपोवनंगतेसतिमुनिर्नारदस्तत्पु
रंप्रविश्यराज्ञाउत्तानपादेनअर्घ्यार्हणेनसम्यक्तत्समर्पितमर्हणमर्घ्यादिकंयस्यसःसुखासीनःसुखावहेआसनेयथासुखमासीनोनारदउवा

तपोवनंगतेतस्मिन्प्रविष्टोऽन्तःपुरंमुनिः॥अर्हितोऽर्हणयाराज्ञासुखासीनउवाचह॥६३॥नारदउवाच॥राजन्किंध्यायसेदीर्घंमुखे
नपरिशुष्यता॥किंवानरिष्यतेकामोधर्मोवार्थेनसंयुतः॥६४॥राजोवाच॥सुतोमेबालकोब्रह्मन्स्त्रैणेनाकरुणात्मना॥निर
वासितःपंचवर्षःसहमात्रामहान्कविः॥६५॥अप्यनाथंवनेब्रह्मन्मास्मादन्त्यर्भकंवृकाः॥श्रान्तंशयानंक्षुधितंपरिम्लानमुखांबु

जं॥६६॥हेराजन्परिशुष्यतामुखेनदीर्घंकिंध्यायसेअर्थेनसंयुतःसहितःकामोधर्मश्चचशब्दोवाशब्दार्थःधर्मोवानरिष्यतिनश्यतीतिस
वितर्कप्रश्नःएवमुक्तोराजाहसुतइतिहेब्रह्मन्स्त्रैणेनस्त्रीषुभवःस्त्रैणःस्त्रीणांवशमितिवास्त्र्यधीनेस्त्रीनिर्जितेनेतियावत्॥अतएवाकरुण
रहितेनचित्तेनमयामेममसुतःसुतरसनेनअपरिमाज्ञतागम्यतेपंचवर्षइत्यनेननितरांमात्रासहनिर्वासितःतस्याअप्यनादृतत्वेननिर्वा
सितप्रायत्वान्मात्रासहेत्युक्तःतथाचभार्यापुत्रयोरपित्याज्यतास्मृता॥वृद्धौचमातापितरौसाध्वीभार्यासुतःशिशुः॥अप्यकार्यशतंकृत्वाभर्तव्या
मनुरब्रवीदितितनुतस्यजेदेकंकुलस्यार्थेइत्युक्तरीत्यासुतस्यपश्चात्सुतोपित्याज्यतावत्रआह॥महान्कविःमहान्विनयादिगुणसंपन्नःकविर्बु

लेख्यावतारचरितैः लेख्यैर्येवोपात्तावतारलीलाचरितैः आपारैः निजमायया आत्मीयसंकल्पेन उत्तमश्लोको भगवान् यत् अचिंतं कर्म वस्य देव
मनुष्यादिसजातियत्वेन चिंतयितुमशक्यं साधुपरित्राणदुष्कृतविनाशनादिकं करोतितं हृदयंगमं मनोहरं ध्यायेत तदानीमवतारप्राचुर्याभावाल्ल
क्षिप्यतीति भविष्यच्चिहृदिंश ॥५९॥ यावत्यो भगवतः परिचर्याः पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विवक्षितस्ताः सर्वा मंत्रहृदयेनैव द्वादशाक्ष
रमंत्रानुसंधानयुक्तमनसैव मंत्रः मूर्त्तिर्विग्रहो यस्य तस्मै भगवते प्रयुंज्यात् अनयुक्ताः कुर्यात ॥५८॥ एवमाराधितो भगवान् आराधकानां समीहितं

परिचर्या भगवतो यावत्यः पूर्वसेविताः ॥ ताः मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्त्तये ॥५८॥ एवं कायेन मनसा वचसा च म
नोगतम् ॥ परिचर्यमाणो भगवान्भक्तिमत्परिचर्यया ॥५९॥ पुंसाममायिनां सम्यग्भजतां भाववर्द्धनः ॥ श्रेयो दिश
त्यभिमतं तद्धर्मादिषु देहिनाम् ॥६०॥ विरक्तिश्चेंद्रियरतौ भक्तियोगेन भूयसा ॥ तं निरंतरभावेन भजेताद्धा विमुक्त
ये ॥६१॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ॥ ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥६२॥

धर्मादिश्रेयो दिशतीत्याह ॥ एवमिति द्वाभ्यां ॥ अमायिनां अवंचकानां अत एव सम्यक् भजतां कर्मायतने देहभृतां पुंसां भाववर्द्धनः समानकारी भ
गवान् भक्तिमतीया परिचर्यातया परिचर्यमाणः धर्मादिषु यद्दाराधकाभिमतं तत् श्रेयो दिशती समुभयोरन्वयः ॥६१॥ एवं धर्मादिसाधारणेन
तत्साधनभूता भक्तिरभिहिता न तु मुक्तिसाधनभूता यां भक्तिं विशेषं वृहन्नुपसंहरति विरक्त इति ॥ इंद्रियरतो इंद्रियसाध्यक्रीडायां विरक्तः
निरंतरभावेन विजातीयप्रत्ययांतराव्यवहितप्रत्ययेन भूयसा वक्ष्यमाणेन तु वर्त्तमानेन भक्तियोगेन प्रेमात्मकानुध्यानरू

मर्शी माश्रुमजगती पतिरत्रान्नपादः । राजलक्ष्मीमना हुम ध्रुवमेवात्मचिंतयन् ॥ ७१ ॥ ध्रुवो मधुवने किमकरोदित्यत्राह ॥ तत्रेत्यादिना ॥ अभिषिक्तः स्नातः य
मुनायामिति शेषः । यस्मां प्रयतः तपसे प्रयत्नवान् तां प्रथमां रात्रिं तत्र मधुवने उपोष्य विभावरीमिमं तमं योगे द्वितीयादिपंचमसतेरभुक्तार्थसाधारस्तु वन
मिति तत्र नवे निमग्रमीको आममाहितैर्ऋतः ऋष्यादेशेन उपदिष्टमार्गेण पुरुषं परमपुरुषं पर्यचरत् परिपूजितवान् ॥ ७२ ॥ तिसृणां रात्रीणां समाहार
स्त्रिरात्रं तस्यांते कपित्थानि बदराणि च फलानि अशनं यस्य सः आत्मनो देहस्य वृत्तिः स्थितिस्तदनुसारेण देहधारणमात्रोपयुक्ताहारेत्यर्थः हरिमर्चय

तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥ ७१ ॥ त्रिरात्रांते त्रिरात्रांते कपित्थबदरा
शनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन् हरिम् ॥ ७२ ॥ द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने ॥ तृणपर्णादि
भिः शीर्णैः कृतान्नोऽभ्यर्चयन् द्विजम् ॥ ७३ ॥ तृतीयं चानयन्मासं नवमे नवमेऽहनि ॥ अब्भक्ष उत्तमश्लोकमुपा
धावत्समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि ॥ वायुभक्षो जितश्वासो ध्यायन्देवमधारयत्
॥ ७५ ॥ पंचमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥

न् मासं निन्ये अतिचक्रमे ॥ ७२ ॥ अर्भको ध्रुवः तथा षष्ठे षष्ठे दिने जीर्णैस्तृणादिभिः कृतमन्नं येन स जीर्णतृणाद्यशनः विभुमभ्यर्चयन् द्वितीयं मासं निनि
न्ये इत्यनुषंगः ॥ ७३ ॥ नवमे नवमेऽहनि अब्भक्षोऽपएव भक्षयन् तृतीयं च मासं नयन् उत्तमश्लोकं भगवंतं समाधिना उपाधावत् आराधितवान् ॥ ७४
वायुभक्षः वायुमेव भक्षयन् चतुर्थमपि मासं नयन् जितश्वासः जितप्राणः देवं भगवंतं ध्यायन् आराधयत् धारणं कृतवान् प्रतिमासमहारसंकोचं
तयोतिरेकं च कृतवानित्यर्थः ॥ ७५ ॥ पंचमे मासि तनु प्राप्ते जितप्राणो राजसुतः ब्रह्म भगवंतं ध्यायन् एकेन पदा चरणेन स्थाणुरिव निश्चलो भवता

हे ब्रह्मन्‌ वने क्षुधितं श्रांतं ममता वपतितः परिम्लानं मुखांबुजं यस्य तं एव शयानमर्भकं अनाथं रक्षकहीनं मा मास्मा हेत्यपि मा स्म हं इति किं स्विदित्यर्थः
॥ ६५ ॥ आत्मानं निंदति ॥ अहो इति ॥ स्त्रियाजितस्य मे मम दौरात्म्यं अवधारय निश्चिनु अहो बतेति खेदे दौरात्म्यं दर्शयति योऽहमसत्तमः ॥ अंकमारु
रुक्षंतं आरोढुमिच्छंतं सुतं प्रेम्णा नाभिनंदितवानस्मि ॥ ६६ ॥ एवमुक्तो नारदस्तमाश्वासयन्नाह मेति ॥ हे विशांपते दिक्पते देवगुप्तं इति हे तु गर्भे हे
वेन ईश्वरेण गुप्तत्वान्‌ रक्षितत्वात्‌ तनयं प्रति तस्य तनयस्य प्रभावमविज्ञायेत्यनेनाकांतस्य वीप्सोपसर्गेण समासे कोत्स्ववाहे शोच पश्चात्तस्य

अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ॥ योंऽकं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ॥ ६७ ॥ नारद उवाच ॥ मा मा
शुचः स्वतनयं देवगुप्तं विशांपते ॥ तत्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत्‌ ॥ ६८ ॥ सुदुष्करं कर्म कृत्वा लोक
पालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन्‌ यशो विपुलयंस्तव ॥ ६९ ॥ मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य ज
गतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत्‌ ॥ ७० ॥ छ छ छ

मासः ॥ अतोऽन्वत्‌ पूर्वं इति तत्त्वत्‌ निषेधः मा मा शुचः मा शुचस्वेत्यर्थः ॥ वीप्सा तात्पर्येण माङो द्विरुक्तस्य प्रयोगः प्रभावमेव विवृणोति प्रावृंक्त
इति यस्य दैत्यश्लोकेन यत्न यस्य तव पुत्रस्य यशः जगत्‌ आवृंक्ते व्याप्नोति ॥ ६८ ॥ प्रभुर्जितेंद्रियो ध्रुवः लोकपालैरिंद्रादिभिरपि सुदुष्करं कर्तुमश
क्यं कर्म तपसा भगवत्तोषणपूर्वकं सर्वोत्कृष्टपदसंपादनरूपं कर्म कृत्वा अतएव तव यशो विपुलयन्‌ विस्तारयन्‌ हे राजन्‌ अपि च अचिरतः आशु
एव आगमिष्यति ॥ ६९ ॥ एवं नारदेनाभाषितो राजा पुत्रमेवानुचिंतयन्नासीदित्याह ॥ मैत्रेय इतीति ॥ इत्येवं देवर्षिणा नारदेन प्रोक्तं विश्रुत्य सवि

भा॰ह॰

॥ ६० ॥

ता अधिष्ठितानरीन्दैर्यथापदे पदे प्रतिपदं सक्षेनरतः सच्यतोवा मतश्चनमतितद्वत् ॥ ८० ॥ किंचतस्मिन्नात्मनः स्वस्य विश्वद्वारं सर्वाणीन्द्रियाणि द्वारभा॰
दः श्रोत्रादीन्द्रियपरः ॥ असुं प्राणं च निरुध्य अनन्यया विषयांतररहितया धिया ध्यायति सतिभगवंतं मितिशेषः ॥ यद्वा ॥ विश्वशब्दो भगवन्नत्
परः विश्वोर्णमसहस्तमित्युपक्रम्य विश्व विस्पुरित्युक्तत्वात् विश्वात्मकत्वाद्वा विश्वो विष्णुः लोकाईद्रादिः सहिताभर्णानितरां निरुच्छ्वासेन उ
च्छ्वासाभावेन निपीडिताः हरिं शरणं ययुः प्रापुः ॥ ८१ ॥ शरणप्राप्तिमेव प्रपंचयति ॥ नैवमिति ॥ हे भगवन् चराचरस्य एवंविधं प्राणनिरोधं न

हे ब॒ऊ॒चुः॥ नैवं विदामो भगवन्प्राणरोधं चराचरस्याखिलसत्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं प्रा
प्ता वयं त्वां शरणं शरण्यम् ॥ ८१ ॥ श्रीभगवानुवाच ॥ माभैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रति
यात स्वधाम ॥ यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ ९

विदामः कदाचिदपि न जानीमः अचरग्रहणं दृष्टांतार्थं तेषां मुच्छ्वासनिरुच्छ्वासयोरभावात् यथा अचरस्य उच्छ्वासादि नास्ति तथा चरस्या
पि प्राप्तमिति न न तस्मात् ॥ अखिलसत्वधाम्नः चिदचिच्छरीरकस्य तव नः संबंधिनां अस्माकं वृजिनात् प्राणनिरोधरूपात् दुःखात् विमो
क्षं विधेहि कुरु वयं शरणं समीहितसाधनत्वेनाध्यवसनीयं त्वां शरणं उपायं प्राप्ताः उपायत्वेनाध्यवस्यामइत्यर्थः ॥ ८२ ॥

॥ ६० ॥

भूतेंद्रियाशयं भूतानि भूतसूक्ष्माणि शब्दादीनि तद्ग्राहकाणींद्रियाणि श्रोत्रादीनि शब्दादिविषयश्रवणानींद्रियाणीत्यर्थः तानि आशेरते यस्मिन् शयनम
न्तर्निरोधात् ॥ अव्यापारितश्रोत्रादींद्रियवन्मनः संकल्पविकल्पादेवाकल्पनिकल्पादेवाकल्पनिवर्त्य हृदि हृदयपुंडरीके भगवतो रूपं दिव्यवि
ग्रहं ध्यायन् भगवतो रूपादपरमन्यन्नाद्राक्षीत् नापश्यत् ॥ अन्यन्नाद्राक्षीदित्यनेन ध्यानविजातीयप्रत्ययांतराव्यवहितत्वकथनेन ध्यानस्य प
रिनिष्पत्ति ॥ नन्वेवं फलावाप्तिहितपूर्वदेशानुक्ता ॥ ७८ ॥ तामेव प्रपंचयिष्यन् तावत्तत्प्रभावमाह ॥ आधारमिति त्रिभिः महदादीनां पृथिव्यंतानां तत्त्वसं
स्थानां चेतनानां च आधारं धारकं अनेन स्थूलचिदचिच्छरीरकत्वमुक्तं सूक्ष्मचिदचिच्छरीरकत्वमाह ॥ प्रधानपुरुषेश्वरं प्रधानं सूक्ष्माचि

आधारं महदादीनां प्रधानपुरुषेश्वरम् ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिरे ॥ ७८ ॥ यदैकपादेन स पार्थिवार्भकः
तस्थौ तदंगुष्ठनिपीडिता मही ॥ ननाम यत्रेदमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥ ७९ ॥ तस्मिन्नभिध्यायति वि
श्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८०

तत्त्वं पुरुषास्तु शब्दात् क्षेत्रज्ञाः तेषामीश्वरं अंतः प्रविश्य नियंतारं अंतः प्रविष्टः शास्तेति श्रुतेः ॥ अनेन यन्महदादीनां धारकत्वमुक्तं तदंतः
प्रविश्य नियमनेनैवेति विशेषितं एवंभूतं भगवंतं ब्रह्म धारयमाणस्य सतः तस्य तेजः सोढुं अशक्नुवंतस्त्रयो लोकाः चकंपिरे कंपि
ताः ॥ ७९ ॥ स पार्थिवार्भको ध्रुवः एकेन पादेन तस्थौ तस्य तदंगुष्ठेनापीडिता नितरां पीडिता आक्रांता सती मही भूमिः ॥ अर्द्धं ननाम प्र
ह्वीबभूव अर्द्धं शब्दस्यात्र समांशवाचित्वाभावेपि विधेयनमनक्रियाविशेषणत्वाभिप्रायेण क्लीबत्वनिर्देशः ॥ इभेंद्रेण गजश्रेष्ठेन निविष्टि

स वै ध्रुवः योगविपाकतीव्रया योगस्य ध्यानयोगस्य विपाकः अपरोक्षप्रीतिरूपत्वादिविशेषणविशिष्टत्वं तेन तीव्रया विजानीयप्रसर्यां तराया बहि
तया धिया प्रथमं हृत्पद्मकोशे स्फुरितं सा त्वा त्कृतं ततः सहसैव आस्वेव तिरोहितं ततः पुनः बहिःस्थितं तडित्प्रभं अंतराविर्भूतं सहसा तिरोधा
नेन तडित्साम्यमभिप्रेत्य तडित्प्रभमित्युक्तं तदवस्थं यादृगंतरस्फुरता दृष्टा मुपलक्ष्य प्रमभिज्ञाय ददर्श साक्षात्कृतवान् ॥ २ ॥ तस्य भगवतो दर्शनेन आ
गतसाध्वसः जातसंभ्रमः अर्भकः ध्रुवः अंगं शरीरं क्षितौ भूमौ दंडवद्विनमय्य नतहेत्वा अवंदत नमस्कृतवान् संभ्रममेवाह दृग्भ्यां पिबन्निव

स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् ॥ तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदव
स्थं ददर्श ॥ १ ॥ तद्दर्शनेनागतसाध्वसः क्षिताववंदतांगं विनमय्य दंडवत् ॥ दृग्भ्यां प्रपश्यन्प्रपिब
न्निवार्भकः चुंबन्निवास्येन भुजैरिवाश्लिषन् ॥ ३ ॥ स तं विवक्षंतमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च
हृद्यवस्थितः ॥ कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले ॥ ४ ॥

दृग्भ्यां प्रपश्यन्निव अवंदत भुजाभ्यां आश्लिषन्नालिंगन्निवावंदत भुजैरिति बहुवचनमार्षं ॥ ४ ॥ तं ध्रुवं विवक्षंतं गुणान्वक्तुमिच्छंतं नुत
यन निमर्थः पुनरतद्विदं स्तोतुमजानंतं अस्य ध्रुवस्य सर्वस्य लोकस्य च हरिहृदये अवस्थितः हेतुगर्भमिदं हृदि अवस्थितत्वात् ज्ञात्वा
सहरिः ब्रह्ममयेन ब्रह्म प्रणवः वेदो वा तन्मयेन तस्य चुरेण ध्वनेः प्रणवाद्यनुकारित्वाद्ब्रह्ममयेनेत्युक्तं कंबुना शंखेन कपोले गंडे बालं ध्रुवं कृप

भगवान्समाधेस्ते इति । मा भैष्ट भयं मा कुरुत तत्तपसो दुरत्ययं ॥ अनुष्ठं भवेत्तं बालं निवर्तयिष्ये निष्पादयिष्यामि समीहितेन संयोजयामीत्यर्थः । अतो यूयं
स्वधाम स्वस्थानं प्रतियात गच्छत को सौ बालः कथं चैकस्मात्प्राणनिरोधात् विश्वस्य प्राणनिरोधात् इत्यत आह । यतो यदीयप्राणनिरोधा
द्देवाः युष्माकं प्राणनिरोध आसीत् ॥ असौ उत्तानपादि । उत्तानपादस्य पुत्रो बालो ध्रुवमपि विश्वप्राणे प्राणानन्तहेतुभूते मयि कोह्येवात्मालक्ष
प्राणाद्यैक्य आकाश आनंदैनस्मात् । यस्मात्तादृपरीत्वा दृश्यमय आत्मा सर्वान्तरस्तन्मेवाच ह्वेतिय प्राणेन प्राणिति स न आत्मा सर्वान्त
रः योपातेन यानि निमित्तवानात्मा सर्वान्तर इति श्रुतेः संगतं आत्मान्तःकरणं यस्य यस्य सोभूत्तत्वप्राणनिरोधेनोच्छ्वासनिश्वासयोरपहृतम

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे अष्टमोध्यायः ॥ ८ ॥ श्रीमैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृ
तावनामाः प्रययुस्त्रिविष्टपम् । सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥ ध्रु

त्वाविश्वप्राणे प्राणनहेतुभूते मम मनेतेन निरुद्धत्वात्सर्वप्राणनिरोधो भूदिति भावः ॥ ८१ ॥ इति श्रीचतुर्थे अष्टमः ॥ ८ ॥ एवं भगवतो देवेषु देवे
पुत्रवधा भगवत्तेषु भगवान् भक्तानुजिघृक्षया ध्रुवेण प्राप्तस्तिष्ठन् तं समीहितेन संयोजयत्स्वधामागात् । तथापि ध्रुवोपि संसाधितसमीहितः
स्वधाम जगामेत्याह नवमेन मुनिः । एवं भगवद्वाक्येन उत्सन्नभया देवा उरुक्रमे भगवति विषये कृतनमः कृतः प्रणामो यैस्ते त्रि
विष्टपं सुरलोकं ययुः जग्मुः ततः सहस्रशीर्षा भगवानपि भृत्यदिदृक्षया भृत्यदर्शनेच्छया मधोर्वनं गरुत्मता वाहनभूतेन सह गतः

अखिलशक्तिधरः अघटितघटनादिसर्वशक्तेस्तवेदमुपपन्नमिति भावः तथा स्वधाम्नः स्वधामभूतान् शरीरभूतानिति यावत् ॥ तृतीयांतपाठे धाम्ना
स्वकीयसंकल्परूपेण ज्ञानेनेत्यर्थः प्रविश्येत्यन्वयः हस्तचरणश्रवणत्वगादीन् हस्तचरणपायूपस्थयोः कर्मेंद्रियोपलक्षणम् श्रवणत्वग्ग्रहण
मवशिष्टज्ञानेंद्रियाणां ॥ आदिशब्देनांतःकरणचतुष्टयाधिष्ठातृदेवताः संग्रहः असान् प्राणान् इंद्रियाणि संजीवयन्निति तस्मै भगवते पूर्णषाड्गु
ण्यपूर्त्तये पुरुषाय पुरुषांतर्यामिणे अनेन जीवांतर्यामित्वमुक्तं पूर्वमपि चिदंतर्यामित्वकथनात् तुभ्यं नमः कृत्स्नचिदचिदंतरात्मत्वेन ज्ञानप्रदत्वं
त्वय्येवोपपन्नमिति भावः ॥६॥ ननु तत्सृष्ट्वा तदेवानुप्राविशत् ॥ अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति जगत्स्रष्टुरेवानुप्रवे

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ॥ सृष्ट्वानु
विश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥७॥ ७

शश्रवणात्तन्नाहं चिदचिदात्मकमेतज्जगत्स्रष्टापि त्वमेवेत्याह ॥ एक इति हे भगवन् इदं परिदृश्यमानं महदादि समष्टिव्यष्ट्यात्मकमशेषं सर्वं ज
गत् उरुगुणया विविधपरिणामजननसमर्थसत्त्वादिगुणया आत्मशक्त्यात्मनः स्वस्य संबंधिन्या शक्त्या कार्योपयोगपृथक्सिद्धविशेषणभूतया मा
माया ख्यया प्रकृत्या सृष्ट्वा सदसत्सु गुणेषु कार्यकारणभूतेषु सत्त्वादिगुणमयपदार्थेषु पुरुषो जीवशरीरकः अनुप्रविश्य त्वमेक एव सन् दारुषु
ह्रस्वदीर्घवक्रऋजुवक्रादिभेदभिन्नेषु दारुषु विभावसुवदग्निवन्नानेव बहुधेव विभासि अत्र विभावसुदृष्टांतेन स्वशरीरभूतचिदचिद्गत
गुणास्पर्शो विवक्षितः इवशब्देन वस्तुन एकत्वं देवमनुष्यादिशरीरसंसृष्टजीवांतरात्मत्वकृतं बहुत्वमपि विवक्षितम् ॥७॥

सवै ध्रुवः दैवीं देवस्य संवेधिनीं देवेन भगवता विभाविता मिमर्श ॥ तां वेदार्थप्रचुरां गिरं वाचं नं देवस्य श्रेयो ऽनन्तरकालमेव प्रतिपद्य लब्धापरितः ज्ञातः
कालेनं न विदितः परात्मनो जीवात्मनोः निर्णयो याथात्म्यं ॥ येन अत एव भक्तिभावः भक्त्यात्मको भावो ऽभिप्रायो यस्य ध्रुवा स्थिरा शाश्वतीं
क्षितिः स्थानं यस्य ॥ अयं भावी निर्देशः ॥ असत्वरः त्वरारहितः परिष्टुतं सर्वतो विख्यातं उरु निरवधिकं श्रवः कीर्तिर्यस्य तं भगवंतं अभ्यगृणात्
अस्तौषीत ॥ ५ ॥ तत्र स्वकीयवागादीन्द्रियसंजीवयितृत्वेन स्वानुभवसिद्धेन ज्ञानंप्रदं चिद्रूपचिच्छरीरं निखिलजगदेककारणं निरस्तनिखिलहे
यगंधं मुमुक्षुपाय्यत्वमुक्तिप्रदत्वाश्रितदुरितौघनिवर्तकत्वनिरतिशयः शः संपन्नत्वनिरतिशयानंदत्वाद्यपरिमितोदारगुणसागरत्वेन भग

सवै तदेव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ॥ तं भक्तिभावो ऽभ्यगृणादसत्वरं परिश्रु
तोरुश्रवसं ध्रुवक्षितिः ॥ ५ ॥ ध्रुव उवाच ॥ योंतः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिल
शक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन्प्राणान्नमो भगवते पुरुषाय तुभ्यं ॥ ६ ॥

वंतं पंचभिः प्रस्तुमतस्मिन्स्वमनः प्रावण्यमेकेन संप्रार्थ्य तस्य द्वारविरोध्यानासक्तचित्तस्य देहतदनुबंधिहेतुकसुखदुःखाद्यननुभूतिमेकेना
भिध्याय ततः साधुपरित्राणाय स्वेच्छया नानाकृतमंगलविग्रहं परत्वेन शंकिता ब्रह्मादिदेवतानामपि कारणभूतस्यावतारेण साक्षाज्जगदवि
तारं त्रिभिः प्रस्तुमेकेन तं शरणमागमपुरुषार्थमर्थ्य तस्य भक्तानाशिषां समन्तावहन् निरतिशयवात्सल्यमेकेन स्तौतीत्यद्वतिद्वादशभिः त
त्र तावत् वागादीन्द्रियसंजीवयितृत्वेन स्वस्य निर्दिशितेन ज्ञानप्रदत्वं निश्चित्य नमस्करोति ॥ य इति ॥ यो भगवान्प्रसुप्तां स्वकार्याक्षमामपि मां स्तो
तुं प्रवृत्तो मे स्तोतुकामस्य मम वाचं वागिंद्रियं मनः प्रविश्य संकल्परूपो ज्ञानेन तत्रानुप्रवेशनं च ते पूर्वमेव प्रविष्टत्वात् ॥ संजीवयति ॥ तत्र हेतुः

नहीषिनवेद्मीति न किंतु त्वत्प्रसादे स्मेवेत्यर्थः परं रूपं विशिनष्टि यत्र यद्विषये वा रः । प्राकृतत्वं वा रः अववर्त्तत इत्यर्थः ॥ यद्वा अवेद्मीतिच्छेदः
अवेद्मीत्यकारो निपातो नञ्पर्यायः ततश्च अतः स्थविराद्रूपात्परं विलक्षणं नभतसंस्थानो देहो यस्य परमात्मन इत्युक्ता प्राकृतादवि
ग्रहात्मकं रूपं ततः परं दिव्यात्मस्वरूपमसत्यं ज्ञानमनंतमित्युक्तविधं अवेद्मीति न वेद्मीति न किंतु त्वत्प्रसादाज्ज्ञानाद्वेद्मीत्यर्थः रूपं स्वरूपं वोध
यन्विशिनष्टि यत्र वा रइति । यत्र स्वरूपे च वा रः देवतिर्यङ्मनुष्यादिजातीयत्वं वा रः ॥ निर्विशेषत्वं वा रश्च अववर्त्तत इत्यर्थः यत्र र

कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके ॥ यन्ना
भिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोस्मि तस्मै ॥ १४ ॥

वा रः ॥ शारं व्यापारो नास्ति न द्रष्टत्स्वरूपं च न वेद्मीति आख्यानं त्वमुक्तं सर्वं वेदायत्सदमामनंति शास्त्रयोनित्वात् वचसां वाच्यमुत्तमम् । नता
स्मि यत्र वचसां प्रतिष्ठा यत्र शाश्वती वेदैश्च सर्वैरहमेव वेद्य इत्यादि श्रुतिस्मृतिभिः शास्त्रैकवेद्यत्वाभिधानात् ॥ १३ ॥ किं च यः पुमा
न्चेतनश्चिदचिदात्मकं जगत् कल्पांते प्रलये जठरेण गृह्णन् कुक्षौ निवेश्येत्यर्थः स्वस्मिन्नहकयस्य स्वानुभवैकशील इत्यर्थः अनंतसुखः शेषसहा
यः तदंके अनंतभोगे शेते योगनिद्रारूढो भवति । यस्य पुंसो नाभिरेव सिंधुस्तस्मिन् कुमुद्वतं कांचनमयं लोकात्मकं ॥ पद्मं तस्य गर्भकर्णिका
यां द्युमान्तेजस्वी ब्रह्मा भवति तस्मै भगवते तुभ्यं प्रणतोस्मि ॥ १४ ॥

वेकेवलंत्वत्संगेतैः कथाश्रवणाद्यापवर्गिकसुखसाधनत्वमेव किंतु जीवद्दशायामपि देहतदनुबंधिनिमित्तसुखदुःखाद्यहेतुत्वमपीत्याह ॥ नद्यति
हे ईश मत्प्रेमरयाशीलमपि अतितरां प्रियं शरीरं ये च अनुमर्त्यमनुसृत्य गच्छंति वर्त्तते इत्यनुगाः सुतादयः तांश्च ते जनाः न स्मरंति न विद्दसंत इत्यर्थः
केन इत्यत्राह ॥ हे अब्जनाभ ये जनाः भवदीयपदारविंदयोः यः सौगंध्यं तेन तस्मिन् वा लुब्धं हृदयं येषां तेषु भागवतेषु कृतः प्रसंगो यैस्ते इत्यर्थः ॥१२
अत्र नाभेत्यनेन विरतिशायसौगंध्यवद्दिव्यमंगलविग्रहवैशिष्ट्यमुक्तं महदाद्यशेषं सृष्ट्वानुप्रविष्टपुरुष इत्यनेन प्रकृतिप्राकृतपुरुषशरीरक
त्वं च ॥ वं स्थूलसूक्ष्मशरीरद्वयमुक्तं अनंतेत्यनेन सत्यज्ञानानंतलक्षणादिव्यात्मस्वरूपं ॥ तत्त्रितयमेव यथावद्विवेचयन् शरणं व्रजतीति तिर्यग्मि

तेन स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविंद
सौगंध्यलुब्धहृदयेषु कृतप्रसंगाः ॥१२॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं
सदसद्विशेषम् ॥ रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥१३॥

मादिभिश्चतुर्भिः तत्राद्येनास्य तद्रूपं प्रपंचयति ॥ तिर्यगिति ॥ हे परम स्थूलसूक्ष्मरूपाभ्यां विलक्षणानिःसमाभ्यधिक अतएवाजस्थूलरूपगतोत्पत्ति
विनाशरहितः नगाः स्थावराः तिर्यञ्चश्चराणामप्युपलक्षणं तिर्यंचः पशुमृगादयः द्विजाः अंडजाः ॥ एषां तिर्यक्त्वादेव संग्रहे सिद्धे गोबलीवर्दन्यायेन पृथ
ग्ग्रहणं एवं सरीसृपग्रहणं च ॥ आदिशब्देन खेचरजोद्भिज्जसंग्रहः तिर्यगादिभिः परिचितं परितो व्याप्तं सदसत् चिदचिदात्मकं विशेषं विशेषाः पृ
थिवी सोऽस्यास्तीति विशेषं अर्श आदेराकृतिगणत्वादच् विशेषपर्यंतमित्यर्थः महदादि महान् आदिर्यस्य अनेकं विविधविचित्रसंनिवे
शं ॥ स्थविष्ठं स्थूलतरं ब्रह्मांडात्मकं तेन तव रूपं वेद्मि त्वच्छरीरत्वेन वेद्मीत्यर्थः स्थूलरूपात्परं विलक्षणं यद्दिव्यमंगलविग्रहात्मकं सूक्ष्मं रूपं

ते शांताः शमदमादियुक्ताः समदृशः देहात्मेश्वराणां प्रकृतिपरिणामरूपत्वान्नैकाकारत्वं सर्वत्र तत्त्वादिरूपसमदर्शिनः अतएव सर्वभूतानि यथायोग्यं दानमानादिभिरनुरंजयंति प्रीतिं कुर्वंतीति सर्वभूतानुरंजनाः सिद्धप्राया न तु नितरां सिद्धाः तेषामर्चिरादिगत्या ब्रह्मलोकप्राप्तेः अंजसा सुखेन यांति तत्सदृशध्रुवगादिति पूर्वेणान्वयः ॥ अयमर्थः शमदमादिभिः सर्वभूतसुहृत्त्वादिभिश्च परब्रह्मोपासननिष्ठा अपि केचित्सार्वभौमपदभुक्त्वा शाब्दान्तरायविहताः समस्तलोकवद्ध्रुवलोकं गतास्तत्र तत्सभोगोत्तरं परिपूर्णयोगमुच्यंत इति ॥३६॥ कइत्युक्तप्रकारेण कृष्णभ

शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ॥३६॥ इ
त्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणांलोकानांचूडामणिरिवामलः ॥३७॥
गंभीरवेगोनिमिषंज्योतिषांचक्रमाहितं ॥ यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ॥३८॥
महिमानंविलोक्यास्यनारदोभगवानृषिः ॥ आतोद्यंवितुदन्श्लोकान्सत्रेगायत्प्रचेतसां ॥३९॥

गवान् परमयत्नं प्राप्यं प्राप्य कमाधारस्त्रयस्य स ध्रुवस्त्रयाणां लोकानाममलश्चूडामणिः शिखामणिरिवाभूत् अमल इति दृष्टांतदार्ष्टांतिकयोरुभयोरपि विशेषणम् ॥३७॥ हे कौरव्य विदुर मेढ्यां धान्याक्रमणाय बलीवर्दबंधनस्तंभविशेषे गंभीरवेगो गवां गणः बलीवर्दसमूह इव ज्योतिषां सर्वादि ज्योतिषां चक्रं यस्मिन् ध्रुव आहितं सत् अनिशं भ्रमति ॥३८॥ अस्य ध्रुवस्य महिमानं विलोक्य भगवान्नारदो ऋषिः ॥ आतोद्यं वीणां वितुदन्वादयन् प्रचेतसां सत्रे भगवन्माहात्म्यप्रसंगेन श्लोकान् ध्रुवस्य महिमप्रतिपादनपरान् त्रीन् श्लोकानगायत् ॥३९॥

इत्येवं भूतस्य ध्रुवस्य व्यवसितम् अभिप्रायं व्यवसायं ज्ञात्वा सुरोत्तमौ सुनंदनंदौ देवयानेन देवप्रवरोपस्थापितेन विमानेन गच्छंतीं देवीं सुनीतिं दर्शयामासतुः ॥ ३२ ॥ तत्र तत्र पथि विमानारूढैर्देवैः प्रशंसद्भिः कुसुमवृष्टिभिरवकीर्यमाणो ग्रहान् आदित्यादिस्थानानि क्रमशो दृष्टवान् ॥ ३३ ॥
देवयानेन सुनंदनंदनाख्य देवप्रवरोपस्थापितविमानेन त्रिलोकं मुनीन् सप्तर्षीन् अप्यतिव्रज्यातिक्रम्य ततः परस्तात् यद्विष्णोः परं न ध्रुवाश्रयस्थानं गतिर्यस्य सः ध्रुवः आकल्पस्थायपि विष्णुगतेर्ध्रुवत्वं अभ्यगात् प्राप्तवान् विष्णोः परं विशिनष्टि । यदिति ॥ स्वरुचैव यत् भ्राजमानम् अनु तस्य

इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ ॥ दर्शयामासतुर्देवीं पुरो यानेन गच्छतीम् ॥ ३२ ॥ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः ॥ अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥ ३३ ॥ त्रिलोकीं देवयानेन सोतिव्रज्य मुनीनपि । परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात् ॥ ३४ ॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्राजंत एते । यन्नाव्रजन् जंतुषु येननुग्रहा व्रजंति भद्राणि चरंति येनिशम् ॥ ३५ ॥ ध्रु ॥ १२ ॥

तस्य रुचा एते त्रयो लोका भ्राजंते यत् जंतुषु भूतेषु ये अननुग्रहा निरनुग्रहाः निष्कृपास्ते नाव्रजन् न गतवंतः ये च जंतुषु भद्राणि सुहृत्त्वादीनि अनिशं चरंति कुर्वंति ते व्रजंति ते व्रजंति तत्परमं धामगा इति पूर्वेण संबंधः ध्रुवस्यानंतं प्राप्तानामपि सप्तलोकगतानामिव प्रायेण पुनरावृत्तसंभावा-
तत्कस्यां तेमोक्ष्यमाणत्वाद्यन्तमुहत्त्वादीनामेव मुक्तिहेतुत्वाच्चैवमुक्तम् ॥ ३५ ॥ किं च परमच्युत परमच्युतप्रियो येषां भागवतानां ते बांधवा येषां

धन्यं धनेछया श्रएवतां श्रावयतां च धनसंपादकम् ॥ तथा यशस्यं यशस्करं आयुष्कारं स्वस्त्ययनं मंगलकरं स्वर्गसंपादकं ध्रौव्यं ध्रुवस्थानप्रापकं सौ
मनस्यं मनःपीडाविनाशकं प्रशस्यं प्रशस्त्यसंपादकं अघमर्षणं पापनिरासकम् ॥४४॥ एतद् अच्युतप्रियस्य ध्रुवस्य चेष्टितं अभीक्ष्णं पौनःपुण्ये
न श्रद्धया श्रुत्वा यो वर्त्तते तस्य भगवति भक्तिर्भवति ॥ भक्तिफलमाह ॥ यया भक्त्या क्लेशानामाध्यात्मिकादीनां संक्षयो भवति ॥४५॥ महत्त्वं सर्वोत्कृष्ट
त्वं इछतां कामयमानानां तीर्थं महत्त्वप्राप्त्युपायः ॥ भवेदिति अनुषंगः तथा श्रोतुः शीलादयो गुणाः भवेयुरिति अनुषक्तस्य वचनविपरिणामेनान्व

धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ॥ स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥४४॥
श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं ॥ भवेद्भक्तिर्भगवति यया स्यात् क्लेशसंक्षयः ॥४५॥
महत्त्वमिछतां तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिछूनां मानो यत्र मनस्विनाम् ॥४६॥
प्रयतः कीर्त्तयेत्प्रातः समवाये द्विजन्मनां ॥ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥४७॥

यः यत्र यस्मिन् ध्रुवचरिते श्रूयमाणे इति शेषः तदिछूनां तेजइछूनां तेजो भवेत् तेजस्वी विधेयते न वुद्धिस्थत्वोसन्निहितत्वात् प्रक्रान्तता
तच्छब्देन परामर्षो हृद्देश्यविधेयत्वोपपत्तिः ॥ तथा यत्र यस्मिन् चरिते मनस्विनां प्रशंसायां नित्ययोगे वा मत्वर्थीयोस्माया मेधास्रजो विनि
रिति विनिः प्रत्ययः मनः प्रशस्तं भगवति मनसो नित्ययोगं वेछतां मनः प्रशस्तं नित्ययुक्तं वा मनो भवेदित्यर्थः ॥४६॥ अर्थं सामर्थ्यात् प्रातः
सायं च सायंकाले च प्रयतः मनःप्रणिधानयुक्तः द्विजन्मनां ब्राह्मणानां समवाये सभायां पुण्यश्लोकस्य ध्रुवस्य महत्समीहितस्य साधनं चरि
तं कीर्त्तयेत् ॥४७॥

न्योकानेवाह । नन्वित्यादि । पतिदेवतायाः सुनीतेः सुतस्य ध्रुवस्य यत्तपः प्रभावस्तस्य फलभूतां गतिं अभ्युपायान् गतिसाधनभूतान् भगवदा
राधनरूपानुपायानपिह ष्ट्वा वेदवादिनोपि ऋषयोपि अधिगंतु प्राप्तुं नैव प्रभवंति न समर्था भवंति किं पुनर्नृपाः नृपान प्रभवंतीति किमुव
क्तव्यमित्यर्थः ॥ ४० ॥ सुहृदाराः पितृपत्नी सुरुचिस्तस्या वाच वाणास्तैर्भिन्नेनात एव दूयमानात् खिन्नेन हृदयेन यो ध्रुवः पंचवर्ष एव वनं प्रतिगतस्त
त्रापि मदाज्ञावर्त्ती अजितमपि विभुं भगवंतं गुणैर्भगवद्भक्तानां गुणैर्भूतमैत्र्यादिभिः पराजितं वशंगतं अहं भक्तपराधीनो ह्यस्वतंत्र इतिभ

नारद उवाच ॥ सुनीतेः पतिदेवतायास्तपःप्रभावस्य सुतस्य तां गतिं । दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः ॥
४० ॥ यः पंचवर्षो गुरुदारवाक्छरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकरोजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम् । ४१
यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदम् ॥ ४२ । मैत्रेय
उवाच ॥ एतत्तेभिहितं सर्वं यत्पृष्टोहमिह त्वया ॥ ध्रुवस्योद्दामयशसः चरितं संमतं सताम् ॥ ४३ ॥ छ ॥ छ ॥ छ

गवदुक्तैः भक्तपराधीनमित्यर्थः जिगाय वशीकृतवान् ॥ ४१ ॥ तस्य ध्रुवस्य अधिरूढं प्राप्तं पदमित्यर्थः पदस्थानं यो भुवि क्षत्रबंधुः क्षत्रियाभा
सः वर्षसमूहैरपि अधिरोढुमिच्छेदपि किं तत्संकल्पोप्यशक्यः दूरतः आरोहणमित्यर्थः कथंभूतं पदं पंचवर्षाणि यस्य सः अल्पैरेवाहोभि
र्वैकुंठं आराध्य आत्मसंकारयित्वा यत्तस्य पदमवाप ॥ ४२ ॥ ततः ध्रुवचरितं निगमयन् तच्छ्रवणादिफलमाह मुनिरेतदिति । तथा यत्त्वम
त्पृष्टोहं तत्सर्वं तुभ्यं कथितं किं तत्राह उद्दामयशसः उत्कृष्टकीर्त्तिः ध्रुवस्य चरितं सतां हरिभक्तानां संमतम् ॥ ४३ ॥

न्तृषिः आत्मेयं विदुरः न्यश्लोकान्मैत्रेयणायस्य चेतसा भित्युक्तं प्रचेतसस्तद्वृत्तान्तं श्रवणसंभावितभगवत्कथाकुतूहलस्या एच्छदित्याह श्रुकः ॥ निशम्येति
कौषारविणा मैत्रेयेणोपवर्णितं ध्रुवस्य वैकुंठस्थानाधिरोहणं तन्निशम्य श्रुत्वा पुनरधोक्षजे भगवति प्ररूढः प्रवृद्धो भावो भक्तिर्यस्य सः तं कौषारविं
प्रष्टुमुपक्रांतवान् ॥१॥ प्रश्नमेवाह ॥ के त इति ॥ ते प्रचेतसां सत्रं इत्युक्ताः प्रचेतसः के इति जातीप्रश्नः हे सुव्रत मैत्रेय ॥ कस्यापत्यानि पुत्राः इति योनिसंबं
धप्रश्नः कस्यान्ववाये प्रख्याता प्रसिद्धा इति वंशप्रश्नः कुत्र वा सत्रमासत इति सत्रदेशप्रश्नः ॥२॥ नारदेन प्रचेतसां वर्णिताः कथाः प्रष्टुं तन्महिमान
माह ॥ मन्य इति ॥ देवदर्शनः देवो भगवान् तस्य दर्शनं येन करणेन स्तुतेन तत्वोपदेशेन भगवत्साक्षात्कारोपायभूतं इत्यर्थः देवस्य दर्शनं साक्षात्कारो यस्य

सूत उवाच ॥ निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥१॥ विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत ॥ कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत ॥२॥ मन्ये महाभागवतं नारदं देवदर्शनम् ॥ येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः ॥ ईज्यमानो भक्तिमता नारदेनेरितः किल ॥४॥ ७

तस्मादेतद्विदुरभीष्टितं अत एव महाभागवतं मन्ये ॥ तमेव विशिनष्टि ॥ येन नारदेन हरेः परिचर्याविधिः पूजाप्रकाररूपः क्रियायोगः प्रोक्तः पंचरा
त्रादुपदेशेन कथितः ॥३॥ क्रियायोगमेव विशदयन्नारदं प्रस्तौति स्वधर्मेति भक्तिमता निरतिशयभगवद्भक्तिमता नारदेन यज्ञपुरुषः यज्ञानां
भोक्ता प्रभुश्च भगवान् स्वधर्मशीलैः स्वस्ववर्णाश्रमोचितभगवदाराधनरूपपंचमहायज्ञाद्यनुष्ठानपरैः पुरुषैरिज्यमान आराध्यमान ईरितः कि
ल सर्वयज्ञाराधनभगवत्परिचर्यारूपत्वेन स्ववर्णाश्रमोचितधर्मा अनुष्ठेया इति पंचरात्रादौ नारदेन भगवता कथितमित्यर्थः ॥४॥ ॥

पौर्णमास्यां सिनीवाल्यां दृष्टेंदुकलायां अमावास्यायां श्रवणे नक्षत्रयुक्ते दिने अर्कदिने सप्तमीभानुवासरादौ च कीर्तयेदिति संबंधः ॥ ४८ ॥ नेछन्निष्कामः तीर्थं
पादे यस्य स तीर्थपादो भगवान् तस्य पदाश्रयः भागवतः श्रद्दधानान् श्रद्धायुक्तान् प्रति इदं चरितं श्रावयेत् । भागवतस्य चित्तरामेतच्चरितश्रावणं युक्तं
मिति भावः तत्र निष्कामतया श्रावणे आत्मना स्वयमेवात्मानं श्रावयित्राध्यात्माने प्रति संतुष्टो भगवान् भवेदिति हेतोः सिध्यति निष्कामतया यः श्रा
वयति तस्मिन् भगवान् स्वयमेव संतुष्ट इति सोपि सिध्यते वमुक्तिं प्राप्नोतीत्येवं समर्थः ॥ ४९ ॥ न केवलं निष्कामतया श्रावयितारं भगवानेवानु [illegible] गृह्णा

पौर्णमास्यां शिनीवाल्यां द्वादश्यां श्रवणेथवा ॥ दिनक्षये व्यतीपाते संक्रमेर्कदिनेपि वा ॥ ४८ ॥ श्रावयेच्छ्रद्दधानां
तीर्थपादपदाश्रयः ॥ नेछंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ॥ ४९ ॥ ज्ञानमज्ञाततत्वाय यो दद्यात्सत्पथेमृतं
कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥ ५० ॥ इदं मयाते भिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हि
त्वार्भकः क्रीडकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५१ ॥ इति श्री भागवते महापुराणे चतुर्थस्कंधे द्वादशोध्यायः ॥ १२ ॥

ति अपि तु सर्व एव देवा अनुगृह्णंतीत्याह ॥ ज्ञानमिति अज्ञातं न तत्वं तत्त्वं यया यथार्थं येन तस्मै सत्पथे सतां मार्गे भगवन्मार्गे इत्यर्थः ॥ अमृतरूपं ज्ञानं यो
विदद्यात् तस्य कृपालोः रतएव दीननाथस्य देवा अनुगृह्णंते अनुग्रहं कुर्वंति ॥ ५० ॥ हे कुरूद्वह विख्यातं प्रसिद्धं विशुद्धं श्रेष्ठ एव नाम यशो धनं कर्म
र्म चेष्टितं यस्य ध्रुवस्येदं चरितं तुभ्यं मयाभिहितं कथितं यो ध्रुवः अर्भक एव सन् मातुर्गृहं क्रीडनकानि क्रीडासाधनानि च त्यक्त्वा विष्णुं शरणं ज
गामेति पुनः पुनर्विस्मयते ॥ ५१ ॥ इति श्रीभागवते चतुर्थे द्वादशोध्यायः ॥ १२ ॥ एवं कार्त्स्न्येन श्रुतं ध्रुवचेष्टितो विदुरः महिमानं विलोक्यास्य नारदो भगवा

भा॰ च॰
॥ ८८ ॥

स्वरूपं स्वस्वरूपं स्मृतं अवरुंधानः अनुसंदधानः ॥ अत एव अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ॥ अव्यवच्छिन्नः निरंतरः योगः ॥ आत्मया यात्मज्ञानयोगः स एवाग्निस्तेन दग्धः कर्मरूपमलं यस्मात् सः आशयो अंतःकरणं यस्येति बहुव्रीहिगर्भो बहुव्रीहिः अत एव आत्मस्वरूपादन्यत् पुरुषार्थभूतं देहं तदनुबंध्यादिकं स्वयमन्यः देहादिभ्यो विलक्षणः नैक्षत न पश्यत् ॥ ९ ॥ जडादितुल्यवेषः आत्मारतिः जडादितुल्यमतिरहितः प्रशांतानि अर्चींषि ज्वाला यस्य सोग्निरिव स्थितः बालानां पथि मार्गे स्वमहात्म्याविष्काररूपेण लक्षितः ॥ १० ॥ तं उत्कलं मंत्रिभिः सहिताः सर्वे कुलवृद्धाः जडमुन्मत्तं च ज्ञात्वा तं

अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः स्वरूपमवरुंधानो नात्मनोन्यं तदैक्षत ॥ ९ ॥ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः लक्षितः पथि बालानां प्रशांतार्चिरिवानलः ॥ १० ॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः ॥ वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतं ॥ ११ ॥ स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् ॥ पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं ॥ १२ ॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः ॥ प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुता ॥ १३ ॥ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥ १४ ॥

॥ र२ ॥

विहाय भ्रमेः सुतं यवीयांसं कनीयांसं वत्सरं भूपतिं राजानं च चक्रुः ॥ ११ ॥ वत्सरस्य इष्टा शीलरूपगुणादिभिः नितरामनुकूला स्वर्वीथ्या भार्या पुष्पार्णादीन् षट् पुत्रान् सा तं सुषुवे ॥ १२ ॥ तत्र षण्णां पुत्राणां मध्ये पुष्पार्णस्य प्रभा दोषे द्वे भार्ये बभूवतुः तत्र प्रभायाः सुताः प्रातरादयस्त्रयो बभूवुः ॥ १३ ॥ दोषासुताः प्रदोषादयस्त्रय आसन् अत्र व्युष्टः पुष्करिण्याख्यायां भार्यायां सर्वतेजसाख्यं सुतमादधे जनयामास ॥ १४ ॥

एवंनारदंप्रस्तुमप्रचेतोभ्यस्तदुपरिष्टकथाः पृच्छति॥ याइति॥ देवर्षिणानारदेनतत्रप्रचेतसांसत्रेयाभगवत्कथावर्णिताःताःकथाःशुश्रूषवेमह्यंकार्त्स्न्येनवक्तुम
र्हसि॥५॥ एवमापृष्टोमुनिःप्रचेतसोध्रुववंशेजाताइतिवक्तुंध्रुववंशमनुश्रावयति॥ ध्रुवस्येति॥ ध्रुवस्यपुत्रःउत्कलाख्यःपितरिध्रुवेवनंप्रतिगच्छतिसतिसा
र्वभौमश्रियंपितुरधिराजासनंचनैच्छत॥६॥ अनिच्छायांकिंकारणमित्यपेक्षायांबहुजन्मसिद्धयोगमहात्म्यप्रसक्तितत्स्वात्मयाथात्म्यानुभवत्वप्रत्वादस्य
सुहृत्पार्थ्यजातंनैच्छदितिवक्तुंतस्यस्वात्मानंदानुभवमाह॥ सइति॥ सउत्कलःजन्मनाजन्मप्रभृतिउपशांतंरागादिभिरकलुषितंआत्मानोयस्यअतएवनि

यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः॥ मह्यंशुश्रूषवेब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि॥५॥ श्रीमैत्रेयउ
वाच॥ ध्रुवस्यचोत्कलःपुत्रःपितरिप्रस्थितेवनम्॥ सार्वभौमश्रियंनैच्छदधिराजासनंपितुः॥६॥ सज
न्मनोपशांतात्मानिःसंगःसमदर्शनः॥ ददर्शलोकेविततमात्मानंलोकमात्मनि॥७॥ आत्मानंब्रह्मनि
र्वाणंप्रत्यस्तमितविग्रहं॥ अवबोधरसैकात्म्यमानंदमनुसंततम्॥८॥

संगःरागादिभिः॥ संगरहितःसमदर्शनःसन्लोकेविततंव्याप्तंआत्मानंआत्मनिलोकंचददर्शलोकविततमात्मानमितिशरीरव्यापकत्वमुक्तं॥ आ
त्मनिलोकमित्यात्मनोधारकत्वमुक्तंलोक्यतेइतिलोकःशरीरं॥७॥ आत्मानंप्रत्यगात्मानंब्रह्मधर्मभूतज्ञानबृहत्त्वयाब्रह्मशब्दवाच्यं॥ निर्वाणंसुखस्वरूपं
प्रत्यस्तमितविग्रहंदेहविनिर्मुक्तं॥ अशरीरेष्विति श्रुतेः॥ अवबोधरसैकात्म्यं अवबोधएवरसःएकात्म्यंएकस्वभावत्वंयस्यतं॥ क्वचिदयंश्लोकोजाड्यर
हितमितपर्यः आनंदंधर्मभूतानंदगुणविशिष्टःगुणवचनेभ्योमनुपोलुग्वक्तव्यइत्यनुशासनात्॥ अनिशंततंअश्रांतमित्यम्॥८॥

भा.च.

॥८९॥

दंडः असाधुनिग्रहरूपो दंडः । स एव व्रतं तद्धिभर्त्तीति तस्मिन् । राज्ञि धर्मकोविदा मुनयः । किं वा मंहः ॥ अपराधं उद्दिश्य वेनं ब्रह्मदंडं प्रति अमूयुजन् । ब्रह्मशापेन युक्तं कृतवंतः प्रजापरिपालननिष्ठे राज्ञि शापकारणं मुनिभिरनुचितमिति भावः ॥२२॥ तदेवाह नेति । अघवानपि अपराध्यपि प्रजापालः राजा प्रजाभिर्नावध्येयः । अवज्ञेयो न भवति । यत् यस्मादसौ प्रजापालः । लोकपालानामोजः स्वतेजसा बिभर्ति ॥२३॥ हे ब्रह्मन् एतत् सुनीथात्मजस्य चेष्टितं श्रद्दधानाय मह्यं आख्याहि ॥ अनेन स्वस्य श्रवणे योग्यतोक्ता परावरवित्तमः परमात्मा अपरः प्रकृतिपुरुषादिः

किं वांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् । दंडव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥२२॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि । यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥२३॥ एतदाख्याहि मे ब्रह्मन् सुनीथात्मजचेष्टितम् । श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥२४॥ श्रीमैत्रेय उवाच ॥ अंगोऽश्वमेधं राजर्षिराजहार महाक्रतुं । नाजग्मुर्देवतास्तस्मिन्नाहुता ब्रह्मवादिभिः ॥२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः । हवींषि हूयमानानि न ते गृह्णंति देवताः ॥२६॥

तदिदं मह्यं श्रद्दधानाय भक्ताय त्वं आख्याहि कथय ॥२४॥ एवमापृष्टो मुनिः ब्रह्मवित् कात्स्न्यं स्वकर्मणि वलाद्दापातितोपि तेन न तुष्यतीति द्योतयन् अंगस्य पुत्रोत्पत्तिक्रममाह ॥ अंग इत्यादिना राजा चासौ ऋषिः अंगः क्रतूनां मध्ये उत्तमं अश्वमेधमाजहार आरब्धवान् । तस्मिन्नश्वमेधे क्रतौ ब्रह्मवादिभिः श्रुताध्ययनादिसंपन्नैः ऋत्विग्भिराहुताः सत्यो देवता नाजग्मुः नागतवत्यः ॥२५॥ हे तात ते ऋत्विजो विस्मिताः यजमानमंगमूचुः उक्तमेवाह । ते तव यावत्संबंधीनि हूयमानानि देवतोद्देशेन प्रक्षेपपूर्वकं त्यक्तानि अयातयामानि अगतवीर्याणि मा

सर्वतेजाः आकूतिनाम्नीं पत्नीं चक्षुः संज्ञं सुतं मनुं अवापः मनोः चक्षुः संज्ञस्य नड्वलाख्या महिषी भार्या विरजान् प्रशस्तान् सुतान् पुरुषः प्रमुखान् द्वादश
पुत्रानसूत ॥१५॥१६॥ ततोल्मुकः पुष्करिण्यां भार्यायां उत्तमान् श्रेष्ठान् अंगादीन् षट् पुत्रानजनयत् ॥१७॥ ततोऽङ्गस्य या सुनीथाख्या भार्या सा उल्वणं दु
रात्मानं वेननामकं पुत्रं सुषुवे यो राज्यमेव प्रपंचयति यस्मिन्नादिनाय स्ववेनस्य दौःशील्यात् दुष्टस्वभावाद्धेतोः स राजर्षिरंगः निर्विण्णः नितरां दुःखितः
पुरान्निरगात् निर्गतः ॥१८॥ हंत हे विदुर मुनयः कुपिताः वेनेन कोपं प्रापिताः वागेव वज्रं येषां ते यं वेनं शेपुः ॥ [किल] शप्तवंतः शापात् तन्मारणस्य त

स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह । मनोरसूत महिषी विरजान्नड्वला सुतान् ॥१५॥ पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतं क्रतं व्रतम् । अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं ॥१६॥ उल्मुकोऽजनयत्पुत्रान् पुष्करिण्यां षडुत्तमान् । अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं ॥१७॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्वणं । यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् ॥१८॥ यमंग शेपुः कुपिता वाग्वज्रा मुनयः किल । गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं ॥१९॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः । जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥२०॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः । राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥२१॥

स्य वेनस्य दक्षिणकरं हस्तं पुनस्ते मुनयो ममंथुः मथितवंतः ॥१९॥ मथने हेतुमाह । अराजक इति तदा शापानंतरं लोके अराजके राज्ञा रहिते स
ति अत एव दस्युभिः पीडिताः प्रजा बभूवुः तदा पृथुर्नाम आद्यः पुरग्रामादीनां तेन रचितत्वात् क्षितीश्वरो राजा नारायणांशेन जातः ॥२०॥ एवं दुष्टपुत्रः
कथमभूत् अजायत यतः दुष्टायाः प्रजाया हेतोः विमनाः दुःखितमना ययौ पुरान्निर्गतः ॥२१॥

भा॰ द॰

॥ ५० ॥

सुप्रजं सपुत्रं साधयन्त्र यं साधनीयं तत्राहुः । इष्ट इति यज्ञभुग्भगवान् पुत्रकामयमानस्य ते त्वया इष्ट इज्यमानस्तु भवन् पुत्रं दास्यति ॥ ३२ ॥ तथा तत्र सति दिवौकसो देवाः स्वभागधेयानि स्वभागान् भागरूपनामधेयेभ्यो धेय इति स्वार्थे धेयप्रत्ययः ग्रहीष्यन्ति । यद्यतः यज्ञपुरुषो हरिः साक्षादपत्याय पुत्राय वृतः स्यात् ततस्तेन तस्मिन् हृष्टे सर्वे देवा आगमिष्यन्तीत्यर्थः ॥ ३३ ॥ ननु तिष्ठन्तु कामान् हरिः कथं दद्यात्तत्राहुः तांस्तानिति जनो यान्यान् कामान् प्रार्थयते तांस्तान् हरिर्दद्यात् । येन प्रकारेण भगवानाराधितो जनैस्तेषां तथा स्वस्वकामानुसारेण फलोदयः फलावाप्तिर्भवति ॥ ३४ ॥ इतीत्थं व्यवसिता निश्चित्वाना ऋत्विजः राज्ञोऽङ्गस्य प्रजातये प्रजोत्पत्तये शिपिविष्टत्वविशिष्टाय विष्णवे । पुरोडाशं निरवपन् शिपिभिः रश्मिभिः विष्टः आविष्टः शिपिर

तथा साधयमहं ते आत्मानं सुप्रजं नृप । इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥ ३२ ॥ तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः । यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥ ३३ ॥ तांस्तान् कामान् हरिर्दद्याद्यान्यान् कामयते जनः ॥ आराधितो यथैवैष तथा पुंसां फलोदयः ॥ ३४ ॥ इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये ॥ पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥ ३५ ॥ तस्मात्पुरुष उत्तस्थौ हेममाल्यमलाम्बरः ॥ हिरण्मयेन पात्रेण सिद्धमादाय पायसम् ॥ ३६ ॥

शिपिविष्टः तन्नीत्याच मन्त्रः किमिते विष्णो परिचक्ष्यं भूत्प्रवक्षे शिपिविष्टो अस्मीत्यादि । अर्थवादश्च यः पशोर्मायारूपत्वाद्विष्णुः शिपिविष्ट इत्यादिभिर्नक्ताच यदुत वा पशिपिविष्टोऽस्मीति प्रतिपन्नस्य रश्मयः शिपयो ॥ त्र रश्मयः उच्यन्ते तैराविष्टो भवतीति यद्वा शिपिषु पशुषु यज्ञरूपेण प्रविष्टः यत्तथा च श्रुतिः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति ॥ ३५ ॥ तस्मात् अग्रेरित्यर्थः अर्थसामर्थ्यान् हेममयानि माल्यानि अम्बराणि च यस्य सः पुरुषः हिरण्मयपात्रेण सिद्धं सम्यक् पक्वं पायसं चरुं गृहीत्वा उत्तस्थौ उत्थितवान् ॥ ३६ ॥

॥ ५० ॥

हे सज्जन् हवींषि अदुष्टानि शुद्धानि ते त्वया श्रद्धया साहितानि संपादितानि च । तथा छंदांसि कल्पेङ्गभूता मंत्राः अयातयामानि स्वरवर्णादिभिरगतवीर्या
णि तव हेतुः दृढवैतैः स्वरवर्णादिषु युक्तत्वेन मंत्रोच्चारणमेव दृढं व्रतं येषां तैः ऋत्विग्भिर्योजितानि प्रयुक्तानि ॥२७॥ एवं यथावत् अनुष्ठीयमाने क्र
तौ देवहेलनं देवान् प्रति हेलनं अपराधं अणु अल्पमपि वयं न विद्मो न जानीमः यत् यस्मात् हेलनात् स्वकीयान् भागान् कर्मसाक्षिणः कर्मणि
ग्रणाहोषरक्षारो देवा न गृह्णंति । अतो वयं केनचिद्देवहेलनेन भवितव्यं परं तु तद्वयं न विद्मः इत्यर्थः ॥२८॥ एवमृत्विग्भिरुक्तो गस्तानाहेत्याह

राजन् हवींष्यदुष्टानि श्रद्धयासादितानि ते । छंदांस्ययातयामानि योजितानि धृतव्रतैः ॥२७॥ न विद्दामेह देवानां हेलनं वयम
ण्वपि । यन्न गृह्णंति भागान्स्वान् ये देवाः कर्मसाक्षिणः ॥२८॥ श्रीमैत्रेय उवाच ॥ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः ॥ त
त्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥२९॥ नागच्छंत्याहुता देवा न गृह्णंति ग्रहानिह । सदसस्पतयो ब्रूत किमवद्यं मया कृतं
॥३०॥ सदस्या ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक् स्थितं । अस्त्येकं प्राक्तनमघं यदिहेदृक्त्वमप्रजः ॥३१॥

मुनिः द्विजवचः श्रुत्वा अथानंतरं सुतरां दुःखितमनाः यजमानोंगः यज्ञे ग्रहीतमौनोपि सदस्यान् सदसि स्थितान् प्रति तदनुज्ञया सदस्यानुज्ञया
मखे मौनस्य देवतानागमनकारणं प्रष्टुं वाचं असृजत् प्रायुंक्त ॥२९॥ वाक्विसर्गमेवाह । नागच्छंतीति इह क्रतौ देवता आहूता नागच्छंति ग्रा
ह्यान् सोमपात्राणि न गृह्णंति हे सदसस्पतयः मया किमवद्यं हेलनं कृतं तद्यूयं ब्रूत ॥३०॥ हे नरदेव इह जन्मनि भवतः ब्रह्मविदस्तावन्मनागी
षदप्यघं न स्थितं किंतु प्राक्तनमेकमस्ति यद्यस्मादीदृशो हीदृक् गुणाधिकोपि त्वमप्रजः प्रजारहितो बभूविथ ॥३१॥ अतो देवा यथा हवींषि त्वयात्मानं

भा.च.
॥६१॥

तस्मपुत्रविंहावाक्यान्याह त्रिभिः येगृहमेधिनोगृहाश्रमिणः अप्रजाः अपुत्राः येवपुत्रिणोपि कुत्सितापत्यकृतं दुर्भरं धारयितुमशक्यंदुःखंनविंदंति
तत्वभंतेतैर्भगवान्देवः प्रायेणाभ्यर्चितः ॥४३॥ यतः कदपत्यात्पापीयसी कीर्त्तिः अपकीर्त्तिः महानधर्मश्चनृणंभवेत् यथायतः कदपत्यात्सर्वेषांवि
रोधः अनंतोपारः आधिःमानसीव्यथाचजायते ॥४४॥ तंप्रजापदेशंपुत्रनाममात्रमपि आत्मनोमोहेनवंधनंकः पंडितोवहुमन्येत यदर्थाः यदर्थाः य
सुतापदेशविमित्राः क्लेशसंपादकागृहाभवंतिपुत्रापदेशमात्रमपिक्लेशाकरगृहादिहेतुत्वेनात्मनोवंधकत्वात्पंडितोनवहुमन्येतेत्यर्थः ॥४५॥ इदानीं

प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिनः ॥ कदपत्यभृतंदुःखंयेनविंदतिदुर्भरम् ॥४३॥ यतःपापीयसीकीर्त्तिरधर्मश्चमहा
न्नृणाम् ॥ यतोविरोधःसर्वेषांयतआधिरनंतकः ॥४४॥ कस्तंप्रजापदेशंवैमोहवंधनमात्मनः ॥ पंडितोवहुमन्येत
यदर्थाःक्लेशदागृहाः ॥४५॥ कदपत्यंवरंमन्येसदपत्याच्छुचांपदात् ॥ निर्विद्येतगृहान्मर्त्योयत्क्लेशनिवहागृहाः ॥४६॥
सएवंनिर्विण्णमनानृपोगृहान्निशीथउत्थायमहोदयोदयात् ॥ अलब्धनिद्रोनुपलक्षितोनृभिर्हित्वागतोवेणसुवंप्रसुप्ताम् ॥४७॥

निर्वेदहेतुत्वेनकुत्सितमेवापत्यमभिनंदति ःकदपत्यमिति शुचांपदात्शोकानांस्थानात् उत्तरोत्तरंगृहासक्तिजननद्वारासंसारदुःखहेतुत्वादिति
सदपत्यात्कदपत्यंवरंश्रेष्ठमन्येवरत्वेहेतुःमर्त्योगृहान्निर्विद्येतनिर्वेदंप्राप्नुयात् यतःकदपत्यात्गृहाःशोकावहाभवंतिकदपत्यंपरमितिभावेनस
पत्यंवैराग्यहेतुत्वात् ॥४६॥ एवमुक्तप्रकारंनिर्विण्णमनाःसन्नृपअंगःमहतामुदयानांविभूतीनांउदयःसमृद्धिर्यस्मिन्तस्माद्गृहान्निशीथेउत्थाय
अलब्धनिद्रस्सन्अनिद्रःप्रसुप्तांवेनसुवंवेनस्यजननींसुनीथांहित्वानरैरनुपलक्षितःअदृष्टःगतःवनंप्रतीतिशेषः ॥४७॥

॥६१॥

वुद्धिमान्स राजा अंगः विप्रानुमतः विप्रैरनुज्ञातः अंजलिना ओदनं पायसं गृहीत्वा स्वयमाघ्राय हर्षेण युक्तः पत्न्यै प्रादात् ॥ ३७ ॥ सा राज्ञी राज्ञः स्त्री सुनीथा पुंसेवं पुंसो संसक्तं ते अनेन तेन पुंसवनेन तदोदनं प्राश्य भुक्त्वा पत्युः सकाशात् गर्भं आदधे धृतवती अप्रजासती गर्भकाले गर्भधारणकाले उपावृत्ते आगते सति कुमारं सुषुवे ॥ ३८ ॥ सः पुरुषः कुमारो बाल एव बाल्यात् प्रभृति असमर्थः ॥ अधर्मांशोद्भवं मातामहं मृत्युं मृत्योर्हि पुत्री सुनीथा ॥ अनुव्रतः अनुसृतो भूतः तेन मातामहानुसारेणायमप्य धार्मिको भवत् ॥ ३९ ॥ अधार्मिकत्वमेव प्रपंचयति स इति ॥ स अंगः सशरासनं धनुः उद्यम्य धनुष्पा

स विप्रानुमतो राजा गृहीत्वांजलिनौदनम् ॥ अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ॥ ३७ ॥ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युराद धे ॥ गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजा ॥ ३८ ॥ स बाल एव पुरुषो मातामहमनुव्रतः ॥ अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः ॥ हंत्यसाधुर्मृगान्दीनान्वेणोसावित्यरौज्जनः ॥ ४० ॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः ॥ प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृप ॥ यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥

सोपि तं शरासनत्यर्थः मृगयुर्लुब्धकः सन् अत एव वनगोचरः ॥ असाधुः दीनान् मृगान् हंति अवधीत् तं दृष्ट्वा असौ वेनः आगच्छतीति सर्वो जनः अरौत् चुक्रोश ॥ ४० ॥ आक्रीडे क्रीडास्थाने वयस्यान् यूनोपि बालान् दारुणः क्रूरः अत एव निरनुक्रोशः कृपारहितः सन् पशुमारं अमारयत् पशुवन्निवामारयत् ॥ ४१ ॥ सन्नृपः अंगः खलं दुरात्मानं पुत्रं नानाविधैः साम्नोः सामाद्युपायैर्विचक्ष्यानुशासेत्यर्थः यदा भृशं नितरां सुदु

अनुग्रहं इं वेनं राजासने प्रतिष्ठितं श्रुत्वा दस्यवश्चोरादयः सर्वेभ्यः त्रस्ताभीताः ॥ आखवः सर्पकाद् इव सद्यः निलिल्युः लीना बभूवुः ॥३॥ स वेनः १
आरूढं नृपस्थानं राजासनं येन सः अष्टविभूतिः लोकपालैश्वर्यैः अणिमादिभिर्वा उन्नद्धः गर्वितः । अतएव स्तब्धः ॥ विवेकशून्यः स्वतः
स्वयं संभावितः ॥ नवितरैरि तिभावः आत्मानं महाभागं महाबुद्धिमंतं महाभागपर्वं तं वामेने ॥४॥ एवं तथा ऐश्वर्यमदेनांधः अत्र निरंकुशो गज
इवोत्सिक्तः उन्मयः रथमास्थाय अधिरुह्य रोदसी द्यावापृथिव्यौ कंपयन्निव पर्यटन् ॥५॥ हे द्विजाः क्वचिदपि यागदानहोमादिकं न कर्तव्य

श्रुत्वा नृपासनगतं वेणमत्युग्रशासनं ॥ निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ॥३॥ स आरूढनृपस्थान उन्नद्धोष्टवि
भूतिभिः ॥ अवमेने महाभागान् स्तब्धः संभावितः स्वतः ॥४॥ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः ॥ पर्यटन्रथमास्था
य कंपयन्निव रोदसी ॥५॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् ॥ इति न्यवारयद्धर्मं भेरीघोषेण सर्वतः
॥६॥ वेणस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं ॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥७॥ अहो उभयतः प्राप्तं लोकस्य
व्यसनं महत् । दारुण्युभयतो दीप्ते इव तस्करपालयोः ॥८॥ अराजकभयादेष कृतो राजातदर्हणः ॥ ततोप्यासीद्भयं त्वद्य कथं स्यात्
स्वस्ति देहिनां ॥९॥

मित्येवं रूपं धर्मं धर्माभासं भेरीध्वनिना न्यवारयत् यत एवमतो दुर्मदः ॥६॥ मुनयो भृग्वादयः सत्रिणः याज्ञिका अपि मिलिताः संतः दुर्वृ
त्तस्य वेनस्य चेष्टितमवेक्ष्य लोकानां व्यसनं दुःखं विमृश्य कृपया ऊचुः ॥७॥ उक्तमेवाह ॥ अहो इति । मलत श्चाग्रतश्च प्रदीप्ते ज्वलिते का१
ष्ठे तन्मध्यवर्तिनां यथा उभयतो भयं तथा लोकानां व्यसनं एवं तस्करेभ्यः पालकात् पार्थिवाच्च दुःखं प्राप्तमित्यर्थः ॥८॥ तदेवाह ॥ अराजकभयादिति अन

र्हणः राज्यानर्होप्येष वेनो अराजकभयाद्राजा कृतः ततो
राज्ञोप्यद्य भयमासीत् देहिनां कथं स्वस्ति सुखं स्यात् ॥९॥

पुरोहिता ऋषयः सर्वाः प्रजाः पतिं राजानं निर्विण्णगतं निर्वेदं प्राप्य गतं विज्ञाय अनपत्यत्वान्मनस्तप्तशोकेन कातराः संतः उर्वी पृथ्वीं विचिक्युः अन्वेषणं चक्रुः न तु तत्रैव वर्त्मसत्व अपि नाप श्यन्विचित्य निवृत्ताः ते नाहु । यथेति निगूढं हृदये वसंतमपि तिरोहितं पुरुषं परमपुरुषं यथा कुयोगिनो न्वेषयंति तत्तथेति ॥ ४८ ॥ प्रजापते राज्ञः पदवीमार्गमलक्षयंतो अजानंत । अत एव हतप्रयत्नाः ते पुरोहितादयः पुरीं प्रत्युपसृत्य आगत्य हे पौरव विदुर साश्रवः शोकाश्रुसहिताः सन्तेतान्संधीन्तान्नृपानीनृपुरान्नम् हर्षिप्राणमनर्ह्य विन्नवंनाशामर्दयंतान्मवेदयनविज्ञापितवंतः ॥ ४९ ॥ इति श्री चतुर्थे त्रयोदशः ॥ १३ ॥ एवं पुरोहितादिरं

विज्ञाय निर्विण्णगतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः । विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् । ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौरव भर्तृविप्लवम् ॥ ४९ ॥ इति श्रीभागवते चतुर्थस्कंधे त्रयोदशोध्यायः ॥ १३ ॥ मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यताम् ॥ १ ॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेणमभ्यषिंचन्पतिं भुवः ॥ २ ॥

निर्विण्णे दिशा ऋषयः तमेव खलं वेनं अभिषिषिचुः पुनस्तेन पीडिताः स्वतेजसा निहत्य तद्बाहू मथनात् इव तीर्णे भगवदंशभूतं पृथुं न त्रियमभिषिषिचुः अस्मिन्प्रतिपाद्यया मास्तुर्विन्याह । चतुर्दशेन मुनिः भृग्वादय इति । लोकानां क्षेमदर्शिनः क्षेमचिंतकास्ते विज्ञापिता भृग्वादयो ऋषयः नृणां गोप्तरि त्रातरि असति विद्यमाने सति पशुसाम्यतां पशुसमानरूपतां पश्यंतः पशुसाम्यतामिति प शुभिः साम्यं येषां तेषां पशुसाम्याः तेषां भावः पशुसाम्यतां तां पश्यंतः ॥ १ ॥ ब्रह्मवादिनः वीरस्य वेनस्य मातरं सुनीथामाहूय तस्यै विज्ञाप्य असमर्थः प्रकृतीनाममात्यादीनां असंमतमपि वेनं भुवः पति

भा.च.

॥ ए ३ ॥

किंतरिष्याहुः धर्मैरित्यादिभिरष्टभिः पुंसा वाङ्मनःकायानां वृत्तिभिर्व्यापारैः धर्मः ईश्वराराधनरूपो धर्मः ॥ आचरितोनुष्ठितः लोकान् विशोकान् निर्दुःखान्
वितरति विकुरुते असंगिनां विरक्तानां आनंत्यं मोक्षसुखानंत्यमपि वितरति ॥१५॥ हे वीर सः लोकसुखकरो मोक्षसुखानंत्यकरश्च मा विनश्येत्
न नश्येत् यस्मिन्नुत धर्मे विनष्टे सति नृपतिः पार्थिवः ऐश्वर्यादवरोहति भ्रश्यति ॥१६॥ हे राजन् असाधवो ये अमात्यास्तेभ्यः ॥ चोरादिभ्यः यथा
यथाप्राप्तं प्रजाः पालयन् ताभ्यो बलिं पूजां गृह्णन् स्वीकुर्वन् इह लोके प्रेत्य परलोकं प्राप्य च मोदते सुखी भवति ॥१७॥ यस्य राज्ञो राष्ट्रे पुरे च स्थितैश्चानु

धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ॥ लोकान् विशोकान् वितरत्यथानंत्यमसंगिनां ॥१५॥ स ते मा विनशेद्वीर प्रजानां क्षे
मलक्षणः ॥ यस्मिन् विनष्टे नृपतिरैश्वर्यादवरोहति ॥१६॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ॥ रक्षन् यथा बलिं गृह्णन्
इह प्रेत्य च मोदते ॥१७॥ यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः ॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमात्मकैः ॥१८॥ तस्य राज्ञो महाराज भ
गवान् भूतभावनः ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥१९॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ॥ लोकाः सपाला
ह्येतस्मै हरंति बलिमादृताः ॥२०॥

वर्णैश्चानुगताश्रमस्वरूपव्यवस्थिततया व्यवस्थितैर्जनैः यज्ञानां भोक्ता प्रभुश्च भगवान् स्वधर्मेण पंचमहायज्ञादिरूपेण इज्यते आराध्यते ॥१८॥
हे महाभाग तस्य निजशासने निजं स्वकीयं यच्छासनं शास्त्रविहितं प्रजापालनादिरूपं कर्म तस्मिन् तिष्ठतः राज्ञः विश्वात्मा सर्वात्मा भूतभावनः
भूतानि भावयत्युत्पादयतीति भूतभावनः जगत्कारणभूतो भगवान् परितुष्यति ॥१९॥ परितुष्यतु भगवान् किं तेन तत्राह तस्मिन्निति जगतामी
श्वराणां ब्रह्मादयस्तेषामपीश्वरे तस्मिन् भगवति तुष्टे सति सपालकाः पालकैः सहिताः लोका आदृताः आदरेण युक्ताः एतस्मै परितुष्टभगवते राज्ञे

॥ ए ३ ॥

अस्माकमप्यनिष्टं जातमित्याहुः अहेः सर्पस्य यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थं करोति तथा तद्वेदाहुः सुनीथायाः अंगात्संभूतो वेनः प्रकृत्या स्वभावेनैव खलः दुरात्मा ॥ १० ॥ अस्माभिः प्रजापालो निरूपितः नियुक्तः स एव प्रजाः जिघांसति हंतुमिच्छति तथापि घातुकत्वेप्यमुं वेनं सांत्वयेम उपप्रत्निभिः प्रार्थयिष्यामः तत्तस्य पातकं अस्मान्न स्पृशेत् ॥ ११ ॥ निषेधस्य प्रसक्तिपूर्वकत्वात्तामाहुः तत्तस्य दौरात्म्यं विद्वद्भिर्जानद्भिरप्यस्माभिरसद्वृत्तो वेनः नृपः कृतः अस्माभिर्नृपीकरणाद्धेतोरयं भूतानि द्रुह्यति अतोऽस्माभिः सांत्वितश्चेन्न भूतद्रोहकृतं पापं अस्मान्स्पृशतीत्यर्थः सांत्वनेन प्र

अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥ १० ॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः ॥ तथापि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ ११ ॥ तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः ॥ सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् ॥ १२ ॥ लोकाधिक्कारसंदग्धं दहिष्यामः स्वतेजसा ॥ एवमध्यवसायैनं मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः ॥ १३ ॥ मुनय ऊचुः ॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भो । आ

सत्येसति कृत्यमाहुः सांत्वित इति । सांत्वितः प्रार्थितः ॥ अधर्मकृदयं वेनोऽस्माकं वाचं न ग्रहीष्यति चेत्तर्हि लोकानां धिक्कारेण निंदया निर्दग्धं स्वतेजसा स्वेषां अस्माकं तेजसा तपोबलेन दहिष्याम ॥ १२ ॥ एवमध्यवसाय निश्चित्य गूढो मन्युर्येषां ते मुनयः वेनमुपव्रज्य समीपमागत्य र सामभिः प्रियोक्तिभिः । वेनं सांत्वयित्वा अब्रुवन् प्रार्थनापूर्वकमब्रुवन्नित्यर्थः हे नृपवर्य वयं यद्विज्ञापयामहे तन्निबोध सावधानचित्तः ॥ अवधत्स्व । कथंभूतं तत्तव आयुरादीनां विवर्द्धनं विशेषेण वर्द्धकम् ॥ १४ ॥

येचमूढाःनप्रह्वेणावस्थितंईश्वरमवजानंति अवज्ञांकुर्वंतितेजनाइहपरत्रचलोकेभद्रंकल्याणंनाविंदंतिनप्राप्नुवंतिकिंतुदुःखिनोभवंतीत्य
र्थः॥२४॥भर्तृस्नेहेविधानोयासांतासांकुयोषितांनिंदितस्त्रीणांयथाजारपुरुषेभक्तिस्तथायज्ञपुरुषेवःयुष्माकमीदृशीभक्तिःसःयज्ञपुरुषःको
नामकिंशब्दःकुत्सायांअसंभावनायांवा॥२५॥वरशापयोरनुग्रहविग्रहयोःप्रभवःसमर्थाविष्ण्वाद्योयेअन्येचदेवानृपतेराज्ञोदेहेवसंतिअ

अवजानंत्यमीमूढानृपरूपिणमीश्वरम्।नानुविंदंतितेभद्रमिहलोकेपरत्रच॥२४॥कोयज्ञपुरुषोनामयत्रवोभक्तिरीदृशी।भर्तृस्नेह
विदूराणांयथाजारेकुयोषिताम्॥२५॥विष्णुर्विरिंचोगिरिशइंद्रोवायुर्यमोरविः॥पर्जन्योधनदःसोमःक्षितिरग्निरपांपतिः
२६॥एतेचान्येचविबुधाःप्रभावोवरशापयोः॥देहेभवंतिनृपतेःसर्वदेवमयोनृपः॥२७॥तस्मान्मांकर्मभिर्विप्रायजध्वंगत
मत्सराः॥बलिंचमह्यंहरतमत्तोन्यःकोग्रभुक्पुमान्॥२८॥मैत्रेयउवाच॥इत्थंविपर्ययमतिःपापीयानुत्पथंगतः॥अनुनीयमा
नस्तद्याच्ञांनचक्रेभ्रष्टमंगलः॥२९॥इतितेसत्कृतास्तेनद्विजाःपंडितमानिना।भग्नायांभव्ययाच्ञायांतस्मैविदुरचुक्रुधुः
॥३०॥

नोनृपःसर्वदेवमयःसर्वदेवताप्रचुरः॥२६॥२७॥तस्मान्नृपस्यसर्वदेवमयत्वात्मामेवहेविप्रागतमत्सरायूयंयजध्वंमह्यमेवबलिंस्वा
मिग्राह्यभागादिकंहरतसमर्पयतमत्तःअग्रभुक्आराध्यःकःपुमानस्ति॥२८॥इत्थमेवंविपरीतमतिःपापीयानुत्पथंदुर्मार्गंप्राप्तःअनुनीय
मानोपिप्रार्थ्यमानोपितेषांमहर्षीणांयाच्ञांनचक्रेयतोयंभ्रष्टमंगलः॥२९॥इतीत्थंपंडितमात्मानंमन्वानेनवेनेनासत्कृताअवज्ञातास्तेमुनयः
भव्ययाच्ञायांलोकशुभावहयाच्ञायांसत्यांहेविदुरतस्मैचक्रुधुःकुपितवंतः॥३०॥

सर्वान् लोकान्नत्वमनेनैश्वर्यामरणममरत्वप्रापकान् यज्ञांश्च संगृह्णातीति नियच्छतीति तथा तं त्रयीमयं धर्माधर्मादिबोधकत्रयीप्रचुरं वेदैकप्रमाणकत्वे
न तत्प्राचुर्यं विवक्षितम् ॥ त्रय्या भागद्वयात्मकत्वात् किंरूपं पूर्वभागप्राचुर्यं विरूपं चोपरितनभागप्राचुर्यमित्यत्र तद्विवेचयन् विशिनष्टि यज्ञ
मयं तपोमयमिति । यज्ञप्रचुरं पूर्वभागोदितानां तेषामाराधनत्वेन तत्प्राचुर्यं विवक्षितं आराधनप्रकारप्रकाशकत्वेन पूर्वभागस्य तस्मिन् प्रामा
ण्यमिति भावः ॥ अत्र सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति वेदैश्च सर्वैरहमेव वेद्य इत्यादिकमनुसंधेयं तपोमयं तपांसि उपासा
नानि तत्प्रचुरं आराध्यस्वरूपगुणादिप्रकाशकत्वेनोपरितनभागस्य प्रामाण्यमिति भावः तं विचित्रैर्इज्यदेवतादिभिर्नानाविधैर्यज्ञैः ते अभ

तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं । यज्ञैर्विचित्रैर्यजते भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि ॥२१॥ यज्ञेन युष्म
द्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर चेष्टितुं ॥२२॥ वेन उवाच
बालिशा बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥२३॥ ॥ ॥ ॥ ॥

भवाय उत्कर्षाय भवायेति छेदे तेन तव समृद्ध्यर्थं यजतः यागं कुर्वाणान् स्वदेशान् तद्वासिनो जनान् अविरोद्धुं अनिवर्तयितुं हे राजन् अर्हसि ॥२१
यस्मात्तद्देशवासिभिर्जनैर्भगवान् इज्यते सोऽपि मुच्यत इत्यभिप्रायेण ते भवायेत्युक्तं तदेव प्रपंचयति । यज्ञेनेति युष्मद्विषये तव देशे द्विजातिभिर्वि
तायमानेन निरंतरं क्रियमाणेन यज्ञेन हरेर्भगवतः कलाः शरीरभूताः सुरा इंद्रादयो देवाः स्विष्टाः यथाशास्त्रं इज्यमानाः प्र
सन्नाः वांछितं तं प्रदिशंति प्रयच्छंतीति हे वीर तद्धेलनं तेषां देवानां हेलनं अवज्ञां चेष्टितुं कर्तुं भवान्नार्हति ॥२२॥ ए
वं विज्ञापितो वेन आहेत्याह । वेन इति । पूर्वं बालिशाः अज्ञाः वेनं न कुतः यतः अधर्मे धर्ममानिनः धर्ममन्वानाः तदेव प्रपंचयति । ये त्वादृशा जनाः वृत्तिदं

भा.वृ.

॥ ९५ ॥

ावं क्रषिपु त्रुवत्सु सत्सु सर्वतो दिशं सर्वासु दिक्षु धावतां अभितो धनादिकं लुंपतां हरतां चोराणां भूरिर्वहुलः पांसुः समुत्थितो भूत् ॥ ३८ ॥ वसुधनं लुंपतां
हरतां चोराणां भर्तरि राज्ञि उपरते तेन क्षेममिति अन्योन्यं जिघांसतां हंतुमिच्छतां लोकानां कृतं तथाविधमुपद्रवम् ॥ ३९ ॥ तथा चोरप्रायमराजकं राजहीनं सत्वं च जनप
दमाज्ञाय ज्ञात्वा शक्ता अपि वेनमिव हुंकारेणैव चोरान्निहंतुं शक्ता अपि क्रषयः तद्दोषदर्शिनः तस्माच्चौरादिहननाद्दोषः पापं तं पश्यंत घातुं
न घातको विप्र इति स्वधर्मे पश्यंत इति भावः नावारयन् न निवारितवंतः ॥ ४० ॥ नन्वेवमृषीणामपि शक्तानां चोरोपद्रुतहीनलोकोपेक्षायां तपोनाश

ावं स्पृषंत क्रषयो धावतां सर्वतो दिशम् ॥ पांसुः समुत्थितो भूरिश्चोराणामभिलुंपताम् ॥ ३८ ॥ तदुपद्रवमाज्ञाय लोकस्य वसुलुं
पतां ॥ भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसतां ॥ ३९ ॥ चोरप्रायं जनपदं हीनसत्वमराजकं । लोका नावारयंछक्ता अपि तद्दोषदर्शि
नः ॥ ४० ॥ ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः ॥ स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥ ४१ ॥ नांगस्य वंशो राज
र्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा वंशेस्मिन् केशवाश्रयाः ॥ ४२ ॥ ७ ७ ७

प्रसंगः स्यादिति ब्राह्मणः समदृगित्यनेन नाशं क्व स्वतपसो नाशाभावार्थं राज्ञांतरमेव संपाद्य तन्मुखेनैव हीनपरित्राणं कार्यमित्यभिप्रायेण रा
ज्ञांतरकरणोपायमस्मन्मंथनादिकं चक्रुरित्याह नांगस्येति द्वाभ्यां समदृक् सर्वस्य ब्रह्मात्मकत्वदर्शी तदुपयुक्तशमादिसंपन्नोपि ब्राह्मणो यदि दी
नानां समुपेक्षकः स्यात्तर्हि तस्य ब्रह्म ब्राह्मं तप इति यावत् स्रवते गच्छति यथा भिन्नभांडस्थं जलं तद्वत् ॥ ४१ ॥ अत उपेक्षारूपदोषपरिहाराय नांग
स्य मा रिविनिश्चिमहीपतेरुरंतरमामंयुरित्यन्वयः राजर्षेरंगस्यैष वंशः संस्थातुं अवसानं प्राप्तुं नार्हति हि यतोस्मिन् वंशे जाता नृपाः अमोघ

॥ ९५ ॥

कोथमेवप्रपंचयति ॥ हन्यतामिति प्रकृत्यास्वभावेनदारुणो धात्रकुः अतएवपापीयानेषवेनोहन्यतां कोपादिहन्तिः यतोसौजीवन्नजगत्भस्म
सात्भस्मभूतं आशुकुरुते ध्रुवं नन्नम ॥ ३१ ॥ असहृतोयंवेनोराजासनं प्रतिनार्हतियोग्योनभवतिहियस्मात्योवेनअनपत्रयोनिर्लज्जः यज्ञप
तिं विष्णुं विनिंदति ॥ ३२ ॥ अस्यभमस्युभाचारं वेनमेकस्तेविनाकोवैपुमान्तंविष्णुंपरिचक्षीतनिंदेत्तवेनस्यकृतघ्नतामाह ॥ यस्यविष्णोरनुग्रह
भाजनः अनुग्रहविषयः सन्श्रीदृशोमैस्वर्यंप्राप्तः ॥ ३३ ॥ इत्थंव्यवसितानिश्चित्यानानाऋषयः रूढमन्यवःपूर्वंगरूढमन्यवः संततःपूर्वमेवभगवन्निं

हन्यतांहन्यतामेषपापः प्रकृतिदारुणः ॥ जीवन्नगदसावाशुकुरुतेभस्मसाध्रुवम् ॥ ३१ ॥ नायमर्हत्यसद्वृत्तोनरदेववरासनं ॥ यो
धियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ॥ ३२ ॥ कोवेनंपरिचक्षीतवेणमेकमृतेऽशुभम् ॥ प्राप्तईदृशमैश्वर्यंयदनुग्रहभाजनम्
३३ ॥ इत्थंव्यवसिताहंतुमृषयोरूढमन्यवः ॥ निर्जघ्नुर्हुंकृतैर्वेणंहतमच्युतनिंदया ॥ ३४ ॥ ऋषिभिः स्वाश्रमपदंगतेपुत्रकले
वरम् ॥ सुनीथापालयामासविद्यायोगेनशोचती ॥ ३५ ॥ एकदामुनयस्तेतुसरस्वत्सलिलाप्लुताः ॥ हुत्वाग्निंसत्कथाचक्रुरुपर
विष्टाःसरित्तटे ॥ ३६ ॥ वीक्ष्योत्थितमहोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथायायापादस्युभ्योनभवेद्भुवः ॥ ३७ ॥

हत्याहतप्रायंवेनंहुंकारैर्निर्जघ्नुः ॥ ३४ ॥ एवंहुंकारैरेववेनंनिहत्यऋषिभिः स्वाश्रमस्थानेगतेप्राप्तेसतिशोचतीसुनीथापुत्रस्यवेनस्यकलेव
रंविद्यायोगेनमंत्रसहितयायुक्तगपुंवर्ज्जाव आर्षः पालयामास ॥ ३५ ॥ तेमुनयः एकदासरस्वत्याःसलिलेराप्लुताः अग्निंहुत्वाप्रातरग्निकार्यं
कृत्वासरितस्तटः रस्वत्यास्तटेउपविष्टाः संतःसत्कथांभगवत्कथांचक्रुः कथयामासुः ॥ ३६ ॥ नद्यउत्थितान्महोत्पातानवीक्ष्यदृष्ट्वातेयेलोकानांभ

भा. च.

॥ ९६ ॥

किमकुर्वित्यत आह। एष इति॥ चतुर्भिः एषः पुमान् भगवतो विष्णोर्भुववपालिनी कला भुवनपालनार्थं कलयावतीर्ण इत्यर्थः॥ इयं स्त्री लक्ष्म्याः संभूतिः संभवः तस्याः कलेत्यर्थः तत्र हेतुः पुरुषस्यानपायिनी पुरुषमविहाय जातेति भावः। एष वत्से भवत्सतां हि कित्रणी ह्यस्य जन्मानि॥ अत्रे पृथ्वावतारे पृथुविष्णोरेषा भयापिनीति वचनार्थोत्रानुसंधेयः॥३५ अयं मिथुने यः पुमान् सोयं राज्ञां प्रथमः मुख्यः यतोयं यशः कीर्त्तिं प्रथयिता विस्तारयिता अतः पृथुश्रवाः पृथुकीर्त्तिसंपन्नः पृथुर्नाम महाराजो भविष्यति नामशब्दः प्रसिद्धौ प्रथयति यशः पृथुरिति योगरूढिभ्यां प्र

ऋषय ऊचुः॥ एष विष्णोर्भगवतः कला भुवनपालिनी॥ इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी॥ ३॥ अयं तु प्रथमो राज्ञां पुमान् प्रथयिता यशः॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः॥ ४॥ इयं च देवी सुदती गुणभूषणभूषणा॥ अर्चिर्नाम वरारोहा पृथुमेवावरुंधती॥ ५॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी॥ ६॥ ७ ५

ख्यातो महाराजो भविष्यतीत्यर्थः॥४॥ इयं तस्मिन् मिथुने सेयं सुदती शोभनदंतवती इतरावयवसौष्ठवस्याप्युपलक्षणमिदं वरारोहा स्त्री यतो गुणानां च भूषणानि भूषणानि वदेहोज्ज्वल्यविशिष्टाश्रयभूतेत्यर्थः ततोर्चिर्नाम अर्चते उज्ज्वलतीत्यर्चिरिति योगरूढिभ्यां प्रख्याता पृथुमेवावरुंधती भविष्यति॥५॥ अत्र हेतुः एष इति हरिस्त्रिभुवनमिक्षितिरिता लोकस्य परिरक्षया साक्षाद्धरेरंशः एव पृथुर्जातः आवेशावतारः तत्परा तदनन्या ही अतएवानपायिनी श्रीः लक्ष्मीरियं जज्ञे लक्ष्म्यंशजातेत्यर्थः॥६॥

॥ ९६ ॥

त्व मिथ्यं विनिश्चित्य ऋषयो विपन्नस्य विपतिं प्राप्तस्य मृतस्येत्यर्थः ऊरुं तरसा वलेन ममंथुः मथितवंतः तत्र मथिते ऊरौ वाहुको नाम नरः आसीत् उद्‌
भव ॥ ४३ ॥ वाहुकमेव विशिनष्टि काकेति वाक इव कृष्णः ॥ अतीव ह्रस्वांगः ह्रस्वौ वाहू यस्य महांतौ हनू कपोलप्रांतौ यस्य ह्रस्वावाकू यस्य निम्नं न
तं नासिकाग्रं यस्य रक्ते अक्षिणी यस्य ताम्रवर्णा मूर्द्धजाः केशा यस्य सः ॥ ४४ ॥ तं वाहुकं दीनं किं करोमीति दीनवादिनं च राजानं हे महाभिप्रेत निषीदेति उ
पविशेत्युक्तवंतः हे तात तात निषीदेति ऋषिवचनात् सो वाहुकः निषादो भवत निषादजातीयो भवेदित्यर्थः ॥ ४५ ॥ तस्य वाहुकस्य ये वंश्यास्ते र

विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रासीद्वाहुको नरः ॥ ४३ ॥ काककृष्णोतिह्रस्वांगो ह्रस्ववाहुर्महाहनुः ॥
ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ॥ ४४ ॥ तं तु तेवनतं दीनं किं करोमीति वादिनम् । निषीदेत्यब्रुवंस्तात स निषादस्ततो
भवत् ॥ ४५ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ॥ येनाहरज्जायमानो वेणकल्मषमुल्वणं ॥ ४६ ॥ इति श्री भागवते महापुरा
णे चतुर्थस्कंधे चतुर्दशोध्यायः ॥ १४ ॥ मैत्रेय उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ वाहुभ्यां मथ्यमानाभ्यां मिथुनं सम
पद्यत ॥ १ ॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् ॥ २ ॥ ५ ५ ५

नैषादाः गिरेः काननं गोचरः आश्रयो नतु पुरादि अवे प्रोष्ये वा ते अभवन् तत्र हेतुः येन कारणेनासौ वाहुको जायमान उल्वणं उत्कटं क
ल्मषं पापं महरत् स्वीकृतवान् ततस्तस्य वंश्यास्तथाभूता इत्यर्थः ॥ ४६ ॥ इति चतुर्थे चतुर्दशोध्यायः ॥ १४ ॥ अथानंतरं तस्य अपुत्रमहीपतेर्वेनस्य
वाहुभ्यां पुनर्विप्रैर्मथ्यमानाभ्यां मिथुनं स्त्रीपुमात्मकं समपद्यत उद्भवत् ॥ १ ॥ ब्रह्मवादिनो ऋषयः तज्जातं मिथुनं दृष्ट्वा भगवत्कलां भगवदं

सरितः समुद्राश्च गिरयो हिमवदादयः नागाः सर्पाः खगाः शकुनयो घोरादयश्चैवमेवं सर्वभूतान्युपायनं सन्मानिकं समाजह्रुः ॥ ११ ॥ स महाराजः पृथुर्

भिषिक्तः सुवासाः कौशेयादि महदाहर्वस्त्रैः स्रग्वी स्रग्भेजयंती अस्यास्तीति स्रग्वी अलंकृतः किरीटाद्याभरणैरिति शेषः तयालंकृतया भार्यया

या अर्चिषा सह अपरोऽग्निरिव रेजे रराज ॥ १२ ॥ सर्वभूतानि समाजह्रुरुपायनमित्येतत्प्रपंचयति । तस्मा इति हे वीर तस्मै पृथवे धनदः कुबेरः हैमं हिरण्म

यं श्रेष्ठं सिंहासनं जहार सलिलस्रावी यस्मात्तथाभूतं शशिप्रभमातपत्रं वरुणः आजहारेत्यनुषंगः ॥ १३ ॥ वायुर्द्वे वालव्यजने कीर्तिमयी कीर्तिप्रचु

तस्याभिषेक आरब्धे ब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मै आजह्रुः सर्वतो जनाः ॥ ११ ॥ सरित्समुद्रा गिरयो नागा गावः खगा

मृगाः ॥ द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनं ॥ १२ ॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः । पत्न्यार्चिषालंकृतया विरेजेऽग्नि

रिवापरः ॥ १३ ॥ तस्मै जहार धनदो हैमं वीर वरासनम् ॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥ १४ ॥ वायुश्च

वालव्यजने धर्मः कीर्तिमयीं स्रजम् ॥ इंद्रः किरीटमुत्कृष्टं दंडं संयमनं यमः ॥ १५ ॥

रं कीर्तिसंपादकत्वेन तस्याः चतुर्थमत्र विवक्षितं स्रजं धर्म आजहारेति सर्वत्रानुषंगः संयमनं दुष्कृद्विषयसमीचीननियमनसाधनं दंड

॥ १४ ॥ ब्रह्मा च तुर्मुखः ब्रह्ममयं वेदमयं ब्रह्मप्रवचनापादकसामर्थ्यवत्त्वेन ब्रह्मप्राचुर्यमत्र विवक्षितम् । वर्म कवचं भारती सरस्वती उत्तमं म

हार्हं हारं हरिरूपेंद्रः सुदर्शनं चक्रं यद्यपि यो भगवदंशोऽनुप्रविष्टः न हेदं चक्रमपि सुदर्शनांशेनानुप्रविष्टमिति भावः तत्सत्त्वो हरिश्रीः

तं प्रशंसुर्विप्राः प्रशंशंसतिस्म प्रशंसुः गंधर्वश्रेष्ठा जगुः गानं कृतवंतः सिद्धाः सुमनोधाराः पुष्पवृष्टीर्मुमुचुः स्वःस्त्रियः स्वःस्वर्गस्तत्रस्थाः स्त्रियः १
अप्सरसः नृत्यंति ननृतुः ॥७॥ शंखादयो दुंदुभ्यादयः विनेदुः तत्र पृथोः समीपे देवादीनां गणा उपाजगुः आगताः गुरुः पिता हितोपदेष्टा च ब्र
ह्मा चतुर्मुखः देवैः सहागत्य वैन्यस्य वेनापत्यस्य पृथोर्दक्षिणहस्ते गदाभृतो भगवतश्चिह्नं रेखात्मकं चक्रादिकं दृष्ट्वा ॥८॥ तथा पादयोर
रविंदं च दृष्ट्वा पृथुः हरेः कलामंशं मेने अप्रतिहतं रेखात्मना वैरभिन्नं चक्रं सुदर्शनं यस्य चिह्नं तस्य परमेष्ठिनः परमपुरुषस्य अधिकरणे इमे

प्रशंशंसति स्म तं विप्रा गंधर्वप्रवरा जगुः ॥ मुमुचुः सुमनोधाराः सिद्धाः नृत्यंति स्वःस्त्रियः ॥७॥
शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि ॥ तत्र सर्व उपाजग्मुर्देवर्षिपितॄणां गणाः ॥८॥ ब्रह्मा
जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः ॥ वैण्यस्य दक्षिणे हस्ते दृष्ट्वा चक्रं गदाभृतः ॥९॥ पाद
योररविंदं च तं वै मेने हरेः कलां ॥ यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥१०॥ ध्र

पृथ्व्यां परमेष्ठिने इति तत्तनीयां तपा वेनुतनस्य पृथोः परमेष्ठिना ब्रह्मणा ब्राह्मणैः सहाभिषेकः आरब्ध इत्यन्वयः ॥ अंशः सन्निति पाठे अप्रतिह
तं रेखात्मना वैरसंकीर्णं चक्रं रेखात्मकं चक्रं अंशः सन् सुदर्शनांशः सन् यस्य स्थितमिति शेषः ॥ अंशशब्दापेक्षया सन्निति पुल्लिंगनिर्दे
शः ॥१॥ अभिषेचनकानि अभिषेकसाधनानि सर्वतो दिग्भ्यो जनाः अस्मै पृथवे आजह्रुः आहृतवंतः ॥१०॥

उक्तमेवाह हे सूतादयः लोकेऽधुनाऽस्पष्टगुणस्य सतो मे मम एष युष्माभिः करिष्यमाणः स्तवः किमाश्रयो योज्यतां लोके प्रख्याता हि गुणाः स्तो
त्रविषयाः अप्रख्यातगुणस्य मे स्तवो विषयाभावाद्विनश्यः स्यात् अतो वो युष्माकं स्तुतिगिरः मयि वितथा मा अभूवन् ॥२०॥ तस्मात्परोक्षेकार
लानरदेवस्य पृथोर्गुणेषु सत्सु अस्मानुपाश्रितानि यशांसि प्रति स्तोत्रमलं समर्थं करिष्यथ हे अपीच्यवाचः मधुरवाचः सूतादयः सभ्यैः प्रे
रिता वयं त्वामेव स्तुमः इति चेत्तत्राह उत्तमश्लोकस्य भगवतो गुणानुवादे कार्ये सति जुगुप्सितमनुत्तमश्लोकगुणानुवादमीदृशं सभ्यान

सिंधवो पर्वता नद्यो रथवीथीर्महात्मनः ॥ सूतोऽथ मागधो वंदी तं स्तोतुमुपतस्थिरे ॥२१॥ स्तावकांस्तानभिप्रेत्य पृ
थुर्वैण्यः प्रतापवान् ॥ मेघनिह्रादया वाचा प्रहसन्निदमब्रवीत् ॥२१॥ पृथुरुवाच ॥ भोः सूत हे मागध सौम्य वंदि
न्लोकेऽधुनास्पष्टगुणस्य मे स्यात् ॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः ॥२२॥

स्तवयंति स्तुतिं कारयंति ॥२१॥ ननु गुणानामधुनाऽस्पष्टत्वेऽपि भविष्यद्गुणैरात्मानं जनः स्तावयन्निति चेत्तत्राह महद्गुणानिति ॥ अधुनाऽस
तोऽपि महतां गुणानात्मनि स्वस्मिन् कर्तुं संपादयितुं ईशाः शक्तोऽपि स्तावकैः स्तोतृभिः कः स्तावयेत् स्तुतिं कारयेत् न कोऽपीत्यर्थः ॥ यदि क
श्चिदेते गुणाः अभविष्यन्निति करिष्यमाणाः शत्रुजयादिभिः शौर्यादयो गुणाः स्वस्मिन्नभविष्यन्निति बुध्वात्मानं स्तावयते स कुमतिः
विप्रलब्धो धिधिज्ञो जनानाम् अपहासं न वेद ॥२२॥

दशचंद्राकाराणिविंवानिकोशेयस्मिन्तमसिंडंतेडु आजहारहदइपत्नी अंविकाशतचंद्रंशतंचंद्राकाराणिविंवानियस्मिन्ततन्शतचंद्रंशतचं
द्रास्यंखेटापरपर्यायचर्मेत्सर्थः सोमचंद्रः अमृतमयान् अमृतस्रावितेनतस्याचुर्यमत्रविवक्षितं अम्यानाजहाररूपा। अयंअतिसुंदरंरथं
१६॥ अग्निराजगवं अजस्यगोस्त्र्यंगाभ्यांनिर्मितंचापंसूर्यःरश्मिमयान्रश्मिवत्सर्वत्रप्रवेशसामर्थ्येनतस्याचुर्यमत्रविवक्षितंमूर्द्दरणी
योगमय्यौयोगवदश्मीएदेशप्रापणसमर्थेतेनतस्याचुर्यमत्रविवक्षितं॥ अन्वहं अहरहवलिपूजोजाहईपुष्पंद्यौराजहारः॥१६॥ खेचरासिद्ध

वस्माद्ब्रह्मसमयंवर्मभारतीहारमुत्तमम्॥ हरिःसुदर्शनंचक्रंतत्पत्न्याहृताश्रियम्॥१६॥
दशचंद्रमसिंरुद्रःशतचंद्रंतथांविका। सोमोमृतमयानश्वान्त्वष्टारूपाश्रयंरथं॥१७॥
अग्निराजगवंचापंसूर्योरश्मिमयानिषून्। भूःपादुकेयोगमय्यौद्यौःपुष्पावलिमन्वहं॥१८॥
नाट्यंसुगीतंवादित्रमंतर्द्धानंचखेचराः॥ ऋषयस्त्वाशिषःसत्यासमुद्रःशंखमात्मजं॥१९॥

साध्यगंधर्वादयः॥ नाट्यादीन्याजहुः प्रापयामासुः ऋषयःसत्याः आशिषआजहुः व्रतवंतइत्यर्थः समुद्रः आत्मजं स्वस्माद्भवंशंखं
आजहार॥१७॥ सिंधवोनद्यः नद्यःपर्वताश्चमहात्मनःपृथोरथवीथीः रथमार्गान् आजहुः दद्रुः धातुनामनेकार्थत्वादानेवृत्तिः ततःस्
तारयत्तंपृथुंस्तोतुमुपतस्थिरेउपसमीपेस्थितवंतः॥१८॥ तानमृतादीनस्तावकान्स्तोतुमुद्युक्तानभिप्रेत्यप्रतापवान्महाप्रभावःवेनस्या

पत्यंपृथुःमेघनिर्ह्रादयामेघगर्जनवद्गंभीरयावाचाप्र
हसन्स्मितपूर्वमिदंवक्ष्माणमब्रवीत्॥१९॥

भा॰ चु॰
॥ ९९ ॥

नालमिति द्वाभ्याम् ॥ तेन त्वं महित्वः अनुवर्णने वयं नालं न समर्थाः कुतः यो भवान् देववर्यः देवानां सगुणैर्दीव्यमाणानामपि ब्रह्मादीनां देवः निरति
शयानंतकल्याणगुणजातेन दीव्यमानो भवान् मायया आत्मीयसंकल्परूपज्ञानेन मायया वयुनं ज्ञानमिति मायाशब्दस्य ज्ञानपर्यायत्वात् अवतता
र अवतीर्णः अनंतकल्याणगुणाकरो भगवानेव त्वद्रूपेणावतीर्णः अतः कथमनंतानां गुणानां वर्णने वयं प्रभवेम इत्यर्थः ननु सममनंतानां भ
गवद्गुणानां वर्णने यूयमसमर्था इति ॥ अहं तु मानुषस्तत्कथं मद्गुणानुवर्णने यूयमप्रभवस्तत्राहुः वेनस्यांगाज्जातस्यावतीर्णस्यापि ते
अजहदनंतकल्याणगुणजातस्य भगवद्रूपाभिन्नस्य तव पौरुषाणि पौरुषाणीति शेषः ॥ अप्रतर्क्यतया वाचस्पतीनां ब्रह्मादीनामपि धियो बुद्धयः

नालं वयं ते महिमानुवर्णने यो देववर्योऽवततार मायया ॥ वेणांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धि
यः ॥ २ ॥ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः ॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्या
नि कर्माणि वयं वितन्महि ॥ ३ ॥ एष धर्मभृतां श्रेष्ठो लोके धर्मेऽनुवर्त्तयन् गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनां ॥ ४ ॥

विमुह्यंत्यवयं वयं असमर्था इति यतो ब्रह्मादय एव मुह्यंति इत्यर्थः ॥ २ ॥ यद्यपि तव महिमानुवर्णने वयं नालं तथापि विपुलकीर्तेः हरेरंशावता
रस्य तस्य पृथोः कथामृते आदृताः सादरा वयं मुनिभिरुपदेशो यथा भवति तथा प्रणोदिताः प्रेरिताः संतः श्लाघ्यानि तव यानि कर्माणि
वितन्महि विस्तारयाम ॥ ३ ॥ विस्तारमेव प्रपंचयति ॥ एष इति ॥ एष पृथुः धर्मभृतां वर्णाश्रमादिनुबंधिधर्मानुष्ठानपराणां मध्ये श्रेष्ठः यु
द्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते इत्युक्तरीत्या स्वयं कृत्वा विदष्य कृत्स्नविल्लोकसंग्रहार्थं नितरां
स्ववर्णाश्रमोचितधर्मानुष्ठानपर इत्यर्थः अत एव लोकं अकृत्स्नविल्लोकं धर्मे अनुवर्त्तयन् अनुवर्त्तयिता स्वस्ववर्णाश्रमोचि

॥ ९९ ॥

सगुनवः स्वात्मस्तुतिं निंदंतीत्याह। प्रभव इति। परमोदाराः निरतिशयोदार्यादिगुणसंपन्नाः प्रभवोपि सद्गुणानात्मनि संपादयितुं शक्ता अपि विश्रुताः प्रख्याता अपि ह्रीमंतो लज्जायुक्ताः संतः आत्मनः स्वस्य विगर्हितं पौरुषं तद्विषयं स्तोत्रं वा जुगुप्संति निंदंति॥ २२॥ हे सूताद्याः सूत प्रभृतयः लोके अविदिता अप्रख्याता वयं तु विवरीमभिः नितरां वरिष्ठैर्दीर्घैः सूताद्यापीनि पाठे सूतेतिजात्यभिप्रायेकवचनं तत्र मागधीनामप्युपलक्षणं हे सूतादयः अद्यापि अधुनापि वरिमभिः वरिष्ठैः कर्मभिर्लोके अविदिता वयं अतः कथमहं बालवदात्मानं गापयिष्यामि गीतं करिष्यामीति यात्वेर्तिह्रीह्ली

तस्मात्सरोते स्तुद्भु पश्चुतानसं लेकतिमयस्तोत्रमपीत्यवाच॥ स उत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः॥ २३॥ महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोपि। तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद॥ २४॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः। ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितम्॥ २५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत्॥ २६॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पंचदशोऽध्यायः॥ १५॥ मैत्रेय उवाच॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया॥ १॥

ह्रीत्यादिना पुकतस्मात्स्वगुणमेकवचनं स्तावयिष्यामीत्यर्थः॥ २६॥ इति श्री चतुर्दशोऽध्यायः॥ १५॥ एवमविकत्थपि त्राप्युनात्मस्तुतिः वारिता अपि तुष्टुवुर्वो गायकास्तुष्टुवुरित्याह मुनिः पंचदशेन। इतीति। गायकाः सूतादयस्तस्य पृथोर्वाग्वेवामृतं तस्य सेवया तुष्टं मनो येषां ते मुनिभिर्भगवदंशोऽयं तस्मात्पृथोर्विकत्थपि तत्वादेकत्वाणगुणजाताभिज्ञैर्मुनिभिः प्रचोदिताः संत। इत्युक्तप्रकारेण ब्रुवंतमपि नृपतिं तुष्टुवुः॥ १॥ तत्र गायकाः पृथोः। कल्याणानुगुणानुनाल्पकवस्तुतावात्मना मनसापर्य्यमापादयतः पुनः ममनुग्रहीतानांतत्सामर्थ्यमा

पृथुर्निर्वर्हयति वदनामृतमूर्त्तिना कथंभूतेन अनुरागसहितो वलोको यस्मिन् विशदं मंदस्मितं तेन चारु सुंदरं तेन अत्र क्वचित् क्वचित् वर्त्तमानत्वनि
र्देशो वर्त्तमानसामीप्ये वर्त्तमानवद्वेति भूतनिर्देश आशंसायां भूतवच्चेति द्रष्टव्यम् ॥९॥ अव्यक्तं प्रवेशनिर्गमयोर्विज्ञानं वर्त्म मार्गो यस्य नि
गूढं निक्षेप्तेः अगः विज्ञातं कार्यं यस्य गंभीरं वेधः किमर्थमेवं कृतवानिति परैरज्ञाताभिप्रायः उपगुप्तं सुरक्षितं वित्तं यस्य अनंतमहा
त्म्यादेर्गुणानामेकं धाम आश्रयः पृथुः प्रचेता वरुण इव संवृतात्मा समुद्रावरणेन वरुण इव चतुर्भिः समुद्रैः जलप्राकारादिभिर्वा परिवेष्टित

देवेवर्षत्यसौ देवो नरदेववपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत् ॥८॥ आप्याययत्यसौ लोकं वद
नामृतमूर्त्तिना ॥ सानुरागावलोकेन विशदस्मितचारुणा ॥९॥ अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा
उपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥१०॥ दुरासदो दुर्विषह आसन्नो
पि विदूरवत् ॥ नैवाभिभवितुं शक्यो वेणारण्युत्थितोनलः ॥११॥ अंतर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः ॥ उदासी

मूर्त्तिः वरुणस्यापि पृथूक्तगुणा द्रष्टव्या ॥१०॥ दुरासदः शत्रोर्मनसाप्राप्तुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः आसन्नः सन्निहितोपि
विदूरवत् सौरूप्येणाभिभवितुमशक्यः वेनएवारणिस्तस्मादुत्थितोनलोग्निरिव अनलस्याप्येते गुणा द्रष्टव्याः ॥११॥ चारणैर्गूढपुरुषैः अं
तर्बहिश्च भूतानां कर्माणि पश्यन्नपि स्तुतिनिंदादावुदासीनो वर्त्तिष्यते देहिनां मध्ये अक्षो देहधारणप्रधानहेतुभूतः सर्वात्मा तत्र रूपो वा
युरिव सर्वान् लोकानिति द्रष्टव्य आर्षः वायुरात्मेव देहिनामिति पाठांतरं तत्र आत्मा अंतः प्रविश्य धारको वायुरिव समर्थः उदासीनद्रष्टा तत्र ह देहिनां

नधर्ममनुप्राप्यपिताधर्मसेतूनां धर्मः सेतुर्येषां तेषां सेतुर्हितानीराणां प्रतिलंभकः नहतं श्रोतस्मात् धर्मः सुसमीहितप्रापकोयेषांतेधर्मसेन
वः धर्मैकशरणाः साधवइतियावत् तेषां गोप्तानसरिपंथिनां धर्मविरोधिनामसाधूनां शास्तायद्वाधर्मा एव सेतवः मर्यादायेषां गोप्ता
देवाकाले गोप्तापेक्षायां लोकधर्मेनुवर्तयन् इत्सपेक्षितप्रकारनिर्देशः ॥४॥ एषइयुः स्वयमेकपालानां समूर्येद्राहीनां तनुः तनुवल्काया
पयोग्यपृथक्सिद्धविशेषणाभूतानामाधारणान् गुणान् ॥ तनुशब्दस्य शरीरपरत्वेपि कार्यापयोग्यपृथक्सिद्धविशेषणत्वमेवप्र
वृत्तिनिमित्तं तद्गुणाः परत्वेपितुल्यं तनौ स्वदेहहे काले काले यथाभागं भागमनतिक्रम्य उभयोर्लोकयोर्हितं यथाभवति विभर्त्तिं इह

एषवैलोकपालानां विभर्त्येकस्तनौ तनूः ॥ काले काले यथाभागं लोकयोरुभयोर्हितम् ॥५॥ वसुका
ल उपादत्ते काले चायं विमुंचति ॥ समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः ॥६॥ तितिक्षत्यक्रमं वै
ए उपर्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्त्तानां क्षितिवृत्तिमान् ॥७॥

लोकस्य पालयोषणानुरंजनद्वारेणामुष्यलोकस्य यज्ञादिप्रवर्त्तनेन तेनैवं यथाभागं हितं यथाभवति यथा विभर्त्ती सर्थः ॥५॥ तत्रसूर्यादिनतुधारणमेवाहर
वृष्टिः वसुधनं काले ग्रहणकाले उपादत्ते स्वीकरोति काले दुर्भिक्षकाले विमुंचति ॥ अष्टौमासान् सूर्यो यथा प्रतपन् वसुजलमादत्ते वर्षासु विमुंचति
तद्वत् अतएव सर्वेषु भूतेषु समः ॥६॥ वैन्यः प्रभुः उपरिसल्लकेपादादिना आक्रमतामप्यार्त्तानां भूतानां करुणः करुणावान् अतिक्रमं तितिक्षति
सहिष्यते अतः क्षितिवृत्तिमान् क्षितेर्धर्मे यो वृत्तिस्तद्वसद्वर्त्तनेन रद्दृत्तिर्यस्यास्तीति ॥७॥ देवे अवर्षति सति कृच्छ्रंगताः प्राणायामांताः प्रजाः स्वयं
वृष्टिं कृत्वा इंद्रवद्रक्षिष्यति ॥ अत्रहेतुः असौनरदेववपुर्हरिरिति ॥८॥ असौ ह्ययुवरनासृतमर्त्तिनावरनएवामृतमर्त्तिस्त्वं इत्तेन लोकमाप्या

भा॰ चं॰

॥१०१॥

साधुषु दंडपाणिरिवेमपराधक्षमो अनेनादंड्यमित्रपक्षपाताभाव उक्तः यो न रुक्मम् ॥१८॥ एष महावीरः पृथुः ओजसा बलेन गां भूमि
मोषधीर्दोग्धा मेदिनी ओषधीर्धास्यतीत्यर्थः । अनुकथितं चेति दुहेः द्विकर्मकत्वात् गामिति द्वितीयानिर्देशः तया इमां भूमिं स्वधनुःकोट्यापरितः स
मां करिष्यति ॥१९॥ किं बहुना यस्य नाम्ना आख्याय इति यत्र नामावतारं नः कल्याणगुणनिधिर्भगवानिहावतीर्ण इत्याहुः ॥ अयं त्विति ॥ अयं त्विह
स्वेनेन निरस्तसाम्यातिशयत्वमभिप्रेतं । तत्र हेतुः साक्षाद्भगवान् भगवच्छब्दप्रवृत्तिनिमित्तभूतज्ञानादिषाड्गुण्यपूर्णः हेयगुणराहित्यमुक्तं ते
नूरस्य इति निर्विकार इत्यर्थः अधीशः त्रिलोकेशः त्रिविधचेतनानामीश इति वा एवंभूतोयः परमात्मा स कलया स्वांशेन जीवेनावती

अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः ॥ यस्मिन्नविद्यारचितं निर
र्थकं पश्यंति नानात्वमपि प्रतीतं ॥१९॥ अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेव
नाथ ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥२०॥ छ

र्णः शरीरभूतपृथ्वाख्यजीवोपलक्षितो वतीर्णः आवेशावतार इत्यर्थः यद्वा यो भगवान् स आत्मा जीवशरीरकः विशेष्यसंनिधौ गवा
दिशब्दानां व्यक्तिपर्यंतत्ववज्जीववाचिनोपि आत्मशब्दस्य शरीरिपरमपुरुषपर्यंतत्वस्याहृतिनयसिद्धत्वात् । कलया इत्थंभूतलक्ष
णे तृतीये यस्मात् पृथक्सिद्धज्ञानादिगुणविशेषणोपलक्षितो अवतीर्ण इत्यर्थः ॥ कोसावात्मा यच्छरीरकोवतीर्ण इत्यत्राह ॥ यस्मि
न्निति । यस्मिन् जीवप्रतीतमपि अविद्यारचितं प्रकृतिपरिणामरूपं नानात्वं देवमनुष्यादिभेदं निर्गतं अर्थाद्धेतुनेः । निरर्थकं अवा ॥१०१॥

रवद्धसुः आत्मद्विषां शत्रूणामपि सुतवदंड्यं नदंडयति सुतमप्रहणं स्वात्मजमामर्थ्य आत्मजमपि दंड्यं दंडयति यतोसौ धर्मे स्थितः यमस्य वृत्तौ स्थितः ॥१२
अस्य पृथोश्चक्रं आज्ञारूपं चक्रं अप्रतिहतं सत् मानसाचलं समभिव्याप्य वर्त्तते किंवत् यथा मानसाचलादिति यतोसौ अर्कः सूर्यो यावत् गोगणैः कि
रणैस्सह तपति तावत् वर्त्तते ॥१४॥ राजशब्दप्रवृत्तिनिमित्तं प्रजारंजनरूपं अस्मिन्नेव पुष्कलमित्याहुः रंजयिष्यतीति ॥ अयं एष पुरात्मनः स्वा
स्वाविचेष्टितैः व्यापारैः यतो लोकं रंजयिष्यति अथ ततः मनोरंजनहेतुभिः अमुं राजानं प्रजाः आहुः ॥१५॥ दृढव्रतः अप्रतिहतसंकल्पः संक

नदंड्यं दंडयत्येष सुतमात्मद्विषामपि॥ दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः॥१३॥ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात्
वर्त्तते भगवानर्को यावत्तपति गोगणैः॥१४॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः॥ अथामुमाहू राजानं मनोरंजनकैः प्र
जाः॥१५॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः॥ शरण्यः सर्वभूतानां मानदो दीनवत्सलः॥१६॥ मातृभक्तिः परस्त्रीषु पत्न्या
मर्द्ध इवात्मनः॥ प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनां॥१७॥ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्द्धनः॥ मुक्तसंगप्रसंगो

यं दंडपाणिरसाधुषु॥१८॥

स्योपि न स्यनाम समीचीनविषयदृष्ट्याह। सत्यसंधः सत्यं समीचीनं संधते संकल्पयति इति सत्यसंधः ब्रह्मण्यः ब्राह्मणेषु साधुः वृद्धानां ज्ञानवृद्धा
नां सेवकः सर्वभूतानां शरण्यः रक्षकत्वेन विश्वसनीयः मानदः सम्मानकरः दीनेषु वत्सलः ॥१६॥ परस्त्रीषु परदारेषु मातरीव भक्तिर्भजनं
यस्य आत्मनो देहस्यार्द्ध इव पत्न्या वर्त्तते प्रजासु पितृवत्स्निग्धः दोषानवेक्षणेन प्रीतिपूर्वकमनुवर्त्तनशीलः ब्रह्मवादिनां ब्रह्मविदां किं
करो दासः ॥१७॥ देहिनामात्मवत् निरतिशयप्रीतिविषयः सुहृदामानंदं सुखं वर्द्धयतीति तथा मुक्तसंगेषु वीतरागिषु प्रसक्तः प्रसंगो यस्य ॥ अ

तस्मैतया प्रदक्षिणं कुर्वंतेएष्यवेलोकपालैरिंद्रादिभिः सहितान्नृपालाराजानः तवतत्रवलिमुपायनंहरिष्यंतिसमर्पयिष्यंति तेषां परलोकपा
लानांनृणांस्त्रियः नस्पृष्टोपार्थशः उच्चरंतः कथयंतः आदिराजंपृथुं चक्रायुधं भगवंतंमन्यंते ज्ञास्यंति ॥२२॥ तद्यशः कथयन्तरूपंस्त्रीणांवाक्यमाहु
रयमित्यादिभिश्चतुर्भिः अयमित्यादिकं नस्तनादिवाक्यंएषप्रेमधामग्नावीरोगांसतीमित्येनेनपोनरुक्त्यापत्तेः अतएवदुदुहे अकरोतुनिलि
ल्युरितिभूतनिर्देशोपपत्तिः अयमधिराजः पृथुप्रजापतिः प्रजापालनाधिकृतः प्रजानांजीवनोपायकरः जीवनोपायंचिकीर्षुरित्यर्थः पर्या
वसानंवोध्यंगांगोरूपधरांमहींदुदुहेदंदद्ववत्स्वशरागस्त्रकोट्याप्रारशदोधनुःपरःधनुः कोट्येतिपूर्वमुक्तत्वान्नशरागस्य धनुः अष्टस्यकोट्या

अयंमहींगांदुदुहेधिराजप्रजापतिर्वृत्तिकरः प्रजानां॥ योलीलयाद्रीन्स्वशरासकोट्याभिंदन्समांगामकरोद्यथेंद्रः॥२२॥
विस्फूर्जयन्नाजगवंधनुःस्वयंयदाचरत्क्ष्मामविषह्यमाजौ॥ तदानिलिल्युर्दिशिदिश्यसंतोलांगूलमुद्यम्ययथामृगेंद्रः॥
२३॥ एषोश्वमेधान्शतमाजहारसरस्वतीप्रादुरभावियत्र॥ अहारषीद्यस्यहयंपुरंदरः शतक्रतुश्चरमेवर्त्तमाने॥२४॥ एष
स्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकम्॥ आराध्यभक्त्यालभतामलंतज्ज्ञानंयतोब्रह्मपरंविदंति॥२५॥

अग्रेणलीलयाअद्रीन्भिंदन्गांभूमिंसमामकरोत्करिष्यतीत्यर्थः॥२३॥ लांगूलंपुच्छमुद्यम्यउन्नमय्ययथामृगेंद्रःसिंहःचरतितथाआज
गवंधनुःविस्फूर्जयन्शत्रुभिःसोदुमशक्योविक्रमोयस्यसः यदाक्ष्मामचरत्तदाअसंतोधर्मविरोधिनोदिशिनिलिल्युःलीनाबभूवु॥२४॥
एषपृथुःसरस्वतीसरस्वत्याख्यमहानदीयत्रयस्मिन्ब्रह्मावर्तेनप्रादुरभाविप्रादुरभूत्कर्मकर्त्तरिचिणतत्रदेशेशतमश्वमेधानाजहा
राऽकरोत्यस्यशतक्रतोःक्रतुप्रातंसंकल्यानुतिष्ठतपृथोश्चरमेशततमेशततमेक्रतौवर्त्तमानेप्रवर्त्तमानेसतिपुरंदरः इंद्रोहयःमश्व

त्तविकं पश्यंति नत्वदर्शिन इति शेषः परमार्थेन आत्मनि अविद्यमानं देहात्माभिमानिनां आत्मनि प्रतीतं अपि नानात्वं देहद्विलक्षणात्मयाथा
त्म्यदर्शिनः प्रकृतिपरिणामरूपत्वेन नकृतमेव पश्यंतीत्यर्थः यस्मिन्प्रतीतं नानात्वमितरेनात्मनि नानात्वस्य प्रतीतिविषयत्वं न तु प्रमितिविष
यत्वमित्युक्तम् । अनेन जीवे नानात्वमविद्यासंबंधकृतं न तु स्वभावत इत्युक्तं भवति यद्वा ननु जीवशरीरकः कलयावतीर्णस्त्वं तज्जीवस्याः विद्या
संबंधाद्याविद्यकाजैवा दोषाः परस्मिन्पुरुषे प्रसज्ज्येयुस्तत्राहुः यस्मिन्निति । यस्मिन्भगवति प्रतीतमपि जीवशरीरकत्वादिना हेतुना प्रतीत
मप्यविद्याकृतं नानात्वं निरर्थकं पश्यंति । अर्थात्प्रयोजनान्निर्गतं निरर्थकमकार्यकरम् । यद्यपि जीवशरीरकत्वादिना प्रतीयते तथा

असैन्नपालाः किल यत्र तत्र बलिं हरिष्यंति सलोकपालाः ॥ मंस्यंत एषां स्त्रि
य आदिराजं चक्रायुधं तद्यश उद्धरंत्यः ॥ २१ ॥ ७ ७

पि जीवदेवबालकत्वयुवत्वादिकं देवादिदेहसंबंधात्प्रतीयमानमपि न वास्तविकं किंतु देवादिदेहगतमेवं परस्मिन्नपि पुरुषे जीवसंबं
धात्प्रतीतमपि जीवगतमेव न तु परमपुरुषगतम् न चैवं जीववत्स्वशरीरत्वाद्वास्तविकेनापि नानात्वेनानर्थप्रसक्तिरिति वाच्यं जी
वस्याप्यनर्थप्रसक्तेः शास्त्रवीरत्वप्रयुक्तत्वाभावात् प्रकृतिवश्यत्वाद्यापन्नत्वात् परमात्मनस्तु मायां स्ववशीकुर्वतः प्रकृतिवश्यत्वकर्म
वश्यत्वाद्यभावेनानर्थाप्रसक्तेः । एतदेवाभिप्रेत्य निरर्थकं पश्यंतीत्युक्तम् ॥ २० ॥ अयं नरदेवनाथः प्रभुः उदयाद्रेः उदयाद्रिपर्यंतं भुवो
मंडलं गोप्ता रक्षिष्यति रक्षणार्थेण कवीरः स्वसमानाभ्यधिकवीरांतरमस्य जैत्रं जयशीलं रथं मास्थाय अधिष्ठाय आत्तधृतः चा

ब्राह्मणादीन् चतुरो वर्णान् भृत्यामात्यान् पुरोधसः पुरोहितान् श्रेणीः तैलिकतंतुविकादीन् पौरान् पुरवासिनः जानपदान् देशवासिनो जना
न् प्रकृतीः निजयोगिनः सम्यगपूजयत् ॥ २ ॥ एवं स्तुतादिस्तुतिकथनव्याजेन समासतः श्रावितं पृथुचरितं मुनिं पुनस्तच्चरितं शुश्रूषया
पृच्छति विदुर इति ॥ बहुरूपिणी कामरूपिणी धरित्री कस्माद्धेतोः गोरूपं दधार यां धरित्रीं पृथुर्दुदोह तत्र वत्सः कः दोहनं दोहनसाधनं
पात्रं ॥ ३ ॥ प्रकृत्या स्वभावेन विषमा पर्वतादिभिर्निम्नोन्नता देवी धरित्री कथं समीकृता तस्य पृथोर्मेध्यं यज्ञार्हं हयमश्वं देवः इंद्रः कस्माद्धे

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौरान्जानपदान्श्रेणीः प्रकृतीः समपूजयत् ॥ विदुर उवाच ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किं ॥ ३ ॥ प्रकृत्या विषमा देवी कृता तेन समा कथम् ॥ तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥ ५ ॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभोः ॥ श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥

तोः अपाहरत् ॥ ४ ॥ हे भगवन् मैत्रेय ब्रह्मविदां मध्ये उत्तमात् सनत्कुमारात् ब्रह्मविषयं सविज्ञानं उपासनात्मकज्ञानसहितं ज्ञानं श
रणं ज्ञम्य ज्ञानं लब्ध्वा राजर्षिः पृथुः कां गतिं गतः प्राप्तः ॥ ५ ॥ सुश्रवसः शोभनकीर्तेः प्रभोर्भगवतः कृष्णस्य यः पूर्वदेहः प्रथमोऽवतारः
पृथुस्तस्य याः कथाः तदाश्रयं तन्निपाद्यं पुण्यं पापवतोऽपि पुण्यसंपादकं श्रवो यशः यच्चान्यदस्ति तत्सर्वं ॥ ६ ॥

राधः पृथुः स्वसद्मनः स्वगृहस्य उपसमीपे यदृनं तत्समेत्य तैकमसहायं भगवंतं सनत्कुमारं भक्त्या आराध्य तदमलं ज्ञानमलभत किं तत् यतो ज्ञा
नात् परं ब्रह्माविंदति ॥ २६ ॥ विश्रुताः विक्रमाः यशांसि यस्य स पृथुः पराक्रमो यस्य सः पृथुः ॥ आत्माश्रयाः स्वविषया गाथाः एवं धर्मरूपास्तास्ता गिरः
श्रोष्यति ॥ २७ ॥ स्वतेजसा स्वबलेन उत्पादिताः लोकानां प्रात्मसदृप्ता दुरात्मानो येन सः अत एव अप्रतिहतचक्रः अप्रतिहताज्ञः दिशो विजेष्य
ति सुरासुरेश्वरैः उपगीयमानः महाननुभावो यस्य सः भुवः पतिः भविता भविष्यति ॥ २८ ॥ इति श्रीचतुर्थे षोडशोऽध्यायः ॥ १६ ॥ एवं सूतादिभिः प्र

नत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः ॥ २६ ॥ दिशो
विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रैरुपगीयमानमहानुभावो भविता
पतिर्भुवः ॥ २७ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे षोडशोऽध्यायः ॥ १६ ॥ श्रीमैत्रेय उवाच ॥ एवं
भगवान्वैण्यः ख्यापितो गुणकर्मभिः ॥ छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च ॥ १ ॥

ख्यापितोहगुणगणाः पृथुः प्रतिपूजितः सत्तत्र ब्राह्मणश्रेष्ठामास्तगणः क्षुत्पीडितजनैः प्रापन्नशरणा आत्मनिरुद्धवीजां महीं जिघांसुः पुनस्त
या प्रसादिते वृभवेत्याह मुनिः षोडशेन एवमिति ॥ भगवान्वैण्यः पृथुरेवं गुणैः कर्मभिश्चात्मीयैः प्रख्यापितः प्रसिद्धिं प्रापितस्तान्सूतादी
न् कामैः स्तनदिष्टाविषयैर्वस्त्राभरणादिभिः प्रतिपूज्य तेषां स्तुतिमभिनंद्य च छंदयामास तोषितवान् ॥ १ ॥

प्रजानां करुणं परिदेवितं विलापं निशाम्य श्रुत्वा पृथुः दीर्घं चिरं दध्यौ चिंतितवान् हे कुरुश्रेष्ठ सः पृथुः निमित्तं लोकस्य निरन्नत्वे निमित्तं हेतुं अ
न्वपद्यत ज्ञातवान् ॥१२॥ इतीति पृथिव्या ओषधिवीजानि ग्रस्तानीति व्यवसितः निश्चितवानः प्रगृहीतं शरासनं धनुर्येन सः यथा त्रिपुरहंता रु
द्रः तथा स्वहेतोः क्रुद्धः विशिखं बाणं संदधे ॥१३॥ उद्यतायुधं शरासने संहितशरं पृथुं निशाम्य दृष्ट्वा धरणी प्रवेपमाना कंपितांगी भयात्कंपमाना गौः
सती गोरूपं धृतवती मृगयुना व्याधेन क्रुद्धेन द्रुता अनुद्रुता भीता मृगीव हरिणीव अपाद्रवत् पलायितवती ॥१४॥ तत्र तत्र तामेव द्रुतगोरूपां धृ

श्रीमैत्रेय उवाच ॥ पृथुः प्रजानां करुणं निशम्य परिदेवितं ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोन्वपद्यत ॥१२॥ इति व्यवसितो
बुद्ध्या प्रगृहीतशरासनः ॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥१३॥ प्रवेपमाना धरणी निशाम्योदायुधं च तं
गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥१४॥ तामन्वधावत्तद्वैण्यः कुपितोत्यरुणेक्षणः ॥ शरं धनुषि संधाय
यत्र यत्र पलायते ॥१५॥ सा दिशो विदिशो देवी रोदसी चांतरं तयोः ॥ धावती तत्र तत्रैनं ददर्शानूद्यतायुधम्
॥१६॥ लोके नाविंदत त्राणं वैण्यान्मृत्योरिव प्रजाः ॥ त्रस्ता तदा निववृते हृदयेन विदूयता ॥१७॥ ॥

तवतीमनुसृत्य गतवान् ॥१५॥ सा देवी धरित्री दिशो विदिशः रोदसी द्यावापृथिव्यो तयोरंतरं अंतरिक्षं च धावती सती तत्र दिग्विदिगादिषु एनं
पृथुं अनुप्रविष्टं उद्धृतमुद्यतमायुधं येन तं ददर्श ॥१६॥ मृत्योर्भीताः प्रजा इव वैण्यात् पृथोः त्रस्ता सती त्राणं रक्षणं पापं लोके नाविंदत न ल
ब्धवती किंतु तदा विदूयता खिन्नतां गमुपतप्तेन हृदयेन निवृत्ते न्यवर्तत ॥१७॥

तव अधोक्षजस्य च भक्ताय अनुरक्ताय मे मह्यं वक्तुमर्हसि कोसावधोक्षजो यस्य भक्ताय मे सुक्तेन त्वाह योधोक्षजो वैणरूपेण पृथुरूपेणावती
र्ण इमां गां पृथ्वीमदुह्यत् दुग्धवान् ॥७॥ एवमापृष्टो मुनिर्विस्तरेण पृथुचरितं वक्तुमुपचक्रमे इत्याह सूतः चोदित इति ॥ अस्य शुकवचनस्त्वं तु
न्माध्यम् । विदुरेणैवं वासुदेवस्य पृथोः कथां प्रति चोदितो मैत्रेयः प्रीतमनाः सन् तं विदुरं प्रशस्य प्रत्युत्तयमभाषत ॥८॥ अंग हे विदुर
विप्रैर्यदा पृथुरभिषिक्तः जनतायाः जनसमूहस्य ग्रामजनबंधुसहायेभ्यस्तलिति समूहार्थे तत्प्रत्ययः पाल इत्यामंत्रितो नियुक्तश्च

भक्ताय मेनुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुमर्हसि योऽदुह्यद्वैणरूपेण गामिमां ॥७॥ सूत उवाच ॥ चोदितो विदुरेणैवं वा
सुदेवकथां प्रति । प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥८॥ श्रीमैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रि
तो जनतायाश्च पालः ॥ प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥९॥ वयं राजन् जाठरेणाभितप्ताः ॥
यथाग्निना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥१०॥ तन्नो भवानीहतु रात
वेन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नंक्ष्यामह उज्झितोर्जा वार्त्तापतिस्त्वं किल लोकपालः ॥११॥

नरहितक्षितिपृष्ठे भूमंडले निरन्ने अन्नरहिते सति क्षुधाक्षामाः क्षीणदेहा यासां ताः प्रजाः एत्य समीपमागत्य पतिं पृथुमब्रुवन् ॥९॥ हे राजन् यथा कोट
रगतेन वह्निना वृक्षा अभितप्ता भवंति तथा वयं जाठरेणाग्निना अभितप्ताः संतः यो भवान् अस्माकं वृत्तिकरः पतिः विप्रैः साधितः मथनेन सं
पादितस्तं शरण्यं त्वाम् अधुना शरणं याताः गताः ॥१०॥ तस्मात् हे नरदेव उज्झितोर्जाः त्यक्तान्नाः वयं यावन्न नंक्ष्यामहे न नाशं यास्यामस्तावद्देव
क्षुधा अर्दितानां पीडितानां नः अस्माकं अन्नं रातवे दातुं भवान् ईहतु यत्नं करोतु यतस्त्वं वार्त्ताया जीविकायाः पतिः रक्षिता लोकानां पालकश्च

पकारः नभिज्ञायास्तवाऽयं द्वितीयोऽपराध इति भावः ननु सापराधाया अपि गोरूपाया ममवधोऽनुचितस्तत्राह यवसमिति यागोरनुदिनं यवसं
तृणमेव परं जग्ध्वि अत्ति पय अथ पयस्तु नैव संदोग्ध्री न प्रपूरयति तस्यां दुष्टायां गवि दंडएवोचितः ॥ अमत्राऽदुष्टायां गवि दंडो न प्रशस्य
ते इत्यस्यार्थं धर्मो हृष्यत इति भावः ॥२३ स्वयंभुवा ब्रह्मणा भूतानां जीवनार्थत्वेन प्राक् कल्पादौ सृष्टानि ओषधिबीजानि आत्मनि स्वस्यां हृतानि
आत्मनि गूढानि तानीत्यर्थः मां भूतपालनाधिकृतं अवज्ञाय पराभूय अतएव मंदधीस्त्वं न मुंचसि ॥ अतस्त्वद्वधउचितएवेति भावः ॥२४॥ तर्हि

यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः तस्यामेवं हि दुष्टायां दंडो नात्र न शस्यते २३
कं इत्युक्तम् । पूर्वं व्याख्यातो विकारी न्याप्रकृतिस्वरूपमपि यत एव प्रकृतिपुरुषाभ्यां विलक्षणः परमात्मा अत एव हेतोः देहाद्युपात्ता आदिशब्देन जीव

यावं संतमात्मानमात्मस्थं वेद पूरुषः ॥ नाश्नते प्रकृतिस्थोपि तद्गुणैः समयिस्थितः ॥ ८ ॥

संग्रहः देहे जीवे च्योपात्ताः परिणामित्वकिंचिज्ञत्वसुखित्वादयः ॥ औपाधिका धर्माः न ह्मीः प्रकृतिपुरुषैकांताः जडत्वाणुत्वादयः स्वभाविकाश्च त
द्गुणः प्रकृतिपुरुषयोः साक्षात्कर्तुः आत्मनः तयोरंतर्व्याप्यावस्थितस्य परमपुरुषस्य न स्युः कैवल्यं प्रकृतिपुरुषगतधर्मराहित्यमेव तस्य प
रमपुरुषस्य वैधर्म्यं नाम यद्धानस्य पतवैधर्म्यं प्रकृतिपुरुषगतपरत्वाणुत्वादिविपरीतप्रत्यक्त्वापरिच्छिन्नत्वादिधर्मवत्वं कैवल्यं प्रकृतिपु
रुषाभ्यां वैलक्षण्यं नामेत्यर्थः तत्र जीवात्परमात्मनो वैधर्म्ये सुषुप्तिसुषुप्तिः निदर्शनमुदाहरणमित्यर्थः सुषुप्तग्रहणं उत्क्रांतेरप्युपलक्षणं
तथाहि सुषुप्त्युत्क्रांत्योः ॥ प्रत्यगात्मनो यीतरत्वेन परमात्मनो व्यपदेशो दृश्यते ॥ तावद्वाजसनेयके कतम आत्मा यो यं विज्ञानमयः प्राणे
ष्विति प्रकृतस्यात्मनः सुषुप्त्यवस्थायां अकिंचिज्ञस्य सर्वज्ञेन परमात्मना परिष्वंग आम्नायते प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं
किंचन वेद नांतरमिति तथा उत्क्रांतावपि प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति ॥ न च स्वयमुत्क्रामतो वा अपि किंचिज्ज्ञस्य तदानीमेव स्वेन

उक्तमेवाह ॥ एष इति । एष इंद्रस्तेन व हयमेधशतस्याश्वमेधशतसंकल्पस्य हि यस्मात् भंगमकार्षीत् अत आत्मानं त्वां क्षमापयतः क्षमां कारयत । अमुष्य इंद्रस्य त्वं क्षंतुमर्हसि इंद्रविषये क्षमां कर्तुमर्हसीत्यर्थः ॥ २ ॥ कथं दुःसहोपराधः सोढुं शक्यस्तत्राह सुधिय इति । हे नरदेव लोके नरोत्तमाः सुधियः देहात्मव्यतिरिक्तात्मविदः साधवः परोपकारपराः । अत एव आगस्कृद्भ्योऽपि भूतेभ्यो नाभिद्रुह्यंति कुतः यर्हि यस्मात्कलेवरं अनात्मा आत्मेतरत् अतस्तदभिमानेन द्रोहं न कुर्वंतीत्यर्थः सुधियां सोढुं शक्यमेवेति भावः ॥ ३ ॥ एवमन्वयमुखेन सुधियामद्रोहकारणमभिधाय व्यतिरेकमुखेनाह । पुरुषा

॥ भा० ४ ॥

श्रीभगवानुवाच ॥ एष तेऽकारिषीद्भंगं हयमेधशतस्य ह ॥ क्षमापयत आत्मानममुष्य क्षंतुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ॥ ३ ॥ पुरुषा यदि मुह्यंति त्वादृशा देवमायया । श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः ॥ आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥

इति । यदि त्वादृशाः सुधियः पुरुषा ईश्वरमायया यदि मुह्यंति देहात्ममोहेन देहप्रयुक्तं भूतद्रोहादिकं कुर्वंति तर्हि त्वादृशैरीश्वरकालकृतयामहतां सेवया श्रम एव परं केवलं जातः संपादितः ते दुर्धिय एवेति भावः ॥ ४ ॥ अतः सुधियां देहात्माभिमानप्रयुक्तभूतद्रोहादेरभावात् अन्यथा दुर्धीत्वप्रसंगाच्च इमं कायं देहं अविद्याकामकर्मभिः ॥ अविद्या अज्ञानं तच्च देहात्माभिमानस्वतंत्रात्माभिमानरूपेण द्विविधं काम अविद्यामूलकः शब्दादिविषयेष्विच्छाविशेषः कर्म काममूलकं पुण्यपापपुण्यरूपं एभिरारब्ध उत्पादित इत्येवमिमं कायं देहं विद्वान् जानन् अत एव प्रबु

दृः चिदचिदीशयाथात्म्यज्ञः अस्मिन्देहे नैवानुषज्यते एवकारेण नितरामासक्त्यभावः सूच्यते ॥५॥ देह एवानाशक्तः कथं देहानुबंधिष्वासक्तः स्या
दित्याह ॥ असंसक्त इति ॥ अस्मिन् शरीरे असंसक्तः समित्येकीकारे आत्मना सह देहमेकीकृत्य न तिष्ठन्नासक्त इत्यर्थः अमुना शरीरेणोत्पादिते संपा
दितेगृहे अपत्यपुत्रादौ द्रविणे वित्ते च ममतां को वा बुधः कुर्यात् अज्ञस्तु कुर्यादित्यर्थः अतो बुध देहार्थं देहानुबंधार्थं वा भूतद्रोहादिकं न कुर्यादि
ति भावः ॥६॥ बुध इत्यनेन चिदचिदीशयाथात्म्यज्ञानवत्वमुपक्षिप्तं तत्कीदृशमित्यपेक्षायां तत्र एक इति द्वाभ्यां चिदचिदीशस्वरूपं विशोधयन् एव
मित्येकेन आत्मयाथात्म्यज्ञानयोगस्य भगवज्ज्ञानांगत्वेन तएकेन कर्मयोगस्य तदंगत्वमभिधाय तद्द्वयानुगृहीतभक्तियोगस्य भगवत्प्राप्त्यु
पायतामभिधायेह श्रीभगवदुपासनविघ्नस्य देहतदनुबंधिप्रयुक्तविकारानस्मुरित्याह ॥ एक इत्यादिना ॥ प्रकृतीनिविविक्तात्मस्वरूपबोधः

असंसक्तः शरीरेस्मिन्नमुनोत्पादिते गृहे ॥ अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥६॥
एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः ॥ सर्वगोनावृतः साक्षी निरात्मात्मनः परः ॥७॥

नेन प्रकृतिपरिणामरूपदेहस्य तद्विपरीतधर्मवत्त्वस्यापि देवमिद्धेः हृदयकृतबोधनं नापेक्षितमिति तावदात्मस्वरूपं प्रकृतिविविक्तं शोधयति ॥ ए
कः ज्ञानैकाकारतया सर्वत्रैकस्वरूपः एको व्रीहिः सुसंपन्नः सुपुष्टं कुरुते प्रजा इतिवदयं निर्देशः नानाकारेषु देवमनुष्यादिशरीरेष्वव
स्थितोपि सर्वत्र ज्ञानैकाकारतया सर्वत्रैकस्वरूप इत्यर्थः देहस्तु देवमनुष्यपश्वपादरूपतः स्थावरभेदभिन्नः शुद्धः निर्मलः देहस्तु मलि
नः स्वयंज्योतिः स्वयंप्रकाशः निर्गुणः रागद्वेषादिरहितः गुणाश्रयः ज्ञानानंदादिगुणाश्रयः सर्वगः ॥ अणुस्वरूपत्वेपि धर्मभूतज्ञानेन
सर्वव्यापी अनावृतः देहइव गृहादिभिरनावृतः साक्षी देहेंद्रियादीनां अपरोक्षं द्रष्टा देहस्तु परप्रकाश्य ॥ रागद्वेषादिगुणाश्रयः ज्ञाना
दिगुणाश्रयः ज्ञानादिगुणाश्रयः ज्ञानादिगुणाऽनाश्रयः आत्मः आवृतः दृश्यश्चेत्यर्थः अस्ति इदं परकेन आत्मा देहादिष्वंतः प्रविश्य

अतएवत्वं च कतुर्विरमताम् ॥ नन्विंद्रः किं न निवार्यते तत्राह ॥ यतो देवेषु दुरवग्रहो भवति यत्र क्रतौ इंद्रनिर्मितैः पाखंडैर्धर्मव्यतिकरो भवत् ॥ ३५ ॥ इंद्र दुराग्रह कृतमनर्थं प्रपंचयन्नाह ॥ एभिरिंद्रेणावसृष्टैः कल्पितैः पाखंडैः हारिभिश्चित्तापकर्षकैः ह्रियमाणं स्ववशीक्रियमाणं जनं विचक्ष्व पश्य पश्य यस्ते तव यज्ञभुक् यज्ञनाशकः ॥ अश्वं मुष्णाति अपहरतीति तथा ॥ ३६ ॥ ततो मम किमिति चेत्तत्राह ॥ भवानिति द्वाभ्यां नानासमयानुरूपं विविधसिद्धांतानुरूपं धर्मं वैन्यस्यापचारात् व्याप्याद् खलु त्वं परित्रातुं अद्य अधुना तस्य वेनस्य देहतः इह लोके ऽवतीर्

कतुर्विरमतामेष देवेषु दुरवग्रहः ॥ धर्मव्यतिकरो यत्र पाखंडैरिंद्रनिर्मितैः ॥ ३५ ॥ एभिरिंद्रोपसंसृष्टैः पाखंडैर्हारिभिर्जनं ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥ ३६ ॥ भवान् परित्रातुमिहावतीर्णो धर्मं च नानासमयानुरूपम् वेणापचाराद् खलु प्रनष्टं तद्देहतो विष्णुकलासि वैन्य ॥ ३७ ॥ स त्वं विमृश्यास्य भवं प्रजापते संकल्पनं विश्वसृजां पिपीपृहि ॥ ऐन्द्रीं च मायामुपधर्ममातरं प्रचंडपाखंडपथं प्रभो जहि ॥ ३८ ॥ ॥

र्णः वैन्यः वेनपुत्रोपि त्वं विष्णुकलासि विष्णोरंशः प्रादुर्भूतोऽसि ॥ ३७ ॥ सः विष्णुकलाभूतस्त्वं अस्य जगतो भवमुत्पत्तिं विमृश्य विचार्य हे प्रजापते विश्वसृजां संकल्पं पिपीपृहि पूरय ये ब्रह्मादयो विश्वसृजः स्तेषां जगदुत्पत्तिः ॥ तेषां संकल्पपूरयेत्यर्थः ॥ प्रजापालनाधिकृतस्य तवेदं युक्तमित्यभिप्रायेण प्रजापते इति संबोधनं कृतं प्रचंडोयः पाखंडमार्गः सैवेंद्रमायाउपधर्मस्य माता जननी तां जहि प्रभो तथा कर्तुं समर्थस्त्वमित्यभिप्रा

॥ ४८ ॥

उपसंहरति ॥ इत्यमिति पंचभिः इत्थमेवं लोकगुरुणा सम्यगादिष्टो दिशांपतिः दिक्पतिः सम्राट् पृथुः मघोनां इंद्रेण सह तया च यज्ञस्तोकरीत्या सख्यं कृतं तेनैव च संदधे संधिं कृतवान् ॥ २ए कृतमवभृथस्नानं येन तस्मै भृत्विक्कर्मणे विपुलवा पारा यस्य स्नेहयोर्वर्द्धिर्षियत्ते येन र्पिता लेवरदा देव्यो वदेनन्दहुः ॥ ४० सत्याः फलाः विनाभृता ॥ आशिषः आशीर्वादाः येषां ते विप्राः श्रद्धयावाप्तदक्षिणाः अत एव तुष्टाः पुनश्च शक्ताः हेत्ते तः आदिराजाय पृथवे आशिषः युयुजुः कृतवतः ॥ ४१ हे महाबाहो विदुर तथान्येषां तत्र यज्ञसमागतास्ते सर्वे आहताः

मैत्रेय उवाच ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः ॥ तथा च कृत्वा च वात्सल्यं मघोनापि च संदधे ॥ ३ए कृतावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ ४० विप्राः सत्याशिषस्तुष्टाः श्रद्धयालब्धदक्षिणाः ॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४१ त्वयाहूता महाबाहो सर्व एव समागताः ॥ पूजिता दानमानाभ्यां पित्र्यदेवर्षिमानवाः ॥

४२ इति श्रीभागवते चतुर्थस्कन्धे एकोनविंशोध्यायः ॥ १९ ॥ ऋषिरुवाच ॥ भगवानपि वैकुंठः साकं मघवता विभुः ॥ यज्ञैर्यज्ञपतिः स्वि

प्रीतिविषयिकृताः यथायोग्यं दानमानाभ्यां पूजिताः पित्रादयः ॥ ४२ ॥ इति टीकायां ए को न विं शो ऽ ध्या यः ॥ १९ ॥ एवं चतुर्मुखादेशान्निवृत्तक्रोधः कृतशतक्रतुसख्य आहृतलिंगदेवताक आसीदित्युक्तं अथ भगवतानिर्वेदिने क्षमाणः ॥ प्रतिबोधितस्तत्र यथायथात्मस्वधर्मपरस्तस्य वर्तितः ॥ प्रतिनिरुक्तत्रिवर्गोत्थिप्सुप्रशस्त्रिन परमपुरुषः स्वपुरमगादित्याह मुनिरेकोनविंशेन भगवानपीति पादद्धाभ्यां पूर्णाभ्यां यज्ञरक्षकः सर्वयज्ञाराध्यो वैकुंठः पुरमपुरुषः पृथुनुष्ठितैर्यज्ञैः सम्यगाराधितो मघवता सह इंद्रेण सह तं पृथुमभाषतजगाद ॥ १ ॥

उपधर्मेषु धर्माभासेषु अनएव पेशलेषु मृदुलेषु अनुकूलाभासेष्विति यावत् वाग्मिषु मित्रमिव समागिववादिषु नग्नरक्तपटादिषु भाव
प्रधानो निर्दिष्टः ॥ नग्नत्वरक्तपटादित्वयुक्तपाषंडेषु रूपेषु नृणां मतिर्धर्म इति भ्रांत्या प्रायशः सज्जते आसक्ता भवति ॥ २५ ॥ तदिंद्र
कृतं क्रतुविघ्नमभिज्ञाय ज्ञात्वा अपरिमितपराक्रमः पृथुः ॥ कुपितः सन् उद्यतकार्मुकं धनुर्यस्य सः ॥ इंद्राय बाणमादत्त इंद्रं हंतुं बाणं गृहीतवा
नित्यर्थः ॥ २६ ॥ शक्रवधकृताभिकृताभिसंधितं संकृताभिप्रायं अतएव क्रोधेन दुःप्रेक्ष्यं असह्यं परैः सोढुमशक्यं रंहवलं वेगश्च यस्य

धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु ॥ २५ ॥ तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः ॥ इंद्रा
य कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुःप्रेक्ष्यमसह्यरंहसं ॥ निवारयामासुरहो महामते ॥
न युज्यतेत्रान्यवधः प्रचोदितात् ॥ २७ ॥ वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषं ॥ अयातयामोपहवैरनंतरं प्र
सह्य राजन् जुहवाम तेहितम् ॥ २८ ॥ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ॥ स्रुग्घस्तान् जुह्वतोभ्येत्य स्वयंभूः प्रत्यषेध ॥ २९ ॥

तं पृथुमृत्विजः अत्राहयः निवारयामासुः निवारणमेवाह ॥ अहो महामते प्रचोदिताद्विहितात् पशोर्वधात् ॥ अन्यस्य वधस्तु न युज्यते ॥ २७
तद्वधं तु वयं करिष्याम इत्याहुः ॥ वयमिति ॥ इहार्थनाशनं यज्ञनाशकं त्वं कीर्त्यैव हतप्रभं मरुत्वंतमिंद्रं वयमाह्वयामहे ॥ कैरयातयामैरग
तवीर्यैरुपहवैरागमनमंत्रैरनंतरं च हे राजन् नूतनत्वमहितं शत्रुं तमिंद्रं प्रसह्य मंत्रबलेन अग्नये जुहवाम पशुपुरोडाशमिवाग्नौ हो
ष्यामः ॥ २८ ॥ इति तं क्रतुपतिं पृथुमामंत्र्य विज्ञाप्य हे विदुर अस्य पृथोः ऋत्विजः स्रुग्घस्ता येषां तान् रुषा क्रोधेन जुह्वतः होमं कु

प्रतिषेधमेवाह भवतेति आर्त्विज्यकर्मण्यधिकृतानामिंद्रो वध्यो न भवति कुतः यत् यस्मात् यज्ञः भगवतस्तनुः शरीरं तथा सुराश्च यस्य भगवत
इष्टाः निरतिशयप्रीतिविषयाः तनवः ॥ यं यज्ञेन भगवच्छरीरभूतं इंद्रं जिघांसथ यूयं हंतुमिच्छथ ॥ ३० ॥ हे द्विजाः राज्ञः पृथोरेतद्धर्मरू
पं कर्म जिघांसता नाशयितुमिच्छता इंद्रेणानुष्ठितं धर्मस्य व्यतिकरः ॥ यस्मिन्नूनमिदं पाषंडात्मकं महद्दृष्टाय्यं पश्यत ॥ ३१ ॥ नहि तथा चेत् पृथु
कीर्तेः विपुलकीर्तेः पृथोः एकोनशतं यस्मिन् तादृशः क्रतुप्रयोगः एकोनशतक्रतुरपि पृथुः महेंद्रस्य पृथुकीर्तिर्भूयादित्यर्थः पृथुकीर्तिः पृथुरिति शा

नैव धीमवतामिंद्रो यष्टव्यो भगवत्तनुः ॥ यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥ तदिदं पश्यत महत् धर्मव्यतिकरं द्विजाः ॥
इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥ ३१ ॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षध
र्मवित् ॥ ३२ ॥ नैवात्मने महेंद्राय रोषमाहर्तुमर्हसि ॥ उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ॥ ३३ ॥ मास्मिन्महाराज कृथाः स्म चिंतां
निशामयास्मद्वच आहतात्मा ॥ यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽन्धम् ॥ ३४ ॥

देन एकोनशतं क्रतवो यस्य तादृशः पृथुर्भूयादित्यर्थः ॥ पृथुं सांत्वयति । नेत्वया स्विष्टैः सम्यगनुष्ठितैः एतावद्भिः क्रतुभिरलं यत् यस्मात् भवा
न्मोक्षधर्मवित् मुमुक्षोराराधनपरेतमेव कर्मानुष्ठानं युक्तमिति भावः ॥ ३२ ॥ आत्मना मनसा रोषं महेंद्राय आहर्तुं स्वीकर्तुं त्वं नार्हसि । हि यत
स्त्वं महेंद्रश्च एवमुभावपि उत्तमश्लोकस्य भगवतो विग्रहौ शरीरभूतौ अतो नान्योन्यं विरोधो युक्त इति भावः ते तुभ्यं भद्रं भूयात् ॥ ३३ ॥ हे महा
भाग अवहितमना मद्वचो निशामय शृणु अस्मिन् यज्ञविघ्ने चिंतां मास्म कृथाः ॥ यत् यस्मात् दैवहतं कार्यं कर्तुं ध्यायतः पुरुषस्य मनः । अनुनि

ताद्दशाकृतिं यास्वंडाकृतिं तमश्वहर्त्तारं वीक्ष्य जटिलं जटाधारिणं भस्मनाछन्नं हेतुगर्भमिदं विशेषणद्वयं जटिलत्वात् भस्मनाछन्नत्वाच्च शरीरि२
णं मूर्त्तं धर्मं मेनेव आम्येत्यर्थः ॥ अतस्तस्मै अश्वहर्त्तारं हंतुं बाणं न मुंचति । जटिलत्वादिनामं च तद्रूपेणाधर्मेपि धर्मभ्रमकरेणांतस्तस्मै२
बाणं नामुंचदित्यर्थः ॥ १४ ॥ वधादश्वहर्तुर्वधान्निवृत्तं तं पृथुपुत्रं हर्तुं अत्रिर्भूयः पुनः अचोदयत् प्रेरयामास । चोदनामेवाह । हे तात यज्ञह
नं ॥ यज्ञविघ्नकर्त्तारं कामेत्वरमाणं धावंतमिंद्रं वारणगजं मृगराडिव सिंह इव ॥ अभिक्रुद्धः अन्वद्रवत् अनुसृतः ॥ अद्रवत् आधावितः

तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम् । जटिलं भस्मनाछन्नं तस्मै बाणं न मुंचति ॥ १४ ॥ वधान्निवृत्तं तं भूयो हंतवे
त्रिरचोदयत् । जहि यज्ञहनं तात महेंद्रं विबुधाधमम् ॥ १५ ॥ एवं वैणसुतः प्रोक्तस्त्वरमाणं विहायसा ॥ अन्वद्रव
दभिक्रुद्धो रावणं गृध्रराडिव ॥ १६ ॥ सोश्वं रूपं च तद्धित्वा तस्यावेतर्हितः स्वराट् वीरः स्वपशुमादाय पितुर्यज्ञ
मुपेयिवान् ॥ १७ ॥ तस्य तचाद्भुतं कर्म विचक्ष्य परमर्षयः ॥ नामधेयं दधुस्तस्मै विजिताश्व इति प्रभो ॥ १८ ॥

१६ ॥ स स्वराट् इंद्रः ॥ ततः पाषंडरूपं अश्वं च हित्वा अंतर्हितस्तिरोहितस्तस्थौ स्थितवान् स वीरः पृथुपुत्रः पशुमश्वमादाय गृहीत्वा पितुः२
पृथोः यज्ञं उपेयिवान् प्राप्तवान् ॥ १७ ॥ तस्य च पृथुपुत्रस्य तदद्भुतं विस्मयनीयं कर्म इंद्रजयेनाश्वाहरणरूपं व्यापारं वीक्ष्य दृष्ट्वा परमर्ष२
यो ऋषयः सर्वे तस्मै पृथुत्राय विजिताश्वः विजयेनाहृत अश्वो येन स विजिताश्व इत्यन्वर्थं नामधेयं ददुश्चक्रुः ॥ १८ ॥

भा॰स्कं॰

॥११३॥

हे प्रभो विजितेंद्रिय विदुर अद्दुई हरिरिंद्रः नीव्रं निविडं तमः उपसृत्य समहृष्टातेन तनमसाछन्नः सन् चषालयूपे च स्वालोग्रे हिरण्मयः चरवालः का
ष्ठकटकसलघुकाद्यूपादिसर्थः॥ हिरण्यनिर्मिता रशना यस्य तं अश्वं पुनर्जहार अपहृतवान्॥ पूर्ववद्विहायसा त्वरमाणमिंद्रं अत्रिर्मु
निः विजिताश्वाय संदर्शयामास॥१९॥ संदर्शितोपि वीरो विजिताश्वः एनं इंद्रं कपालखट्वांगधरं हेतुगर्भमिदं कपालखट्वांगधरत्वात्
नाबाधत वधं ज्ञातवान्॥२०॥ अत्रिणा पुनः सरोषेंद्र इति चोदितो विजिताश्वः रुषा तस्मै इंद्राय विशिखं बाणं संदधे इंद्रः अश्वं तद्रूपं कपाल

उपसृत्य तमस्तीव्रं जहाराश्वं पुनर्हरिः॥ चषालयूपतश्छन्नो हिरण्यरशनं विभुः॥२१॥ अत्रिः संदर्शयामास त्वरमाणं विहा
यसा कपालखट्वांगधरं वीरो नैनमबाधत॥२०॥ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा। सोश्वं रूपं च तद्धित्वा तस्थावंतर्हि
तः स्वराट्॥२१॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत्। तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः॥२२॥ यानि रूपाणि जगृहे इंद्रो
हयजिहीर्षया। तानि पापस्य खंडानि लिंगं खंडमिहोच्यते॥२३॥ एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया॥ तद्गृहीतविसृष्टेषु
पाषंडेषु मतिर्नृणाम्॥२४॥

खट्वांगधरत्वादिरूपं हित्वा अंतर्हितः सन् तस्थौ॥२१॥ अथानंतरं वीरो विजिताश्वः स्वाश्वं स्वपितुर्यज्ञं आगमत् अश्वमुपादाय गृहीत्वापि
तुः पृथोर्यज्ञमव्रजत् तत्प्रभृति पाषंडमार्गाः प्रवृत्ता इत्याह। तदवद्यमिति सार्द्धैस्त्रिभिः हरेरिंद्रस्य तदवद्यं निंदितं रूपं जटिलत्वादिरूपं
ज्ञानदुर्बला ज्ञानहीना जगृहुः॥२२॥ एतदेवोपपादयति॥ हयस्याश्वस्य जिहीर्षया गृहीतुमिच्छया यानि यानि रूपाणि जग्राह तानि तानि
रूपाणि पापस्य खंडानि सुखलु हा इति वर्णलोपेन निरुक्तानि रूपाणि लिंगं खंडं लिंगं पापचिह्नं ज्ञापकं खंडं सम्यक् इत्यन्वर्थनाम्ना इहास्मिंल्लो
केउच्यते इत्यर्थः॥२३॥ एवं वैन्यस्य पृथोः यज्ञजिघांसया यज्ञविघ्नकर्तुमिच्छया अश्वमिंद्रे हरति सति अश्वहरणोपायतया तेन इंद्रेण गृ

॥११३॥

भगवान् शतक्रतुरिंद्रः ॥ तदात्मनः स्वस्य कर्मातिशयमद्भुतातिशयं अभिप्रेत्य ज्ञात्वा आत्मन इति पंचमी वा पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥ कर्मा
तिशयं प्रपंचयन् तत्र स्थावरं तं प्रस्तौति ॥ यत्रेति सप्तभिः ॥ यत्र महोत्सवदेशे ईश्वरः सर्वान्तरात्मा पापाङ्कुशपूर्णः सर्वलोकहितोपदेष्टा प्रभुर्यज्ञाराध्यः
तत्फलप्रदश्च हरिः साक्षादन्वभूयत प्रत्यक्षो भूत्वाविर्बभूवेति यावत् ॥ ३ ॥ कथंभूतोऽन्वभूयत तत्राह ॥ ब्रह्मरुद्राभ्यां तथा संभूतैर्लोकपालैश्च
अन्वितो युक्तः गंधर्वादिभिरुपगीयमानः अन्वभूयत ॥ ४ ॥ सिद्धादयः सुनंदनंदौ प्रमुखौ मुख्यौ येषां ते हरेर्भगवतः पार्षदप्रवराश्च ॥ ५ ॥

तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः ॥ शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवं ॥ २ ॥ यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः ॥ अ
न्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥ अन्वितो ब्रह्मसर्वाभ्यां लोकपालैः सहानुगैः ॥ उपगीयमानो गंधर्वैर्मुनिभिश्चा
प्सरोगणैः ॥ ४ ॥ सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः ॥ सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥ कपिलो नारदो दत्तो योगे
शाः सनकादयः ॥ तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥ ६ ॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धि स्माभीप्सि
तानर्थान् यजमानस्य भारत ॥ ७ ॥ ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः ॥ ८

तथा कपिलादयः ये चान्ये भगवतो भक्तास्तेपि तत्सेवने भगवत्सेवन उत्सुकाः आसक्ताः संतः तं भगवंतमन्वायुः अनुसृत्यागतवंतः ॥ ६
हे भारत यत्र तत्र स्थावरं धर्मदुघा यज्ञादिहविर्दोग्ध्री भूमिः सर्वकामदुघा नतदीप्सितानपीप्सितानपीप्सितांश्च कामान् दुहंती यजमानस्य
दृष्टा वाभीप्सितानर्थान् दोग्धि दुदुहे ॥ ७ ॥ नद्यः सर्वरसान् द्राक्षादिरसान् क्षीरं दधि चान्नं पानकादि गोरसं घृतं तक्रं च ऊहुः वहंति स्म

सिंधवः समुद्राः रत्नानां विकरान् सत्हानद्ध एवं तद्इति योग्यक्रियाध्याहारः यद्वानुषक्तस्य आस्त्यंतद्न्यस्य प्रकृतोपयुक्तार्थपरत्वं गिरयचतु
र्विधंभक्ष्यस्तोज्यचोष्यलेह्यभेदेनचतुर्विधमन्नं प्रददुः सपालकाः सर्वे जनाउपायनं सामानिकमुपाजह्नुः समर्पितवंतः ॥ ए॥ अथोत्तजोभ
गवानर्द्दिशोन्नायोयस्य तस्य पृथोमन्वद्वतारभतस्याप्यावेशावतारत्वाज्जीवाभिप्रायेणाधोक्षजस्येत्युक्तं इत्युक्तविधं परमः ॥ उद्दयोपृद्धिर्य
स्मिंस्तत्कर्म असयुरसहमानः प्रतिघातं विघ्नं अचीकरत् अकरोत् निवृत्तप्रपयाल्ल्हजोगिचू ॥ १ ॥ प्रतिघातकरणमेव प्रपंचयति चर
मेणन्याश्विना यजुष्पतिं ॥ भगवतस्त्वयीपतिवेपिप्रकृतस्याश्वमेधस्य यजुर्वेदविहितत्वात् ततधिपतिरित्यभिप्रायेण यजुष्पतिमित्युः

सिंधवो रत्ननिकरान् गिरयोन्नं चतुर्विधं उपायनमुपाजह्नुः सर्वे लोकाः सपालकाः ॥ ९ ॥ इति चाधोक्षजेशस्य पृथोस्तु
परमोदयम् ॥ असूयन् भगवानिंद्रः प्रतिघातमचीकरत् ॥ १० ॥ चरमेणाश्वमेधेन यजमाने यजुःपतिम् ॥ वैण्प
यज्ञपतिं स्पर्द्धन्नपोवाहतिरोहितः ॥ ११ ॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ॥ आमुक्तमिव पाषंडं योधर्मे ध
र्मविभ्रमः ॥ १२ ॥ अत्रिणा चोदितो हंतुं पृथुपुत्रो महारथः ॥ अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १३ ॥

तं यजुष्पतिं भगवंतं चरमेण शततमेनाश्वमेधेन वैण्ये पृथौ यजमाने आराधयति सति स्पर्द्धन् स्पर्द्धमानः इंद्रः चक्षिङो ङित्करणेनानुदात्ते
त्वलक्षणस्यात्मनेपदस्यानित्यत्वज्ञापनात् कृत्वादेशः तिरोहितः सन् यज्ञपशुमश्वमपोवाह अपहृतवानित्यर्थः ॥ ११ ॥ तमिंद्रं विहायसा
आकाशे त्वरमाणं धावंतं भगवानत्रिर्मुनिरैक्षत कथंभूतं अधर्मे विभ्रमः धर्मभ्रांतिकरजटिलत्वाद्याकारलक्षणो यः पाखंडस्तं ॥ आ
मुक्तं प्रविष्टं यद्वा आमुक्तमिव कवचिनमिव पाखंडं पाषंडं रूपं कवचमिव गृहीतवंतमित्यर्थः को सौ पाषंडः येनामुक्तस्तत्राह यद्इति पूर्व

॥११२॥

अनुक्तं संग्रहार्थमाह। सर्वैः स्वजातौ यो मुख्यस्तेन वत्सेन स्वे स्वे पात्रे सर्वान्स्वापेक्षितान्कामान्दोग्धीति तं सर्वकामदुघां पृथ्वीं पृथक्पृथ
क्पयः दुदुहुः ॥२६॥ उपसंहरति। एवमिति। एवमन्नादाः अन्नाकांक्षिणः पृथ्व्यादयः आत्मनः स्वस्य स्वस्य समीचीनमन्नं स्वाभीष्ट
मन्नमित्यर्थः तदेव क्षीरभेदे दोहपात्रं दोहादिभेदेन दुदुहुः हे कुरूद्वह ॥२७॥ ततो महीपतिः पृथुः प्रीतः सन् सर्वकामदुघां इमां पृथ्वीं
प्रेम्णा दुहितृत्वे चकार दुहितरं मममन्तेत्यर्थः यतोयं दुहितृवत्सल ॥२८॥ ततो राजराट् राज्ञां राजो विभुः समर्थः वैन्यः पृथुः स्वधनुःकोट्या

सर्वैः स्ववत्समुख्येन स्वे स्वे पात्रे पृथक्पयः। सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥२६॥ एवं पृथ्वादयः पृथ्वीम
न्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥२७॥ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चका
रे तां प्रेम्णा दुहितृवत्सलः ॥२८॥ चूर्णयन्स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमंडलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥२९॥ अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता। निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः ॥३०॥

स्वधनुष्कोट्या गिरिकूटानि शिखराणि चूर्णयन्भूमंडलं प्रायशः समं चक्रे प्रायोग्रहणात् नेनाऽसमीकृतमपि क्वचित्क्वचिद्दृश्यत इ
त्यभिप्रेतं ॥२९॥ अथ दोहनसमीकरणानंतरं प्रजानां वृत्तिदः जीविकाप्रदः पिता पितृवद्रक्षकश्च भगवान्वैन्यः पृथुः यथार्हतः य
थायोग्यं तत्र तत्र तस्मिन्भूमंडले प्रजानिवासान्कल्पयांचक्रे ॥३०॥ केते निवासास्तत्कल्पितानाह। ग्रामानिति ॥ ग्रामाहट्टादिस्माः

पुरः हट्टादियुक्ताः पत्तनानि दुर्गाणि विविधानि ऐन्द्रकं पार्वतं वार्क्षं इति भेदभिन्नानि घोषान् आभीराणां निवासान् व्रजाः गवां निवासस्थानानि शि
विरान् सेनानिवासस्थानानि तत्सहितानाकरान् स्वर्णोत्पत्तिस्थानानि खेटान् कृषीवलग्रामान् खर्वटान् पर्वतप्रान्तग्रामान् कल्पयामासेत्यन्व
यः ॥३१॥ किं पृथोः प्राक् ग्रामादयो नाऽभूवन्नेत्याह । इह भूमंडले पृथोः प्राक् पूर्वं एषां पुरग्रामादिकल्पना नैव नास्त्येवेत्यर्थः । तत्र पृथुकल्पि
तग्रामादिषु नास्ति कुतोऽपि भयं यासां ताः प्रजाः यथासुखं स्वस्वसुखानुसारेणावसंतिस्म अवसन्नित्यर्थः ॥३२॥ इति श्रीभागवते अष्टादशो
ध्या ॥१८॥ एवं पृथुर्धरित्र्या गोरूपधरायास्तत्संदर्शितोपाय दुग्धौषधिवीजः समीकृतभूमिः कल्पितप्रजानिवासोऽभूदित्युक्तं अथ सं

ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च । घोषान्व्रजान्सशिविरानाकरान्खेटखर्वटान् ॥३१॥ प्राक्पृथोरिह नैवे
षा पुरग्रामादिकल्पना ॥ यथासुखं वसंति स्म तत्र तत्राकुतोभयाः ॥३२॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे अष्टादशोध्यायः
१८ ॥ श्रीमैत्रेय उवाच ॥ अथादीक्षत राजा तु हयमेधशतेन सः । ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥१॥

कल्पितशताश्वमेधः स्वनुष्ठितैकोनशताश्वमेधः पश्चाज्जिघांसितशतक्रतुः स्वगुराननिर्देशाद्विवृत्तेंद्रवधो विसृष्टचरमक्रतुः कृत
शतक्रतुसख्यः कृतावभृथस्नानः प्राप्तदेववरो विप्रगणप्राशासितो दत्तलिंगदक्षिणः पूजितदेवर्षिगणो बभूवेत्याह मुनिरष्टाद
शेन ॥ अथेति ॥ अथ दोहनसमीकरणप्रजानिवासकरणानंतरं स राजर्षिः पृथुः हयमेधशतेन निमित्तेनादीक्षत दीक्षितोऽभूत् प्र
नाश्वमेधसंकल्पमकल्पयदित्यर्थः कुत्रेत्यत आह । मनोः स्वायंभुवस्य क्षेत्रे तदुषितक्षेत्रे सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तद्दे
वनिर्मितं देशं ब्रह्मावर्तं प्रचक्षत इति प्रसिद्धे ब्रह्मावर्ताख्ये यत्र क्षेत्रे प्राची सरस्वती नदी प्रवहते इति शेषः ॥१॥

रावमेत्रपि गंधर्वाप्सरसः दोग्धारः विश्वावसुं वत्सं कृत्वा पद्ममये पद्मात्मके पात्रे गांधर्वं गांधर्वीणां संबंधि सौंदर्यं च पयः अधुक्षन् दुदुहुः॥१७
श्राद्धदेवताः पितरः पित्रादिभिन्नगणाः दोग्धारः अर्यम्णा वत्सेन॥ अर्यमाणं वत्सं कृत्वेत्यर्थः॥ आमपात्रे॥ अपक्वे मृन्मये पात्रे श्रद्धया कव्यं
पितॄणामन्नं क्षीरमधुक्षत दुदुहुः आर्षत्वात्तव्यत्ययेनाःदादेशः कव्यस्य विशेषणं श्रद्धयादेयत्वज्ञापनाय श्रद्धया अधुक्षदित्युक्तं यद्यपि
श्रद्धयादेवताः इत्यवयवार्थादेव कव्यस्य श्राद्धपूर्वकत्वं प्रतीयते तेन तथापि गच्छतीति गौः गमेर्डोः गौर्गच्छतीत्यत्र प्रकृत्युपादानं गमनस्येव प्रकृत्यु

गंधर्वाप्सरसोधुक्षन्पात्रेपद्ममयेपयः॥ वत्संविश्वावसुंकृत्वागांधर्वंमधुसौभगम्॥१७॥ वत्से
नपितरोर्यम्णाकव्यंक्षीरमधुक्षत॥ आमपात्रेमहाभागाःश्रद्धयाश्राद्धदेवताः॥१८॥ प्रकल्प्य
वत्संकपिलंसिद्धाःसंकल्पनामयीम्॥ सिद्धिंनभसिविद्यांचयेचविद्याधरादयः॥१९॥
अन्येचमायिनोमायामंतर्धानाद्भुतात्मनां॥ मयंप्रकल्प्यवत्संतेदुदुहुर्धारणामयीं॥२०॥

पानस्य श्रद्धाया अविवक्षणात् श्रद्धयेत्युक्तं॥१८॥ सिद्धा दोग्धारः कपिलं मुनिं वत्सं प्रकल्प्य नभसि आकाशे पात्रे संकल्पनामयीं संकल्पप्रचुरां अ
णिमादेः संकल्पानुसारित्वात् संकल्पनामयीमित्युक्तं सिद्धिं अणिमादिसिद्धिमधुक्षन् तथा ये च विद्याधरादयस्ते दोग्धारः तेपि तमेव वत्सं कपि
लं प्रकल्प्य नभस्येव पात्रे खेचरत्वादिरूपां विद्यां क्षीरात्मना दुदुहुः॥१९॥ अथान्ये च मायिनः आश्चर्यरूपधारिणः किंपुरुषादयो दोग्धा
रः वत्सत्वे वत्सभावे मयं प्रकल्प्य मयं वत्सं कृत्वेत्यर्थः धारणामयीं धारणाप्रचुरां मनोव्यापारविशेषधारणरूपयोगानुसारित्वात् धारणा

मकीर्त्तमुक्तं तत्रैव कारदशस्कन्धे स्मृतिमविष्यति अन्तर्द्धानमद्भुतरूपं चेसेतदुभयाकारित्वेन तदात्मिकां मायां विचित्ररूपसर्गकारिणीं शक्तिं दुदुहुः ॥ २० ॥ पिशिताशनाः मांसभक्षा यक्षाद्यो दोग्धारः भूतेशो रुद्रो वत्सो येषां भूतेशं वत्सं विधाय ते स्वपर्थः कपाले पात्रे क्षतजं रुधिरं तदे वासवं आसवं वन्यादकं त्वा सवमित्युक्तं दुदुहुः ॥ २१ ॥ अहयो निःफणाः दन्दशूकाः दंशनस्वभावाः सर्पाः सफणाः त एव कद्रूपं संततिजा तास्ता दोग्धारः ॥ तक्षकं वत्सं विधाय वितानेव पात्राणि तेषु विषं पयः दुदुहुः ॥ २२ ॥ तदा पशवो दोग्धारः गोवृषं गोपुत्रं वृषं श्रेष्ठं रुद्रवा

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ॥ भूतेशवत्सा दुदुहुः कपाले क्षतजासवं ॥ २१ ॥ तथाहयो दन्दशूकाः सर्पा नागाश्च तक्षकम् ॥ विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् ॥ अरण्यपात्रे चाधुक्षन् मृगेन्द्रेण च दंष्ट्रिणः ॥ २३ ॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे सुपर्णवत्सा विहगाश्चरं वाचरमेव च ॥ २४ ॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः गिरयो हिमवद्वत्सा नानाधातून् स्वसानुषु ॥ २५ ॥

हन्नं वृषभं वत्सं कृत्वा अरण्यमेव पात्रं तस्मिन् यवसं तृणं क्षीरं अधुक्षन् मृगेन्द्रेणोत्तरत्रान्वयः ॥ २३ ॥ क्रव्यादाः मांसाशिनः दंष्ट्रिणो व्याघ्रादयः प्राणिनः दोग्धारः मृगेन्द्रेण सिंहेन वत्सेन स्वकलेवरपात्रे क्रव्यं मांसं दुदुहुः विहगाः पक्षिणः सुपर्णो गरुडः वत्सो येषां ते चरं कीटादिकं अचरं फलादिकं च दुदुहुः ॥ २४ ॥ वनस्पतयः वृक्षाः वटो वत्सो येषां तथाभूताः सन्तः पृथक् कटुकम्लमधुरादिभिन्नं रसमयं पयः दुदुहुः गिरयः पर्वताः दोग्धारः हिमवान् वत्सो येषां तथाभूताः सन्तः स्वसानुषु पात्रभूतेषु नानाधातून् गैरिकादीन् दुदु

अहं च भवद्भिर्भवादृशैर्लोकपालैरपालिता अनादृता च सती लोके सर्वस्मिन् चोरीभूते चोरप्राये सति यज्ञार्थे यज्ञनिमित्तं ओषधीरन्नसंमिलितवती
असद्भिर्भुज्यमाना नरो भ्रंशंति तत स्वयज्ञादयो न सिध्येरन्नित्यालोच्य ग्रसमित्यर्थः ॥ ७ ॥ नाममयाग्रीर्णा वीरुधः ओषधयः भूयसा महता कालेन म
यि क्षीणाः जीर्णाः नूनं निश्चयेजीर्णानां पुनर्निर्गमने दृष्टेन निश्चितेन योगेनोपायेन आदातुं ग्रहीतुमर्हति । ८ ॥ को सौ दृष्टो योगस्तत्राह वत्स
मिति त्रिभिः ॥ हे वीर महावाहो हे भूतभावन यदि भवान् भूतानामूर्जस्वद्वलप्रदमन्नं वांछति तर्हि मे गोरूपायाममानुरूपं वत्सं दोहनं दुग्धस्मि

अपालितानाहता च भवद्भिर्लोकपालकैः ॥ चोरीभूते यलोकेहं यज्ञार्थे ग्रसमोषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि का
लेन भूयसा । तत्र दृष्टेन योगेन भवानादातुमर्हति ॥ ८ ॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव । धोक्ष्ये क्षीरमयान्का
माननुरूपं च दोहनम् ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन । अन्नमीप्सितमूर्जस्वद्भगवान्वांछते यदि
१० ॥ समां च कुरु मां राजन्देववृष्टं यथा पयः । अपर्ताववपि भद्रं ते उपावर्त्तेत मे विभो ॥ ११ ॥ ७ २ ७

त्रिभिः दोहनं पात्रं दोग्धारं चोपकल्पय । येन वत्सादिसामग्रीसंपादनेन अहं तव वत्सला त्वद्विषये वात्सल्यवती क्षीरमयान् क्षीरविकारान्
मत्क्षीरप्रकृतिकान् कामान् कामं तदृत्ति काम ओषधीछंदः सोमवीर्यौ जीवलाभवादयस्तान् धोक्ष्ये क्षीररूपेण प्रपूरयिष्यामि ॥ ९ ॥ १०
हे वीर मां पर्वतादिभिर्निम्नोन्नतां पृथ्वीं समां कुरु किं समीकरणसाध्यं तत्राह देववृष्टं वर्षासु देवेन पर्जन्येन वृष्टं पयः जलं अपर्ताव
पि वर्षर्त्वपगमेपि मयि यथा उपावर्त्तेत तदर्थं समीकरणाभावे क्वापि मयि जलं न तिष्ठेत् ततः समाहं कर्तव्येत्यर्थः हे प्रभो ते तुभ्यं भद्रं दो

॥९८॥

भा॰च॰

॥१०४॥

एवं धरित्र्याभिहितः पृथुस्तथैवाकरोदित्याह मुनिः इत्थमुक्तविधं प्रियं हितं च भूमेर्वाक्यमादायउं ईप्सनु मन्यमनुस्वायंभुवं वत्सं कृत्वा पाणौ गो
दोहनपात्रे स्वयं दोग्धा भूत्वा सकलौषधीः अदुहत् सकलौषधिप्रकृतिभूतं क्षीरमदुहत् क्षीरं अदुह्यत धरित्र्यास्तर्हि करणं ओषधीः प्रादुर्भाव
यामास इत्यर्थः एवमग्रेऽपि बोध्यम् १२ यथाह पृथुरेवमपरे च बुधाः सारासारविवेककुशलाः सर्वत्र सर्वेषु पदार्थेषु सारं आददते गोरूपाया धरि
त्र्याः क्षीरं प्रदुह्य सर्ववस्तुषु सारं निहितं तदित्यर्थः तदेवाह अन्ये ऋषिप्रभृतयः यथाकामं स्वस्वकामानुरूपं पृथुभावितां पृथुवशीकृतां दुदु

हुरिति प्रियं हितं वाक्यं भुव आदाय भूपतिः॥ वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः॥१२॥ तथापरे च सर्वत्र सारमाददते बुधाः
ततोऽन्ये च यथाकामं दुदुहुः पृथुभावितां॥१३॥ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम वत्सं बृहस्पतिं कृत्वा पयश्छंदोमयं शुचि॥
॥१४॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन्॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः॥१५॥ दैतेया दानवा वत्सं
प्रह्लादमसुरर्षभम्॥ विधायादूदुहन् क्षीरमयःपात्रे सुरासवम्॥१६॥ ॥०॥ ०॥

दुः॥१३॥ के के किं किमदुदुहुस्तत्राह॥ ऋषय इति। ऋषयो वसिष्ठादयः बृहस्पतिं वत्सं कृत्वा देवीं धरित्रीं इंद्रियेषु पात्रभूतेषु पात्रभूतेषु वा
ध्यानमतः अथ वाणौ वैंद्रग्रहणादिंद्रियाणां पात्रत्वं हे सत्तम विदुर शुचि पवित्रं छंदोमयं छंदः प्रकृतित्वेन तस्मात् वेदमंत्रविवर्तितं पयः क्षीरं
दुदुहुः दुग्धवंतः॥१४॥ तथा सुरगणाः इंद्रं वत्सं कृत्वा हिरण्मयेन पात्रेण वीर्यं मनःशक्तिः ओज इंद्रियशक्तिः बलं देहशक्तिः एतत्त्रयसं
पादकं सोमममृतं तत्तदात्मकं पयः अदूदुहन्॥१५॥ दितेरपत्यानि दानवा दोग्धारः असुरश्रेष्ठं प्रह्लादं वत्सं विधाय कृत्वा अयःपात्रे गोदीये

एवमचिंत्यविविधशक्तिमत्वेन भगवंतं स्तुत्वा तद्देहे पुनरनुसंदधती सर्वानवतारान्नमस्करोति ॥ नूनमिति ॥ येषामीश्वराणामीश्वरावताराणां
ईहितं चिकीर्षितं ननु गुणसर्गमायया तस्य ईश्वरस्य संबंधिन्या सत्वादिगुणकार्यप्रपंचमूलया मायया मोहितं यच्चित्तं तस्य वर्त्मनिवृत्तयो येषां ते मी
दृशैर्जनैर्न ज्ञायते नूनं निश्चितं तेभ्यः वीराणां मध्ये षामयि यशस्करेभ्यो हिरण्याक्षादीनां भगवता युद्धे निहता इमे वं रूपां कीर्त्तिं संपादके
भ्योऽवतारेभ्यो नमः ॥३६॥ इति श्रीभागवते सप्तदशोऽध्यायः ॥१७॥ एवं सर्वकारणत्वेन विचित्रशक्तिमत्वेन च पृथुं प्रस्तूय तदभिमतौषधिवीज

ननं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥
३६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तदशोऽध्यायः ॥१७॥ मैत्रेय उवाच ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् । पुनराहा
वनिर्भीता संस्तभ्यात्मानमात्मना ॥१॥ संनियच्छाभिभो मन्युं निबोध श्रावितं च मे । सर्वतः सारमादत्ते यथा मधुकरो बुधः
॥२॥

निर्गमोपायं विवक्षन्ननंतरं तं विश्वासयितुं प्रसादयंत्याह महीत्याहि मुनिः ॥ इत्थं पूर्वोक्तप्रकारेण पृथुमभिष्टूय ततोऽप्यनिवृत्तरुषा
प्रस्फुरितः नितरां चलितः अधरोष्ठो यस्य तं दृष्ट्वेति शेषः ॥ भीतासत्यवनिर्मही आत्मानं मनः आत्मना बुद्ध्या संस्तभ्य निर्भयं कृत्वा
आह ॥१॥ उक्तमेवाह ॥ भो हे प्रभो अभि अभितः कात्स्न्र्येन मन्युं क्रोधं संनियच्छ उपसंहर मे मया निश्रावितं विज्ञापितं निबोध जानी
हि ॥ किं तदित्यत्राह ॥ बुधः सारासारविभागज्ञः यथा मधुकरः भ्रमरः तथा सर्वतः सर्वेभ्यो वस्तुभ्यः सारं आदत्ते गृह्णाति वक्ष्यमाण
मिमा नतः सारभूतं श्रीगदाने नैवेश्यसिद्धौ किं त्वयामहं कुर्व्वतीति भावः मयाग्रीणां ओषधीरुपायेन गृहाणेति वक्ष्यमुपायेन सर्वं सिध्य

भा॰ च॰

॥१०८॥

अस्मिन्निति त्रिभिः पुंसां कामिनां श्रेयसः पुरुषार्थस्य प्रसिद्धये निष्पत्तये तत्त्वदर्शिभिः मुनिभिरस्मिंल्लोके ये उपायाः कृषिगोरक्षावाणिज्यादय
यः जीवनोपाया दृष्टा विज्ञाता निर्णीता इति यावत् ये चामुष्मिन् परस्मिन् लोके स्वर्गसाधनभूता अग्निहोत्रादयः प्रयुक्ता अनुष्ठिताश्च शिष्टान्
दृष्टाश्च ॥३॥ तानेव पूर्वैर्मुनिभिर्दर्शितानुपायान् योऽवरोऽर्वाचीनः सम्यक् श्रद्धया कर्त्तव्येषु त्वरया उपेतः युक्तः सन्नातिष्ठत्यनुतिष्ठति स एव
वांजसा सुखेनोपेयानुपायसाध्यान् विंदते लभते ॥४॥ अथ तु न विंदत इत्याह ॥ तानिति योऽविद्वान् विद्वान् वा तान् पूर्वदर्शितानुपायाननाऽ

अस्मिन्लोकेथवामुष्मिन्मुनिभिस्तत्वदर्शिभिः ॥ दृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ॥३॥
तानातिष्ठतियःसम्यगुपायान्पूर्वदर्शितान् ॥ अवरःश्रद्धयोपेतउपेयान्विंदतेंजसा ॥४॥
ताननादृत्ययोविद्वानर्थानारभतेस्वयं ॥ तस्यव्यभिचरंत्यर्थाआरब्धाश्चपुनःपुनः ॥५॥
पुरासृष्टाह्योषधयोब्रह्मणायाविशांपते ॥ भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ॥६॥ ७

दृत्य स्वयमर्थान् स्वबुध्या स्वबुद्धिमात्रेण पुरुषार्थसाधनत्वेनावधारणीयार्थान् पुरुषार्थोपायाभासानारभते तस्य पुनः पुनः प्रारब्धाश्च
अंतरायविहता पुनः पुनरनुष्ठिता अपि व्यभिचरंति न फलजनका भवंतीत्यर्थः ॥५॥ ननु त्वस्त्वेवं कोसावोषधीबीजनिर्गमोपायः किमर्थं च
तानि त्वमाग्रसदित्यत्राह पुरेति हे विशांपते ब्रह्मणा पुरा या ओषधयः सृष्टाः इह जीवनार्थत्वेन यज्ञानुष्ठानद्वारा परत्र लोके स्वर्गाद्यर्थत्वे
न च सृष्टास्ता ओषधयः अधृतव्रतैः लोकपालयज्ञानुष्ठानव्रतरहितैरत एवासद्भिः भुज्यमाना मया दृष्टा असद्भिर्भुज्यमाना इमा ओष

भा० स्कं० ३
॥१८४॥

र्थः ॥ उत्थापयितुं न प्रभवंति न समर्था ॥ तथाप्यत्र क्षेत्रज्ञादयो पि स्वाधिष्ठैरिंद्रियैः सह देवादिशरीराणि प्रविष्टा अपि क्षेत्रज्ञानुप्रवेशमंतरेण उत्थापयितुमशक्ता इत्यर्थः ॥ ७१ ॥ एवमन्वयव्यतिरेकाभ्यां भोक्तृत्वेन क्षेत्रज्ञस्यैव प्राधान्यमुक्तं तस्य क्षेत्रज्ञस्यानुचिंतनं भगवद्भक्तियोगांगत्वेन कार्यमित्याह तमिति ॥ प्रत्यगात्मानं जीवं परिशुद्धस्वरूपं योगेन तद्यायात्मविवेचनरूपयोगेन प्रवृत्तया धियेगेन प्रवृत्तयाऽस्मिन्देहे हि विविच्य शरीरबुद्धींद्रियप्राणादिभ्यः पृथक्कृत्य तु भक्त्या ईश्वरभक्त्या कामानभिष्वंगेन ज्ञानेन ब्रह्मात्मकत्वानेन चात्मनि मननासि चिंतयेत् यद्वा प्रत्यगात्मानं धिया विविच्यात्मनि तस्मिन्प्रत्यगात्मनि परमात्मानमिति शेषः ॥ अविहिताप्रतिषिद्धनिषिद्धविषयवैराग्ये

तस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ॥ ७२ ॥ इति श्रीभागवते तृतीयस्कंधे षड्विंशः ॥ कपिल उवाच ॥ प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जला

ज्ञानेन कर्मयोगउक्तज्ञानेन प्रत्यगात्मयाथात्म्यज्ञानयोगेन भक्त्या ईश्वरभक्त्या ज्ञानभक्तियोगाभ्यामनुगृहीतया भक्त्येत्यर्थः चिंतयेत् ॥ ७२ ॥ इति तृतीयेस्कंधे का षड्विंशोऽध्यायः ॥ २६ ॥ एवं जगत्सृष्ट्यादिव्यापारकथनेन भजनीयस्य भगवत ऐश्वर्यमावेद्य तत्प्राप्त्युपायभूतभक्तियोगांगात्मयाथात्म्यज्ञानयोगमुपपादयितुं रतींद्रियात्मस्वरूपं कथमनुप्राक्यमित्याशंकां वारयितुं तस्य प्रत्यगात्मनो जाग्रदाद्यवस्थासु विसदृशतां एव भासं कथयिष्यन् तस्यैव स्वात्मनः प्रकृतिसंसर्गकृतमेव जाग्रदाद्यवस्थारूपसांसारिकप्रवृत्तिपुरुषत्वं तदा यत्र सुखदुःखभोक्तृत्वं च न स्वरूपप्रयुक्तमिति पूर्वोक्तमनुवदति पुरुषो जीवः प्रकृतिस्थोऽपि

श्रीधरी
॥१८४॥

कादेवताकेनेंद्रियेणकुत्रप्रविष्टाउत्थापनाय्या क्राभ्हदिमत्राह ॥ वह्निरित्यादिभिः सप्तभिः वह्निरधिदेवतावाचावागिंद्रियेणसह मुखंदेवाय्य
छिमुखंयोभोज आशात ॥ नहासोविराट्कार्यभ्हतव्यष्टिशरीरंजातेनोदतिष्ठन्प्रहृतुन्मुखेवाभ्हत ॥ एवमुक्तरनापिद्रष्टव्यम् ॥ सर्वत्रविराट्
प्राद्धेनविराट्कार्यभ्हतवाद्यष्टिशरीरजातंलक्ष्यते अन्यथाचतुर्मुखानांवुद्ध्यादीनांचतुर्मुखशरीरोत्थापकत्वाशक्तिः ॥ ६३ ॥ ६४ ॥
६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ एवंस्वतःसेंद्रियाणांदेवानांउत्थापनाशक्तिमभिधायक्षेत्रज्ञाधीनतेषामत्थापकत्वमित्याह ॥ चित्तेनेतिः

वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् ॥ घ्राणेननासिकेवायुर्नोदतिष्ठत्तदा ॥ ० ॥ ६३ ॥ अक्षिणीचक्षुषादित्योनो ॥ ० ॥
श्रोत्रेणकर्णौचदिशोनो ॥ ० ॥ ६४ ॥ त्वचंरोमभिरोषध्योनो ॥ ० ॥ रेतसाशिश्नमापस्तुनोद ॥ ० ॥ ६५ ॥ गुदंमृत्युरपानेननो
॥ ० ॥ हस्ताविंद्रोवलेनैवनो ॥ ० ॥ ६६ ॥ विष्णुर्गत्यैवचरणौनो ॥ ० ॥ नाडीर्नद्योलोहितेननो ॥ ० ॥ ६७ ॥ क्षुत्तृड्भ्यामुदरंसिंधुर्नो
॥ ० ॥ हृदयंमनसाचंद्रोनो ॥ ० ॥ ६८ ॥ वुद्ध्याब्रह्मापिहृदयंनो ॥ ० ॥ रुद्रोभिमत्याहृदयंनो ॥ ० ॥ ६९ ॥ चित्तेनहृदयंचैत्यःक्षेत्र
ज्ञःप्राविशद्यदाविराट् ॥ तदेवपुरुषःसलिलादुदतिष्ठत ॥ ७० ॥ यथाप्रसुप्तंपुरुषंप्राणेंद्रियमनोधियः ॥ प्रभवं

चैत्यःचित्ताधिदेवःक्षेत्रज्ञःहृदयमधिष्ठानंचित्तेनसहयप्राविशत् अदेवविराट्पुरुषःविराट्पुरुषःविराट्पुरुषविराट्कार्यभ्ह
तोदेवादिरूपःपुरुषःसलिलात्सलिलकार्यभ्हतब्रह्मांडात् ॥ इहसत्वोपेपंचमी ॥ सलिलेमाविष्टपतस्थः ॥ उदतिष्ठतंप्रवेक्षमोऽ
भ्हदित्यर्थः ॥ ७० ॥ तदेवसहृष्टांतमाह ॥ यथेति ॥ प्राणादयओजसास्ववलेनप्रसुप्तंपुरुषंयेनक्षेत्रज्ञेनविनायदिच्छामंतरेणत्य

त्रिविनायेननोत्थापयेतुमोजनमा ॥ ७१ ॥

चंद्रमा अधिदेवता हृदयादेवाधिष्ठानाद्य वसायाख्यवृत्त्यवछिन्नबुद्धिरूपांतरिंद्रियं तदधिदेवता गिरांपतिर्ब्रह्मा तदा हृदयमेवाधिष्ठानं तत्र आभि
मानाख्यवृत्त्यवछिन्नाहंकाराख्यं अंतःकरणमिंद्रियं तदधिदेवता रुद्रस्तया हृदयमेवाधिष्ठानं चित्ताख्यवृत्त्यवछिन्नाख्यमंतःकरणमिंद्रियं
तदभिमानि चैत्यः क्षेत्रज्ञः निरभिधेयं तदसमर्थः ॥ अत्र चतुर्मुखस्याभयेंद्रस्य विभागोक्तिरिंद्रियाभिमानिदेवतात्वाकारेणेति न विरोधः ॥
६१ ॥ एवं समष्टिभूत चतुर्मुखदेहस्य वागादींद्रियतदधिष्ठानेभ्यः देवादिव्यष्टीनां इंद्रियतत्स्थानतदधिदेवतासृष्टिरुक्ता ॥ अथ त्ते
क्षेत्रज्ञभोगायतनत्वाद्देवादिशरीराणां तत्र प्राप्तं भोक्तुं क्षेत्रज्ञस्य सन्वयव्यतिरेकाभ्यां प्रतिपिपादयिषुर्वागादींद्रियतदधिष्ठातृदेवता

मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोभवत् ॥ ६१ ॥
एतेह्यभ्युत्थिता देवा नचास्योत्थापनेशकन् ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥ ६२ ॥

नां च व्यष्टीनां देवादिव्यष्टिशरीराधिष्ठानेषु प्रविष्टानामपि क्षेत्रज्ञानुप्रवेशमंतरेण व्यष्टिशरीरभूतजातस्य प्रवृत्तिर्यतः ॥ संपादनासा
मर्थ्यमाह ॥ एत इति ॥ एते देवा इंद्रियसहितास्तदभिमानिवागादिदेवा अभ्युत्थिताः समष्टिचतुर्मुखशरीरादुत्पन्नाः अस्य देवादिव्यष्टि
शरीररूपभूतजातं प्रविश्येति शेषः ॥ उत्थापने प्रवृत्तमुखकरणे नाशकन्न समर्था बभूवुः एतदेव प्रपंचयति पुनरित्यादिना पुनः शब्दोऽ
सामर्थ्यप्रतिपादनानंतर्यद्योतकः देवादिव्यष्टिशरीरमुखानि देवाधिष्ठितानींद्रियाणि उत्थापयितुं प्रवृत्तमुन्मुखं कर्तुं क्रमाद्द्वाविविशुः तदधिष्ठा
नं प्रविविशुः ॥ ६२ ॥

घ्राणाद्गन्धं नासिकां तदधिष्ठाता वायुश्च ॥ प्राणाधीनत्वं सर्वेंद्रियेष्वपि द्रष्टव्यम् ॥ तथा हि छंदोगवाजसनेयिनां प्राणविद्यायां ॥ एता ह वै देवता ॥ अहं श्रेय
से व्यूहिरे: अहं श्रेयसे विवदमाना इति चोपक्रम्य वागाद्येकैकापक्रमणे अप्ये सप्राणानामिंद्रियाणां शरीरस्य च स्थितिं तत्कार्यं चाविकलं
प्रतिपाद्य प्राणापक्रमणे सर्वेषां विशरणमकार्यकरत्वं चाभिधाय सर्वेषां प्राणाधीनस्थितित्वमभिहितम् ॥ अक्षिणी चक्षुरिंद्रियाधिष्ठाने २
निरभिद्येतां विभक्ते अभवतां तयोरन्तराच्चक्षुरिंद्रियं निरभिद्यत ॥ तस्माच्चक्षुषः सूर्यश्चक्षुषोऽधिष्ठाता अभवत् कर्णौ श्रोत्रेंद्रियाधिष्ठा

घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो न्वभिद्येतां कर्णौ श्रोत्रं ततो दिशः ॥५५॥ निर्बिभेद वि
राजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः ॥५६॥ रेतस्तस्मादाप आसन्नि
रभिद्यत वै गुदम् ॥ गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ॥५७॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट्
पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ॥५८॥ नाड्योऽस्य निरभिद्यंत ताभ्यो लोहितमाभृतं ॥ नद्यस्ततः समभव
न्नुदरं निरभिद्यत ॥५९॥ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ॥६॰

ने निरभिद्येतां ॥ ततः श्रोत्रेंद्रियं तदधिदेवता दिशश्च निरभिद्यंत ॥५५॥ विराजो ब्रह्मणः रोमाणि श्मश्र्वादयः त्वगिंद्रियाधिष्ठानभूताः त
तः त्वगिंद्रियं ततस्तदधिदेवता ओषधयश्चासन् एवं शिश्नमुपस्थेंद्रियाधिष्ठानं ॥५६॥५७॥ हस्तौ पाणींद्रियं तदधिष्ठाता स्वराट् इंद्रः स्वरा
डिंद्रः प्रथममासीदिति श्रुतेः पादौ पादेंद्रियाधिष्ठाने गम्यमानं पादेंद्रियं तदधिदेवता हरिरुपेंद्रः ॥५८॥ अस्य ब्रह्मणः नाड्यः अधिष्ठानं आभृ
तं पूर्णं लोहितमिंद्रियस्थानीयं तदधिदेवता नद्यः उदरमधिष्ठानम् ॥५९॥ क्षुत्पिपासे इंद्रियस्थानीये समुद्रोऽधिदेवता हृदयं पुंडरीकाका

पुनरण्डमेव विशिनष्टि ॥ एतदिति ॥ एतदण्डविशेषाख्यमण्डं वहिः ॥ प्रधानेन पञ्चम्या आवृत्तैः क्रमवृद्धैः क्रमश उत्तरोत्तरमधिकैः कियदाधिक्यं तत्राह ॥ दशोत्तरैः
दशगुणितोत्तरैः उत्तरोत्तरं दशगुणाधिकैः तोयादिभिः योयं ब्रह्माण्डं पृथिव्या उपलक्षितं पृथिव्यादिभिः सप्तभिः परिवृतं परिवेष्टितं यत्र यस्मिन्नण्डे लोक
वितानः देवमनुष्यादिलोकविस्तारः भवति तद्भगवतो रूपं शरीरमित्यर्थः ॥ ५२ ॥ एवं महदादिचतुर्मुखान्तसृष्टिरुक्ता ॥ अथ समष्टिभूतचतुर्मुखश
रीरस्यानन्तरत्वात् देवादिव्यष्टिशरीराणाम् इन्द्रियतत्स्थानतदभिमानिदेवतानां विभागं विवक्षुः सोपि विभागश्चतुर्मुखशरीरकपरमात्मकर्तृक इ
त्याह हिरण्मयादिति हिरण्मयात् अण्डकोशात् सलिलेशयात् अण्डकोशेशयानोऽनिरुद्धरूपी भगवाननन्त उत्थाय यस्माद् उ

दतिष्ठदसौ विराट् ॥ ५१ ॥ एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ॥ यत्र
लोकवितानोऽयं रूपं भगवतो हरेः ॥ ५२ ॥ हिरण्मयादण्डकोशादुत्थाय सलिलाशयात् ॥ तमाविश्य महादेवो
बहुधा निर्बिभेद खम् ॥ ५३ ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ॥ वाण्या वह्निरथो नासे प्राणोतो घ्राण एत

त्थितो भूत्वा तं चतुर्मुखमाविश्य महादेवो भगवान् खमिन्द्रियगणं बहुधा नैकधा निर्बिभेदः समष्टिभूतचतुर्मुखशरीरास्यमिन्द्रियगणं व्यष्टिरू
पेणानेकधा विभक्तमकरोदित्यर्थः ॥ ५३ ॥ विभागमेवा ॥ निरभिद्यतेत्यादिभिः ॥ अस्य ब्रह्मणः ॥ प्रथमं मुखं निरभिद्यत ततस्तस्मान्मुखाद्वाणीति वदत्यनेनेति
पञ्चम्यर्थे सप्तमी वचनविवक्षया षष्ठी वा ॥ तत समष्टिभूतब्रह्मशरीरमुखाद्देवादीनां वागिन्द्रियाधिष्ठानव्यष्टिमुखविभक्तमभूदित्यर्थः ॥ ततो वा
णी वाग्व्यष्टिरभवत् ॥ वाण्या वागिन्द्रियाद्वा तदधिष्ठानाद्वा वह्निरभवत् वह्निरभिमानी अभवत् ॥ अथो अनन्तरमस्य नासे घ्राणेन्द्रियाधिष्ठाने नासाविले निरर
भिद्येतां ॥ अनतः नासाभ्यां प्राणः प्राणेन्द्रियव्यष्टिः एतयोः एतस्य प्राणेन्द्रियस्याधिष्ठानापेक्षया एतयोरिति द्विवचननिर्देशः एतयोर्नासिकयोः प्रा

ये भूतानां शब्दादिगुणाः कत्वमुक्तं तेषां च लक्षणान्याह पंचभिः अर्थाश्रयत्वं भूतस्याकाशस्य गुणविशेषः शब्दो यस्यार्थः विषयः ग्राह्य इति यावत् तच्छ्रो
त्रमुच्यते आकाशावीरणगुणशब्दग्राहकत्वमेव श्रोत्रमित्यर्थः एवमुत्तरत्रापि ज्ञेयम् ॥४७॥ ४८॥ यत्तूक्तं पृथिव्याः सर्वेऽसत्वगुणा इव हेतिलक्षा
णांतरमाह द्रव्यस्येति ॥ द्रव्यस्यासाधारणकारणस्य धर्मः शब्दादिः परस्मिन्कार्ये वाय्वाद्यादौ समन्वयात् समवायाद्दृश्यते ॥ अतस्तस्मादिवानामाकाश
दीनां विशेषः शब्दादिः भूमौ पृथिव्यामेवोपलक्ष्यते दृश्यते ॥४९॥ एवं महदादि पृथिव्यंतं भूतसृष्टिमभिधायतेभ्योऽडसृष्टिमभिधास्यन्नादावी
र्यः पृथग्भूतायतनतायतनत्वे संहतिं विनेसुकरीमाह ईश्वरानुप्रवेशमाह ॥ एतानि महदादि पृथिव्यंतानि सप्त तत्वानि तन्मात्राणि भूतेषु इंद्रिया

नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥४७॥ तेजोगुणविशेषोऽर्थो
यस्य तच्चक्षुरुच्यते ॥ अंभोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥४८॥ पर
स्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥४९॥ एतान्यसंहत्य यदा महदादी
नि सप्त वै ॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥५०॥ ततस्तेनानुविद्धेभ्यो युक्तेभ्योंऽडमचेतनं ॥ उत्थितं पुरुषो यस्मा

त्पहंकारे चांतर्भाव्य सप्तेति निर्देशः यदा संहत्यामिलित्वा स्थितानि तदा कालकर्मगुणोपेतः कर्मादृष्टं गुणाः कालादिभिरुपेतस्ततः जगदादि
रीश्वरः तानि महदादितत्वानि उपाविशत् ॥ ५१ ॥ मिलनं संहननं समागतत्वभेदेन द्विविधं संहननं नाम पृथक्स्थितस्यैव संयोगमात्रं समागतत्वं
एकस्थितत्वं संश्लेषविशेषः एतदुभयाभावात् पृथक् समर्थान्यवस्थितानीश्वरानुप्रवेशादुभयं प्राप्तेभ्योऽडसृष्टिमाहततईश्वरानुप्रवेशा
नंतरं तेनेश्वरानुप्रवेशेन हेतुनानुविद्धेभ्यः समागतेभ्यः युक्तेभ्यः संहतेभ्यस्तत्वेभ्य अचेतनमधिष्ठातृचेतनरहितमंडमुत्थितं उत्पन्नं कीदृ

क्लेदनमार्द्रीकरणं पिंडनं मृदादेः पिंडीकरणं तृप्तिः तृप्तिः तृप्तिदात्वं जीवनम्॥ अयोमयः प्राण इति श्रुतेः॥ आप्यायनं तद्वैकल्यनिवर्तनमोदनं मृदूकरणं भूयस्त्वं कूपादावुद्धृतस्यापि पुनरुद्गमः पांचभौतिकेष्वपि जलांशस्य भूयस्त्वं वा॥ तथा च सत्त्वकारः॥ आत्मकत्वानुभूयस्त्वादिति इमाः क्लेदनादयः तेजसो वृत्तयः॥४३॥ दैवचोदितादिता दिताद्विकुर्वाणादम्भसो मात्रादंभसः गंधमात्रमभूत्तस्माद्गंधमात्रात्पृथ्वी अभूत् घ्राणं घ्राणेंद्रियं गंधगा गंधग्राहकं एव गंधः द्रव्याणां संसर्गिकद्रव्याणामवयववैषम्यादिकारात्पृथक् करंभादिभेदेन विभिद्यते॥ तत्र करंभो

क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोदनम्॥ तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः॥४३॥ रसमात्राद्विकुर्वाणादंभसो दैवचोदितात्॥ गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः॥४४॥ करंभपूतिसौरभ्यशांतोग्राम्लादिभिः पृथक्॥ द्रव्यावयववैषम्याद्गंध एको विभिद्यते॥४५॥ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम्॥ सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम्॥४६॥

मिश्रगंधः यथा व्यंजनादीनां हिंग्वादिसंस्कारैः पूतिर्गंधः सौरभ्यं कर्पूरादेः शांतः शतपत्रादेः उग्रो लशुनादेः अम्लः पर्युषितं भुक्तान्नादेः॥४५॥ भावनं घटादिनिष्पादनं ब्रह्मणः स्थानं ब्रह्मणश्चराचरोपलक्षणार्थः॥ सर्वेषामाधारत्वमित्यर्थः ब्रह्मण इति पाठे तु ब्रह्मणः ब्रह्मकुलस्य स्थानमिति एवार्थः सद्विशेषणं सतां कार्याणां विशेषाकृतत्वं ब्रह्मादिकार्याणां देशभेदेन सारासारवत् दर्शनात्सर्वसत्त्वगुणोद्भेदः तत्र देशस्य प्राणिनामाकारविशेषहेतुत्वं यद्वा शब्दादिसर्वसत्त्वगुणवत्त्वं चेति पृथिव्या वृत्तिः कार्यमेवल

वायोरिति ॥ स्पर्शः त्वग्ग्राह्यो साधारणगुणो यस्य तस्माद्दैवेरिताद्वायोः रूपं रूपतन्मात्रमभूत् ततो रूपात्तेजः समुत्थितं उत्पन्नमभूत् किं तद्रूपस्य ग्राहकमित्यत्रा
ह ॥ चक्षुश्चक्षुरिन्द्रियं रूपोपलम्भनं रूपग्राहकं च ॥ ३८ ॥ द्रव्याकृतित्वं द्रव्यस्य भूतान्तरस्यावर्त्तकत्वं गुणतानितिसंद्रव्याश्रयत्वं व्यक्तिसंस्थानेव्यंजकं तराथ्या
वर्त्तकत्वं ॥ तेजस्त्वं तेजसः साधारणगुणत्वं च हे साध्वि रूपमात्रस्य रूपतन्मात्रस्य वृत्तयः लक्षणानीत्यर्थः ॥ ३९ ॥ द्योतनं प्रकाशनं पचनं तंदुला
देः क्षुत्तृड् अशनापिपासा च तद्द्वारेण पानमदनं च हिमार्दिभिः भवः शोषणं च तेजसो वृत्तयः लक्षणानि कार्याणीति यावत् ॥ ४० ॥ रूपमात्रादि

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ॥ समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम् ॥ ३८ ॥ द्रव्याकृतित्वं गुणता
व्यक्तिसंस्थात्वमेव च ॥ तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ॥ ३९ ॥ द्योतनं पचनं पानमदनं हिममर्दनं
तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥ ४० ॥ रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् ॥ रसमात्रमभूत्त
स्मादंभोजिह्वारसग्रहः ॥ ४१ ॥ कषायोमधुरस्तिक्तः कट्वम्ल इति नैकधा ॥ भौतिकानां विकारेण रस एको विभिद्यते

॥ ८४ ॥

ति दैवेन चोदितात्प्रेरिताद्विकुर्वाणात् रूपतन्मात्राद्रूपं तन्मात्रं यस्य तस्मात्तेजसः ॥ रसमात्रं रसतन्मात्रमभूत् ॥ तस्माद्रसमात्राद् अंभः अभूत् रसः
तन्मात्रस्य ग्राहिका केत्यत्राह ॥ जिह्वा रसनेन्द्रियं रसस्य ग्रहः ग्राहिका ॥ ४१ ॥ कषायादि बहुल वर्णोपि ... भौतिकानां संसर्गिकद्रव्याणां
विकारेण रसः कषायादि भेदेनानेकधा भिद्यत इत्यर्थः ॥ ४२ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

नभसोलक्षणमाह॥भूतानामिति ब्रह्मादिस्तंबपर्यंतभूतानामिंद्रदातृत्वमवकाशदातृत्वंवहिरंतरश्च वहारास्पदत्वं॥प्राणनांइंद्रिया॰
णांआत्मनश्चधिष्ण्यत्वंस्थानत्वंनाड्यादिछिद्ररूपेणनभसआकाशस्यवृत्तिलक्षणंवृत्तिःछिद्रदातृत्वादिकार्यमेवलक्षणम् एवमु
त्तापिवेदनतन्मात्रमहाभूतयोरुत्पत्तिःद्वितीयेनतन्मात्रलक्षणंमित्यनुसंधेयं॥३४॥नभसइति॥शब्दतन्मात्राच्छब्दतन्मात्रंनभसाधा
रणंयस्यतस्मात्कालगत्याकालप्रेरितभगवत्संकल्पेनविकल्पवतोविक्रियमाणान्नभसःआकाशात्स्पर्शःस्पर्शतन्मात्र

भूतानांछिद्रदातृत्वंवहिरंतरमेवच॥प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षणम् ॥३४॥ नभ
सःशब्दतन्मात्रात्कालगत्याविकुर्वतः॥स्पर्शोऽभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहः॥३५॥
मृदुत्वंकठिनत्वंचशैत्यमुष्णत्वमेवच॥एतत्स्पर्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः॥३६॥चालनं
व्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः॥सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्षणम्॥३७॥

मभवत्ततःस्पर्शाद्वायुरभवत्॥कोस्पर्शस्यग्राहकइत्यत्राह त्वक्त्वमिंद्रियंस्पर्शस्यसंग्रहःसम्यग्ग्राहकःसम्यग्ग्रहोययासात्व
गितिवायुस्त्वंतुनियतलिंगत्वात्॥३५॥मृदुत्वादयःवायोःतन्मात्रत्वमसाधारणगुणत्वंचस्पर्शस्पर्शस्पर्शत्वंलक्षणमित्यर्थः
॥३६॥चालनंवृक्षशाखादेःव्यूहनंविभागकरणंप्राप्तिस्खलितयोःसंयोजकत्वंद्रव्यशब्दयोर्नेतृत्वंद्रव्यनेतृत्वंशब्दनेतृत्वं तत्रद्रव्य
नेतृत्वंद्रव्यस्यगंधवतोघ्राणंप्रतिशब्दस्यनेतृत्वंदूरस्थशब्दस्यश्रोत्रंप्रत्याह्वत्वकरणं॥सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्ष

अथ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिं तयोः कार्यापरंपरपर्यायं लक्षणं चाह ॥ तामसादिति पंचदशभिः ॥ भगवद्वीर्यचोदिताद्भग
वत्कालप्रेरिता इतराण्व विकुर्वाणात्तामसाहंकाराच्छब्दमात्रं शब्दतन्मात्रमहमभुदूरभूत ततस्माच्छब्दमात्रान्नभउदभूत् तत्र शब्दः केन
गृह्यते इत्यत आह ॥ श्रोत्रमिति श्रोत्रं तु शब्दगं इन्द्रियादिनां श्रोत्रादीनां नभआदिभ्यो नोत्पत्तिः यतः श्रोत्रादीनां तैजसानुगृहीतवैकारिका
दुत्पत्तेरुक्तत्वात् ॥ किंतु शब्दादिरूपविषयोत्पत्त्यनंतरं श्रोत्रादीनां तत्संबंधमात्रमुच्यते श्रोत्रं श्रोत्रेंद्रियं शब्दगं ॥ तन्मात्रज्ञापकमित्यर्थः ॥ ३२ ॥ किं तच्छब्दतन्मात्रं कारणरूपेण नभ इत्यपेक्षायां तयोः कार्यमुखेन स्वरूपं बोधयति द्वाभ्यां ॥ अर्थाश्रयत्वं अर्थवाचकत्वं

तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगम् ॥ ३२ ॥
अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥ ३३ ॥

द्रष्टृलिंगत्वं द्रष्टुः सर्वज्ञस्य परमात्मनः लिंगत्वं प्रमाणमनत्वं भगवतः शास्त्रयोनित्वात् ॥ द्रष्टुः घटपटाद्यर्थं द्रष्टुः लिंग्यते प्रतीयते इति द्रष्टृलिंगं तस्य भावस्तस्य भावस्तत्त्वमिति यामिति वा घटपटादिप्रष्टुर्हि तद्वाचकः शब्दः प्रतीयते यद्यपि शब्दस्य वैखर्यप्यर्थः ॥ प्रतीयते तथापि तदपि शब्दस्य लक्षणमेव न तु देवहीतः अर्थाश्रयत्वमित्युक्तं ॥ अर्थाश्रयत्वं श्रोतुरर्थप्रत्यायकत्वमेव वक्तुरीश्वत्वेनानुमापकत्वं वा अर्थं हृदयस्थितं बहिराविष्करोतीति कुड्याद्यंतरितस्यापि वक्तुर्ज्ञापकत्वं वा ॥ नभसस्तन्मात्रत्वं आकाशस्यासाधारणगुणः सूक्ष्मत्वं वा शब्दस्य तल्लक्षणं
णं कार्यं कवयो विदुः ॥ ३३ ॥

कथमनादध्यवसायात्मिका बुद्धिरेव बुद्धितत्त्वमभ्युपगन्तव्यमिति चेत्॥ अत्राध्यवसायात्मिकान्तःकरणवृत्तिविशेषाया बुद्धेः पुनर्हेत्वन्तरेहिमनवस्था
प्रसंगः तस्मात् बुद्धितत्त्वमभ्युपगन्तव्यं येन ज्ञानस्वरूपमात्रजननसामर्थ्यमभ्युपगतनिश्चयः प्रमात्मकं ज्ञानमिति यथोक्त एवार्थः। साधु तः तस्माद्बुद्धि
तत्त्वरूपा वृद्धिर्यथा तेन मनसः अनुग्रह इति दर्शितं॥ अत्र तु सर्वेन्द्रियाणामिन्द्रियकारणस्य वैकारिकस्य तैजसानुग्राह्यत्वमेव न तु अहंकारा
नुग्राह्यत्वमित्युच्यते॥ अत एवोत्पत्तिर्वाचिकः॥ शब्दोऽन्वन प्रयुक्तः पुष्टं चैतन्न॥ न हि तैजसस्य प्रवर्तनात्मकक्रियाशक्तियुक्तस्यानुग्राहकत्वं तत
रेण शुद्धस्य ज्ञानकार्यजननसामर्थ्यमस्ति॥ न चैवं बुद्धितत्त्वस्यापि तैजसस्यापि तैजसादुत्पत्तिरनुपपन्ना कथमुक्तेति वाच्यं तस्मिंस्तैजसाहंकृतानुग्राहकप्रका
रूपप्रदर्शनमात्रपरत्वात् तस्मात्तैजसानीन्द्रियाण्येवेत्यस्यायमर्थः तैजसाहंकारानुगृहीतवैकारिकाहंकारकार्याण्येवोभयविधानीन्द्रियाणीति
इन्द्रियाणां तैजसानुगृहीतवैकारिकाहंकारोत्पत्तिर्हि द्वितीयस्कंधेऽभिहिता॥ एतत्तैजसहेतुकमुपपादयन्ति प्राणस्य हीति॥ हि यस्मात्प्राणस्य कर्मे
न्द्रियगणस्य प्राणमनु॥ क्रामन्तं सर्वे प्राणा अनुक्रामन्तीति इति सर्वेन्द्रियाणां प्राणशब्दवाच्यत्वेऽपि बुद्धेरिति ज्ञानेन्द्रियगणस्य पृथगुपादानं गोव
लीवर्दन्यायेनात्र कर्मेन्द्रियवर्गपरः प्राणशब्दः तस्य कर्मेन्द्रियगणस्य क्रियागमनादिक्रियारूपा शक्तिरिष्यते पतश्च बुद्धेः बुध्यतेऽनेनेति बु
द्धिः ज्ञानेन्द्रियवर्गस्य विज्ञानमयः प्रकाशनरूपा शक्तिस्ता इष्येते॥ ततस्तैजसाहंकारानुगृहीतसात्त्विकाहंकारकार्याण्येवोभयेन्द्रियाणीत्यर्थः बु
द्धेर्विज्ञानशक्तित्वेऽपि ज्ञानेन्द्रियगणस्य वैकारिकत्वं स्पष्टमेवोक्तं॥ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयमिति सत्त्वस्यैव प्रका
शकत्वात्॥ ननु उभयेन्द्रियाणामपि तैजसानुगृहीतवैकारिकत्वे उभयेषामपीन्द्रियाणां ज्ञानक्रियाशक्तिद्वयमस्त्वमेव स्यान्न तु न दृष्टमिति चे
न्न॥ सत्त्वरजसोरुद्भवाभिभवयोगेन ज्ञानेन्द्रियोत्पादनवेलायां वैकारिके सत्त्वस्योद्भवः रजसोऽभिभवः कर्मेन्द्रियोत्पत्तिवेलायां तु रजस उ
द्भवः सत्त्वस्याभिभव इत्याशयात्॥ ३१॥

संशयो विकल्पज्ञानं विपर्यासश्च हेत्वाभ्यासात्वा विपरीतज्ञाने वित्र स्थिते ॥ तत्र धर्मान्तरस्य धर्मान्तरे प्रतीतिरन्यथाज्ञानं यथा पीतः शंख इति धर्मान्तरस्य धर्म्यन्तरत्वेन प्रतीतिर्विपरीतज्ञानं यथेदं रजतमिति शुक्तिशकले निश्चयः समारूपस्मृतिरनुभूतवस्तुविषयं ज्ञानं स्वापो निद्रा संशयादिस्वायोनाभिः रथगलेकरेण वृत्तिभिर्बुद्धेः बुद्धितत्त्वस्य लक्षणं इन्द्रियानुग्राहकत्वरूपलक्षणं उच्यते ॥ यथेन्द्रियाणां द्रव्यस्फुरणविज्ञानादिजनकत्वं तदा तानीन्द्रियाणि बुद्धितत्त्वानुगृहीतानीत्युच्यन्ते इत्यर्थः यद्वा इन्द्रियाणामिति कर्तरि षष्ठी इन्द्रियाणां कार्यभूतं द्रव्यस्फुरणविज्ञानं द्रव्यस्फुरणमर्थे॥न्द्रियसंबंधस्फुरणं तज्जन्यविज्ञानं शब्दवाच्यं बुद्धितत्त्वं तैजसाहंकाराद्भवत् अनुग्राहेन्द्रियकार्यत्वादित्यर्थः संशयादयो ज्ञानविशेषा इत्याह संशय इति ॥ बुद्धेर्लक्षणं बुद्धेः प्रकारः वृत्तितः सदोषनिर्दोषेन्द्रियवृत्तिभिरित्यर्थः ॥ २९ ॥ उभयेन्द्रियाणामुत्पत्तिं लक्षणं चाह ॥ तैजसानीति ॥ क्रियाज्ञानवि

संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥ स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ ३० ॥ तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥

भागशः ज्ञानेन्द्रियकर्मेन्द्रियविभागेनोभयविधानीन्द्रियाणि तैजसान्येव ॥ एवकारान्तरकार्यत्वव्युदासार्थः ननु पूर्वमिन्द्रियाणामनुग्राह इति तैजसाहंकारस्येन्द्रियानुग्राहकत्वमुक्तम् ॥ अत्र त्विन्द्रियाणां तत्कार्यत्वमेवोच्यते इति विरोधः मैवं पूर्वत्र कोऽसाविन्द्रियेषु तैजसकृतोऽनुग्रह इत्यपेक्षायां द्रव्यस्फुरणविज्ञानरूपानुग्रह इत्युक्तम् ॥ न च तत्रोतः करणभेदस्य बुद्धितत्त्वस्यैवोत्पत्तिरुच्यते इति वक्तुं शक्यं ॥ महत्तत्त्वानुगृहीतान्तःकरणाध्यवसायात्मकवृत्तिविशेषस्यैव बुद्धित्वाद्वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायतेति मन उक्तिकथनेनैव सिद्धत्वात् पृथग्बुद्ध्युत्पत्तिकथनस्यानपेक्षितत्वात् अन्यथा चित्ताहंकारयोरपि पृथगुत्पत्तिकथनापत्तेश्च ननु तत्र निश्चयः स्मृतिरेव चेति बुद्धेर्वृत्तिविशेषस्यान्निश्चयस्य

॥ मर ॥

अस्यैतैजसाहंकारस्याधिष्ठानारंवदन्कोमाविंद्रियेषुनत्कृतोनुग्रहइतिविवक्षायांज्ञानस्वरूपमात्रजननसामर्थ्यादिरेवसर्वेंद्रियेष्वनुग्रा
ह्यत्वंहत्तिभिर्लक्ष्यतइत्याहयामिर्निर्विमिः॥करणीकाणामिंद्रियाणामधीश्वरमधिष्ठेयतैजसाहंकारानुग्राह्यत्वादिंद्रियाणामप्यमनिरु
द्धाधिष्ठितत्वमुक्तंशारस्वातलीवेंदीवरश्यामंकरपिभिःशनैःसमगाराधनीयंमनिरुद्धाख्यव्यूहंयंतैजसाहंकारंविदुः अनिरुद्धा

यद्विदुर्ह्यनिरुद्धाख्यंहृषीकाणामधीश्वरम्॥शारदेंदीवरश्यामं
संराध्यंयोगिभिःशनैः॥२८॥तैजसात्तुविकुर्वाणाद्बुद्धितत्त्व
मभूत्सति॥द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः॥२९॥

धिष्ठिततैजसाहंकारविदुरित्यर्थः॥२८॥तस्मात्तैजसाद्विक्रियमाणाद्धेसतिइंद्रियाणामनुग्रहरूपंबुद्धितत्त्वंबुध्यतेनेनेतिबुद्धिः
ज्ञानस्वरूपमात्रजननसामर्थ्यमभूत्॥कथंबुद्धितत्त्वस्येंद्रियानुग्राहकत्वमवगम्यतइत्याशंकायांस्ववृत्तिभिरित्याहद्रव्येति॥द्र
द्रव्यस्फुरणविज्ञानाद्दयोबुद्धितत्त्वस्यवृत्तयः तत्रद्रव्यस्फुरणविज्ञानंद्रव्यमात्रावभासरूपंज्ञानं व्यावर्तकाकारज्ञानाभावात्॥२९

भ्यहंकारस्यलक्षणंतस्यस्वकार्यभूतांतःकरणभेदाहंकारानुग्राहकत्वंतदुक्तिलक्षणंचाहकर्तृत्वमिति॥कर्तृत्वाभिमानः॥आत्मनिगमनाद्याश्रयत्वाभिमानोयदामनसिस्यात्तदाहंकारानुगृहीतंमनइत्यर्थः॥एवंकरणत्वमिंद्रियत्वंकार्यत्वंदेहत्वंचेतिलक्षणमहंकारस्यलक्षणंचिन्हं॥एते त्रिविकारणत्वादहंकारस्येत्यर्थः॥शांतत्वंप्रकाशकत्वंघोरत्वंविक्षिप्तत्वंमूढत्वंचेतिवाहंकृतेर्लक्षणंतत्रकारणंगुणत्रयरूपेणाहंकारोलक्ष्यतइत्यर्थः॥२६॥अथमनसउत्पत्तिपूर्वकंतल्लक्षणमधिष्ठातारंचाह वैकारिकादिति॥विकुर्वाणाद्वैकारिकाहंकारान्मनस्तत्वमजायतयस्यमनःसंकल्पविकल्पाभ्यांवर्त्तते॥संकल्पःसमिमेकीकारेदेहादिभिरात्मनोऽपृथक्त्वेनचिंतनं॥विकल्पोविषयचिंतनं॥यदंतःकरणेतैजसाहंका

कर्तृत्वंकरणत्वंचकार्यत्वंचेतिलक्षणं॥शांतत्वघोरविमूढमितिवास्यादहंकृते॥२६॥वैकारिकाद्विकुर्वाणान्मनस्तत्वमजायत॥यत्संकल्पविकल्पाभ्यांवर्त्ततेकामसंभवः॥२७॥

रानुग्रहात्संकल्पविकल्पैभवतःतदातदेवांतःकरणंमनइतिजानीयादित्यर्थः॥तस्यप्रद्युम्नाधिष्ठितत्वमाहकामसंभवति॥वैकारिकइतिशेषःकामःप्रद्युम्नःतस्यसंभवःसम्यग्भवतिसंभवःतस्माद्विभतितिरित्यर्थः॥अयमधिष्ठाताप्रद्युम्नोमनःकारणस्यवैकारिकाहंकारस्यतुमनसश्चद्रष्टाजातइतिनदधिष्ठातुर्वक्तव्यमाणत्वात॥अस्यमनसोनुग्राहकस्तुतैजसोहंकारःलोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहादीनांरजःकार्यत्वगमात्तुतस्यप्रवर्तनात्मकक्रियाशक्तियुक्तत्वाच्च एवंनाममाहंकारकार्यस्याकाशादेरपिस्वस्वकार्यजनकत्वेतैजसोहंकारोनुग्राहकोवेदितव्यःएवंसामान्येनोक्तमहंकाराधिष्ठातृत्वंसंकर्षणस्यतुनाममाहंकाराधिष्ठातृत्वमेवेतिशेषेपर्युवसन्नंबोध्य॥२७॥

कत्वमविकारित्वं विक्षेपादिराहित्यं समनएव शांतत्वं रजस्तमोभ्यामनभिभूतत्वं इत्येवं रूपैः स्वच्छत्वादिभिर्यैर्वृत्तिभिर्लक्षणैः प्रोक्तं यदा स्वच्छत्वा
दिर्गुणकं मनस्तदा सत्वोऽचार अव्यक्तानुग्रहीतमिति चेतो वृत्तिर्लक्ष्यते इत्यर्थः स्वच्छत्वादौ दृष्टांतमाह ॥ अपामंभसां प्रकृतिरनारोपितस्वस्वभा
वः यथाऽपां स्वभावरूपं स्वच्छत्वं फेनतरंगादिराहित्यं एवं स्वच्छत्वादिकं यथाभवति तदाव्यक्तानुग्रहीतं मन इत्यर्थः ॥२२॥ एवमध्यवसायादि
वृत्तिभिर्बुद्धेर्महत्तत्वानुग्रहीतत्वं वेदितव्यं अथाहंकारोऽस्मात्रिप्रकारं वदन् तत्स्वरूपं तद्द्वारभेदं तदधिष्ठातारं चाह त्रिभिः महत्तत्वादि
ति भगवतो वीर्येण संकल्परूपज्ञानेन चोदितात्प्रेरिताहतएव विकुर्वाणात् महत्तत्वाद्वैकारितेजसतामसभेदेन त्रिविधः क्रियाप्र

महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्यचोदितात ॥ क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥२३॥
वैकारिकस्तैजसश्च तामसश्च यतो भवः ॥ मनसश्चेंद्रियाणां च भूतानां महतामपि ॥२४॥
सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते ॥ संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयम् ॥२५॥

देन प्रवर्तीकरजोगुणोद्रिक्त इत्यर्थः ॥ अहंकारः समपद्यत उदभदित्यर्थः ॥२३॥ कोसावहंकार इत्यत्राह ॥ वैकारिक इति ॥ यतः त्रिवि
धादहंकारान्मनसः इंद्रियाणां ज्ञानकर्मोभयेंद्रियाणां महतां भूतानामाकाशादीनां अपिशब्दात् तन्मात्राणां च भव उत्पत्तिः मनआ
दीनां कारणमित्यर्थः ॥२४॥ तस्याहंकारस्य संकर्षणाधिष्ठितत्वमाह सहस्रशिरसं सहस्रफलसामनंतं अनंतशब्दवाच्यं साक्षात्
संकर्षणाख्यं भगवद्व्यूहं पुरुषं परमपुरुषं भूतेंद्रियभूतादीनां कारणं अहंकारं प्रचक्षते संकर्षणाधिष्ठितमहंकारं प्रचक्षत इत्यर

कत्स्य गुणस्याविर्भावादित्यपेक्षायां तद्दर्शयन्नमलप्रकृतिमहतो वासुदेवाख्यव्यूहाधिष्ठितत्वं तत्संभवान्तःकरणभेदचित्तवृत्त्यनुग्राहकत्वं
चाह ॥ यत्तदिति भगवतः पदं तत्र सत्त्वं निर्मलत्वात्स्वकाशकनामयं इत्यनुकरीत्यासत्त्वस्य प्रकाशकत्वात्तद्गुणकस्य भगवद्रूपत्वं भक्त र
स्यानत्वमित्यर्थः शांतमभिमततमस्कमनणवस्वच्छं प्रकाशसत्वगुणकं यच्च वासुदेवाख्यं वासुदेवाख्यभगवद्व्यूहाधिष्ठितं यच्चि
त्तमंतःकरणभेदचित्तानुग्राहकं अमलप्रकृत्यपर्यायमव्यक्तं तदेव महदात्मकं महत्तत्वामनावस्थितं इत्यर्थः अत्र वासुदे
वाख्यं चित्तमित्यधिष्ठात्रधिष्ठेययोरनुग्राह्यानुग्राहकयोश्चाभेदविवक्षया निर्देशः नात्र चित्तस्य वैकारिकाहंकार्यांतःकर

यत्तत्सत्त्वगुणं स्वच्छं शांतं भगवतः पदम् ॥ यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥२१॥
स्वच्छत्वमविकारित्वं शांतत्वमिति चेतसः ॥ वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥२२॥

णभेदस्य वासुदेवाधिष्ठितत्वं महदात्मकत्वं चोच्यते चित्ते चेद्भ्रमतो भवेदिति चित्तस्य क्षेत्रज्ञाधिष्ठितत्ववक्ष्यमाणत्वान्महत्वात्कार्याहंकारस्य चित्तर
स्य महदात्मना वस्थानायोगाच्च कारणेहि कार्याणामनवतिष्ठते ननु कार्ये कारणस्यानातनु संहारदशायां यद्यपि संभवति तथाप्यत्र सृष्टिप्रकरणेत
या वस्थानमयुक्तं नापि महदात्मकमिति चित्तस्यांतःकरणभेदस्य महदनुग्राह्यत्वमुच्यते महतो बुद्ध्यानुग्राहकत्वान्महान्वै बुद्धिलक्षणइत्युक्तः
न चात्र शब्देन बुद्धिरेवांतःकरणभेदो विवक्षित इति वकुं शक्यं बुद्धेर्वासुदेवाधिष्ठितत्वानुपपत्तेः बुद्धेर्गिरिशपतिरिति वक्ष्यमाणत्वात्तस्मादत्राभि
मततमस्कमुद्भूतसत्वगुणात्मकमव्यक्तमेव वासुदेवाधिष्ठितं महदात्मनापरिणतमित्यवधारणीयं तत्र यद्यप्यस्याधिष्ठाना वासुदेवः सएव म
हतोप्यधिष्ठाना ऽधिष्ठान्यं चेनरानुक्ते ॥२१॥ तदंतःकरणमव्यक्तानुगृहीतं स चित्तमितिलक्ष्यत इत्यत्राह ॥ स्वच्छत्वमिति ॥ स्वच्छं भगवद्विग्राह

भा.त.
॥१७६॥

नाह॥ य आत्ममायया स्वसंकल्पेनैव सत्वानां पृथिव्यादिसंघातदेहानामंतः पुरुषरूपेणाऽहमिछमिद्वेष्मिसुखोदुःखइति इछाद्वेषसुखाद्युपजीवा
ख्यरूपेणांतः॥ प्रविश्य तदात्मवद्भवत्सम इव विष्यतीति तेषामेवसत्वानांविशेषणत्वेन बहिः कालाख्यरूपेण च समन्वेति अवभासते॥१८
एवंस्रष्टुर्योगितया प्रकृतिपुरुषकालशरीरकत्वंभगवतउक्तं अथसृष्टिमाहदैवादितिपरःपुमान्परमपुरुषःसभगवान्परमपुरुषः
स्वस्यांस्वीयायांयोनौजगद्योनौप्रकृतौदैवाद्भगवत्संकल्पात् क्षुभितधर्मिण्यांरजस्तमश्चाभिभयसत्वंभवतिभारतरजःसत्वंतमश्चै
वतमःसत्वंरजस्तथेत्युक्तरीत्या क्षुभितसत्वादिगुणायांवीर्यंमहदादिप्रपंचस्रष्टिसामर्थ्यंचेतसमष्टिंवा आधत्तायुक्तंततःसायोनिः

दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान्॥ आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयम्॥१९॥
विश्वमात्मगतंव्यंजन्कूटस्थोजगदंकुरः॥ स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनंतमः॥२०॥

हिरण्मयंप्रकाशबहुलंमहत्तत्वमसूत प्रसूतवती क्षुभितधर्मिण्यामित्युक्तं सत्वादिगुणक्षोभोनाम गुणानांसाम्यावस्थाप्रहाणेना
न्यतमगुणाभिभवपूर्वकमन्यतमन्यतमगुणाविर्भावः॥१९॥ तत्रमहत्तत्वस्रष्टिः कस्यगुणस्याभिभवादित्यत्राह॥ विश्वमि
ति॥ जगदंकुरः जगदंकुरस्थानीयंयस्यतथासः जगत्कारणभूतः कूटस्थाविकारकोनिर्विकारीभगवानात्मगतंसाभिध्यायशरीरंस्वा
दितिउक्तप्रकारेणस्वशरीरभूतप्रकृतिलीनंविश्वंव्यंजयन्व्यंजयितुंस्वतेजसास्वसंकल्परूपज्ञानेनात्मप्रस्वापनंजीवानांज्ञान
संकोचकंतमस्तमोगुणमपिबदभिभूतमकरोदित्यर्थः॥२०॥

॥१७६॥

तत्र कालो वतवांतरमिति मनोंतरमुपलक्षयति ॥ प्रभाववमिति ॥ योऽसौ परमपुरुषसंबंधिनं प्रभावनेक आहुः ॥ कोसौ योऽसौ प्रभा
वृद्दस्य तत्र यतः योसावाद्यं जगतः सर्वसंहारादिरूपसंसार भवं भयं भवति ॥ परमपुरुषस्य सर्गसंहारादिषु जगत्त्रियमनं साम
र्थ्यं कालः वतुवत्वांतरमित्यर्थः एकदेशमुक्त्वा मनोंतरत्वं गम्यते स्वमतमाह ॥ अहंकारेति ॥ अनात्मन्यात्माभिमानोऽहंकारस्तेन मूढ
स्यातिमूढस्यं तमसा मिलीयत इति तमः शब्दवाच्यं निरतिशयस्वरूपापन्नं प्रधानं प्रकृतिकारणं परमात्मानं वाऽईयुषः संसारद
शायांमायुस्य कर्तुर्जीवस्य ॥ १६ ॥ तयाहे मानविप्रकृतेः प्रधानस्य यद्गुणसाम्यं तस्यनिर्विशेषस्य नामरूपादिविशेषशून्यस्य ना
मरूपादिविशेषस्य परिहारेण संहारदशायां साम्यावस्थापन्नगुणत्रयस्य प्रधानस्य चेत्यर्थः ॥ यतश्चैषा व्यापारो भवति स भग

प्रभावं योऽस्य परमाहुः कालमेके यतो भयः ॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १६ ॥ प्रकृतेर्गुणसाम्यस्य निर्वि
शेषस्य मानवि चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥ १७ ॥ अंतः पुरुषरूपेण कालरूपेण यो बहिः ॥ समन्वे
तेषसत्वानां भगवानात्ममायया ॥ १८ ॥

वदात्मकः काल इत्युपलक्षितः संहारदशायां नामरूपविभागानर्हनिरतिशयसू
क्ष्मावस्थामापन्नयोः प्रकृतिपुरुषयोः परमात्मात्मकयोस्तस्मिन्नेव लीनयोः पुनः सृष्टिदशायां जगदाकारेण परिणमनरूपे
यो व्यापारस्तद्धेतुभूतः स च भगवदात्मक इत्यर्थः ॥ १७ ॥ एवं प्रकृतिपुरुषकालस्वरूपं शोधितं तेत्रयोपि भगवद्रूपाणि प्रधानपु
रुषकालस्वरूपं शोधिभागशः रूपाणीत्युक्तैः तेषु पृथिव्यादिस्थूलरूपेण परिणतत्वात्सायेण प्रकृतिः स्फुटस्वरूपा पुरुषकालयो
स्तु नादृशस्थूलपरिणामाभावात्तयोः प्रतीयमानत्वं युक्त्या दर्शयन्नतयोः शास्त्रैकसमधिगम्यं भगवदात्मकत्वं मंतरिति श्लोके

भा.त.

॥१७५॥

श्चंतःकरणंभजति॥मनइति॥अंतरात्मकमंतःकरणंवृत्त्यास्वगुणवृत्त्यासंकल्पाध्यवसायाभिमानचिंतारूपलक्षणयाचिह्नभूतयामनोबुद्धि
रहंकारश्चित्तमिति चतुर्धालक्ष्यतइत्यन्वयः॥अत्रायंभावः एकमेवांतरिंद्रियंसंकल्पादिवृत्तिभेदेन चतुर्विधः॥तत्रचित्तबुद्ध्यहंकाराः
णांक्रमेणामलप्रकृतिमहदहंकाराः अनुग्राहकाः मलप्रकृत्याद्यनुग्राह्यत्वनिबंधनचित्तादिभेदव्यपदेशः अनुग्राह्यानुग्राहकयोरभे
दविवक्षयाक्वचिदनिर्देशोमहान्वैबुद्धिलक्षणइत्यादिः एषांचात्मकमहदहंकाराणामधिष्ठातारोवासुदेवादयावक्ष्यंते एवंचबुद्धि
शब्देनांतरींद्रियस्यस्ववृत्तिरूपाध्यवसायजनने ऽनुग्राहकंमहत्तत्त्वव्यवसितंचित्तशब्देनचिंताजनकस्यांतरिंद्रियस्यानुग्राहकत्वा
द्वाव्यक्तारव्यामलप्रकृतिर्विवक्षिता॥तत्रानुग्राह्यग्राहकयोरभेदवक्षया चतुर्विंशतिकंगणंविवृद्धिरिमुक्त॥भेदविवक्षायांसप्तविं

मनोबुद्धिरहंकारचित्तमित्यंतरात्मकम्॥चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया॥१४॥ए
तावानेवसंख्यातोब्रह्मणःसगुणस्यह॥सन्निवेशोमयाप्रोक्तोयःकालःपंचविंशकः॥१५॥

शतिकोगणोबोध्यइति॥१४॥एवंतत्त्वानिसंकलय्यसंगृह्णन्कालस्वरूपंलक्षयतिएतावानिति॥सगुणस्यसत्त्वादिगुणकस्यब्रह्म
णःप्रधानस्यनत्वादेतद्ब्रह्मनामरूपमन्नंचजायतइतिदैवब्रह्मणिवेदितव्येइत्यादिश्रुतौममयोनिर्महद्ब्रह्मेत्यादिस्मृतौच॥प्रकृतावर
पिब्रह्मशब्दप्रयोगात्तदुपयुक्तमानुगुण्यंचयद्वाउक्तानांतत्त्वानांतत्त्वानांयःपृथिव्यांतिष्ठन्यस्यवक्षुषितिष्ठन्नितिब्रह्मात्मकत्वश्रवणा
त्सत्त्वादिगुणात्मकनिकार्यभूतपृथिव्यादिशरीरकपरब्रह्मणःपरमात्मनइत्यर्थःसन्निवेशः॥अवस्थाविशेषःमयाप्रोक्तः॥एतावानिवच
तुर्विंशतिसंख्याकएवसंख्यातःगणिततत्त्वजातेनविशेषः अथकालस्वरूपंलिलक्षयिषुलक्ष्यतावच्छेदकांतरत्वमाहयःकालःसपंचविंशति

त्कार्यावस्थाया पृथिव्यादिविशेषवत्सदसदादि पृथिव्यंतकारणरूपेण ब्रह्मादिस्तंबपर्यंतशरीररूपेण च कार्यकारणमित्यर्थः ॥१०॥ एवमवस्थाद्वयमभिधाय तस्यैव प्रधानस्य कार्याणां महदादीनां सृष्टिमनुक्रमिष्यन् तावत्तत्कार्याणि गणयन्सुखग्रहणाय संग्रह्णाति ॥ पंचभिः पंचभिर्भूतैस्तन्मात्रैः चतुर्भिर्मनोहंकारमहदव्यक्तैः दशभिर्ज्ञानकर्मोभयेंद्रियैरित्येवं संख्याभेदेन चतुर्विंशति तत्त्वानि चतुर्विंशतिर्यस्मिन् तं प्राधानिकं प्रधानकार्यात्मकं गणसमूहं विदुः ॥११॥ एतद्विवृणोति त्रिभिः महाभूतान्याकाशादीनि

पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पंचैव भूरापोग्निर्मरुन्नभः ॥ तन्मात्राणि च तावंति गंधादीनि मतानि मे ॥ १२ ॥ इंद्रियाणि दश श्रोत्रं त्वकदृक्रसनानासिका ॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥ १३ ॥

पंचैवेति आकाशोधिकः संख्याव्यवच्छेदार्थः ॥ तानि गणयति ॥ भूरिति स्पष्टोर्थः ॥ गंधादीनि गंध आदिर्येषां तानि तन्मात्राणि द्रव्याणीत्यर्थः ॥ गंधादयो हि पृथिव्यादीनामवस्थाविशेषः तावंति पंचैवमे मया मतानि ज्ञातानि इदं मम भगवतमित्यर्थः एवं च तेजोवन्नात्मकं मत त्रयमेवेति मतांतरव्यावृत्तिः ॥ १२ ॥ इंद्रियाणि गणयति ॥ इंद्रियाणीति ॥ श्रोत्रादीनि ज्ञानेंद्रियाणि वागादीनि कर्मेंद्रियाणि तत्र पायुर्गुदं ॥ १३ ॥

भा.त.

॥ १५९ ॥

कंसांख्यं तत्त्वप्रमाणमेव हीमर्थः एतन्निदर्शयति ॥ हे मुने अयातन एव तु मम महं यस्याशक्तलयात्वद्वीर्येणेमवो चं तद्दतं सत्यं कर्तुमिति
शेषः अवितथवाचात्मतनशब्दोऽपि विमानत्वार्थं तं यथामयाः ज्ञानि अवातरिक्तियाविशेषणे वा ॥ ३५ ॥ अवतारप्रयोजनमाह
एतदिति दुराशयोऽतःकरणं यस्मिन् तस्माद्दाम्तत्वेनानुसंहिताद्देहान्मुमुक्षूणां मोक्तुमिच्छतां संसृतिमनिच्छतामित्य
र्थः तेषामात्मदर्शने प्रकृतिविविक्तजीवात्मपरमात्मयाथात्म्यविज्ञाने संमतायाभिमताय उपयुक्तायेति यावत् तत्त्वानां

एतन्मे जन्मलोकेस्मिन्मुमुक्षूणां दुराशयात् ॥ प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ॥ ३६ ॥ एष आ
त्मायथोव्यक्तो नष्टः कालेन भूयसा ॥ तं प्रवर्त्तयितुं देहमिमं विद्धि मया धृतम् ॥ ३७ ॥

प्रकृतिपुरुषेश्वरयाथात्म्यरूपतत्त्वानां प्रसंख्यानाय प्रकथनाय विवेचनायास्मिन् लोके एतन्मम जन्माभवदित्यर्थः ॥ ३६ ॥ ननु पूर्वमेव
विद्धि च तत्त्वज्ञानुवृत्तिपरंपरामिल्लां येन आत्मयथो विकल एवावतिष्ठते किमिदानीं त्वदवतारसाध्यमित्यत्राह एष इति एष आ
त्मापथः आत्ममार्गः ॥ आत्मतत्त्वं इति यावत् अव्यक्तः सूक्ष्मः परमदुर्ज्ञेय अत एव मया पूर्वमुपादिष्टोपि भूयसा कालेन विलेन
नष्टः परिभ्रष्टः तमेवात्मपथं प्रवर्त्तयितुं मयेमं देहं धृतमिति विद्धि जानीहि ॥ ३७ ॥

॥ १५९ ॥

कर्दमेनैवमुक्तो भगवान्कपिलः स्वचिकीर्षितसांख्यतंत्रस्य प्रामाण्यं तावत्त्रिदर्शनेन प्रदर्शयन्स्वावतारप्रयोजनं च कथयन्नभिप्रेतार्थे
पितरमादिशति । षड्भिः श्लोकैः सत्यलौकिके सत्यं पुण्यं ऋतपर्यायत्वादृतं च पुण्यमेव ॥ अपुण्यस्य कर्मणएवमननाद्दात्मानं जुगुप्सेदि
त्युक्तेः ऋतं पिबंतौ सुकृतस्य लोक इति चोक्तेः क इति चोक्तेः तच्च पुण्यं कर्मोपासनं चेति द्विविधमत्र विवक्षितं कथं कर्मवाचिपुण्य
शब्देनोपासनमभिधीयत इति न शंक्यं उपासनस्यापि मनोव्यापाररूपत्वेन तेनाभिधानसंभवात् अतः वाचिकैः पक्षिमृगतां मा
नसैरंत्यजातितां शारीरजैः कर्मदोषैर्याति स्थावरतां नर इति मानसव्यापारस्यापि कर्मदोषैरित्यनेन क्रियारूपत्वमवगत भ
गवदनुग्रहविशेषस्यैव पुण्यरूपत्वेनोपासनस्यापि तदनुग्रहहेतुत्वेन तदभिधानस्यान्याय्यत्वाच्च ॥ लोक्यत इति लोकः फलं स

श्रीभगवानुवाच ॥ मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके ॥ अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥ ३५ ॥

साधनं लौकिकं तच्चापि स्वर्गापवर्गसाधनभेदेन कर्मोपासनं चेति द्विविधं तस्मिन्विषये यन्मया प्रोक्तं सांख्यं तत्प्रमाणमेवेत्यर्थः ॥ व
स्मात्ते हि सांख्ये भगवद्भक्तियोगनिष्ठानामर्चिरादिगत्या भगवत्प्राप्तिर्निवृत्तिधर्मरतानामित्यारभ्य सूर्यद्वारेण ते यांतीत्यनेन अथ
यो गृहमेधीयान्धर्मानित्यारभ्य गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यंतीति स्वर्गासक्तमनसां तत्साधनानुष्ठानेन पितृयाण
गमनेन भोगानुभवश्चावक्ष्यते ॥ यद्वा सत्यं ब्रह्म सत्यं ज्ञानमनंतमिति श्रुतेः लोक्यते साक्षात्क्रियत इति लोकः फलं तत्साधनं लौ
किकं सत्यं च लौकिकं चेति समाहार द्वंद्वः तस्मिन्ब्रह्मस्वरूपतदनुभवरूपफलतत्साधनादिविषये इत्यर्थः तत्र यन्मया प्रो

भा॰ट॰

॥१६०॥

यतेइतिसंसारः तेनमद्र्जनेनमात्मन्यात्मन्येवस्वात्मन्येवात्मनामनसाऽन्वीक्षस्वात्मानंकुर्वन्विशोकः विगतः शोकः शोकहेतुमत्याविरोधिप्राची
नंकर्मयस्यसः अभयंनविद्यते भयंयस्मात्तंमामृच्छसिप्राप्स्यसिकथंभूतंमात्मानंजीवांतरात्मानंस्वयंप्रकाशंसर्वभूतानांगुहायांहृदयकु
हरेशयानं॥३८॥३९॥मपिगतेसतिकिंभवान्करिष्यतीत्यत्राह॥मात्रइति॥असोममातावियायामहुपदिष्टब्रह्मविद्ययाभयंमृत्युमपि
तरिष्यति॥नामाध्यात्मिकींसर्वकर्मशमनीपूर्वोत्तराधिविनाशिविद्यांमात्रेवितरिष्यउपदेक्ष्यामिइत्यर्थः॥४०॥एवंकपिलेनोक्तः॥कर्द
मस्तदुक्तमेवाकरोदित्याह मैत्रेयः॥एवमिति॥तेनकपिलेनसमुदितःप्रजापतिःकर्दमस्तंकपिलंप्रदक्षिणीकृत्यप्रक्रमप्रीतस्तुष्टो

मात्रे आध्यात्मिकींविद्यांशमनींसर्वकर्मणां॥वितरिष्येययाचासौभयंचातितरिष्यति॥४०॥मैत्रेयउवा
च॥एवंसमुदितस्तेनकपिलेनप्रजापतिः॥दक्षिणीकृत्यतंप्रीतोवनमेवजगामह॥४१॥व्रतंसआस्थि
तोमौनमात्मैकशरणोमुनिः॥निःसंगोव्यचरत्क्षोणीमनग्निरनिकेतनः॥४२॥मनोब्रह्मणियुंजा
नोयत्तत्सदसतःपरम्॥गुणावभासेविगुणएकभक्त्यानुभाविते॥४३॥ वनंप्रत्येवजगाम॥अहोऽनेनसर्वसंप
त्सम्पद्स्वगृहत्यागोविस्मीयते॥४१॥सकर्दमःमौनव्रतमास्थितः आश्रितः आत्मापरमात्मैवैकंशरणंपायोरक्षकश्चयस्यसः
मुनिःशुभाश्रयसंशीलनपरःनिःसंगःइंद्रियार्थेष्वासक्तिरहितःसंसारिजनसंगरहितोवा॥अनग्निःपरित्यक्तगृहाश्रमत्वाद्गा
र्हपत्याग्निरहितःअनिकेतनःनियतावसथरहितःक्षोणींभूमिंव्यचरत्॥४२॥यत्सदसतःपरंचिदचिद्विलक्षणं॥परंविलक्ष
णंतस्मिन्ब्रह्मणिगुणावभासेःयस्मेतिबहुव्रीहिः॥मंगलगुणावभासितेहेयगुणरहितेमनोयुंजानःएकाग्रीकुर्वन्॥४३

॥१६०॥

एवमवतारप्रयोजनमभिधाय तमादिशति ॥ गच्छेति ॥ मया आदिष्टः आदिष्टः कामं यथेच्छं गच्छ याहि ॥ मयि संन्यस्तेन समर्पितेन कर्मणा मन
संहितफलेन परमाराधनैकवेषेणानुष्ठितेन कर्मणा सुदुर्जयं उपायांतरैर्जेतुमशक्यं मर्त्यं ज्ञानोत्पत्तिविरोधिपुण्यपापरूपप्राचीनं कर्म
जित्वा अपोह्य अमृतत्वाय मत्प्राप्तिरूपामृतत्वविरोधिप्राचीनकर्मनिरसनायेति मां भज ॥ अत्रेदं वेदितव्यम् ॥ अनादिपुण्यपापरूपं कर्म
किंचिन्मोक्षोपायभूतभगवदुपासनोत्पत्तिविरोधि किंचित्तु कर्मोपेयभगवत्प्राप्तिविरोधि ॥ तत्रोपायविरोधिनः ॥ कर्मणोऽनभिसं
हितफलकर्मणा निवृत्तिः धर्मेण पापमपनुदतीति ॥ अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ कषाये कर्मभिः पक्वे ततो ज्ञानं प्रव

गच्छ कामं मयापृष्टोमपि संन्यस्तकर्मणा ॥ जित्वा सुदुर्जयं मर्त्यममृतत्वाय मां भज ॥ ३८ ॥ मामा
त्मानं स्वयंज्योतिः सर्वभूतगुहाशयम् ॥ आत्मन्येवात्मनान्वीक्षन्विशोकोभयमृच्छसि ॥ ३९ ॥

र्तते इत्यादिस्मृतिभिरुक्ता ॥ अत्राविद्ययाऽनभिसंहितफलकर्मणा मृत्युमुपायोत्पत्तिप्रतिबंधककर्म तीर्त्वा अपोह्य विद्यया ज्ञाने
नामृतत्वमश्नुते प्राप्नोतीति श्रुत्यर्थः तथा च स्मृतिः इयाज सोपि सुबहून्यज्ञान् ज्ञानव्यपाश्रयः ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमवि
द्ययेति उपेयविरोधिनस्तु कर्मणः भगवदुपासनात्मभक्त्याद्यपरपर्यायज्ञानेनैव निवृत्तिः तमेव विदित्वातिमृत्युमेति नान्य
पंथाः एवमेवंविदि पापं कर्म न श्लिष्यते क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे निचाप्य तं मृत्युमुखात्प्रमुच्यते ध्यात्वा
देवं मुच्यते सर्वपाशैः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति स्मृतिप्रसिद्धं तदनेन त्वापि संन्यस्तकर्मणेत्यादिना

इति तृतीये चतुर्विंशः ॥२४॥ नवमाकर्णितमनुतद्रूपस्य चरित्रः शौनकः कपिलोक्तं सांख्यं शुश्रूषुः तत्कानुवादपूर्वं कपृच्छति त्रिभिः कपिल
इति ननु शारीरकमीमांसायां ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानं विप्रतिषेधाच्चासमंजसमित्यादिष्वब्रह्मात्मकप्रधानोपा
दानकारणत्वस्यानुपपत्तिपरस्मात् विरुद्धार्थत्वादिति दूषितं सांख्यं केवलब्रह्मस्वरूपगुणविभूतिवर्णनपरं तद्विरोधि च तस्मात् श्रा
दिकवैदिकानार्थोपबृंहणपरे अस्मिन् स्वकर्तृके पुराणे कथं भगवतावतारेणैव निवेशितमुच्यते॥ दूषितांशस्य हि हारेण तदुक्तं चेक
परिग्रहीनसत्कार्यवादादिग्रहेण च कपिलमतमपि शिक्षणीयं तदेवमति समीक्षीनम्याय्योपपन्नं कर्तुं च तदुक्तज्ञानयोगस्य

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे ई प्र णं म चतुर्विंशोध्यायः ॥२४॥ शौनक उवाच॥ कपिलस्तत्
त्वसंख्याता भगवानात्ममायया॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥१॥ छ ॥

भगवद्भक्तियोगांगत्वकथनायात्र निवेशितमत एव शारीरकसूत्राः कपिलोक्तत्वादत्रात्र न निवेशिताः कथं पुनर्भगवदवता
तारेण कपिलोऽनुवैदिका परिग्रहीता ब्रह्मात्मकप्रधानकारणत्वादिवादाः परिग्रहीता इति चेतस्माद्विशिष्टभगवत्वेपिस्व
स्य क्षेत्रज्ञत्वेन स्वाज्ञानमूलत्वादेरविरुद्धार्थपरिग्रहस्य यथा हिरण्यगर्भस्य भगवदावेशावतारत्वेपि क्षेत्रज्ञत्वेन स्वलार
योगस्य भिसेनरचितानत्यैवेदमपीति ज्ञेयम्॥ अजः कर्मीयत्र जन्मरहितः॥ भगवानात्ममायया स्वसंकल्पेन नृणामात्म
प्रज्ञप्तये आत्मया थात्म्यविशदीकरणाय तत्वसंख्याता तत्वत्रयकथनः कपिलः जातः अवतीर्णः ॥१॥ स्वा ॥

निरहंकृतिर्देहात्माभिमानरहितः निर्ममः देहापत्यकलत्रादिषु स्वीयत्वबुद्धिरहितः निर्द्वंद्वः शीतोष्णादिद्वंद्वधर्मैरनाकुलः समदृक् विद्याविनय
संपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च समदृक् पंडितो मत इत्याद्युक्तरीत्या समदर्शनः स्वदृक् प्रकृतिविलक्षणाव्ययात्मकस्यात्म
दर्शी प्रत्यक्प्रशांतधीः प्रत्यगात्मनि ब्रह्मात्मके जीवात्मनि प्रशांता धीर्यस्य सः ब्रह्मात्मकस्यात्मानुभवपरः निस्तरंगितोदधिरिव स्वयम
प्यशनायापिपासाशोकमोहजरामरणाख्योर्मिषट्करहितः ॥४४॥ सर्वज्ञे प्रत्यचः जीवस्यात्मन्यंतःप्रविष्टनियंतरि षाड्गुण्यपूर्णे सर्वभू
तधारके परमपुरुषे परेण ध्रुवानुस्मृतित्वप्रत्यक्षतापन्ननिरतिशयप्रियत्वादिदशापन्नेन भक्तियोगेन लब्धमतिः ॥४५॥ धार्येषु सर्वभूते

निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् ॥ प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ॥४४॥ वासुदेवे भग
वति सर्वज्ञे प्रत्यगात्मनि ॥ परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ॥४५॥ आत्मानं सर्वभूतेषु भगवंतमवा
स्थितम् ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥४६॥ इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ॥ भगवद्भक्ति
युक्तेन प्राप्ता भागवती गतिः ॥४७॥ पुत्रवस्थितं भगवंतमात्मानं धारके परमात्मनि भगवति भूतानि धार्याण्यपश्यत् ॥ पूर्वोक्त
तादात्म्यं भगवतो व्याप्तिद्वारिकत्वं चोच्यते ॥४६॥ इच्छाद्वेषादिप्राकृतगुणरहितेन सर्वत्र भूतेषु समचेतसा तत्तत्कर्मोपात्तदेवमनुष्यति
र्यग्विचित्राकारेण प्रकृतिपरिणामरूपान् देहानात्मनि शरीरं जीवानां भेदेपि सर्वत्र ज्ञानैकाकारतया एकरूपान् तत्तत्कर्मानुसारेण
नियंतृत्वभेदेप्यंतर्यामित्व निरतिसमस्तहेयप्रत्यनीककल्याणगुणाकरत्वेन ऐकरूप्यमीश्वरं पश्यतीत्यर्थः यच्चित्तं तन्नत्समचेतस्तेन भ
गवद्भक्तियोगेन च भागवती गतिः मुक्तिः प्राप्ता लब्ध्वा पापांतरे स एव तां भागवतीं गतिं प्राप्तः ॥४७॥ ॥ ॥ ॥ ॥

भा.तृ.

॥१२३॥

ततः वचोग्रहणानंतरमकुतोभयमकुतश्चिद्भीतिरहितमतएवमुखतः अभिमुखतश्चरंतंसपत्नमसुरमब्जजो ब्रह्मणो घ्राणेंद्रिया
विर्भूतो भगवानुत्पत्योद्धत्य गदया हनौ कपोलस्याधोदेशे जघान ॥२॥ सा भगवत्प्रयुक्ता ऽप्राप्तैव गदा तेनासुरेणाक्रांतगदया हता र
भगवत्कराद्विहता भगवत्कराद्विहता च्युता सती विघूर्णिता घूर्णिता ध्वनयंती अपतत् ततो रेजे राजत तद्भगवत्कराद्विहस्तं पत
नं च्युतं पश्यतां आश्चर्यमिवाभवत् ॥३॥ सोऽसुरस्तदा लब्धतीर्थो लब्धावकाशोपि निरायुधमायुधरहितं विष्वक्सेनमप्र

ततः सपत्नं मुखतश्चरंतमकुतोभयं ॥ जघानोत्पत्य गदया हनावसुरमक्षजः ॥२॥ सा हता तेन गदया वि
हता भगवत्करात् विघूर्णितापतद्रेजे तदद्भुतमिवाभवत् ॥३॥ स तदा लब्धतीर्थोपि न बबाधे निरायु
धम मानयन्स मृधे धर्मं विष्वक्सेनं प्रकोपयन् ॥४॥ गदायामपविद्धायां हाहाकारे विनिर्गते
मानयामास तद्धतुं सुनाभं चास्मरद्विभुः ॥५॥

गवंतं मृध्ये युद्धे धर्मं संमानयन्प्रकोपयन्न च बाधेन प्राहरत् ॥ स
मृधे हनिपाते तु मत्लब्धतीर्थोपि न बबाधे समानयन्न भवेति वाक्यभेदेनान्वपादपौनरुक्त्यं बोध्यं ॥४॥ गदायामपविद्धायां स्व
हस्ताद्विहतायां तस्यां पश्यतां हाहाकारे च विनिर्मिते च सति विभुर्भगवांस्तस्य हेतस्य धर्मं निरायुधाबाधनरूपं धर्मं मा
नयामास बहुमन्यत सुनाभं चक्रमस्मरत्स्वहस्तगतमकरोदित्यर्थः ॥५॥ ॥ ॥ ॥ ॥ ॥ ॥

॥१२३॥

अधुनाऽद्दृशं नौ एष अभिजिन्नामाऽभिजिदाख्यो मौहूर्तिकः मध्याह्नमुहूर्तरूपः योगः युक्तः कालः अगात् आगतः तत्तस्मात्सुहृदां त्वं सुहृदां नः शिवाय त्वं त्वरया दुस्तरं दुर्जयं दैत्यमाशु निरसन् जहि ॥ २७ ॥ दिष्ट्येति ॥ विहितं त्वयैव शापानुग्रहकाले विहितमयं वा तदा विश्वेश्वरः कृपा भगवान् लोकभावनः ॥ हनिष्यत्यवतीर्यामौ यथाद्रीन् शतपर्वधृदिति पित्रा कश्यपेनैव विहितं मृत्युं त्वामप्यसुरः स्वयं दिष्ट्या दैवेनैवासादितः ॥ एनमसुरं मृधे युद्धे विक्रम्य प्रहृत्य प्रसह्य वा हत्वा त्वं समर्थः ॥ लोकान् शर्मणि सुखे

अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात ॥ शिवाय नस्त्वं सुहृदामाशु निरस्य दुस्तरम् ॥ २७ ॥ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् ॥ विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि ॥ २८ ॥ इति श्रीभागवते महापुराणे हिरण्याक्षयुद्धं नामाष्टादशोऽध्यायः ॥ १८ ॥ मैत्रेय उवाच ॥ अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः ॥ प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत ॥ १ ॥ आधेहि सुखे नरान् कुर्विसमर्थः

२८ ॥ इति श्री टीकायामष्टादशः ॥ १८ ॥ एवं ब्रह्मणा भाषितो भगवांस्तद्वचोभिर्नंघासुराणां बलकर्यामपि वेलायां स्वपराक्रममेवादिदर्शयिषया पुनर्युयुधे इत्याह मुनिः ॥ अवधार्येति विरिंचस्य ब्रह्मणो निर्व्यलीकं निर्देषममृततुल्यं च वचो वधार्य श्रुत्वा प्रहस्य कालात्मनीः ॥ सर्वसंहर्तुर्ममापि शत्रुवलाद्भयं ब्रवीतीति विहस्य स भगवान् प्रेमगर्भेण प्रेमसहितेनापांगेन कटाक्षेणाङ्गीकृतवान् ॥ ॥ ॥ ॥ ॥ ॥

वानां विप्राणां मैरमेयीणां धेनूनाम् ॥ अनागसां निरपराधिनामपि भूतानां सर्वजीवानां च ॥ २२ ॥ आगस्कृन्निर्निमित्तमपराधकमसरिहासय
प्रवृत्तो भयकृद्भीतानां त्राता दुःकृदर्थं प्राणादिहर्ता ॥ अस्मत्तो राद्धो लब्धो वरो येन स स्वयमप्रतिरथः प्रतिपक्षरहितः अन्वेषयन्प्रतिरथं
न गत्यन्कंटक इव लोकान्पटति चरति ॥ २३ ॥ हे देव मायाविनं विचित्रचतुरोगादिवलोत्पादकाश्चर्यशक्तिसंपन्नमत एव दृप्तं गर्वितं नि
रंकुशं निरंकुशगजमिव स्थितं ममसतमं दुरात्मानं नागनं दैत्यप्रत्युत्थितमाशीविषं सर्पं पुच्छाकर्षणादिना वालकवत्माक्रीड ॥ २४ ॥ दारुण

आगस्कृद्भयष्कृदस्मद्राद्धवरोऽसुरः ॥ अन्वेषन्नप्रतिरथो लोकानटति कंटकः ॥ २३ ॥ मैनं मायाविनं दृप्तं निरं
कुशमसत्तमम ॥ आक्रीड बालवद्देव यथाशीविषमुत्थितम् ॥ २४ ॥ नयाद्देवेष वर्द्धेत स्वां वेलां प्राप्य दा
रुणः ॥ स्वां देवमायामास्थाय तावज्जह्यघमुच्यत ॥ २५ ॥ एषा घोरतमा संध्या लोकछंवकरी प्रभो ॥ उप
सर्पति सर्वात्मन्सुराणां जयमावह ॥ २६ ॥ उग्रः एष दैत्यः स्वावत्स्वां स्वबलकरीं वेलां संध्यारूपां प्राप्य न वर्द्धितता
वद्देव स्वात्मामायां बलमायां बलमास्थायाश्रित्य जहि यद्वा स्वां पूर्वोक्तविधां मायामास्थाय स्वां वेलां प्राप्य यावदेष न वर्द्धेत
तावज्जहीत्यन्वयः हे अच्युताश्रितानां च्यवते इत्युच्यत ॥ २५ ॥ कासावायास्यति यां प्राप्य वर्द्धेतेत्यत्राह हे प्रभो लोक
छंवट्करी लोकानां प्रतिकूलकरी ॥ लोकछप्रकरीति पाठे मोहनकरीत्यर्थः घोरतमा भयंकरा एषा संध्या उपसर्पति आयाया
स्यति हे सर्वात्मन्सुराणां जयमावह संपादय ॥ असुराणां जयापहेति पाठे संध्यां विशेषणम् ॥ २६ ॥

तयोर्हर्यसुरयोः स्पर्धोः स्पर्द्धमानयोः लीलाभ्यां गदाभ्यां हतानि ताडितान्यंगानि ययोस्त एव क्षतांगा गदाघातानाश्रयतीत्याश्रवं रुधिरं तस्य घ्राणेन
विवृद्धः मन्युर्ययोस्तयोरत एवेलायां भूम्यां निमित्तभूतायां इलार्थमित्यर्थः जिगीषया परस्परजये इच्छया विचित्रमार्गान् गदायुद्धक्रमा-
नाश्रभेदांश्चरतोर्मृधः संग्रामः शुष्मिणोर्मत्तवृषभयोरिव व्यभाद्बभौ ॥१९॥ दैत्यस्य हिरण्याक्षस्य यज्ञावयवस्य यज्ञमूर्तेर्मायया स्व-
संकल्पेन गृहीता वाराहतनुर्यस्य तस्य महात्मनः दैत्ये स्व अनुग्रहप्रवणाचित्तस्य भगवतश्च हे कौरव्य विदुर मह्यां भूम्यां निमित्तभू-

तयोस्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्वोः ॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शु-
ष्मिणोर्मृधः ॥१९॥ दैत्यस्य यज्ञावयवस्य मायया गृहीतवाराहतनोर्महात्मनः ॥ कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरा-
गादृषिभिर्वृतः स्वराट् ॥२१॥ आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम् ॥ विलक्ष्य दैत्यं भगवान्सहस्र-
णीर्जगाद नारायणमादिसूकरम् ॥२१॥ ब्रह्मोवाच ॥ एष ते देव देवानामंघ्रिमूलमुपेयुषां ॥ विप्राणां सौरभेयीणां भूताना-
मप्यनागसाम् ॥२२॥

तायां द्विषतोर्युध्यमानयोर्विमर्दनं युद्धं दिदृक्षुर्द्रष्टुं ॥ स्वराट् ब्रह्मा ऋषिभिर्मरीच्यादिभिर्वृतः आगतश्च
सहस्रणीः देवसहस्रं नयतीति देवसहस्रनेता भगवान् ब्रह्मा दैत्यमालक्ष्य आदिसूकरं नारायणं जगाद ॥ कथंभूतं दैत्यं आसन्नं प्राप्तं
शौण्डीरमहो येन तं अपेतोऽपगतं याऽसाध्वसं यस्मात्तं कृतः प्रतीकारः प्रतिहरणरूपा प्रतिक्रिया येन तं महार्योऽसह्यः विक्रमो यस्य तं
इति ॥२१॥ उक्तिमेवाह एष इत्यादिना यावदध्यायसमाप्ति ॥ एष दैत्यः हे देव नारायण ते तवांघ्रिमूलं पादमूलं उपेयुषां शरणं गतानां दे-

भगवताऽधिक्षिप्तः तिरस्कृतः उक्तरीत्या सः रुषा भृशं प्रलब्धः प्रहसितश्चासुरः उल्बणं क्रोधमाजहार स्वीकृतवान् स्वक्रोधस्येत्यर्थः॥ यथा क्रीड्यमा
नः अहिराट् सर्पश्रेष्ठः तथेति दृष्टांतः॥१३॥ अमर्षितः क्रुद्धः अत एव श्वासान् सृजन् तत एव मन्युना प्रचलितानीन्द्रियाणि यस्य स दैत्यः आसाद्य
समीपमागत्य तरसा बलेन गदया हरिमभ्यहनत् ताडितवान्॥१४॥ भगवांस्तु रिपुणा सुरेण उरसि निसृष्टं गदया वेगं तिरश्चीनस्तिर्यग्गमनः
सन् अंतकं मृत्युं योगारूढः निष्पन्नयोगी वा वंचयत् परिहृतवानित्यर्थः॥१५॥ पुनस्तामप्राप्तामेव गदां या अभीक्ष्णशः पुनः॥ भ्रामयंतमसुरं स

मैत्रेय उवाच॥ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं॥ आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव॥१३॥
सृजन्नमर्षितः श्वासान्मन्युप्रचलितेन्द्रियः॥ आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिम्॥१४॥ भगवांस्तु गदावेगं
विसृष्टं रिपुणोरसि॥ अवंचयत्तिरश्चीनो योगारूढ इवान्तकम्॥१५॥ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः॥ अभ्यधावद्धरिः क्रुद्धः संरम्भाद्दष्टदच्छदम्॥१६॥ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः॥ आजघ्ने
स तु तां सौम्य गदया कोविदोऽहनत्॥१७॥ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च॥ जिगीषया सुसंरब्धावन्योन्यमभि
जघ्नतुः॥१८॥

निकृष्टोऽहमिति संरम्भात् क्रोधात् दष्टच्छदः दष्टाधरः अभ्यधावत्॥१६॥ ततः अभिधावनानंतरं प्रभुर्भगवान् स्वगदया अरातिं
शत्रुं दक्षिणपार्श्वे आजघ्ने प्रजहार हे सौम्य विदुर स त्वसुरः कोविदः गदायुधे कुशलः एवं तां स्वदक्षिणस्यां भ्रुवि हरिणा युक्ताम् अप्राप्ता
मेव गदया अहनत् आजघ्ने॥१७॥ हर्यक्षो हिरण्याक्षः हरिश्च सुसंरब्धौ जिगीषया अन्योन्यं जेतुमिच्छया गुर्वीभ्यां गदाभ्यामन्योन्यं परस्परमभि

तद्वनमेवाह ॥ मन्य इति ॥ भो अनुस्वयं वनमोचराः मृगा इति यद्युक्तं तत्सत्यमेव किंतु युष्मद्विधान भवाद्दशान्ग्रामसिंहानुपुनः मृगयन्मृगः अन्वेषयन्मृगयितुमहं मृगो जात इत्यर्थः मृगये इति पाठे तु मृगये ऽन्वेषयामीत्यर्थः मृत्योः पाशैः प्रतिमुक्तस्य बद्धस्य तव भद्रमंगलं चिकत्थनस्माघनं धीरान गृह्णंति नाभिनंदंति ॥ मृत्युपाशैः प्रतिमुस्येति हेतुगर्भम् ॥ मृत्युपाशप्रतिबद्धत्वाद्यद्विकत्थनं तत्र गृह्णंतीत्यर्थः ॥ १० ॥ तद्युक्तिविपर्यये पर्यवसायत्राह ॥ रसौकसां रसातलवर्जितां युष्माकं न्यासहराः एते वयं न्यस्तं निक्षिप्तं प्रतिपाद्यावस्मिन्निति न्यासः आधारः भवतामाधारभूतं वयं ॥ अयं काकुः नहीयं भूमिः रसातलवर्त्तिनाम्यामस इत्यर्थः ॥ एते वयं गतलज्जाः ते त्वया कर्त्रीगदया द्राविताः धाविताः अयमपि काकुः अस्मा

श्री ॥ भगवानुवाच ॥ मन्यसे वयं भो वनगोचरमृगान्युष्मद्विधान्मृगये ग्रामसिंहान् ॥ मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णंति न भद्र ॥ १० ॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविता स्ते ॥ तिष्ठामहे ऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरं ॥ ११ ॥ त्वं पद्मयानां किल यूथपाधिपो घटस्व नो ऽस्वस्तय आश्वनूहः ॥ संस्थाप्य चास्मान्प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः ॥ १२ ॥

भिरेव यूयं द्राविता इत्यर्थः ॥ अथापि गदया द्राविता अपि कथंचित्केनापि प्रकारेण आजौ संग्रामे तिष्ठामहे स्थातुमिच्छामहे बलिना त्वया सह वैरं विरोधं उत्पाद्य क्व यामः ॥ क्व गमिष्यामः ॥ अत्रापि भवदपेक्षया विलक्षणेनैव प्रकारेण आजौ तिष्ठामहे बलिभिरस्माभिर्विरोधमुत्पाद्य क्व यास्यसीति विपर्यये पर्यवसानमभिप्रेतम् ॥ ११ ॥ त्वमिति ॥ पद्मयानां पदातीनां ये यूथपास्तेषामधिपस्त्वं न अस्माकमस्वस्तये परिभवाय आशु घटस्व यतस्व ॥ अनूहः ॥ अशंकनीयमस्मात्संस्थाप्य हत्वा नामश्रुप्रमृजः यः पुमान्स्वीयां प्रतिज्ञां नातिपिपर्त्ति न पूरयति प्रतिज्ञातार्थं निर्वर्तनेन समापयति स असभ्यः सभायामनर्हः ॥ अत्रापि त्वं पद्मयानामित्यादिशब्दानां विपर्ययवसायित्वं भगवतोऽभिप्रेतम् ॥ १२ ॥

भ्रमिंनपलस्यतेदंष्ट्रकोटिस्थ्यां महषम्सहमानअंबुमध्यात्ग्राहिणामकरेणहतःसकरेणुःहस्तिनीसहितःइभोगजइवनिरगात्निर्गत॥६॥निःसरंतं
तंसलिलान्निर्गछंतंभगवंतंगजयथाग्राहोमकरस्तथानुद्रुतःअनुधावत्हिरण्यकेशोहिरण्याक्षःकरालाभयंकरादंष्ट्रायस्यसः॥असनि
रिवनिस्वनोयस्यस अब्रवीत् तदेवाहगतन्हियांनिर्लज्जानामसतांकिंतुविगर्हितंखविनिंदाभयाभावात्पलायनंनायुक्तमितिभावः स्तुतिपक्षेतु
गतंन्हियामस्माकंकिंविगर्हितंसलिलोकोपकारार्थंभुवमुद्धरंतंप्रत्यसतामस्माकमनुसवणमुचितमेवेत्यर्थः॥७॥सभगवान्सलिलस्योपरिष्टात्
परिगोचरेव्यवहारगोचरेदर्शेगांभूमिंविन्यस्यनिधायतस्यांगविस्वसत्वंस्वबलरूपामाधारशक्तिमदधात्निहितवान् अरेःशत्रोर्हिरण्याक्षस्य

तंनिःसरंतंसलिलादनुद्रुतोहिरण्यकेशोद्विरदंयथाझषः॥करालदंष्ट्रोऽशनिनिस्वनोऽब्रवीद्गतन्हियांकिंत्वसतां
विगर्हितं॥७॥सगामुदस्तात्सलिलस्यगोचरेविन्यस्यतस्यामदधात्स्वसत्वं॥अभिष्टुतोविश्वसृजाप्रसूनैरा
पूर्यमाणोविबुधैःपश्यतोहरेः॥८॥परानुषक्तंतपनीयोपकल्पंमहागदंकांचनचित्रदंशम् मर्माण्यभीक्ष्णं
प्रतुदंतंदुरुक्तैःप्रचंडमन्युःप्रहसंस्तंबभाषे॥९॥ पश्यतमतःविश्वसृजाब्रह्मणाऽभिष्टुतःत्वयासाधुकृतमित्येवयुक्तः॥विबुधैर्देवैः
कर्तृभिःप्रसूनैःपुष्पैःकरणैरापूर्यमाणःविकीर्यमाणः॥यद्वाभिष्टुतःतंहिरण्याक्षंबभाषेइत्युत्तरेणान्वयः॥९॥परामुषक्तंपराणपृष्ठतोऽनुषक्त
मनुलग्नमनुद्रुतंतपनीयोपकल्पंतपनीयंसुवर्णंतन्मयान्युपकल्पानिभूषणानियस्यतंमहतीगुर्वीगदायस्यतंदुरुक्तैर्दुर्वाक्यैरभीक्ष्णंपुनःपु
नःमर्माणिप्रतुदंतंव्यथंतमसुरंप्रतिप्रचंडउत्कटःमन्युःक्रोधोयस्यसःभगवान्प्रहसन्बभाषेउवाचसोपालंभमितिशेषः॥९॥ ॥

किंच ॥ नविति ॥ सपत्नैः सुरैर्नोऽस्माकमभवाय नाशाय त्वं भृतः पुष्टः किंच पुष्टस्त्वं परोक्षजित्परोक्षं जयतीति परोक्षजिद्यो मायया ऽसुरान् हंसि त्वां
योगमाया आत्मीयमायैव बलं यस्य तं मत्वा अल्पपौरुषं बलं संस्थाप्य हत्वा हे मूढ सुहृदां शुचः अश्रूणि प्रमृजे स्तुतिपक्षे नः सपत्नैरभवाय मो-
क्षाय भृतः किमाश्रितः किं यो भवान्परोक्षेणेंद्रादिद्वारेण जिष्णापयाऽऽत्मीयसंकल्पेनासुरान् हंसि न नु तवास्ति वैषम्यं किंतु लीलयैवेत्यर्थः
योगमायाबलेमात्मायमचिंत्यबलम् ॥ अथवा ऽल्पपौरुषमल्पपौरुषं यस्मात्तं त्वा संस्थाप्य हृदि सम्यक् भक्त्या स्थापयित्वा हृष्टो हसेत्यर्थः
हे मूढ त्वं प्रसह्य हास्यति आप्मापयतीति मूढप्रः तत्त्वं वोधनं प्रसूत्रौ विति धातुः सुहृदां वंधूनां शुचः संसारदुःखानि प्रमृजे नाशयामि यन त्वं स्मर्तुं

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंस्यसुरान्परोक्षजित् ॥ त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृ-
जे सुहृच्छुचः ॥ ४ ॥ त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यं बलिं हरंत्यृषयो ये देवाः स्वयं सर्वे
न भविष्यंत्यमूलाः ॥ ५ ॥ स तुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलभ्य भीताम् ॥ तोदं मृषन्निरगादंबुमध्याद्ग्राहा-
हतः सकरेणुर्यथेभः ॥ ६ ॥ बोधवानपि मोचयसीत्यर्थः ॥ ४ ॥ त्वयीति ॥ अस्मद्भुजच्युतया अस्मद्धस्तविसृष्टया गदया शीर्णं भिन्नं शिरो यस्य त-
स्मिंस्त्वयि संस्थिते हते सति तुभ्यं बलिं पूजां ये च ऋषयो देवाश्च हरंति कुर्वंति ते सर्वे स्वयमेव प्रयत्नमंतरेणामूला अनाश्रयाः संतः न भविष्यंति
न प्रपत्स्यंते इत्यर्थः स्तुतिपक्षे त्वमस्मद्भुजच्युतया गदया शीर्णशीर्षण्यपि संस्थिते सम्यक् स्थिते सति तुभ्यं बलिं हरंति ऋषयो देवाश्चामूला न भविष्यं-
ति किंतु दृढमूला एव भविष्यंतीत्यर्थः ॥ ५ ॥ स भगवानरेरसुरस्य दुरुक्तय एव तोमराः शस्त्रविशेषास्तैस्तुद्यमानः व्यथमानः भीतां दंष्ट्राग्रगतां गां

इतिपदद्वंद्वं तदविगलायित्वांग हे विदुर हरेर्भगवतो गतिं मार्गं नारदाद्धित्वा ज्ञात्वा गान्वितः रसातलं निर्विविशे प्रविष्टवान् ॥१॥ तत्र रसातले ऽभितः सर्वतः जयतीत्यभिजितिन्द्वहरिं कुयं भृतं धराधरं भूधरं पर्वतं इव स्थितमग्रदंष्ट्रया दंष्ट्राग्रेण प्रोन्नीयमानो ध्वंनीयमानावनिर्येन तं महताश्रियाऽक्षणस्वरुचाहिरण्याक्षतेजांसिस्वरुचो हिरण्याक्षतेजांसि हरंत ॥ अरुणाहारुणाश्रियं इति पाठे ऽक्षारुणां वरुहश्रियं मुष्णंतं इत्यर्थः ॥ ददर्शेति दो वनगोचरः वनेषु जलेषु लक्ष्यमाणः मृगो वराहस्तं पश्यन् इति जहासापहसितवांश्च ॥२॥ तत एनं भगवतं ग्राहोवाच च ॥ उक्तिमेवाह एह्यागच्छ त्वं महीं विमुंच रसां पातालवासिनां नोऽस्माकं विश्वसृजा ब्रह्मणा इयं मही मर्पिता ऽस्मया पातालावतरणमस्या न घटत इति भावः ॥ हिरण्याऽ

ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णंतमक्ष्णा स्वरुचोऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥२॥ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते

ऽक्षेणाधिक्षेपार्थे प्रयुक्तापीयं भारती वस्तुतो भगवंतं स्तौति तत्राह वनगोचरः जलाश्रयो नारायणः ऽस एव योगिभिर्मृग्यत इति मृगः दृष्टान्विहं तु मृगयत इति वा ॥ अज्ञ नास्ति ज्ञो यस्मात्सर्वज्ञ इत्यर्थः हे सुराधम ममेक्षतः पश्यतः अनयाऽस्मान्सह त्वं स्वस्ति मंगलं यथा न यास्यसि स्तुतिपक्षे तु सुरा अधमा यस्मात् हे सुरोत्तम ममेक्षमाणस्यापि मत्तः मामनादृत्य त्वमनया सह त्वं मानो अस्मदादीयं समस्तं मंगलं यास्यसि तथाप्यसत्कृपया विमुंचेत्यर्थः ॥ अस्माभिरासादितालीलया स्वीकृता नामकराकृतिर्येन सः तत्संबोधनम् ॥३॥ ०॥ ०॥ ०॥

हेप्रभोसःभगवानपांपतिःवरुणःउद्रिक्तमदेनविद्विषासुरेणैवमुक्तःदृढंयथातथाप्रलब्धविप्रलब्धाः॥समुत्थंरोषंस्वयाधियासमनउवा असुरवयं
युयुत्सायामुपरमंगताःप्राप्ताः॥२९॥किंचसनातनात्पुरुषात्परमपुरुषान्हेसुरर्षभयुद्धमार्गेषुकोविदंनिपुणंत्वांयःसंयुगे आराधयिष्यति
सन्यंनपश्यामः अतस्तंपरमपुरुषंगत्वाहिगच्छकीदृशोसौपुरुषःयमिहित्स्तुच्यतइत्यत्राह॥भवादृशामनस्विनःस्वैराःयंपुरुषंगृणतेस्तुवंति
३०॥वीरंतंपरमपुरुषमारात्समीपेऽभिपद्यविस्मयोविगतगर्वःवीरशयेरणप्रदेशेश्वभिर्वृतः॥परिवेष्टितःशयिष्यते॥भवानिवसोपिनयुयु

सएवमुद्रिक्तमदेनविद्विषादृढंप्रलब्धोभगवानपांपतिः॥रोषंसमुत्थंशमयंस्वयाधियाव्यवोचदंगोपशमंगता
वयम॥२९॥पश्यामिनान्यंपुरुषात्पुरातनाद्यःसंयुगेत्वांरणमार्गकोविदम॥आराधयिष्यत्यसुरर्षभेहि
तंमनस्विनोयंगृणतेभवादृशाः॥३०॥तंवीरमारादभिपद्यविस्मयःशयिष्यसेवीरशयेश्वभिर्वृतः॥यः
स्त्वद्विधानामसतांप्रशांतयेरूपाणिधत्तेसदनुग्रहेछया॥३१॥इतिश्रीभागवतेमहापुराणेतृतीयसप्तदशोऽ
ध्यायः॥१७॥मैत्रेयउवाच॥तदेवमाकर्ण्यजलेशभाषितंमहामनास्तद्विगणय्यदुर्मदः॥हरेर्विदित्वागतिमंग
नारदाद्रसातलंनिर्विविशेत्वरान्वितः॥१॥त्सतिचेत्किंविधेयंइत्यत्राह योभगवांस्त्वद्विधानामसतांप्रशांतये॥विनाशायसतामनुग्र
हेछयाचरूपाणिवराहाद्यवतारान्धत्तेबिभर्ति॥३१॥इतिश्रीभागवतेतृतीयेशप्तदश॥१७॥एवंवरुणेनाभाषितोऽसुरस्तंभगवंतमन्वेषयन्गतइ
त्याहमुनिःततएवंउक्तप्रकारेणजलेशभाषितंवरुणभाषितंमाकर्ण्यनिशम्यमहामनाःप्रतियोद्धारंश्रुत्वाहृष्टचित्तःदुर्मदः अतएवशयिष्यस

भा.तृ.
॥ ११८ ॥

तस्मिन् हिरण्याक्षे प्रविष्टे सति वरुणस्य सैनिकाः यादोगणाः ससाध्वसाः भययुक्ताः अतएव सन्नधियः ॥ विशीर्णबुद्धयः यद्वा ऽवसन्नबुद्धयः दुःखि
तचित्ता इति यावत् ॥ अहन्यमाना अपि तस्यासुरस्य वर्चसा तेजसा प्रधर्षिताः अभिभूताः संतो दूरतरं प्रदुद्रुवुः पलायितवंतः ॥ २५ ॥ वर्षपूगा
न् बहून् संवत्सरान् उदधौ समुद्रे चलन् चरन् श्वसनेन पवनेन ईरितान् उत्थितान् महोर्मीन् उच्चैस्तरंगान् मुहुर्मौर्व्या ऽयोमय्या गदया ऽभिजघ्ने प्रजहार तत्र
विभावरीं प्रचेतसः वरुणस्य पुरीं मासेदिवान् प्राप्तः ॥ २६ ॥ तत्र विभावर्यामसुराणां यो लोकः पातालं तस्य पालकं यादोगणानामृषभमधि

तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः ॥ अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दू
रतरं प्रदुद्रुवुः ॥ २५ ॥ स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीञ्छ्वसनेरितान्मुहुः ॥ मौर्व्याभिजघ्ने गदया वि
भावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥ २६ ॥ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं
स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् ॥ २७ ॥ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वी
र्यापहो दुर्मदवीरमानिनां ॥ विजित्य लोकेऽखिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो ॥ २८ ॥ ॥

पतिं प्रचेतसं वरुणं उपलभ्य समीपे प्राप्य स्मयन् ईषद्धसन् प्रलब्धुं नीचवत्प्रणिपत्य प्रणम्य हे ॥ अधिराज वरुण मे मह्यं संयुगं देहि इति जगा
द मया सह युद्धं स्वीकुरु उक्तवान् ॥ २७ ॥ तस्य पुनः सामुत्सिपादयिषया आह त्वं लोकपालानामधिपतिर्बृहच्छ्रवा महायशाः ॥ दुर्मदाये वीरमा
निनं मन्यंते तेषां वीर्यापहर्ता कथमहमेवंविधस्त्वयापि निग्रहीतव्य इत्यत्राह ॥ यद्यस्मात्पुराऽखिलान् दैत्यान् दानवांश्च विजित्य राजसूयेना

॥ १८ ॥

॥ ११८ ॥

तस्य हिरण्यकशिपोरनुजः पितृक्रमादनुजः हिरण्याक्षः प्रियप्रीतिविषयः अन्वहं स्वयमेव प्रीतिकृत् गदा पाणौ यस्य स युयुत्सुर्योद्धुमिच्छन् रणं मृगयन् दिवं यातः गतः ॥२०॥ तं हिरण्याक्षं दुःसहजवं दुःसहं बलं रणत् क्वणती कांचनमये नूपुरे यस्य तं ॥ वैजयंत्या स्रजा पुष्पपत्रादिनिर्मितस्रग्विशेषो वैजयंती तया स्रजा जुष्टमलंकृतमंसे स्कंधे न्यस्ता निहिता महती गुर्वी गदा येन तम् ॥२१॥ मनसा बलेन वरेणोद्रिक्तं गर्वितमसृण्यमवनिरंकुशमकुतोभयं कुतश्चिद्भीतिमकुर्वाणं वीक्ष्य भीताः संतो निलिल्यिरे तर्हिताः तत्र दृष्टां

हिरण्याक्षोनुजस्तस्य प्रियः प्रीतिकृदन्वहं ॥ गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणं ॥२०॥ तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरम् ॥ वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदम् ॥२१॥ मनोवीर्यवरोद्रिक्तमसृण्यमकुतोभयं ॥ भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥२२॥ स वै तिरोहितान्दृष्ट्वा महसा स्वेन दैत्यराट् ॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशम् ॥२३॥ ततो निवृत्तः क्रीडिष्यन्गंभीरं भीमनिस्वनं ॥ विजगाहे महासत्वो वार्धिं मत्त इव द्विपः

तः तार्क्ष्याद्गरुत्मतः त्रस्ता अहयः सर्पा इवेति ॥२२॥ स दैत्यराट् हिरण्याक्षः स्वेन महसा तेजसा तिरोहितानिंद्रसहि॥ तान्देवसमहान्ज्ञात्वा क्षीबो मत्तः अपश्यन् ॥ क्षीवानपश्यदिति पाठे पौरुषहीनानपश्यञ्ज्ञातवानत एव भृशं व्यनदत् ध्वनत् ॥२३॥ ततो दिवः निवृत्तः प्रत्यागतः क्रीडिष्यन्विहरिष्यन् गंभीरमगाधं भीमः निस्वनः तरंगजन्मो ध्वनिर्यस्मिंस्तं वार्धिं समुद्रं महासत्वो महाबलः हिरण्याक्षः द्विपो गज इव विजगाहे विलोडितवान् ॥२४॥

पुनस्तावेव विशिनष्टि ॥ दिवीति ॥ हेमकिरीटकोटिभिः स्वर्णमयमुकुटाग्रैर्दिविस्पृशौ दिवं स्पृशंतौ निरुद्धाः काष्ठा दिशो याभ्यां तौ ॥ निरुद्धकोष्ठावि
ति पाठे भ्रमणमहद्धकोष्ठौ इमर्थः स्फुरंत्यंगदानि येषु ते भुजा ययोस्तौ ॥ अंगदे स्याद्वेंततमार्थ चरणैः पादैः पदे पदे प्रतिपदं विन्यासं गां भूमिं कंप
यंतौ चालयंतौ सुशोभना कांची मेखला यस्मात् तया कथ्यार्कं स्यंमतीत्यातिक्रम्य तस्थतुः स्थितवंतौ ॥१७॥ तयोर्यमयोर्मध्ये यः स्वदेहा
त्ययममजायत तं हिरण्यकशिपुं यथा विदुः प्रादितिर्यं प्रथमप्रसूतं तं हिरण्याक्षं यथाविदुः तथा नामधेयं प्रजापतिः कश्यपः

दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ ॥ गां कंपयंतौ चरणैः पदे पदे कट्या सुका
च्यार्कमतीत्य तस्थतुः ॥१७॥ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत ॥ तं वै
हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः ॥१८॥ चक्रे हिरण्यकशिपुर्दोर्भ्यां
ब्रह्मवरेण च ॥ वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः ॥१९॥ अकार्षीत्कृतवान् ॥ अयंभावः

यद्याहि गर्भाधानसमये योनिपुष्पं शिवं द्वौ वीर्यं द्विधा विभक्तमादितः प्राक् पश्चाद्भावेन प्रविशति तदाय मो भवतः स्वपितृतः प्रवे
शक्रमविपर्ययेण मातृतः प्रसूतिर्यदा विसदृशविधा स्यात् तं वीर्यं पुष्पं परिक्षरम् ॥ तौ तदा भवतो गर्भौ सूतिर्वैशविपर्ययादिति
पिंडसिद्धिस्मरणात् ॥ अतः स्वदेहात्सर्वं यो जातस्तस्य हिरण्यकशिपुरिति दितेः प्रथमप्रसूतस्य हिरण्याक्ष इति नाम कृतवानित्यर्थः
र्थः ॥१८॥ हिरण्यकशिपुः स्वदोर्भ्यां भुजाभ्यामुद्धतः ब्रह्मणश्चतुर्मुखस्य वरेणाकुतोमृत्युः कुतश्चिदपि मृत्युरहितः पालसहितान् लो

गावोऽसृग्दोहाः रक्तं दुहंत्यः अत्रसन्नुद्वेजितवत्सः तोयदा मेघाः पूयवर्षिणः ॥ कश्मलवर्षिणोऽभवन् देवताप्रतिमाः व्यरुदन्नश्रूणि मुंचन्न
निलं वायुं विनाऽन्तरेणापि द्रुमाः पेतुः ॥१३॥ पुण्यतमानश्शुभकराननुगुरुबुधादीन् भगणान् बहूनि नक्षत्राणि चान्ये क्रूरग्रहा अंगारका
द्योऽतिपीडिताः यद्वा कर्त्तरि क्तः आर्षत्वात्पीडाकाराः अतिचेरुः अतिक्रम्य जग्मुः वक्रगत्या प्रत्यावृत्य परस्परं युयुधुश्च ॥१४॥ अ
न्यांश्चाकारश्न्यांश्च महोत्पातान् दृष्ट्वाऽतत्त्वविदस्तदुत्पातफलमजानंत्यः ब्रह्मपुत्रान्मरीच्यादीनृते ऽन्तरेण सर्वाः प्र

गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः ॥ व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलं ॥१३॥
ग्रहान्पुण्यतमानन्ये भगणांश्चातिपीडिताः ॥ अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम् ॥१४॥
दृष्ट्वान्यांश्च महोत्पातानतत्त्वविदः प्रजाः ॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवं ॥१५॥
तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥१६॥

त्यः भीताः विश्वसंप्लवं जगत्संहारं मेनिरे ऽमन्यंत ॥ ब्रह्मपुत्रास्तु त्रैकाल्यावस्तविषयज्ञानसंपन्ना न भीता इत्यर्थः ॥१५॥ तौ जाता
वादिदैत्यौ सहसा आशु व्यज्यमानमात्मपौरुषं पूर्वसिद्धं स्वपौरुषं ययोस्तौ वश्मसारेणायस्तुल्येन कायेनाद्रिपती इव पर्व
तश्रेष्ठौ इव ववृधाते ॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वार्द्धिः समुद्रः विमनाः दुःखितः चित्तइव उद्गूर्मिभिः ऊर्मिभिः तं उदरं उदरस्थाम करादयो यस्य सचुक्रोश समुष्कानि पंकजानि यासुताः उदपानाः उदका
नि पिबंत्यस्मिन्निति वापीकूपतडागादयः तैः सहितानद्यश्चचुक्षुभुः ॥७॥ सराह्वोराहुग्रस्तयोः शशिसूर्ययोः मुहुः पुनः पुनः परिधयः परिवे
षाः अभूवन निर्घाताविरभ्रगर्जितानिरथनिर्ह्रादारथध्वनितुल्यध्वनयः विवरेभ्यः गिरिगह्वरेभ्यः प्रजज्ञिरे जाताः ॥८॥ अंतर्ग्रामेषु ग्राममध्येषु
मुखतो मुखेः उल्बणं वह्निं वमंत्यः उद्गिरंत्यः शिवाः गोमायवः शृगालानां उलूकानां च टंकारैर्ध्वनिभिः सहाशिवं यथा तथाः प्रणेदुः ध्वनितवत्यः

चुक्रोश विमना वार्द्धिरुदूर्मिः क्षुभितोदरः । सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः ॥७॥ मुहुः परिधयोभूवन्स
राह्वोः शशिसूर्ययोः । निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ॥८॥ अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्बण
ं शृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः ॥९॥ संगीतवद्रोदनवदुन्नमय्य शिरोधराम् । व्यमुंचन्विवि
धा वाचो ग्रामसिंहास्ततस्ततः ॥१०॥ खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं । खार्कारिरभसा मत्ताः प
र्यधावन्वरूथशः ॥११॥ रुदंतो रासभत्रस्ता नीडादुदपतन्खगाः । घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्व
न ॥१२॥

शिवाः शृगालजात्यवांतरजातीयाः ग्रामेषु यासां ध्वनिमत्यंतारिष्टसूचकं लोका वदंति ॥९॥ ग्रामसिंहाः श्वानः शिरोधरां कंधरां उन्नमय्योद्धृत्य सं
गीतवद्रोदनवच्च विविधा वाचो भाषणानि ततस्ततः तत्र तत्र व्यमुंचन् कृतवन्त इत्यर्थः ॥१०॥ खरा गर्दभाः कर्कशैः कठिनैः खुरैर्धरातलं घ्नंतः ताडयंतः खा
र्कारोगर्दभजातिशब्दः तस्मिन्रभसः संभ्रमस्तेनामत्ताः रभसः संभ्रमोयेषामिति वा वरूथशः संघशः पर्यधावत ॥११॥ रासभत्रस्ताः रासभध्वनिभीताः

रितिस्तु भर्त्तुः कश्यपश्यपादेशात्लोकान्सपालांस्त्रीन् चंडिमुक्तराक्रंदयिष्यतः इतिवाक्यात्त्वापत्याभ्यांदेवोपद्रवमाशंकमानासती वर्षशतेपूर्णेस
तियमौद्वौ पुत्रौप्रसुषुवेप्रसूतवती युगपज्जातौयमावितिसुच्यते ॥२॥ तत्रतज्जन्मदेशेतयोर्जायमानयोः सतोर्दिविभुविचांतरिक्षे बहवः विचि
त्राः लोकस्यातन्मशंभयावहाः ॥ भयंकराः उत्पाताः निपेतुः पतिताउद्भवभूवुरित्यर्थः ॥३॥ तानेवप्रपंचयति ॥ सहेत्यादिभिरेकादशभिः सहाच
लाः सपर्वताः ॥ भुवः भूभागाः चेलुश्चलितवन्तः सर्वादिशाः प्रजज्वलुः वह्निज्वालायुक्ताबभूवुः सोल्काः सांगाराः अशनयश्चपेतुः प

रितिस्तुभर्त्तुरादेशात्पत्यपरिशंकिनी ॥ पूर्णेवर्षशतेसाध्वीपुत्रौप्रसुषुवेयमौ ॥२॥ उत्पाताबहवस्तत्रनिपेतुर्जा
यमानयो ॥ दिविभुव्यंतरिक्षेचलोकस्यातिभयावहाः ॥३॥ सहाचलाभुवश्चेलुर्दिशःसर्वाःप्रजज्वलुः ॥ सोल्का
श्चाशनयःपेतुःकेतवश्चार्त्तिहेतवः ॥४॥ ववौवायुःसुदुःस्पर्शःफूत्कारानीरयन्मुहुः ॥ उन्मूलयन्नगपती
न्वात्यानीकोरजोध्वजः ॥५॥ उद्धसत्तडिदंभोदघटयानष्टभागणे ॥ व्योम्निप्रविष्टतमसानस्मव्यादृश्यतेपदं ॥६॥

तिनः आर्त्तिहेतवः लोकपीडासूचकाः केतवः धूमकेत्वादयः उद्बभूवुरितिशेषः ॥४॥ सुदुःस्पर्शः कठिनस्पर्शः फूत्कारानितिवायुशब्दा
नुकरणं तान्मुहुरीरयन् ध्वनयन्नगपतीन् वृक्षश्रेष्ठानुन्मूलयन् वात्याश्चक्रवायवः तेषामनीकः समूहोयस्यरजएवध्वजोयस्य वात्यानी
तिपाठे वात्याभिरानीतं उद्धूतं रजएवध्वजायस्येत्यर्थः ॥ एवंविधोवायुर्ववौप्रासरत् ॥५॥ उद्धेहर्षसंत्यस्य वतडितोयेषु तेषामंभोदानांमेघा
नांघटयासमूहेनन्नष्टोभागणः सर्वादिप्रभासमूहोयस्मिंस्तस्मिन्व्योम्निप्रविष्टेनतमसा विष्टपगाढांधकारेणपदंस्थानंनव्यादृ

भगवान्कदाविधास्यतीति विधातुं न प्रभवेत्त्वेवेति शंकाद्वयं परिहरन्नितिहासं निगमयति ॥ विश्वस्य जगतः स्थितिलयोत्पत्ति हेतुरत एवाद्य ॥
स्पृष्टेः ॥ प्रागपि निर्विकारत्वेन स्थितः कथं निर्विकारस्य सृष्ट्यादि हेतुत्वमिति योगपरिशु द्धमानसैरपि दुरत्यया दुर्विवेचनीया आत्मीयाविचित्रसर्गकारिणी शक्तिर्यस्या नेन सद्द्वारकं सृष्ट्यादिहेतुमिति फलितम् ॥ एवंभूतस्त्र्यधीशः त्रिलोकाधिपतिः यो भगवान्स एव नोऽस्माकं क्षेमं विधास्यति सत्वगुणोत्कर्षकाले करिष्यति तत्रेह न याभ्यते एतस्मिन्न भगवत्यस्मदीयस्यास्मदिष्टस्य विमर्शेन किया नर्थः ॥ किं यत्प्रयोजनम् ॥ हरत्वा विश्वस्य स्थितिलयोद्भवलीलस्याचिंत्यविविधविचित्ररचनासमर्थमायाधीशस्य षाड्गुण्यपूर्णस्य त्रिलोकाधिपतेः स्वा

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः ॥३७॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे जलविंबयोकुंसनं मपइविंध्यापः ॥१६॥ मैत्रेय उवाच ॥ निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः ॥ अतः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः ॥१॥

श्रितास्मदीयविमर्शनमत्यल्पप्रयोजनमित्यर्थः ॥३७॥ इति तृतीये षड्विंशः ॥१६॥ एवमथात्रापीतिहासोऽयं श्रुतो मेव र्णितः पुरा ब्रह्मणा देवानामनुएकृतामिसुपक्रांतं देवब्रह्मसंवादरूपं इतिहासं प्रस्तुतमेव निगमयन्प्रसंगप्राप्तं हिरण्याक्षवधं प्रनुष्टुपुब्रह्मनारदसंवादोपाख्यातमितिहासांतरं परमप्रकृते नसंगमयन् हिरण्याक्षजन्मप्रभृतिवृत्तांतमाह मैत्रेयः ॥
निशम्येति ॥ आत्मभुवा ब्रह्मणा गीतं कारणं स्वव्यसनकारणं निशम्य शंकयोज्झिताः क्षेमं विधास्यतीति वचनात् शंकया मुक्ताः सर्वे त्रिदिवौक

सः देवास्ततः ब्रह्मलोकात् त्रिदिवाय त्रिदिवं स्वर्गं प्रतिजग्मुः ॥१॥

अथ तौ किमभूतां किमकुर्वतां चेत्यत्राह ॥ तावितिगीर्वाणऋषभौ पार्षदप्रवरौ तौ दास्योदुस्तरा ब्रह्मशापाद्धेतोर्हरिलोकत एव हतश्रि
यौ भ्रष्टतेजसौ अत एव विगतस्मयौ विनष्टगर्वौ च भूतां ॥ ३३ ॥ तदा विकुंठस्यानात्तयोर्निपतमानयोः सतोः हे पुत्रका देवाः विमा
नाग्रेषु वसतां महानुच्चैर्हाहाकार आसीत् ॥ ३४ ॥ तावेव हरेः पार्षदश्रेष्ठौ दितेर्जठरे कुक्षौ निविष्टं काश्यपसंवेधि उल्वणं उग्रं ते

तौतु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः ॥ हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥ ३३ ॥ त
दा विकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥ ३४ ॥
तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं काश्यपं तेज उल्वणम् ॥ ३५ ॥ तयो
रसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥ ३६ ॥

जः वीर्यं प्रत्यधुना आशु प्राप्तौ भवतः ॥ ३५ ॥ तयोरसुरयोरसुरजन्मनोर्यमयोः सहैव गर्भं प्रविश्य उत्पत्स्यमानयोस्तेजसा अद्य
वः युष्माकं तेजः आक्षिप्तमभिभूतमेतर्हि इदानीं भगवान् तद्भवतो तेजः विधास्यति तौ निहत्य भवत्तेजः यथावस्थितं करि
ष्यतीत्यर्थः ॥ ३६ ॥

भगवंतं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्यानुमान्यानुज्ञाप्य वैष्णवीं भागवतीं श्रियं संपदं शंसंतः प्रशंसंतः मुदिताः प्रतिजग्मुः ॥२८॥ मुनिनिर्गमनानंतरं द्वास्थौ सांत्वयन्भगवानुवाचेत्याह त्रिभिः भगवाननुगौ भृत्यौ प्रत्याह उवाच ॥ उक्तिमेवाह यातं गच्छतं मा भैष्टं भयं मा कुरुतं शं सुखं एव गच्छतोरपि युवयोरस्तु ॥ ययावयोरनुग्रह एव भवता क्रियते तर्हि ब्रह्मदंड एव किं न निरस्यते इत्यत्राह ॥ ब्रह्मतेजः ब्रह्मदंडं तेजः कार्यं वा दंडस्यापि तेजः शब्देन निर्देशः हंतुं निरसितुं समर्थोपि नेच्छे कुतः हि यस्मान्मम मम मतं संमतम् ॥२९॥ न केवलं ममैवेदं ब्रह्मतेजो मतं

भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च ॥ प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियम् ॥२८॥ भगवाननुगावाह यातं मा भैष्टमस्तु शम् ॥ ब्रह्मतेजः समर्थोपि हंतुं नेच्छे मतं तु मे ॥२९॥ एतत्पुरैव निर्दिष्टं रमया क्रुद्धयाऽनया ॥ उपारते मयि द्वारि युवाभ्यां यन्निवारिता ॥३०॥ मयि संरंभयोगेन निस्तीर्य ब्रह्महेलनं ॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥३१॥ द्वास्थावादिश्य भगवान्विमानश्रेणिभूषणं ॥ सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ॥३२॥

किं तु लक्ष्म्या अपीत्याह ॥ एतदिति ॥ एतद्युवयोरितो निर्गमं पुरा पूर्वकाले क्रुद्धया रमया लक्ष्म्यैव निर्दिष्टम् ॥३०॥ पुराकृते तत्राह ॥ मयि उपारते प्रणयकलहवशान्नू लीलया नेसति मच्चिलयाद्बहिर्निर्गत्य पुनरंतः प्रविशंती द्वारि युवाभ्यां यद्यदा निवारिता तदेत्य र्थः ॥३०॥ अंते मयि संरंभः क्रोधस्तस्य योगोऽनवरतसंबंधस्तेन ब्रह्मविदपराधजन्यं फलं निस्तीर्य निरवशेषं भुक्त्वा ह्यल्पीयसैव कालेन पुनर्मे निकाशं समीपं प्रत्येष्यतं प्रत्यागच्छतं ॥३१॥ एवं द्वास्थावादिश्य भगवान्स्वस्थानमाविवेशेत्याह ॥ भगवान्द्वास्थावादिश्याज्ञाप्य विमानश्रे

एवं यथामति भगवदुक्तौ नीतायामर्थे परिष्कृत्य तत्र चिकीर्षितमजानंतः स्वापराधानुगुणं दंडधारणं च निवेदयंत आहुरेकेन ॥ यमिति ॥ हे अधीश
भवाननयोः भृत्ययोर्वा यो दंडो मम अस्माभिर्विहित ममं वा दंडं वृत्तिं वा यथापूर्वमत्र लोके वर्त्तनं विधत्ते तन्निर्व्यलीकं सत्यं यथा तथाऽनुमन्म
हे अनुमन्यामहे अस्मासु चोचितः स्वापराधानुरूपः यो दंडः सक्रियतां विधीयताम् ॥ भवद्भिः किमपराद्धमिति चेत् ये वयमनागसौ निरपराधि
नौ किल्बिषेण शापेनायुंक्ष्महि योजितवंतः द्वास्थयोरपूर्वजनंनिवारणं स्वाभाविकमित्यभिप्रायेणानागसाविति उक्तं ॥ २५ ॥ एवं मुनिभि

यं वाऽनयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम् ॥ अस्मासु वा य उचितो ध्रियतां स दं
डो येनागसौ वयमयुंक्ष्महि किल्बिषेण ॥ २५ ॥ श्रीभगवानुवाच ॥ एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभ
संभृतसमाध्यनुवद्धयोगौ ः भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव विहितस्तदवैत वि
प्राः ॥ २६ ॥ ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं ॥ वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभुं

रावेश्वितहार्दी मुनीनां भृत्ययोश्चानुग्रहमानो भगवान्मुनीनस्याहेकेन ॥ एतौ पार्षदौ सुरेतरगतिमासुरं जन्म प्रतिपद्य स ॥ २७ ॥
द्यः जन्मप्रभृतिमपि यः संरंभः क्रोधः तेन संभृतः संजातः समाधिरनवरतभावना तेनानुवद्धोऽनुवृत्तः योगः मत्संवंधो ययोस्तावमत
एवाशु पुनः सकाशं मत्समीपं उपयास्यतः हे विप्राः वः युष्माकं यः शापः स मयैव त्वन्मुखेन विहित इत्यवैत अवगच्छत जानीतेति यावत् ॥ २६ ॥
एवं भगवतोक्ता मुनयो यदूचुरित्याह द्वाभ्याम् ॥ अथानंतरं नयनयोर्य आनंदस्तस्य भाजनं विषयं वैकुंठं तस्याधिष्ठानं स्थानं स्वप्रकाशं वि

त्वा प्राकृतदिव्यमंगलं शुद्धसत्वमयम् सो द्विजदेवतार्थं धर्मविरोधिनो रजस्तमः प्रचुरान्निरस्य कृत्स्नं जगत्तपोदानमयार्थैः धर्मपदैः पोषय
सीत्यर्थः ॥ २२ ॥ नन्वमिति ॥ आत्मना भवता गोपं गोपनीयं रक्षणीयं द्विजोत्तमानां कुलमर्हणेन समर्हणेन सूनृतेन प्रियवाक्येन च यद्धि श्रेष्ठ
स्त्वं गोप्तारहिता न चेत्त्वयं धर्माननुतिष्ठन् लोकांस्तेषु प्रवर्त्तयसे न चेदित्यर्थः तर्ह्येवं तदैव शिवः श्रेयः संपादकः नवतत्संबंधी वेदपंथा
वेदमार्गः कर्मोपासनात्मकः नंक्ष्यति नाशं यास्यति ॥ हि यस्मादृषभस्य श्रेष्ठस्य यथाचरितं तं देवलोकः प्रमाणं प्रमाणत्वेनाग्रहीष्यन् तं दे
वगीत ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तत इति ॥ २३ ॥ न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंच

चेत्वं द्विजोत्तमकुलं यदि हात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन ॥ तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोग्रहीष्यदृषभस्य हि तत्प्रमाणम् ॥ २३ ॥ तत्तेऽनभीष्टमिव सत्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः नैतावता त्र्यधिपतेर्वत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः ॥ २४ ॥

न नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि
यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥ संकरस्य च कर्त्ता स्यामु
पहन्यामिमाः प्रजाः इति त्वयैव गीतत्वाद्वेदमार्गनाशनं न तवानुचितमेवेत्याहुः ॥ तदिति ॥ सत्वनिधेः शुद्धसत्व श्रयस्मात्तएव जनाय क्षेमं वि
धातुं कर्तुमिच्छोः निजशक्तिभिः निजावतारैरुद्धृताः निर्मूलिताः अरयो धर्मविरोधिनो यस्मात्तेन तव तद्वेदमार्गनाशनमभीष्टमिवानभीष्टमेवेत्य
र्थः हे त्र्यधिपते त्रिलोकाधिपते विश्वस्य भर्त्तुर्धारकस्य पोषकस्य वा अवनतस्य ब्राह्मणान्प्रणतस्य ॥ अत्र प्रणतस्येति रजोधारणस्याप्युपल

यदुक्तंयत्सेवयाचरणपद्मपवित्ररेणुमितितदपियाविद्यमिछन्द्रिर्श्रीसगणःसेवितव्याइत्येनतात्पर्यकमित्यभिप्रेत्याथयेषाममलांघ्रिर॰
जोविमर्शीत्यस्यातात्पर्यंपरिष्कुर्वंतः आहुरर्द्धेनतंइति ॥ तंधर्ममर्यादाप्रतिष्ठातारंश्रियोपिसमाश्रयणीयंलावण्यनिधिंत्वांद्विजानामनु
पथंपथिपथिलग्नंयत्पुण्यरजः तथाश्रीवत्सलक्ष्मचश्रीवत्सचिह्नंचकिंपुनीतःपवित्रीकुरुतः ॥ किंकिमर्थंतेउभेभगभाजनः
निरतिशयसौंदर्याश्रयः त्वमगाःप्राप्नवानसिभूषणत्वेनस्वीकृतवानसि ॥ पुनीतइतिपाठांतरंद्विजानुपथपुण्यरजःपुनीतेकिंपुनी
तइत्यर्थः तर्हिकथंरजोविमर्शीतिश्रीवत्सलक्ष्मकिंकिमर्थमगाभूषणत्वेनेतिचेद्रजोपितथैवविमर्षीतिशंकोत्तरत्वेनव्याख्ये

तंत्वांद्विजानुपथपुण्यरजःपुनीतःश्रीवत्सलक्ष्मकिमगाभगभाजनस्त्वम् ॥२१॥ धर्मस्यतेभगवतस्त्रियुगत्रि॰
भिःपद्भिश्चराचरमिदंद्विजदेवतार्थं नूनंभृतंतदभिघातिरजस्तमश्चसत्वेननोवरदयातनुवानिरस्य ॥२२

यं ॥२१॥ एवमलंकारायैवरजोविमर्षीत्यभिधायाथलोकमर्यादापालकेनभवतावश्यंतत्कर्त्तव्यमेवेतिप्रतिपादयिषवोवश्यंलोकम॰
र्यादाभवतापाल्याऽन्यथोत्सीदेयुरिमेलोकाइत्यमुमर्थमन्वयव्यतिरेकाभ्यामुपपादयंतआहुस्त्रिभिः हेत्रियुगत्रीणियुगानियुग्मानि
ज्ञानशक्त्यादिगुणानांयस्येतित्रियुगस्तस्यसंबोधनं धर्मरूपस्यनेनव त्रिभिःस्वैरसाधारणैःपद्भिस्तपोदानदयात्मकैर्द्विजदेवतार्थेद्वि
जदेवतासंरक्षणार्थं ॥ निजदेवतार्थमितिपाठेतुस्वकीयदेवतासंरक्षणार्थं ॥ तदभिघातितेषांधर्मपदानामभिघातुकंयद्रजस्त
मश्चरजस्तमः ॥ प्रचुरंतात्सत्वेनशुद्धसत्वमयेनतन्वामत्स्याऽवतारैरित्यर्थः निरस्यचराचरात्मकमिदंजगद्भृतंनूनंस्वेछोपा॰

यद्युक्तं न श्रीर्विरक्तमपि मां विजहातीति तत्र प्रियया प्युक्ताभिप्रायकत्वेन तं तानुपपन्नमिति मत्वा तत्तात्पर्यं परिष्कुर्वन्त आहुः सार्द्धेन ॥ यमिति
यं त्वां विभूतिर्लक्ष्मीः कायं भजता अर्थार्थिभिश्चतुर्विधपुरुषार्थिभिः स्वशिरसा धृतः पादरेणुर्यस्याः सा ॥ तया चोक्तं ॥ अकिंचनेकशर॰
णाः के चिदन्यपाधिकाः पुनः तस्याद्गोमोलह वदं प्रपद्य प्रीतमानसाः लक्ष्मीपुरुषकारेण हृतवन्तो वरानने इत्येवं भूता लक्ष्मीः ॥ धन्या॰
र्चितांघ्रितुलसीनवदामधाम्नः धन्यैर्भागवतैरर्चितं नूतनतुलसीमालायाः स्थानं यस्य तस्य मधुव्रतपतेर्भृंगराजस्य लोकं स्थानं श्रीपा
दपं प्रकामयमानेव पं त्वामनुवेलं तत्तद्रुचितावसरेषु उपयाति सेवते तां लक्ष्मीं विविक्तैः परिशुद्धैः चरितैः समर्हणैरनुवर्त्तमानां

यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदामधाम्नो
लोकं मधुव्रतपतेरिव कामयाना ॥ यस्तां विविक्तचरितैरनुवर्त्तमानां नात्याद्रियत्परमभागवतप्रसंगः
॥२०॥

सेवमानां यो भवान्नात्याद्रियन्नाप्यादृतवान् ॥ कुतः यतस्त्वं परमभागवतेषु एव प्रकृष्टसंगवान् ॥ अयं भावः एवं हि सा लक्ष्मीर्मेने अ
यं हि सारग्राही मधुव्रतो धन्यैश्चलभ्यार्चितांघ्रिगतायां तुलस्यामपरिहारेण निश्चलः सन् रमते तेनांघ्रिलावण्यमधिकं स्यात्ततोहं वक्ष
स्थितापि योगिजनादिवद्दृढसेवकसमर्हणं मंगीकृत्यापि तुलस्या सह सापत्न्येनापि चरणे सेविष्यामीति एवमौत्सुक्येनानुवर्त्तमा॰
नामपि तां त्वं परमभागवतप्रसंगेनावसरमलभमानो नातीवादृतवानिति ॥२०॥ ॥ ॥ ॥ ॥

ब्राह्मणात्वमेव प्रपंचयंति । नन्विति । धर्मश्चातुर्वर्ण्यं चातुराश्रमव्यवस्थया व्यवस्थितः सनातनो धर्मः त्वत एव वृत्तः तव तनुभिरवतारै रक्ष्य
तेचेद्दृशस्यधर्मस्य परमः नित्योनिरतिशयगुह्यः फलं निर्विकारोभवानेव मतः ज्ञातः श्रुतिभिरितिशेषः तथाच श्रूयते इष्टापूर्तं बहुधा
जातं जायमानं विश्वं बिभर्ति भुवनस्यनाभिः एषमृतपालएषसेतुर्विधारणः ॥ अविद्ययामृत्युंतीर्त्वा विद्ययामृतमश्नुत इत्यादि निर्विका
रत्वेनेनकर्मसुरुचिमात्रजनकानामवांतरफलानां हेयत्वं सातिशयत्वं भगवतस्त्वनंतस्थिरफलत्वंसूचितम् ॥ १८ ॥ अतो धर्म

त्वं नः सनातनो धर्मो रक्ष्यते तनुभिस्तव । धर्मस्य परमो गुह्यो
निर्विकारो भवान्मतः ॥ १८ ॥ तरंति ह्यंजसा मृत्युं निवृत्ता य
दनुग्रहात । योगिनः स भवान्किंस्विदनुगृह्येत यत्परैः ॥ १९ ॥

स्थापनार्थायैव ब्राह्मणैरेव मितस्तुत्वं मन्मथेदमनुपन्नमित्याहुः । तरंतीति । निवृत्ताः निवृत्तिधर्मनिष्ठाः योगिनः मृत्युं संसारम् ॥ यदनुग्रहाद्य
स्तनवानुग्रहादंजसासुखेन तरंति । तथाच श्रुतिः ॥ अमृतस्यैषसेतुरितिः सेतुः प्रापकः स भगवान्परैरन्यैरनुगृह्येत किंस्विदितिका
कुः नानुगृह्येतेत्यर्थः ॥ अनुग्राहयतेपरमितिपाठे तर्हितदापरं ब्राह्मणमनुग्रहकर्तारं करोषिकिमित्यर्थः ॥ १९ ॥ ॥

येनमाययात्मीयविचित्रसर्गकारिण्याप्रकृत्या आरब्धस्य कृत्स्नस्य जगतः यस्यारमेष्ठ्यं सर्वोत्कृष्टाधिपत्यं तस्योदयो यस्मान्न मत्सदाधिपत्यप्रदाता
रं इत्यर्थः तं भगवंतं ते विप्राः कुपितत्वचः मंशयावहवाक्यश्रवणेन क्रुद्धात्वन्येषां ते प्रहृष्टाः निरतिशयकल्याणगुणगणाकरस्यात्मदैवतस्य भ
गवतो दर्शनेन तत्संभाषणेन तत्कृपावलोकनादिजनितहर्षयुक्ताश्च प्रांजलयः प्रोचुः ॥१४॥ उक्तिमेवाहुः दर्शिभिः नेति हे भगवन् देवतव त्वया चि
कीर्षितं निश्चयं वयं न विद्मः किं भवानस्माननुजिघृक्षति उत वा निजिघृक्षतीति त्वत्तात्पर्यं विशिष्य न जानीमः किंनु मे मह्यं प्रसेकाभिप्रायेणोक
वचनं । अनुग्रहश्चेत्यनुग्रहः कृत इत्यापाततो विघ्नः आपाततो वानुग्रहः कृतः कथं जानीयेत्यत आहुः यद्यस्मादध्यक्षः वाङ्मनसागोचरस्त्व

न्ते येन माययारब्धपारमेष्ठ्यमहोदयं प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः कुपितत्वचः ॥१५॥ ऋषय ऊचुः ॥ न वयं भगव
न्विद्मस्तव देव चिकीर्षितम् । कृतो मेनुग्रहश्चेति यदध्यक्षः प्रभाषसे ॥१६॥ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल
ते प्रभो । विप्राणां देवदेवानां भगवानात्मदैवतम् ॥१७॥ मत्तिविषयः प्रभाषसे ॥१६॥ एवं स्वात्मनां तदभिप्रायानभिज्ञत्वमा
वेद्य तदुक्तानां तात्पर्यं कोटीकुर्वंतो ब्रह्मण्यदैवं परं हि मे इत्याद्युक्तयो धर्ममर्यादायै एव प्रवृत्त्योपपन्ना नान्यथेत्याहुर्न वभिः ब्रह्मण्यस्येति अ
र्द्धभिः हे प्रभो ब्रह्मण्यस्य ब्राह्मणत्वमर्यादापालकस्य तव ब्राह्मणाः परं दैवतं किलेत्यनेन लोकशिक्षासूचिका । यदि भवान् ब्राह्मणान्परदैवतभा
वेनानुवर्तसे तर्हि तेनानुवर्तनानाद् ब्राह्मणान्बहु मन्यंतः न त्वेषु रतो लोकशिक्षार्थमेव ब्रह्मदैवं परं हि मइत्युक्तमिति भावः वस्तुतस्तु देवदे
वानां देवेन त्वयापि देवानां बहु मंतव्यानां विप्राणां भगवान्स्वाकुरणपूर्णः आत्मदैवतमात्मदैवतं इति हेतुगर्भ आत्मदैवतस्य तव न देवतां
तरसंभवतीत्यर्थः । न याच श्रूयते पतिं विश्वस्यात्मेश्वरं यस्मात्परं नायरमस्ति । न तस्येशे कश्चन तस्य नाम महद्यशः स्वे महिम्नि प्रतिष्ठित इ

एवमाश्रितसौलभ्यसौशील्यादिगुणसंपन्नेन भगवता कानि ब्रह्मदेवं परं हि मे यत्ते वयाचरणाय प्रपवित्ररेणुं न श्रीर्विरक्तं मां विजहा
तियेषाममल्लोङ्घ्रिरजःकिरीटैर्बिभर्मीत्यादिवचांस्याश्रुसमुनयस्तं देवतानां परमं च दैवतं इत्यादिश्रुतिभिः परमदैवत्वेन र
कीर्तितो भगवान् किमस्मद्वचनायैवं वदत्युहोस्विद्धर्मसंस्थापनार्थायय यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन ॥ इति स्वगीतानुर
सारेण वदतीति तात्पर्यमजानंतो नूनमसौ न भक्तान्वंचयति किंतु धर्मसंस्थापनार्थायैव वदतीति पुनर्निश्चिचीषया नद
कानि वाक्यान्यस्य तात्पर्यकत्वेन प्रतिपादयिष्यंतः ॥ संप्रसूःचुरित्याह ब्रह्मा त्रिभिः अथोक्तविध भगवद्वाक्यश्रवणानंतरं

ब्रह्मोवाच ॥ अथोनस्योशतीं देवीमृषिकुल्यां सरस्वतीम् ॥ नास्वाद्य मन्युदष्टानां तेषामात्माप्यतृप्य
त ॥१२॥ सतीं मा द्वायुष्य एवं ततो लब्धीं गुर्वर्थं गह्वराम् ॥ विगाह्यागाधगंभीरां न विदुस्तच्चिकीर्षितं
॥१४॥

तस्य भगवतः ऋषिकुल्यां वेदसजातीयां उशतीं कमनीयां देवीममानुषां सरस्वतीं गिरमास्वाद्यानुभूयाश्रुतमन्युनाविषमानेन क्रो
धेन दग्धानां तेषां मुनीनां मात्मानः करणं नातृप्यत तद्वाक्यतात्पर्याज्ञानान्मन्युदष्टत्वाच्च वितंनातिप्रसन्नमभूदित्यर्थः ॥१३॥ सतीं साध्वीं
मत्वाक्षरां गुरुभिर्बहु वैदग्धैर्यै गह्वरां दुर्विज्ञेयामगाधां गंभीरामभिप्रायेणागाधामर्थतो गंभीरां सरस्वतीमित्यनुषंगः एवं ततः वि
गाह्य विलोड्यादायाहृत्येदमेषां वाक्यानां तात्पर्यमिति परिश्रुतेत्यर्थः तेन भगवता कर्तुमिष्टेन विदुः विचार्य परिश्रुतमन विदुः ।

भा॰तृ॰

॥११०॥

ये पुनः क्षेपतः तिरस्कुर्वतोपि ब्राह्मणान् पि धिया मदात्मकबुद्ध्याऽर्चयंतः पूजयंतः तुष्यद्धृदः संतुष्टचित्ताः स्मितं हासः तदेव सुधा तयो
क्षितं सिक्तं पद्ममिव वक्त्रं येषां ते ॥ अनुरागकलया ऽनुरागेण कलया कलितया मुक्तया वाचा गिरा आत्मजवत् पुत्रमिव गृणं
तो भाषंतः संबोधयंति ॥ तैरहमिव उपाहृतः उपकारितः ते मदनुग्रहविषया इति भावः ॥११॥ एवं ब्राह्मणान् प्रशस्याथ मुनिविहि
तं दंडं स्वयमप्यनुमनुते ॥ तन्मे इति ॥ तस्मात् स्वभर्तुः स्वयोरात्मनो भर्तुर्मम अवसायमुक्तविधं निश्चयमलक्ष्यमाणं अजानंतो यु

ये ब्राह्मणान्मयि धियाक्षिपतोर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ॥ वाण्यानुरागकलयात्म
जवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः ॥११॥ तन्मे स्वभर्तुरवसायमलक्ष्यमाणौ युष्मद्व्यति
क्रमगतिं प्रतिपद्य सद्यः ॥ भूयो ममांतिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः ॥१२॥

युष्मद्व्यतिक्रमोऽपराधः तस्य गतिं फलं प्रतिपद्य आप्य भूयः पुनः ममांतिकं समीपं इतां प्राप्नुतां यद्यस्माद्द्वौ रोदंड एवं भवता
नुमतश्चेत्तर्हि कोस्मास्वनुग्रह कारितेत्यत्राह भृतयोर्भृत्ययोरचिरत आशु विवासः युष्मद्व्यतिक्रमगतिप्राप्तिः कल्पतां कल्प्य
तामिति यत्तदेव मेऽनुग्रहः महदतिक्रमफलमवाप्य पुनराशु मत्समीपागमनं एव मदनुग्रह इत्यर्थः ॥१२॥

॥११०॥

किंच येषां ब्राह्मणानाममलं पवित्रं पदांघ्रिरजः पादरजस्तदहं किरीटैर्विभर्मि तान्विप्रान्को न विषहेत तिरस्कुर्वतोपि ब्राह्मणान्को न क्षमेत कथं
भूतोहमखंडानंताविकुंठाप्रतिहतिरहिता योगमायाविभूतिः स्वाष्टयकसिद्धत्वेन युग्ममानाष्ट्रयैशक्तिर्विभूतिः कार्यात्मिका विभवो य
स्य सममार्हणांभः तीर्थोदकरूपा गंगा सह चंद्रललामलोकान् चंद्रोल्ललामच्चिह्नं यस्य स महादेवस्तत्सहितांल्लोकान्पुनाति तथा च वक्ष्य
ते यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूदित्येवं परमपावनोप्यहं तत्पादरजो विभर्मीति भावः

येषां विभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः ॥ विप्रांस्तु को न विषहेत यदर्हणांभः
सद्यः पुनाति सह चंद्रललामलोकान् ॥ ९ ॥ ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि
च भेदबुद्ध्या प्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान्गृध्रा रुषा मम कुषंत्यधिदंडनेतुः ॥ १० ॥ ॥ ॥

९ ॥ एवं ब्राह्मणान्स्तुत्वा यत्नात्केवलस्तुवन्नते पुरुषापराधिनो मन्निग्रहविषयाः कृतोपचारास्तु मदनुग्रहविषया इत्याह ॥ द्वाभ्यां ॥ ये म
इति ॥ मे मम तनूः शरीरभूतान्द्विजवरान्मदीया मच्छरीरभूताः दुहतीः गाश्च प्रशंसाप्रसंगाद्दुहत्वा युक्तिः ॥ अलब्धशरणानि रक्षक
हीनान्येतानि मच्छरीराणि भूतानराणि च ये पुरुषा अघं पापं तेन क्षताः ॥ अनुविद्धाः दृशो नेत्राणि येषां तेऽत एवाहिमन्यवः अहे
: सर्पस्येव मन्युः क्रोधो येषां तथाभूताः संतो बुध्या मदात्मकत्वविरुद्धबुध्या द्रक्ष्यंति तान्मम मतियामस्य दंडनेतुः यमस्याधीनाः गृ
ध्रा श्येयोमुखाः गृध्राः कुषंति तेषां नेत्राणि लुंचंतीत्यर्थः ॥ १० ॥ ॥ ॥ ॥

भा॰द॰

॥१०९॥

रेवब्राह्मणाः नियमान्व्रतानि वहंतिकुर्वंति ॥ ब्रह्मादिभिरुपास्योसौ लक्ष्मीरनादृतवंतमपिमांब्राह्मणसेवाप्रभावेणैवनविजहातीत्यर्थः ॥७॥
किंचनेति ॥ वितानेयज्ञे श्चोतद्घृतप्लुतं श्चोतता क्षरता घृतेन प्लुतं विलोडितं यजमानहविः यजमानसंबंधिहविः तेनदेवतोद्देशेन त्यक्तं चरु
पुरोडाशादिरूपंहविरित्यर्थः हुतभुङ्मुखेनाग्निमुखेनाहमत्र यथाहं तथानादमिनाश्नामि ॥ यद्ययामप्यवहितैरर्पितैर्निजकर्मपाकैः स्वव
र्णाश्रमोचितकर्मफलैस्तुष्टस्यनिजकर्मफलानिमपिसमर्प्यस्वतएवतुष्टस्येत्यर्थः अनुग्रासं प्रतिकवलं चरतोभुंजानस्यब्राह्मणस्यमु
खतः मुखेनाग्निना ॥ अहंहिसर्वयज्ञानां भोक्ताचप्रभुरेवचेत्युक्तरीत्या सर्वयज्ञफलप्रदः तदेवाग्निस्तद्वायुरितिश्रुत्युक्तरीत्याऽग्ना

नाहं तथाद्मि यजमानहविर्विताने श्चोतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्म
णस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥८॥ ॥

द्मितयांशित्वेनयागीयंहविर्भुंजानोभगवान्यथाब्राह्मणमुखेनभुंजन्तुष्यतितथानतुष्यतीत्यर्थः यजमानहविर्विताने इत्यपिपाठः तद्वा
निजकर्मपाकैः स्वपुण्यफलरूपैः समप्यवहितैरर्पितैर्यजमानहविर्विताने यजमानसंबंधिहविर्विस्तारे हुतभुङ्मुखेनतथानाद्मिय
थाचोनत् घृतप्लुतमनुग्रासं चरतः स्वतएवतुष्टस्य ब्राह्मणस्यमुखेनाश्नीसन्नयः फलाभिसंधिरहितैर्यज्ञैर्भगवदाराधनस्यभगव
त्संतोषातिशयाधायकत्वमत्रोक्तं भवति ॥९॥

॥१०९॥

तस्मादाश्रितमौलप्स्यादिकल्याणगुणाइतियशः संपन्नोऽहं निरतिशयप्रियाणां भवतां विरोधि चेत्स्वांगमपि लुनामीत्याह ॥ यस्येति यस्य ममामलामृतय
शः ॥ श्रवणावगाह ॥ अमलं पवित्रममृततुल्यं यद्यशः तस्य श्रवणावगाहः श्रोत्रप्रवेशः आश्वपचं श्वपाकपर्यंतं जगत्सद्यः पुनाति पवित्र
यति सोऽहं विकुंठ श्रोत्रप्रवेशमात्रेण सद्यो जगत्पावनकरयशः संपन्नः विकुंठः प्रतिहतिरहितः भवद्भिर्निमित्तभूतैर्भवद्भ्य इति पंचम्यंत
पाठेपि तदा भवद्भ्यो हेतुभ्या उपलब्धसतीर्थकीर्तिराश्रितसुलभ इत्यधिक्षिप्तकीर्तिरहं वः युष्माकं प्रतिकूलाद्वृत्तिर्यस्तं स्ववाहुमपि छिं
द्याद्वः प्रतिकूलवृत्तिश्चेत्स्ववाहुमपि लुनीये इत्यर्थः ॥ ६ ॥ एवं स्वस्य भक्तेषु निरतिशयप्रीतिं तद्विरोधिनिरसनं चाभिप्रेतमाविष्कृत्य प्रशांतिं स
ताज्ञीयदपि च पुरीकोशाकथनमिति तिन्यायेन स्वप्रशंसार्थं स्वभक्तान्ब्राह्मणान्प्रशंसति ॥ यत्सेवयेत्यादि पंचभिः ननु कथमात्मप्रशंसानिंदितार

यस्यामृतामलयशः श्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः ॥ सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिंद्यां स्व
वाहुमपि वः प्रतिकूलवृत्तिं ॥ ६ ॥ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलं ॥ न श्रीर्विरक्तमपि
मां विजहाति यस्याः प्रेक्षालवार्थमितरे नियमान्वहंति ॥ ७ ॥ भगवता क्रियते इति निःशंकनीयम विद्यमानगुणारोपणेनात्मप्रशंसाया
निंदितत्वादियं तु प्रशंसा स्वाभाविकी ज्ञानवलक्रिया चेति श्रुत्युक्तविधया स्वाभाविकगुणानुकथनरूपेति न दोषः यत्सेवया येषां ब्राह्मणानां सेवया
चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य तं स्वपादरेणुना पवित्रत्वं ब्राह्मणसेवया लब्धमिति भावः अत एव सद्यः क्षतो निरस्त अखिलस्य लोकः
स्य मलो येन तं प्रतिलब्धं प्राप्तं शीलं येन तं ॥ एते गुणा ब्राह्मणसेवयैव स्वेन लब्धा इति भावः एवं विधं विरक्तमपि मां श्रीर्लक्ष्मीर्न जहाति तत्कृत्या
नोपि ब्राह्मणसेवयैवेति हृदयं कीदृशी चासौ लक्ष्मी यां मां न जहाति इत्युच्यते तत्राह यस्याः लक्ष्म्याः प्रेक्षालयार्थं कटाक्षलेशप्रसारणायेतरे

भा॰ तृ॰
॥ १०८ ॥

उक्तमेवाह ॥ एकादशभिः ॥ एताविति जयो विजयश्चेत्येतौ मह्यं मम पार्षदौ मां कदर्थीकृत्यावज्ञाय यस्माद्युष्मभ्यं बह्वकृतां अतिक्रममप
चारमकृतामकुरुतां ॥२॥ तस्मान्मामनुव्रतैर्भवद्भिरेतयोर्यो दंडः धृतः स एव दंडः अस्माभिर्हे मुनयः देवहेलनाद्देवानां युष्माकं हेलनादवज्ञाना
न्निमित्तादनुमतोऽङ्गीकृतः ॥३॥ तत्तस्मादहं स्वकृतत्वद्विषयायाचरणाद्वः युष्मानद्याधुना प्रसादयामि क्षमापयामि ॥ ननु सत्यपराधे दु
ष्टा एव क्षमामर्षितव्या इत्यत्राह हि यस्माद्ब्रह्म ब्राह्मणा मे मम परं उत्कृष्टं दैवमतो वः प्रसादयामि ॥ ननु किमपराद्धं भवता येन प्रसादयामीति

श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वकातामतिक्रमम् ॥२॥ यस्
त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः ॥ स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥३॥ तद्वः प्रसादयाम्यद्य
ब्रह्म दैवं परं हि मे ॥ तद्धि स्वात्मकृतं मन्ये यत्स्वपुंभिरसत्कृताः ॥४॥ यन्नामानि च गृह्णाति लोको भृत्ये कृता
गसि ॥ सोऽसाधुवादस्तत्कीर्तिं हंति त्वचमिवामयः ॥५॥ भाषसे इत्यत्राह ॥ स्वपुंभिरसत्कृता अवज्ञाता इति यत्तद्धि
आत्मकृतं मया कृतमित्येव मन्ये ॥४॥ भृत्यकृतमागः स्वामिन्येव पर्यवस्यतीत्याह यदिति ॥ भृत्ये कृतागसि कृतापराधवति सति यस्य
नामानि यस्य स्वामिनो नामानि च जनः गृह्णाति अनेन स्वामिना भृत्यद्वारा एवमेव ममासाधु कृतमतो यं दुरात्मेत्यादि विनिंदकना
मानि लोको वदति असाधुवादः तत्कीर्तिं तस्य स्वामिनः कीर्तिं हंति नाशयति त्वचमामय इवामयोऽत्र श्वेतकुष्ठादिरोगः स यथा त
स्य त्वचः तद्गतं सौंदर्यं हंति तथैतत्पर्यः भृत्यकृतापराधनिमित्तोऽसाधुवादः स्वामिनि पर्यवसन्नस्तत्कीर्तिमेव नाशयतीति भावः ॥५॥

॥ १०८ ॥

इदं तु लोकद्वयस्योत्तमं यस्य त्वद्रूपस्य कृतार्थानां वदंतो न मन्वते। प्रादुरिति हे पुरुहूत पुरुभिः बहुभिः हूतः स्तुत सर्वोपनिषद्वेद्य इत्यर्थः यद्वा रूपविशेष
णां पुरुभिर्हूतं वेद्यं पंचोपनिषत्प्रतिपाद्यमित्यर्थः यदिदं रूपं दिव्यं मंगलविग्रहं प्रादुश्चकर्थ प्रकटीकृतवानसि तेन रूपेण तद्दर्शनेनेत्यर्थः
हे ईश अस्माकं दृशः नेत्राणि निर्वृतिं सुखमलंभ प्राप्तमवापुः प्रापुः अनात्मनां न विद्यते आत्मा अंतःकरणं स्ववशं येषां तेषामयोगिनां दुरुदयः दुर
वगमः यो भगवानितीत्थमेव धारणो वा प्रतीतः दृष्टः अस्माभिरिति शेषः तस्मै भगवते तुभ्यं इदं नमः कुर्म इत्यर्थः ॥५०॥ इति तृतीये पंचदशः
॥१५॥ एवं मुनिभिरभिवेदितस्य रूपगुणरूपविभूतिस्तत्प्रसादितो भगवानाश्रितसुलभः प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ज्ञानी

प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः। तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां
दुरुदयो भगवान्प्रतीतः ॥५०॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे जलविंवयो नाम पंचदशोध्यायः ॥
॥१५॥ ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम् प्रतिनंद्य जगादेदं वैकुंठनिलयो विभुः ॥१॥

त्वात्स्यैव मे मतमिति स्वगीतोक्तरीत्या निरतिशयस्वप्रीतिविषयान्मुनीन्प्रसादयितुमुवाचेत्याह। इतीति मुनीनां शुभाश्रयसंशील
नशीलानां योगधर्मिणां भगवद्भक्तियोग एव धर्मो येषामस्तीति तेषां इत्युक्तप्रकारेण गृणतां स्तुवतां तेषां सनकादीनां तद्भावि
तं प्रतिनंद्य शिरसा संश्लाघ्य विकुंठः स्थानं निलयो यस्य स विभुर्भगवानिदं वक्ष्यमाणं जगाद उक्तवान् ॥१॥ ॥ ॥

भा.टी.

॥१०७॥

ष्टद्धसत्वमयविग्रहवदेवात्मतत्वमस्माभिः प्राप्युपदिष्टमिति प्रसभि ज्ञानमेव जानीम इति कृतार्थोपपन्नतेति भावः ॥४७॥ ननु कथं मद्दर्शनमात्रेण कृ
तार्थता यतो धर्मादीनामेव पुरुषार्थत्वमित्याशंक्य कैमुत्यन्यायेन दर्शनस्यैव कृतार्थतापादकत्वमाहुः नेति ॥ अंग हे भगवन् येषां त्वदंघ्रिरेव श
रणं स्वरक्षणोपायो येषां ते भगवच्चरणागता इत्यर्थः अतएव कुशला दुष्करोपायेभ्यो निवृत्तत्वात् कीर्त्तन्यं कीर्त्तनीयं तीर्थं पवित्रं यशो य
स्य तस्य भगवतः कथायां रसज्ञाः रसानुभवपराः संतः ते तव प्रसादरूपमात्यंतिकं मोक्षमपि न विगणयंति ते तव भ्रुवः उन्नयैर्विक्षेपैर
र्पितं विहितं भयं यस्मिंस्तत् स्वर्गस्वाराज्यादिकं न विगणयंतीति किमु वक्तव्यमित्यर्थः त्वत्कथाश्रवणमात्रेण स्वात्मनः कृतार्थः तां मन्यमा

नात्यंतिकं विगणयंत्यपि ते प्रसादं किंत्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ॥ येतु त्वदंघ्रिशरणा भवतः कथायाः कीर्त्तन्यतीर्थयशसः
कुशला रसज्ञा ॥४८॥ कामं भवः स्ववृजिनैर्निरयेषु नः स्याच्चेतोलिवद्यदि नु ते पदयो रमेत ॥ वाचश्च नस्तुलसीवद्यदि तेंघ्रि
शोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः

नाः तच्छ्रवणागताः परमपुरुषार्थं मोक्षमपि नाद्रियंते किमुत वक्तव्यं ज्ञानसागोचरं स्वरूपस्वभाव ॥४९॥
भवद्दर्शने नास्माकं कृतार्थतेति भावः ॥४८॥ किं बहुना दर्शनस्य कृतार्थतापादकत्वं कथनीयमेतावतैव सर्वेषां कृतार्थतास्यादिति सू
चयंतस्त्वदेव प्रार्थयंते नो नमस्कुर्वंति द्वाभ्यां श्लोकाभ्यां काममिति ॥ हे भगवन् स्ववृजिनैः ॥ स्वेषामस्माकं वृजिनैर्दुरितैः कामं नोस्माकं निरयेषु नीच
योनिषु भवो जन्मास्तु किंतु यदि नु नंते तव पदयोः नश्चेतश्चित्तः मलिवद्भृंगवद्रमेत पदिनः वाचः गिरः तुलसीव तेंघ्रिशोभाः स्तुतिपराः
स्युरित्यर्थः यदि नः कर्णरंध्रः ते गुणगणैः पूर्येत नित्यं त्वद्गुणगणश्रवणपरः स्यादित्यर्थः इदं शिरः ॥ पाणपादीनां भगवद्वंदनार्चनादेरुपलक्षणं
नवद्दुरितानुसारेण जन्मास्तु तत्र श्लोकः इदं तु भवंतं प्रति प्रार्थनीयमवशिष्यते ॥ यच्चेतआदीनां भवत्पादारविंदध्यानादिप्रावण्यमित्येतावतैव

॥१०७॥

इदंतु लोकद्वयोत्क्रमश्च स्वहृद्यस्यात्वकृतार्थतां वदंतो नमंति । प्रादुरिति हे पुरुहूत पुरुभिः बहुभिः हूतः स्तुतश्च सर्वोपनिषद्वेद्यो इत्यर्थः यद्वा रूपविशेष
णां पुरुभिर्हूतं वेद्यं चोपनिषत्प्रतिपाद्यमित्यर्थः यदिदं रूपं दिव्यमंगलविग्रहं प्रादुश्चकर्थ प्रकटीकृतवानसि तेन रूपेण न दर्शनेनेत्यर्थः
हे ईश अस्माकं दृशः नेत्राणि निर्वृतिं सुखमलंभ्यम् अवापुः प्रापुः अनात्मनां न विद्यते आत्मा अंतःकरणं स्ववशं येषां तेषामयोगिनां दुरुदयः दुर
वगमः यो भगवानितीत्यमवधारणे वा प्रतीतः दृष्टः अस्माभिरिति शेषः तस्मै भगवते तुभ्यं इदं नमः कुर्म इत्यर्थः ॥ ५० ॥ इति तृतीये पंचदशः
१५ । एवं मुनिभिरभिवेदितस्वरूपगुणरूपविभूति सत्प्रसादितो भगवानाश्रितसुलभः प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ज्ञानीत

प्रादुश्चकर्थ यदिदं पुरुहूतरूपं तेनेश निर्वृतिमवापुरलं दृशो नः । तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां
दुरुदयो भगवान्प्रतीतः ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे जलविंवयोनाम पंचदशोध्यायः ॥
१५ ॥ ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम् प्रतिनंद्य जगादेदं वैकुंठनिलयो विभुः ॥ १ ॥

त्वात्मैव मे मतमिति स्वगीतोक्तरीत्या निरतिशयस्वप्रीतिविषयान्मुनीन्प्रसादयितुमुवाचेत्याह । इतीति मुनीनां शुभाश्रयसंशील
नशीलानां योगधर्मिणां भगवद्भक्तियोग एव धर्मो येषामस्तीति तेषां इत्युक्तप्रकारेण गृणतां स्तुवतां तेषां सनकादीनां तद्भाषि
तं प्रतिनंद्य शिरसा संश्लाघ्य विकुंठः स्थानं निलयो यस्य स विभुर्भगवानिदं वक्ष्यमाणं जगाद उक्तवान् ॥ १ ॥ ॥ ॥

भा.स्क.
॥१०७॥

शुद्धसत्वमयविग्रह वदेवात्मतत्वमस्माभिरप्युपदिष्टमितिप्रसभिज्ञानमेवजानीम इतिकृतार्थोपपन्नतेतिभावः ॥४७॥ ननुकथंमद्दर्शनमात्रेणाकृ
तार्थता यतोधर्मादीनामेवपुरुषार्थत्वमित्याशंक्याह केमुत्यन्यायेनदर्शनस्यैवकृतार्थतापादकत्वमाहुः नेति ॥ अंग हे भगवन् येतवदंघ्रिरेवश
रणंस्वरक्षणोपायो येषांते भगवच्चरणागताइत्यर्थः अतएवकुशलाद्दुष्करोपायेभ्योनिवृत्तत्वात् कीर्त्तन्यंकीर्त्तनीयंतीर्थंपवित्रंयशोय
स्यतस्यभगवतः कथायारसज्ञाः रसानुभवपराः संतः तेतवप्रसादरूपमात्यंतिकंमोक्षमपिनविगणयंतितेनवभ्रुवः उन्नयैर्विक्षेपैर
र्पितंविहितंभयंयस्मिंस्तस्वर्गस्वाराज्यादिकंनविगणयंतीतिकिमुवक्तव्यमित्यर्थः त्वत्कथाश्रवणमात्रेणस्वात्मनःकृतार्थतामन्यमा

नात्यंतिकंविगणयंत्यपितेप्रसादंकिंत्वन्यदर्पितभयंभ्रुवउन्नयैस्ते ॥ येतुतवदंघ्रिशरणाभवतःकथायाःकीर्त्तन्यतीर्थयशसः
कुशलारसज्ञा ॥४८॥ कामंभवःस्ववृजिनैर्निरयेषुनःस्याच्चेतोलिवद्यदिनुतेपदयोरमेत ॥ वाचश्चनस्तुलसीवद्यदितेंघ्रि
शोभाःपूर्येततेगुणगणैर्यदिकर्णरंध्रः ॥४९॥
नाः तच्चरणागताः परमपुरुषार्थंमोक्षमपिनाद्रियंतेकिमुनवाङ्मनसागोचरंस्वरूपस्वभाव
भवद्दर्शनेनास्माकंकृतार्थतेतिभावः ॥४८॥ किंबहुनादर्शनस्यकृतार्थतापादकत्वंकथनीयमेतावतैवसर्वेषांकृतार्थतास्यादितिस्
वयंतन्नत्वेवप्रार्थयंतेनोनमस्कुर्वंतिद्वाभ्यांश्लोकाभ्यांकाममिति ॥ हे भगवन्स्ववृजिनैः ॥ स्वेषामस्माकंवृजिनैर्दुरितैःकामंनोस्माकंनिरयेषुनीच
योनिषुभवोजन्मस्यात्तुवितर्के यदिनस्तेनतवपदयोःनश्चेतश्चित्तःमलिवद्भृंगवद्रमेत यदिनः वाचः गिरः तुलसीवत्तेंघ्रिशोभाःस्तुतिपराः
स्युरित्यर्थः यदिनःकर्णरंध्रःतेगुणगणैःपूर्येतत्रितंत्वद्गुणगणश्रवणपरास्युरित्यर्थः इदंशिरः ॥ पादपद्मानांभगवद्वंदनार्चनादेतत्पल्लक्षणं
नत्वदृष्टिनानुसारेणजन्मस्यात्तत्रशोकःइदंतुभवंतंप्रतिप्रार्थनीयमवशिष्यते ॥ यच्चेतआदीनांभवत्पादारविंदध्यानादिप्रावण्यमित्येतावतैव

॥१०७॥

स्तुतिमेवाहुर्याबद्ध्यायतमाप्तिः ॥ तच्च चिरमस्माभिर्हृदये ध्यातमनंतस्त्वमस्मज्ज्ञानप्रदर्शनाद्य नयनविषयतां गतोसीत्यात्मनः कृतार्थतामा
हुः ॥ य इति ॥ दुरात्मनामयोगिनां हृदि गतोऽपि विद्यमानोपि ॥ अंतर्हितस्तिरोहितः यस्त्वं सोद्यैव नोस्माकं नयनमूलं नयनविषयतां हे
अनंत राद्धः प्राप्तः यर्ह्येव यदैव भवदुद्भवेन पित्राऽस्मत्पित्रा चतुर्मुखेनानुवर्णितं रहउपदिष्टस्वस्वरूपगुणविभूतिर्भवान्भ
तर्ह्येव कर्णविवरेण नोऽस्माकं गुहां हृदयगुहां प्रविष्टः त्वत्तु त्वत्तोऽस्मत्पितुश्चतुर्मुखाद्दुपदिष्टरहस्यं तत्त्वमस्माभिस्तेनैवं तं हृदये ध्यातमि
दानीं नयनमूलं गतोसि ॥ अतो वयं कृतार्था इति भावः ॥ ४६ ॥ ननु भवत्पित्रोपदिष्टमात्मतत्त्वमन्यदहं त्वन्यस्तत्कथं मद्दर्शनेन कृ

सनकादय ऊचुः ॥ योंऽतर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनंत राद्धः ॥ यर्ह्येव
कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहा भवदुद्भवेन ॥ ४६ ॥ तं त्वां विदाम भगवन्परमात्मतत्त्वं स
त्वेन संप्रति रतिं रचयंतमेषां ॥ यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागा
॥ ४७ ॥

तार्थतेत्यत्राहुः ॥ तमिति ॥ हे परम परोमायस्मात्स परमः सर्वोत्कृष्टस्तस्य संबोधनं सर्वोत्कृष्ट भगवन्सत्त्वेन शुद्धसत्त्वमयदेहेन एषां भक्तानां संप्रति
सम्यक्प्रति क्षणं रतिमनुरागं रचयंतं नवा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामायेति स्मारितं पूर्वोक्तविधं त्वामेवात्मतत्त्वं
पित्रोपदिष्टमात्मतत्त्वं विदाम प्रत्यभिजानीमः किं तदात्मतत्त्वं यन्मदभिन्नं जानथेत्यत्राहुः अनुतापविदितैरनुतापः संसारनिर्वेदस्तेन लब्धै
र्दृढैर्भक्तियोगैर्विरागा विगतरागादिविषयाभिलाषा उद्ग्रंथयः निरहंकारास्ते प्रसिद्धा मुनयो हृदि यदात्मतत्त्वं विदुस्तदुपासीरन्मुनिभिरुपास्यं

संश्लेषमकारि नेसंभ्रममस्माहतइति ॥ तेमुनय अमुष्य भगवतः वदनमेवासितपद्मकोशमुद्वीक्ष्य ऊर्ध्वंवीक्ष्य श्यामवर्णत्वादसितपद्मकोशोदृष्टां
तितः अमृतोपमेयं ॥ कथंभूतं सुंदरतराधरं कुंदहासं सुंदरतरेऽरुणेऽधरोष्ठे कुंदवद्धासोयस्मिंस्तं लब्धाशिषः लब्धामनोरथाः संतः पुन
स्तदीयं भगवतस्तं वंधिनखाएवारुणमणयस्तेषां श्रयणमाश्रयं मंघ्रिद्वंद्वं निरीक्ष्य पुनः पुनरेवं निरीक्ष्य युगपत्सर्वांगलावण्यग्रहणाशक्त्या
ःपश्चाद्विदध्युर्ध्यातवंतः ॥४४॥ एवंनिरतिशयसर्वांगलावण्ययुक्तं भगवंतं स्वहृदिध्यात्वाऽस्तुवन्नित्याह ॥ पुंसामिति ॥ इहास्मिंल्लोके योगा
नांकर्मयोगज्ञानयोगभक्तियोगादीनां येमार्गाः प्रकारास्तैर्गतिं स्वरूपं मृगयतां चिंतयतां कर्मज्ञानयोगयोः प्रकारौ भक्तियोगसाधनतैक

तेवा अमुष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहासं ॥ लब्धाशिषः पुनरवेक्ष्यतदीयमं
घ्रिद्वंद्वंनखारुणमणिश्रयणंनिदध्युः ॥४४॥ पुंसांगतिंमृगयतामिहयोगमार्गैर्ध्यानास्पदंब
हुमतंनयनाभिरामम् ॥ पौंसंवपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः
॥४५॥

रूपो भक्तियोगस्यतु मुक्तिसाधनतैकरूपः प्रकारः तैर्मृगयतां ज्ञानकर्मयोगाऽनुगृहीतभक्तियोगेनगतिं स्वस्वरूपं चिंतयतामित्यर्थ
ः तेषां पुंसां ध्यानास्पदं ध्यानस्यविषयभूतं बहुमतमत्यादरास्पदं मतएवनयनयोरभिरामं पौंसं पौरुषं वपुः शरीरं दर्शयानं दर्श
यंतमनन्यसिद्धैः स्वासाधारणैरौत्पत्तिकैः स्वाभाविकैरष्टभोगैरणिमाद्यष्टविभूतिभिः यद्वा अहिंसाप्रथमं पुष्पं पुष्पमिंद्रिय
निग्रह इत्याद्युक्तैर्भोगैर्युतं युक्तं भगवंतं समगृणन्सम्यगस्तुवन् ॥४५॥ ॥ ॥ ० ॥ ० ॥ ० ॥

किंचइंदिरायाः अहंनिरतिशयसौंदर्यनिधिरितिलक्ष्म्याउत्स्मितंउत्स्मयंविस्मयइतियावत् ॥ तदत्रभगवतोदिव्यदेहविस्मयेउपसृष्टमंत
र्भूतमहोममेदंनिरतिशयंसौंदर्यमितियस्यलक्ष्म्याउत्स्मितंतदत्रदिव्यदेहेऽन्तर्भूतंनिरतिशयसौंदर्यवत्सलक्ष्म्या अपिसुंदरमित्यर्थः स्वा
नांधियाविरचितंभक्तैःस्वमनस्येवंवितर्कितंइत्यर्थः बहुसौष्ठवेननिरतिशयसौंदर्येणाढ्यंयुक्तं मह्यंममब्रह्मणः भवस्यरुद्रस्यभ
वतांदेवतानांचभजंतंभजनीयंकर्मणिशतृप्रत्ययः आर्षत्वात् ॥ अंगंदेहंवानिरीक्ष्यदृष्ट्वानवितृप्तदृशःनवितृप्ताद्दिदृक्षापर्याप्तिम

अत्रोपसृष्टमितिचोत्स्मितमिंदिरायाःस्वानांधियाविरचितंबहुसौष्ठवाढ्यं ॥ मह्यंभ
वस्यभवतांचभजंतमंगंनेमुर्निरीक्ष्यनवितृप्तदृशोमुदाकैः ॥४२॥ तस्यारविंद
नयनस्यपदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः ॥ अंतर्गतःस्वविव
रेणचकारतेषांसंक्षोभमक्षरजुषामपिचित्ततन्वोः ॥४३॥ श्रीरामायनमः

प्ताः अतृप्तिर्णीयेषांतेमुनयःकैःशिरोभिःमुदानेमुर्नमश्चक्रुः ॥४२॥ तस्यारविंदनयनस्यपुंडरीकाक्षस्यभगवतःपदारविंदयोः
किंजल्काः अंगुलयः तैर्मिश्रितोयस्तुलसीमकरंदस्तस्यवायुः चस्वविवरेणस्वनासारंध्रेणांतर्गतःसन्अक्षरजुषामप्यात्मानुसंधा
नेनाविष्कृतमनसामपितेषांमुनीनांचित्ततन्वोःसंक्षोभंचकारचित्तसंक्षोभमानंदपारवश्यंतनुक्षोभोरोमांच ॥४३॥ ॥ ॥

भा॰त॰

‖ १०५ ‖

किंच कृतत्वप्रसादसुमुखं कृतत्वप्रसादः पूर्णानुग्रहः तस्मिन्सुमुखं पूर्णमनुग्रहं कुर्वंतमिव स्थितमित्यर्थः स्पृहणीयानां कांतिसौकुमार्यादिगुणानां धाम आश्रयं स्नेहयुक्तो योऽवलोकः ‖ तस्य कलया प्रसरणेन हृदि संस्पृशंतं चित्तमपहरंतमित्यर्थः ‖ पृथौ पीने विशाले च श्यामे उरसि शोभितया प्रकाशमानया श्रिया लक्ष्म्या स्वलोकस्य चूडामणिरिव स्थितम ‖ आत्मधिष्ण्यमात्मनः ‖ स्वस्य धिष्ण्यं स्थानं वैकुंठलोकं सुभगयंतमिव स्थितम् ३९ ‖ किंच ‖ पृथुनितंबिनि विपुलनितंबे पीतांबरे विस्फुरंत्या कांच्या मेखलया पृथुनितंबोपरि धनपीतांबरोपरि विराजमानया कांच्येत्यर्थः ‖ अलिभिर्भ्रमरैर्विरुतया नादितया वनमालया च मधुपानमत्तैर्भ्रमरैरेत्यर्थः ‖ उपलक्षितमित्यध्याहारः ‖ यद्वा सुभगयंतमिति पूर्वेणो

कृतत्वप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतं श्यामे पृथावुरसि शोभितया श्रिया स्वचूडामणिं सुभगयंतमिवात्मधिष्ण्यम ‖ ३९ ‖ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया वनमाल‑ या च ‖ वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ‖ ४० ‖ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटम ‖ दोर्दंडखंडविवरे हरता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ‖ ४१

णसंबंधः वल्गुसुंदरे पृथुप्रकोष्ठे पृथुवलयानि यस्य तं विनतासुतो गरुडस्तस्यांसे स्कंधे विन्यस्तः निहितः हस्तः वामहस्तो येन तं ‖ इतरेण दक्षिणहस्तेनाब्जं सनालं कमलं धुनानं लीलया भ्रामयंतमित्यर्थः ‖ ४० ‖ किंच विद्युतं तडितं क्षिपती तिरस्कुर्वती ये मकराकृती कुंडले ताभ्यां यन्मंडनमलंकरणं तदर्हे गंडस्थले यस्मिंस्तत्तथा उन्नसं चोच्चनासिकं मुखं च यस्य तं मणियुक्तं किरीटं यस्य तं दोर्दंडानां भुजदंडानां यः खंडः समूहः तस्य विवरे मध्ये स्थितेन ‖ ४१ ‖

नाम्नो हरेण परार्ध्यं उत्कृष्टो यो हारो मुक्ताहारस्तेन कंधरायां कंठगतेन स्थितेन कौस्तुभेन च उपलक्षितम् ‖ ४१ ‖

‖ १०५ ‖

अनुग्रहात्तेनेत्यर्थः ॥ एवंस्वानांमहदतिक्रममपराधंतदैवतत्क्षणमेवावबुध्यज्ञात्वाआर्याणांभक्तानांहृद्यःमनोज्ञः अरविंदनाभोभगवान्त
स्मिन्यत्रदेशेसनकादयोद्वास्थौचतत्रदेशेययौजगाम ॥ कथंभूतःसन्सहश्रीःलक्ष्मीसहितःपरमहंसायेमहामुनयःसनकादयस्तैरन्वे
षणीयौसंशीलनीयौचरणौचलयन्नचवरणादर्शनप्रतिघातहेतुकंक्रोधंतौदर्शयित्वाशमयिष्यामीतित्वराव्याजेनपद्भ्यामेवययौ
इतिभावः ॥ मिथुनस्यैवोपास्यत्वप्राप्तत्वद्योतनाययमात्रसंनिधौसुतरांतेषांकोपमुपशमयितुंचसश्रियःआगमनमित्यभिप्रायः ॥ ३७ ॥
अथागच्छंतंभगवंतमनुवर्णयतिपंचभिः ॥ तमिति ॥ आगतमागच्छंतंभगवंतंतेमुनयःअचक्षतापश्यन् ॥ आपंचमादिदमेवक्रि

ब्रह्मोवाच ॥ एवंतदैवभगवानरविंदनाभस्वानांविवुध्यसदतिक्रममार्यहृद्यः ॥ तस्मिन्य
यौपरमहंसमहामुनीनामन्वेषणीयचरणोचलयन्सहश्रीः ॥ ३७ ॥ तंत्वागतंप्रतिहृतौप
यिकंस्वपुंभिस्तेऽचक्षताक्षविषयंस्वसमाधिभाग्यं ॥ हंसश्रियोर्व्यजनयोःशिववायुलोलच्छुभ्रात
पत्रशशिकेसरशीकरांवुं ॥ ३८ ॥

यापदं ॥ कथंभूतंभगवंतंस्वपुंभिःस्वपार्षदैःप्रतिहृतंप्रत्याहृतमौपयिकंछत्रचामरव्यजनपा
दुकादियस्यतंस्वानांभक्तानांयःसमाधिस्तस्यभाग्यंफलमक्ष्णोर्विषयंसमाधिभावयमधुनात्विविषयतांगतमिवस्थितमित्यभिप्रायः हं
सवच्छ्रीर्ययोर्व्यजनयोश्चामरयोर्यःशिवःसुरभिःसुमंदोवायुस्तेनपल्लोलच्छुभ्रमातपत्रंसएवशशीतस्यकेसरामुक्तादामखिलंवास्तेभ्यः
शीकरांवुनितेभ्योगलंतिअंबुकरणानियस्मिन्तं हंससदृशाचामरसुरभिसुमंदसुखस्पर्शवान्वीषल्लोलच्चंद्रमंडलसदृशशुभ्रातपत्र

अथैवं मुनिभिरुक्तो भगवद्दास्योनेषां पादमूले पतितो विज्ञापयामासतुरित्याह ब्रह्मन्तेषामिति द्वाभ्यां ॥ तेषां मुनीनां तदीरितं भाषितं कथं भूतं ब्रह्मदंडं ब्रह्मशापरूपमतएवास्त्रपूगैरस्त्रसमूहैरनिवारितमनिवारणीयं दुस्तुक्तप्रकारेणावधार्य श्रुत्वा सद्यः तदैव हरेरनुचरौ भृत्यावतिकातरेण तस्मादग्रहीतेषां मुनीनां पादौ गृहीतवान्तौ दुरुविभ्यतः ॥ अधिकं विभ्यतः भीतान् ॥ अहो अस्माभिर्निरपराधीभ्यां भगवद्भक्ताभ्यां मपराद्धमनेन भागवतापचारेण वयमपि संसरेमेति भयकंपितान्मुनीन्प्रति अपततां दंडवत्प्रणाममपूर्व

ब्रह्मोवाच ॥ तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः ॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥ ३५ ॥ द्वा पा ऊवाच ॥ भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषम् ॥ मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ॥ ३६ ॥

कं विज्ञापयामासतुरित्यर्थः ॥ ३५ ॥ विज्ञापनमेवाह ॥ भूयादिति ॥ अघोन्यपराधवति यद्यवितो दंडः भवद्भिर्युष्माभिरकारि कृतः नात्र कश्चिद्भवतामपराध इति भावः ॥ अतो सौ दंडः नावावयोर्भगवद्विषयस्मृतिनाशको मोहः वः युष्माकमनुतापकलया यः कृपानिमित्तोनुतापः तस्य कलया लेशेन मा भवेदिति ॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

क्रियैश्वर्यभोगोपकरणान्विता इति श्रूयते ॥ समस्तेन तयाविधाः परमाकाशवर्त्तिनः पुरुषाः इमौ तु द्वारपालौ परमव्योमनिलयनित्य
सिद्धभगवत्परिजनरूपौ सुकृतविशेषाल्लब्धद्वारस्याधिकारौ ॥ अनयोर्भगवद्भक्तप्रातिकूल्यायोगात्तत्क्षमाः प्रवेशनिवारणायो
गाच्च साक्षाद्भगवत्परिजनानां हि नित्यज्ञानक्रियैश्वर्यवचनाद्भगवदभिप्रायानभिज्ञत्वं नोपपद्यते भगवदनुचरत्वप्राप्ति
स्वानुष्ठानविशेषाद्भवतीति स्मर्यते ॥ भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेदित्यादि ॥ यथाऽनंतवैनतेयव्यतिरेकेण नागसुप
र्णजातीया बहवो विद्यंते एवं सुकृतवशाद्भगवत्परिजनतुल्यरूपतामापन्ना बहवः संभवंति ॥ अत्रापि वसंति यत्र पुरुषाः
सर्वे वैकुंठमूर्त्तयः ये निमित्तनिमित्तेन धर्मेणाराधयन्हरिं इति सामान्येनउक्ताः को वामिहेत्य भगवत्परिचर्ययोच्चैरित्यनयो
र्भगवदाराधनेनेन तद्देशप्राप्तिविशेषतउक्ता किं च नंदः सुनंदो य जयो विजः प्रबलो बलः कुमुदः कुमुदाक्षश्च विष्वक्सेनः
पतत्रिराट् ॥ जयश्च श्रुतदेवश्च पुष्पदंतश्च सात्वतः सर्वे नागायुतप्राणाः इह जयोश्च सुरासुरैरिति त्रिविक्रमकाले जयवि
जययोर्नाम्ना मेश्रायोभिमतौ जयविजयौ साक्षाज्जयविजयाभ्यामन्यौ निश्चितौ कल्पावतारे शापान्मोक्षमाणयोस्तयो
र्भीमनावतारेनयोः पारिषदत्वापत्त्यनुपपत्तेः ॥ अस्य लोकस्य परमाकाशादन्यत्वं पूर्वमुपपादितं अतस्त्रिपाद्विभूतिवर्त्तिभ
गवत्परिजनव्यतिरिक्तत्वमनयोः सिद्धमिति न प्रमाणांतरविरोधः ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

षोडशमेऽवतारे भार्गवरामात्मा ल्वोनपान्कार्तवीर्यादीन् ब्रह्मद्रुहः ब्रह्मकुलद्रोहकान्नृपान्कुपितः त्रिसप्तकृत्वः एकविंशतिवारं महीं निःक्ष
त्रां क्षत्रबीजरहितामकरोत् ।२०। ततः सप्तदशोऽवतारे पाराशरात्सत्यवत्यां जातो बादरायण इति प्रसिद्धः । अल्पमेधसः । कृत्स्नवेदमर्थागमो
पबृंहितुमक्षमान्पुंसः पुरुषान्दृष्ट्वा वेद एव तरुस्तस्य शाखाश्चक्रे ॥ ऋग्यजुःसामादिभेदेन तदवांतरभेदेन च विभक्तवानित्यर्थः ॥२१ नरदे
वत्वमिति ॥ अतः परमष्टादशेऽवतारे सुरकार्यं रावणवधरूपं कर्तुमिच्छया नरदेवत्वं क्षत्रियत्वं प्राप्तः श्रीरामरूपेणावतीर्ण इत्यर्थः समु

अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥ त्रिसप्तकृत्वा कुपितो निःक्षत्रामकरोन्महीं ॥२०॥ ततः सप्तदशे जातः स
त्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥२१॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥२२॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्नाजिनसुतः कीकटे
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भरं ॥२३॥ षु भविष्यति ।२४

द्रविषयको निग्रहः सेत्वादिर्येषां तानि वीर्याणि कर्माणि चक्रे ॥२२॥ एकोनविंशे विंशतिमे चावतारे भगवान्वृष्णिषु यादवेषु रामकृष्णा।
विति जन्मनी रामः बलरामः । कृष्णश्चेति द्वे जन्मनी प्रादुर्भावरूपे प्राप्य भुवो भारमहरत् ॥ रामस्तु एकोनविंशः । कृष्णस्तु विंशतितमोऽवतार
इत्यर्थः । २३ ततः कलौ युगे संप्रवृत्ते सति सुरद्विषामार्हतानामासुराणां वा संमोहनार्थं भगवान् कीकटेषु जिनस्य सुतो भविष्यति । नाम्ना
बुद्ध इति प्रसिद्धः ॥ अयमेकविंशोऽवतारः ॥२४॥

क्रियैश्वर्यभोगोपकरणान्विताइतिश्रूयते ॥ समस्तंतयाविधाःपरमाकाशावर्त्तिनःपुरुषाःइमौतुद्वारपालौपरमव्योमनिलयनित्य
सिद्धभगवत्परिजनरूपौमुहुर्त्तनविशेषाद्वध्वद्वारस्याधिकारौ ॥ अनयोर्भगवद्भक्तप्रातिकूल्यायोगात्क्ष्माःप्रवेशनिवारणायो
गाच्चसाक्षाद्भगवत्परिजनानांहिनित्यज्ञानक्रियैश्वर्यवचनाद्भगवदभिप्रायानभिज्ञत्वंनोपपद्यतेभगवदनुचरत्वप्राप्तिः
श्चानुष्ठानविशेषाद्भवतीतिस्मर्यते ॥ भूमौमस्तरशायीचविस्मोरन्वचरोभवेदित्यादि ॥ यथाऽनंतवैनतेयव्यतिरेकेणनागसुप
र्णजातीयावहवोविद्यंतेएवंसुहूर्त्तनवशाद्भगवत्परिजनतुल्यरूपतामापन्नावहवःसंभवंति ॥ अत्रापिवसंतियत्रपुरुषाः
सर्वेवैकुंठमूर्त्तयः येनिमित्तनिमित्तेनधर्मेणाराधयन्हरिंहतिसामान्येनउक्ताःकोवामिहेत्यभगवत्परिचर्ययोश्चैरित्यनयो
र्भगवदाराधनेननहेशप्राप्तिर्विशेषतउक्ता किंचनंदःसुनंदोथजयोविजःप्रवलोवलःकुमुदःकुमुदाक्षश्चविष्वक्सेनः
पतत्रिराट् ॥ जयश्चश्रुतदेवश्चपुष्पदंतश्चसात्वतःसर्वेनागायुतप्राणाश्चजयोश्चसुरासुरैरितित्रिविक्रमकालेजयवि
जयस्यानावगमाद्वेशाययोर्मिमतौजयविजयौसाक्षाज्जयविजयाभ्यांमन्यौनिश्चितौ कृष्णावतारेशापान्मोक्षमाणयोस्तयो
र्वामनावतारेतयोःपारिषदत्वापत्त्यनुपपत्तेः ॥ अस्यलोकस्यपरमाकाशादन्यत्वंपूर्वमुपपादितं अतस्त्रिपाद्विभूतिवर्त्तिभ
गवत्परिजनव्यतिरिक्तत्वमनयोःसिद्धमितिनप्रमाणांतरविरोधः ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

षोडशमेऽवतारे भार्गवरामाख्यो नृपान् कार्तवीर्यादीन् ब्रह्मद्रुहः ब्रह्मकुलद्रोहकान् नृपान् कुपितः त्रिसप्तकृत्वः एकविंशतिवारं महीं निःक्ष-
त्रां क्षत्रबीजरहितामकरोत् । २० । ततः सप्तदशेऽवतारे पाराशरात् सत्यवत्यां जातो बादरायण इति प्रसिद्धः । अल्पमेधसः । कृत्स्नवेदमर्थागमो-
पबुद्धिसमर्थान् पुंसः पुरुषान् दृष्ट्वा वेद एव तरुः तस्य शाखाश्चक्रे ॥ ऋग्यजुःसामादिभेदेन तदवांतरभेदेन च विभक्तवानित्यर्थः ॥ २१ ॥ नरदे-
वत्वमिति ॥ अतः परमष्टादशेऽवतारे सुरकार्यं रावणवधरूपं कर्तुमिच्छया नरदेवत्वं क्षत्रियत्वं प्राप्तः श्रीरामरूपेणावतीर्ण इत्यर्थः समु-

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वा कुपितो निःक्षत्रामकरोन्महीं ॥ २० ॥ ततः सप्तदशे जातः स-
त्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥ २२ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्नाजिनसुतः कीकटे-
षु भविष्यति ॥ २४
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भरं ॥ २३ ॥

द्रविषयको निग्रहः स आदिर्येषां तानि वीर्याणि कर्माणि चक्रे ॥ २२ ॥ एकोनविंशे विंशतिमे चावतारे भगवान् वृष्णिषु यादवेषु रामकृष्णा-
विति जन्मनी रामः बलरामः । कृष्णश्चेति द्वे जन्मनी प्रादुर्भावरूपे प्राप्य भुवो भारमहरत् ॥ रामस्तु एकोनविंशः । कृष्णस्तु विंशतितमोऽवतार
इत्यर्थः । २३ । ततः कलौ युगे संप्रवृत्ते सति सुरद्विषामार्हतानामासुराणां वा संमोहनार्थं भगवान् कीकटेषु जिनस्य सुतो भविष्यति । नाम्ना
बुद्ध इति प्रसिद्धः ॥ अयमेकविंशोऽवतारः ॥ २४ ॥

अथासौ जगत्पतिः भगवान् युगयोः कलिकृतयुगयोः संध्यायां संधौ राजदस्युप्रायेषु चौरप्रायेषु केवलाधर्मबहुलेषु सत्सु तद्वधार्थं विष्णुयशसो जनिता विष्णु॥यशसः पुत्ररूपेणावतरिष्यति ॥ स च नाम्ना कल्किरिति प्रसेत्स्यति ॥ २५ ॥ दिङ्मात्रमेतद्दर्शितमित्यभिप्रायेणाह ॥ अवतारा इति ॥ हे द्विजाः सत्वनिधेः ॥ शुद्धसत्वमूर्तेर्भगवतो निरुद्धादेते वताऽन्येप्यसंख्येयाः स्युः प्रवर्त्तंते ॥ यथाऽविदासिनोऽक्षोभ्यात्सरसः सहस्रशः ॥ कुल्याः स्युः ॥ स्यंदंते तद्वत् ॥ कुल्याः क्षुद्रनद्यः ॥ २६ ॥ केतऽत्यत आह ॥ ऋषय इति ॥ ऋषयो मंत्रद्रष्टारो वसिष्ठाद

अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥ अवतारा ह्यसंख्याता हरेः सत्वनिधेर्द्विजाः ॥ यथाऽविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयः पितरो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ ॥

यो मुनयः ॥ केवलस्वात्मपरमात्मयाथात्म्यमननशीलाः शुकादयः ॥ देवाः इंद्रादयः ॥ मनुपुत्राः प्रियव्रतादयः ॥ महौजसः ॥ महाप्रभावाः ॥ सप्रजापतयः ॥ दक्षादिभिः सहिताः प्रजापतयश्चेत्यर्थः ॥ त एते सर्वे हरेरेव कलाः स्मृताः ॥ भगवदंशेनैव संभूता इत्यर्थः ॥ तथा चोक्तं भगवता ॥ यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवमिति ॥ २७ ॥

एतद्वचनार्थमेवाह । एतइति ॥ एते कृषिप्रभृतयस्तु पुंसो निरुद्धाख्यस्यांशकलाः । स्वांशांशभूताः । कृष्णस्तु भगवान्स्वयमिति श्रीकृष्णस्य पू-
र्णावतारत्वमुक्तं ॥ उपाहृतं भगवद्वचनेन विभूत्यादिमतां जंतूनां ममत्वेन निर्दिष्टश्रीकृष्णस्य स्यतेजोंशसंभवत्वं श्रीकृष्णस्य पूर्णत्वं स्थापि-
तं । अत्रापि भगवानित्यनेन पूर्णषाड्गुण्यत्वमवगतं ॥ यद्वा । अत्रैतदित्यनेन पूर्वोक्तेषु हिरण्यसनकादिषु केषांचिद्वराहनारायणमत्स्य-
कूर्ममोहिनीनृसिंहवामनश्रीरामावताराणां पूर्णत्वेपि । चतुर्विंशत्यायेन सर्वेप्यवताराः परामृश्यंते ॥ तत्र पूर्णत्वं नाम षाड्गुण्यपूर्णत्वेन
रूपेण साक्षात्स्ववतीर्णत्वं । अंशांशसंभूतत्वं तत्तच्छक्तीनां ताराम्यतयावस्थितस्य षाड्गुण्यपूर्णस्य भगवतः ॥ केनाप्यैश्वर्यवीर्यादिगुणा ।

एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥२८॥

लेशेन जीवद्वारा विर्भूतेन विशिष्टतयासंप्रज्ञातत्वम् । निरंशस्य ब्रह्मस्वरूपस्यैकदेशभेदेवाविर्भावासंभवात् ॥ ननु धर्मिस्वरूपैकदेशवा-
चिनोंशशब्दस्य कथं गुणपरत्वमिति चेन्न ॥ अपृथक्सिद्धविशेषणस्यापि अंशशब्दवाच्यत्वाद्विशिष्टवस्त्वेकदेशत्वस्यैवांशपदप्र-
वृत्तिनिमित्तत्वाद्विशिष्टवस्त्वेकदेशत्वं च विशेषणविशेष्ययोरेकदेशतया द्वयोरप्यवशिष्टं वाराहाद्यवताराणां पूर्णत्वं तु तत्तत्सुरा-
णादिभ्य एवावगंतव्यं ॥ सर्वावतारसाधारणं प्रयोजनमुपसंहरति ॥ इंद्रेति । इंद्रारिभिरसुरादिभिर्व्याकुलं तं लोकं युगे प्रतियुगं मृडयं-
ति ॥२८॥

भा॰प्र॰
३८

अवतारकीर्तनादिफलमाह॥ जन्मगुह्यमिति। यः कश्चिन्नरो भगवतः एतज्जन्मगुह्यमवताररहस्यं सायंप्रातः समाहितचित्तो भक्त्या गृ
णन् कीर्तयन् दुःखग्रामाद्विमुच्यते॥ संसारान्मुक्तो भवतीत्यर्थः। जन्मगुह्यमित्यनेन भगवज्जन्मन जीवजन्मवत्कर्ममूलमपि तु स्वसंकल्प
मूलमित्यभिप्रेतं॥ २९॥ तदेवं दर्शयित्वा नरूपप्रसंगात् केवलमवतीर्णमेव रामकृष्णाद्याख्यं भगवतो रूपमपि तु परिदृश्यमानं प्रकृति

जन्म गुह्यं भगवतो य एतत्प्रयतो नरः॥ सायंप्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते॥ २९॥
एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः॥ मायागुणैर्विरचितं महदादिभिरात्मनि॥ ३०॥

गुणवैषम्यमूलमहदादिकृतजगदपि तद्रूपमित्याह॥ एतद्रूपमिति॥ चिदात्मनः ज्ञानस्वरूपस्यात एवारूपस्य भगवतः। मायागुणैर्गु
णपरिणामरूपैर्महदादिभिरात्मन्याधारभूते स्वस्मिन्नेतत्परिदृश्यमानं जगदात्मकं रूपं रचितं। आत्मनीत्यनेन रूपशब्देन जगतो भ
गवद्रूपत्वमुपपादितं। शरीरस्यात्मनाधार्यत्वनियमात्॥ ३०॥

३८

एवंजगदंतर्गतदेवमनुष्यादिशरीराणामपि भगवद्रूपत्वेसति जीवानांकेवलंदेवोहंमनुष्योहमित्यभिमानिनोभ्रमएवेत्याह। यथेति
यथामेघसमूहानभस्याकाशेऽबुद्धिभिराकाशयाथात्म्यविद्भिरारोपिताः। यथा च पृथिव्याः संबंधी रेणुर्धूलिरनिले तद्याथात्म्यविद्भिरारो
पिताः॥ एवमबुद्धिभिः। प्रत्यगात्मविद्भिर्द्रष्टरि जीवे दृश्यत्वमारोपितं देवादिशरीरजातमहंममाभिमानविषयत्वेनारोपितमित्यर्थः। अ
तो न देवादिशरीरजातं जीवस्वरूपमिति भावः। यद्यपि देवादिशरीरस्य तदभिमानिनि जीवे न धार्यत्वात्तं प्रति रूपत्वमस्त्येव। तथा

यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः॥ ३९॥

पि यश्चात्मनि तिष्ठन्यस्यात्मा शरीरमित्याद्युक्तरीत्या जीवस्यापि परमपुरुषधार्यत्वान्मुख्यधारकत्वं परमात्मनीष्टमेवेति तं प्रत्येवा
देवाद्यचेतनजातं मुख्यं रूपं देहात्मनोरुभयोरपि परमपुरुषधार्यत्वमज्ञानं भ्रमरूपं प्रकृतिपुरुषयोरग्रहात्मकत्वं ज्ञानं प्रकृत्या
दात्माभिमानः॥ स्वातंत्र्याभिमानः प्रकृतेः। प्रसंगात्त्वैकधार्यत्वाभिमानश्चाबुद्धिकृत इत्यभिप्रायः॥ ३९॥ ॥ ॥ ॥॥ ॥ ॥॥

न्नवद्रूपमस्यात्मन्यारोपितमस्य स जीवः कीदृशः तत्राह। अत इति। अविद्यात्मकरूपमपरं चान्यत्स्थूलविलक्षणं तत्त्वं स जीवः। परत्वमेव दर्शयितुं विशिनष्टि। अव्यक्तं बाह्येन्द्रियैरीदृशमप्रकाशं। कुतः स्थूलापेक्षायां हेतुरदृष्टाश्रुतवस्तुत्वादिति॥ तत्र हेतुमाह॥ अव्यूढगुणबृंहितमिति व्यूढैर्गुणैर्बहुधा विभक्तैर्गुणैर्बृंहितं। स्थूलीकृतं यन्न भवति। तदव्यूढगुणबृंहितं॥ अनेनाविद्यावृत्तिः कारणदशायामस्थूलमचेत

अतः परं यदव्यक्तमव्यूढगुणबृंहितम्॥ अ
दृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः॥ ३२॥

नं कार्यदशायां हि व्यूढैर्गुणैः सत्त्वादिभिश्चान्वितं स्थूलीभवति न तथेत्यर्थः। अत एवादृष्टाश्रुतवस्तुत्वं॥ तदन्यार्थेन त्र॥ तत्र दृष्टं कार्यावस्थमपि द्रव्यं श्रुतं तु कारणावस्थं॥ अचेतना परार्थाश्च नित्या सततविक्रियेत्यादिशास्त्रैः श्रुतं तदुभयविलक्षणत्वादव्ययत्वं॥ अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यत इति हि भगवता गीयते॥ एवंभूतं यद्वस्तु स जीवः यः पुनर्भवः। प्रकृतिसंगात्पुनः पुनर्जन्मभागि।
त्यर्थः। यत्पुनरिति पाठे यतो यत्संबंधात्पुनर्भवस्ततः परमित्यन्वयः ३२

तर्हि केनोपायेन प्रकृतिसंगमूलकपुनर्भवस्य निवृत्तिः कीदृशं वा निवृत्तपुनर्भवं जीवस्वरूपमित्यत्राह् । यत्रेति । याभ्यां । सदसद्भ्यां कार्य
कारणपरौ । असद्वा इदमग्र आसीत् ततो वै सदजायतेति प्रयोगात् कारणावस्था च स्थूलदृशा । ततश्चायमर्थः । यत्राऽत्मनीमेऽविजितेस
दसद्रूपे उत्पत्तिविनाशाविन्यर्थः ॥ अविद्ययाऽज्ञानेनात्मनि कृते आरोपिते च तस्मिन्नात्मनि स्वसंविदा स्वशरीरकपरमात्मविषयसम्य

यत्रेमे सदसद्रूपे प्रतिसिद्धे स्वसंविदा ॥ अविद्या-
यात्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ ३३ ॥ ॥ ॥ ॥

ग्ज्ञानेन प्रतिषिद्धे निवृत्ते भवतः ॥ अनेन स्वसंविदेव पुनर्भवनिवृत्तिहेतुरिति दर्शितं ॥ इतिशब्दः प्रकारवाची इत्येवंविधं स्वसंविन्निवृत्तो
त्पत्तिविनाशमित्यर्थः ॥ अत एव दर्शनं ज्ञानं प्रकृतिसंगवियुक्तं केवलपरिशुद्धजीवात्मस्वरूपज्ञानं यत्तद्ब्रह्मगुणतो बृहत्वाद्ब्रह्मशब्द
वाच्यं ॥ मुक्तात्मस्वरूपं ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाहमिति मुक्तात्मन्यपि ब्रह्मशब्दप्रयोगो दृश्यते ॥ ३३ ॥ ॥ ॥

भा॰ भ॰

५०

वतीति॥ यद्वियद्वा एषा वैशारदी महदादिकार्यमुखेन विपुला एषा माया तन्मूला मतिरभिमतिः। देहात्माभिमानादिरूपा चोपरता निवृत्ता भव
ति॥ उपरतिरत्र संबंधविरहः। नित्यासततविक्रिया गौरनाद्यंतवतीहि। मायाशब्दवाच्यायाः प्रकृतेर्नित्यत्वावगमेन विनाशायोगात्। एवं स
ति तदेत्यादि॥ तदैव संपन्ने परमात्मप्राप्त्या अभिव्यक्ते स्वस्वकीये महिम्नि गुणाष्टकरूपे मुक्तैश्वर्यात्मके महिम्नि महीयते॥ महत्पूजायां
महत्त्वाद्द्वारकं जंतात्कर्मेत्यात्मने पदं॥ स्वकीये स्वमहिम्नि मुक्तैश्वर्ये संपन्नः तदत्रे लब्ध्वा समृद्धः। महीयत इति निरवशेषत्वेन प्रा-

यद्येषोपरता देवी माया वैशारदी मतिः॥ संप
न्न एवेति विदुर्महिम्नि स्वे महीयते॥ ३४॥ ॥१॥

कृतिसंबंधतत्कार्यनिवृत्ताविर्भूतगुणाष्टकमुक्तः॥ महिम्नलब्ध्या हेतुना परमव्योमवासिभिर्बहुमतो भवतीति विदुः॥ मुक्तात्मस्वरू
पयाथात्म्यविदः॥ यद्वा॥ संपन्न इति प्रथमांततया देहे॥ परब्रह्मानुभवन् परव्योमनिवासिभिर्बहुमतो वर्तिष्टते इत्यर्थः॥ अपहतपाप्म
त्वादिगुणाष्टकमहिम्नः प्रकाश्यंते न जन्यंत इत्यादिशास्त्रेभ्यः स्वाभाविकत्वावगमात्स्वमहिम्नीत्युक्तं भवति॥ ३४॥ ॥१॥ ॥

५०

तदेवं प्रसक्तानुप्रसक्ततया जीवस्वरूपं कथितं ॥ अथ परमप्रस्तुतस्य भगवज्जन्मविलक्षणत्वमाह ॥ एवमिति ॥ अजनजीववत्कर्माय
त्तजनैर्रहितस्याकर्तुस्तथा देवपुण्यपापात्मककर्मरहितस्य हृत्पतेः । हृदयकमलमध्यावस्थानेन पाति सर्वाणि भूतानि नियमयतीति
हृत्पतिः ॥ तस्य सर्वान्तरात्मनो भगवतः ॥ एवमुक्तविधानि जन्मानि कर्माणि कवयो वेदगुह्यानि वर्णयंति ॥ कवयो ज्ञानाधिकाः नमु
ह्याश्चिंतयन्कविरिति प्रयोगात् ॥ वेदगुह्यानि वेदरहस्यानि वर्णयंति ॥ अजायमानो बहुधा विजायते तस्य धीराः परिजानंति योनि

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥

मित्यादिहि वेदस्तास्तयोर्विषयविभागप्रदर्शनपूर्वकं यादृशानि भावयंति तादृशानि वर्णयति ॥ तत्र ह्यजायमान इत्यनेन जीवस्यक
र्मायत्तोत्पत्तिः सेश्वरस्य प्रतिषिध्यते ॥ बहुधा विजायत इत्यनेनाकर्मायत्तस्वसंकल्पमूलाचोत्पत्तिर्बोध्यते ॥ न हिंस्याद्भूतानि पशुमा
लभेतेत्यादिवद्विधिनिषेधयोर्भिन्नविषयत्वावश्यंभावात्तयोरेकविषयत्वे पूर्वोत्तरव्याघातापत्तेः ॥ एवमुत्सर्गापवादसामान्यविशे
षन्यायादिभिर्निर्णीतवाक्यमिममर्थं कवय एव जानंतीत्यभिप्रायेणोक्तं । तस्य धीराः परिजानंति योनिमिति ॥ तस्य प्रस्तुतस्य भगवतो

योनिमयविशेष्यं शारीरं धीराः परिजानंतीति ॥ अकर्मा यतः तत्त्वविच्छोपातत्वाज्जलस्वभाववत्वादिरूपेण धीरा एव जानंतीत्यर्थः ॥ अकर्तुः कर्मा
णि वेदगुह्यानि इत्यनेन विधिनिषेधवारिन्योः निष्क्रियं निष्कलंपस्य चैतत्कर्म सर्वं वेदितव्यम् इत्यादिश्रुत्योरपि कविभिर्निर्णीतत्वात् यो वि
षयविभागो दृष्टव्यः इति सूचितं ॥ इदं सगुणनिर्गुणसशरीराशरीरविकाराविकारजीवब्रह्मभेदाभेदश्रुतिविभागस्याप्युपलक्षणं
एवं च जन्मकर्मगुणशरीरविकारभेदप्रतिपादकानां वेदांतवाक्यानां तत्प्रतिषेधपरैर्वाक्यैर्बाध्यत्वं मृषावादिभिरुक्तमनादरणी
यमिति भावः ॥ तथा चोक्तं । वाल्यैर्वरदगुरुभिर्यद्ब्रह्मणो गुणशरीरविकारभेदकर्मादिगोचरधियः प्रतिषेधवाचः ॥ अन्योन्यभिन्न
विषयान विरोधगंधं धर्ममर्हंति तन्नधियः प्रतिषेधवध्या इति ॥ अकर्तुः कर्माणि वेदगुह्यानि इत्यनेन भगवच्चेष्टितानां ज
गद्व्यापाररूपाणां जीवचेष्टितसजातीयतया चिंतयितुमशक्यानि किंतु तद्वैजात्येन वेदाद्देवावगंतव्यानि ॥ तथैव च कविभिरपि
वर्ण्येतदपि चोक्तं ॥ कवयो वर्णयंतीत्यनेन कवीनां भगवज्जन्मकर्मयाथात्म्यविदां नाममूलतद्वर्णयितृत्वोक्त्या कुबुद्धीनां भग
वज्जन्मकर्मादियाथात्म्यावेदित्वं च सूचितमिति ॥ ३५ ॥

तदेवोपपादयितुं तावद्भगवतस्तच्चेष्टितस्य जीवतच्चेष्टिताभ्यां वैलक्षण्यं दर्शयति। स वा इति सवै भगवानमोघलीलः। अमोघा अवितथा लीला यस्य सः इदं पृथिव्यादिचिदचिदात्मकं जगत् सृजत्यवति रक्षति अत्ति संहरति॥ नचास्मिन् जगति सज्जते च। लीलाशब्देन जगद्व्यापारस्य लीलात्वमुक्तं। अनेन प्राचीनकर्मवासनानुगुणप्रवृत्तबुध्यनुगुणकेवलसुखदुःखाद्यर्थं जीवकर्मव्यावृत्तिः। अमोघपदेन निर्विघ्नसमाप्तिं वदताप्यनेकांतरायोपहतजीवकर्मवैलक्षण्यमुक्तं॥ समुदायेन जीववैलक्षण्यं॥ विश्वं सृजत्यत्यवतीत्यनेन सर्गादिकर्मणः कृत्स्नजगद्विषयकत्वोक्त्या नल्पत्वमवगतं। अनेनाल्पजीवव्यावृत्तिः॥ अस्मिन्न सज्जत इति संगनिषेधेन संगहेतुकरागद्वेषादि

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन्॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः

॥३६॥

राहित्यं लक्ष्यं तेन वैषम्यनैर्घृण्याभावः। एवं च जीवव्यावृत्तिः। किंच। भूतेषु चिदचिदात्मकेषु न हिंस्याद्भूतानीत्यादाविवात्र भूतशब्दश्चेतनसंसृष्टचेतनवाची॥ अंतर्हितः अंतरात्मतया वस्थितोपि भूतैरविज्ञातः इत्यर्थः॥ जीवस्त्वनुमापकैर्लक्षणैर्विज्ञायते इति ततो व्यावृत्तिः॥ आत्मतंत्रः स्वतंत्रः॥ जीवस्तु कार्मकर्मदैवादिपरतंत्रः षड्गुणेशः॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां षण्णां गुणानामीशः। अधिपतिराश्रय इति यावत्॥ जीवस्तु तद्विपरीतगुणाश्रयः। षाड्वर्गिकं षडिंद्रियवेद्यं शब्दादिकं भुंक्ते॥ तेन लीलारसमनुभवति जीवस्तु सुख्यति दुःख्यति मुह्यतिचेति भावः॥३६

भा० टी०

४२

नेति ॥ यतएवमतएवास्य मनसा संकल्पेन वचोभिर्वेदात्मकैश्च नामानि देवमनुष्यादिनामानि रूपाणि देवादिरूपाणि च नटचर्यामिव वितन्व
तः दधतो धातुरीश्वरस्योतीर्गतीः अवतेर्गत्यर्थाः पदवीः प्रकारानिति यावत् निपुणेन भावप्रधानो निर्देशः ॥ नैपुण्येनापि जंतुः नावै
ति नाऽवगच्छति ॥ अत्र वयतो हेतुं वदन् जंतुं विशिनष्टि ॥ कुत्सिता मनीषा बुद्धिर्यस्य शब्दादिविषयासक्तिबुद्धिरज्ञः ॥ अहंममाभिमाना
भ्यासात्मपरमात्मयाथात्म्यानभिज्ञः मनोवचोभिर्नामानि रूपाणि च वितन्वतः ऽस्यत्र मनसा संकल्पेन रूपसृष्टिर्वेदं वचोभिर्नामकल्प।
नमिति विवेकः ॥ नामरूपं च भूतानां कृत्यानां च प्रपंचनं ॥ वेदशब्देभ्य एवादौ देवादीनां चकारसंकलिवचनात् ॥ नटचर्यामिवेति विदधि

न्वा यस्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्या
मिवाज्ञः ॥ ३७ ॥

रा

अतदेवयत्राहित्यं विवक्षितं ॥ यद्वा नटचर्यामिव नटो यथा विचित्रवेषानुपादत्ते ॥ तद्वद्रूपाणि मत्स्यकूर्मादीनि तन्नामानि च संतन्वतः
विश्वतः धातुर्जगत्स्रष्टुरीश्वरस्योतीर्गतीर्जंतुर्मनसा वचोभिश्च निपुणेन तत्र नैपुण्येन च नावैतीत्यर्थः ॥ अत्र पक्षे नटचर्यामिवेति दृष्टां
तेनेदं विवक्षितं ॥ नटस्यानेकवेषपरिग्रहेपि यथा स्वस्वभावात्यागः ॥ वेषाणां चेष्टामूलं तं चर्यायाश्च लीलात्वं तद्वदस्यादस्यापीति
कुमनीषो भवाऽज्ञो जंतुर्नावैति ऽस्यनेन शब्दादिषु विरक्तः स्वात्मपरमात्मयाथात्म्यमननशीलस्त्ववैतीति सूचितं ॥ ३७ ॥ ॥ ॥

तदेवाह सेति। यः पुमानमायया गुणकामादिरहितया संततया अनुवृत्त्या दुरंतवीर्यस्य पारवीर्यस्य रथांगपाणे रनुवृत्त्या सेवया तस्य रथांगपाणेः पादसरोजगंधं भजेतानुभवेत्। स धातुः रथांगपाणेः पदवीं वेद जानाति। तथा चोक्तं भगवता। भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेति। ३८। एवं मयोपपादितं भगवदवतारादिरहस्यमनायिकाविच्छिन्नभगवद्भक्तियोगनिष्ठा एव जानंत्येवात्र न विप्रतिपत्तिरिति सूचयितुं श्रोतृणां शौनकादीनां कृतार्थतां सहेतुकामाविःकरोति। अथेति। भगवंत इत्थं

स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः। यो मायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधम्। ३८। अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे। कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः। ३९।

बोधनं। यूयमित्यध्याहारः। यद्वा हे मुनयः भगवंतः पूज्या भवंतः। धन्याः कृतार्थाः। कुतः। हि यस्मादिह लोकेऽखिललोकनाथे वासुदेवे सर्वात्मकं करणत्रयेणापीत्यर्थः। सर्वात्मक इति पाठे सर्वस्यात्मनि सर्वशरीरके चेति वासुदेवविशेषणं। आत्मभावं भावः योगः आत्मनो भावः आत्मकर्तृकः। सर्वात्मन इति पाठे आत्मना मनसा यो भावो भक्तिस्तं कुर्वंति। ततो धन्या इत्यर्थः। कथं भक्तियोगमात्रकर्तृकत्वेन धन्यत्वमित्यपेक्षायामात्मभावं विशिनष्टि। यत्र यस्मिन्नात्मभावे उग्रः गर्भजन्मजरामरणादिदुःखहेतुत्वेन घोरः परिवर्तः संसारपरिवृत्तिर्भूयो न भवति। ३९।

तदेवं तु समाप्ते कांडे ततः श्रेयस्त्वन्नः शंसितुमर्हसीत्यादीनां शौनकादिप्रश्नानां संग्रहेणोत्तरमभिधायाथैतच्छ्रावयिषितभागवताख्य
पुराणमुखेन तान्येव विस्तरतः प्रतिपिपादयिषुस्तावदेतत्पुराणनिर्माणप्रकारं निर्मातुर्बादरायणस्य निर्माणप्रवृत्तिनिमित्तस्य पुनः
शुकं प्रत्यध्यापनं तेनाधीतस्य राज्ञे श्रावणं च सहेतुकं शृष्टमवसरप्रदानाय भगवान् बादरायणस्त्विदं पुराणं निर्माय पुत्रमध्यापयत्
तन्मुखेन प्रवर्तयामास ॥ तदेतत्तन्मुखेनाधिगतमिदं पुराणं वः श्रावयिष्यामीत्याह सूतः ॥ इदमिति ॥ इदं भागवतमिति प्रसिद्धं
पुराणं ब्रह्मसंमितं । ब्रह्मणा वेदेन संमितं समीकृतं वेदतुल्यमित्यर्थः ॥ यद्वा । ब्रह्म परं ब्रह्म तत्सम्यङ्मीयतेऽनेनेति ब्रह्मसंमितं

इदं भागवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥

वाहुलकात्करणे क्तः । परं ब्रह्मप्रमापकमित्यर्थः ॥ यद्वा सम्यक् मीयते प्रमीयते इति कर्मण्येव क्तः ॥ ब्रह्मसंमितं यस्मात्तद्ब्रह्मसंमितं । संपू
र्वादिणतो विल्वस्माद्वा कर्मणि क्तः ॥ ङमो ह्रस्वादचि ङमुन्नित्यमिति ङमुडागमः ॥ ब्रह्म सम्यगिवमवगतं येन यस्माद्वा तद्ब्रह्मसमि
ते ॥ तत्त्वेऽपि तु वरं न विशिनष्टि । उत्तमश्लोकस्य भगवतश्चरिते चरितप्रतिपादकं प्रतिपाद्यप्रतिपादकयोरभेदविवक्षयोत्तमश्लोकचरि
तमित्युक्तं ॥ एवंविधं पुराणं भगवानृषिर्निखिलनिगमद्रष्टा व्यासश्चकार ॥ ४० ॥ ॥ ॥ ॥ ॥

किमर्थं लोकस्य अपण्डितो जनस्य निःश्रेयसार्थं तदेव दर्शयितुं विशिनष्टि। धन्यं सम्यग्ज्ञानजननद्वारा कृतार्थत्वावहं स्वस्त्ययनं मंगलास्पदं प
वित्राणां पवित्रं यो मंगलानां च मंगलमित्युक्तरीत्या निरतिशयमंगलावहं भगवत्स्वरूपप्रतिपादकत्वेन मंगलास्पदमित्यर्थः। त
देकविधमिदं पुराणमात्मवतां ज्ञानिनां श्रेष्ठं सुतं श्रीशुकं ग्राहयामास अध्यापयामास॥ ४०॥ पुराणमेव विशिनष्टि॥ सर्वेषां पूर्वोत्तरभागा
त्मकानां वेदानां इतिहासानां च सारं सारं समुद्धृतं। एतत्पुराणरूपेणेति शेषः। सारं सारांशः। समीचीनन्यायैः परिष्कृतोऽर्थ इति यावत्। सा

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्॥ तदिदं ग्राहयामास सुतमात्मवतां वरम्॥ ४०॥ स
र्ववेदेतिहासानां सारं सारं समुद्धृतं। स तु संश्रावयामास महाराजं परीक्षितम्॥ ४१॥ प्रायोपविष्टं
गंगायां परीतं परमर्षिभिः॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः॥ ४२॥ ॥ ॥ ॥

रं सारं समुद्धृतमित्यनेन वेदेतिहासादिसिद्धस्यार्थशरीरस्य क्रमविशेषनिवेशनं वेदाद्यर्थपरिष्करणं च व्यासबुद्ध्यधीनमित्यवगम्यते। स
त्वधीतैतत्पुराणः शुकस्तु परीक्षितं महाराजमिदं संश्रावयामास। श्रणोतेः शब्दकर्मणो ण्यन्ते कर्तुः परीक्षितो णौ गतिबुद्धीति कर्मसंज्ञा
यां द्वितीया। एवं ग्राहयामास सुतमित्यत्रापि तत्र ग्रहेरपि शब्दकर्मकत्वात्॥ ४१॥ परीक्षितं कथंभूतं गंगायां प्रायोपविष्टमनशनव्रतदीक्षितम्
षिभिः परीतं परिवेष्टितं। तत्र परीक्षितः संनिधौ भूरितेजसो विप्रर्षेः शुकस्य कीर्तयतः श्रावयतः सतः॥ हे विप्राः॥ ४२॥ ॥ ॥

भा० प्र०
४४

अहमिति। तत्र निविष्टोऽहं तदनुग्रहात्कृपया अध्यगमम् अधिगतवानस्मि पुराणमिति। गमेर्लृदित्वादङ्। अध्यगममिति रूपं सत्तदनुग्र-
हादधिगतेन तेन सोऽहं च यथाधीतं यथावदधीतं। यद्वा अधीतमिति भावे क्तः॥ यथाध्ययनमध्ययनमनतिक्रम्याध्ययनानुसारेणेत्य-
र्थः। यथामति श्रावयिष्यामि। यथामतीत्यनेन पुराणस्य दुरवबोधत्वं सूच्यते॥४४॥ पुराणंसोति॥ कृष्णे इति॥ कृष्णे भगवति धर्मज्ञा

अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्॥ सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति॥४४॥ कृ-
ष्णे स्वधामोपगते धर्मज्ञानादिभिः सह। कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः॥४५॥
इति श्रीभागवते महापुराणे प्रथमस्कन्धे तृतीयोऽध्यायः॥३॥ ॥ ॥

नादिभिः सह स्वधाम स्वलोकं गतवति सत्यत एव कलौ युगे नष्टदृशां नष्टप्रज्ञानां जनानां दृष्टिप्रदानक्षम एव एव पुराणरूपोऽर्कः सूर्यो-
ऽधुनोदितः। यथा रात्रौ नष्टदृष्टीनामर्कोदये सति दृष्टिः स्वविषयग्रहणसमर्था भवत्येवं रात्रिरूपे कलौ नष्टप्रज्ञानां पुरेतरेतत्पु-
राणार्कोदयेन प्रज्ञा प्रवर्तत इत्यर्थः॥४५॥ इति प्रथमे तृतीयः॥३॥

४४

४

चतुर्थः

भा॰ टी॰

॥१॥

श्रीरामानुजाय नमः॥ तृतीये स्वायंभुवस्य च मनोर्वंशः परमसंमत इति स्वायंभुवचरितं तत्संततीश्च एतत्स्वायंभुवचरितमभिधाय एतत्ते॥ आदिराजस्य मनोश्चरितमद्भुतम्॥ वर्णितं वर्णनीयस्य तदपत्योदयं श्रृणु इति तत्संततिकथनं प्रतिज्ञाय तावदेव हूतिसंततिं प्रक्रम्य कलानस्याद्दयोन वपुत्रिकाः कपिलाख्यः पुत्रस्तच्चरितमित्येतानि कथितानि इदानीमस्मिन्स्कंधे मनुपुत्रस्योत्तानपदः संततिं विस्तरेणवक्ष्यमाणस्तत्रादौ आकूतिप्रसूत्योर्वंशं देवहूतिदुहितृसंततिं चाह मैत्रेयः मैत्र उ मनोस्त्विति॥ हे सुव्रत विदुर आकूत्याद्यास्तिस्रः कन्याः मनोः स्वायंभुवात् जायायाः शतरूपायाः जज्ञिरे च कारात्तेद्वौ पुत्रौ च जज्ञाते इत्यर्थः॥ मैत्रेय उ॥ तुग्रादो रम्यापि पुत्रलाभः स्यादिति तत्त्वदर्शयितुमाह॥ आकूतिमिति॥ नृपो मनुः आत्ममती प्रियव्रतो

श्रीयज्ञपुरुषाय नमः॥ मैत्रेय उवाच॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सुव्रतः॥ १॥ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः॥ पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः॥ २॥ प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत्॥ मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना॥ ३॥ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक्॥ या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी॥ ४॥

उत्तानपादभ्रातृमतीमपि स्वदुहितरमाकूतिं पुत्रिकाधर्ममाश्रित्य अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति भाषाबंधनपूर्वकप्रदानं पुत्रिकाधर्ममाश्रित्य पुत्रवात्सल्यकामउक्तभाषाबंधनं कृत्वा रुचये प्रादात्तदह तवान्॥ २॥ स लब्धभार्यो ब्रह्मतेजस्वी ब्रह्मवर्चोचितधर्मानुष्ठानजनिततेजोविशेषवउक्तः भगवान्प्रजापतिः रुचिः सर्वोत्कृष्टेन समाधिना भगवंतमाराध्य तस्यामाकूत्यां मिथुनं स्त्रीपुंमिथुनं अजीजनत उत्पादयामास॥ ३॥ किं तन्मिथुनं यदजीजनत्तदाह यस्तयोरिति॥ तयोरपत्ययोर्मध्ये यः पुरुषः स यज्ञः कृतवस्तएवस्वं स्वीयं रूपं शरीरं तद्बिभर्तीति तथा साक्षाद्विष्णुः विष्णोरंशः अयमपि कपिलवंशावतारः यज्ञस्वरूपभृदित्यनेन यज्ञनामत्वं सूचितं॥ तयोर्या स्त्री सा

॥१॥

॥ ६ ॥ तानाह तोषइति ॥ तोषादयो द्विषट् द्वादश पुत्राः सर्वे तुषिता नाम तुषिता इति प्रसिद्धाः परस्परं तुष्टाभ्यां पित्रभ्यां जातत्वादिति भावः ते तुषिताः ॥ ५ ॥

स्वायंभुवो मनुर्मुदा युक्तः मिथुनजन्मनिमित्तहर्षयुक्तः स्वपुत्र्याः आकूत्याः पुत्रं वितततेजस्कं विष्णुं संभृतं पूर्वकृतभाषाबंधनाद्धेतोः स्वगृहं प्रति आनिन्ये आनीतवान् रुचिस्तु दक्षिणां स्वकन्यां जग्राह ॥ पुत्रिकामेव पुत्रत्वेनापालयदित्यर्थः ॥ ५ ॥ कामयानां पतिं कामयमानां तां दक्षिणां यजुषां ज्ञानानां मंत्राणां वा पतिर्यज्ञरूपो भगवान् उवाह ॥ पश्चात् तुष्टायां तस्यां स्मिन् प्रीतियुक्तायां दक्षिणायां स्वयमपि प्रीतियुक्तः द्वादश पुत्रानजनयत ॥ अत एव तुष्टयोरभवन्देवा द्वादशैते महाबला इति पाठांतरं तदा तुष्टयोः परस्परसंतोषयुक्तयोर्यज्ञदक्षिणयोर्द्वादश पुत्रा अभवन्नित्यर्थः देवाः मरीचिप्रमुखास्तनयाः ॥ ऋषयः सुरगणेश्वरो यज्ञश्च स्वायंभुवमन्वंतरे आसन् स्वस्वसंतानव

आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषं ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणां ॥ ४ ॥ तां कामयानां भगवानुवाह यजुषां पतिः ॥ तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥ ६ ॥ तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः ॥ इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ॥ ७ ॥ तुषिता नाम ते देवा आसन्स्वायंभुवांतरे मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ ॥ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदंतरम् ॥ ९ ॥ ० ॥

र्द्धनेन लोकमर्यादापालनेन चासन् ॥ अनेन स्वायंभुवमन्वंतरगतं षट्कं कथितं मन्वंतरं मनुर्देवा मनुपुत्रा महौजसः ॥ ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते इति हि विष्णुपुराणे तत्र स्वायंभुवो मनुः तुषिता देवाः मरीचिमुख्या ऋषयः यज्ञो हरेरवतारः स एव सुरगणेश्वर इंद्रः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं व्याप्तं पालितं च तन्मन्वंतरमित्यर्थः ॥ ९ ॥ एवमाकूतिसंततिः कथिता अथ देवहूतिदुहितृसंततिं कथयिष्यन् देवहूतिचरित्रं तु विस्तरेणोक्त

भा.स्कं.

॥ २ ॥

तीयेत्वयाश्रुतमित्याह ॥ देवहूतिमिति ॥ तत्संबंधि चरितम् ॥ गदतो मम मत्तः भवता श्रुतप्रायं बाहुल्येन श्रुतत्वादिति भावः ॥ १० ॥ प्रसूतिसं
ततिस्तु तद्वंशानुप्रसंगेन महता प्रबंधेन कथनीयेति सापि पश्चाद्वक्ष्यत इति अभिप्रायेणात्र संगृह्णाति ॥ दक्षायेति ॥ यत्कृतः दा
क्षप्रसूतिभ्यां कृतः सर्गः त्रिलोक्यां महान् विततः ॥ आकूत्यादिसंततसंपेक्ष्य याप्रसूतिसंततेर्वैपुल्यमनेन कथितं ॥ ११ ॥ अथ देवहूतिर
दुहितृसंततिरुच्यत इत्याह ॥ या इति ॥ हे क्षत्तः कर्दमस्य सुताः कलादयो मरीच्यादीनां यत्नयः पत्न्यः याः उक्ताः ॥ तासां कर्दमसु

देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबंधि श्रुतप्रायं भवता गदतो मम ॥ १० ॥ दक्षाय ब्र
ह्मपुत्राय प्रसूतिं भगवान्मनुः ॥ प्रायच्छद्यत्कृतः सर्गः त्रिलोक्यां विततो महान् ॥ ११ ॥ याः
कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥ १२ ॥
पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा ॥ कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥ पूर्णि
मासूत विरजं विश्वगं च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥ १४ ॥

सुतानां प्रसूतेः प्रसवं पुत्रपौत्रादिसंतानविस्तरं मे मया प्रोच्यमानं कथ्यमानं कथ्यमानं निबोधः ॥ १२ ॥ तदेवाह ॥ पत्नीति ॥ कर्दम
स्य सुता मरीचेः पत्नी कला नाम्नी कश्यपं पूर्णिमानं च द्वौ पुत्रौ सुषुवे ॥ तौ विशिनष्टि ॥ ययोः कश्यपपूर्णिम्नोर्वंशजैर्जगदापूरितं बभूव
१३ ॥ हे तत्र पूर्णिमा मरीचिपुत्रः विरजं विश्वगं च पुत्रं देवकुल्याकन्यां च असूत उत्पादयामास देवकुल्यां विशिनष्टि हरेर्भगवतः
पादशौचात् पादक्षालनाद्या दिवः सरिद्गंगा अभूत् सैव यं देवकुल्या दिवः सरिदभिमानिनी देवता सर्वं ॥ १४ ॥

॥ २ ॥

अत्रेर्यपत्नी अनसूया कर्दमस्य दुहिता सा सुयशसः निर्मलकीर्तिसंपन्नान् त्रीन् सुतान् जज्ञे तानाह ॥ दत्तमित्यादिना ॥ तान्विशिनष्टि ॥ आत्मेशब्रह्मसंभवान् ॥ आत्मा परमात्मा विष्णुः ईशो रुद्रः ब्रह्मा चतुर्मुखः तेभ्यः संभवान् तदंशभूतानित्यर्थः यद्वा आत्मेशब्रह्मणां संभवोऽभिव्यक्तिर्येषु तान् ॥ ननु परमात्मनः सर्वान्तर्यामिणो जीवधाम्न ज्ञानशक्त्याद्यमेयानन्तगुणविशिष्टविग्रहरूपांशावतारत्वं जन्म कथं पुनः परमात्मांशभूतयोर्गुणस्वरूपयोर्विष्णुब्रह्मरुद्रयोः पुनर्जीवान्तरानुप्रवेशरूपांशावतारत्वं समसं ॥ अविद्याकर्मसंज्ञान्यात् तृतीया शक्तिरिष्यते ॥ यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ॥ संसारतापानखिलान् वाप्नोत्यत्र संततान् ॥ तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते इत्युक्तरीत्या जीवस्य यद्धर्मभूतं ज्ञानं तत् हविद्याकर्मणा तिरोहितं सत् तारतम्येनावतिष्ठते तत्र परमात्मप्र

अत्रेः पत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥१५॥

सादाद्विद्यारूप्यावरणस्य निवृत्त्या वसंकोचेन प्रसृतं भवति ॥ अत एव मुक्तौ निःशेषस्यावरणनिवृत्तौ स चानंत्याय कल्पते इति धर्मभूतज्ञानस्यासंकोचेन प्रसरणं मुक्तजीवस्य श्रुतम् ॥ सचित्तं च प्रदीपवद्द्वावेशस्तथा हि दर्शयतीति ॥ अणोरप्यात्मन एकदेहस्थितस्याप्यसंकुचितस्वधर्मभूतज्ञानद्वारा स्वल्पपरिमाणस्यापि दीपस्य स्वधर्मभूतप्रभाद्वारेणानेकघटपटादिप्रकाशकत्ववदनेकशरीरपरिग्रह इति भावार्थः एवं च ब्रह्मरुद्रयोः परमपुरुषप्रसादाज्ज्ञानावरणनिवृत्त्या वस्त्राद्यपेतया ज्ञानप्रसरवाहुल्यात् तद्धर्मभूतज्ञानस्य दुर्वाससोमयोरनुप्रवेशात् तदंशावतारत्वं तयोरुपपद्यं एवमन्यत्रापि यत्र क्वचिज्जीवस्य जीवान्तरांशत्वमुच्यते तत्रायमेव न्यायो वेदितव्यः ॥१५॥

भा॰ च॰

॥३॥

एवं स्वायंभुवीनामात्मजानां प्रसूतिरुक्ता तत्रात्रेर्गृहे त्रिमूर्त्यवतरणे संभवासंभवत्कारणं पृच्छति विदुरः ॥ अत्रेरिति स्थित्यादिकर्तारः सुर
श्रेष्ठाः आत्मानत्रयः अत्रेर्गृहे किंचिच्चिकीर्षवः किं कर्तुमिच्छवो जाताः एतज्जन्मनः प्रयोजनं हे गुरो मे मह्यमाख्याहि कथय ॥१६॥ तत्र निमित्तं क
थयन्नाह ॥ ब्रह्मणेति ॥ ब्रह्मणा चतुर्मुखेन स्वरूपेणानिमित्तं भक्तानां सृष्ट्यर्थं मिमर्यः चोदित आदिष्टः ब्रह्मविदग्रेसरोऽत्रिः पत्न्या अनुसूय
या सह ऋक्षनामकं कुलाचलं तं तत्र पर्वते तपस्थितुं स्थितः आस्थितः ॥१७॥ स च मुनिस्तस्मिन्कुलाद्रौ प्रसूनानां स्तबकाः येषु पलाशाशोकेषु तेषु

विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गु
रो ॥१६॥ मैत्रेय उवाच ॥ ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः ॥ सह पत्न्या ययावृक्षं कुलाद्रिं
तपसि स्थितः ॥१७॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्या
याः समंततः ॥१८॥ प्राणायामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः ॥१९॥ श
रणं तं प्रपद्येहं य एव जगदीश्वरः ॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् ॥२०॥ तप्यमानं त्रिभुवनं प्राणायामे

कानने निर्विंध्याख्याया नद्याः स्रवद्भिर्वारिभिः समंतादुद्घुष्टे नादिते ॥१८॥ प्राणायामेन मनो नियम्य शीतोष्णादिसहः वायुभक्षः संवत्स
रशतमेकपादेन भुवमवष्टभ्य तप आतिष्ठत् ॥१९॥ तस्माद्धेरभिसंधिविशेषमाह ॥ शरणमिति ॥ य एव यतो वा इमानि भूतानि जा
यंत इत्यादिश्रुतिप्रसिद्ध एव जगदीश्वरः जगत्सृष्टिस्थितिप्रलयवर्तकः तं शरणमहं प्रपद्ये मह्यमात्मसमां स्वतुल्यां प्रजां प्रयच्छ॰
त्विति चिंतयन् अतिष्ठदिति पूर्वेणान्वयः ॥२०॥ प्राणायाम एवैधः तस्मादग्निर्निचयो यस्मात्तेन मुनेरत्र मूर्ध्नः शीर्षकपालान्निर्गतेना॰

ग्निना तपोऽग्निना संतप्यमानं त्रैलोक्यं समीक्ष्य त्रयः
॥४९॥ धूमाग्निना ॥२१॥ आत्मशब्दस्थाणा प्रभवः
॥३॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः

आसते मुनिप्रभृतिभिः प्रस्तूयमानकीर्त्तयमानकीर्त्तयः तदाश्रमस्थानं ययुः अत्र एव जगदीश्वरस्तं शरणं प्रपद्यद्भिः सृष्टिस्थितिप्रलयप्र
वर्त्तकत्वेनाकारेण परमात्मनउपासितत्वात्तस्य ब्रह्मरुद्रांतर्यामितया नाद्रूपेण सृष्टिसंहारकारणत्वात्तयोर्ब्रह्मरुद्रयोरपि तत्रागमन
मुपपन्नमिति विवेकितव्यं ॥२२॥ तेषामात्मेशाब्रह्मणामाविर्भावः प्राक्कथ्यंतस्य संयोगः सान्निध्यं तेन विद्याति मनो यस्य स मुनिरत्रिरेकपादे
नोतिष्ठन्‌ विबुधश्रेष्ठानात्मेशाब्रह्मणो ददर्श ॥२३॥ ननाम मेदंडवत्प्रणम्य ॥ अर्घ्यं तेऽसृजते अनेननिःसृष्टं पुष्पादिकमलं जलौघ

अथ समेतो मुनिर्गंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाश्रमपदं ययौ ॥२२॥ तत्प्रादुर्भावसंयोग
विद्योतितमना मुनिः ॥ उत्तिष्ठन्नेकपादेन ददृशो विबुधर्षभान्‌ ॥२३॥ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांज
लिः ॥ वृषहंसमुपर्णस्थान्‌ स्वैः स्वैः चिह्नैश्च चिह्नितान्‌ ॥२४॥ कृपावलोकेन हसद्वदनेनोपलंभितान्‌ ॥ तद्रोचि
षा प्रतिहते निमील्य मुनिरक्षिणी ॥२५॥ चेतस्तत्प्रवणं युंजन्‌ स्तावीत्संहतांजलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्व

स्य सर्वान्‌ तत्प्रेम समीपे स्थितानुष्टाव ॥ एतदेव प्रपंचयति गरुडवृषभहंसानस्वैः स्वैश्चिह्नैः शंखचक्रत्रिशूलकमंडल्वादिभिर्लक्षि
तान्‌ ॥२४॥ कृपया अवलोको यस्मिन्‌ हसच्च तद्वदनं च तेन उपलंभितान्‌ प्रसन्नत्वेन ज्ञापितान्‌ तेषां शोचिषा दीप्त्या प्रतिहते अक्षि
णी नेत्रे निमील्य ॥२५॥ चेतश्चित्तं तत्प्रवणं विबुधर्षभासक्तं कृत्वा सर्वद्धांजलिः सन्‌ मुनिरत्रिर्मधुरया वाचा सर्वलोके भ्यः श्रेष्ठान्‌
विबुधर्षभानस्तावीत्‌ स्तुतवान्‌ ॥२६॥ स्तुतिमेवाह ॥ विश्वेति द्वाभ्यां ॥ विश्वस्योद्भवादिषु निमित्तं भक्ते पुविश्वसर्गाद्यर्थं मितमर्थः अनु

भा॰ द्वि॰

॥४॥

युगं प्रति कल्पं विभज्यमानैर्मायागुणैरजस्सत्वतमोभिरुपलक्षिता गृहीता देहा यैस्ते यूयं ब्रह्मविष्णुगिरीशाः अतस्तेभ्यो वः युष्मभ्यं प्रणतो ऽस्मि युष्माकं मध्ये एक एव भगवान् जगदीश्वर उपहूतः शरणं तं प्रपद्ये इत्येक एव निर्दिष्टस्त्वात्मा एव युष्मासु कतम इति युष्माभिरेव कथनी यमस्मर्थः ॥२७॥ एन देव प्रपंचयति ॥ एक इति ॥ प्रधानं सर्वोत्कृष्ट एव भगवानसर्वेश्वरः विविधैरुपचारैर्मया प्रजननाय सर्वेश्वरतुल्यपु

अत्रिरुवाच ॥ विम्बोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरिशाः प्रणतो स्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः ॥२७॥ एको मयेह भगवान् विविधप्रधानैः चित्तीकृतः प्रजननाय क येनुपूयम ॥ अत्रागतास्तनुभृतां मनसोपि दूराद्ब्रूत प्रसीदत महानिह विस्मयो मे ॥२८॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥२९॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्रस्याय चित्तीकृतः चित्तविषयीकृतः उपासित इत्यावत् ॥ अतस्तनुभृतां देहिनां मनसोपि दूरात् मनसापि ग्रहीतुमशक्या यूयं त्रयोपि कथमत्रागताः तत्र कारणं ब्रूत कथयत प्रसीदत मह्यं प्रसन्ना भवतः ॥ अत्र त्रयाणामागमेनेन मम महान् विस्मयो वर्त्तते २८ ॥ इत्येवं तस्यात्रेर्वचः श्रुत्वा त्रयो ब्रह्मविष्णुशिवाः प्रहस्य श्लक्ष्णया गंभीरया वाचा हे प्रभो विशेषेंद्रियविदुर तमृषिं अत्रिं प्रत्याहुः ॥२९॥

॥४॥

डिकिमेवाह ॥ नैतन्मायया ब्रह्मतः संकल्पस्तेनैव तथा भाव्यं नान्यथा सतः सत्संकल्पस्य तेसंकल्पः कथमेकस्मिन् ध्याते त्रयः आगतास्तत्राहुः हे
ब्रह्मन् त्वं यदेकं जगदीश्वरमव्ययं नित्यं ध्यायसि तदयं तदेव तत्त्वं सद्वारकं मद्वारकं च त्रिमूर्त्तिरूपेणावस्थितमित्यर्थः मूर्त्तिविशेषनिर्धारण
मंतरेण जगत्सृष्टिस्थितिलयहेतुरीश्वरो ईश्वर इति तत्संकल्पः अतो वयमागता इत्यभिप्रायः ननु यद्वै ध्यायसि ते वयमिमनेन त्रिमूर्
तैं कथं प्रतीयते ॥ मममैकत्वमस्त्येव ननतः किं ॥ ब्रह्मशिवयोर्भगवत्सारतं यममस्मिन् पुराणे पूर्वापर्यं ये श्रूयमाणं विरुध्यत इति चेत् नः
सर्वगत्वादनंतस्य समवाहमवस्थितः यतः सर्वमहं सर्वमपि सर्वं समानानन इति च ब्रह्मात्मकत्ववृध्या चतुर्मुखशिवयोरभेदस्य बृह
तोपपत्तेः तथाहि नयो ब्रह्मात्मकत्वं स्फुरमुच्यते महाभारते तनवा नराणां मम च ये चान्ये देहिसंज्ञिताः सर्वेषां साक्षिभूतोसौ न ग्राह्यः के

दे वा ऊचुः यथा ह्रतस्ते संकल्पो भाव्यं तेनैव नान्यया ॥ सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयम् ॥३१॥

न विरुद्धं चिदिति ॥ मद्वारकं अमद्वारकं चावस्थितं तत्त्वयैव वयमित्यर्थः अत्रेदमवधेयम् ॥ यद्यपि क्वचित्क्वचित् ब्रह्मनारायणाः शिवस्व
नारायणाः ब्रह्मा नारायणो द्वैसौ कल्पादौ भगवान् यथा प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकं ततः स भगवान् विष्णु रुद्ररूपधरो
व्ययः ततः कल्पाग्निरुद्रोसौ भूत्वा सर्वं हरो हरिः सर्वं स्वयमिमं तत्कारणीं ब्रह्मविष्णुशिवात्मिकां संज्ञां संयाति भगवानेक एव जनार्दन इत्या
दि पुरुविषतैं कं प्रतीयते तथापि नारायणाद् ब्रह्मा जायते नारायणाद् रुद्रो जायते नारायणाद्धादशादित्या रुद्रा वसवः सर्वाणि छंदांसि
एको ह वै नारायण आसीन्न ब्रह्मा नेशानः यश्चाभिपद्मादभवन्महात्मा प्रजापतिः तत्र ब्रह्मा चतुर्मुखो जायत सोऽग्रे भूतानां
सृष्टुमक्रम अशेषं त्रिशिरस्कं त्रिपादं सर्वदं परमेशं ब्रह्मादरसादयः कालस्तथैवाखिलजंतवः विभूतयो हरेरेता जगतः ॥ इति हि

भा॰च॰
॥ ५ ॥

तदवतारित्वाद्भगवतस्तयोरभेदावगमात्सामानाधिकरण्यमप्यदुष्टं ततः करिष्यामि त्वामाविश्य प्रजायते ॥ हरो हरतीति तद्वाश्चाइत्याधानुगुर
णेनातयोर्भिन्नेनाप्युपपत्तेरभेदो न युक्तः ननेवमपि ब्रह्मविष्णुरुद्रेन्द्राः सर्वे संप्रसूयन्ते इति ब्रह्माद्युविशेषणाविष्णोरप्युत्पत्तिश्रवणा
त्त्रिमूर्तीनां तेषां तारतम्येऽप्यन्तरे दैवंत्रिमूर्त्या कारणावस्थितमिति ॥ मैवं ॥ सद्देवेत्यादिवाक्येषु कंवो क्यासर्ववाक्यं सावधारणमि
मित्याया द्युस्तावधारणेषु प्रत्येकमेकस्यैवव्यतिरिक्तसमस्तकारणत्वबोधनात्समुच्चितस्यकारणत्वानुपपत्तेः चिद्विशेषासाधारण
ब्रह्मरुद्रेन्द्रदेवेष्वानवादिपरत्वात्मानां पुरेवादप्रसिद्धेन्द्रादीनां कार्यत्वकर्मवश्यत्वयोः श्रुतिप्रतिपन्नत्वात् तद्वाचिनां तेषां विशेष्य

अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः ॥ भवितारोंगभद्रंते विस्रप्स्यंति च ते यशः ॥ ३१ ॥
एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्वराः ॥ सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः ॥ ३२ ॥

यवश्यापकत्वाद्युपपत्तेः ॥ श्रीपतेरसाधारणपुरुषनारायणपरत्वात्स्य कुत्रापि कर्मवश्यत्वाश्रवणात् तदुत्पत्तिश्रुतिश्च अजायमा
नो बहुधा विजायत इति श्रुत्यवतारत्वस्य श्रवणेन कर्मकृतत्वस्यापादितत्वादितरोत्पत्तेस्तद्रूपवादाभावात् तस्य सर्वकारणत्वोप
पत्तेस्तस्य सकलजगत्कारणत्वबोधकश्रुत्यैकार्थ्यान्नारायणस्यैव सर्वोत्कृष्टत्वमेष्टव्यमित्यन्यत्र विस्तरः ॥ ३० ॥ अथ हे मुने
अस्मदंशेन संभूताः सुता लोकविश्रुता भविष्यंति ते तव यशः विस्रप्स्यंति विस्तृतं करिष्यंति ते भद्रमस्तु ॥ ३१ ॥ एवमभीष्टं वरं दत्वा
तयोर्दंपत्योः अन्यनमस्ययोः सम्यग्द्विषतोः पश्यतोः सतोः सम्यक्पूजिताः सुरेश्वराः प्रतिजग्मुः ॥ ३२ ॥

॥ ५ ॥

ततो ब्रह्मणश्चतुर्मुखस्यांशेन सोमो विष्णोरंशेन दत्तात्रेयः शंभोरंशेन दुर्वासाश्चजातः अथांगिरसः अंगिरस उत्पन्नाः प्रजा मया
कथ्यमानाः शृणु ॥३३॥ अंगिरसपत्नी श्रद्धाख्या कर्दमस्य तृतीया दुहिता चतस्रः कन्यकाः अलतवतीकन्याः निर्दिशति
३४ ॥ अपरावपि तनुजौ अंगिरसः पुत्रौ उतथ्यः बृहस्पतिरिति ख्यातौ प्रसिद्धौ स्वारोचिषे मन्वंतरे अस्तां भगवान्ब्रह्मिष्ठः

सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ॥ दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥३३॥
श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः ॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥३४॥ तत्पुत्रा
वपरावास्तां ख्यातौ स्वारोचिषेंतरे ॥ उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ॥३५॥ पुलस्त्यो
जनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥ सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥३६॥
तस्य यक्षपतिर्देवः कुबेरस्त्विलविलासुतः ॥ रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ॥३७॥

निपुत्रद्वयविशेषणानि ॥३५॥ पुलस्त्यः पत्न्यां स्वभार्यायां हविर्भुगाख्यायां कर्दमस्य चतुर्थ्यां पुत्र्यां अगस्त्यमजनयत् ॥ अगस्त्यं विशि
नष्टि योगस्य अन्यजन्मनि दह्रोऽग्निः जठराग्निरभवत् तथा महातपा विश्रवाश्च पुलस्त्यसुतः इत्यर्थः ॥३६॥ तस्य विश्रवसः इलविलासु
तः इलविलायां जातः यक्षाणां पतिः प्रभुर्देवः कुबेरः तथा अन्यस्यां भार्यायां कैकस्यां रावणादयः पुत्रा विश्रवसस्त्रय एव जाताः ॥३७॥

पुलहस्य भार्या गतिनाम्नी कर्दमस्य पंचमी दुहिता सती पतिव्रता त्रीन् सुतान् असूत प्रसूतवती ॥ तान्निर्दिशति ॥ कर्मश्रेष्ठमिति हे महामते ॥ ३८ ॥ क्रतोरपि भार्या क्रि
यानाम्नी कर्दमस्य षष्ठी सुता ब्रह्मतेजसा ज्वलतः ॥ प्रकाशमानान् षष्टिसहस्राणि वालखिल्यान् ऋषीन् असूयत ॥ ३९ ॥ नया वसिष्ठस्य भार्याया
ऊर्जायां कर्दमस्य नवम्यां सुतायां हे परंतप चित्रकेतुप्रमुखा नयः सप्तमहर्षयः निर्मलाचाराः जज्ञिरे ॥ अरुंधत्या एव नामांतरमूर्जेति वेदितव्यम् ॥ ४० ॥
पुत्रान्निर्दिशति ॥ चित्रकेतुरिति ॥ द्युतिमान् तेजस्वी सामर्थ्यः शक्त्यादयः ॥ अपरे अन्यस्यां भार्यायां जाता इत्यर्थः ॥ ४१ ॥ अथर्वणः पत्नी कर्दमस्याष्टमी

पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वा
लखिल्यानसूयत ॥ ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंत
प ॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृ
द्यानो द्युमान् शक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं ॥ दध्यंचमश्वशिरसं भृगोर्वंशं निबो
ध मे ॥ ४२ ॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् ॥ धातारं च विधातारं श्रियं च भगवत्परां ॥ ४३ ॥ आयतिं
नियतिं चैव सुते मेरुस्तयोरदात् ॥ ताभ्यां तयोरभवतां मृकंडः प्राण एव च ॥ ४४ ॥

सुता शांतानाम्नी चित्तिरिति पाठांतरं तज्जातस्याएव नामांतरं धृतव्रतं दध्यंचं च अश्वशिरसं लेभे लब्धवती ॥ अथ मे ततः भृगुवंशं निबोध शृणु ॥
४२ ॥ हे महाभाग ख्यात्यां ख्यातिनाम्न्यां कर्दमस्य सप्तम्यां दुहितरि भृगुः धातृविधातारौ पुत्रौ पुत्रानित्यार्षं बहुवचनं भगवत्परां भगवान्नारायणो यस्या
स्तां श्रियं लक्ष्मीं शोभनांतां कन्यां चाजीजनत ॥ ४३ ॥ मेरुः स्वस्य सुते आयतिनियतिं च तयोः धातृविधात्रोः ददौ दत्तवान् ताभ्यां धातृविधातृभ्यां तयोर्मेरुदु

ततः मृकंडो मार्कंडेयः प्राणाद्वेदशिरा मुनिरभवत् उशनाः शुक्रः यस्य वेदशिरसः सुतः स कविः शुक्रश्च भार्गवः भ्रगुवंशप्रशंसतद्दर्श्य ॥४५
देवहूतिदुहितृसंततिमुपसंहरति ॥ नवेति हे क्षत्तः एते नव मरीच्यादयः सर्गैः स्ववंशैर्लोकानभावयन् ॥ उत्साहयामासुः कर्दमदुहितृसंततिश्र
वणफलमाह ॥ एष इति ॥ कर्दमदौहित्रः कर्दमदुहितृसंबंधी संतानो मया कथितः श्रद्धापूर्वकं श्रृण्वतः पापनिवर्तक ॥४६॥ एवं देवहूतिसंत
तिमभिधाय मनोस्तृतीयायदुहितुः प्रसूतेः संतानमाह ॥ प्रसूतिमिति अजात्मजो ब्रह्मपुत्रो दक्षः मानवीं स्वायंभुवमनुदुहितरं प्रसूतिमुपयेय

मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः ॥ कविश्च भार्गवो यस्य भगवानुशना सुतः ॥४५॥ सर्वे ते मु
नयः क्षत्तर्लोकान्सर्गैरभावयन् ॥ एष कर्दमदौहित्रसंतानः कथितस्तव ॥ श्रृण्वतः श्रद्दधानस्य स
द्यः पापहरः परः ॥४६॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ॥ तस्यां ससर्ज दुहितॄः षोडशामल
लोचनाः ॥४७॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ॥ पितृभ्य एकां युक्तेभ्यो भवायैकां भव
च्छिदे ॥४८॥ श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः

मे उवोढवान् तस्यां प्रसूत्यां अमललोचनाः सौंदर्यशालिनीः षोडश दुहितॄः संससर्ज ॥४७॥ तत्र त्रयोदश दुहितॄः विभुस्तदभिप्रायविज्ञानसमर्थो
दक्षः धर्माय ददौ एकां दुहितरमग्नये एकां युक्तेभ्यो मिलितेभ्यः पितृभ्यः एकां भवच्छिदे भवाय रुद्राय अहो तज्ज्ञानप्रदत्वाद्रुद्रस्य भवच्छि
त्त्वं विविक्तिनम ॥४८॥ तत्र धर्मपत्नीस्त्रयोदश दुहितॄर्निर्दिशति ॥ श्रद्धेति ॥४९॥

तासां प्रत्येकं संततिमाह ॥ श्रद्धेति ॥ आसां श्रद्धादीनामत्वं तदपत्यानां शुभादीनामत्वं श्रद्धादिधर्मयुक्तत्वेन श्रद्धादिकार्यं शुभादिधर्मयुक्तत्वे
न च द्वयोर्धर्मनाम्नामसमर्थत्वात् यद्वा श्रद्धाशुभाद्यादिवेदनात्वाद्यातासां तेषां च तन्नामत्वं ॥ ५० ॥ ५१ ॥ त्रयोदशानां मध्ये मूर्त्तिसंख्या धर्मपत्नी
सर्वेषां गुणानां कल्याणगुणानामुत्पत्तिरभिव्यक्तिर्ययोस्तावृषी नरनारायणौ भगवदवतारभूतौ असूत ययोर्नरनारायणयोर्जन्मनि

श्रद्धासूत शुभं मैत्री प्रसादमभयं दया ॥ शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥ ५० ॥ योगं क्रियोन्न
तिर्दर्पमर्थं बुद्धिरसूयत ॥ मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ॥ ५१ ॥ मूर्त्तिः सर्वगुणोत्पत्तिर्न
रनारायणावृषी ॥ ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतं ॥ ५२ ॥ मनांसि ककुभो वाताः प्रसेदुः स
रितोद्रयः ॥ दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ॥ मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः
नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलं ॥ देवा ब्रह्मादयः सर्व उपतस्थुरभिष्टवैः ॥ ५४ ॥

जन्मकाले अदः एतद्विश्वं सुनिर्वृतं सदभ्यनंदत ॥ ५२ ॥ सर्वेषां मनांसि दिशः सरितः समुद्रा वाता अप्रसन्ना अभवन् ॥ तूर्याणि वाद्या
नि देवैर्वाद्यंत ध्वानिताः ॥ ५३ ॥ देव्यः देवानां संबंधिन्यः स्त्रियः अवतीर्णाः नरनारायणौ द्रष्टुकामाः सर्वे ब्रह्मादयो देवाः अभी
ष्टवैः उपतस्थुः आगत्य समीपे अभितः स्थित्वा स्तोत्रैस्तुष्टुवुरित्यर्थः ॥ ५४ ॥ ॥ ॥ ॥

यइति ॥ निजया आत्मीयया मायया संकल्पेन स्वात्मन्येवाधारभूते खे आकाशे रूपभेदं सितनीलादिरूपभेदमिव विरचितं यथाहि इदं विश्वं रचितम् ॥ अत्रा
काशदृष्टान्तेन स्वस्यासङ्गस्वरूपत्वमुच्यते ॥ यद्वा स्वस्मिन्नात्मनि जीवे आकाशे रूपभेदमिव इदं देवतीर्यगादिरूपभेदं विरचितम् ॥ तत्राक
ाशदृष्टान्तेन सितनीलादिरूपभेदो मेघादिकृतो वस्तुतस्तु आकाश इति निरिक्तोऽपि भ्रान्तिदृष्टीनामाकाशाभिन्नत्वेन प्रतीतस्तद्वद्देवादिरूपभेदाद्विल
क्षणो ह्यात्मस्वरूपेण इति भिन्नत्वेनैव भ्रान्तिदृष्टीनां प्रतीयमानो देवादिरूपभेद इति विवक्षितं ॥ तयोः क्रमः ॥ सितनीलादिभेदेन यथेदं दृश्यते नभः भ्रां
तिदृष्टिभिरात्मापि एकः सन्पृथगीक्ष्यते इति ॥ अस्मिन्पक्षे यो मायया आत्मनि रचितमित्युक्त्या भगवत्संकल्पादेव जीवस्य बंध इत्युक्तं भ

यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ॥ एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार
पुरुषाय नमः परस्मै ॥५५॥ सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्त्वेन नः सुरगणाननुमेयतत्त्वः
दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविन्दम् ॥५६॥ श्रीरामः

वतितत्प्रतिक्षणाय तस्य देवादिरूपस्य स्वरूपात्मनः प्रतिचक्षणाय प्रतिबोधनाय देवादिरूपभेदाद्विलक्षणं ब्रह्मात्मकप्रत्यगात्मस्वरूप
बोधनाय तद्वारा संसारमोचनाय इत्यभिप्रायः तेन देवमनुष्यादिसजातीयेन स्वसंकल्पोपात्तेन अप्राकृतेनाकर्मवश्येन कृष्णाकारेण ध
र्मसद्मगृहे यो भगवान् प्रादुश्चकार प्रादुर्भूतः तस्मै परमपुरुषाय ते नमः ॥५५॥ सोऽयं स्वसंकल्पकृतजगद्बंधमोक्षो भगवान् अनुमेयतत्त्वः
शास्त्रैकवेद्यविविधविचित्रशक्तिमत्स्वरूपः स्थितिव्यतिकरोपशमाय स्थितिः पालनं व्यतिकरः सृष्टिः उपशमः संहारः तेषां समाहा
रे द्वंद्वः तस्मै जगत्पालनाद्यर्थं पालनाधिकृतभगवद्रूपाभनेंद्राद्यभिप्रायेण स्थितिपदं प्रयुक्तं सत्त्वेनेति गुणत्रयोपलक्षणं स्थित्वा

प्रद्युम्नमत्सरिगुणाभिविशिष्टेव हृष्टनवत्वान्‌ सुरगणान्‌ ॥ अद्भुतकर्मणोन अवलोकयायुक्तेनैव विलोकनेन दृष्टवान्‌ आशीर्लिङो आर्द्धधातुकत्वात्षष्टादे-
शाभाव ॥ ५६ ॥ दृष्टवानिति निर्दिष्टीयांत पावेतु पश्यतीति क्रियापरमध्याहर्तव्यं दृष्टवान्‌ कृपावलोकनविषयत्वयोस्मान्‌ तस्मात्पश्यत्विति अर्थः कथंभू-
तेन विलोकनेन यच्छ्रियो लक्ष्म्याः निकेतं स्थानं अमरविंदकमलं तत्क्षिपता निरस्कुर्वता ॥ ५६ ॥ हे तात एवं लब्धः कृपावलोको यैस्तैः सुरगणैर-
भिष्टुतौ अत एव तौ अवलब्धाराधयौ गंधमादनाख्यपर्वतं प्रतिपयतुः गतवंतौ ॥ ५७ ॥ तावेव हरेरंशावतीर्णाविमौ नरनारायणौ भुवः भारव्य-

एवं सुरगणैस्तात भगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौ गंधमादनम्‌ ॥ ५७ ॥ तावि-
मौ वै भगवतो हरेरंशाविहागतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५८ ॥ स्वाहाभि-
मानिनश्चाग्नेरात्मजांस्त्रीनजीजनत्‌ ॥ पावकं पवमानं च शुचिं च हुतभोजनम्‌ ॥ ५९ ॥

ययाय भारस्य व्ययाय यदुकुलश्रेष्ठौ इमौ कृष्णार्जुनौ विहागतौ तावेव कृष्णार्जुनरूपेणावतीर्णाविति अर्थः ॥ ५८ ॥ एवं धर्मपत्नीनां दक्षदुहितॄ-
णां संततिः कथिता अथ चतुर्दश्याः दक्षदुहितुः संतानमाह ॥ स्वाहेति ॥ अभिमानिनः स्वाहां भार्यां स्वस्यां संततमनुकूलां मन्यमानात् अग्ने-
स्तद्भार्या स्वाहाख्या त्रीन्पुत्रानत्र जनवती अभिमानिन इत्यात्मजविशेषणं वा ॥ त्रेताग्न्यभिमानिनो देवानित्यर्थः तानाह ॥ पावकमिति ॥ हु-
तभोजनमिति त्रयाणां विशेषणं हुतं देवतोद्देशेन त्यक्तं च पुरोडाशादिकं भुक्त इति हुतभोजनस्तम् ॥ ५९ ॥

तेभ्योः पावकादिभ्यः पंचचत्वारिंशा इमयः समभवन् गतएवं पंचचत्वारिंशदग्नयः पितृपितामहैः साकं सह एकोनपंचाशत् तत्र पितरस्त्रयः पिता
महएकः ॥ ६ ॥ पंचचत्वारिंशत्पत्नी विशिनष्टि वैतानिका इति ॥ यज्जामभिः येषामग्नीनां नामभिः वैतानिके वैदिके कर्मणि तथा यज्ञेय इष्टायज्ञ
रूपे वैतानिके कर्मणि अग्नयः अग्निदेवताका इष्टयो यामाः ब्रह्मवादिभिर्वैदिकैर्निरूप्यं तेन एते अग्नय इत्यर्थः ॥ ६१ ॥ अथ पंचदश्याः दक्षदुहि
तुः संततिं वक्ष्यन् तत्पत्नीं पितॄन्विभजति ॥ अग्निष्वात्ता इति अग्निष्वात्ता अयज्वानस्ते तेऽग्नयः येषामग्नौ करणं नास्ति तेऽनग्नयः ते चाज्यपाः

तेभ्योग्नयः समभवन् चत्वारिंशच्च पंच च ॥ त एवैकोनपंचाशत्साकं पितृपितामहैः ॥ ६० ॥ वैतानिके कर्मणि
यन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्य इष्टयो यज्ञे निरूप्यंतेग्नयस्तु ते ॥ ६१ ॥ अग्निष्वात्ता बर्हिषदः सौम्याः पित
र आज्यपाः ॥ साग्नयोनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ॥ ६२ ॥ तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्र
ह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥ ६३ ॥ भवस्य पत्नी तु सती भवं देवमनुव्रता ॥ आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥

ये च बर्हिषदो यज्वानस्ते साग्नयः अग्नौ करणं तेन सौम्याः सोमपाश्च तथा च श्रुतिः ॥ एवै यज्वानस्ते वै पितरो बर्हिषदः ये वा अयज्वानो गृ
हमेधिनस्ते पितरोग्निष्वात्ता इति तेषामुभयविधानां पितॄणां पत्नी दाक्षायणी दक्षदुहिता स्वधा स्यात् ॥ ६२ ॥ तेभ्यः पितृभ्यः मेधां वैतर
णीं च द्वे कन्ये दधार धृतवती प्रसूतवती इत्यर्थः ॥ तयोः संततिर्नास्तीत्याह ॥ उभय इति ॥ ते उभे मेधावैतरण्यौ ब्रह्मवादिन्यौ ब्रह्मोपदेष्ट्र्यौ ॥ ज्ञानं
शास्त्रजन्यं विज्ञानं विवेकादिजन्यं तयोः पारं अंतं गतवत्यौ सनकादिवदूर्ध्वरेतस्के ते इति भावः ॥ ६३ ॥ भवस्य रुद्रस्य या पत्नी सती नाम्नी सा

पि गुणशीलादिभिरात्मनः स्वस्याः सदृशं देवं भवं सेव
मानापि पुत्रं न लेभे ॥ ६४ ॥

तत्र हेतुः स्वे पितरि हते अनागसे निरपराधिने भवाय रुद्राय रुषा क्रोधेनाप्रतिरूपे अश्वसदृशे प्रतिकूले सति आत्मना स्वयमेव आत्मानं देहं अप्रौढैव
बालैव सती योगसंयुता अजहात् तत्याज योगाग्निना देहं ददाहेत्यर्थः ॥६४॥ इति श्रीभागवते चतुर्थस्कंधे प्रथमोध्यायः ॥१॥ भवाय पितर्यप्रतिरूपे स्वमा
नं तत्याजेति संग्रहेणोक्तं देहत्यागनिमित्तं स्पष्टं चाशृण्वन् तद्विस्तरबुभुत्सया पृच्छति विदुरः भव इति त्रिभिः ॥ शीलवतां निर्वैरत्वसमदर्शन
त्वादिरूपस्वभाववतां मध्ये श्रेष्ठे भवे दक्षः दुहितृवत्सलः सती नाम्नीमात्मजामनादृत्य कस्माद्धेतोर्विद्वेषमकरोत् न च दुहितृजामात

पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ॥ अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥६४॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे प्रथमोध्यायः ॥१॥ विदुर उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥१॥ कस्तं चराचरगुरुं निर्वैरं शांतविग्रहम् ॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥२॥ एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥३॥ ॥

रोर्विद्वेषो नोचित इति भावः ॥१॥ न च भवो विद्वेषार्ह इत्याह ॥ क इति कोन्वस्माद्दक्षः चराचराणां गुरुं ज्ञानोपदेष्टारं अचराणामपि ज्ञानसं
पादने समर्थं किं पुनः चराणामिति कैमुत्यन्यायद्योतनायाचरपदं प्रयुक्तम् ॥ जगतः जिज्ञासोर्लोकस्य महद्दैवतं आराध्यं शंकराज्ज्ञान
मन्विच्छेदिति श्रुतेर्भावः निर्वैरं भवं कथं द्वेष्टि अद्वेषीत्यर्थः निर्वैरत्वे हेतुः शांतविग्रहं शांतिरेव विग्रहो यस्य शांतिप्रचुरमित्यर्थः
आत्मनि सर्वभूतानि आत्मनि परमपुरुषे आरामो रतिर्यस्य तं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति श्रुत्युक्तरीत्या शमदमादि
भिः सर्वात्मकं ब्रह्मैवोपासीनमित्यर्थः जामातुर्भवस्य श्वशुरस्य दक्षस्य च यतो हेतोर्विद्वेषोऽभवत् यतश्च विद्वेषाद्दुस्त्यजान् दुहिता सती प्राणान् तत्याज

एवमाएसैसमेत्रेयोभवदक्षयोर्मिथोविद्वेषनिमित्तंतन्निमित्तंसतीदेहत्यागंचसम्यगुपपादयिपुरोपोद्घातिकींकथांप्रस्तौति ॥ पुरेति ॥ विश्वसृजांमरी
च्यादिप्रजापतीनांसत्रेबहुयजमानकर्तृकेयागःसत्रंतस्मिन्नमरर्षयस्तथासम्भ्रमाइंद्रादयःसुरगणाः अग्नयोऽग्न्यभिमानिन्योदेवताश्चसमे
ताःसंवीभूता आसन् ॥ ४ ॥ तत्रयज्ञियेदेशेप्रविष्टंदक्षंविनिरीक्ष्य दृष्ट्वाचतुर्मुखंशिवंचविनासर्वेतस्माद्दक्षस्यभासाआत्मत्विषमभिभूतंतेजःये
षांतेसदस्याःअग्न्यभिमानिदेवतासहिताःसदस्याःसदसिसंस्थितास्स्वासनेभ्यउदतिष्ठन्उत्थितंवंतःदक्षंकथंभूतंप्रभोचिषादेहकांत्या

श्रीमैत्रेयउवाच ॥ पुराविश्वसृजांसत्रेसमेतापरमर्षयः ॥ तथामरगणाःसर्वेसानुगामुनयोऽग्नयः ॥ ४ ॥ तत्रप्रविष्ट
मृषयोदृष्ट्वार्कमिवरोचिषा ॥ भ्राजमानंवितिमिरंकुर्वतंतन्महत्सदः ॥ ५ ॥ उदतिष्ठन्सदस्यास्तेस्वधिष्ण्येभ्यःसहा
ग्नयः ॥ ऋतेविरिंचंशर्वंचतद्भासाक्षिप्तचेतसः ॥ ६ ॥ सदसस्पतिभिर्दक्षोभगवान्साधुसत्कृतः ॥ अजंलोकगुरुं
नत्वानिषसादतदाज्ञया ॥ ७ ॥ प्राङ्निषण्णंमृडंदृष्ट्वानामृष्यत्तदनादृतः ॥ उवाचवामंचक्षुर्भ्यामभिवीक्ष्यदहन्निव
॥ ८ ॥

आदित्यमिवभ्राजमानंमहत्सदःमहतींसभांवितिमिरंयथातथाकुर्वंतम ॥ ५ ॥ ६ ॥ ततःसभगवान्दक्षःसदसस्पतिभिःसाधुयथात
थासत्कृतःपूजितःलोकगुरुमजंब्रह्माणंप्रणम्यतस्याजस्याज्ञयानिषसादउपविष्टवान् ॥ ७ ॥ प्राक्पूर्वमेवागत्यनिषण्णमुप
विष्टंमृडंशिवंदृष्ट्वातेनमृडेनानादृतःप्रत्युत्थानादिभिरसत्कृतोदक्षःनामृष्यतनसेहेवामंवक्रंयथातथादहन्निवचक्षुर्भ्यामभिवीक्ष्य
उवाच ॥ ८ ॥ उक्तिमेवाह ॥ श्रूयतामित्यादिनायज्ञभागंनलभतामितिमतेनहेसहाग्नयोमहर्षयःसाधूनामाचारंब्रुवतःकथयतोमेव

वः तावद्वक्ष्यमाणं श्रूयतां युष्माभिरिति शेषः इदं वक्ष्यमाणं वचः अज्ञानात्मत्सराच्च न कथ्य इत्याह ॥ अज्ञानादिति ॥ अज्ञानात्मत्सराच्च न कथयिष्य
मीत्यर्थः ॥ ९ ॥ अयं रुद्रः नाम्नाभिप्रायमसहमानोऽयमिति सर्वनाम्नाभिर्दिष्टवान् एवमुत्तरत्रापि लोकपालानां यशोघ्नो नाशः निरपत्रपः ज्ञान
रहितः स्तेयेन विहितधर्मपरिभाविनामुर्वैणा वा येन स्तेयेन सद्भिराचरितः अनुष्ठितः पंथा वैरिकाचारः दूषितः दोषं प्रापितः विनाशित
इति यावत् ॥ १० ॥ लब्धतामेव प्रपंचयति एष इति द्वाभ्यां एष रुद्रः यत् मे मम शिष्यतां उपगतः मे दुहितुः सख्याः पाणिं विप्राग्निसाक्षिकं
साधुवदग्रहीत् ॥ साधु विहितमिति च प्रत्ययेन वस्तुनः साधुरिति वर्जितं मर्कटस्येव लोचने यस्य सोऽयं रुद्रः मृगशावस्य हरिणबालकस्य दृशि

श्रूयतां त्रपर्षयो मे सह देवाः सहाग्नयः ॥ साधनां ब्रुवतो रुद्रं नाज्ञानान्न च मत्सरात् ॥ ९ ॥ अयं तु लोकपालानां यशो
घ्नो निरपत्रपः ॥ सद्भिराचरितः पंथा येन स्तेयेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत्
पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ॥ ११ ॥ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥ प्रत्युत्था
नाभिवादार्हैर्वाचाप्यकृत नोचितं ॥ १२ ॥ लुप्तक्रियायाशुचये मानिने भिन्नसेतवे ॥ अनिच्छन्नप्यदां बालां शूद्रायेवो

णीवाक्षिणी यस्यास्तस्याः सख्याः पाणिं गृहीत्वा जन्त्वा प्रत्युत्थानाभिवादनादियोग्येऽपि मय्युचितं सत्कारं नाकृत न कृतवान् ॥ ११
१२ ॥ अनर्हाय कस्मां दत्तवानाह मिन्यनुतप्यमानं आह ॥ लुप्तक्रियायेति सार्द्धैस्त्रिभिः लुप्तक्रियाय लुप्तः क्रियासदाचारः येन अतएव
वाशुचये मानिने दुरहंकारिणे भिन्नसेतवे भिन्नः भ्रंशितः सेतुर्धर्ममर्यादा येन तस्मै अनिच्छन्नपि दातुमिति शेषः अहं बालां कन्या
मदां दत्तवान् यथा शूद्राय उशतीं निर्दुष्टां वेदलक्षणां गिरं तद्वदित्यर्थः ॥ १३ ॥

प्रेतवासेषु श्मशानेषु घोरेः विहृतै र्भूतगणैः परिवृतः वेष्टितः नग्नः दिवसनः मुक्तकेशः विकीर्णकेशः उन्मत्त इव हसन् रुदंश्च भ्रमति
पृथ्व्यां इति ॥२४॥ चिताभस्मना न भस्मनाहृतं प्रेतानां स्रजो मालास्य नियमस्य मः वस्थिभूषणाः नृणामस्थीनि भूषणानि यस्य सः स्वयमशिवो
मंगलोपि शिवापरेशाः शिव इति व्यवहारमात्रं यस्य स्वयं मत्तो मत्तानां प्रियश्च ॥२५॥ तमोमात्रात्मकः केवलतमोरूपः आत्मास्वभावो ये
षां तेषां प्रमथभूतानां प्रमथाख्यभूतविशेषाणां पतिः तस्मै उन्मादानां भूतविशेषाणां वा यायदुर्हेतुः चिन्तायन एको वायु आचा
रहीनाय साध्वी सती कन्या मया दत्ता परमेष्ठिना चोदित आदिष्टोहं दत्तवानिति मध्याहार चोदित इत्यार्षत्वाद्यस्य येन तत्नीयार्थो प्रय

प्रेतावासेषु घोरेषु प्रेतै र्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो मुक्तकेशो हसन्रुदन् ॥२४॥ चिताभस्मकृतस्नानः प्रेतस्र
ङ्स्थिभूषणः ॥ शिवापरेशोऽप्यशिवो मत्तो मत्तजनप्रियः ॥ पतिः प्रमथनाथानां तमोमात्रात्मकात्मनाम् ॥२५॥

स्वावेते निवेदे ॥ केचित्तु अनुप्रक्रियायाः शुचये इत्यादि ग्रंथं प्रक्षिप्तं पठंत यथाश्रुतं व्याख्याय वालवत्स्वयमर्थं इत्युपक्रमस्तु प्राः क्रियाय
मिव तत्त्वत्वात् अत एव न शुचिर्यस्मात् अमानिवे चामित्वमेतत्व इति छेदः तस्य परमेश्वरस्य महीयामानुषी कन्या कथं योग्यास्या
दिति लज्जा मदातुमति श्चत्रापेन कं कंधु लोभेन दत्तवान् स्त्रद्धायेसन हेतुमाह दृष्टांतः न हीत्ये पूर्वापरस्वग्रंथविरोधायतेः न दुक्तं भ
वति यथा कथंचित् शुद्धाय वेदमर्थलाभेन दद्याति ॥ प्रेतावासेषु भिमादि समवे विड्वनमात्रमिति स्वयमेवाह ॥ उन्मत्तवदिति ॥ अत्यर
यादुन्मत्त इत्येवावर्षेत ॥ अशिवः नास्ति शिवो यस्मात् अमतः अमतजनप्रियः इति च छेदः पतिः प्रमथभूतानामिति भक्तवात्स

भा.वे.
॥११॥

त्यमाह ॥ न समानविशेषत्वमपनीयमानीतिवचनाच्छानामपि श्रेयं बुद्धिर्यस्मात् तद्द्रेष्यप्येतेषु मयामुकं प्यादिति हृन्मनोयत्समुद्गहेन तस्मैव तेनिरपेक्षे इति ह
द्रस्य प्रशंसापरत्वेव्याचष्टे ॥ तत्रायं बालबोधार्थः किं दक्षस्याभिप्रेतः उतेतत्तनुगणाकर्तुः उतान्यस्य त्वादृशस्य कस्यचित् ॥ नाद्यः साधूनां ध्रुवोता
हृतेनाज्ञानाच्च च मत्सरादिनिवालविकृतत्वमुपपन्नस्य लोकपालानां यशोघ्नो निरपत्रपः येनसम्यक्त्वेन दूषितः ॥ पापमेभिर्यता प्राप्त इत्यादिहृय
तोभिप्रेतत्वासंभवात् निंदायामेव तस्य तात्पर्यमिति श्रयावगमात् ॥ अत एव हि दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिःक्रम्य विहृदमन्युजं
गामेति निंदापूर्वकशापकरणत्वविहृद्धकोधत्वविनिष्कमणाद्योवक्ष्यमाणा उपपन्नाः न द्वितीयः वेदांतार्थोपबृंहकस्य द्रूपत्वादस्य पु
राणस्य वेदांतेषु च अनपहतपाप्मा वा अहमस्मि नारायणाद्रुद्रो जायते इमादिषु कर्मवश्यत्वकार्यत्वादिश्रवणात् द्विलक्षणार्थो नाम

तस्माद्गन्मादनाद्यायन दृष्टो चायदृहृदे ॥ रत्नावनमयामाध्वी चोदितः परमेष्ठिना ॥ १६ ॥

त्रनिवद्रुमयुक्तत्वेनेन तन्तुगणाकर्तृं भिप्रेतत्वासंभवात् ॥ अत एव हि मद्घो जायत तन्मन्युः कुमारो नीललोहितः सवै रुद्रो देवानां पूर्वजो
भगवानजः नामानि ममहे धातः स्थानानि च जगन्मतरिति वेदांतार्थोपसारेणैव कार्यत्वकर्मवश्यत्व चतुर्मुखकृतनामस्थानादिमत्व
मुपबृंहितं ॥ ब्रह्मविद्विभिरस्त्रैव क्याहिकं प्रतीयमानं प्रतई नन्यायेनाम्यथानुपपन्नमिति पूर्वमेव प्रतिपादितं न तृतीयः ॥ आग्रहमूलकत्वात्
निंदापरत्वे यस्यान्यथा कथं चिदिदप्रीनार्थपर्यवसानेकरणे सर्वत्राप्येवमेव स्यादिति स्तुतिनिंदयोर्व्यवस्थानुपपत्ते श्वयरस्पुक्तंलुप्ता
क्रियायस्मिन परब्रह्मत्वादिति ॥ तदयुक्तं परब्रह्मत्वे पितामहकृतलाघवतारेषु लुप्तक्रियात्वदर्शनेन हेतो र्व्यभिचारात् अमानिनेऽभिन्नमे
नवदनिपरके दरदसम्यग्युक्तं मद्रिराचरितः पंथायेनसम्यक्त्वेन दुषितइतियज्ञभागं नलभतां देवैर्देवगणाधिपइति पूर्वोत्तरव्याघातात्

॥१९॥

तस्यपरमेश्वरस्यमदीयामानुषीकन्यागृह्यपुत्रंभवतस्तयोरुभयोरपिचतुर्मुखाप्रमतत्वेनदक्षकन्यायामानुषीत्वासंभवात्मनोजीनावभ्यैतोद्यश्चेत्सि
द्दिमानुषशब्दोव्युत्पादितः नाममात्रापिद्दोषममेषंमपनीययानीतस्याद्यपिमर्दनानर्हेद्विषतः क्रूरात्संसारेषुनराधमान्क्षिपाम्यजस्रमशुभानासुरी
ष्वेवयोनिषु आसुरीयोनिमापन्नामूढाजन्मनिजन्मनि॥मामप्राप्यैवकौंतेयततोयांत्यधमांगतिमितिनितामसानानिम्नाद्यगानात्॥तस्माद्यथेयं
नेत्राबार्थः॥१६॥मदभंप्रमनीयं अप्रतीक्ष्रियमुदासीनमवस्थितमासीनंगिरिशमेवमुक्तविधयाविनिंद्याथअपउपस्पृश्यआचम्येमर्थः

श्रीमैत्रेयउवाच॥विनिंद्यैवंसगिरिशमप्रतीपमवस्थितं॥दक्षोथापउपस्पृश्यक्रुद्धःशप्तुंप्रचक्रमे॥१७॥अयंतुदेव
यजनइंद्रोपेंद्रादिभिर्भवः॥सहभागंनलभतांदेवैर्देवगणाधमः॥१८॥निषिध्यमानःससदस्यमुख्यैर्दक्षो
गिरित्रायविसृज्यशापम॥तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगामकौरव्यनिजंनिकेतनम॥१९॥विज्ञायशाप
गिरिशानुगाग्रणीर्नंदीश्वरोरोषकषायदूषितः॥दक्षायशापंविससर्जदारुणंयेचान्वमोदंस्तदवाच्यतांद्वि
जः॥२०

क्रुद्धःशप्तुमुपक्रांतवान्॥१७॥अयंभवोरुद्रः तुर्हेतौयतः देवगणाधमःसर्वेभ्योदेवेभ्योधमःततइंद्रादिभिर्देवैःसहदेवयजनेदेवोद्देश्यय
कयागेयज्ञभागंनलभतांनप्राप्नुयात्॥१८॥हेकौरव्यविदुरसदस्यःसदस्यमुख्यैःसभ्यश्रेष्ठैर्निषिध्यमानःनिवार्यमाणोपिविवृद्धःमन्युःर
कोधोयस्यसःगिरित्रायरुद्रायशापंयज्ञभागानर्हतारूपंशापंविसृज्यतस्मात्सत्रदेशात्वहिर्निर्गत्यस्वीयंनिकेतनंगृहंप्रतिजगाम॥१९॥
गिरिशानुगानांरुद्रपार्षदानांअग्रणीर्मुख्यःदक्षविसृष्टंशापंज्ञात्वारोषएवकषायस्तेननदूषितःआरक्तनेत्रइत्यर्थःदक्षायदारुणंशा

भा.च.
॥१२॥

पं विसमर्जेत यातस्मात् इत्याशा वचनां वचनाग्नई त्वा विनिंघ्नतां ये च सदस्या द्विजा अन्वमोदन्त तेभ्यश्च शापं विसमर्जेत्यर्थः ॥ २० ॥ तत्र दक्षं शपति सार्धै
स्त्रिभिः । य इति । अज्ञः देहादिविलक्षणात्मज्ञानरहितः अत एव पृथग्दृष्टिरज्ञस्तात्मकत्वं तत्त्वं वस्तुदर्शी ॥ अप्रतिद्रुहि प्रतिद्रोहमकुर्वति भग
वति भगवति दक्षाख्यमर्त्यदेहमेव मर्त्यमुद्दिश्य मत्वा गतिरिथं संभाजमुद्दिश्य केवलं निकृष्टमज्ञात्वेत्यर्थः द्रुह्यति अपकरोति एतस्मात्कारणात्
तत्त्वमिति पाठे एतेन मर्त्यत्वेन ज्ञात्वेत्यर्थः सदक्षः ततस्तत्त्वतः प्रकृतिपुरुषेश्वरयाथात्म्यात् विमुखः पराङ्मुखः भवेत् तत्त्वत्र यज्ञानरहितो भवे
दित्यर्थः अयं प्रथमशापः ॥ २१ ॥ एवं तत्त्वैमुख्यरूपं शापं दत्त्वा अनात्मकार्यरूपमनात्मविकलोककर्माभिरुचिरूपं शापं विसर्जन्निग्रहे विषयेति कू

य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २१ ॥ गृहेषु
कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतंत्रं वितनुतां वेदवादविपन्नधीः ॥ २२ ॥ बुध्यापरा
भिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्त्वतितरां दक्षो वस्तमुखोऽचिरात् ॥ २३ ॥

धर्मेषु अविचाल्यानि कर्माणि येषु प्राकृतगुणसंसर्गाद् निर्वाप्य कमपि तियावत् गृहेषु ग्राम्यसुखेच्छया सांसारिकवैषयिकसुखेच्छया सक्तः अत एव
वेदवादैः अल्पास्थिरफलसाधनानि कर्माणि अनन्तास्थिरफलसाधनत्वेन प्ररोचयद्भिः अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्य
याजिनः सुकृतं भवतीत्यादिभिः अर्थवादैर्विपन्ना विनष्टा धीर्बुद्धिर्यस्य सः कर्मतंत्रं कर्मकलापं वितनुतां अल्पास्थिरफलसाधनकर्माणि कुर्यादित्य
र्थः अयं द्वितीयः ॥ २२ ॥ परो देहादिः तमेवात्मत्वेनाभिध्यातुं शीलमस्यास्तया बुद्ध्या विस्मृता आत्मगतिः जीवात्मपरमात्मयाथात्म्यावगतिर्येन अ
त एव यः पशुतुल्यः अत एव नितरां नितरां स्त्रीकामः सदक्षः अचिराद्वस्तस्य वस्तमुखवस्तुसमं मेषसमं मुखमिव मुखं यस्य सः अस्तु भवेत् ॥ २३ ॥

॥१२॥

तथा कर्ममय्यां कर्मात्मिकायां अविद्यायां नियमेन विधेति तत्र विद्येति बुद्धिर्यस्य अत एवासौ जडः ॥ अजः अजतुल्यः पशुप्रायः ॥ अस्तु स्यादिति तृतीयः
शापः ॥ अथ रुद्राय मानिनो दक्षानुकूलान् द्विजान् शपति संसरंत्विति सार्द्धद्वयेन शर्वं रुद्रं अवमन्यत इति सर्वावमानी तं ॥ अमुं दक्षमनुसृत्य
ये च दक्षकृतशापाभिनंदिन इत्यर्थः ॥ ते इह लोके संसरंतु जन्ममरणादिभाजो भवंतु ॥ अयं प्रथमः शापः ॥ २४ ॥ ये हरद्विषः ते पुष्पिण्याः
पुष्पमात्रफलायाः ॥ आपातरमणीयाया इत्यर्थः ॥ यद्वा पुष्पवन्मनःक्षोभकत्वात् हर्षवादा पुष्पशब्देन विवक्षिताः पुष्पिण्यास्तद्बहुलाया
इत्यर्थः ॥ अथवा पुष्पं गंधवच्छ्रवणमात्रोपभोग्यस्वर्गादिसुखप्रकाशिकायाः श्रुतायाः वेदपूर्वभागरूपाया इत्यर्थः ॥ यामिमां पुष्पितां

विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरंत्विह ये चामुमनु शर्वावमानिनम् ॥ २४ ॥ गि
रः श्रुतायाः पुष्पिण्या मधुगंधेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः ॥ २५ ॥
सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः ॥ वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥

वाचमित्यादिवत् मम मनःक्षोभवेण भूरिणा मधुगंधेन मधुगंधतुल्येन स्वर्गादिसुखप्रकाशनेन उन्मथितः क्षोभित आत्मा मनः
येषां ते हरद्विषस्ते मुह्यंतु मोहं प्राप्नुवंतु नित्यानित्य धर्माधर्मादिषु सर्वत्र विपरीतज्ञाना भवंत्विति द्वितीयः शापः ॥ २५ ॥ सर्वभक्षाः स
र्वे अविहिता प्रतिषिद्धविविधं भक्षं येषां ते हरा द्विजा वृत्त्यै केवलशरीरस्यपत्यकलत्रादि पोषणाय ये धृतानि विद्यातपोव्रतानि
यैस्तै वित्तदेहादिष्वेव आरामो रतिर्येषां ते याचकाः संतो विचरंत्विति तृतीयः शापः ॥ २६ ॥

एवं शापं तं नंदीश्वरमालक्ष्य भृगुः प्रत्यशपदित्याह मैत्रेयः तस्य नंदीश्वरस्य ब्रह्मकुलायैवमुक्तरीत्या शापं ब्रुवतः सतस्तं शापमाश्रुत्वा भृगुर्दुरत्य
यं दुरतिक्रमं ब्रह्मदंडं ब्रह्मदंडकल्पं शापं प्रत्यसृजत् प्रत्यददात् ॥२७॥ तमेवाह ॥ भवेति भवस्य रुद्रस्य व्रतं पिशाचचर्यादिकं तद्धारयंति ये च भव
व्रतधराननुव्रताः अनुसरंतः ते सर्वे पाषंडिनो वेदविरुद्धकर्मनिष्ठाः सच्छास्त्राणां भगवच्छास्त्राणां पंचरात्रादीनां परिपंथिनः प्रतिकूला
भवेयुः ॥२८॥ पाषंडित्वमेव विशदयति ॥ नष्टशौचा दुराचाराः मूढधियः परावरतत्त्वज्ञानरहिताः जटादिधारिणः शिवदीक्षायां मुद्रि
कादृतत्त्वतः परमुद्राविशारदः भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छतीत्याद्युक्तविधशिवदीक्षायां विशंतु यत्र दीक्षायां सुरापैष्टी

तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै ॥ भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययम् ॥२७॥ भवव्रतधरा ये च ये च तान्समनु
व्रताः ॥ पाषंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः ॥२८॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिव
दीक्षायां यत्र दैवं सुरासवं ॥२९॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ ॥ सेतुं विधारणं पुंसामतः पाषंडमाश्रिताः

आसवं मद्यं दैवं दैवतवत् सेव्यं तत् दैवं देवमिव पूज्यं सुराकुंभस्थापनं तस्य देवपूजादेः शैवागमादिष्वभिधानादेवमुक्तं ॥२९॥ भवतामं
यं शापोऽनुरूप एवेति वदन् तमेव प्रथयति ॥ ब्रह्म चेति ॥ यतो यूयं पाषंडं पाषंडधर्ममाश्रिताः यत् यस्मात् पुंसां वर्णाश्रमवतां सेतुं स्व
र्गापवर्गसाधनयज्ञोपासनादिप्रकाशनेन पुरुषार्थप्रापकं मर्यादारूपं च विधारणं मातापितृसहस्रवद्धितोपदेशादिना विशेषध
धारकं प्रवर्तकं चेति यावत् ॥ एवंभूतं ब्रह्म वेदं ब्राह्मणांश्च परिनिंदितवंतः ततो विगर्ह्यं पाषंडं यातेत्युत्तरत्रान्वयः ॥३०॥

वेदस्यसेतुत्वंविधारणत्वेप्रपंचयति॥एषइति॥एषएववेदएवलोकानांवर्णाश्रमवतांशिवःशिवःसुखकरःपंथाःस्वप्रकाशप्रयणोपासनादिद्वा
रात्स्वर्गापवर्गोपायसनातनः अनादिनिधनः॥अनादिनिधनाह्येषावागुत्सृष्टास्वयंभुवेत्युक्तत्वात्॥यंवेदंतदुक्तयज्ञोपासनादिरूपधर्म
मित्यर्थः पूर्वेचमात्विका ऋषयः चकारादपरेच अनुतस्थुः अनुतिष्ठंतवंतः अनेनशिष्टपरिग्रहकथनेनशैवागमानांतद्वैपरीत्यमा
वेदितंजनार्दनोभगवान्यद्वेदास्यंब्रह्मप्रमाणंयस्यसः आर्षत्वात्क्लीवत्वंवेदाःप्रमाणमितिवद्विधेयप्रमाणापेक्षया॥अनेन
ब्रह्मणोपिप्रामाण्यमितिकथनेनसर्वापिश्रेयःसंपत्तिर्वेदाधीनेत्युक्तंयद्वायस्मिन्वेदेजनार्दनःप्रमाणंसत्कारणमितियावत्

एषएवहिलोकानांशिवःपंथासनातनः॥यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः॥३१॥तद्ब्रह्म
परमंशुद्धंसतांवर्त्मसनातनम्॥विगर्ह्ययातपाषंडंदैवंवोयत्रभूतराट्॥३२॥श्रीमैत्रेयउवाच॥
तस्यैवंवदतःशापंभृगोःसभगवान्भवः॥निश्चक्रामततःकिंचिद्विमनाइवसानुगः॥३३॥

तस्यहवाएतस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदइतिश्रुतेः॥अनेनापौरुषेयत्वकथनेनपौरुषेयत्वप्रयुक्तंभ्रमविप्रलम्भादि
दोषराहित्यसिद्धिःशैवागमानांपौरुषेयत्वंतत्प्रयुक्तदोषवत्वंचसूचितं॥३१॥तत्तस्मात्परमंनिरतिशयश्रेयःसाधनप्रकाशकत्वेन
सर्वोत्कृष्टंशुद्धमपौरुषेयंसनातनंसतांवर्त्मब्रह्मवेदंविगर्ह्यविगर्हणाद्धेतोरित्यर्थः॥पाषंडंयातप्राप्नुयातपाषंडधर्मएवनिष्ठांवृत्तो
भवतेत्यर्थः यत्रयस्मिन्पाषंडेवःयुष्माकंभूतानामस्मानांपतिःरुद्रोदैवं॥३२॥अथशापप्रतिशापोनिर्गमयन्अनंतरकथांप्रस्तौतिमै
त्रेयः हेसाधोतस्यभृगोःएवंवदतःसतःभगवान्भवोरुद्रःसानुगःसभूतःकिंचिद्विमनाइवइवशब्देनवस्तुतःसमदर्शित्वात्वैमनस्याभवः

भा॰ तृ॰

॥१४॥

हे महदेवाम विदुर॥ यत्र यस्मिन्विदुर॥ यत्र यस्मिन्नसत्रे ऋषयः पुरुषोत्तमो हरिरिज्यः आराधनीयः न द्विश्वसृजां सत्रं सहस्रं परिवत्सरपर्यं
तं अनुष्ठेयं सं विधाय अनुष्ठायतेपि भ्रग्वादय॥३४॥ यत्र प्रदेशे गंगायमुनयामहाचिता युक्तानत्रावभृथंस्नाने आप्लुमक्त्वा ततः स्व
स्वधाम स्थानं ययुः॥३५॥ इति श्रीभागवतचंद्रचंद्रिकायां द्वितीयोध्यायः॥२॥ दक्षो दुहितृवत्सलः विद्वेषमकरोत कस्मादिति पृष्टं विद्वेषनि
मित्तमुक्तम॥ अथ यतत्याजद्दुस्त्यजाम्नतीति एषं प्राणत्यागनिमित्तं तत्प्रकारश्चाचष्टे॥ तत्र प्राणत्यागनिमित्तमरोद्दयागारंभः स च ग

तेपि विश्वसृजः सत्रं सहस्रपरिवत्सरान॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः॥३४॥ आप्लुत्यावभृथं
यत्र गंगायमुनयान्विताः॥ विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः॥३५॥ इति श्रीभागवते महापुराणे
॥ पारमहंस्यां संहितायां चतुर्थस्कंधे द्वितीयोध्यायः॥२॥ श्रीमैत्रेय उवाच॥ सदा विद्विषतोरेवं कालो
वै ध्रियमाणयोः॥ जामातुः श्वसुरस्यापि सुमहानतिचक्रमे॥१॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा पर
मेष्ठिना॥ प्रजापतीनां सर्वेषामाधिपत्ये स्मयोभवत॥२॥ ॥

वीतगर्वश्च प्राजापत्यादधिकारादि निवर्तनतावदेक्ष भवयोर्विद्विषतोः सतोर्महान्कालोतीतइत्याह॥ सदेति॥ एवमुक्तरीत्यासदा
विद्विषतोर्मिथो द्वेषं कुर्वतो जामातुर्भवस्य दक्षस्य च ध्रियमाणयोरवतिष्ठमानयोः सतोः सुमहान्भयान्कालः॥ अतिचक्रमे व्यतीतम
गर्वनिमित्तमाह॥१॥ यदेति परमेष्ठिना चतुर्मुखेन ब्रह्मणा यदा सर्वेषां प्रजापतीनां आधिपत्ये दक्षोभिषिक्तस्तदानस्मययोगर्वः अभव

॥१४॥

मयाज्ञौ रौद्रयागमारेभ इत्याह ॥ दृष्ट्वेति स दक्षः ब्रह्मिष्ठानब्रह्मात्मकान्सर्वेषां ब्रह्मात्मकत्वेपि तद्द्वारेब्रह्मणा आवेशावतारत्वादतिशयेनब्रह्मत्वमिष्टं प्रथम
येन विवक्षितं तद्दानुचरस्तत्तारा धकाभिप्रायेणावहुवचनं अभिभय परा भाव्यते भ्यो यज्ञभागं नदास्यामीति संकल्पेमर्थः वाजपेयेनेष्ट्वा वाजपेयारब्ध
यागं कृत्वा वृहस्पतिसवं नाम वृहस्पतिसवाख्यं क्रतुं समारेभ आरब्धवान् वाजपेयेनेष्ट्वा वृहस्पतिसवेन यजेतेतिति श्रुते ॥३॥ तस्मिन् वृहस्पति
सवे समारब्धे सर्वे महर्षयः तथा देवर्षयः पितरो देवताश्च तत यातेषां पत्न्यश्च कृतस्वस्त्ययनाः कृतमंगलाः सर्वालंकारभूषिताः सभर्तृका आ

इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥३॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षि
पितृदेवताः ॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥४॥ तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम्
सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥५॥ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः ॥ विमानयानाः स
प्रेष्ठाः निष्ककंठीः सुवाससः दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः ॥ पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ७॥

सन्न् तत्रागत्योपविविशुरित्यर्थः सभर्तृका इत्यनेन भर्तृसान्निध्यादानंदातिशयः सूच्यते ॥४॥ तत्तथा नभसि खेचराणां प्रजल्पतां पितृयज्ञमहो
त्सवं श्रुत्वा दाक्षायणी सती तत्र सर्वाभ्यो दिग्भ्यो व्रजंतीरुपदेवानां गंधर्वाणां वरस्त्रियः वरस्त्रीर्विमानमोरीतीयतः स्वनिलयाभ्यासे स्वगृहसमी
पे दृष्ट्वा औत्सुक्यात् पतिमभ्यभाषतेति त्रयाणामन्वयः कथंभूताः स्त्रियः दृष्ट्वा विमानानि यानि गमनसाधनानि यासां ताः सप्रेष्ठाः प्रिये
ण सहिताः निष्काणि पदकानि कंठे यासां शोभनानि वासांसि यासां लोकानि चंचलाक्षीणि यासां मृष्टानि उज्ज्वलानि कुंडलानि यासां ताः ॥७॥

हेवामहेषांभोशर्वश्वसुरस्यप्रजापतेर्दक्षस्यकर्तुरिषड्ढीयज्ञरूपोमहोत्सवः संप्रतिनिर्वापितःप्रवर्त्तितःतत्रचविबुधाःव्रजंतिअमपारो
संह्लोमतेप्रियेप्रार्थिनोभाव अर्थिनोभाव अर्थिनायदीछावर्त्ततइत्यर्थः। तर्हितत्रवयमपि अभिसरामगच्छाम। ८। स्वाभिप्रायंप्रकटयं
त्याह पद्भिःतस्मिन्यज्ञमहोत्सवेममभगिन्यःस्वभर्तृभिःसहसुहृदिदृक्षवः। भगिनीमातापित्रादीन्द्रष्टुमिच्छवः आगमिष्यंतिध्रुवं
निश्चयः। आर्यांतुवितनवतत्राह॥ अहमपितस्मिंस्तुत्सवेभवताकंउपनीतम्। अस्मिन्नित्यादिसमर्पितंपारिवर्हिंवस्त्राभरणाद्यु

तस्याऊचुः। प्रजापतेस्तेश्वसुरस्यसांप्रतंनिर्यापितोयज्ञमहोत्सवःकिलः वयंचतत्राभिसरामवामते
यद्यर्थिनामीविबुधाव्रजंतिहि। ८। यस्मिन्भगिन्योममभर्तृभिः। स्वकैर्ध्रुवंगमिष्यंतिसुहृद्दिदृक्षवः॥ अ
हंचतस्मिन्भवताचकामयेसहोपनीतंपरिवर्हितुं॥ ९॥ तत्रस्वसर्मेननुभर्तृसंमतामातृस्वसृःक्लिन्न
धियंचमातरम्। द्रक्ष्येचिरोत्कंठमनामहर्षिभिरुन्नीयमानंचमृडाध्वरध्वजम्॥ १०॥ ॥१०॥

पायनंआर्हितुंकामयेइच्छामि॥ ९॥ किंचहेमृडचिरोत्कंठमनाबहुकालमौत्सुक्याविष्टमना अहंममेममभर्तृभिःसंमानिताःस्व
स्याभगिनीःभर्तृसम्मताइत्यनेनस्वस्या अपिभर्त्रा अनुग्राह्यत्वंसूचितंतथामातृस्वसःमातृभगिनीःक्लिन्नधियंमद्दर्शनलाभेन
विन्नचित्तांमपिप्रेनाईचितांवामातरंमहर्षिभिरुन्नीयमानंहूर्ध्वंक्रियमाणंअध्वरध्वजंयूपंद्रक्ष्ये॥ १०॥

अहो किं तत्राश्चर्यं येन त्वं विदिद्दक्षसीत्यत्राह । त्वयीति ॥ अजात्ममायया अजस्य कर्मायत्तजन्मादिरहितस्यात्मनः विक्षोभिण्या यया संकल्पेन विनि
र्मितं गुणत्रयात्मकं अहङ्कृतिपरिणामकमेतद्विविधविचित्रसन्निवेशं जगत्त्वयि आश्चर्यं भाति विविधविचित्रसन्निवेशजगद्दर्शनमेव ज्ञानिनित्य
याश्चर्यबुद्धिजनकं न तत् आश्चर्यकरं किं चित्तवास्तीत्यर्थः ॥ ज्ञानिनो हि विचित्रं जगद्दृष्ट्वा आश्चर्यं प्राप्नुवंतीति भावः अत्राजात्मनस्तव मायया त्व
य्येव विनिर्मितं जगदाश्चर्यं भातीत्यन्वयोःसंगतः मद्रूपात्मकाकाशशिवेंद्रादिरिशादीनां छागपशुन्यायेन एको ह वै नारायण आसीन्न ब्रह्मा नेशान
इति नारायणात् प्रविशेषपर्यवसानात्तस्यैव कारणत्वेन जगतस्तन्माया निर्मितत्वात् युक्तं चेतत् अनपहतपाप्मा वा अहमस्मीति नारायणद्रु

त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ॥ अथाप्यहं योषिदतत्त्वविच्च
ते दीना दिदृक्षे भव मे भवक्षितिम् ॥ ११ ॥ पश्यप्रयातीरभवान्ययोषितोप्यलंकृताः कांतसखा
वरूथशः ॥ यान्ति व्रजन्ति शितिकंठ मंडितं नभो विमानैः कलहंसपाण्डुभिः ॥ १२ ॥ ॥

द्रोजायत इति कार्यत्वकर्मवश्यत्वादियुक्तस्य रुद्रस्य कारणत्वासंभवात् अन्यथा पूर्वापरविरोधात् । तथापि तवाश्चर्यकरस्यान्यस्याभावेप्य
हं योषित्त्वात्तत्स्वभावा अतत्त्ववित्परावरतत्त्वमजानंती अनेन विशेषणद्वयेन स्थिरचित्तानां तत्त्वविदां च भगवद्विभूतित्वेन जगदवलो
कनमेवाश्चर्यजनकमिति सूचितमिति यथाकथं एवार्थः साधीयात् अतो दीना कृपणास्मि तोहि भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ॥ ११
दिदृक्षामेव कैमुत्यन्यायेन अनन्तिप्रपश्येति द्वाभ्याम् ॥ हे भव अन्या अपि मामित्र संबंधरहिता अपि योषित वरूथशः संघशः प्रयांतिताः
पश्यकथंभूताः कांतःप्रियाः सखायो यासांताः हे शितिकंठ यासां योषितां व्रजद्भिः कलहंसवत्पांडुरैः ॥ शुभ्रैर्विमानैर्नभस्थलं मंडितं ॥ १२

हे सुरवर्य सुतस्य पितृगेहकौतुकमुत्सवं निशम्य सुतायाः देहः कथं नेंगते इत्थं न प्रचलति अथाप्यनाहूताः संतः कथं वा गमिष्याम तत्राह । सौहृदं सुहृदो नि
केतनं तथा भर्त्तुरीशं गुरोः स्वमनाहूता अपि अभियंति गच्छंति संतः हे सत्वमार्षभ ॥१३॥ उपसंहरति तदिति । हे अमर्त्य देवतात तस्मात् प्रसीद इदं मे वांछि
तं कारुणिको भवान् कर्त्तुमर्हति कारुणिकत्वमेवाह । अदभ्रचक्षुषा अनल्पदृष्ट्या त्वया आत्मनो देहस्यार्द्धे समे अंशे अहं निरूपिताः अतो यतो ईदृशा
ऽर्धदइति निरूपितास्मीति । अतो मया याचितस्त्वं मामनुगृहाण ॥१४॥ एवमाभाषितो भवः प्रत्यभाषतेत्याह मैत्रेयः । एवमिति । गिरित्रः गिरिं कैलासं त्रा

कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते । अनाहूता अप्यभियंति सौहृदं भर्त्तुर्गुरोर्देहकृतश्च के
तनम् ॥१३॥ तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको बतार्हति । त्वयात्मनोऽर्द्धेहमदभ्रचक्षु
षा निरूपिता मानुगृहाण याचितः ॥१४॥ ऋषिरुवाच । एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन्
सुहृत्प्रियः । संस्मारितो मर्मभिदः कुवागिषून्यानाह को विश्वसृजां समक्षतः ॥१५॥

यते इति गिरित्रो भवः । एवमुक्तरीत्या प्रियया सत्या अभिभाषितः प्रियः सुहृदपि मर्मच्छिदः हृत्स्थमनसि कुवागिषून् कुत्सितानि दुरावाच एव इ
षून् प्रति संस्मारितः स्मरणं प्रापितः निहृत्तद्वेषणात् स्मरतेर्वा णिजंतात् कर्त्तरि क्तः समस्मरन्निति अर्थः बहिः प्रहसन्निव प्रत्यभ्यधत्त प्रत्यभाषत केन
कुवागिषवः यान् स्मरन् प्रत्यभिधत्ते तत्राह । कः दक्षः विश्वसृजां प्रजापतीनां समक्षतः परोक्षं यान् आह । अयं हि लोकपालानां यशोघ्नो निरप
त्रपः इत्यादिना उक्तवान् तान् स्मरन्निति अर्थः ॥१५॥

प्रियमोक्तमनघ प्रसक्तं रयति ऽभवः त्वयोदितमिति यावत् दध्मायसमाप्तिहे शोभने त्वयोदितमुक्तम् ॥ अनाहुता अपि विंधुषु यंतीति तच्छोभनमेव किंतु
वलीयसा अनात्मदेहाभिमानत्वकृतो यो महस्तेन मन्युना क्रोधेन चेतेवं धवो यदि अनुत्पादितदोषदृष्टयः उत्पादिता गुणेषु सत्स्वपि दोषेष्वेव
दृष्टिवद्दृष्टिर्येषां नयेत्सेनभवंतिनर्थं नाहुता अप्यभियंतीति शोभनमिमसर्थः ॥१६॥ ननु विद्यादिसंपन्नो दक्षस्तादृशे त्वंथि कंथमुत्पादितदोषदृष्टिः
स्यात्तत्राह ॥ विद्येति ॥ सतां साधवनां गुणैर्विद्यातप आदिभिः षड्भिः असतमेषु इतरे दोषरूपतां प्राप्तैर्विद्यादयएवाश्रयभेदेन गुणा दोषाश्चसु

श्रीभगवानुवाच ॥ नयोरिदं न शोभनमेव शोभने ॥ अनाहूता अप्यभियंति वंधुषु तेयद्यनुत्पादितदोषदृष्टयो वलीयसानात्ममहेन मन्युना ॥१६॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेनरैः ॥ स्मृतौ हतायां भृतमानदुर्हृदं
प्राप्तध्वानपश्यंति हि धाम भयसाम् ॥१७॥ नैतादृशानां स्वजनव्यपेक्षया गरहान् प्रतीयादनवस्थितात्मना
म् ॥ येभ्यागतान् वक्रधियाभिचक्षते आरोपितभ्रूभिरमर्षणास्त्रिभिः ॥१८॥ ॥ ॥ ॥

रिति भावः स्मृतौ हतायां विवेकज्ञानेन ऐसतिभृतमानदुर्दृशः भृतः पुष्टः मानः अहं विद्वानहं तापसइत्यादिगर्वस्तेन दुष्टा दृष्टिर्येषां ते भयसां महत्
तमानां तेजः तथा यथावस्थितं न पश्यंति हीनि असत्त्वेन त्वसिद्धिं द्योतयंति ॥१७॥ तस्मादेतादृशानामनवस्थितचित्तानां गरहे स्वजनव्यपेक्षया स्वजनद
तिवुद्ध्या न प्रतीयान्न गच्छेत ॥ अनवस्थितत्वमेवाह ॥ येव क्रा कुटिला तया दृष्ट्यावक्रधियेति पावे कुटिलवुद्ध्येत्यर्थः ॥ आरोपिताउन्नमिताभ्रू
र्येषां तैरमर्षणैः सक्रोधै रक्षिभिः गरहान् प्रत्यभ्यागतान् पश्यंति ॥१८॥ पश्यंत्वेवमथापि मोहाद्गतमेव वंधुभिस्तत्राह ॥ नयेति ॥ अरिभिः शा

भा॰ टी॰

॥९३॥

त्रुभिः शिलीमुखैः बाणैररिर्द्दिनं निशाः भिन्नगात्रोपितयाम व्यथते यतः शेते स्वपिति यथा स्वानां वक्रधियां दुरुक्तिभिः मर्मसु ताडितः दूयता व्यथमानेन हृ
दयेन दिवानिशं तप्यति दुरुक्तीनां सोढुमशक्यत्वात्ततः कृहाम्प्रति गतम्मम्निमर्षः ॥१९॥ मास्तु त्वकमन्नमहमेवाव्रजिष्यामीति चेन्मामनाहृ
समता यात्त्वत्पितृकृतः पराभवः प्राणापि पात्ये स्माहित्याह ॥ व्यक्तमिति यावत्समाप्तिहे सुभ्रु यद्यपि त्वमुत्कृष्टगतेः उत्कृष्टा गतिः प्राजापत्या
धिकाररूपा गतिर्यस्य तस्य प्रजापतेर्दक्षस्यात्मजानां दुहितॄणां मध्ये प्रिया प्रीतिविषयाऽसीति मे मतं ज्ञातं व्यक्तं स्फुटं तथापि मदाश्रयणा

त्पथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता । स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानि
शं तप्यति मर्मताडितः ॥१९॥ व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता । अथाऽ
पि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥२०॥ पापच्यमानेन हृदातुरेन्द्रियः समृद्धिभिः
पूरुषबुद्धिसाक्षिणाम् । अकल्पएषामधिरोढुमञ्जसा परं पदं द्वेष्टि यथासुरा हरिम् ॥२१॥

तु महत्संबन्धाद्धेतोस्त्वं पितुः सकाशान्मानं न वलप्स्यसे यतः मत्संबंधात्कः दक्षः परितप्यते क्लिश्यति ॥२०॥ ननु कुतस्त्वया दक्षस्तिरस्कृतः
यतो सौत्वां द्वेष्टि न चाह ॥ पापच्यमानेनेति पूरुषबुद्धिसाक्षिणां पुरुषो जीवः बुद्धिर्महान् तेषां साक्षात्प्रपश्यन्तीति तथा तेषां ब्रह्मात्मकत्वेन प्र
कृतिपुरुषयोर्याथात्म्यविद्वामितियावत् ॥ तेषां समृद्धिभिः पूर्णकीर्त्यादिभिः तेषां पुरुषबुद्धिसाक्षिणां परं स्थानमैश्वर्यमधिकारं वा
अधिरोढुमासमर्थः अतएव पापच्यमानेन भृशं तप्यमानेन हृदयेन आतुरेन्द्रियः दुःखितेन्द्रियः तान्परं केवलं द्वेष्टि स्वयं मूर्खो

ऽदुर्भगाख्यमहद्भिः साम्यमलभानत्वान्न केवलं दे
ष्टि यथा असुरा हरिर्द्विषंति ॥२१॥

॥९१॥

वनुगृहमतो दक्षस्तया प्राणमादिभिरसत्कृतस्त्वं द्वेष्टि न चाह: प्रत्युद्गमेति हे सुमध्यमे प्राज्ञैर्देहमानिभिर्मिथः परस्परं प्रत्युद्गमप्रश्रयणाभिवादनं प्र
त्युत्थानप्रसामाभिवादनं विधीयते मनोवाक्कायैरिति शेषः प्राज्ञा नमन्निपाते तु प्राज्ञैर्गुहाशयाय ॥ अंतर्यामिणे परस्मै पुरुषायैव चेतसैव वि
धीयते न तु देहाभिमानिने करणत्रयेण मयः प्राज्ञैः परस्परं मनसैव विधीयते परिपूर्णे तस्मिन् कायिकव्यापारायोगादित्यर्थः वर्णनं तु अ
ज्ञानं प्राज्ञेषु पिनियमस्तस्य करणत्रयेणाविहितत्वात् ॥ न त्वं तर्ह्यमुद्दिश्य मानसिकं प्रत्युद्गमनादिकमस्मै देहाभिमानिने दक्षाय वि
हितमेव मयेति भावः ॥ २२ ॥ ननु किं विशेषेण चेतसैव प्रणतिर्विधीयते इत्युच्यते न तु मनोवाक्कायानाममतमेनेन तत्र कारणमाह ॥ २३ ॥
प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ॥ प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ २२ ॥
सत्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ॥ सत्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे मनसा विधीयते
२३ ॥ तत्ते निरीक्ष्यो न पितापि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये ॥ यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरो
त्तिरः इति ॥ विशुद्धं रजस्तमोभ्यामनभिभूतं सत्वं सत्वप्रधानं चित्तं वसुदेवशब्दितं वसुदेवशब्देनोच्यत इत्यर्थः तत्र विशुद्धे सत्वे वसुदेवशब्द
प्रवृत्तौ निमित्तमाह ॥ यस्मात्तत्र सत्वे पुमान् वासुदेवः अपावृतः अपगतं आत्मावरणं यस्मात्सः ईयते प्रतीयते प्रकाशते इति यावत्
तत्र सत्वं निर्मलत्वात्प्रकाशकमिसुत्करीणां वासुदेवस्वरूपरूपादिप्रकाशकसत्वप्रधानत्वाच्चित्तस्य द्योतमानत्वाद्देवत्वं भगवतो वासभ
वत्वात्वसुत्वमिति वसुदेवशब्दितं सत्वमित्यर्थः तस्मिंश्च सत्वमित्यर्थः तस्मिंश्च सत्वाख्ये चित्ते अधोक्षजोऽधःकृतेषु अक्षेषु इंद्रियेषु
अक्षेषु आविर्भवतीत्यधोक्षजः इंद्रियानगोचरः केवलपरिशुद्धचेतसैव ग्राह्यः भगवान् वासुदेवः मे मया मनसा विधीय

तस्मात्त्वयापितादेहकृद्दपिपालकः पितृवाद्दिमातृप्रयं देहकृद्दिसुकंममद्विट्द्वेषी दक्षोमननिरीक्ष्यनिरीक्षितुमयोग्यः नयातंद्दक्षये अनुव्रतानां
पितृनिरीक्ष्याः हेविबोधनयोद्दक्षः विश्वसृट्यज्ञगतं विश्वसृजां सत्रे आगते अनागसं निरपराधिनं मां दुर्वचसा दुरुक्त्या तिरोकरोत् तिरस्कृतवा
न् ॥ २४ ॥ यदि मद्वचोतिहायातिक्रम्य व्रजिष्यसि नहि भवत्यास्तव भद्रं समानेन भविष्यति प्रत्युत पराभव एव स्यादिति भावः बंधुकृतपराभवो
दुःसहः स्वापभवो देहिनि चेत्तत्राह संभावितस्य सन्मानितस्य स्वजनाद्योपराभवः स सद्यो मरणाय कल्पते भवति ॥ २५ ॥ इति श्रीचंद्रिकायां त्ट

यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ॥ संभावितस्य स्वजनात्पराभवो यदा स सद्यो
मरणाय कल्पते ॥ २५ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे तृतीयोध्यायः ॥ ३ ॥ श्रीमैत्रेय उवा
च ॥ एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् ॥ सुहृद्दिदृक्षुः परिशंकिता
भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ १ ॥

तीयः ॥ ३ ॥ भवो क्रमेऽर्द्धे नोपसंहरन्भवान्याः स्वाभिप्रेतार्थलाभनिमित्तं शोकं तन्निमित्तं भर्त्तरि क्रोधं भर्त्तारमनादृत्याध्वरे गमनं तत्र पितृ
कृतपराभवं तन्निमित्तं देहत्यागप्रकारं चाह ॥ एतावदिति शंकरः एतावदभिधाय उभयत्र पत्न्यास्तत्र गमने अनुज्ञादाने वा तन्निवा
रणे वा तच्छरीरनाशं चिंतयन् विरराम तत् स्नीमा सवनः सा सती सुहृद्दिदृक्षुः मातापित्रादीन्द्रष्टुमिच्छंती निष्क्रामती गृहाद्बहिर्निर्गच्छं
ती पुनः भवात् शंकरात्परिशंकिता भर्तुर्वचोतिहाय गमने का वा हानिः स्यादिति परिशंकिता च ततो द्विधा आस बभूव ॥ १ ॥

सुहृद्दिदृक्षायाः सुहृन्मिलनेच्छाया यः प्रतिघातः निरोधस्तेन दुखितचित्ता बंधुस्नेहाद्रुदंती अश्रूणां कलाभिर्लेशैरतिविह्वलाया कुला भवानी सती अप्रति-
पूरुषं समदर्शित्वेन प्रतिपक्षरहितं भवं रुद्रं रुषा जातवेपथुः उत्पन्नशरीरकंपा प्रधक्ष्यतीव भस्मीकुर्वतीव ऐक्षत अपश्यत् ॥२॥ तदा ततः सती विनि-
श्वस्य दीर्घं निश्वासं विधाय सतां जितात्मनां प्रियं यः प्रेम्णा आत्मनो देहस्यार्द्धं मह्यं दत्तवान् ॥ अनेन त्यागानर्हत्वमुक्तं तं रुद्रं हित्वा एषा स्त्रीस्वभावस्तेन वि-
मूढधीः नष्टमतिः शोकेन बंधुदर्शनासंभावनानिमित्तेन रोषेण दिदृक्षाप्रतिघातनिमित्तक्रोधेन पुनर्दूयता भर्त्रैव चातिक्रमनिमित्तेन

सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदंत्यश्रुकलातिविह्वला ॥ भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्ष-
त जातवेपथुः ॥२॥ ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा ॥ पित्रोरगात्स्त्रैणविमू-
ढधीर्गृहान्प्रेम्णात्मनो योऽर्द्धमदात्सतां प्रियः ॥३॥ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः
सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेंद्रास्तरसा गतव्यथाः ॥४॥ तां सारिकाकंदुकदर्प-
णांबुजैः श्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ५

र्थं संभावनया परित्यक्तेन हृदा पित्रोर्गृहान् प्रत्यगात् ॥३॥ द्रुतविक्रमां शीघ्रं पादविक्षेपान् कुर्वतीं एकामसहायां तां सतीं त्रिनेत्रानुचराः सहस्र-
शोऽनुययुः एतदेव प्रपंचयति सपार्षदैर्यक्षैः सहिता मणिमान्मदादयो येषां ते पुरः पुरतः वृषेंद्रो येषां ते तरसा बलेन गतव्यथा
निर्भयाः यद्वा अगतव्यथाः छेदः रुद्रगमनाभावादगतव्यथाः सभयाः तरसा बलात् तां ॥४॥ तां सतीं वृषेंद्रमारोप्य नंदीश्वरे उपवेश्य सा-
रिकादिभिः क्रीडोपकरणैः सारिकापक्षिविशेषः श्वेतातपत्रादिभिः राजचिह्नैश्च विटंकिता अलंकृता ययुः ॥५॥

आत्रब्रह्मघोषेणवेदघोषेणऊर्जितंव्याप्तंयज्ञसंबंधिवैशसंविशसनंयस्मिन्तद्ब्रह्मघोषोर्जितंचतद्यज्ञवैशसंचेतिकर्मधारयः विप्रर्षि-
भिः ब्रह्मर्षिभिर्जुष्टंसेवितंतथाविबुधैर्देवैश्चसर्वतोजुष्टंमृद्दारिभिः निसृष्टानिनिर्मितानिभांडानिपात्राणियस्मिन्तद्यजनंयागस्थानंसम
माविशत् ॥६॥ तत्रागतांसतींजननीस्वसृश्चविनाकश्चनकोपिनाद्रियतनादृतवान्कुतःयज्ञकृतोदक्षात्यद्भयंतस्मान्तत्रहेतुः ॥ तेनवि
मानितांअवमानितांतांतास्तुसादराः प्रेमाश्रुभिःनिरुद्धःकंठोयासांतथाभूताःतांमुदापरिषस्वजुःआलिंगितवत्यः ॥७॥ मात्रामातृभिःमा

आत्रब्रह्मघोषोर्जितयज्ञवैशसंविप्रर्षिजुष्टंविबुधैश्चसर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निःसृष्टभांडंयजनंसमाविशत् ॥६॥ तामागतांतत्रनकश्चनाद्रियद्विमानितांयज्ञकृतोभयाज्जनः ॥ ऋतेस्वसृर्वैजननींचसादराः
प्रेमाश्रुकंठ्यःपरिषस्वजुर्मुदा ॥७॥ सौदर्यसंप्रश्नसमर्थवार्तयामात्राचमातृस्वसृभिश्चसादरं ॥ दत्तांसप
र्यांवरमासनंचसानादत्तपित्राप्रतिनंदितासती ॥८॥ अरुद्रभागंतमवेक्ष्यचाध्वरंपित्राचदेवेकृतहेलनं
विभौ ॥ अनादृतायज्ञसदस्यधीश्वरीचुकोपलोकानिवधक्ष्यतीरुषा ॥९॥

तृभगिनीभिश्चसौदर्यांसंप्रश्नसमस्तवार्तयासोदरीणांभगिनीनांसंबंधियःकुशलप्रश्नादिस्तत्पूर्वयासमस्तवार्तयासकलदत्तां
तेनसमर्थवार्तयेतिपाठेसौदर्येणसोदरत्वेनभगिनीनांयःसंप्रश्नस्तत्रसमर्थयोग्ययावार्तयासादरंआदरेणसहितंयथातथा
सपर्यांपूजामुत्कृष्टमासनंसतीनादत्तनस्वीकृतवती ॥ तत्रहेतुःपित्रादक्षेणअप्रतिनंदितनाअनादृता ॥८॥ अरुद्रभागंनविद्यतेरुद्रस्य
भागोयस्मिन्तमध्वरंयज्ञंविभौदेवेरुद्रेपित्रादक्षेणकृतंहेलनंचावेक्ष्यअपराधंआह्वानाद्यकरणात्तथास्वयंयज्ञसदसिपित्राअ

सा सती देवी अमर्षवि[illegible]पन्नया अमर्षेण क्रोधेन विपन्नया अव्यक्तगिरा वाचा तत्रावहेलनात् समुत्थितान् दक्षं हंतुमुद्यतान् उद्युक्तान् भूतगणान्
ऋषिभिः महाहीन् स्वतेजसा स्वबलेन निगृह्य निवार्य धूमपथश्रमस्मयं धूमपथेषु धूमादिमार्गप्रवृत्तकर्मसु परिश्रमोत्थगर्वं शिवं द्वेष्टीति शि
वद्विट् तं दक्षं जगर्हे निनिंद सती निंदावाक्यान्युक्तवतीत्यर्थः ॥१०॥ तामेवाह ॥ न यस्येति त्रयोदशभिः प्रियात्मनः प्रियः निरतिशयप्रीति
विषयः आत्मा परमपुरुषः यस्य प्रियो हि ज्ञानिनोऽत्यर्थमहमिति गीतत्वात् ॥ यस्य लोके भुवने देहभृतां मध्ये अतिशायनः ॥ अति
शयिनः प्रियः प्रीतिविषयः तथाऽप्रियो वा नास्ति सर्वांतरात्मानं परमात्मानमेव निरतिशयप्रीतिरूपापन्नया भक्त्या भजतस्तस्य सर्वं ब्र

जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ॥ स्वतेजसा भूतगणान्समुत्थितान् निगृह्य देवी जगतोऽभिशृण्वतः ॥१०॥ श्रीदेव्युवाच ॥ न यस्य लोकेऽस्त्यतिशायनः प्रियः तथा
प्रियो देहभृतां प्रियात्मनः ॥ तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवंतं कतमः प्रतीपयेत् ॥११॥

ब्रह्मात्मकतया नु संदृश्यतः प्रियादिविभागो नास्तीत्यर्थः तस्मिन् मुक्तवैरके सर्वभूतसुहृदि समस्तात्मनि समस्तस्यात्मा आत्मवत्प्रियः
तस्मिन् यद्वा समस्ते आत्मा ब्रह्म पूर्णमिति शिवं यस्य तस्मिन् ऋते द्वैतसंप्रपन्नेषु वामदेवप्रतिपेदे अहं मनुरभवं सूर्यश्च कक्षीवान्
ऋषिर्विप्र इत्यादिश्रुत्युक्तविधया सर्वात्मकं ब्रह्म स्वस्मिन् साक्षात्कुर्वती वार्थः यो हं शरीरकः परमात्मा स एव मन्वादिशरीरक इति श्रु
त्यर्थः यद्वा ब्रह्मणा आवेशावतारत्वाद्रुद्रे ब्रह्मदृष्ट्या वेदमुक्तं सर्वात्मनीति अस्मिन्नशेषदीनसुहृद[illegible]तः एवंविधे रुद्रे भवंतं वि

णावं ब्रह्मविरहे प्रेमरसस्य महत्त्वप्रतीपाविषयत्वमुक्तं अथैतस्मिन्साधौ ब्रह्मविरहितापराधिनो दुर्जनात्स्वतउमंचमिदं शरीरं सस्वामीतिवक्ष्यमाणप्रथमं
साध्वसाधुलोको विभजति ॥ दोषानिति ॥ हे द्विज पित्र शब्देना संबोधनं तदृषिशेषापाय भवादृशाः केचित्वादृशाः दुर्जनाः परेषां स्वापेक्षया असंमेषागु
णेषु सत्स्वपि दोषानेव गृह्णंति तानेवोद्घाटयंति न तु गुणान् असाधवइत्यर्थः येषु नः गुणाः दयः दोषास्तु गृह्णंति किंतु फल्गून्यानपि गुणानेव
बहुलीकरिष्यवः वितनोतु मि(?)वो भवंति ते महत्तमाः गुणेषु साधवइतिपाठे येसाधवः फल्गूनपि गुणान् बहुलीकरिष्यवस्ते महत्तमाइत्यन्वयः
तेषु च मध्ये त्वमेषु भवान घं अपापं अविरतं लब्धवान् कृत्वानित्यर्थः ॥२१॥ असतोवादृशामिदं महत्त्वपचरणं युक्तमेवेत्याह ॥ नाश्चर्यमिति कु
णपात्मवादिषु कुणपं शवं प्राणैः शरीरमेवात्मेति ये वदंति तेषु भवादृशेष्वसत्सु सर्वदा सेर्ष्य ईर्ष्या असमासेर्ष्यं यथा भवति तथा महद्धिनिंदाम
दोषान्परेषां हि गुणेषु साधवो गृह्णंति केचिन्न भवादृशा द्विजा ॥ गुणांश्च फल्गून्बहुलीकरिष्णवो महत्तमास्तेषु विर
भुवानघम ॥२२॥ नाश्चर्यमेतद्यदसत्सु सर्वदा महद्धिनिंदाकुणपात्मवादिषु सेर्ष्यं महापूरुषपादपांशुभिर्निरस्ततेजस्सु तदेव
शोभनं ॥२३॥ यद्यस्तरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् पवित्रकीर्त्तिं तमलंघ्यशासनं भवानहो द्वेष्टि शिवं शि
हत्तमविषयनिंदेति यदेतत्तदाश्चर्यं न भवति यस्तु तत्र महापुरुषपादपांसुभिः महापुरुषा महत्तमास्तेषां अंघ्रिरजोभिः निरस्ततेजः प्रभावो ये
षां तेषु त्वादृशेषु तदेव महद्धिनिंदनमेव शोभनं उचितं यद्यपि महांतः स्वनिंदां सहंते तथापि तत्पादरेणवस्तु न सहमानास्तेषां तेजो निरस्यंते
अतोसत्सु विनिंदनमेवोचितमित्यर्थः ॥२३॥ कोसावपचारो महत्सु मया कृतइत्यत्राह यस्मेति द्व्यक्षरं शिवइत्यक्षरद्वयात्मकं नाम न
मधेयं प्रसंगाद्वापि सकृद्गिरा वागिंद्रियेणेरितमुच्चरितं नृणामघं पापमाशु झटिति निवर्त्तयति सत्नामपि मामोच्चारणादेव भगव
न्नामवदघनिवर्त्तकत्वादिति भावः अलंघ्यमनतिक्रमणीयं शासनमाज्ञा यस्य तं शिवमशिवो मंगलो भवान्द्वेष्टि अहो कष्टं अमं

॥२०॥

ङ्गिरद्ब्रह्मरसासवार्थिभिः ब्रह्मरसो ब्रह्मानंदः स एवासवो मकरंदस्तदर्थिभिः ब्रह्मानंदानुभवमधुलिप्सुभिः महतां मनांस्येवालयो यस्य गंगास्थैर्यस्य र
रुद्रस्य पादपद्मं निषेवितं ईप्सिताज्ञानमान्द्यच्छेदितिज्ञानप्रदत्वादितिभावः कीदृशं तस्मात् पादपद्मं यन्निषेवितं तत्राह॥ यस्य पादपद्मं अर्थितो लोकस्य या
चमानस्य जनस्य आशिषोऽभिष्टानि वर्षति ददाति तस्मै विश्ववंधवे विश्वानुकूलाय भवान् द्रुह्यति अपकरोति कुत्सितं हे इति चतुर्थी॥ २४॥ ननु मंग
लाचारत्वान्धामैव न सम्यगित्यत्राह किं वेति॥ यो रुद्रः श्मशाने जटाः अवकीर्य विक्षिप्य नमाल्यभस्मन्कपाली॥ श्मशानमाल्यभस्मर
कपालवान् पिशाचैः सह अवसत्तमेवमशिवं अमंगलाचारं रुद्रं तच्चरणावसरं रंजइ आहारः ये ब्रह्मादयो महद्भिः शिरोभिर्दधति धा
रयंति नितेत्वदन्मेवतो मे ब्रह्मादयः मनीषादि नवब्रह्मप्रभृतयः यद्वा अनंतगुणेसविज्ञानो बहुव्रीहिः॥ अमस्यया अजं लोकगुरुं तं नत्वेमादि पृथ्वी
यस्य पादपद्मं महतां मनोलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः॥ लोकस्य यदर्थनि चाशिषोऽर्थिनः तस्मै भवान् द्रुह्यति विश्ववंधवे
परविरोधात्॥ शिवास्यां शिवद इति आस्थानाम यस्मतथाभूतं न विदुः किं विदुरित्यर्थः अमंगलाचारस्त्वनुकरणमात्रमितिभावः ननु सप
रस्य ब्रह्मणो विष्णोः सर्वोत्तमत्वजगत्कारणत्वोपास्यत्वमोक्षप्रदत्वादिति पादकवेदांतार्थोपबृंहणपरेष्वपि पुराणेषु अश्रुतत्र तत्र रुद्रादिजी
वविशेषस्य कार्यत्वकर्मवश्यत्वादीन्यभिधाय पुनः समस्तान्यनिमुक्तवैरके ब्रह्मादयो महद्भिरर्द्धधतितच्चरणावसरं एनाहं न यज्ञो न वपूज्य
मस्ये येदेहभाजो नु न यष्टव्यं तत्त्वं विदुः प्रमाणं बलवीर्ययोर्वा त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः विश्वस्रजसि पास्यसि क्रीडन्नूर्णप
दोयथा॥ अहं ब्रह्मा च शर्वश्च जगतः कारणं॥ त्वयात्ममेकं भावानां यो न पश्यति वैभिदां सर्वभूतात्मनां ब्रह्मन्स शांतिमधिगच्छतीत्यादिषु
भवानी ब्रह्मविष्ण्वादि वचनेषु सर्वोत्तमत्वं जगत्॥ कारणत्वोपास्यत्वादीन्यविरुद्धान्प्रतिपादयन्भगवान्पाराशर्यः कथं विश्वसनीय

इति चेन्न अन्यपुराणे परस्परविरुद्धार्थकथनं न व्याप्यमिति कुचित्तामसानामपि देवतानां तरस्यो न्नमत्वकरणतोपासनत्वादिकं प्रतईन.धिकरणन्याये
नरुद्रादिशरीरकपरमात्माभिप्रायकं रुद्रादेर्भगवदावेशावतारत्वाद्भगवद्दृष्ट्योपपन्नमेतत् अथवा यथावस्थितमत पूर्ववृत्तांतस्यैवास्मिनु
पुराणोक्तत्वान्न तत्र तत्र कथासु भवानी प्रभृतीभिर्योनिवाक्यान्यभिहितानि ते षामेवात्र निवद्धत्वात्तत्र भवान्याहि वाक्यानां पतिपराण्येव ब्रह्म
मेकत्व प्रशंसात्मकत्व प्रशंसात्मकत्वादितात्पर्यविशेषप्रवृत्तत्वान्न पाराशर्येणाविरुद्धमभिहितं नन्वेवमपि ब्रह्मात्मकत्वेनापि रुद्राद्युपा
सनमपि कर्तव्यमिति नियध्वसंरंनामभिरेषितेन रुणां सहकृत्संगादद्यमाशु हंतिपवित्रकीर्तेयेम् ईंनिभिर्धत्तितञ्चरणावसृष्टमित्यादिव
चनेभ्यः प्रतीयते कुचित्तु चित्राविकतं तेनात्मं देवनमस्कुर्यान्नान्यं देवं निरीक्षयेत् नान्यप्रासादमारोहेन्नान्यं वायतनं विशेदित्यादिभिर्वचनो

कं वाशिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने॥ तन्मा
ल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्द्धभिर्धत्ति तच्चरणावसृष्टम्॥१६॥

न रवं हृत्याहि प्रतिषेधस्यानङ्गत्वैः सहदर्शनसमानाः सर्वसंस्पर्शसंभाषणादरविभुक्त्यादयः प्रतिषिद्धाः अन्यतदेवतान्तरतद्भक्तादयस्तत्र
तच्चिनिंद्यंते॥ अतः सात्वतेन पुराणयोर्विरोधः मैवं ब्रह्मोपासनं हि द्विविधं सद्वारकमद्वारकं चेति॥ तत्र सद्वारकोपासं नामराजस्तमः प्र
कृतिब्रह्मरुद्रादिजीवशरीरकपरमात्मोपासनं॥ अद्वारकं तु शुद्धसत्वमयस्वेच्छोपात्तदिव्यमंगलविग्रहविशिष्टस्यानिरस्तनिखिलदो
षस्यानंतकल्याणगुणाकरस्य श्रियः पत्युर्नारायणस्योपासकरूत्यनुसारेण वासुदेवसंकर्षणरामकृष्णादिव्यूहविभवादिभेदेनोपा
सनं तत्राद्यमुपासनं तत्तत्फललिप्सुभिः कार्यं द्वितीयं तु मुमुक्षुभिः कामिभिश्च एतच्च सर्वं भगवतागीतं। योयो यां यां तनुं भक्तः श्रद्धया

सिंचुमितीत्याहिना ॥ अनन्याश्चिंतयंतो मामित्याहिना देवांतरे वयज्ञो यांतीत्याहिना च ॥ अत्राप्युपक्रमे प्रथमस्कंधेऽभिहितं ॥ जत्तमप्रश्नेन यः समग्रीः
त्मोत्मभजेति वै ॥ पितृन्भूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः श्रेयांसि तत्र खलु सत्वतनोर्नृणांस्युरिति तथा द्वितीये ॥ अकामः सर्वकामो वा मोक्ष
काम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परमिति ॥ वक्ष्यति च ॥ धर्मार्थकाममोक्षाणां यद्वेद्ध्य आत्मनः एकमेव हरेस्तत्र कारणं
पादसेवनमिति ॥ एवं स्थिते द्विविधयाप्युपासनया अभिचारिण्येव भवितव्यमिति मुमुक्षया भजतां स्वोपास्याद्देवतांतरवैभवादिदर्शने
ननमस्कारादिकरणे स्वदेवताभक्तिर्व्यभिचरिता स्यादिति सर्वथा मुमुक्षूणां देवतांतरभजनं निषिध्यते सर्वदेवतानां ॥ ब्रह्मात्मकत्वे
नानुसंधानं त्वमविरुद्धमेवेति न मात्वैतेन मुग्राण्यो विरोधः देवतांतरनमस्कारादि निंदा तु न हि निंदां निंदितुं प्रवृत्ता किंतु निंदाहितरत्नेमानुमितिमा

द्वैतोऽपि धावयनिरयाद्यह्वकल्मषं शोधर्मोऽवितर्थैः सर्वाणि भिर्नैर्भिरस्यमावे ॥ छिंद्यात्समस्य सरुषतीमसतां प्रभुश्चेजिह्वामसून्नपि ततो वि
सृजेत्स धर्मः ॥१७॥ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः ॥ जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं
प्रचक्षते ॥१८॥

येनोपपद्येत्स्वगुणेन यं ॥१६॥ भवतु वहुधा भवो मया भिध्नतस्तथापि किं भवत्या भवितव्यमित्यत्राह कर्णाविति द्वाभ्यां धर्मावितरि धर्मरक्षके ई
श्वरे स्वतंत्रा भर्तृनेमे असत्तानिभिर्निरंकुशैर निवारितैर्नृभिर्दुर्जनैरस्यमाने अधिक्षिप्यमाणे सति यद्यधिक्षेपं श्रुणुयान्न सुजनः अकल्पः विनि
रूकुं दुर्जनं शिक्षायामसमर्थस्तर्हि कर्णौ पिधाय अपच्छेद्यदि ततो निरगात् निर्गच्छेत् यदि प्रभुः समर्थस्तर्हि दुष्टानां दुष्टां जिह्वां प्रसह्य बलात्कारेण छिंद्यात् स्व
यमप्यसूनप्राणान् विसृजेदिति नियमस्तु धर्मः ॥१७॥ अतः शितिकंठगर्हिणः शंकरद्वेषिणस्तव अपादानस्यैव शेषत्वविवक्षया पञ्चमी उत्पन्नं
ममम देहं यं कलेवरं न धारयिष्ये प्रमादादापन्नस्यापवित्रस्य संग विनाश विना न शुद्धिरिति दृष्टांतेनाह मोहाज्जग्धस्य भक्षितस्य जुगुप्सि

नन्वग्निमेवसामस्तानियतोसावमंगलोनष्टोवैदिकंपंथानमनुसंधेयवर्तते ॥ अतोमयावैदिकमार्गानुवर्तिनाश्रेष्ठेणाशिक्षितव्यइत्यत आह ॥ नेति स्वात्मन्येवलोकेलो
कयतेपश्यतीदमनेनस्मादृश्यतइतिलोकः ब्रह्मतस्मिन्नरममाणस्यमहामुनेरुद्रस्यमतिर्वेदवादान् अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभव
ति अपामसोममसृता अभूमेत्यादीन्कर्मप्ररोचनानर्थवादाननानुवर्ततेतेपुनरासक्तोभवतिनिवृत्तिमार्गनिरतस्यनप्रवृत्तिरूपेस्वचित्तमथवत
इतिवनस्यवैदिकपथानमनुवर्तनमितिभावः अनयोःप्रवृत्तिनिवृत्तिधर्मयोराचारःपृथगेवदृश्यतेयथादेवमनुष्ययोर्गतिःपृथगेवदृ
श्यतेगतिराकाशएवमनुष्याणांनुपृथिव्यामेवतद्वत् ॥ अथापिभवानेवश्रेष्ठस्तथाप्युत्कृष्टःस्वकीयेधर्मेस्थितोवर्तमानःपरंनिन्द

नवेदवादाननुवर्ततेमतिःस्वएवलोकेरमतोमहामुनेः ॥ यथागतिर्देवमनुष्ययोःपृथ
क्स्वएवधर्मेनपरंक्षिपेत्स्थितः ॥ १९ ॥ कर्मप्रवृत्तंचनिवृत्तमप्यृतंवेदेविविच्योभयलिं
गमाश्रितम् ॥ विरोधितद्यौगपदैककर्तरिद्वयंतथाब्रह्मणिकर्मनर्च्छति ॥ २० ॥

दंनक्षिपेन्नाधिक्षिपेदितियतस्सावधर्मः ॥ १९ ॥ प्रवृत्तिधर्ममपिवैदिकत्वाविशेषात्किमितिनानुवर्ततेभवइत्यत आह ॥ कर्मेति ॥ प्रवृत्तंस्व
र्गादिफलोद्देशेनप्रवर्तनंफलकामनातोनिवृत्तंचकर्मउभयोर्लिंगंफलाभिसंधिसहितत्वासहितत्वाभ्यांचिह्नाभ्यांयुक्तंयथाभवतितथा
वेदेविविच्यआश्रितंस्वर्गकामोयजेतशांतोदांतउपरतस्तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेन
धर्मेणपापमपनुदतीत्यादिवेदे अमांकुर्याणयद्यपिविहितंतथानयापितद्द्वयंप्रवृत्तिनिवृत्तिभेदेनद्विविधंकर्मयौगपद्येनकर्तर्येक
स्मिन्नधिकारिणिविरोधिपरस्परविरुद्धं अतोब्रह्मणिब्रह्मज्ञानेकर्मप्रवृत्तंचोभयंकर्मनऋच्छतिनप्राप्नोतिसाधनतामितिशेषःकेवलं

यतएवोभवविधं कर्माधिकारिभेदेष्ववस्थितमतः स्वदनुष्ठितनिवृत्तधर्मस्य ध्या अणिमादयः सिद्धयः प्रवृत्तिधर्मपरयणांभावतां न संतीत्याह हे पि
तः अस्मादपस्थिताः अस्माभिराश्रिताः परिगृहीताइत्यर्थः पदव्यः अणिमादयः सिद्धयः वः युष्माकंमा न संतीत्यर्थः ॥ नह्यस्माकं सिद्धयोरुद्रस्मनसं
नीतयेत्याह याभवदीयाः स्वर्गादिपदव्यः अनुधमवर्त्मभिः धर्मादिमार्गभ्रष्टयज्ञादिकर्मानुयायिभिस्तहन्तस्त्रैयाज्ञियान्येनकुत्सितान्येनत्रैते
रसुरद्धिः आगिभिर्यज्ञशालात्स्वेवेमिताल्पुना ॥ अस्मदाश्रितास्तु पदव्यः अव्यक्तलिंगादुरवममचिह्नार्विभाव्याः ॥ अवधूतैर्निरस्तनिखिलज
गमदरागादिसंसारिकधर्मैः सेविताः परिगृहीताः अतः फलतोनुष्ठानतश्चमहादेववैलक्षण्यं प्रवृत्तिनिवृत्तधर्मयोरितिनमहतमानांप्रवृत्तिधर्मैरु

मवः पदव्यः पितरस्मदाश्रितायायज्ञशालासुनुधमवर्त्मभिः ॥ नदृन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा
अवधूतसेविताः ॥ २१ ॥ नैतेनदेहेननृकृतागसोदेहोद्भवेनालमलंकुजन्मना व्रीडाममाभूत्कुज
नप्रसंगतस्तज्जन्मधिग्योमहतामवद्यकृत ॥ २२ ॥ ॐ ॐ ॐ

विरुत्पद्यतइतिभावः ॥ २१ ॥ किंवहुनासर्वथास्वदेहेनत्वक्ष्मामेवेत्याह ॥ नैतिद्वाभ्यां हेहेदेहे कृतागसः कृतापराधस्यनवदेहोद्भवेनदेहादु
त्पन्नेन आर्षत्वान्मापेक्षमपि समासः नित्यसापेक्षात्वादानेनकुजन्मनामदीयेनकुत्सितेनदेहेननप्रयोजनं किंतु अलमहम् ॥ ननुष्मास्य
सिमदेहंकथंसक्ष्यसितत्राह ॥ कुजनस्यनवप्रसंगात्संवंधातममव्रीडालज्जा अभूत् अतोमहतामवद्यकृद्विप्रियकर्तादेहः तस्माद्यज्ज
न्मतस्मिन्निदिनंतत्संवंधात्श्लाघ्यमित्यर्थः ॥ २२ ॥ किंचब्रह्मभवजोमहद्भः परिहासादिपुमर्मोक्तिपुमाहशाययामीति संबोधयन्

भा॰टी॰
॥२३॥

संबंधो येषां ते गोत्रबंधवः यदा आह गद्गदाक्षराणि तदाहं व्यपेतनर्मस्मितं व्यपेतं अपगतं नर्मपरिहासः स्मितं च यया भवस्य एवं दुर्मनाः अतिदुःखितचित्ता
भवामि तस्माद्धि विभिन्नमेव तनुं त्वत्तः प्राप्तामहं गाज्ञानामि इदं कलेवरं व्युत्स्रक्ष्ये त्यक्ष्यामि हे शत्रुहन् विदुर इत्युक्तप्रकारेण अध्वरे यज्ञे दक्षमनूद्य अ
नूक्त्वा उदीचीमुत्तरदिशं प्रविश्य निषसाद शांतवाक् गृहीतमौना निषसाद उपविष्टवती ॥२३॥ तत्र जलं स्पृष्ट्वा आचम्येत्यर्थः पीतदुकूलवस्त्रेण
संवृता दृक् दृशम् आर्षत्वात् द्वितीयाया दृक् निमील्य योगपथं योगिनां देहत्यागमार्गं समाविशत् आश्रितवतीत्यर्थः ॥२४॥ योगपथमाश्रय

गोत्रं त्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजम् ॥२३॥ श्रीमैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शांतवाक् ॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥२४॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदितानयत् ॥२५॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥२६॥

तामेवाह ॥ कृत्वेति जितं आसनं यया सा अतएव मलरहिता अनिंदिता निर्दूषणा सती अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिनिरोधेन समानौ समानवृत्ती
नाभिचक्रे कृत्वा ततः उदानवायुमुत्थाप्य धिया मनसा शनैः हृदि स्थाप्य स्थापयित्वा उदानवायुं कंठात् कंठमार्गेण भ्रुवोर्मध्यमनयत् ॥२५॥ महताम
पि मध्ये महीयसा महत्तमेन रुद्रेण आदरं मुहुर्मुहुः पुनः पुनः अंकमुत्संगं प्रसमारोपितं स्वदेहमेवं दक्षक्रोधेन जिहासती त्यक्तुमिच्छती मनस्विनी
स्वतंत्रा स्वतंत्रा मरणे इत्यर्थः सती भवानी गात्रेषु अंगेषु अनिलाग्निधारणां दधार चकारेत्यर्थः तया हि धारणया अनिलाग्न्योः उत्पत्तिः ॥२६॥

॥२३॥

ततः अद्भुते जगत्यंतिजासवं गुरोः स्वभर्तुः रुद्रस्य चरणांवुजासवं चरणांवुजे आसवमानरं चिंतयंती अनुभवंती अतएव दहनेकल्मषापापरहि
ताभर्तुः रूपमालानरं हृदि श्रीचाचिंतितवती देहः सद्यः समाधीनायोग्निसेनप्रजज्वालप्रज्वलितोभवत् ॥२७॥ तदद्भुतमाश्चर्यं पश्यतो भुवि दिवे आका
शेचसुमहानतुच्चैः हाहेति वारः शब्दः अभूत् देवाहदेवतमस्य देवश्रेष्ठस्य रुद्रस्य देवीप्रियासती केन दक्षेणप्रकोपप्रापिता असन् प्राणान्
जहौ अत्यजत् ॥२८॥ अहोप्रजापतेर्दुरात्म्यमहदनात्म्यं दौर्जन्यं अथ पश्यत चराचरं विश्वं यस्य रुद्रस्य प्रजाः प्रजावत् प्रीतिविषयं सुहृद्दस्म

ततः स्वभर्तुश्चरणांवुजासवं जगत्गुरोश्चिंतयती न चापरं ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्नि
ना ॥२७॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत ॥ हंत प्रिया दैवतमस्य देवी जहावसून्
केन सती प्रकोपिता ॥२८॥ अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ॥ जहावसून् यद्विमता
त्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥२९॥ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेपकीर्तिं महतीमवा
प्स्यति ॥ यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेपराधतः ॥३०॥

र्थः ॥ तस्य दक्षस्य सती भार्या यस्य चराचरं प्रजाः प्रजावत्स्नेहविषयः सर्वत्र स्नेहएवास्यन्याय्य इतिभावः तेन दक्षेणविमता
विमानिता असून् जहौ नत्विदं विमानयोग्यस्माह ॥ आत्मजा तत्रापि मनस्विनी प्रशस्तमनस्वं गुणवती तस्यर्थः अतएवाभीक्ष्णं पुनः
पुनः मानं सन्मानं अर्हति ॥२९॥ दुर्मर्षं मत्सरं तासहमानं हृदयं यस्य सोयं ब्रह्मध्रुक् ब्रह्मवंधुः ब्राह्मणापसदः दक्षः लोके असती अपकीर्तिं च अ
वाप्स्यति चात्करकं च यद्यस्मः स्वीयामंगजां अपराधतः स्वापत्यामृतये मरणाय उद्यतां उद्युक्तां पुरुषद्विटशिवद्वेषी दक्षः तत्सुरूपायवि

यद्दरंति प्रयोगान्यथा सद्दस्य भगवद्धाम्न कल्याणरूद्रं द्विषंत्यपि भगवंतं ते इशीसमर्थः न प्रत्यषेधत न न्यवारयत ॥३०॥ तत्राह सा द्यायणा अद्भुतमसुत्यागंश्रा
ण्त्यागं दृष्ट्वा जनेनैवं वदति सति रुद्रपार्षदा दक्षं हंतुं उद्यतान्यायुधानि यैस्ते उदतिष्ठन् उत्थितवंतः ॥३१॥ तेषामापततां समीपमागच्छतां पारिष
दां वेगं निशाम्य दृष्ट्वा भगवान् भृगुः यज्ञघ्नान् हंतीति यज्ञघ्नघ्नं तेन यजुषा अपहता असुरा रक्षांसि पिशाचा इति मंत्रेण दक्षिणाग्नौ जुहाव
हे नितिविस्तरः ॥३२॥ अध्वर्युणा भृगुणा हूयमाने सति येन तपसा सोमं प्राप्तास्ते ऋभवो नाम देवाः सहस्रशः उत्पेतुः उत्थिताः ॥३३॥ ब्रह्मतेजसा उश

वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतं दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ॥३१॥ तेषामापततां वेगं निशाम्य भगवान्भृगुः
यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥३२॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ॥ ऋभवो नाम तपसा सोमं।
प्राप्ताः सहस्रशः ॥३३॥ तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः ॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ॥३४॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे चतुर्थोऽध्यायः ॥४॥ श्रीमैत्रेय उवाच ॥ भवो भवान्या निधनं प्रजापतेरसत्कृतायाः
अवगम्य नारदात् स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥१॥

द्दीप्यमानैः अलातान्येवायुधानि येषां तैः ॥ ऋतुभिर्हन्यमानाः प्रमथा रुद्रपारिषदाः दिशो भेजुः पलायितवंत इत्यर्थः ॥३४॥ इति श्रीमद्वी
रराघवाविरचितायां चतुर्थस्कंधे चतुर्थोऽध्यायः ॥४॥ एवं सत्याः प्राणत्यागनिमित्तं तत्त्यागप्रकारश्च ॥ सप्रपंचमुक्तः ॥ अथ तत्प्रसंगात्समर्कं दह
आध्वरविनाशं पुनस्तत्संधानं च सप्रपंचमाह त्रिभिरध्यायैः तत्राद्येनाध्वरविनाशप्रकारमाह मैत्रेयः भव इति ॥ प्रजापतेर्दक्षस्य कर्तुरिषष्टी
तेनासत्कृतायाः भवान्याः सत्याः निधनं तथा रुद्रस्याध्वरे ये ऋभवो देवास्तैर्विद्रावितं पलायितं स्वपार्षदानां सैन्यं च नारदान्मुनेरवगम्य श्रुत्वा

अपारं क्रोधमादद्दे हृदि कृतवानित्यर्थः ॥१॥

ततः सधूर्जटिः रुद्रः घोरः सन्न क्रुद्धमुखइवः प्रोद्धुरोयेनसः तडितांवह्नीनांचसदाज्वालाः तद्रूपंरोचिर्यस्यास्तांजटांउत्कृत्य उत्पाट्य उत्थितः गंभीरो
नादोयस्यसः हस्तवातांजटांभुविविससर्ज अपातयत ॥२॥ ततोजटायाः सकाशात् अतिकायः वीरभद्रः ॥ जातइतिशेषः तंविशिनष्टित्वाद्रेहेमाद्रि
वंस्पृशन् अनुच्चइत्यर्थः घनरुक कृत्स्नवर्णः तिस्रसूर्यसदृशादृशोयस्य करालाउग्रादंष्ट्रायस्य ज्वलन्नग्निरिवमूर्द्धजायस्य नृकपालानां
मालाअस्यसंतीतिनया ॥ विविधानिउद्धृतान्यायुधानियस्यसः ॥३॥ किंकरोमिकिंकरवाणीतिगृणंतंभाषंतंबद्धांजलिंतंवीरभद्रंभूतनाथो

क्रुद्धः सुदष्टौष्ठपुटः सधूर्जटिः जटांतडिद्वह्निसटोग्ररोचिषं ॥ उत्कृत्यरुद्रः सहसोत्थितोहसन्गंभीरनादोविससर्जतां
भुवि ॥२॥ ततोतिकायस्तनुवास्पृशन्दिवंसहस्रबाहुर्घनरुक्त्रिसूर्यदृक् ॥ करालदंष्ट्रोज्वलदग्निमूर्द्धजः क
पालमालीविविधोद्यतायुधः ॥३॥ तंकिंकरोमीतिगृणंतमाहबद्धांजलिंभगवान्भूतनाथः ॥ दक्षंसयज्ञंजहिमद्भटा
नांत्वमग्रणीरुद्रभटांशकोमे ॥४॥ आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुं ॥ मेनेतदात्मानमसंगरंह
सामहीयसांतातसहः सहिष्णुं ॥५॥ अन्वीयमानः सतुरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवं ॥ उद्यम्यशूलंजगदंतकांत
कं संप्राद्रवत घोषणभूषणांघ्रिः ॥६॥

भगवान्रुद्रः आहउवाच हेरुद्र हेभटयुद्धकुशल मद्भटानांत्वमग्रणीर्नायकः मे अंशभूतसयज्ञंदक्षंजहिविनाशय ॥४॥ कुपितेनमन्युनारुद्रे
णैवमाज्ञप्तोदेवदेवंविभुंरुद्रंपरिचक्रमेप्रदक्षिणीचकारतदा असंगरंहसाप्रतिघातरहितेनवेगेनमहीयसांबलीयसामपिसहः तेजोबलंनशाहि
ष्णुंसोढुमक्षमं आत्मानंमेनेअमन्यत ॥५॥ सतुवीरभद्रः भृशंनदद्भिः ध्वनद्भिः रुद्रपारिषदैरन्वीयमानः परिवेष्टितः सुभैरवं अतिभयंकरंयथा

भा.द.
॥२५॥

भवतितथाश्चनरहत्नवाद्ततः सवीरभद्रोजगर्जतंतन्कोमतुलस्याप्यकोपसंरम्भलमुद्यम घोषणानि ध्वनंति भषणानि नूपुरादीनि ययोस्तावंघ्री यस्य सः
प्राद्रवत् दक्षाध्वरं प्रसमगात् ॥६॥ अथततः ऋत्विजो दक्षो दक्षाध्वरे ऋत्विजः यजमानः दक्षः तथा सदस्याः सभ्याः द्विजास्तत्पत्न्यश्च उदीच्यां ककुभि दि
शि रेणुं प्रसमीक्ष्य ततमानं भवति किं तु रजइति ज्ञात्वा आहुः रजइतएततुकुतोभूदितिद्ध्युश्चिन्तयामासुः ॥७॥ हे त्वं नरा संभवे नोतातिकं कल्पयंत आहुः
वाता इतिवाता श्चवाता वायवः नवांति नप्रसरंति दस्यवश्चोरादयः नसंभवति ॥ नचहेतुर्हियस्मात् उग्रदंडो दमनं प्रशासनं यस्य सः प्राचीनबर्हिः न

अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ॥ तमः किमेतत्कुत एतद्रजोभूदितिद्विजा द्विजपत्न्यश्च दध्युः ॥६॥ वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः ॥ गावो न काल्यन्त इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥७॥ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैव तस्य ॥ यत्पश्यन्तीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥८॥

हातश्चोराजावतिनदस्यवः संनीतिभावः हेत्वा कस्मिकत्वद्योतकंगावोनकाल्यंते नप्रोत्प्रनीयंते अतइदंरजः कुतउत्थितं अधुनालोकः प्रलयाय
नाशाय कल्पते संभाव्यतइत्यर्थः ॥८॥ प्रसूतिर्दक्षपत्नी तन्मिश्राः तत्सहिताः स्त्रियः उद्विग्नचित्ताः उद्विग्नं भीतं चित्तं यासां ता ऊचुः तस्य दक्षस्य वृजि
नस्य पापस्य तस्यैवायं विपाकः फलं यत् यस्मात् प्रजेशो दक्षः दुहितॄणां पश्यन्तीनां सतीनां अनेनतस्याः दुःखाधिक्यं सूचितं अनागसं निरपराधां सुतां

॥२५॥

असह्यप्राकृमंरुद्रंकोपयतोदृस्या मेगतमवृषंभावान्नाहुःयम्यांयस्त्विति योरुद्रोंतकाले प्रलयकाले व्युप्तोविकीर्णः जटाकलापोयस्यस्वम्खलस्य
सख्या अग्रेण अर्पिताओंताहिगजेंद्रा येनउद्दिताविउन्त्रमितानि अस्त्राणियेस्तेहोषः वाहवएवध्वजास्तान् विततप्रसार्यउद्घाट्टहासः सएवस्तन
यित्नुर्गर्जितंतेनभिन्नाविहीर्णादिशोयेनसहर्षेणान्त्सानि ॥१०॥ तमेवंभूतमसह्यमप्रतिभूतंतेजोयस्यतंरुद्रममर्षयित्वा असहनयुक्तंकृत्वामसुर
लोकोधेनस्तुतवान्सं अनएवद्दुर्निरीक्ष्यंद्रष्टुमशक्यंभ्रुकुट्याउग्रंदंष्ट्राभिर्मुद्दरस्तःउस्थितोभागणेनक्षत्रसंघोयेनतंकोपयतोविधातुरपिकिंस्व

यस्त्वंतकाले व्युप्तजटाकलापः स्वम्खलसख्यार्पितदिग्गजेंद्रः ॥ विततनत्समुदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयि
त्नुभिन्नदिक्कः ॥१०॥ अमर्षयित्वातमसह्यतेजसंमन्युप्लुतंदुर्विषहंभ्रुकुट्या करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्ति
किंकोपयतोविधातुः ॥११॥ वहेवमुद्विग्नदृशोच्यमाने जनेनदरहृत्त्समुहूर्महात्मनः ॥ उत्सेतुरुत्पाततमाःसह
स्वशोभयावहादिविभूमौचपर्य्यक् ॥१२॥ तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैरुदायुधैः
पिंगैःपिशंगैर्मकरोदराननैःपर्याद्रवद्भिर्विदुरान्वरुध्यत ॥१३॥

स्तिस्यात्रविधातुरप्येवमस्याकाककथेत्यर्थः ॥११॥ उद्विग्नाप्रचलिताहृग्यस्यतेनजनेनबहुधाभवत्सेवमुच्यमानेसतिसहस्रशःउत्पाततमामहो
त्पाताःमहात्मनःस्थिरचित्तस्यापिदक्षस्यभयावहाभूमौचपर्यक्परितःउत्थिताः ॥१२॥ तावत्ततआसुरुद्रानुचरैर्महान्मखयागःहेविदु
र अन्वरुध्यतअन्यत्त्वधातविनाशिनइतियावत्तरुद्रानुचरैःकथंभूतैःनानाविचित्राणिआयुधानियेषांतैःवामनकैःह्रस्वैःउद्यतायुधैःपि
ङ्गैःपीतैःमकरस्येवोदरमाननंचयेषांतैःपरितोधावद्भिः ॥१३॥ मखानुरोधमेवप्रपंचयतिकेचिदुद्दपार्षदाःप्राचीनवंशंबभंजुःत्रुटितवं

तः तथा केचिदपरे पत्नीशालां बभंजुरित्यनुषंगः पत्नीशालायाः पूर्वतः स्थितं मंडपं प्राग्वंशः सदः पुरतो हविर्धानं तस्योत्तरत आग्नीध्र
शालां तद्विहारं यजमानगृहं महानसं पाकभोजनशालाम् ॥ १४ ॥ रुरुजुः बभंजुः अमूत्रयन् मूत्रं कृतवंतः तथोत्तरवेद्या मेखलाः सीमास्त
चाभिविभिदुः ॥ १५ ॥ अतर्जयन् अभर्त्सयन् अपरे पलायितान् पुनरनुधावनेन प्रत्यासन्नान् देवान् जगृहुः गृहीतवंतः मणिमान् रुद्रानु

केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथापरे सद आग्नीध्रशालां च तद्विहारं महानसम् ॥ १४ ॥ रुरु
जुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ॥ कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥ अ
बाधंत मुनीनन्ये एके पत्नीरतर्जयन् ॥ अपरे जगृहुर्देवान् प्रत्यासन्नान्पलायितान् ॥ १६ ॥
भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं ॥ चंडीशः पूषणं देवं भगं नंदीश्वरोऽग्रहीत् ॥ १७ ॥ सर्व ए
वर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ॥ तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् ॥ १८ ॥ जुह्वतः
स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ॥ भृगोर्लुलुंचे सदसि योऽहसत् श्मश्रु दर्शयन् ॥ १९ ॥

चराग्र्यः भृगुं बबंध वीरभद्रः प्रजापतिं दक्षं चंडीशः पूषणं संबद्धदेवं भगाख्यं नंदीश्वर अग्रहीत् ॥ १७ ॥ सर्वे दिवौकोभिः देवैः सहिताः सदस्याः
सभ्याः ऋत्विजः रुद्रानुचरैर्बध्यमानान् भृग्वादीन् दृष्ट्वा भृशं ग्रावभिः शिलाभिरर्द्यमाना ताड्यमाना अनेकधा विद्रुद्रुः ॥ १८ ॥ स्रुवहोमस्साधनं ह
स्ते यस्य तस्य जुह्वतः होमं कुर्वतो भृगोः श्मश्रूणि भगवान्भवो वीरभद्रः लुलुंचे उत्पाटितवान् किं विशेषेण श्मश्रूण्येवोत्पाटितानीत्यत आह यो भृगुः

श्मश्रु दर्शयन् अहसत् तदं परिहसितवान् अतः श्मश्रूण्येव लुलुंचेत्यर्थः ॥ १९ ॥

भगवान्वीरभद्रः रुषा क्रोधेन भूमौ पातितस्य भगस्य नेत्रे उज्जहार उद्धृतवान् यो भगः सदसि सभायां स्थितः शपंतं शिवनिंदां कुर्वंतं दक्षं नेत्रेणासूसुचत् सूचितवान् प्रेरितवानित्यर्थः ॥ कालिंगस्य कलिंगदेशराजस्य बलः बलभद्रः यथा तथा पूष्णः दंतान् पातयत् पातितवान् यः पूषा गरिमणि गुरुतरे दक्षे शप्यमाने सति दतः दंतान् दर्शयन् अहसत् पूष्णोहि इति ॥ द्विवचनपाठे तु तदिंद्रापोस्लभ्यरुर्भवति स्त्राम्य सहितस्यातिपोष्णो दंतयानप्राप्त्यर्थः एवं वीरभद्रः दक्षस्योरसि ॥२१॥ आक्रम्य पादं दत्त्वा विमस्य शितधारेण निशितधारेण हेतिना खड्गेन छिंदन्नपि

भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि ॥ उज्जहार सदस्थोक्ष्णा यः शपंतमसूसुचत् ॥२०॥ पूष्णो ह्यपातयद्दंतान् कालिंगस्य यथा बलः ॥ शप्यमाने गरिमणि योहसद्दर्शयन्दतः ॥२१॥
आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिंदन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यंबकस्तदा ॥२२॥
शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥२३॥
दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ॥ यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥२४॥ ॥

तदा शिरः दक्षस्य उद्धर्तुं तदा नाशक्नोत् असमर्थोभवत् ॥२२॥ अस्त्रान्वितैर्मंत्रसहितैः शस्त्रैर्न निर्भिन्ना त्वग्यस्य तथाभूतमेवं दक्षं दृष्ट्वा इति शेषः पशुपतिर्हरो वीरभद्रः परं विस्मयमापन्नः प्राप्तः चिरं दध्यौ शिरसः उद्धरणोपायं चिंतितवान् ॥२३॥ पशूनां पतिः स वीरभद्रः मखे अध्वरे संज्ञपनं मारणं योगमुपायं निश्चितवान् तेनैव योगेन तस्य दक्षस्य कायाच्छिर आहरत् उद्धृतवान् ॥२४॥

तच्छिरस्फुरन्नरूपं कर्मिणां सतां स्तुवतां भूतादीनां साधुवादः अभवत् अन्येषां ब्राह्मणादीनां तद्विपर्ययः असाधुवादः अभवदित्यर्थः
२४ ॥ तस्य दक्षस्य शिरः तस्मिन्नन्तरध्वसंबंधि दक्षिणाग्नो अमर्षितः क्रुद्धः जुहाव तस्य देवयजनमेवं दध्वा नाशयित्वा गुह्यकालयं के
लाशं प्रतिष्ठनप्रययौ ॥ २६ ॥ इ श्री तु पंचमः ॥ ५ ॥ एवं दक्षाध्वरविनाश उक्तः अथ पुनस्तत्संधानप्रकारं विवक्षुस्तदुपोद्घातरूपं दे
वहेलनरुद्रप्रसादनं च स्वपन्नतावृद्दैवानां रुद्रपरिषद्‌नाडितानां स्वयंभुवे भुवि ज्ञापयन्ने वदन्तेन सह रुद्रसंनिधिं गता इत्याह मैत्रेय ॥ अ
थेति ॥ अथ दक्षाध्वरविनाशानंतरं सर्वे त्रिविक्रमभागोविभिः सन्येष्व सहिताः सर्वे देवगणाः रुद्रानीकैः रुद्रसैन्यैः कर्तृभिः स्फलादिः

साधुवादस्तेषां कर्मिणां तथा सम्यक्शंसतां ॥ अतथैवेतरेषां विप्रवादानां अन्येषां तद्विपर्ययः ॥ २४ ॥ जुहाव तच्छिरस्तस्मिन् दक्षिणाग्नावमर्षितः
॥ तेन देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम् ॥ २६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पंचमोध्यायः ॥ ५ ॥ श्रीमैत्रेय उवाच
अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥ संछिन्नभिन्नसर्वांगाः सर्त्विक्स
भ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥ २ ॥ उपलभ्य पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्च विश्वा

भिः साधनैः संछिन्नानि विदीर्णानि सर्वाणि अंगानि येषां ते अतएव पराजिताः भयाकुलाः संतः स्वयंभुवे चतुर्मुखाय नमस्कृत्य एतद्वृत्तं र
कार्त्स्न्येन न्यवेदयन् विज्ञापितवंतः ॥ २ ॥ किं स्वयंभुवे विज्ञापितवंत इत्युच्यते ब्रह्मापि दध्वात्तरे आगतस्तद्वृत्तं ज्ञानान्येवेत्याह ॥ उपल
लभ्येति ॥ अब्जसंभवो भगवान् ब्रह्मा सर्वांतरात्मा नारायणश्च पुरैवैतत् भाविदक्षाध्वरनाशनमुपलभ्य ज्ञात्वा भगवान् विश्वात्मेति
विशेषणाभ्यां तयोः सर्वज्ञत्वं सूचितं तस्य दक्षस्याध्वरं प्रति नेयतुः न गतवंतौ ॥ ३ ॥

विभुर्ब्रह्मा नदेवे विनिर्वेद्दैतत्काकार्णश्रुत्वाहउवाच॥ उक्तिमेवाह॥ तेजीयसीत्याहिना तेजीयसीतिते नास्वरुद्रेहृतमागः॥ अपराधोयैस्तेषांवुभु
वतांभवितुमिच्छा श्रेयस्काममानामितियावत्॥ यमेत्तेमायचश्रेयसेप्राणेयप्रायश्चः नभयात्तेजीयानिविभक्तिविपरिणामेनानुषज्जते
असत्तुहृतत्तेजीयान्नपुष्वात्तप्रसाद्यमानोपिक्षेमहुच्छस्यादित्यर्थः॥ प्रायेणेतिलोकोक्तिः॥ ४॥ यद्यप्येवमथापिये भवंतोवर्हिषःयज्ञ
स्यभागभाजंभजंतिप्रापुर्वंतीतितथातातत्पराहुः वहिस्कृतवंतः तेयूयंपरिशुद्धचेतसानिष्कपटचित्तेनमप्रगृहीतांघ्रिपद्मपादाद्रउप
संगृह्येत्यर्थः॥ भवंतद्रप्रसादयध्वंकथंपादोपसंग्रहपात्रेणप्रसन्नोभवेत्तत्राह क्षिप्रसादेपादग्रहणस्यान्ततिक्रमणीयंतामालोर

तस्यास्तत्कार्णविभुः प्राहतेजीयसिकृतागसि॥ तेमायतत्रसामर्थ्यान्नप्रायेणवुभूषतां॥ ४॥
अथापियूयंकृतकिल्बिषाभवंयवर्हिषोभागभाजंपराहुः॥ प्रसादयध्वंपरिशुद्धचेतसा
क्षिप्रप्रसादंप्रगृहीतांघ्रिपद्मं॥ ५॥ आशासानाजीवितमध्वरस्यलोकःसपालःकु
पितेनयस्मिन्॥ तमाशुदेवंप्रिययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः॥ ६॥

यआश्वनुग्रहकारिणमितिभावः॥ ५॥ अध्वरस्ययज्ञस्यजीवितंपुनःसंधानंआशासनार्थमभ्यमानायूयंयस्मिन्रुद्रेयस्मिन्कुपि
तेसतिसपालःदिक्पालसहितोलोकोनास्तिनश्येदित्यर्थः तद्दुरुक्तैःदक्षादीनांदुर्वाक्यैःहृदिविद्धंताडितंअधुनाप्रिययाभार्यया
चविहीनंदेवंमाधमाशुक्षमापयध्वंप्रसादयध्वंवयंतत्रगंतुविभीमस्त्वमेवकंचिदुपायंचिंतयेत्यत्ररुद्रंप्रसन्नोति॥ ६॥

नाहमिति यस्यात्मतंत्रस्य तत्वं याथात्म्यं बलवीर्ययोः प्रमाणं नियत्तां च अहं न विद्मो यज्ञः रुद्रः न च न विद्यात् यूयं न विद्याथ तथा मुनयो ये मे च देहधारिणो
तेंद्रियपरोक्षदर्शिनो न विदुः अस्मदादिभिरदुर्ज्ञेयं तस्यात्मनः परमात्मत्वेन शवतारभूतस्य उपायं क्षमोपायं को विधित्सेत न कोऽपि धातुमिच्छादित्यर्थः ॥ ६ ॥ भव
द्विः पादेषु पतनं ग्रहणं तस्मात् एतेनागसः कः कमुपायं विधित्सेदिति भावः ॥ ७ ॥ सोऽजः ब्रह्मा सुरान् एवमादिश्य आज्ञाप्य तैर्देवैः सप्रजापतिभिः पितृभिश्च सम
इतः स्वधिष्ण्यात् स्वस्थानात् पुरारेः शंभोर्हरस्य प्रियं निलयं स्थानमभूतं अद्रिश्रेष्ठं कैलासं प्रति ययौ ॥ ८ ॥ कैलासं वर्णयति जन्मौषधीत्यादिभिश्चतुर्दशभिः

नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्वं ॥ विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं वि
धित्सेत ॥ ७ ॥ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ॥ ययौ स्वधिष्ण्यान्निलयं पुरद्वि
षः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ ८ ॥ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः ॥ जुष्टं किन्नरगंधर्वैरप्सरो
भिर्वृतं सदा ॥ ९ ॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १०

जन्मना औषध्यादिभिश्च ये सिद्धास्तैर्नरेतरैर्देवयोनिभिः तत्र जन्मतः सिद्धा औषधाद्यनपेक्षमेव सृष्टिवेलायामेव देवत्वेन सृष्टाः औषध
आदिभिः सिद्धाश्च देवत्वं संपादकौषधाद्युपायैर्देवत्वेन सिद्धाः योगः रुद्रोपासनारूपयोगः मंत्रः यावज्जीवं शिवपंचाक्षर्यादिमंत्रावृत्तिः जु
ष्टं सेवितं तथा च गीतेन भगवता देवान् देवयजो यांतीति पितॄन्यांति पितृव्रता इति ॥ अप्सरोभिः किन्नर्यादिभिश्च सदावृतं ॥ ९ ॥ शृंगैः शिखरैः
रमणैः प्रियैः सह विहरंतीनां सिद्धानां या योषितस्तासां रमरमं रतिप्रदं शृंगैः कथंभूतैः नानाधातुभिर्गैरिकादिभिः विचित्रैः नानाद्रुमाः ल

नाना श्च मल्लानि स्तबकानि प्रसव वृन्दानि यस्मिंस्तस्मिन् पुन्नागकेसराः सान्तर्निचयेषु तैः ॥ ११ ॥ तथा मयूराणां केकास्वानैः अभितः सर्वतः हृतं नादितं मदेन मकरंद पानजनितमदेन अंधैः अलिभिर्भृंगैर्विमर्दितं तमर्दनाख्यरागगीति विशेषेणआपूरितं कंकनानां कोकिलानां नादितैः त्रिमात्र शब्दैः तत्पानप्रापतत्रिणां चकूजितैः ॥ १२ ॥ इन्दं लेउन्नतप्रावैः कामदुघैर्द्रुमैश्च विजानपदितं आदधतमिवस्थितं तलोकेहिहसमुक्षिप्य मुदैः स्वरैराकानमधिंनां कामधुक् अदिश्च उन्नतिशृह स्ताकारैर्द्रुमैश्च दिजानपदितं आकयंतमिव स्थितं तलोकेहिहसमुं ब्रजंतमि

नाना फलप्रसवर्णैर्नानाकेसरसानुभिः ॥ रमणांविहरंतीनांरमणैः मिद्धयोषितां ॥ ११ ॥ मयूरकेकाभिरुतं मदांधालिविमर्दितं ॥ नादितं रक्तकंकानां कूजितैश्च पतत्रिणां ॥ १२ ॥ आदधतेविमोदस्त्री ईजानकामदुघैर्द्रुमैः ॥ ब्रजंतमिव मातंगेर्गर्जंतमिव निर्झरैः ॥ १३ ॥ मंदारैः पारिजातैश्च सरलैश्चापशोभितं ॥ तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥ १४ चूतैः कदंबनीपैश्च नागपुन्नागचंपकैः ॥ पाटलाशोकवकुलैः कुंदैः कुरवकैरपि ॥ १५ ॥ स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः ॥ कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितं ॥ १६ ॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ भूर्जैरोषधिभिः पूगैराज

वृक्षैर्दनराणांच निमिर्गणं तं नापमातामिवस्थितं ॥ १३ ॥ मंदारादिभिर्वृक्षविशेषैरुपशोभितः ॥ १४ ॥ चूतैराम्रविशेषैः ॥ १५ ॥ स्वर्णार्णशतपत्रैः सुवर्णवर्णैः कुशेशयैः कुंदादिभिर्लताविशेषैश्च मंडितं रेणुकाएलाजातिमालतीपनसादिभिर्द्रुमैश्च द्रुमजातिभिः द्रुमसामान्यैर्वेणुकीचकैश्च राजितं मंडितं नीरंध्रमसंभ्रत्वेन वेणुकीचयोर्भेदः ॥ १७ ॥

क्षुपतर्थः व्रजद्भिः मातंगैः ४

॥ १४ ॥

कुमुदादिसमृद्धिभिः शतपत्राणां भरवर्णवर्णितां वनानां ऋद्धिभिः राजितं नलिनीषु सरस्सु कलं मधुरं यथा भवति तथा कूजद्भिः खगवृंदैः परि
तथैरुपशोभितम् ॥१८॥ मृगादिभिर्जुष्टं निषेवितं कर्णान्त्रकपराश्वास्यैः कर्णौ गोकर्णाख्यैः ऊर्णमृगैः एकपदैः अश्वमुखैश्च मृगनाभिः
कस्तूरीमृगैश्च निवितं जुष्टम् ॥१९॥ कदलीखंडैः संरुद्धान्यावृतानि नलिनीनां कमलाकराणां पुलिनानि तैः श्रीः शोभा यस्मिन् तं स्नानेन पु

खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥१८॥ कुमुदोत्पलकल्हार
शतपत्रवनर्द्धिभिः ॥ नलिनीषु कलं कूजत्खगवृंदोपशोभितम् ॥१९॥ मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैरृ
क्षशल्यकैः ॥ गवयैर्नाभिभिर्व्याघ्रैर्निर्जुष्टं महिषादिभिः ॥ कदलीखंडसंरुद्धनलिनीपुलिनश्रियम्
॥२०॥ पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया ॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ॥२१॥ ददृशु
स्तत्र ते रम्यामलकां नाम वै पुरीम् ॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं ॥२२॥ नंदा चालकनंदा च
सरितौ बाह्यतः पुरः ॥ तीर्थपादपदांभोजरजसातीव पावने ॥२३॥ ॥

ण्यं संपादकं उदकं यस्याः तया सत्याः निर्मलया नंदया गंगया परिवेष्टितम् ॥२१॥ भूतेशस्य रुद्रस्य गिरिं कैलासं विलोक्य देवाः विस्मयं ययुः प्रापुः ते
देवाः तस्य रुद्रस्य अलकां नाम अलकेति प्रसिद्धां रम्यां यां पुरीं सौगंधिकाख्यं वनं चापि ददृशुः ॥२२॥ सौगंधिकनाम्नोऽन्वर्थतामाह ॥ यत्र वने सौ
गंधिकं नाम पंकजं भवति जातावेकवचनं पुरीं वर्णयति नंदा चेति चतुर्भिः पुरः पुरात् बाह्यतः बाह्ये नंदा अलकनंदा चेति द्वे सरितौ भवतः

सरितौविशिनष्टि। सार्द्धद्वयेननीयैर्यपादस्यहरेःपादांभोजरजसाअतीवामलंतंपावनेभगवत्पादांभोजरजोयुक्तत्वादत्यंतपावित्र्यकरइत्यर्थः हेक्षत्तःसुरस्त्रियः
स्वधिष्ण्यतःस्वविमानेभ्यःअवरुह्यरतिकर्शिताःविहारश्रांताःसत्यःययोःसरितोर्विगाह्यपुनःस्वप्रियान्सिंचंत्यःक्रीडंतिजलक्रीडांकुर्वंतिययोः
सरितोरंभःवितृषोपिविगततृष्णाअपिगजाःकरिणीःपाययंतःपानंकारयंतःपिबंतितत्रहेतुःतासांसुरस्त्रीणांस्नानेनभ्रष्टंगलितंयन्नवंकुंकु
मंतेनचपिंजरंपीतवर्णम्॥२५॥पुनःपुरींविशिनष्टितारेति।ताराःरूप्यंताराहेमविमानानांशतैःसंकुलांपुण्यजनैःयातुधानैस्तेषांस्त्रीभिर्युक्तां

ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः॥क्रीडंतिपुंसःसिंचंत्योविगाह्यरतिकर्शिताः॥२४॥
ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरम्॥वितृषोपिपिबंत्यंभःपाययंतोगजागजीः॥२५॥
तारहेममहारत्नविमानशतसंकुलाम्॥जुष्टांपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनम्॥२६॥
हित्वायक्षेश्वरपुरींवनंसौगंधिकंचतत्॥द्रुमैःकामदुघैर्हृद्यंचित्रमाल्यफलच्छदैः॥२७॥

घनैःवज्रहर्षैवतडिद्भिर्मेघैःसहितंखमाकाशंयथेतितत्रविमानानिखमिवपुण्यजनामेघाइवतत्स्त्रियःतडितइव॥२६॥एवंभूतांयक्षे
श्वरस्यकुवेरस्यपुरींअलकांहित्वाअतिक्रम्यतत्सौगंधिकाख्यंवनंचदृष्ट्वावनंचदृष्ट्वातेदेवाआगतवंतःददृशुरितिचतुर्थेनान्वयः
कथंभूतंतंवनंचित्राणिमाल्यानिमाल्यायोग्यानिपुष्पाणिकिसलयादीनिपरिच्छदानिक्रीडोपकरणानियेषुतैःकामान्वर्षद्भिर्द्रुमैर्हृद्यं
मनोहरम्॥२७॥रक्तकंठखगानांकोकिलपक्षिणांअनीकस्यसमूहस्यस्वरैर्मंडिताःषट्पदायस्मिन्कलहंसानांकुलस्यप्रेष्ठंस्वरंडानिपद्मा

वनगजैः संघृष्टाः हरिचंदनद्रुमास्तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः अधि अधिकं मुहुरुन्मथयत् स्मरवशीकुर्वत् ॥२९॥ वैदूर्यैः मणिभिः कृता
विकसितानि सोपानानि यासु उत्पलानां मालाः पंक्तयो यासु ताः आर्षत्वाद्धसमयेन द्वितीया वाप्यः किंपुरुषैर्प्राप्ताः यस्मिन् वने संति तद्वनेह
ष्ट्वा ह्यवाप्य इति व्यत्ययात्सप्तम्या वनं वापीश्च दृष्ट्वा आरात् समीपे वटं ते देवा ददृशुः ॥३०॥ वटं विशिनष्टि ॥ स इति ॥ स वटो योजनश
तमुत्सेधः उच्छ्रायो यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैः विटपैः शाखाभिः आयतो विस्तृतः पर्यक् परितः कृता अचलानि

रक्तकंठखगानीकस्वरमंडितषट्पदं ॥ कलहंसकुलप्रेष्ठं खरदंडजलाशयं ॥२८॥ वनकुंजरसंघृष्टहरिचंदनवायुना ॥ अधिपु
ण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥२९॥ वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटं
॥३०॥ स योजनशतोत्सेधः पादोनविटपायतः ॥ पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥३१॥ तस्मिन्महायोगमये मुमु
क्षुशरणे सुराः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ॥३२॥ सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहं ॥ उपास्यमानं स
ख्या च भर्त्रा गुह्यकरक्षसां ॥३३॥

अचला छाया येन निर्गतं नीडं कुलायं यस्मात् तापेन सूर्याद्यातपेन रहितः ॥३१॥ महायोगमये महायोगो भगवदुपासनायोगं तन्मयचु
रे महायोगनिष्ठपुरुषप्राचुर्यात् तत्स्थानस्य महायोगमयत्वं मुमुक्षवः अज्ञानान्मोक्तुमिच्छवो जिज्ञासव इति यावत् तेषां शरणे आ
श्रये यस्मिन् वटमूले आसीनमुपविष्टं त्यक्तामर्षो यो अंतकः कालस्तत्तुल्यं शिवं सुरा ददृशुः ॥३२॥ शिवं विशिनष्टि सनंदनाद्यैरिति पंच
भिः महासिद्धैः शांतैः सनंदनाद्यैः गुह्यकरक्षसां भर्त्रा प्रभुणा सख्या वैश्रवणेन च उपास्यमानं सेव्यमानं शांतविग्रहं निर्वैरं कृतापराधेषु

विद्याज्ञानयोगःतपःकर्मयोगःताभ्यांयुक्तोयोगपथःभगवद्भक्तिमार्गःतमास्थितंज्ञानकर्मयोगानुगृहीतभगवद्भक्तियोगनिष्ठमित्यर्थःअधीश्वरं।
जितेंद्रियंविश्वसुहृदंचराचराणिभूतानिभगवद्वपुःअतस्तदानुकूल्यंमेस्यादितिसुहृत्तांविश्वानुकूल्यंअतएववात्सल्याल्लोकानांमंगलंक्षेममेव
चरंतंकुर्वंतं॥३४॥संध्याभ्ररुचारक्तवर्णेनअंगेनतापसाभीष्टंभस्मादिलिंगंचंद्ररेखांचबिभ्रतम्॥३५॥दर्भमय्यांबृस्यांब्रुवंतोयस्यांसीदंतीतिबृसीए
पीठतांहित्वात्साधुः॥आस्तरणविशेषस्तस्यांउपविष्टंपृच्छतेनारदायसतामन्येषांसनंदनादीनांश्रृण्वतांसतांसनातनंब्रह्मपरमात्मानंप्रवोचंतं

विद्यातपोयोगपथमास्थितंतमधीश्वरं॥चरंतंविश्वसुहृदंवात्सल्याल्लोकमंगलम्॥३४॥लिंगंचतापसाभीष्टंभस्मदंडज
टाजिनम्॥अंगेनसंध्याभ्ररुचाचंद्रलेखांचबिभ्रतं॥३५॥उपविष्टंदर्भमय्यांबृस्यांब्रह्मसनातनं॥नारदायप्रवोचंतं
पृच्छतेशृण्वतांसतां॥३६॥कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि॥बाहुंप्रकोष्ठेऽक्षमालामासीनंतर्कमुद्रया॥३७॥
तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगकक्षां॥सलोकपालामुनयोमनूनामाद्यंमनुंप्रांजलयःप्रणेमुः॥३८॥

वाप्रवोचंतं॥३६॥सव्यंपादंदक्षिणेऊरौकृत्वाविन्यस्यजानुनिसव्येसव्यंबाहुंकृत्वादक्षिणेबाहुप्रकोष्ठेमणिबंधस्थानेअक्षमालांकृत्वादक्षिणह
स्तकृतयानयातर्कमुद्रयोपलक्षितमासीनमित्यर्थःतदुक्तंयोगशास्त्रे।एकंपादमथैकस्मिन्विन्यसेदूरुसंस्थितंइतरस्मिंस्तथाबाहुंवीरास
नमिदंस्मृतं॥तर्कमुद्राचोक्तातर्जन्यंगुष्ठयोर्मध्येमिथःसंयुज्यचांगुलीःप्रसार्यबाधनंप्राहुस्तर्कमुद्रेतितांत्रिकाइति॥३७॥तंब्रह्मनिर्वाणसमा
धिंआनंदरूपब्रह्मविषयसमाधिमाश्रितंयोगकक्षांयोगपट्टंव्युपाश्रितंविशेषेणोपाश्रितंमुनीनामाद्यंमुख्यंमुनिंगिरिशंलोकपालसहि

अ॰ क॰

॥३१॥

सनुमितीशः सुरासुरैः शेरभिवंदितोंघ्रीयस्तं तथागतमात्मयोनिं ब्रह्माणं मुसलभृत्तातात्तस्मै ब्रह्मणे उत्थायेति पाठांतरं तदा आसनादुत्थाय पर शिरसा अभिवंदनप्रणामं चक्रे महत्तमो विष्णुर्वामनरूपः यथा कस्य कास्य प्रजापतेः यद्वा कस्य चतुर्मुखस्याभिवंदनं चक्रे कस्य रुद्राभि वंद्यत्वं तद्दर्शनमाह महत्तम इति विष्णुर्यथा तदस्य महत्तमः प्रभुः तथा क्रोपीत्यर्थः ॥३९॥ नीललोहितं रुद्रं परोसिद्धगणाः अनुवर्तंते नेम

सनुपलभ्यागतमात्मयोनिं सुरासुरैः शेरभिवंदितांघ्रिं ॥ उत्थाय चक्रे शिरसाभिवंदनमर्हत्तमः कस्य यथैव विष्णुः ॥३९॥ तथापरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललोहितम् ॥ नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥४०॥ ७ ७

हर्षिभिः सह नमस्कृतः आत्मभूः ब्रह्मा कृतप्रणामं कृतः चतुर्मुखविषयः प्रणामो येन तं शशांकशेखरं कृतप्रणाममिति प्रथमांतपाठे रु द्रेण कृतप्रणामः प्राह ॥४०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥३१॥

रुद्रस्य भगवद्गात्मकत्वान्नदावेशावतारत्वाद्वरुद्रं ब्रह्मणा समाधिकरणेन निर्दिशन्त्यत्रिकृष्णसब्रह्मणोसाधारणं प्रकृतिपुरुषशरीरकत्वजगत्कार
णत्वधर्मनयोद्दास्यापकत्वानुग्रहीतत्वनिग्रहीतत्वादितत्त्वं रुद्ररूपसंस्मायेरुद्ररूपेणावस्थितस्य ब्रह्मण आह॥ जानेत्वामित्यादिभिश्चतुर्भिः हे ई
शरुद्र विश्वस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः योनिवीजयोः योनिवीजभूतयोः क्षेत्रवीजवत्प्रकृतौ पुरुषस्य मिलितत्वात योर्योनिवीजर
शद्वाभ्यां निर्देशः शक्तेर्ब्रह्मणः अप्रथक्सिद्धविशेषणभूतायास्त्रिगुणायाः प्रकृतेः तथा शिवस्य निर्वाणमयएवायमात्मेत्यादिश्रुत्याप्रत्यगात्म
नः सुखरूपत्वाभिधानाजीवस्य शिवशब्देन निर्देशः तस्य च यत्परं विलक्षणं तस्य परमात्मेडितमिति निर्दिशन्त्यपरशब्देन योगेऽस्मादादितर
नैरिकशब्देस्यादिनापंचमी॥ प्रकृति पुरुषाभ्यां स्वरूपतः स्वभावतश्च विलक्षणमित्यर्थः तद्यन्निरंतरं निर्भेदं तत्प्रकृतिपुरुषांतरात्मतया

ब्रह्मोवाच॥ जाने त्वामीशं विश्वस्य जगतो योनिवीजयोः॥ शक्तेः शिवस्य च परं यद्ब्रह्म निरंतरम्॥४१॥

वस्थितमपि निरस्तनिखिलद्वेषत्वेन समस्तकल्याणगुणगुणात्मकत्वेन चैकरूपमित्यर्थः यद्वा निरंतरं अंतरं विच्छेदः तस्मान्निर्गतं सर्वानुस्यूतं स
र्वांतरात्मतया वस्थितमिति यावत॥ अथवा कार्त्स्न्येन ज्ञानस्वरूपं न तु प्रदेशभेदेन जडमित्यर्थः तद्ब्रह्म त्वां जाने॥ इदं च सामानाधिकरण्यं शरी
रात्मभावनिबंधनमावेशावतारत्वनिबंधनं च न तु तादात्म्यनिबंधनं एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधसंभवौ मयादर्शितपंथानौ सृष्टिसंहार
कारकौ॥ सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते नारायणाद्रुद्रो जायते अनपहतपाप्मा वा अहमस्मीत्यादिभिः कार्यत्वकर्मवश्यत्वाद्यभिधा
नेन रुद्रादेर्जीवत्वनिश्चयात्तादात्म्यासंभवात् अत एव भवांस्तु पुंसः परमस्य माययादुरंतया स्पृष्टमतिः समस्तदृग्गतिव्यतिरेकेण निर्दिश्यति
४१॥ एवं ब्रह्मसामानाधिकरण्येन रुद्रं निर्दिश्य ब्रह्मदृष्ट्या तस्य चिदचिच्छरीरकत्वं स्पष्टयादिकर्तृत्वं चाह॥ त्वमिति हे भगवन्नुस्वांशयोः स्वस्य तव र

ंशयोः शिवशक्त्योः प्रकृतिपुरुषयोः अत्र विशिष्टवस्त्वेकदेशत्वरूपमंशत्वं विवक्षितं न तु विशिष्टवस्त्वेकदेशत्वं प्रकृतिपुरुषयोर्विकाररूपमेतज्ज
सत्वमेव सर्वं खल्विदं ब्रह्मेतिवत्सामानाधिकरण्यमिदं शरीरात्मभावनिबंधनेव कथं रुद्राख्यजीवविशेषस्य कृत्स्नप्रपंचं प्रति आत्मत्वं जगतश्च
शरीरत्वं संभवेदपि कथंचिच्छरीरात्मभावे शरीरवाचिपदस्य शरीरिवाचकेन कथं सामानाधिकरण्यमिति चेदुच्यते॥ न त्वत्र रुद्राख्यजीवविशेष
स्यात्मत्वं जगतश्च शरीरत्वं चोच्यते किंतु ब्रह्मविदः अहंत्वमादिशब्दा अहंत्वमादिबुद्धयश्च ब्रह्मपर्यंताः तदेतमर्थमुपपन्नमृषिर्वामदेवः प्रतिप
दे अहं मनुरभवं सूर्यश्च कक्षीवानृषिरस्मि विप्रः अस्मि त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते न तो हंसो सोहम्॥ अहं हरिः स
र्वमिदं जनार्दन इत्यादिश्रुतिस्मृतिभिरुपलभ्यते एवं चात्र प्रस्तोतुश्चतुर्मुखस्य ब्रह्मविदग्रेसरत्वेन तत्प्रयुक्ता अहंत्वमादिशब्दास्तद्बुद्धयः

त्वमेव भगवानेतच्छिवशक्त्योः स्वरूपयोः॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥४२॥

श्च ब्रह्मपर्यंता इति रुद्रस्य भगवदात्मकत्वेन तत्पर्यंतत्वमवगम्य ब्रह्मसामानाधिकरण्येन स निर्दिष्ट इति विशेष्यभूतस्य ब्रह्मणः कृत्स्नचिद
चिदंतरात्मत्वं तयोः शरीरत्वं च युक्तमेवमपि कथमात्मवाचिना शरीरवाचिशब्दस्य सामानाधिकरण्यमिति चेत्॥ गवादिशब्दानां जातिगुण
मात्रपरतया व्युत्पन्नानां शुक्लो गौरित्यादिषु व्यक्तिगुण्यादिपर्यंतत्वमंतरेण पर्यवसन्नानां यथा व्यक्त्यादिपर्यंतत्वे सामानाधिकरण्यमेवं जातिगु
णादिवत् शरीरस्यापृथक्सिद्धविशेषणत्वात् तद्वाचिमात्रपरतया लोके व्युत्पन्नशरीरिपर्यंतमभिधत्ते आत्मा देवो जातस्यात्मवाचिसामाना
धिकरण्यमुपपन्नमेव॥ न च व्यक्त्याक्षेपाल्लक्षणया वा गौः शुक्ल इत्यादिप्रयोगोपपत्तिः अपृथक्सिद्धविशेषणवाचित्वस्य लक्षणादिप्र
तिबंधकत्वाद्यथा जात्याकृतिगोत्वगुणादिशब्दानामपि लक्षणादिना गोत्वं शुक्लमित्यादिप्रयोगोपपत्तिः नन्वेवं जात्यादिशब्दानां अ

रथकमिह विशेषवाचिनां अमृतादिपर्यंतपर्यवसानेन सामानाधिकरण्यापत्तिः नियतनिकर्षवाचिनां कदाचिदपि विशेष्यपर्यंतत्वाभावस्य भाष्यादिषूक्तत्वात्
अत एव शरीरदेहादिशब्दानां कदाचिदपि नामवाचिसामानाधिकरण्यमिति भाष्यादिषु विस्तरः कृत्स्नचिदचिदात्मकप्रपंचशरीरकत्वं क्रीडन्नेव विध्वंस
जनिपालनिरसनिष्वसि(?) संहारसि क्रीडन्निमनेन जगद्व्यापारो भगवतो लीलेत्युक्तं ऊर्णपटः ऊर्णनाभिर्यथेति दृष्टांतः यथोर्णनाभिर्यथेति दृष्टांतः य
थोर्णनाभिः सृजते गृह्णते चेति श्रुतिप्रसिद्धः ॥४२॥ एवं परब्रह्मदृष्ट्या चिदचिच्छरीरकत्वं सृष्ट्यादिकारणत्वमभिधाय पुनस्तद्रूपाप्रकृताध्वर
संधित्सो(?) सारूपायपुरुषार्थबोधिशास्त्रप्रवर्तकत्वं धर्ममर्यादापालकत्वं चाह त्वमेवेति धर्मार्थधुक् धर्मार्थौ दोग्धीति धर्मार्थधुक् धर्मादि
प्रदरकत्वमेव अभिप्रेत्य पुरुषार्थावाप्रयहन्तेण(?) समर्थेन स्वत्रेण स्ततिनेन शास्त्रेण अध्वरं मर्जिय(?) स एवानसि पुरुषार्थसाधनभूत धर्मार्थ

त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरं ॥ त्वयैव लोकेवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः ॥४३॥
त्वं कर्मणां मंगलमंगलानां कर्तुः स्म लोकं तनुषे स्वः परं वा ॥ अमंगलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥४४॥

सपादबोपायावबोधिशास्त्रप्रवर्तकत्वमेवेत्यर्थः सेतवो वर्णाश्रमधर्ममर्यादास्त्वयैवावसितानिबद्धाः के ते सेतवः ये वसिताः इत्यत्राह यान्
सेतून् धृतव्रताव्रतनिष्ठाः संतो ब्राह्मणाः श्रद्दधते श्रद्धापूर्वकमनुतिष्ठंति ॥४३॥ पुनर्ब्रह्मदृष्ट्यैव सर्वकर्मकारयितानफलप्रदश्च त्वमेवेत्याह
त्वमेवेत्याह ॥ त्वमिति ॥ हे मंगलशिव लोके मंगलानां कर्मणां कर्तुः कर्त्रे इत्यर्थः स्वः स्वर्गपुरं मोक्षं वा तनुषे प्रददासि अभिसंहितफलकर्मणां क
र्तुः स्वर्गं अनभिसंहितफलकर्मणां कर्तुः मोक्षं तनुषे इत्यर्थः अमंगलानामकुशलानां अशलानां कर्मणां कर्तुः उल्बणं तमिस्रं निरयं तनुषे वि
पर्ययः अमंगलानां कर्मणां कर्तुः कस्यचिदपि स्वर्गमोक्षप्राप्तिरूपः विपर्ययः केन हेतुना भवेत् केनापीत्यर्थः अतस्तदेव तत्कृतं फलमेव भवति

एवंब्रह्मरक्ष्याहइमम्स्पनस्यप्रसादोस्मितादपिवपासनोरोषोनयुक्तइतिकेमुमनयेनाह नवाइति॥त्वच्चरणे अर्पितं आत्मा चितं येषां सर्वेषु भूतेषु तत्वद्दितीया
र्थंवद्दीनामित्यर्थः अत्रत्वांत्वदितिपरद्वयंत्रस्लपर्यंतं भगवच्चरणारविंदसमर्पितचित्तानां सर्वाणि भूतानि भगवदात्मतया पश्यतामित्यर्थः॥एवंभूता
नांसतां अत्रापिद्वितीयार्थे षष्ठीसतः॥वे अनर्थकारित्वेन प्रसिद्धः रोषः नाभिभवेत् अभिभूतान् कुर्यात् यथा पशुम् रुद्र॥ अभिभवेत् पशुमेवा
भिभवेत् यो रोषः सतां नो हि निकिमुत कथ्यमित्यर्थः अतस्तव रोषो न युक्त इति किमुत कथ्यमिति भावः॥४५॥कृतापराधेष्वपि महांतः कृपावंतो
भतः हंता पराधिनमपि इक्षं अनुग्रहीतुमर्हसीत्याह त्रिभिः पृथग्दृशः अत्र स्वात्मकस्वतंत्रवस्तुदर्शिनः देवमनुष्यदेहात्माभिमानभिन्न

नवैसतांत्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोभिभवेद्यथापशुं॥४५॥
पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोनिशं॥परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः॥४६॥
यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः॥कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमं

धियो वा कर्मण्येव दृष्टिर्येषां दुष्ट आशयो अंतःकरणं येषां अनिशं परेषामुदयेन संपदा अर्पिता हृदि रुक् व्यथा येषां अरुंतुदा मर्मच्छेत्तारः दु
रुक्तैः परान्तुदंति व्यथयंति तानेवं भूतान् दैवेनैव वधो येषां तान् भवद्विधो निरुपमकरुणः मावधीत् मा हन्यात्॥४६॥ प्रस्तुतसाधूनां दृष्टान्तमा
लोच्यानुग्रहमेव कर्तुमर्हसीत्याह यस्मिन्देशे यदाकाले दुरंतया पुष्करनाभस्य पद्मनाभस्य मायया स्पृष्टधियः मोहितचित्ताः पृथग्दृशोभ
वंति तेनैकाकारेण कार्यकारणात्मकरूपे आत्मनि देवमनुष्यादिभेददर्शिनः तथा ब्रह्मात्मकत्वदर्शिनश्च भवंतीत्यर्थः तथापराधिषु साधवो ह्यनुकंप
या अनंतरमेव परदुःखासहिष्णुतया चित्तप्रकंपेन कृपां कुर्वंति न तत्क्रमं अप्रियं कुतः दैवबलात्कृतत्वेन मम मदैव मे एवंभूतं कोत्रापराधस्तेषामि

॥३२॥

अतो भवान् परमस्य पुंसः परमपुरुषस्य दुरंतया मायया अस्पृष्टमतिः भगवत्स्वरूपत्वेन अमोहितबुद्धिः अत एव समस्तदृक् सर्वार्थदर्शी तया मायया हता
त्मसु मोहितेषु अत एव अनुकर्मचेतस्सु कर्मानुगुणचित्तवृत्तिषु तापराधजनेषु अनुग्रहं कर्तुमर्हसि हे प्रभो समर्थ ॥४८॥ एवं सामान्येनोक्त्वा प्रस्तुत
माह। कुर्वन्ति त्रिभिः हे मन्यो रुद्र त्वया हतस्य अत एवासमाप्तस्य प्रजापतेर्दक्षस्य अध्वरस्योद्धरणं पुनरुद्धारं कुरु कुर्याः कस्य यत्राध्वरे भागितः भागा

भवांस्तु पुंसः परमस्य मायया दुरंतयास्पृष्टमतिः समस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं क
र्तुमिहार्हसि प्रभो ॥४८॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयासमाप्तस्य मनो प्रजापतेः ॥ न यत्र भा
गं तव भागिनो ददुः कुयाजिनो येन मखो निनीयते ॥४९॥ जीवताद्यजमानोयं प्रपद्येताक्षिणी
भगः ॥ भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् ॥५०॥ देवानां भग्नगात्राणामृत्विजां चा
युधाश्मभिः भवतानुगृहीतानामाशु मन्योस्त्वनातुरम् ॥५१॥ ॥ छ ॥ ॥

र्हस्य तव भागं न ददुः येन त्वया हेतुना मखो न नीयते न समाप्यते निनीयते इति पाठांतरः तदा किमर्थमध्वरोद्धारणाय मां प्रार्थयसे अत्राह
न खः येन त्वया हेतुना निनीयते समाप्यते यद्यपि चारात्मखो विनष्टः पुनस्तस्यैव भवतोनुग्रहान्मखः समापनीय इति भावः ॥४९॥ अयं य
जमानो दक्षः जीवतात् जीवतु भगः अक्षिणी प्रपद्येत प्राप्नुयात् ॥५०॥ आयुधैरश्मभिश्च भग्नगात्राणामृत्विजां देवानां च पुनर्भवता अनुगृ

भा॰ स्कं॰ ४

॥३५॥

भगाख्यनवास्त्विनाह एषइति हे देवइज्याः वरिष्ठार्थैर्यदिशसर्वं अध्वरस्ययदुच्छिष्टः यते हृते यावानवशिष्टार्थस्तावानेषतवभागोस्तु रुद्रयज्ञहनम् ॥ अद्य अ
धुनातेनत्वभागेनयज्ञः कृत्स्नतांसंकृत्स्नतां ॥५२॥ चतुर्थे षष्ठोध्यायः ॥ ६ ॥ एवंब्रह्मणाप्रसादितो भवो देवाननुगृह्णन् तद्विज्ञापितमंगीचकारेत्याह ।
मैत्रेयउवाचेति ॥ अजेनब्रह्मणा अनुनीतेनप्रार्थितेन अतएवपरितुष्यतामवेनहे महाविदुर प्रहस्यश्रूयतामित्यामंत्र्य अभ्यधायि अभ्यभाषित ॥१॥
तदेवाह नाघमिति ॥ हे प्रजेश परेषां मम हानीनामीशाप्रभोनगवन्मायामोहितानां बालानां अघमपराधं अधुनानवर्णयेएवमेवमपचरितमि
तिनकथयामीत्यर्थः नानुचिंतये नस्मरामिकिंत्वपराधाचरणे दक्षायामयादंडः कृतः दंडमात्रंकृतमित्यर्थः ॥२॥ तदनुग्रहप्रकारमेवाह प्रजा

पतेर्दग्धशीर्ष्णोभवतु अजमुखं शिरः अस्ययज्ञस्य भवे ॥ यज्ञस्तेरुद्रभागेनकृत्स्नतामुपयज्ञहन् ॥५२॥ इति श्रीभागवतेमहापुराणेचतुर्थस्कंधेषष्ठोध्या
यः ॥ ६ ॥ श्रीमैत्रेयउवाच ॥ इत्यजेनानुनीतेनभवेनपरितुष्यता ॥ अभ्यधायिमहाबाहो प्रहस्यश्रूयतामिति ॥१॥ श्रीमहादेव
उवाच ॥ नाघंप्रजेशबालानांवर्णयेनानुचिंतये ॥ देवमायाभिभूतानां दंडस्तत्र धृतोमया ॥२॥ प्रजापतेर्दग्धशीर्ष्णो
भवत्वजमुखंशिरः ॥ मित्रस्यचक्षुषेक्षेत भागंस्वंबर्हिषोभगः ॥३॥ ❀ ❀

पतेरित्यादिभिस्त्रिभिः दग्धशीर्ष्णः दक्षिणाग्नौदग्धं शिरोयस्यतस्यप्रजापतेर्दक्षस्य अजमुखं कंठादुपरिएव अजस्यमुखंयस्मिन्तच्छिरोभव
तुमित्रनाम्नोदेवस्यचक्षुषीनेत्रेभवेतांचक्षुषीक्षेतेत्यत्रार्षत्वाद्दीर्घत्वेद्विवचनमितिप्रागुक्तत्वाभावः मित्रचक्षुर्भगः पूर्वंकृतइत्यर्थसिद्धंच
क्षुषेतितृतीयान्तस्यपक्षेतेनदामित्रस्यचाजमुखंशिरोभवतु अत्रपक्षेमित्रस्यशिरोभंगः पूर्वमर्थसिद्धोज्ञेयः भगाख्यभगाख्यादिवःव
र्हिषोयज्ञस्यस्वीयंभागंचक्षुषाईक्षेतपश्यतु भगस्यनेत्रेउत्पाट्यतामित्यर्थः अयमेवार्थःसाधुः भगस्यनेत्रेभगवान्पातितः सहपेतिइतिपू

श्रीमद्भागवतटीकायांस्कंधे ४

॥३५॥

ष्पादेवः यजमानस्य वधिपिष्टं भुंजइति हिदिर्दं तैर्जक्षतु अघात् पूष्णो हंतो ऽस्मदो रंति ऽनर्थः ये देवा मे मह्यं उच्छेषणं यज्ञावशिष्टं ददुः दत्तवंतः ते सर्वे
प्रकर्षेण क्षतानि सम्यक् कृतानि सर्वाण्यंगानि येषां ते भवेयुरित्यर्थः प्रकृतसर्वांगा इति पाठे तदा ये देवा नितरां भिन्नसर्वावयवा ये च मह्यमुच्छेषणं द
दुः ते अनु अतिकृतवंतः इत्यर्थः ॥ अनुग्रहान्तरं वे उच्छेषणदानाभावात् ते सर्वे अध्वर्यवः ऋत्विजश्च अश्विनोर्बाहुभ्यां कृतबाहवः ॥ उस्मादितबाहव
हस्तो हस्ताभ्यां कृतहस्ताश्च भवंतीत्यन्वयः भृगुः वस्तस्य श्मश्रुः वस्तस्य मेषस्य श्मश्रूणि यस्य ॥५॥ एवं रुद्रेणानुगृहीता देवाः

पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ॥४॥ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृ
तबाहवः ॥ भवंत्वध्वर्यवश्चान्ये वस्तश्मश्रुर्भृगुर्भवेत् ॥५॥ मैत्रेय उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितं
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥६॥ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षिभिः ॥ भूयस्तद्देवयजनं स
मीढ्वद्वेधसो ययुः ॥७॥ विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः ॥ संदधुः कस्य कायेन सवनीयपशोः शिरः ॥८॥

किमकुर्वंस्तत्राह ॥ मैत्रेयः तदेति मीढुष्टमोदितं मीढुष्टमः शिवतमो रुद्रस्तेनोक्तं श्रुत्वा सर्वाणि भूतानि परितुष्टात्मभिः परितुष्टचित्तैः हे तात वि
दुर साधु साध्वित्यब्रुवन् ॥६॥ ततः मीढ्वांसं रुद्रं त्वया आगत्य सर्वं कार्यमित्यामंत्र्य संप्रार्थ्य शुनासीरा इंद्रोपलक्षिता देवाः ऋभुभिः भृगुप्रमुखैर्मानद
क्षिणाग्निप्रभवैः ऋत्विग्भिः देवैः सह समीढ्वद्वेधसः मीढुषा वेधसा ब्रह्मणा च सहिता भूयः पुनस्तद्देवयजनं देवा इज्यंते ऽस्मिन्निति देवयज
नं यागदेशं ययुः जग्मुः ॥७॥ भगवान्भवो रुद्रः यदाह प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिर इत्यादि तत्तथा कार्त्स्न्येन विधाय हस्तबाह्वादिकं विधा

य सवनीयपशोरजस्य संबंधि शिरः कस्य दक्षस्य
कायेन शरीरेण संदधुः ॥८॥

भा०दं ॥३४॥

सवनीयपशोः शिरसि संधीयमाने सति रुद्रेणाभिवीक्षितो दक्षः सुप्त इवोत्तस्थौ उदतिष्ठत् अग्रतः पुरतोवस्थितं मृडं रुद्रं ददृशे च ॥ ९ ॥ पूर्वं वृषध्व
जे रुद्रे द्वेषेण कलिलात्मा कलुषीकृतः आत्मा यस्य सः प्रजापतिर्दक्षः शिवावलोकात् शरत्कालीनह्रद इवामलोभवत् ॥ १० ॥ भवस्तवाय रुद्र
स्तुतये कृतधीः कृतमनाः संपरेतां परलोकं गतां सुतां सतीं अनुरागतः स्मरन् तस्मादौत्कंठ्याद्बाष्पकलानेत्रजलेशस्तेन नाशक्नोन्न स
मर्थोभूत् ॥ ११ ॥ प्रेम्णा विह्वलितः विकलचित्तत्वात् कृच्छ्रात् प्रयासेन मनः संस्तभ्य स्ववशं कृत्वा सुधीः स्तुतिसमर्थबुद्धिमान् प्रजापति

संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः ॥ सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥ ९ ॥ तदा वृषध्व
जद्वेषकलिलात्मा प्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रद इवामलः ॥ १० ॥ भवस्तवाय कृतधीर्नाशक्नो
दनुरागतः ॥ औत्कंठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ॥ ११ ॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमवि
ह्वलितः सुधीः ॥ शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥ द उ च ॥ भूयाननुग्रह अहो भवता कृ
तो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः ॥ न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥

र्दक्षः ईशं रुद्रं निर्व्यलीकेन प्रीतियुक्तेन भावेन अभिप्रायविशेषेण शशंस तुष्टाव ॥ १२ ॥ यदपि यद्यपि प्रलब्धः परिभूतो मया भवान्
तथापि त्वया दंडो धृतः शिक्षा कृता न तूपेक्षितोस्मि ॥ युक्तमेवैतदित्याह ॥ ब्रह्मबंधुषु ब्राह्मणाभासेष्वपि तुभ्यं न व हरेर्विष्णोश्चेति
वां युवयोः अवज्ञा उपेक्षा नास्ति धृतव्रतेषु स्ववर्णाश्रमधर्मनिष्ठेषु ब्राह्मणेषु कुत एवावज्ञा स्यात् ॥ न कुतः स्यादित्यर्थः हे भगवन्

हरिः ॥ ३४ ॥

नन्वहं तेन त्वं वेत्स्वपरमात्मा हृष्यात्सौ निविद्धेति ॥ चतुर्मुखरूपी त्वं प्रथमं कस्मात् आहो आहो आत्मतत्त्वं जीवपरया यात्मस्वानुभवोपदेशाभ्यां अवि अवितुं रक्षितुं
विद्याशास्त्रजन्मज्ञानं तपः शमदमादिः कृच्छ्रचान्द्रायणादि च व्रतं स्ववर्णाश्रमोचितो धर्मः एतान् बिभ्रतीति तान् विप्रान् अनुस्मरतः ॥ अस्माकं स एवा
नसि न त्वस्मान् हे परम सर्व विपत्सु सर्वास्वापत्सु पास्त्र दृष्टान्तपदेशो वा महे व वदिति स्मायेन ब्राह्मणान् पश्वन् पालक इव गृहीतदंडः सापराधेषु
कृतशिक्षः यासि रक्षसि ॥१४॥ स्वस्मात् किं चमं निवेदयन् क्षमापयति ॥ यो सावि ति ॥ अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन मया विगणय्य तत् पणीकृ

विद्यातपोव्रतधरान् अनुस्मरतः स्म विप्रान् वृद्धात्मतत्त्वमवितुं प्रथमं त्वमस्माक् ॥ न ब्राह्मणान् परमसर्वविपत्सु
पासि पालः पश्वनिव विभो प्रगृहीतदंडः ॥१४॥ यो सौ मयाविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशि
खैर्गणय्य न तन्मा ॥ अर्वाक्पतंतमर्हत्तमनिंदयापात् दृष्ट्यार्द्रया स भगवान्स्वकृतेन तुष्येत् ॥१५॥ श्रीमैत्रे
य उवाच ॥ क्षमाप्यैवं स मीढ्वांसं ब्रह्मणानुमंत्रितः ॥ कर्म संतानयामास सोपाध्यायर्त्विग्भिः ॥१६॥

समसभायां दुरुक्तयाणुविशिखाः बाणाः क्षिप्तः ताडितो सो भगवान् अर्हंतमम पूज्यस्तनवनिंदया अर्वाक्पतंतं अधोलोकान् गच्छंतं मार्द्रया
दृष्ट्या अपात् विनाशाद्रक्षत् यस्मात् समहता अपराध अरक्षदिति वान्वयः स भगवान् स्वकृतेनोपकारेण तुष्येत् न मया तत्प्रतिकर्तुं शक्यमित्यर्थः
अनेन स्वस्मात् किं चमं निवेदितं ॥१५॥ मीढ्वांसं रुद्रमेवं क्षमाप्य प्रसाद्य ब्रह्मणा चतुर्मुखेन च रुद्रेण चानुमंत्रितः अनुज्ञातः उपार
ध्यायसहितैः ऋत्विगादिभिः कर्म अध्वरमनुवर्तयामास संप्रवर्तयामास संतानयामासेति पाठे संतारयामास समापयामास ॥१६॥

भा॰ च॰

॥३६॥

कर्येकवासनानितरस्त्वाह वैश्वसृजमिति यज्ञसंतानमेव यज्ञविभेदपरिहाराय वीरसंसर्गशुद्धये विरागाणप्रमथानां संसर्गकृतदोषशुद्धये वीरभद्रसंसर्गशु
द्धये वा वैश्वसृजं विश्वसृजेर्देवनाकं त्रिकपालं त्रिषु कपालेषु संस्कृतं पुरोडाशं द्विजोत्तमा ऋत्विजः निरवपन् ॥१७॥ हे विशांपते विदुर आत्तहविषा उपात्त
हविषा अध्वर्युणा सह यजमानो दक्षः विशुद्धया निर्मलया बुद्ध्या दध्यौ ध्यानवान् तदा नदैव हरिः प्रादुरभूत् आविर्बभूव तथेति पाठे यथा ये
न प्रकारेण दध्यौ ध्यानं यथा तं प्रकारमनतिक्रम्य प्रादुर्बभूवेत्यर्थः ॥१८॥ दश दिशः द्योतयन्त्या आत्मनः प्रभया तेषां सदस्यानां तेजः मुष्णन् तिरस्कुर्व

वैश्वसृजं यज्ञसंतानमेव त्रिकपालं द्विजोत्तमाः ॥ पुरोडाशं निरवपन् वीरसंसर्गशुद्धये ॥१७॥ अध्वर्युणात्तहविषा यजमानो विशां
पतिः ॥ धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥१८॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश ॥ मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्र
वाजिना ॥१९॥ श्यामो हिरण्यरशनोर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः ॥ कंबुब्जचक्रशरचापगदासि
चर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥२०॥ ❀ ❀ ❀

न् हरिः स्तोत्रे बृहद्रथंतरे वा जौ पक्षौ यस्य तेन बृहद्रथंतरे पक्षाविति श्रुतेः स्तोत्रपक्षेण वा तार्क्ष्येण गरुडेन उपानीतः समीपं प्रापितः ॥१९॥
आविर्भूतं भगवंतं वर्णयति श्याम इति द्वाभ्याम् ॥ हिरण्यवद्रशना यस्येति वस्त्रं लक्ष्यते अर्कतुल्येन किरीटेन जुष्टं नीलालका एव भ्र
मराः तैर्मंडितकुंडलमास्यं यस्य कंबुः शंखः अब्जं कमलं चापः शार्ङ्गं असिः खड्गः चर्म खेटः कंबुप्रभृतिभिरायुधैः अन्यत्र त्राणार्थं व्यग्रैः स
व्यैः हिरण्मयैः भुजैः केयूरादिभिर्भूषितैः भुजानां हिरण्मयत्वं केयूरादिभिर्भूषितत्वात् स्वर्णं गतपुष्पितैः शाखाविशेषैः कर्णिकार इव शोभमानः

टी॰

॥३६॥

वक्षस्यधिष्ठितावधूर्लक्ष्मीर्यस्य वनमाला अस्यास्तीति वनमाली उदारहासयुक्तो योवलोकः तस्य कलया अपांगेन विश्वं रमयन् पार्श्वयोरुभयो
र्भ्रमंतीव्यजने चामरेण वराजहंसौ यस्य सः श्वेतातपत्रमेव शशी तेनोपरि रज्यमानः शोभातिशयं नीयमानः ॥२१॥ उपागतेस्समीपेप्राप्ते तं भग
वंतमालक्ष्य दृष्ट्वा ब्रह्मेंद्रत्र्यक्षनायका मुख्या येषां ते सर्वे सुरगणादयः सहसा उत्थाय प्रणेमुः मस्त्रकुः तस्य भगवतस्तेजसा हततेजश्चास्ति
रस्कृतप्रभा सन्नजिह्वाः गद्गदवाचः ससाध्वसाः तन्महिम्ना क्षोभितचित्ताः मूर्ध्नि धृतानि अंजलिपुटानि येषां ते मूर्द्धसुधृतांजलिपुटा इत्य

वक्षस्यधिष्ठितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वम् ॥ पार्श्वभ्रमद्व्य
जनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः ॥२१॥ तमुपागतमालक्ष्य
सर्वे सुरगणादयः ॥ प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः ॥२२॥ तत्तेजसा हतरुचः
सन्नजिह्वाः ससाध्वसाः मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजम् ॥२३॥

र्थः अधोक्षजमुपतस्थुः तुष्टुवुः ॥२२॥ यस्य भगवतो महिमानं प्रसर्वा गृहतयो अधस्ताद्देववृत्तयः येषां ते कार्त्स्न्येन तन्महिमानं मवगंतुं
मनर्हं मनोवृत्तयोपि नवादयः शार्वहयः कृतानुग्रहविग्रहं कृतः प्रकटीकृतः अनुग्रहार्थं विग्रहो येन तं कृतः अनुग्रह एव नियहो येन तं
भक्तानुग्रहे कप्रधानमर्त्तिं मितिमर्थः यथामति स्व स्वमेति विस्मये ॥ वाङ्मनसागोचरमहिमानं वाङ्मनोवृत्तिभिस्तुष्टुवुरित्याश्चर्यम् ॥२३॥

तत्रतावद्दृष्टस्तुतिप्रकारमाह॥ इत्यस्य इति गृहीतार्हणाशाधनोत्तमं अर्च्यते पूज्यते अनेनेत्यर्हणं अर्हणासाधनं गंधपुष्पादिकं गृहीतमर्हणं येन स चा
सौसाधनोत्तमस्तं साधनेषु उत्तमः साधनोत्तमः पुरुषार्थप्रापकानां मध्ये उत्तममित्यर्थः तथा च वक्ष्यति धर्मार्थकाममोक्षाख्य यदृच्छेदिमादिः
अनेनसमीहितफलसाधनप्रकोनाध्यरापेक्षया मुख्यं न पुरुषार्थप्रापकत्वाद् उत्तमोपायममितमुक्तं भवति यद्वा प्रगृहीतं कर्त्तव्यत्वेनोपात्तं प्रक्रा
न्तमिति यावत्॥ अर्हणं भगवदाराधनं भगवत्यागारूपं पूजनं तत्समयानि साधनानि निवृत्तकानि प्रयाजादीनि तेभ्य उत्तमं यागनिवर्त्तकमित्य
र्थः इशाप्त्रेवहुधाजातं जायमानं विश्वं विभर्त्ति भुवनस्य नाभिरिति श्रुतेः विभर्त्ति पोषयति वर्त्तयतीति यावत्॥ अत एव हि पूर्वं तदागम

अप्यर्वाग्वृत्तयो यस्य महित्वात्मभुवादयः॥ यथाम
तिगृणंतिस्मकृतानुग्रहविग्रहम्॥२४॥ ❀

नार्वावाद्यामादिनिवृत्तिः न केवलं यागादिनिवर्त्तक एवापि तु तत्फलप्रदो भोक्ता चेत्याह यज्ञेश्वरं यज्ञानां भोक्तारं तत्फलदं चेत्यर्थः तद
यागीत॥ अहं च सर्वयज्ञानां भोक्ता च प्रभुरेव चेति॥ अत्रेश्वरत्वाद्वित्तं भोक्तृत्वं रक्षकत्वं च ईश्वरो हि स्वं भुंक्ते रक्षति च न केवलं यज्ञस्य
रक्षकं॥ अपि तु यज्ञकर्तुर्यजमानस्यापीत्याह विश्वसृजां मरीच्यादीनां पतिं पालयितारं सस्तूयस्याप्युपलक्षणमिदं पतित्वमपिहितो
पदेशेनेत्याह॥ गुरुहितोपदेष्टारं सुनंदनप्रभृतिभिः भक्तैरनुगैः सुरैरीडितं परिवेष्टितं अनेन निम्नविभूत्याधिपतित्वमुक्तं एवंभूतं भगवं
तं कृतांजलिर्बद्धांजलिरीक्षोग्रहस्तनस्तुवन्प्रयतः समाहितचित्तः प्रपेदे शरणागतः॥२४॥

तत्रप्रकृतिपुरुषविलक्षणं परमात्मस्वरूपं सर्वशान्तिमद्विशेषं तमनुसंदधानः प्रपद्यते इत्यतः शुद्धमिति शुद्धमपापविद्धं कर्मरूपोपाधिरहि
तमकर्मवृत्तमितियावत् ॥ अनागवस्वधाम्निस्वस्वरूपेमायांप्रतिषिध्य निरस्यस्वेनरूपेण अवस्थप्रकृतिजन्यदोषमित्यर्थः शुद्धत्वेहेतुः
उपशान्ताखिलबुद्ध्यवस्थं उपशान्ताः शान्तिंगताः अखिलाः सर्वाः बुद्ध्यवस्था मनोवृत्तयो यस्य तत् निवृत्तनिःशेषनिवृत्तप्रकृतिपरिणामक
पानवर्तीपोंद्रियसर्ववृत्तिव्यापारविद्धमितिभावः यद्वा स्वधाम्नि उपरताः प्रशान्ताः अखिला बुद्ध्यवस्था यस्य तत् स्वस्वरूपानुभवेनैव नि
वृत्तसर्वमनोवृत्तीत्यर्थः तत्कुतः एकं समाभ्यधिकरहितं स्वस्वरूपस्थानिःसमाभ्यधिकोहिरूपत्वात् तदेकानुभवेन निवृत्तसर्वेंद्रियवृ

दक्षोगृहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम् ॥ सुनंदनं
नाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृतांजलिः ॥ २५ ॥ ७८

त्तिवाक् शुद्धमित्यर्थः किमेवंविधं स्वरूपं जडं नेत्याह ॥ चिन्मात्रं ज्ञानैकरसं क्वचिदप्यजडं न केवलं स्वयमेव शुद्धमपि त्वेषामपि शुद्धत्वापाद
कमित्याह अभयं येन विद्यते भयं यस्मात्तदभयं ॥ यद्रूपाश्रयणाद्धि शुद्धत्वापादकमभयास्यात् संसारनिवृत्तिस्तदभयमित्युच्यते तथा च श्रुतिः यदा
ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयंप्रतिष्ठां विंदते सोभयंगतो भवति ॥ एवं रूपं स्वरूपं प्रतितिष्ठन् अजहत्स्थितमित्यर्थः तयै
व पुरुषं पुरुषाकारतामुपेत्य मायारेवादिशरीररूपेण परिणामं प्राप्तस्मिन् जीवांतरात्मतयावस्थायेत्यर्थः स्वयमात्मतंत्रः स्वतंत्रो भा

वान्नतस्संमायायां अपरिशुद्धः कर्मवशस्त्वात्मप्र
तोमहदिहं सर्वं शान्तिस्तमितिभावः ॥ २५ ॥

भा॰टी॰
॥३८॥

ऋत्विजःपरमात्मतत्त्वानभिज्ञतामात्मीयामावेदयन्तस्तंसर्वयज्ञाराध्यत्वेनस्तुवंतितत्त्वमितिहेअनंजनपुण्यरूपमलराहितेतत्त्वंवयंनंदिकेश्व
रस्यशापात्कर्मण्येवअवग्रहधियःकृताग्रहचित्ताअतस्तवतत्त्वंयाथात्म्येनविदामनविजानीमःकिंतुहेभगवन्प्रलिषाड्गुण्यमंत्रैस्त्रिवृत्
त्रयाणांसत्वादीनांगुणानांवावृत्तभावोऽस्मिन्प्रवर्तनेयस्मिन्ननतत्त्रिभिर्गुणैर्वर्त्ततेनइतिवात्रैगुणैर्वर्ततेइतिवात्रैगुण्यविषयावेदाइत्युक्तरीत्या
नत्रैगुण्यानुसारेणाध्वराख्यंकर्मविहितंधर्मोपलक्षणंधर्मस्यक्रियाजन्यस्यापूर्वस्यदेवताप्रसादस्यवाउपलक्षणेऽनेनेत्युपलक्षणं

दक्ष उवाच॥ शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायां
तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धइवात्मतंत्रः ॥२६॥

स्तापूर्वं अस्मादेकमितिसर्वःनःप्राणावैनमिंद्रःप्रजयापशुभिःसमर्पयतीतिदेवताप्रसादादेर्ज्ञापकत्वेनहिचोदितंइदमध्वराख्यंकर्म।
ज्ञातंअस्माभिरितिशेषःकीदृशंतत्कर्मेत्तत्राह यदर्थंयत्प्रयोजनाययत्कर्मफलप्रदानाययत्कर्माराध्यत्वाययेसमर्थाःअदःएतद्देवतं
अधिदैवव्यवस्थाविशेषेणअधिष्ठायस्थितेनवानिसर्थःव्यवस्थाःसत्त्वाद्यागमाभावआर्षःअनेनइंद्रादिरूपेणसर्वैःयज्ञाराध्यस्तत्तुल

[illegible] ॥३८॥

अथ सदस्यास्तापत्रयाभिभूतानां जनपदस्याहेयतामाविष्कुर्वंतो भगवच्चरणारविंदशरणागतिं प्रार्थयंत आहुः उत्पत्त्यध्वनीति । हे शरणद उपायनि-
वर्तके शरणायेति यावत् ॥ उत्पत्त्यध्वनि संसारमार्गे वर्तमानः अज्ञानां सार्थः समूहः कामेनोपसृष्टः पीडितः ते तव पादौकः पादावेव ओकः वि-
श्रांतिस्थानं कस्यन्न समत्वबुद्धिश्रांतिजनकस्यानभिमर्षः कदा याति शरणं गच्छति कथंभूते उत्पत्त्यध्वनि अशरणे विश्रमस्थानशून्ये उरु-
क्लेशा एव दुर्गस्थानानि यस्मिन् ॥ अंतक एवोग्रो व्यालः तेनान्विष्टे लक्षीकृते विषयमृगतृष्णात्मगेहोरुभारे विषयरूपा मृगतृष्णा आत्मा-
भिमानास्पदं च शरीरं गेहं ममतास्पदं गृहं तान्येवोरुभारो यस्मिंस्तथाभूते यद्वा अज्ञसार्थस्य विशेषणं विषयमृगतृष्णात्मगेहोरुभारो य

॥ ऋत्विज ऊचुः ॥ तत्त्वं न ते वयमनंजन रुद्रशापात्कर्मण्यवग्रहधियो भगवन्न विदामः ॥ धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं
ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः ॥ २७ ॥ सदस्या ऊचुः ॥ उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे विष-
यमृगतृष्यात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥

समूह इति द्वंद्वानि सुखदुःखान्येव श्वभ्राणि गर्तानि यस्मिन् खला दुर्जना एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मि-
न् ॥ २७ ॥ हृद्गतममुमभिनिंदामहत्त्वमासीत्पूर्वं इदानीं तु तान्न गणयामीत्याह ॥ तव वेति हे वरद इहास्मिन् लोके आशिषा कामेन अखिलेरर्थे आरा-
धनीये न या अलसैः मुमुक्षुभिः आदरेण हेलीयेत च वरांघ्रौ निरतिशयसुकुमारत्वसुगंधत्वादियुक्ते चरणारविंदे रचितधियं न्यस्तचित्तं
मा अविद्यलोकाः तल्लोकः यदि यद्यपि अपविद्धं आचारहीनं जपति निंदति तथापि तत्तस्य नं न गणये न गणयामि निंदकान्नगर्हयामीत्यर्थः
कुतः त्वत्परानुग्रहेण न च वपः परानुग्रहः परेषु अनुग्रहः तेन हेतुना न च परानुग्रहेक निरतत्वात्त्वच्चरणारविंदासक्तचित्तानामस्माकमपि परानु-

गुरुत्वविद्याभिरोहितस्वरूपत्वेन देहपरवशत्वात्सर्वैर्ब्रह्मादयो जीवा अपराधैकपरास्तत्र त्वपराधसहनैककृपालोसि अतः प्रकृतोपराधस्त्वया क्षंतव्य इत्याह यन्मायर्येति वब्रह्मादयः सर्वेपि नुभृतो देहिनः जीवा इतियावत् ॥ गहनया दुरत्ययया यस्य तव मायया अपहृतः तिरोहितः आत्मनो बोधः धर्मभूतं ज्ञानं येषां ते अतएव मस्तिमः शारदा चासस्वप्रकृतिपरिणामरूपे शरीरे स्वयंतःशयानाः वर्त्तमानाः यद्वा तमः कार्ये जन्मजरामरणादिरूपे संसारे शयानाः आत्मन आत्मनि श्रितं जीवांतरात्मतयाधिष्ठितमिमर्थः तव तत्त्वं स्वरूपया थात्म्यमधुनापि न विंदंति न जानंतीति सोयं प्रणतानां शरणागतानां आत्मबंधुः ॥ आत्मवन्निरतिशयप्रीतिविषयः प्रीतिमांश्च बंधुः यद्वा प्रणतानां आत्मनां बंधुः

ते इदं उद्धव उवाच ॥ नैवं वरद वंगंध्रावाभिषेहाभिवलार्थैर्ह्यपि मुनिभिरशक्यैरागहरेणाहिलीये ॥ यद्विरविचितधियं मा विद्यतो कोपविहजपतिनगणायतत्वमृगानुग्रहेण ॥ २९ ॥ अगुरुतवाच ॥ यन्मायया गहनयापहृतात्मबोधाः ॥ ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः ॥ नात्मश्रितं तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः ॥ ३२ ॥

प्रसीदतु अस्मान्ननुगृह्णातु ॥ ३२ ॥ अथ ब्रह्मानात्मनश्रितं तव विदंत्यधुनापि तत्त्वं मिमि भगवतस्तत्त्वस्यावेद्यत्वं यद्गुणोक्तं तद्देवप्रपंचयन्नाह नैनदिति ॥ भगवतागानद्यायुज्ञमागो चरस्वरूपं पुरुषो जीवः पदार्थानां भेदस्वासाधारणं धर्मं गरहणानीनि पदार्थभेदग्रहाः पदार्थभेदाग्रस्यैत गाभिरिति वा पदार्थभेदग्रहाः रूपस्पर्शादिग्राहकैश्च क्षुरादिभिरिंद्रियैरित्यर्थः नेहैत नासाक्षात्कार्याते ॥ कुतः यावत्तयावतायव्रह्मस्यर्थः ॥ असौ पुरुषः ज्ञानस्य ज्ञायतेनेनेति ज्ञानं करणेत्युपतस्यइंद्रियवर्गस्य अर्थस्य शब्दादेर्विषयस्य गुणस्य च ज्ञानार्थयोः कारणस्य सत्वादिगुणस्य च आश्रयः त्वं तु मायामयात्नमायापरिणामरूपात् अस्मतो देहादेर्नत्संस्पष्टश्च जीवात्मव्यतिरिक्तः अनंतविलक्षणः प्राकृतं हि चक्षुरादींद्रियं प्राकृ

दं इत्तु भगवदवतारस्य धर्मसंस्थापनार्थत्वमनुसंदधन्नाह इदमिति हे अच्युत इदं तव वपुः शरीरं विश्वभावनं विश्वं भावयति सुखितं करोतीति विश्व
भावनं अतएव मनोदृशां मनसां दृशां च आनंदं करोतीत्यानंदकरम ॥ अस्य रूपस्य धर्मसंस्थापनार्थत्वात्तस्य चाधर्मविरतिपूर्वकत्वाद्धार्मिका
विरत्युपयुक्तत्वं विवृण्वन्नाह ॥ सुरविद्विषः असुरास्तान् क्षपयंतीति तैः उद्धतान्यायुधानि यैः तैरेभिर्भुजैर्दंडैः दंडवद्दीर्घैर्भुजैरुपपन्नं युक्तम् ३१ । अत्र
त्विकपक्षस्तु भवद्दासा धन्वेनोपक्रान्तं विछिन्नमध्वरं कृपादृष्ट्या पवित्रीकुर्विन्त्याहुः यज्ञ इति अयं यज्ञस्तव यजमानाय आराधनायैकेन त्व

ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत ॥ ज्ञानस्य चार्थस्य गुणस्य
चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥ इन्द्र उवाच ॥ इदमप्यच्युत विश्वभावनं वपु
रानंदकरं मनोदृशाम ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥ ३२ ॥

स्तमाह देहोवाद्वर्षं सदृशः आरब्धमचेतनी पशुपतिना रुद्रेण दृष्टेकोपात् विध्वस्तः हे यज्ञात्मन् पत्नी आत्मा मूर्त्तिर्यस्य तस्य संबुधिः नोऽस्मा
कं यज्ञं नलिनकांत्या दृशा नेत्रेण पुनीहि पवित्रं कुरु कथंभूतं यज्ञं शिवाः सेरते यस्मिंस्तिनि शवशयनं श्मशानं दृष्टाभाप्रतीतिर्यस्य सः मे
धशब्देन पशुहिंसा धुन्सवो लक्ष्मेन शांतः मेधः पशुः यस्य सः उपरतो शवः शवशयनाभस्त्वासौ शांतमेधश्चेति कर्मधारयः ॥ ३२ ॥

भा॰च॰टी॰

॥ ५० ॥

रूपवत्तुयस्य स्वात्मनोसाधारणमपहृत्य पाप्मत्वं देवमनुष्यादि पुण्यापुण्य सजातीय चेष्टितत्वेपि तत्स्वत्वानानुभवितृत्वरूपं तदनुसंदधानाः परि
पूर्णत्वेन स्तुवंति ॥ अत्रान्वितमिति ॥ हे भगवन् तेन च चेष्टितमिदमनन्वितमघटमानं विस्मयमित्यर्थः किं तत्राह ॥ आत्मनात्स्वयं कर्मपुण्यापु
ण्यसजातीयं कर्म चरसि अनुतिष्ठसि नात्मसेतत्कृतेन नसमस्येदमर्थः इदमप्यसमदनन्वितमित्याहुः यत इति ॥ चतुर्थ्यर्थे तस्मिन्सावे विभ
क्तिवात यस्मै विभक्तये यद्विभक्त्यर्थे ईश्वरी लक्ष्मी उपसेदुः भेजुः अस्मादर्थ इति शेषः ॥ द्वितीयार्थे वातामिविभक्तये संप्रदेयामीश्वरी भेजुंस्तास्व

प॰ ऊ॰ कु॰: यत्तोयं न वयजनायके नसहृषो विध्वस्तः पशुपतिनाद्य दत्तकोपात् ॥ तं नस्त्वं शव शयनाम शांतमे
धं यत्नात्मन्नलिनदृचा दृशापुनीहि ॥ ३३ ॥ अ॰ प॰ ऊ॰ कु॰: अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि क
र्म नाज्यसे ॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्त्ततीं भवान् ॥ ३४ ॥

यमनुवर्त्तिनीं स्वयमेवानुवर्त्तमानां भवान्नमन्यते नाद्रियते उपेक्षत इत्यर्थः अनेन परिपूर्णत्वमुक्तम् ॥ ३३ ॥ सिद्धात्मुवत्कथां सुखमभिनंदंतः अ
यमिति ॥ अयं नो स्माकं मनो गजः क्लेशा आध्यात्मिकादयस्ता पादावाग्नयस्तै दग्धः अत एव तृषा शब्दादिविषयासक्त्या आर्त्तः पीडितः
तेन च तृष्णैव मह्य शुद्धपीयुषं तन्मयी या नदी तस्या अवगाद प्रविष्टोसाविंद्रावाग्नितुल्यसांसारिकाध्यात्मिकादितापं न सस्मार न स्मरति न च

र्भपत्नीयमानात्सौनिजमानीत्सौति: स्वागतमिति हे ईश तेनव स्वागतं भद्रमागमनं जातं हे श्रीनिवास प्रसीद प्रसन्नो भव अस्माकमिति शेषः तेनु
भ्यं नमः हे अधीश यथा शिरसा हिनः कबंधमात्रः पुरुषः अंगैः करचरणाद्यवयवैः शोभनैरपि न शोभते तथा त्वां विना केवलं मयाज्ञाद्यंगैर्म
खो भवति अतो नः श्रिया कांतया सह त्रायस्व पालयेत्यर्थः लोकपालास्तु भगवतः सौलभ्यं तन्मायावैभवं अनुसंदधानाः स्तुवंति दृष्ट इति त्वं वा
ङ्मनसागोचरस्वरूपस्वभावस्त्वं नः अस्माकं दृग्भिः मांसचक्षुर्भिः ॥ किं दृष्टः कथं दृष्ट इत्यर्थः स्वयं वाङ्मनसावृद्धस्वरूपस्वभावत्वे सति अवि
जनजनयनविषयतागतत्वरूपसौलभ्येनैव दृष्ट इत्यर्थः ॥३४॥ नो इति निपातो वा नञ्पर्यायः हृग्भीर्नो दृष्टः किं दृष्ट एवेत्यर्थः सौलभ्यमेवात्र
कारणमिति भावः यद्यप्येषां दृग्विषयोऽपि दृग्विषयो जात इत्येषामभवदीयामायाभवदीयो विचित्रः संकल्प इत्यर्थः मायाशब्दस्य विचि

त्रिषा ॥ ऊचुः ॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ॥ तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥३५॥ स्वागतं प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः
त्वामृते धीश नांगैः मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः ॥३६॥

त्रिसर्गकारिशक्तिविशेषपरत्वे पूर्वेणैवान्वयः साधुः इदमपि तव मायाकार्यमेवेत्याह असद्गृहे: असति देहे तदनुबंधिनि च गृहे आग्र
हः ॥ अहं ममेत्यभिमानः येषां तैः देहात्माभिमानिभिरित्यर्थः दृष्टं शरीरं येन कारणेन प्रसंगदृष्ट्या दृश्यते आत्मत्वेनाभि[illegible] मन्यत इत्यर्थः
प्रपात दृष्टपस्य प्रत्यक्षेण दृष्टिः भवदीयामायाविचित्राशक्तिरित्यर्थः तत्कारणमनाभवदीयामायेतिभावः हिशब्दः श्रौतीस्मार्तीचप्रसिद्धिं
द्योतयति ॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः नासदासीन्नो सदासीत्तमसा गूढमग्रे प्रकेतं दैवी ह्येषा गुणमयी
मम माया दुरत्यया मामहि श्रुतिस्मृतिभ्यो चानुसंधेयाः एतेन देहात्मभ्रमो भगवन्मायामूल एवेत्युक्तं भवति एवं जीवे शोकभ्रमोपि त्वन्मा

भा॰सु॰टी॰

॥४१॥

वाप्रसन्ना देवा आहुः हे भगवन् अनेन जीवदेहेन त्वामपश्यन्तो जीवस्याणुस्वरूपत्वात् यस्त्वं प्रकृतिपुरुषविलक्षणस्त्वं पंचभिर्भूतैः पृथिव्यादिभिः सहित इति शेषः
अत एव पंचभिः भूतैस्तत्सारीरागामहत्वं शरीरत्वं स्वेनेत द्विशिष्टः षष्ठः चिद्विलक्षणो जीवः पंचभूतप्रस्तावात् षष्ठ इत्युक्तिः भासि जीवत्वेन प्रतीयसे एषा
पि प्रतीतिस्त्वदीयैव मायाकार्यं भनैवेत्यर्थः हि शब्दः स्वतंत्रात्मभ्रमवत्सु रूपेषु प्रसिद्धिद्योतकः ॥३६॥ लोकपाला भगवतः सौलभ्यानुसंधानपूर्वकं
मायादेवभवद्रूपजीवदेहैक्यप्रतीतेर्भ्रमत्वे योगीश्वराजीवानां परमपुरुषात्स्वतंत्रभेदं वारयंतः स एव इदं समपारतंत्र्येन समं च शरीरिभाव शेषशेषिभावादि
निवंधनत्वमाविष्कुर्वंतो वा स्तत्स्वगुणाविशिष्टत्वेन स्तुवंति प्रेयानिति हे प्रभो विश्वात्मनि विश्वस्य चिदचिदात्मप्रपंचस्यांतःप्रविश्य स्वयपरिस्मन्क
स्वरूपस्वभावेन एव प्रकाशनेन धारके ॥ अनेन विश्वस्य शरीरत्वमुक्तमिति जीवानां परतंत्रभेदोभ्युपगत इति वेदितव्यं विश्वात्मनि त्वयि विश्वस्या

लोकपाला ऊचुः दृष्टः किंनो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् ॥ माया ह्येषा
भगवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥३७॥ छ

छिन्नद्वेषो त्वप्रियः पुमान् आत्मनः स्वस्य पृथक्त्वं पृथक्सिद्धत्वं स्वस्याब्रह्मात्मकत्वमित्यर्थः नेहेतेन न पश्येत् स्वात्मानं परमात्मशरीरत्वेनापृथक्
सिद्धत्वेन ब्रह्मात्मकत्वेनानुपश्येदित्यर्थः ॥ अमुना अमुष्मात् तत्तद्दर्शिनः अन्यस्तेनव प्रेयान् प्रीतिविषयो नास्ति । न ह्येव हि भगवतां प्रियो हि ज्ञा
निनोत्यर्थमहं स च मम प्रिय इति गीतमिति भावः ॥ अत्र पृथक्त्वं नेहेतेत्यनेन तादात्म्येन दर्शनं विहितमित्यर्थः वर्णनं तत्त्वयुक्तं विश्वात्म
नि भ्रमेशानयोनि पूर्वोक्तव्याघातात् ॥ विश्वतादात्म्यं तु सर्वसमयविरुद्धं जडाजडयोरप्यैक्यप्रसंगात् अतो विश्वात्मनीति व्यतिरेकनिर्देशात्
व अत आत्मनः पृथक्सिद्धत्वेनैव दर्शनं प्रतिषिध्यते अनेन परतंत्रभेद उक्तः शरीरात्मभाववचनेन तदंतर्भूताः शेषशेषिभावादयोर
प्यर्थादुक्ताः एवं शरीरत्वेन शेषत्वेन चात्मानमनुसंदधानो मम प्रिय इति त्वयैवोक्तमिति सत्त्वयानुगृह्यत इति सिद्धमेव किंतु योसौ प्रास्त्व ।

॥४१॥

सिद्धशरीरात्मभावादित्रानुष्ठ्यस्य : केवलस्यस्वामिभावज्ञानवान्नमोपि वात्सल्यवशात्त्वयानुग्राह्य एवेत्याहुः नह्यपितिर्यग्घ्यस्यात्मनोः प्रियतमं न पश्यति लोक
सिद्धं स्वामिन्नन्यभावमेव पश्यति तथापि भक्तेशातया भक्तस्वामिभावेन उपधावतां समीपगतं प्रक्रांतानां अनिष्फलज्ञानानामित्यर्थः अनन्यवृ
त्त्या अनुग्रहे कहल्या अनुग्रहाण अस्मीदहे वत्सल दोषेपि गुणबुद्धिमन् दोषेपि गुणबुद्धिर्वात्सल्यं यथा मातुः पुत्रे वत्सलत्वेन वा ज्ञानुग्रहे उचित इति
भावः यद्वा अनन्यवृत्त्या अव्यभिचारिण्या भक्त्या उपधावतां अनुगृहाणेत्यन्वयः ॥३॥ अननुभवतो विश्वात्मकत्वे विश्वगतदोषाणां परमात्मन्यापत्ति
त्तिनः सुखदुःखाद्यनुभवस्त्रजीववत्त्वचाह ॥ नगादिति ॥ जगतउत्पत्तिस्थितिलयेषु निमित्तभूतेषु जगदुद्भवाद्यर्थमित्यर्थः देवतोदेवान्देवोभग
वानतत्संबंधिसंकल्पो देवत्वस्मात् बहुभिद्यमानगुणया बहुधा विद्यमानागुणाः ब्रह्मरुद्रादिदेहरूपेण परिणम्यमानाः सत्वादिगुणा यस्याः

योगेश्वरा ऊचुः प्रेयान्नतेन्योस्त्यमुतस्त्वयिप्रभो विश्वात्मनीक्षेन्नपृ
थग्य आत्मनः ॥ अथापि भक्तेशतयोपधावतामनन्यवृत्त्यानुगृहाणवत्सलः ॥

यात्ममायया रचिता आत्मभेदमतये रचितः आत्मनि यो भेदः देवत्वमनुष्यत्वादिरूपः तद्विषयामतिर्बुद्धिर्यस्मात्तस्मै देहात्माभिमानान्वितदेहेत्वद्रूपश
रीरायेत्यर्थः यद्वा बहुभिद्यमानगुणया बहुभिद्यमानाः देवमनुष्यपश्वादिरूपेण गम्यमानाः सत्वादिगुणा यस्याः तया आत्मनः परमात्मनो
मायया न स्वशरीरभूतया माययेत्यर्थः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपां गुणैर्विचित्राः सृजंतीं सरूपाः प्रकृतिं प्रजाद्
मादिकमत्रानुसंधेयं तया मायया देवान् भगवत्संकल्पात् जगदुद्भवस्थितिलयेषु सत्सु अत्रात्ममाययेत्यनेन आत्मसंबंधित्वावगमात्संबं
धमात्मान्यस्य विशेषपर्यवसानजिज्ञासायां यस्यात्मा शरीरं यस्याव्यक्तं शरीरमिति श्रुत्यवस्थापितशरीरशरीरिभावरूपसंबंधविशेषप
र्यवसानान्तत्र आत्मिकया मायया जगदुपादानत्वमवगंतव्यं जगदुपादानभूतया मायया जगदुत्पत्त्यादिषु सत्सु स्वसंस्थया स्वस्य संस्थया समय

णावस्थितिसंपादयिता स्वभेदरूपरचिताः आत्मभेदाः आत्मगता देवत्वमनुष्यत्वादयो भेदास्तद्विषयामतिर्यस्य तस्मै तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि नामरूपे व्याकरोदिति आदिश्रुत्युक्तरीत्या स्वस्य चिदचिदात्मतयानुप्रवेशेन चिदचिद्गतनामरूपभेदस्य स्वपर्यंतत्वव्याचिकीर्षितेनेत्यर्थः चिदचिद्गतनामरूपभेदस्य चिदचिद्द्वारा स्वपर्यंतत्वानुदृष्टेरित्यर्थः एवंभूतायापि विनिवर्तितभ्रमगुणात्मने विशेषेण निवर्तिता विनिवर्तिताः नित्यनिवर्तिता भ्रमः अन्यथाज्ञानविपरीतज्ञानादिरूपः गुणाः तद्धेतवो रजस्तम आदिगुणाः आत्मनि येन तस्मै ॥ विनैवंप्रकारेण नित्यनिवर्तितहेयायेत्यर्थः अनेन विश्वगतदोषापत्तिः परिहृता एवंभूताय तेन नमः केवलं नमस्कुर्मो न तु तद्गुणान्वर्णयितुं शक्नुम इति भावः ॥४८॥ योगीश्वरैर्निरस्तनिखिलहेयत्वेन स्तुते भगवति स भगवान् किं निर्गुण इत्याशंकायां निरस्ताखिलहेयः समस्तकल्याणगुणाश्चेति स्तुवन्नमस्करोति ॥ शब्दब्रह्मा नम इति शब्दब्रह्मशब्देन वेदा विवक्षिताः निर्गुणाय निर्गताः सत्वरजस्तम आदयो हेयगुणा यस्मात् तस्मै नि

जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया ॥ रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥
॥४९॥ श ब्रु वा नमस्तेऽश्रितसत्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥५०॥

रस्ताखिलहेयायेत्यर्थः कल्याणगुणवत्त्वमाह धर्मादीनां धर्मार्थादीनां प्रसूतये प्रकृष्टा सूतिर्यस्मात् स प्रसूतिः तस्मै प्रसवित्र इत्यर्थः धर्मप्रसवित्वं धर्मादिप्रशासकवेदोपार्जनत्वद्वारा ॥ तथा च श्रुतिः तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति स्मृतिश्च अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा ॥ आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतय इति ॥ अनेन सर्वकारणत्वतदुपयुक्तसर्वज्ञत्वसर्वशक्तित्वादिनापरेऽपूत्वा वात्सल्यादिकल्याणगुणजातं विवक्षितं ॥ नहि किं कति कल्याणगुणा इत्यत्र तेषामानंत्यमाह ॥ तत्काष्ठं तेषां तत्स्वरूपरूपगुणविभूतीनां काष्ठां अवधिं अहं शब्दब्रह्मन वेद न जानामि अपरे ब्रह्मादयोऽपि न विदुः अहमेव न जानामि कुतो परे महदाय तनसूक्ष्मदर्शिनो ज्ञानी पुरिति कैमुत्यन्यायोऽत्र विवक्षितः अत्र तेषां तत्त्वनिषेधो न स्वरूपगुणादिविषयः ॥ किंतु तदियत्ताविषयः तथा च श्रूयते

यस्यामतं तस्यमतं यस्यनवेदसः यतोवाचोनिवर्त्तंते अप्राप्यमनसासह ॥ आनंदंब्रह्मणोविद्वान् अविज्ञातंविजानतां विज्ञातमविजानतामितिपरिछि
न्नत्वेनजानतोऽमतं अपरिछिन्नत्वेनजानतस्तुमतमित्यर्थः ॥ ३ए ॥ एवंशब्दब्रह्मणि ॥ निरस्तनिखिलहेयत्वेनसमस्तकल्याणविशिष्टत्वेनभग
वतंस्तुवन्नितरदभिनेघ्याग्निः सर्वतेजसामाछादकत्वसर्वतेजःप्रकाशकत्वादिकल्याणगुणांतरविशिष्टत्वेनस्तुवन्नमस्करोति ॥ यत्तेज
सेति ॥ यस्यभगवतस्तेजसाप्रकाशेनसुसमिद्धप्रदीप्ततेजायस्माहं ॥ अनेनस्वस्यतत्प्रकाशेनसुसमिद्धतेजस्त्वकथनेनतत्तेजसाविना
स्वस्यासुसमिद्धतेजस्त्वमुक्तं एतदेवहिसर्वतेजसामाछादकत्वंपरत्वायतंसर्वतेजसांप्रकाशनमिति अहमितिसर्याहीनामुपलक्षणं तथाच

अग्निरुवाच ॥ यत्तेजसाहंसुसमिद्धतेजाहव्यंवहेस्वध्वरआज्यसिक्तं ॥ तंय
ज्ञियंपंचविधंचपंचभिःस्विष्टंयजुर्भिःप्रणतोस्मियज्ञम् ॥ ४१ ॥

श्रुः यतेनतत्रसर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिव्वाहितश
क्तोनामेवास्माकंस्वस्वकार्यक्षमत्वमित्याह यत्तेजसासुसमिद्धतेजाः अहंसध्वरे आज्यसिक्तंहविर्वहामिइंद्रप्रभृतिभ्यइंद्रादिदेवताभ्यःप्रतिन
यामीत्यर्थः तंयज्ञियंयज्ञायहितंयज्ञोहदेवयजनेंद्रादिदेवतामन्त्रेतिसमर्थः पंचविधंत्रेतासभ्यावसथ्यरूपेणपंचविधाग्निशरीरंपंचभिर्य
जुर्भिः आश्रावयेतिचतुरक्षरमस्तुश्रौषडितिचतुरक्षरंयजेतिद्व्यक्षरंयेयजामहइतिपंचाक्षरंद्व्यक्षरोवषट्कारइतिश्रुत्युक्तैःपंचभिर्य
जुर्भिःस्विष्टंसुष्टुपूजितंतथाचोक्तं चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच ॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदत्वितिनित्यंप्रणतो

भा.द.

॥४२॥

सन्त्वाविष्णुरिदेवतात्मकत्वेन सर्वयज्ञमूर्तित्वेन भगवंतं स्तुवंति जगत्कारणत्वेन वेदं सर्वमुपपन्नमिति मत्वा देवाः सौलभ्यादिकल्याणगुणानंतरविशिष्टत्वेन
स्तुवंति॥ पुरेति॥ अत्र सर्वोपादानत्वात् पुमान् पुरा अग्रे सृष्टेः प्रागित्यर्थः कल्पापाये प्राक्तनकल्पांते स्वकृतं स्वसृष्टं विकृतं कार्यवर्गमुदरीकृत्य उदरे निहित्य
संहृत्येति यावत् उरगेंद्रः शेषः स एवाधिशयनं शय्या यस्मिन् तस्मिन् सलिले शेषे शयितवानसि सिद्धैर्जनलोकवासिभिः हृदि विमृशिता अध्या
त्मपदवी स्वात्मतत्त्वज्ञानमार्गो यस्य स योगपरिष्कृतमनोग्राह्य इत्यर्थः एवंभूतोपि त्वमेवाद्य अधुना अक्ष्णोः पथि चरसि प्रत्यक्षोसि वा अत्र नसा
गोचरत्वे सौलभ्यातिरेकाख्यगुणोपि सूचितः भृत्यान् अस्मान् अवसि पालयसि अनेन भक्तानुग्रहकातरत्वमुक्तं॥४२॥ देवेषु सर्वकारणत्वसौलभ्या
दिगुणविशिष्टत्वेन स्तुतवत्सु गंधर्वाप्सरसस्तु तत्कार्यभूतमिदं कृत्स्नं जगत् क्रीडोपकरणमिति स्तुवंतो नमस्कुर्वंति॥ अंशांशा इति हे भूमन्

देवा ऊचुः पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधिशयने॥ पुमान् शेषे सिद्धै
र्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः॥४२॥ गंधर्वा ऊचुः॥ अंशांशास्ते देव मरी
च्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः॥ क्रीडाभांडं विश्वमिदं यस्य भूमन् तस्मै नित्यं नाथ नमस्ते करवाम॥४३॥

हे भूमन् जगदंतर्बहिर्व्याप्य वर्तमान हे देव ध्यानमानमरीच्यादिमुख्या येषां तथा ब्रह्मेंद्रौ आद्यौ मुख्यौ येषां रुद्रः पुरोगो मुख्यो येषां एते देवगणास्ते
तव अंशांशाः॥ अत्र देवगणानां मरीचिब्रह्मरुद्रेंद्रमुख्यत्वकथनं सृष्टिस्थित्याद्यधिकाराधिकृतदेवताबहुत्वाभिप्रायेण तत्र सृष्टिसृष्ट्यां
मध्येपि चतुर्मुखस्य मरीच्यादीनां च प्रधानत्वात् ब्रह्मादयो मरीच्यादय इति चोक्तं॥ तत्रापि प्राधान्याप्राधान्याभिप्रायेण ब्रह्मादयो मरीच्यादय इति
चेकोदितयेनोक्तिः इंद्रपुरोगत्वकथनं पालनाधिकारिदिग्गीशानाभिप्रायेण रुद्रपुरोगत्वकथनं संहाराधिकार्यभिप्रायेण यद्वा सर्वेषां भगवद
ंशांशत्वेनोनशक्तित्वादि भगवद्गुणलेशाभिव्यक्तिकृतमिति विवेरितव्यं विशिष्टवस्त्वेकदेशरूपांशांशत्वं तु सर्वजीवसाधारणमिति ताद्विशिष्य न

एवं हरस्तावितयुगंधर्वाप्सरोगणेषु तत्रकल्याणगुणविशिष्टं भगवंतं स्तुतवत्सु नावहासोकल्याणगुणवर्णनमसंख्येयत्वात्तेषां इदं त्वद्गुणमाहात्म्यं त्व
त्कथामृतमितिमाहुर्विद्याधराः त्वन्माययेति । त्वन्मायया अयथार्थसंकल्पेन ॥ अयं सर्वपुरुषार्थसाधनं नरदेहमभिपद्य अस्मिन्कलेवरे देहे तदनुबं
धिनि च ममाहमिति दुर्मतिं दुर्बुद्धिं कृत्वापि दुर्मतिरिति प्रथमांतपाठे हमिति शेषः अहं ममाभिमानं कृत्वेत्यर्थः अतएव दुर्मतिः वैषयिकसुखा
नामेदुःखिन विनोपि इत्यर्थः लोकवेदमर्यादोल्लंघिभिः स्वैः पुत्रादिभिः क्षिप्तोपि तिरस्कृतोपि असद्विषयेषु प्रकृतिपरिणामरूपशब्दादिवि
षयेष्वासक्तोपि यदि युष्मत्कथामृतनिषेवकः युष्मत्कथैवामृतं तत्सेवनं इति युष्मत्कथामृतनिषेवकः सेवनमत्र श्रवणश्रावणादिरूपं

विद्याधरा ऊचुः । त्वन्माययार्थमभिपद्य कलेवरेस्मिन्कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ॥ क्षिप्तोप्यसद्विष
यलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत ॥४४॥ ब्राह्मणा ऊचुः ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं
त्वं हि मंत्रः समिद्दर्भपात्राणि च ॥ त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥४५॥

पं विवक्षितं तर्हि आत्ममोहं आत्मनो मोहं अहंकारममकाररूपं मोहं उद्व्युदस्येत ॥ उच्चैर्व्युदस्येत परित्यजेत मुक्तो भवेदिति भावः अहं ममाभि
मानादिरूपं तस्मात्सद्विषयप्रवणत्वात्प्रत्यात्ममोहनिवर्तनद्वारा मुक्तिसाधनं त्वत्कथामृतमेव नान्यउपायोस्तीति इदं त्वत्कथामृतमाहात्म्यम
स्मद्गुणमिति भावः ॥४४॥ ब्राह्मणास्तु नावहासोकथामृतमाहात्म्यमिदं त्वद्गुणनमंत्रात्ममाहात्म्यमिति कथयिष्यंतः प्रकृतयज्ञनिरूप्याचि
कीर्षया यज्ञसाधनं निर्मितेन स्तुवंतः तस्मादं प्रार्थयंते तमिति त्रिभिः त्वं क्रतुर्यज्ञः हविः पुरोडाशादिः सदस्याश्च ऋत्विजस्ते त्वमेव हुताश
त्विता रूपः वेदनादनद्यः अग्निहोत्रं अग्निहोत्राख्यं कर्मविशेषः क्रतुरित्यनेन यागात्मकत्वमुक्तं अग्निहोत्रमिति होमात्मकत्वं देवताद्देश्य

नद्ग्रस्यमानस्त्रोयानः सत्वः प्रक्षेपादिको होमः सर्वत्र सामानाधिकरण्यं शरीरात्मभावनिबंधनम् ॥४५॥ यज्ञानुष्ठानोपयोग्यस्य पृथिव्युत्थितानय
नववोधिविध र्यवास्यादिरूपेणावस्थितवेदमूर्तिं स्वतमेवत्स्याहुः त्वमिति पुराकल्पादौ महासूकरः स्वेतवाराहरूपस्त्वं वारणेंद्रो गजः श्रेष्ठः पद्मि
नीं यथा समसीमिव अम्भसोपमेयं न हि वारणेंद्रः पद्मिन्युद्धरणं क्वचिद् दृष्टं रसाया रसातलात् गां पृथिवीं दंष्ट्रया उद्धृत्य उत्पाटयन् योगिभिः स्तूय
मानः अनुद्दर्षविशेषेणोद्धृतवानसि ॥ हे त्रयीगात्र वेदमूर्ते अत एव यज्ञक्रतुः यज्ञो यागः क्रतुराराधनरूपं कर्म यस्य सः ॥ यद्वा हे यज्ञवि
लोपेन वै विग्नुः यज्ञाया चरतः कर्मणि स्युत्तिरूप निर्भ्यां क्रतुः क्रतुमर्ति रित्यर्थः ॥४६॥ स एवं भूतस्त्वं परिभ्रष्टसत्कर्मवैदिकत्वदाराधनरूपं या

त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा ॥ स्तूयमानो नदल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्रय
ज्ञक्रतुः ॥४६॥ स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते य
ज्ञविघ्नाः क्षयं यान्ति तस्मै नमः ॥४७॥ श्रीमैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितं ॥ कीर्त्यमाने हृषीकेशे सन्नि

गान्ध्यं कर्म येषां अत एव तत्फलापरिहारायत्वत्संदर्शनमाकांक्षतां कामयमानानां अस्माकं प्रसीद प्रसन्नो भव हे यज्ञेश यस्य ते तव नाम्नि नृ
भिर्नरैः कीर्त्यमाने सति यज्ञस्य विघ्नाः क्षयं नाशं यांति तस्मै ते नमः ॥४७॥ इत्यादीनां स्तुतिमुपसंहरन् तैः स्तुतो भगवान् तानंनुगृह्णन् आव
भाषे इत्याह ॥ मैत्रेयः इतीति हाम्या हे भद्र विदुर इत्थमनेन प्रकारेण विघ्नभावने विघ्नकारणे हृषीकेशे कीर्त्यमाने सति कविः कर्मसुकु
शलो दक्षः रुद्राभिमर्शितं रुद्रेण विहतं यज्ञं संनिन्ये प्रवर्त्तयामास ॥४८॥

रुद्रेणामंत्र्य रुद्रमितिवा। पूर्वं गेहभाजा भागान रुद्रानभिमर्षिणेन भिद्रानं नीतुं न ज्ञागप्रहायं तनदभिमर्षिण मिमवगं तवम। सर्वात्मा सर्वस्यात्मा सर्वात्मनयाम
ईभागभोक्तापि भगवान् स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाणमिव दक्षं आभाषाभिमुखीकृत्य बभाषे॥४९॥ तत्राहितोपदेशं भगवान् कार्य
कार्यकारणरूपेणावस्थितः प्रकृतिपुरुषशरीरकोऽहमेक एव मच्छरीरभूत ब्रह्मरुद्राख्यजीवानुप्रवेशेन जगत्सृष्टामि संहरामि स्वावृता
रूपेण पालयामि अतो मत्तः मच्छरीरभूताच्च न व्यतिरिक्तं वस्त्वस्तीति अब्रह्मात्मकस्वतंत्रवस्तुदृष्टिर्देहात्मभ्रांतिमूलाना। तुनाविकीस
र्वस्य ब्रह्मात्मकत्वदृष्टिस्तुनाविकीमुत्रपायभूतेत्याह॥ अहमितिपंचभिः अहं निरस्तनिखिलदोषत्वेन समस्तकल्याणगुणात्मकत्वेन च भ
वद्भिः स्तुतः सर्वाध्यक्षविकाररहितोऽहं ब्रह्मादिसर्वभूतान्तरानुप्रविश्यत्वेन मम तत्स्वत्वेन महापतसृष्ट्याद्युपयुक्तज्ञानवत्त्वेन च प्रसिद्धौ ब्रह्मरुद्रौ

भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक्॥ दक्षं बभाष आभाष्य प्रीयमाणमिवानघ॥४९॥ श्रीभगवानुवाच॥
अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्॥ आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः॥५०॥

च जगतः परं कारणं स्थितिसर्गप्रलयकारणं॥ अनेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणि यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्र
हिणोति तस्मै यतो हैवाविश्वधर्मशेषप्रसारको धूमं भवो महादर्शिनपंथ्या नो सृष्टिसंहारकारको सृष्टिं ततः करिष्यामित्यासाविश्वप्रजाप
तेरमृदिश्यु नियमनुरोधायमर्थोऽलभ्यते॥ ननु प्रतिनियतसृष्ट्याद्यधिकारभेदेन पृथक्त्रयाणां कारणत्वमभिहितं कथं कृत्स्नस्य जग
तः त्वमेककारणत्वमुच्यते॥ अत एवाहितत्वात ब्राह्मणे वै सर्वा देवताः न कश्चिदिन्द्रत्वमुत्तरः अग्निः सर्वा देवता एक एव रुद्रः सोमः
पवने जनिता मतीनां जनिता पृथिव्या जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः आपो वा इदं सर्वमित्यादिभिः आम्नाय

न्तीं द्वारीनामविसमाप्यधिकमहिमप्रतीतेरर्थवत्त्वमव्याकुलं ॥ सर्वेषां पृथक्कारणत्वे सममप्यधिकमहिम्नेव प्रतीतेऽपि न ह्याहतं अन्यपरतया धिगतं
चेत्स्वारस्यांशं ॥ अतएव तत्त्वप्रधाने सृष्टिस्थितिप्रलयप्रकरणे पृथग्देवस्वरूपेण मुक्तोपास्यत्व निरतिशयबृहद्गुणत्वेनैकमेव ब्रह्म जन्मस्थिति
प्रलयसमवायरूपेण जिज्ञास्यलक्षणमत्र लक्षितं सूत्रकारेण जन्माद्यस्य ॥ यत इति तत्र कारणभूतपरामर्शिना यत इत्यनेन कारण
त्वाक्षेपुष्टो गोवा मन्त्रवर्णादिति सौत्रन्यायात्सर्वस्यादिप्रदानामामान्यानां नागयुणादिविशेषपर्यवसायित्वात्सर्वश्रुतीनां नाराय
णएव पर्यवसानमिति ॥ यतो वा इमानीत्यादिश्रुतेरिदयमिति सूत्रकारस्याभिप्रायो ज्ञायते अतः सृष्ट्यादिभिर्लक्ष्यं कारणमेकमेव
नतु नानाभूतं ब्रह्माद्यत्वं सर्वेष्वेवमादिभिः प्रतिनियतस्थित्यादिकारणत्वकीर्तनं नतु प्रयोजनप्रयोजकभावेनान्वेवमपि सृष्ट्यादीनां प्र
त्येकं लक्षणत्वात्तत्त्वसमापि कारणं वस्तु नानाभूतमिति चेन्न समुदायस्य लक्षणत्वात् ॥ सृष्टिस्थितिप्रलयानां समुदायो हि लक्षणं न
त्वेकैकं समुदायस्य लक्षणत्वं हि श्रुतिस्वारस्यादवसीयते ॥ यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशं
तीत्येतत्र प्रतिवाक्यं तद्ब्रह्मेत्युक्तेः ॥ अन्यथैकैकलक्षणत्वे तु व्यर्थत्वं स्यात् ॥ ननु समुदितं न लक्षणं व्यावर्त्ताभावात् ॥ न हि जगदुत्पत्तो
निमित्तोपादानभूतस्थित्यादिकारणत्वव्यवच्छेद्यं किमपि वस्त्वस्तीति चेत् ॥ मतस्य व्यवच्छेद्यत्वेन तथापि श्रुत्यनुरोधात्सूत्रकारेण ज
न्मादीत्येकवचनान्तेन समुदायवाचिना समुदायस्य लक्षणत्वमुक्तं ॥ श्रुतिश्च तद्धि जिज्ञासस्वेति विधित्सितोपासनोपयोगिनिरतिश
यबृहत्त्वविपरीताबृहत्त्वशंकाव्यवच्छेदार्थं समुदायमाह ॥ शंकितव्यवच्छेदेनापि हि सप्रयोजनत्वं स्यात् ॥ लक्ष्याकारविपरीतशंकानिरा
करणेन विना लक्ष्याकारनिश्चयायोगात् ॥ न च जन्मादिष्वेकैककारणत्वे लक्ष्याकारविपरीतशंकानिराकरणं क्षमं ॥ तथाहि उत्पत्ति
कारणत्वेनाभिहितेऽपि स्थित्यादिकारणत्वं न चेतनत्वगुणज्ञानशक्तिविरहान्न स्थितिप्रलयकारणभूतवस्त्वन्तरसद्भावाच्च जन्ममात्रका
रस्य निरतिशयबृहत्त्वं न स्यात् ॥ मुक्तैर्लयान्तर्गभावान्मोक्षप्रदतयोपास्यस्यैव प्राप्यत्वाच्च मोक्षप्रदत्वप्राप्यत्वानुगुणोऽस्य बृहत्त्वं न सिध्य

ति ॥ अतो जन्मादिकारणत्वमात्रस्य समस्तवस्तुव्यवच्छेदकत्वमतोऽपि जन्मादिसमुदायकारणत्वस्यैव निरतिशायबृहत्त्वोपयिकत्वात् सृष्टिस्थितिप्रलय
समुदायकारणत्वं लक्षणमिति ज्ञापितम् ॥ अतः समुदायस्यैव लक्षणत्वादपि तस्य ब्रह्मवस्त्वेकमेव साक्षात् ब्रह्मादीन् प्रति योजकत्वेन च का
रणमिति मुख्यमन्यत्र कस्यैव तत्त्वसमवायकतया द्वारकतया च कारणत्वे स्पष्टे प्राक् कथमवस्थितः कथं तत्त्वसमिष्ट्यन्तरं ब्रह्मरुद्रादीनां सृ
ज्यान्तर्यामित्वेऽपि पर्यवसानमित्यत्राह सोऽहमिति ॥ आत्मेश्वर इति ॥ आत्मनः स्वस्य ईश्वरः आत्मेश्वरः पतिं विश्वस्यात्मेश्वरमिति श्रुतेः अने
न स्वस्य प्रयोजकान्तराप्रयोज्यत्वमुक्तं आत्मना स्वस्मिन् लीनानां जीवानामीश्वरः अतः ॥ प्रविश्य नियन्तृत्वेनावस्थित इति वा उपद्रष्टा
उपद्रष्टृत्वेवमनुमन्त्रादिनामरूपाभावात् केवलं द्रष्टृत्वेनावस्थित इत्यर्थः ॥ अनेन पदद्वयेन नामरूपविभागानर्हमिति सूक्ष्मप्रकृतिपुर
षशरीरकत्वं फलितम् ॥ यस्यात्मा शरीरं यस्याव्यक्तं शरीरं असद्वा इदमग्र आसीत् तद्धेदं तर्ह्यव्याकृतमासीदिति च श्रवणात् ॥ एवं चना
मरूपाविभागानर्हसूक्ष्मचिदचिद्विशिष्टस्यैनैवं कारणवस्तुस्थितिरित्युक्तं भवति ॥ कारणत्वोपयुक्तकल्याणगुणत्वमाह स्वयंदृगिति
तिमिराविर्भूतासंकुचितज्ञान इत्यर्थः ॥ स्वयं आत्मना पश्यतीति स्वयंदृगिति व्युत्पत्तेः अनेन निमित्तत्वोपयुक्तनिरुपाधिकसर्वज्ञत्वमुक्तं
स्वयंदृगित्युपादानत्वोपयुक्तसर्वशक्तित्वादेरप्युपलक्षणम् ॥ हेयगुणराहित्यमाह ॥ अविशेषणः विशेषणानि प्रकृतिपुरुषगतानि जड
त्वपरिणामित्वासर्वज्ञत्वदुःखित्वादयो यावन्तोऽकाराः तद्रहित इत्यर्थः ॥ अविशेषण इति न सर्वगुणनिषेधः स्वयंदृगिति कल्याणगुण
विधानात् ॥ कारणत्वोपयुक्तगुणकथनस्यापेक्षितत्वान्निषेधस्याविहितेतरविषयत्वाच्च ॥ ५० ॥

भा.पु.

॥ ४६ ॥

सोहं स्वस्वप्रकृतिपुरुषशरीरको निरस्तनिखिलहेयः समस्तकल्याणगुणात्मकोऽहं हे द्विज दक्ष गुणमयीं त्रिगुणात्मिकां आत्ममायां आत्मीयां प्रकृ
तिं समाविश्य जीवद्वारा संकल्परूपज्ञानेनानुप्रविश्य जगत्सृजन् ब्रह्मद्वारा सृजन् रक्षन् अद्वारा पालयन् हरन् रुद्ररूपेण संहरन् क्रियोच
चितां सद्वारकाद्वारकसर्गादिक्रियोचितां संज्ञां ब्रह्मविष्णुशिवात्मिकां संज्ञां संदधे बिभर्मि अतः कृत्स्नचिदचिदात्मकप्रपंचरूपकार्यरूपेण ॥ च ॥
स्वस्वप्रतिपुरुषशरीरकत्वेन कारणरूपेण वास्थितोऽहमेक एवेति न मद्व्यतिरेकं वस्त्वस्तीति भावः तथा च श्रूयते ॥ नामरूपे व्याकरवाणि तत्सृ

आत्ममायां समाविश्य सोहं गुणमयीं द्विजः ॥ सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचितां ॥ ५१ ॥

ष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति ॥ नन्वनुप्रविश्य नामरूपे व्याकरवाणीत्यनुप्रवेशपूर्वकत्वं सृष्टेः प्रतीयते तत्सृष्ट्वा त
देवानुप्राविशदिति सृष्टिपूर्वकत्वं प्रतीयते कथमेतद्विप्रतिषिद्धमुपपद्यते ॥ उच्यते ॥ अत्र ह्यनुप्रवेशसृष्ट्योः समानकर्तृत्वमात्रमेवा
वविवक्षितं न तु पौर्वापर्यमपीति ल्यापन्यायविप्रतिषिद्धनिर्देशः अत एव हि तत्सृष्ट्वा विदधद्रूपमेतीत्यनुप्रवेशसृष्ट्योर्योगपद्यमस्य ॥ ४६ ॥
वष्टुं तेन तत्सृष्ट्वा तदेवानुप्राविशदिति स्थितस्यैवानुप्रवेशो वा विवक्षित ॥ ५१ ॥

सर्वं हि सर्वस्वरूपात्मकत्वान्मध्यानिरिक्तस्वतंत्रवस्त्वभावादसदात्मकस्वतंत्रवस्तुदृष्टिर्देहात्मभ्रांतिमूलेत्याह ॥ तस्मिन्कार्यावस्थकारणाव
स्थप्रकृतिपुरुषेश्वरे किं न यंतृत्वं राजादिवन्नेत्याह ॥ परमात्मनि प्रकृतिपुरुषयोरंतःप्रविश्य पतत्यतेर्दोषैरस्पृष्टः प्रशासने भर्तरि ग
वमेव हि परमात्मशब्दाद्योगीतानाचार्यैः श्रोक्तः उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः अत्र
लोकत्रयमित्यनेन प्रकृतिपुरुषावुक्तौ न तदात्मकत्वाल्लोकत्रयस्याविश्येत्यत्रांतःप्रविष्टः शास्तीति श्रुत्यनुरोधादंतःप्रविश्येत्यर्थः
अव्यय इत्यनेनाविकारित्ववाचिना प्रकृतिपुरुषगतदोषास्पर्शित्वमुक्तं ईश्वर इत्यनेन नियंतृत्वमभिहितं बिभर्तीत्यनेन धारकत्वं फलितं
किमेवंभूतस्यादस्यः कश्चिदस्तीत्याह ॥ अद्वितीये स्वसमानद्वितीयवस्तुरहित इत्यर्थः यथा चोलनृपः सम्राडद्वितीयो भूतल इत्य

तस्मिन्नत्रस्मापद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोनुपश्यति ॥५२॥ छ

केवले स्वाधिकवस्तुरहिते तथा च श्रूयते ॥ न तत्समश्चाभ्यधिकश्च दृश्यते स्मर्यते च न त्वत्समोस्त्यभ्यधिकः कुतोन्य इति यद्वि
तुपादद्वितीय इति स्वसमानवस्तुनिषेधादेव न त्वधिकवस्तुनिषेधः कैमुत्यन्यायसिद्ध इति तर्हि केवलनिरस्तनिखिलहेयेत्यसाधार
णस्वरूपेण गुणैश्च निरतिशयबृहति अनंतकल्याणगुणात्मकस्वरूप इत्यर्थः ॥ एवंभूते मयि भूताविमदहंतरात्मकतया मदाय
तनस्थायिनी निमच्छरीरतया मदपृथक्सिद्धे तेन स्थिताविद्ब्रह्मरुद्रादिभूतानि भेदेन पृथक्सिद्धत्वेन स्वतंत्राणि अज्ञः ब्रह्मा
त्मकत्वज्ञानरहितो देहात्मबुद्धिः विपश्यति ॥ अनेन देहात्मभ्रांतिस्वतंत्रात्मभ्राम्यतिभेदेन दर्शनमूलमित्युक्तम् ॥५२॥

भा॰टी॰

॥४०॥

सर्वेषां मदात्मकत्वज्ञानिनस्तु न भूतानि वेदेन पश्यंतीति सदृष्टांतमाह ॥ यथेति ॥ पुमान् देहात्मभ्रांतिमानपि पूरुषः स्वांगेषु पृथक्स्थितमर्हेषु शिरःपाण्याद्यवयवेषु मध्ये क्वचित्कस्मिंश्चिदप्यवयवे पारक्यबुद्धिं परकीयं तस्य भावः पारक्यं तेन पृथक्स्थितमर्हत्वं स्वतः परकीयबु गम्यस्थानं पृथक्स्थितमर्हे न बुद्धिं न कुरुते एवं मत्परः मदाश्रितचित्तः सर्वस्य मदात्मकत्वज्ञानसंपन्न इत्यर्थः ॥ भूतेषु मत्तः पृथक्स्थितमर्हत्वबुद्धिं कुरुत इत्यर्थः ॥ ५३ ॥ एवं कृत्स्नस्य जगतः स्वात्मकत्वेन स्वपृथक्स्थितमर्हे विशेषणत्वेन स्वप्रकारतयामुपपाद्य पृथगीश्वरत्वेन शंकितयोर्ब्रह्मरुद्रयोरपि मदायत्तसत्तादिमत्त्वेन मत्प्रकारत्वज्ञानं मनःप्रशांतिद्वारा मुक्तिसाधनमित्याह त्रयाणामिति

यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ ५३ ॥
त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ॥ सर्वभूतात्मनां ब्रह्मन्स शांतिमधिगच्छति ॥ ५४ ॥

हे ब्रह्मन् दक्ष एकभावानां एको भवः सत्ता येषां भव इति स्थित्यादीनामप्युपलक्षणं एकविधसत्तादिमतां मदायत्तसत्तादिमतामित्यर्थः ॥ एकस्मिन् भावो येषामिति व्यधिकरणबहुव्रीहिर्वा त्रयाणां ब्रह्मविष्णुरुद्राणां तत्र ब्रह्मरुद्रयोः परमात्मायत्तसत्तादिमत्त्वकथनेन तयोः परमात्मानं प्रति अपृथक्सिद्धप्रकारता ज्ञाविष्णोस्तु विष्ण्वायत्तसत्तादिमत्त्वकथनेनानन्याधीनसत्तादिमत्त्वकथनेनानन्याधीनसत्तादिमत्त्वं फलितं ॥ तथा च श्रूयते स्वमहिम्नि प्रतिष्ठितः पतिं विश्वस्यात्मेश्वरमिति ॥ एकशब्देन मूर्त्ति ॥ त्रयातिरिक्तां परं वस्तु पलक्षणं त्रयाणां तदायत्तभावादिमत्त्वकथनं तु संगतं परत्वस्य जगत्कारणनिष्ठत्वात्कारणत्वस्यात्मेश्वरउप

॥४७॥

द्वेष्यादिष्वविशेषोऽस्त्येव प्रतिपादितत्वादितितिरिक्तो न्यूक एवं त्वं भाभावादस्मिन् ब्रह्मणादितीये केवले परमात्मनीति विशेषः परत्वस्यैवोक्तत्वाच्च तारकभावा
नोपकस्वरूपाणामिति त्रयाणां तदात्मवर्णनं तत्र युक्तं ब्रह्मरुद्रयोः कर्मवश्यत्वसमतपाल्यत्वनियाम्यत्वादेरनपहतपाप्मत्वाच्च अहमस्मि नारा
यणाद्रुद्रो जायते इत्यादिश्रुतत्वाज्जीवत्वनिश्चयात् यद्यपि ब्रह्मा नारायणः शिवश्च नारायणः ब्रह्मा नारायणस्यैवोऽसौ कस्माद्देवो भगवान्
यथा प्रजाः ससर्ज भगवान्नारायणात्मकः ततः स भगवान्विष्णुरुद्ररूपधरोऽव्ययः ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वं हरो हरिः सर्ग
स्थितिसंहारकरणाद् ब्रह्मविष्णुशिवात्मिकां स संज्ञां याति भगवानेक एव जनार्दन इत्यादिप्रमाणात् त्रिमूर्त्यैक्यं अंगीकार्यं तथापि नारा
यणाद्रुद्रो जायते नारायणात्॥ द्वादशादित्यास्तद्वा वसवः सर्वाणि भूतानि नारायणाद्देवं समुत्पद्यंते॥ एको ह वै नारायण आसीन्न
ब्रह्मा नेशानः॥ एको ह वै नारायण आसीन्न ब्रह्मा न च शंकरः॥ स मुनिर्भूत्वा समचिंतयत॥ ततस्तेभ्यजायंत विश्वहिरण्यगर्भोऽग्नि
र्यमवरुणरुद्रेंद्राः यच्चाभिपद्मादभवन्महात्मा प्रजापतिः तत्र ब्रह्मा चतुर्मुखो जायत सोऽग्रे भूतानां मृत्युं सृजत अग्रजं त्रिशिरस्कं निया
म्यवद परमब्रह्मणा पुत्रायमेष्यायद्दारूप्यः॥ कालमत्यैवाखिलं जंतवः विभूतयो हरेरेता जगतः सृष्टिहेतवः रुद्रः कालांतकाद्याश्च
समस्ताश्चैव जंतवः इत्यादिषु भगवतस्तयोश्च परस्परभेदावगमात्॥ समानाधिकरण्यस्पष्टं ततः करिष्यामि त्वामाविश्य प्रजापते
हरो हरिश्चेति तदृशः इत्यादौ तु गुणेनोतयोर्मितवेनाप्युपपत्तेः॥ भेदनिर्देशस्य स्वाभाविकभेदाभ्युपगमेन विनानुपपत्तेश्च नत्रिमूर्त्यैक्य
मुपपद्यते तस्माद्ध्येयो नारायण एव॥ सर्वभूतात्मनां तत्र विशेषः सर्वभूतात्मत्वं एष सर्वभूतांतरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः
अंतःप्रविष्टः शास्ता जनानां सर्वात्मा समस्तांतरात्मा न च वचये वास्य देहिमंजितादि इत्यादि श्रुतिस्मृत्युक्तं सर्वभूतांतरात्मत्वरूपमितर

श्री·चौ·
॥४८॥

योस्त्वगोष्ठेन नस्य चेतनानां नरत्वापत्त्यासंभवेन सर्वभूतानां ब्रह्मरुद्रास्य जीव आपत्त्यासंभवात् नानात्मस्वरूपेसर्वभूतात्मत्वमपितुन
दैन पृथक्त्वं पिबर्वा मदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चकक्षीवानृषि विप्रात्वं वाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देव
तेन द्योहं यो सौसोहं अहं हरिः सर्वमिदं जनार्दनः ॥ आत्मेतित्पगच्छंति ग्राहयंति चेत्यादि श्रुतिस्मृतिसूत्रोक्तविधया सर्वभूतान्तरात्म
त्वेन प्रसिद्धिन परमात्मस्वरूपं कथमेकस्य सतः हुपात्तस्य सः सर्वभूतात्मशब्दस्यार्थ इयपरत्वमुच्यते । एकस्यापि सर्वभूतात्मशब्दस्य
हृतेकशेषस्य बहुवचनांतस्यानिर्देशात् भिन्नार्थकानामपि शब्दानां सरूपाणामेकशेषविधानात् यथोक्तार्थपरत्वोपपत्तिः अने
न ब्रह्मरुद्रयोः सर्वभूतांतरात्मत्वेन प्रसिद्धिनमत्स्वरूपत्वेन प्रियोहि ज्ञानिनोत्यर्थः महं स च मम प्रियः ज्ञानी त्वात्मैव मे मतमितितद

श्रीमैत्रेय उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिं ॥ अर्चित्वा क्रतुनास्वेन देवानुभयतोयजत् ॥५५॥

कंरीत्या निरतिशयममतीति विषयत्वान्मच्छरीरत्वान्तद्विषये हृतोपराधो मय्येव पर्यवसन्नमभिप्रेतं । एवं च ब्रह्मरुद्रपरो सर्वभूतार
त्मशब्दो सर्वभूतेष्वात्मा परमात्मा यो आत्मा वितिमधिकरणबहुव्रीहि[illegible] विग्रहितव्यो सर्वभूतानां त्रयाणां यः पुमानभिदानपश्यति ईश्व
रात्म्यं यद् नित्यं पश्यति अपित्वेकत्वं रूपेणाच्युस्थितमिति पश्यतीत्यर्थः ॥ पूर्वापरानुगुण्यात्समासांतानुगनुराधाञ्च हे ब्रह्मन्दर्शशांति
मन्त्र ॥ प्रप्नोति अधिगच्छति शांतिमधिगमत्यागपुरुषो भवेदित्यर्थः ॥५४॥ रत्नाध्वरप्रसंगमुपसंहरति मैत्रेयमिति ॥ एवमिति भगवतैवं
मादिष्टः प्रजापतीनां पतिः प्रजापतिः दक्षप्रजापतिर्यस्मादिति वा रत्नः स्वेनस्वकर्त्तृकेन क्रतुना हरिमर्चयित्वा स्वेन त्रिकपालेनैकस्मिन्नेव योगे

एवं निखिलजगदेककारणत्वेन कृत्स्नविदविदंतरात्मत्वेन निरस्तनिखिलदोषत्वेन च वागाद्यींद्रियसंजीवयितृत्वात्तस्यैव ज्ञानप्रदत्वमुक्तं तदेव निद
र्शयन् तस्यैव निरतिशयपुरुषार्थसाधनत्वेन भजनीयतामाह ॥ त्वद्दत्तयेति त्वदीयया तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तमिति
वदता त्वया दत्तया वयुनया ज्ञानेन स्त्रीत्वमार्षं ॥ हे नाथ भवंतं प्रपन्नः शरणं गतो ब्रह्मा चतुर्मुखः सुप्तप्रबुद्ध इव पूर्वं सुप्तः पश्चात्प्रबुद्ध इव विश्वम
चष्ट अपश्यत् तद्विश्वदर्शनोपयोगिज्ञानविधुरस्त्वत्प्रपत्त्याहृतज्ञानेनासृजदित्यर्थः ॥ नात्र भूतार्थविवक्षा पश्यतीत्यर्थः हे आर्तबंधो तापत्रयार्
तानां बंधो अपवर्गशरणं मुक्त्युपायं ॥ आपवर्ग्यमिति पाठे स्वार्थे ष्यञ् ॥ अपवर्गे भवं आपवर्ग्यं सुखं तत्साधनमिति वा तव पादमूलं कृतवि

त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबं
धो ॥ ८ ॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं न
रकेपि नृणां ॥ ९ ॥

दास सर्वेंद्रियोपजीवनेन ज्ञानप्रदत्वाद्युपकारस्तेन कथं विस्मर्यते एवं महोपकारिणं त्वामभजंतः कृतघ्ना एवेत्यर्थः ॥ ८ ॥ तथा त्वां भजतोपि माह
ग्राः सकामास्तेपि मंदभाग्या एवेत्याह ॥ नूनमिति ॥ कल्पकतरुं कल्पकतरुतुल्यं आश्रितमभीष्टार्थप्रदत्वेन कल्पकतरुतुल्यं विवक्षितं ततो निरति
शयगुणवत्त्वमाह ॥ भवाप्ययविमोक्षणं भवो जन्म अप्ययो मरणं तयोर्मोक्षणं मोचनं यस्मात्तं यद्वा ॥ भवाप्यययोर्विमोक्षयतीति पुण्यताकर्त
रि तु ल्युट् वा बहुलकात् ॥ मुक्तिप्रदमित्यर्थः एवंभूतं त्वां ये मादृशा लोकाः अन्यस्य त्रिवर्गस्य हेतोः कारणात् भजंति ते जनास्तव मायया मम
मायातुरन्ययेत्युक्तविधया विमुष्टमतयः अपहृतज्ञाना इति निश्चये कुतस्ते विमुष्टमतयः इत्यत आह ॥ यद्यस्मात्स्पर्शजं विषयेंद्रियसंबंधजं ॥ अ

ननुवातेवैनिरयास्तान्स्यात्तस्यपरमात्मनइत्युक्तविधयावरकेनरकप्रायेपिसंसारेनृणांकुणपयोपभोग्यंकुणपयेनशवतुल्येनशरीरेणोपभोग्यं
सुखमितिशेषः इत्युक्तंति ॥ ९ ॥ ननुस्वर्गस्यापिसुखत्वप्रतिपत्तेःकिंतदर्थंभजमानान्निंदित्वानिष्कामान्प्रशंससीत्याशंक्यायांस्पर्शजस्यात्स्यास्थिरत्वा
त्विंहयामीत्यभिप्रेत्याहकिंवक्तव्यंनिष्कामभक्तिःसाध्यस्यापवर्गिकसुखस्यनिरवधिकत्वात् ॥ नतेनस्पर्शजस्यसाम्यमितियतस्त्वच्चरणध्यान
त्वद्भक्तजनकथाश्रवणजन्यसुखेनापिनैवैकल्यमपिसमानमितिकैमुत्यन्यायेनाह ॥ येति ॥ तनुभृतांदेहिनांतवचरणकमलध्यानात्भवज्जनभागव
तानांतेषांकथाश्रवणेनवायानिर्वृतिःसुखंस्यात्सानिर्वृतिर्हेनाथस्वमहिमन्यपिस्वाभाविकगुणैकरूपमहिम्निब्रह्मणिस्फुरद्धात्मन्यनुभूयमा

यानिर्वृतिस्तनुभृतांतवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात् ॥ साब्रह्मणिचस्वमहिमन्यपिनाथमाभूत्किंत्वंतकासिलुलि
तात्पततांविमानात् ॥ १० ॥ भक्तिंमुहुःप्रवहतांत्वयिमेप्रसंगोभूयादनंतमहतामलाशयानां ॥ येनांजसोल्बणमुरुव्यसनंभवाब्धिं
नेष्येभवद्गुणकथामृतपानमत्तः ॥ ११ ॥

नेपिमाभूत्यासीत्यर्थः ॥ अंतकासिलुलितात् ॥ अंतकाख्यशस्त्रहतात्विमानात्पततांस्वर्गिणांनिर्वृत्तिःस्यात्किंनास्त्येवेत्यर्थः ॥ १० ॥ एवंनिम
निरतिशयानंदसाधनभूतंत्वांहित्वापिक्षुमानिशयाल्पसुखसाधनत्वेनभजंतोमाद्दशामंदभाग्याएवेत्युक्तास्वस्यसत्संगतिप्रवणादिप्रणाप्राभक्ति
महेतुकीप्रार्थयते ॥ भक्तिमिति ॥ हेअनंतदेशकालपरिच्छेदरहित ॥ त्वयिनिरस्तनिखिलदोषसार्वज्ञ्यनिरतिशयानंदत्वाद्यपरिमितोदारगुणसा
गरेत्वयिमुहुःपुनःपुनःनिरंतरमित्यर्थःभक्तिंप्रवहतांकुर्वतांअतएवामलःआशयोंतःकरणंयेषांमहतामक्रोधाद्यात्मगुणयुक्तानांप्रसंगः
प्रकृष्टःसंगमहतामितिसंबंधमात्रेषष्ठी ॥ महत्संबंधिसंगमःमहत्संगमइत्यर्थःमेस्यात् ॥ येनमहत्संगेनहेतुनाप्रवृत्तायाभवतोगुणकथासेवम

धुतस्यपानेनमत्तःतृप्तःनिरस्ततापत्रयइत्यर्थःउरुव्यसनं
अधिकदुःखगर्भंमतएवोल्बणंदुस्सहंनेष्येनयामि ॥ ११ ॥

एवंरूपं विशिष्टं पुनः स्वरूपं विशिनष्टि ॥ त्वमिति द्वाभ्यां ननु जीवब्रह्मणोरपि स्थूलसत्वे शरीरत्वेन न को विशेष इत्यत्राह ॥ त्वमिति ॥ त्वं अकर्मायतस्थि
त्युपाताप्राकृतदिव्यमंगलगुणस्य ह विशिष्टस्त्वंस्थितौ निमित्तभूतायां जगत्पालनार्थमित्यर्थः ॥ अधिमखः यज्ञाराध्यो यज्ञफलप्रदश्च व्यति
रिक्तः प्रकृतिपुरुषविलक्षणः ॥ आस्से तिष्ठसि अत्राधिमख इत्यनेन स्थितावित्यनेन च परित्राणाय साधूनामित्युक्तरीत्या सर्वयज्ञाराध्यत्वाय
साधुपरित्राणाय च त्वज्जन्म न तु जीववत्कर्मायत्तमिति अवगम्यते ॥ अव्यतिरिक्त इति छेदे प्रकृतिपुरुषविलक्षण एवंभूताभ्यामपृथक्त्वेना
वस्थित इत्यर्थः ॥ नन्वनंतविचित्रस्थिरचरात्मकस्य जगतः ॥ धारणपोषणभोगाद्यात्मकं पालनं कथमेकेन मया युगपत्कर्तुं शक्यमित्यत्रा

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥०॥

द ॥ बुध्यवस्थितिं बुद्धावस्थितिं विषयभूतं संकल्परूपज्ञानविषयमिति यावत् ॥ अखंडितया असंकुचितया स्वदृष्ट्या संकल्परूपज्ञाने
न द्रष्टासा ज्ञातासि कृत्स्नस्य जगतः सर्वैर्देसकालावस्थास्वनिष्टनिरसनेष्टप्रापणात्मकपरिपालनोपयोग्यसंकुचितस्वसंकल्परूप
ज्ञानाश्रयोसीत्यर्थः स्थितावधिमखो व्यतिरिक्त इत्यपि पाठः ॥ तत्र अजः प्रकृतिपुरुषगतस्वरूपान्यथाभावस्वभावारूपोत्पत्यादिरहितः
अत एव व्यतिरिक्तः प्रकृतिपुरुषाभ्यां विलक्षणः स्थितावधिं यद्वा स्थितावधिमखस्थावरपर्यंतं वा यत्त्वं जगत्सर्वमखंडितज्ञानेन साक्षात्कुर्व
न् आस्स इत्यर्थः ॥ एवं त्वं नित्यमुक्तः प्राप्यवस्तुगतदोषास्पृष्टः ॥ अनेनाविद्यावृत्ति अविद्यया हि अव्यक्तमहदादिकं स्वकार्यैपुष्टथि

॥ ह ॥

भा. बृ.

॥ ६४ ॥

आदिपुव्याप्तेन तत्कृतदोषैरस्पृष्टत्वम्॥ एवं जीवव्यावृत्तिश्च जीवोऽपि देवादिशरीरेषु व्याप्तः परमार्थेन तत्कृतदोषैरस्पृष्टोऽप्यहंममाभिमानाभ्यां क्लिश्यतीत्यनि-
त्यमुक्तः त्वं तु नित्यमुक्त इति भावः तत्र हेतु॥ विशुद्धः अकर्मवश्यः नित्यमुक्तः शब्दात्परस्य सुपलोपः आर्षः कर्मधारयो वा विशुद्धत्वे हेतुः परिबुद्धः
असंकुचितज्ञानः जीवो हि कर्मायत्तसंकोचविकासभाग्भावरूपज्ञानाश्रयो न परिशुद्धः त्वं तु परिशुद्ध इति भावः तत्र हेतुः कूटस्थः निर्विकारः
स्वरूपतः स्वभावतोऽपि निर्विकारस्त्वं जीवस्तु स्वभावतो विकारी॥ ननु नित्यमुक्तत्वपरिबुद्धत्वविशुद्धत्वानि मुक्तेषु नित्यसिद्धेषु चातिव्याप्तानि तत्रा-
ह॥ आत्मा तेषां तन्तः प्रविश्य धारकः न चात्मत्वमप्यतिप्रसक्तं अत उक्तं आदिपुरुषो भगवान् अधीश इति आदिपुरुष इति कर्मधारयः आदिशब्द

यदुपज्ञवस्थितिमखंडितयास्वदृष्ट्याद्रष्टास्थिता नावधिमखो व्यतिरिक्त आस्ते ॥ १५ ॥

उपकारणवाची कारणं हि कार्यस्यादिः जगत्कारणभूतः पुरुष इत्यर्थः जगत्कारणत्वं च न मुक्तेषु प्रपन्नं जगद्व्यापारवर्जं प्रकरणादिसंनिहितत्वा-
द्भोगमात्रसाम्यलिंगाच्चेति मुक्तेषु जगद्व्यापाराभावस्य सत्त्वात् भगवच्छब्देन समग्रषाड्गुण्यपरिपूर्णत्वमुच्यते तदप्यनतिप्रसक्तमेव च अ-
धीशः त्रयाणां सत्त्वरजस्तमसां तत्संबद्धिना मरूपाणां त्रयाणां लोकानां वा अधीशः इदमप्यनतिप्रसक्तमेवेति त्रिविधचेतनव्यावृत्तिः ॥ १५ ॥

॥ ६४ ॥

ननु कथमचेतनेषु चेतनेषु चावस्थितस्यापि तत्कृतदोषास्पर्शः न चाकर्मवश्यत्वादुपपत्तिः पुण्यापुण्यसजातीयचेष्टितानि कुर्वतस्तद्वश्यत्वानु
पपत्तेरित्यत आह ॥ यस्मिन्निति विरुद्धमतयः विरुद्धा मतिर्यासु ताः आश्रयान्तरेषु सामानाधिकरण्यानर्हाः ॥ विद्यादयो ज्ञानादयः विविधाः शक्तयः २
आनुपूर्व्यात् क्रमेण यस्मिन्सत्तयाविर्भवंति ॥ शक्तिर्हि कार्योपयोग्यपृथक्सिद्धविशेषणम् तत्र सृष्टिस्थितिमंतःप्रवेशनियमनसंहारादीनां क्र
मिकत्वेन पौर्वापर्यात्तदुपयुक्तशक्तीनामपि तद्द्वारा पौर्वापर्यमत्र विवक्षितं ॥ सर्वदा सर्वशक्तेस्तस्य क्रमेण शक्त्याश्रयत्वायोगात् एवं च सर्वश
क्तेस्तस्य सर्वमुक्तमुपपन्नमिति भावः उक्ताकारं ब्रह्म जगत्कारणत्वेन लक्षयन् संग्रहेण तत्स्वरूपमपि शोधयन् शरणं व्रजति ॥ तदिति ॥ तद्ब्रह्म

यस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥ तद्ब्र
ह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥१६॥

विश्वभवनमेकमित्यनेन यतो वा इमानि भूतानीति वाक्यस्मारितं ॥ अविकारमानंदमात्रमनंतमिति पदत्रयेण सत्यं ज्ञानमनंतमिति पदत्र
येण ॥ तत्र हि जन्मादिवाक्ये जगत्कारणत्वेनोपलक्षितस्य ब्रह्मणः स्वरूपं सत्यादिवाक्ये शोधितं एवमत्रापि तथा हि विद्यादयो विविधशक्त
य इत्यनेन सृष्ट्याद्युपयुक्ताः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्युक्तशक्तीनामभिधानेन जगज्जन्मादयोऽप्युप
स्थापिताः सर्वशक्तिमत्त्वेन प्रसिद्धं ब्रह्म यस्मिन्निति यच्छब्देनानूद्योपस्थितानां जन्मादीनां लक्षणत्वमुच्यते विश्वभवमिति ॥ भवत्यस्मादि
ति भवं विश्वस्य भवं विश्वभवं विश्वोत्पत्तिकारणमित्यर्थः ॥ एकशब्देनोपादानत्वनिमित्तस्थितिसंहारकारणत्वे चैकस्यैवेति विवक्षितम्

भा॰ च॰

॥ ९६ ॥

तद्धेमनेन अधीहि भगवो ब्रह्मेत्युपसन्नमे भृगुस्तस्य प्रतिवचनत्वसमर्पकं तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यं स्मारितं ॥ एवं जगत्कारणत्वेनोपलक्षितं ब्रह्म
स्वरूपतो लक्षयति अविकारमिति अनेन सत्यपदं स्मारितं तेन हि सततपरिणामिनोः चेतनाचेतनसंसृष्टाच्चैतन्याच्च वैलक्षण्यमुक्तं एवमत्राप्यविकार
पदेन आनंदमात्रं दुःखासंभिन्नज्ञानमात्रं मात्रचा क्वापि जडत्वव्यावृत्तिः ॥ अनेन ज्ञानपदं स्मारितं अनुकूलज्ञानमेव हि आनंदः अतस्तस्यापि ज्ञा
नपदस्यानंदरूपज्ञानपर्यवसानत्वद्योतनायानंदशब्दः ॥ प्रयुक्तः ॥ अनेनानंदपदेन नित्यासंकुचितानुकूलज्ञानाश्रयत्वं विवक्षितं तेन मुक्त
चेतनव्यावृत्तिः ते हि बद्धदशायां संकुचितज्ञानत्वेन न नित्यासंकुचितज्ञानाः अनंतपदेन देशकालवस्तुपरिच्छेदराहित्यं विवक्षितं ॥ अनेन ना
नित्यसिद्धव्यावृत्तिः तेषां स्वरूपस्याणुपरिमाणत्वेनानंतत्वाभावात् तत्र देशपरिच्छेदो नाम इदमत्र न भवतीति कालपरिच्छेदो नाम इदमिदानीं न भ

सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः ॥ अप्ये
वमार्य भगवान्परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥

वतीति एवंरूप ॥ एतद्द्वयरहितं वस्तुपरिच्छेदो नाम सर्ववस्तुसामानाधिकरण्यमर्हत्वं एवंभूतं ब्रह्माहं प्रपद्ये शरणं गतोऽस्मि ॥ १६ ॥ एवं ब्रह्मस्व
रूपगुणाद्विशेषाननंतं प्रपद्येत्यञ्जनस्य फलाविनाभावमाविष्कुर्वन् वा तस्य निधेस्तस्याभिमतार्थाद्दित्सातिशायिनपुरुषार्थप्रदत्वमाह सत्याशिष इति
हे भगवन् सत्याशिषः ॥ आशिषः सत्या क्रियंते येन स सत्याशीः तस्य पुरुषार्थमूर्तेः स्वयं पुरुषार्थभूतस्वरूपस्य तव पादपद्मं यथा आशीः तथा इच्छानु
रूपमिष्टार्थः अनुभजतां न एव दीनान् त्रिवर्गनिष्ठानप्येवंभूतानस्मान् ॥ अनुग्रहकातरः अनुग्रहैकविवशः भगवान् षाड्गुण्यपरिपूर्णः भवान् वा
त्सल्यार्थैकः वाश्रेव नवप्रसूता धेनुरिव हे आर्य स्वामिन् परिपाति अभिमतप्रदानेन परिपाति परीत्युपसर्गेण सर्वतः याति संसारभयाच्च माती

॥ ९८ ॥ श्रीमद्भागवतटीका ॥ ९६ ॥

स्तुतिमुपसंहरति ॥ अथेति ॥ सत्संकल्पेन दृढसंकल्पेन धीमता ध्रुवेणैवमभिष्टुतस्तुतः अनंतरं भक्तेष्वनुरक्तो निरतिशयप्रीतिमान् भगवान्प्रतिपद्य स्तुति
मितिशेषः इदं वक्ष्यमाणमब्रवीत् ॥ १८ ॥ उक्तमेवाह ॥ वेदेति ॥ हे राजन्यबालक ते त्वया हृदि व्यवसितं अभिमतविषयत्वेन निश्चितमहं वेद जानामि ॥ ते
त्वया व्यवसितमितरैर्दुरापं दुर्लभमपि हे सुव्रत ते तुभ्यं प्रयच्छामि ददामि ॥ १९ ॥ व्यवसितमेव प्रपंचयति नान्यैरिति सार्द्धद्वयेन ॥ हे भद्र ध्रुव शाश्व
तीक्षितिर्वासो यस्मिन् भ्राजिष्णु दीप्तिमत् अन्यैरनधिष्ठितं यत्र स्थाने ज्योतिषां ज्योतिरूपाणां ग्रहादीनां चक्रमाहितमर्पितं ॥ २० ॥ धान्याक्रमाणा

श्रीमैत्रेय उवाच ॥ अथाभिष्टुत एवं वै सत्संकल्पेन धीमता । भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत् ॥ १८ ॥ श्रीभगवानुवाच ॥
वेदाहं ते व्यवसितं हृदि राजन्यबालक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥ १९ ॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षि
ति । यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् ॥ २० ॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ॥ धर्मोग्निः कश्यपः शु
क्रो मुनयो ये वनौकसः ॥ चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः ॥ २१ ॥ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः ॥ ० ॥

भ्राम्यमाणानां प्रग्रहाणां बंधनस्तंभो मेढिः ॥ तस्यां गोचक्रवत् बलीवर्दसमूहवत् निहितमिति सर्वथः कल्पवासिनामवांतरकल्पवासिनां परस्ताद
पि स्थास्नु लोकत्रयनाशेप्यनश्वरम् ॥ धर्माग्न्यादयो नक्षत्ररूपाः वनौकसो मुनयः सप्तर्षयः यत्प्रदक्षिणीकृत्य भ्रमंतश्चरंति ॥ २१ ॥ तस्या
नंगसादनेनतरं समासमीत्याह ॥ प्रस्थिते इति तुभ्यं गां पृथिवीं दत्वा पित्रा उत्तानपादेन वनं प्रस्थिते इति भावे क्तः वनप्रतिगमने सति धर्मसंश्र
यः वर्णाश्रमधर्मप्रतिपालकः भवान् षट्त्रिंशति वर्षसाहस्रं वर्षाणां सहस्राणि ततः समाहारे द्विगुः अव्याहतेंद्रियः अविहतेंद्रियः रक्षि

भा॰ च॰

॥६७॥

त्वया संकल्पितमपि मदङ्के त्वपि ग्रोहादेवं भविष्यतीत्याह हेवेनत्वज्ञातरसि। अतमास्योत्वज्ञातरि मृगयायां नष्टे सवितस्मिंस्तुत्तमे मनोयस्याः सामातासु
रुचिः वनं प्रविशय्दवाग्निं प्रवेक्ष्यति ॥२३॥ किंच यज्ञहृदयं यज्ञस्य हृदयं तात्पर्यभूमिं यज्ञाराध्यमित्यर्थः मां यज्ञानां प्रभुं पुष्कलदक्षिणैः समग्रद
क्षिणैराराध्य इह राजे सत्याः दृढसंकल्पजाः आशिषः इच्छाविषयान् भुक्त्वा अनुभूय॥ अंते भोगानंतरं मां अनुस्मरिष्यसि ॥२४॥ ततः सर्वलोकैः
सप्तर्षिपर्यंतैः नमस्कृतं मत्स्थानं मदनुग्रहात्वं ध्रुवस्थानं गंतासि प्राप्स्यसि स्थानं विशिनष्टि ऋषिभ्य उपरिस्थितात् स्थितं यतिः मनः प्रयतनशीलः

षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः ॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेष्यंती वनं माता दावाग्निं सा प्रवेक्ष्यति
२३॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ॥ भुक्त्वा चेहाशिषः सत्याः अंते मां संस्मरिष्यसि ॥२४॥ ततो गंतासि मत्स्था
नं सर्वलोकनमस्कृतम्। उपरिष्टादृषिभ्यस्त्वं यतो नावर्त्तते यतिः ॥२५॥ मैत्रेय उवाच ॥ इत्यर्चितः स भगवान् अतिदिश्यात्मनः
पदं॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥२६॥ सोपि संकल्पजं विष्णोः पादसेवोपपादितं प्राप्य संकल्पनिर्वाणं नातिप्रीतोभ्यगात्
पुरम् ॥२७॥

गत्वा यतः स्थानात् पुनर्नावर्त्तते नावीगवरोहति अपितु ततो वैकुंठमेव यातीत्यर्थः ॥२५॥ भगवदुक्तिमुपसंहरन् भगवानतिरोदधदित्याह मु
निः इत्युक्तप्रकारेणार्चितः आराधितो भगवान् आत्मनः पदं स्थानं अतिदिश्य दत्वा बालस्य ध्रुवस्य पश्यतः सतः गरुडध्वजो गरुडवाह
नः स्वं दर्शितध्वजस्य भगवान् स्वधाम वैकुंठस्थानमगात् प्रतिपद्यत ॥२६॥ सोपि ध्रुवोपि विष्णोः पादसेवया उपसादितं प्रापितं संकल्पजं त
पश्चर्यारंभे फलसंकल्पाज्जातं संकल्पनिर्वाणं संकल्पस्य निर्वाणं समाप्तिर्यस्मिन् तत्कं सुखं न तु स्वाभाविकानंदाविर्भावरूपमिति भावः

॥६७॥

अनतिप्रीतिकारणं पृच्छति विदुर ॥ सुदुर्लभमिति । मायाविनः मायाधिपतेः संबंधिनेन दत्तमित्यर्थः इतरैः सुदुर्लभं अतिदुःखेनाप्यलभ्यं यत्पदं तस्यानंभ
गवत्पूजनार्चनेनार्जितं संपादितं तस्यानंएकजन्मनालब्ध्वापि द्वितीयेशरीरे असत्यवल्लभेत्यर्थः स्वमात्मानं असिद्धार्थमिव अपरिपूर्णार्थमिव कथममम
न्यत ॥ २८ ॥ मुक्तयर्थः भगवदनाराधनेमेवाप्रीतिकारणमितिवदंस्तस्य परितापमहर्षिः मातुरितिसपत्न्यामातुःसुरुचेर्वाचरावबाणैः तैर्हृदिविद्धः जा
तव्यथः तानवाग्बाणान्स्मरन्मुक्तिप्रदाद्भगवतः मुक्तिं नैच्छत तत्प्रयुक्तं पश्चात्तापमुपेयिवान् प्राप्तः ॥ २९ ॥ पश्चात्तापविषयाध्रुवोक्तिमाह ॥ समाधीति

श्रीविदुरउवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितम् । लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं
स्वमात्मानममन्यतार्थवित् ॥ २८ ॥ श्रीमैत्रेयउवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् ॥ नैच्छन्मुक्तिप
तेर्मुक्तिं तस्मात्तापमुपेयिवान् ॥ २९ ॥ श्रीध्रुवउवाच ॥ समाधिनानेकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरे
तसः ॥ मासैरहं षड्भिरमुष्य पादयोः छायामुपेत्यापगतः पृथग्मतिः ॥ ३० ॥

सार्द्धैः षड्भिः ऊर्ध्वरेतसः जितेंद्रियाः सुनंदादयः नैके भवे न नैके भवायस्मिन् बहुजन्मना अप्यतेमेत्यर्थः समाधिनायस्य भगवतः पदं स्वरूपं विदुः
साक्षात्कुर्वंति अमुष्यभगवतः पादयोः छायामहं षड्भिरेव मासैरुपेत्यापिप्राणमस्तुत्यादिसमये गरुडारूढस्य हरेः पादछायायां स्थित्वापि स्व
र्थः पृथग्मतिः देहात्माभिमानस्वातंत्र्याभिमानग्रस्तः अपगतः भगवत्पादछायाः सकाशाद्दूरीकृतः ॥ ३० ॥ तस्मात्स्वास्थिरसांसारिकभोगयाच्ञा
कारणानिश्चिनोति ॥ शोककारणंव्यनक्ति यत यस्मात् भवच्छिदः गर्भजन्मजरामरणाद्यात्मकसंसारभयनिवर्तकस्य भगवतः पादमूलं गत्वासा

भा॰ वे॰
॥२६८॥

तोत्कमयंतवमत्संयाचेयाचितवान्ननुनिरतिशयानंदापहतपाप्मत्वादिगुणाएकाविर्भावपूर्वकब्रह्मानुभवात्मकानंदमितिभावः॥२॥अनात्मादे
हः तस्यवर्मअनात्म्यंदेहोजन्मभिन्नपर्थः तन्नष्पपतत छोत्यमितिअहोवतेतिहाकष्टमितिभावः॥३१॥मतिरितिपतद्भिःस्वस्यभोगांतेस्वर्गीसतद्भिःपत
द्भिःपतनशीलैः॥अतएवासहिष्णुभिः असहनपेत्तयाधःपदप्राप्तत्वात्परसमृद्धिनसहिष्णुभिर्देवैर्ममतिःबुद्धिर्विदूषितासांसारिकभोगतोल्पपा
दनेनप्रापितात्मदेहोजन्मभेवव्यजयन्परितपतियोहंनमसत्तमःदुर्जनः॥अतएवनारदवचःविकल्पेविद्यमानेपिनह्यसंतोषहेतवइत्यार
दितोक्तंवचःतथ्यंनाग्रहीषंनग्रहीतवान्॥३२॥प्रसुप्तवाहममपिदैवीगुणमयीदुरत्ययांमायामुपाश्रित्यतयाअतएवभिन्नदृक्देहात्माभिमान

अहोवतममानात्म्यंमंदभाग्यस्यपश्यत।भवच्छिदःपादमूलंगत्वायाचेयदंतवत्॥३१॥मतिर्विदूषितादेवैःपतद्भिरसहि
ष्णुभिः॥योनारदवचस्तथ्यंनाग्रहीषमसत्तमः॥३२॥दैवीमायामुपाश्रित्यप्रसुप्तइवभिन्नदृक्॥तप्येद्वितीयेप्यसतिभ्रा
तृभ्रातृव्यहृद्रुजा॥३३॥मयैतत्प्रार्थितंव्यर्थंचिकित्सेवगतायुषि।प्रसाद्यजगदात्मानंतपसादुःप्रसादनम्॥भवच्छिदमयाचेहं
भवंभाग्यविवर्जितः॥३४॥स्वाराज्यंयच्छतोमौढ्यान्मानोमेभिक्षितोवत।ईश्वरात्क्षीणपुण्येनफलीकारानिवाधनः॥३५॥

सतंचात्माभिमानीद्वितीयेअत्रस्वल्पकस्वतंत्रवस्तुन्यसमपिभ्रातैवभ्रातृव्यःशत्रुरितिपारुष्योगमस्ततयानप्येतामनुभवामि॥३३॥किंचमयाय
त्प्रार्थितंतद्व्यर्थमित्याह॥मयेतिदुःखेनापिप्रसादयितुमशक्यंभवच्छिदंजगदंतरात्मानंतपसाप्रसाद्यभवंसंसारमेवयाचेयाचितवानस्मिहेति
खेदेयतोहंभाग्यविवर्जितःदुर्भगः॥३४॥दौर्भाग्यमेवसदृष्टांतमाह॥स्वाराज्यंस्वराट्कर्मवश्यत्वस्याभावस्वाराज्यं।सस्वराड्भवतीतिसर्वेषु
लोकेषुकामचारोभवतीतिश्रुतेःमुक्तैश्वर्यंयच्छतोभगवतःसकाशात्केवलंमेममयामानः॥अभिमानः॥भिक्षितःयाचितःनिर्धनःक्षीणे

॥२६८॥

॥म॥

दुर्लभं यं प्राप्यापि कथमेवं तप्यतीति त्वयानघाकूतमित्याह मुनिः नवाइति ॥ मुकुंदस्य मुक्तिप्रदस्य भगवतः पदारविंदयोर्यद्रजः परागस्तज्जुषः सेवमानाः भवा
दृशा जनाः अस्य भगवद्भक्तो दास्यं शेषत्वमृते विना अर्थं आत्मन स्वस्य नैव वांछंति नेछंति यतस्ते जनाः यदृछया दैवात् लब्धामनस ॥ समृद्धिर्येषांते
३६॥ सुतमाह ॥ आकर्ण्येति ॥ राजा उत्तानपादः ॥ आत्मजं ध्रुवं आयांतं आकर्ण्यापि संपरेत्य मृत्वा यथागतं पुनरागतमिव न श्रद्दधे न विश्वस्तवान्
संपरेत्य यथागतमित्यागमन दौर्लभ्यमुक्तं तेन च भाग्यहीनत्वाभिप्रायेण तमेव व्यनक्ति ॥ अभद्रस्य भाग्यहीनस्य मम भद्रं पुत्रप्रत्यागमनरूपं मंग

श्रीमैत्रेय उवाच ॥ नवै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः ॥ वांछंति तद्दास्यमृतेर्थमात्मनो यदृछया लब्ध
मनः समृद्धयः ॥३६॥ आकर्ण्यात्मजमायांतं संपरेत्य यथागतम् । राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥३७॥ श्रद्धाय वाक्यं
देवर्षेर्हर्षवेगेन धर्षितः ॥ वार्त्ताहर्त्तुरतिप्रीतो हारं प्रादान्महाधनम् ॥३८॥ सदश्वं रथमारुह्य कार्त्तस्वर परिष्कृतम् ॥ ब्राह्मणैः
कुलवृद्धैश्च पर्यस्तोमात्यबंधुभिः ॥३९॥ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः । निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सु
कः ॥४०॥

ल्यं कुतो हेतोः स्यादित्यभिप्रायेण न श्रद्दधे इत्यन्वयः ॥३७॥ ततो देवर्षेर्नारदस्य वाक्यं एष्यति चिरतो राजन् यशो विपुलं यं तवेति वाक्यं तात्कालि
कं वा श्रद्धाय विश्वस्य हर्षयोगेन प्रत्यागमन निमित्तसंतोषयोगेन धर्षितः प्रगल्भितः उद्रिक्तानंद इति यावत् वार्त्ताहर्त्तुः पुत्रागमनवार्त्ता
कथयितुः महाधनमनर्घ्यं हारं मुक्तामणिमयं प्रीत्यादात् ॥३८॥ अमात्यबांधवैरिति द्वंद्वः ब्राह्मणादिभिः पर्यस्तः परिवृतः ॥३९॥ ब्रह्मघोषेण
ध्वनिवाचनात्मकेन ॥ आत्मजावीक्षणोत्सुकः पुत्रदर्शनोत्सुकः निश्चक्राम निष्क्रांतवान् ॥४०॥ ॥ ॥ ॥ ॥ ॥

अस्मराज्ञो महिष्यौ भार्ये सुनीतिः सुरुचिश्च उत्तमेन सार्द्धं शिबिकां न स्वाहनमारुह्याभिजग्मतुः ॥४१॥ उपवनाभ्याशे उपवनसमीपे आयांतं तं ध्रुवं दृष्ट्वा त
रसा आभ्युपायात् वत्सयूताम् पुत्रमासाद्य प्रेम्णा विह्वलः परवशः नृपः उत्तानपादः ॥४२॥ दीर्घोत्कंठमनाः अतएव श्वसन् श्वासं मुंचन् दोर्भ्यां अं
गजं पुत्रं परिरेभे अंगजांघ्रिशिनः शिविष्वक्सेनस्य भगवतो अंघ्रिसंस्पर्शेन हतमशेषमघं पापं यस्य कंवं बंधनं संसृतिकारणं यस्य तम् ॥४३॥ जातउद्यमो म
हान् मनोरथो यस्य सः राजा द्वितीयां तपोऽवेत्तनयविशेषणं मूर्द्धि आजिघ्रन् आघ्राणं कुर्वन् शीतैर्नयनवारिभिः ॥ अश्रुभिः स्नापयामास ॥४४

सुनीतिः सुरुचिश्चास्य महिष्यौ रत्नभूषिते ॥ आरुह्य शिबिकां सार्द्धमुत्तमेनाभिजग्मतुः ॥४१॥ तं दृष्ट्वोपवनाभ्यास आयां
तं तरसा रथात् ॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥४२॥ परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन् ॥ विष्व
क्सेनांघ्रिसंस्पर्शहताशेषाघबंधनम् ॥४३॥ अथाजिघ्रन्मुहुर्मूर्द्धि शीतैर्नयनवारिभिः ॥ स्नापयामास तनयं जातोद्दा
ममनोरथः ॥४४॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः ॥ ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥४५॥ सुरुचि
स्तं समुत्थाप्य पादावनतमर्भकम् ॥ परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥४६॥ यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्ह
रिः ॥ तस्मै नमंति भूतानि निम्नमाप इव स्वयं ॥४७॥ उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेमविह्वलौ ॥ अंगसंगादुत्पुलकावस्रौघं मुहुरूह

पितुरुत्तानपादस्य पादावभिवंद्य नमस्कृत्य पितुराशीर्भिः अभिमंत्रितः कृतसंभाषणः सत्कृतः संमानितः ॥ सज्जनश्रेष्ठः ॥ ध्रुवः शिरसा मातरौ सु
रुचिसुनीती ननाम ॥४५॥ ॥४६॥ सुरुचिः पादयोरवनतमर्भकं ध्रुवमुत्थाप्य परिष्वज्य आलिंग्य बाष्पेण गद्गदस्वरयुक्तया गिरा वाचा चिरंजीवेत्याह
॥४७॥ सुरुचेः प्रीतिर्न संभाविन्यत्राह ॥ यस्येति मैत्र्यादिभिरात्मगुणैः यस्य हरिः प्रसन्नः तस्मिन् सर्वभूतानि नमंति प्रह्वीभवंति आपो यथा स्व

उत्तमः ध्रुवश्चोभौ भ्रातरौ प्रेमविह्वलौ अंगसंगात्तालिंगनात् कुमलकोऽडरं चिमुलकौ भ्रश्रोघं आनंदाश्रुकणाः समं हं मुहुः पुनः पुनः कृहतुः सुसुचतुः अर्थः ॥ अस्य ध्रुवस्य जननी सुनीतिः उपगृह्य आलिंग्य तस्य नयस्यांगस्पर्शेनेन निर्वृता सुखिता आधिं मनःपीडां जहौ तत्याज ॥ ४० ॥ हे वीर वीरसुवः वीरस्य ध्रुवस्य जनन्याः ॥ सुनीत्याः शिवैः शांतैः नेत्रजैः सलिलैः अभिषिच्यमानाभ्यां स्तनाभ्यां पयः स्नुस्राव ॥ ४१ ॥ उत्तानपादं जनाः प्रशशंसुः प्रशंशं सामेवाह हे राजन् ॥ आर्तिहा दुःखापहर्त्ता पुत्रः चिरं नष्टो दर्शनमप्राप्तः इदानीं दिष्ट्या भाग्येन ते त्वया प्रतिलब्धः प्राप्तः अयं भुवो मंडलं रक्षिता

सुनीतिरस्य जननी प्राणेभ्योपि प्रियं सुतम् । उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता ॥ ४९ ॥ पयस्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ॥ तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ॥ ५० ॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ॥ प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ॥ ५१ ॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा । प्रतिलब्धश्चिरं नष्टो मृत्युं जिग्युः सुदुर्जयम् ॥ ५२ ॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ॥ आरोप्य करिणीं हृष्टः स्तूयमानो विशत्पुरम् ॥ ५३ ॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः ॥ ५४ ॥ चूतपल्लववासस्त्रक्मुक्तादामविलंबिभिः । उपस्कृतं प्रतिद्वारमपां कुंभैः सदीपकैः ॥ ५५ ॥

रक्षिष्यति ॥ ५१ ॥ प्रणतार्तिहा भक्तानां दुःखापहर्त्ता भगवान् त्वया नूनं जन्मांतरे अभ्यर्चितः यस्य भगवतो नुध्यायिनो ध्यातारः ॥ सुदुर्जयं मृत्युं संसारं जिग्युः जितवंतः ॥ ५२ ॥ एवं जनैः लाल्यमानो राजा सभ्रातरं सोत्तमं ध्रुवं हृष्टः करिणीं हस्तिनीं आरोप्य जनैः स्तूयमानः पुरमविशत् ॥ ५४ ॥ अथ पुरं वर्णयति ॥ तत्र तत्रेति चतुर्भिः उपसमीपे समंतात्क्लृप्तैः मकरतोरणैः सवृंदैः फलमंजरीयुक्तैः कदलीस्तंभैः तद्विधैः सवृंदैः पूगानां पो

भा०स्कं० ४
॥१०॥

र्तृन पक्षया स्थूवासांसि च ॥ व्रजस्त्रसुक्दामानि च तेषां विशिष्टं बंधनमस्ति येषु तैः मरीकैः अपांकुंभैः प्रतिद्वारमुपस्कृतं अलंकृतम् ॥ ५६ ॥ गोपुरैः द्वारैः लक्ष्यकयुक्तैः शातकौंभाः स्वर्णमयाः परिच्छदाः परिकरा येषां तैः सर्वतः परितः अलंकृतं श्रीमत् सर्वसमृद्धिमत् विमानानामिव शिखरैः द्युतिर्यस्मिन् ॥ ५७ ॥ रथ्या राजमार्गः अट्टः उच्चस्थप्राकारस्तोपरि निर्मिता भूमिका मार्गाः अंतरः संमार्जिता मृष्टत्वरादयो यस्मिन् चंदनचर्चितं

प्राकारैर्गोपुरागारैः शातकुंभपरिच्छदैः ॥ सर्वतोलंकृतं श्रीमद्विमानशिखरद्युभिः ॥ ५६ मृष्टचत्वररथ्याट्टमार्गं
चंदनचर्चितं ॥ लाजाक्षतैः पुष्पफलैस्तंदुलैर्बलिभिर्युतम् ॥ ५७ ॥ ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ॥ सिद्धा
र्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ॥ ५८ उपजह्रुः प्रयुंजाना वात्सल्यादाशिषः सतीः ॥ शृण्वंस्तद्वल्गुगीतानि
प्राविशद्भुवनं पितुः ॥ ५९ ॥ महामणिव्रातमये स तस्मिन् भवनोत्तमे ॥ लालितो नितरां पित्रान्यवसद्दिवि देववत् ॥
६० पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः ॥ ६१ ॥ यत्र स्फटि
ककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभांति ललनारत्नसंयुताः ॥ ६२ ॥

चंदनैर्युक्तिः संसिक्तं ॥ ५८ ॥ सिद्धार्थाः श्वेतसर्षपाः उपजह्रुः प्रकिरन्सतीः सत्यः विभक्तिव्यत्यय आर्षः संमार्जिता मृष्टत्वरादयो यस्मिन् चंद
नि शृण्वन् पितुर्मंदिरं आविशत् ॥ ५९ ॥ ६० ॥ अनर्घमणिसमूहमये भवनश्रेष्ठे पित्रा नितरां लालितः दिवि देववन्न्यवसत् ॥ ६१ ॥ भवनं
वर्णयति ॥ यत्र भवने शय्याः दांताः क्षीरफेनवन्निर्मलाः शुभ्राः रुक्मपरिच्छदाः सुवर्णमयाः परिकराः अनर्घाणि आसनानि रौप्याराज

॥१०॥ टी० ...

यत्र भवनेस्फाटिकमयकुड्येषु इंद्रनीलमणिखचितेषु प्रतिफलिता ललनाः स्त्रियः रत्नानितैः संयुताः मणिप्रदीपाः उपमितस्समासः ॥ ६२ ॥ अथातिरम्याण्युद्यानानि च यत्र संतीत्यनुषंगः तानि विशिनष्टि विचित्रैरमरद्रुमैः मंदार पारिजातादिभिर्द्रुमैः कथंभूतैः कूजंति विहंगानां मिथुनानि येषु गायंतो मधुपानमत्ताम धुव्रता भृंगा येषु तैर्द्रुमैः युक्तानीति शेषः ॥ ६३ ॥ वाप्यश्च यत्र संतीत्यन्वयः वापीर्विशिनष्टि वैदूर्यमणिमयाः सोपाना यासां पद्मा

उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रते ॥ ६३ ॥ वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारंडकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६४ ॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् ॥ श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परम् ॥ ६५ ॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतम् ॥ अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥ ६६ ॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः ॥ वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम् ॥ ६७ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां चतुर्थस्कंधे नवमोध्यायः ॥ ९ ॥ ॥ ॥ ॥ ॥

निउत्पलानि कुमुदानि च अनुसंतिताः विभक्तिव्यत्यय आर्षः हंसानां कारंडवानां च कुलैः संघैश्च जुष्टाः शब्दिताः ध्रुवः विस्मयमाश्चर्यं प्रपेदे ॥ ६५ ॥ अथ कतिपयवर्षानंतरं ऊढवयसं प्राप्तयौवनं प्रकृतीनां मंत्रिणां संमतं अनुरक्ताः अनुरागयुक्ताः प्रजा यस्मिंस्तं पुत्रं ध्रुवं वीक्ष्य भुवः पतिं चक्रे राज्याभिषिक्तमकरोत ॥ ६६ ॥ तत आत्मानं प्रवयसं वृद्धं आकलय्य आलोच्य विशांपतिः राजा आत्मनः स्वस्य गतिं मुक्त्युपायं विमर्शयन् अतएव वि

भा.च.
॥७१॥

अथयरणमेवध्रुवः कृतोद्वाह उत्पादितपुत्रोजित आत्रहंतृपुण्यजनं आतेत्याह मुनिः प्रजापतेर्दिति॥ शिशुमाराख्यस्य प्रजापतेः दुहितरं भ्रमिं उप
येमेऊढवान्तयोर्ध्रुवभ्रम्योः सुतौकल्पवत्सराख्यौ॥१॥ पुनरन्यां भार्यां वायोर्दुहितरं इडाख्यांभार्यांमहाबलोध्रुवः उत्कलनामानंपुत्रंकथंभूतं
योषितांरत्नं विभाति मनोहरं कन्यारत्नमिति वापुत्रं अजीजनत् उत्पादयामास॥२॥ उत्तमस्त्वकृतोद्वाह एव कदाचिन्मृगयायां वलीयसः पुण्यज

मैत्रेय उवाच॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ॥१॥
इलायामपि भार्यायां वायोः पुत्र्यां महाबलः॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत्॥२॥
उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा॥ हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता॥३॥ ध्रु
वो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः॥ जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयम्॥४॥
गत्वोदीचीं दिशं राजा रुद्रानुचरसेवितां॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम्॥५॥

नान्यद्वान्॥ अद्रौ हिमवति हतः तस्योत्तमस्य माता सुरुचिः तस्य पुत्रस्य गतिं गता मरणं प्राप्तेत्यर्थः॥३॥ ध्रुवः भ्रातुरुत्तमस्य वधमाकर्ण्य कोपा
मर्षशुग्भिस्त्रिभिः समाहारद्वंद्वः तेन अमर्षः असहनं आर्पितः व्याप्तः जैत्रं जयशीलं स्यंदनं रथमास्थायाधिरुह्य पुण्यजनालयं अलकां पुरीं गतः
गतवान्॥४॥ रुद्रानुचरा भूतादयः तैः सेवितां गुह्यकैर्यक्षैः संकुलां व्याप्तां पुरीमलकां हिमवतो द्रोण्यां ददर्श॥५॥

॥७१॥

हहहाहुःखमंनरिष्वंदिशः दशदिशश्चानुनादयन्प्रतिध्वनयन्शंखंदध्मौनादितवान्॥येनशंखनिनादेनउद्विग्नाःचलिताःदृशः यासांताउपदे
शोयत्तास्त्रियाःहेततः धूमंनिताराममत्रमनभीतवृत्सः॥६॥उपदेवाश्चमहाभटास्तेवलिनः ततः अलकायानिष्क्रम्यतस्यशंखनिनादमहसंतःउ
द्यतायुधाःउद्यतास्त्रशस्त्राः अभितःपेतुःउपर्यागतवंतः॥७॥ऊग्रंभीमंधनुर्यस्यसमहारथोध्रुवः आपततःसर्वान्वीरान्युगपदेवप्रत्येकं१
त्रिभिस्त्रिभिर्बाणैरहन्प्रत्येकंत्रिभिस्त्रिभिर्बाणैः॥सर्वानत्रयोदशायुतानियुगपन्निजघान॥८॥तेवैउपदेवाःसर्वेललाटलग्नैस्तैस्त्रिभिरिषुभि

दध्मौशंखंहहहाहुःखंदिशश्चानुनादयन्॥येनोद्विग्नदृशःक्षत्ररूपदेव्योऽत्रसन्त्रशम्॥६॥ततोनिष्क्रम्य
लिनउपदेवमहाभटाः॥असहंतस्तन्निनादमभिपेतुरुदायुधाः॥७॥सतानापततोवीरउग्रधन्वामहारथः
एकैकंयुगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः॥८॥तेवैललाटलग्नैस्तैरिषुभिःसर्वएवहि॥मत्वानिरस्तमात्मा
नमाशंसनकर्मतस्यततः॥९॥तेपिचामुममृष्यंतःपादस्पर्शमिवोरगाः॥शरैरविध्यन्युगपद्द्विगुणंप्र
चिकीर्षवः॥१०॥ततःपरिघनिस्त्रिंशैःप्रासशूलपरस्वधैः॥शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैःशरैरपि॥११॥

रात्मानंनिरस्तंपराजितंमत्वातस्यध्रुवस्यतत्कर्मआशंसनप्रशंशंसुः॥९॥तेपिचयत्ताउरगाःसर्पाःपादस्पर्शंपादाहतिमिवअमुंध्रुवममृष्यं
तः॥आसहमानाद्विगुणंयथाभवतितथापद्भिःषड्भिः॥प्रतिकर्तुमिच्छंतःशरैर्युगपदेवाविध्यन्निजघ्नुः॥१०॥ततःपरिघादिभिःशस्त्रैः
विशेषैरविध्यन्तयाचित्रवाजैश्चित्रपक्षैःशरैरपिनितरांकुपिताः॥अयुतानात्रयोदशयक्षास्तस्यप्रतिकर्तुंतत्प्रतिक्रियांकर्तुमिच्छंतःसरथं

भा.च.

॥७२॥

तथा स चौत्तानपादिः ध्रुवः अरीणां शस्त्रवर्षेण छन्नः आवृतः आसारेण धारावर्षेण यथा गिरिः पर्वत इव नोपादृश्यत नैवादृश्यत ॥१३॥ ततो देवादिविपश्यतां सि द्धानां मध्ये हाहाकार आसीत् मनोर्नप्ता पश्य पुमान् अयं ध्रुवः अर्णवः समुद्रस्तस्मिन् मग्नः हन्त हा कष्टमित्येवंरूप हाहाकार आ सीत् छद्मस्वर्षैः ततो नदत्सु यातुधानेषु राक्षसेषु जयकाशिषु जितं मयेति जयप्रकाशकेषु सत्सु जयप्रालिप्सितिपाठे जयकाशेषु सत्सु नीहारात्

अम्ववर्षन्प्रकुपिताः सरथं सहसारथिं ॥ इच्छंतस्तत्प्रतीकर्तुमयुतानां त्रयोदश ॥१२॥ औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा । नउपादृश्यत छन्न आसारेण यथा गिरिः ॥१३॥ हाहाकारस्तदैवासीत् सिद्धानां दिवि पश्यतां ॥ हतोयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥१४॥ नदत्सु यातुधानेषु जयकाशिष्वथो मृधे ॥ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥१५॥ धनुर्विस्फूर्जयन्नुग्रं द्विषतां खेदमुद्वहन् ॥ अस्त्रौघं । व्यधमद्बाणैर्घनानीकमिवानिलः ॥१६॥ तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् । कायानाविविशुस्तिग्मा गिरीनशनयो यथा ॥१७॥

स्करः सूर्य इव तस्मात् छुरवर्षान्तर्यान्तस्य छोपेपंचमीरथे आस्थाय उदतिष्ठत् उत्थितः ॥१५॥ ततः उग्रं धनुः विस्फूर्जयन् ज्याघातं कुर्वन् द्विषतां पुण्यजनानां खेदमुद्वहन् बाणैः वारस्त्रौघं द्विषत्प्रयुक्तं अस्त्रसमूहमनिलो वायुरिव मेघपंक्तिं व्यधमत् चूर्णयामास ॥१६॥ तस्य ध्रुवस्य चापा त् धनुषो विनिर्मुक्ताः तिग्मास्तीक्ष्णा बाणाः गिरीन् पर्वतान् अशनयो यथा रक्षसां वर्माणि कवचानि छित्त्वा कायान् देहान् आसमंताद्विवि

॥ ९४ ॥ ध्रुः ॥ ७२ ॥

भल्लैः बाणैः संछिद्यमानानां रक्षसां चारूणि सुंदराणि कुंडलानि येषु तैः शिरोभिः स्वर्णमयतालवृक्षसदृशैः ऊरुभिः वलयैः सुंदरैर्बाहुभिर्महाधनैर
नर्घैः हारादिभिश्चास्तृताः आच्छादिता रणभूमयः वीराणां मनोहरा विरेजुः बभुः ॥१८॥ एवं हतेभ्योवशिष्टाइतरे रक्षोगणाः क्षत्रियवर्यस्य
ध्रुवस्य सायकैः बाणैः प्रायः बाहुल्येन विवृक्णाः संछिन्ना अवयवा येषां ते रणाजिरात् रणभूमेः सिंहेन विक्रीडितेन गजा इव दुद्रुवुः पलायि
तवंतः ॥१९॥ नष्टामानवश्रेष्ठ ॥ स ध्रुवः महामृधे महति युद्धे आततायिनं शस्त्रपाणिम् अपश्यमानः पुरीं दिदृक्षन्नपि द्रष्टुकामोपि मायिनां द्विषां पु

भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥ हारकेयूरमुकुटैरुष्णीषैश्च
महाधनैः ॥ आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥१९॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः
प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्रीडितयूथपा इव ॥२०॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मा
नवोत्तमः ॥ पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥२१॥ इति ब्रुवंश्चित्ररथः स्वसारथिं यतः
परेषां प्रतियोगशंकितः ॥ शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोन्वदृश्यत ॥२२॥

णपुजनानां चिकीर्षितं जनो न वेदेमेवं बुध्वा नाविशत् न प्रविष्टवान् ॥२१॥ स चित्ररथो ध्रुवः सारथिं प्रति इति न मायिनां वेद चिकीर्षितं जन इत्ये
वं वदन् परेषां विद्विषां प्रतियोगं प्रतिक्रियां प्रतिशंकितः शंकमानः अतएव अंतः यत्नवान् जलदैर्मेघैरिवेरितं शब्दितं गर्जितमिव सर्वतः
शब्दं शुश्राव ततः समनंतरमेव नभस्वता वायुना महद्दिक्षु रजः धूलिरन्वदृश्यत दृष्टः ॥२२॥

ऐरावतं विस्फुरत्तडितो यस्मिन् त्रासयंस्तनयित्नवो ऽशनयो यस्मिन् तेन मेघसमूहेन सर्वतः छुरितं व्याप्तं ॥ २३ ॥ रुधिरौघादयः व्रष्टुः निपे
तुः इत्यर्थः न सृजन्ति नव्यज्वलती ति शरीरमिश्रमसृग्गिरः श्लेष्मादिः रुधिरस्य पूयमुपादानात् मेदसः पुरस्थमार्षं महामिकबंधानि शिरोहीनशरीराः
णि गगनात्तस्य भुवस्याग्रतः निपेतुः ॥ २४ ॥ ततः खे आकाशे गिरिः दृष्टः पतत्सर्वतो दिशं सर्वा सुदिक्षु साश्मवर्षिणः अश्मसहितं यद्वर्षणं त

तमसेनाच्छादितं व्योम घनानीकेन सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥ २३ ॥ ववृषू रुधिरौघासृ
क्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनाद्दस्यकबंधान्यग्रतोऽनघ ॥ २४ ॥ ततः खे दृश्यत गिरिर्निपेतुः सर्वतोदि
शम् ॥ गदापरिघनिस्त्रिंशमुशलाः साश्मवर्षिणः ॥ २५ ॥ अहयोऽशनिनिःश्वासा वमंतोऽग्निं रुषाक्षिभिः ॥ अभ्य
धावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥ २६ ॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवं ॥ आससाद महाह्रादः
कल्पांत इव भीषणः ॥ २७ ॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां ॥ ससृजुस्तिग्मगतय आसुर्या मायया सुराः
॥ २८ ॥

दृतः गदादयः निपेतुः ॥ २५ ॥ अशन्यिव निःश्वासो येषां अहयः सर्पाः अक्षिभिरग्निं वमंतः उज्जिरंतः क्रुद्धा गजाः सिंहा व्याघ्राश्च यूथशः
संघशः अभ्यधावन् अभिमुखं तूर्णमागतवंतः ॥ २६ ॥ ऊर्मिभिस्तरंगैर्भीमो भयंकरः समुद्रः समंताद्भुवं प्लावयन् प्रलय इव महान्ध्व
निर्यस्यात एवातिभीषणः आससाद प्राप्त ॥ २७ ॥ उक्तविधान्यन्यानि च अमनस्विनां अज्ञानां त्रासकारिणि भयंकराणि तिग्मा क्रूरा गतिः प्रव

असुरैर्ध्रुवे प्रयुक्तामतिदुस्तरां तां मायां निशाम्य दृष्ट्वा आगताः सर्वे मुनयः तेऽस्य ध्रुवस्य शं सुखं मंगलमाशंसन् आशंसितवंतः ॥ २९ ॥ आशंसामेव विवृण्वन्ति औत्ता नपादइति ॥ अंग हे औत्तानपादे ध्रुव ॥ आवन्नार्त्तिहरः भक्तदुःखापहर्त्ता शार्ङ्गधन्वा भगवान्देवः तव विपक्षान् शत्रून् छिनत्तु नाशयतु भगवंतं वि शिनष्टि ॥ यस्य भगवतो नामधेयं निशम्य श्रुत्वा अभिधाय उक्त्वा वा लोकः ॥ अञ्जसा शीघ्रं जनः सदुस्तरं मृत्युं तरति ॥ ३० ॥ इति श्री चंद्रचंद्रिकायां चतु

ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम् ॥ निशाम्य तस्य मुनयः शमाशंसन्समागताः ॥ २९ ॥ मुनय ऊचुः ॥ औत्तानपाद भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्त्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य चाद्धा लोकोञ्जसा तरति दुस्तरमंग मृत्युं ॥ ३० ॥ इति श्री भागवते महापुराणे चतुर्थस्कंधे दशमोध्यायः ॥ १० ॥ श्री मैत्रेय उवाच ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधे स्त्रमुपस्पृश्य यन्नारायणनिर्मि तम् ॥ १ ॥ संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥ २ ॥

र्थस्कंधे दशमः ॥ १० ॥ मुनिभिरेवमाशंसितो ध्रुवः स्वधनुः प्रयुक्तनारायणास्त्रो विनाशितप्रतिपक्षः स्वपिता महानुनीतहृदयः स्वपुरंगत इत्याह एकादशेन मुनिः निशम्येति ॥ एवं गदतामृषीणां निशम्य श्रुत्वा च इति शेषः उपस्पृश्य अप इति शेषः आचम्येत्यर्थः यन्नारायणनिर्मितं तन्नारायणास्त्रं संदधे ॥ १ ॥ एतस्मिन्नारायणास्त्रे संधीयमाने प्रयुज्यमाने सति गुह्यकैर्यक्षैर्निर्मिता मायाः हे विदुर ज्ञानोदये सति यथा क्लेशा रागद्वेषादयस्तथा क्षिप्र

॥८॥

आर्षं ऋषेर्नारायणादुद्भूतं अस्त्रं धनुषि तस्य ध्रुवस्य प्रयुंजतः संदधतः सतः स्वर्णमयाः पुंखा मूलप्रदेशा येषां कलहंसानां वासांसि पक्षा येषां ते शरा विनिः
सृताः धनुषो विनिर्गता द्विषंतां बलमाविविशुः आविष्टवंतः यथा भीमः भयंकरो रवो ध्वनिर्येषां ते शिखंडिनः मयूरा यथा वनं विशंति तद्वत् भीमरवा
इति दार्ष्टांतिकेप्यन्वेतव्यम् ॥३॥ तैस्तिग्मधारैस्तीक्ष्णधारैः शिलीमुखैर्बाणैः प्रधने युद्धे उपद्रुताः ताड्यमानाः पुण्यजना इतस्ततः तं ध्रुवं प्रकुपितास्ते
ऊर्ध्वमुद्धृतायुधाः संतः उन्नद्धा उच्छ्रिताः फणा येषां ते अहयः सर्पा इव सुपर्णं गरुडं अभ्यधावन् ॥४॥ मृधे युद्धे ॥ अभिमुखं धावतः पृषत्कैर्बाणैर्नि

तस्यार्षमस्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः ॥ विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः
३॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः ॥ पुण्यजना उपद्रुताः ॥ तमभ्यधावन् कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इ
वाहयः ॥४॥ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमंडलं व्रजंति निर्भिद्य य
मूर्ध्वरेतसः ॥५॥ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः ॥ औत्तानपादिं कृपया पितामहो मनुर्जगादो
पगतः सहर्षिभिः ॥६॥ मनुरुवाच ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ॥ येन पुण्यजनानेतानवधीस्त्वमनागसः ॥७॥

कृत्ताः संछिन्ना बाह्वादयो येषां तान् पुण्यजनान् परं लोकं निनाय ॥ कथंभूतं ऊर्ध्वरेतसः संन्यासिनः अर्कमंडलं निर्भिद्य यं व्रजंति ॥५॥ एवमनाग
सो निरपराधिनः चित्ररथेन ध्रुवेण बहुशः हन्यमानानभीक्ष्यमानान्गुह्यकान्यक्षान्वीक्ष्य ध्रुवस्य पितामहो मनुः स्वायंभुवः कृपया महर्
षिभिः सह उपगतः समीपं प्राप्तः ॥ औत्तानपादिं जगाद उवाच ॥६॥ उक्तमेवाह ॥ अलमित्यादिना हे वत्स तमोद्वारेण संमोहनात्मकाज्ञानहेतु
ना क्रोधाद्भवति संमोहः इति स्मरणात् ॥ पाप्मना निरपहेतुना रोषेणालं येन रोषेणानागसोपि तान् पुण्यजनान् त्वमवधीः

हेत्वानसद्भिर्विगर्हितं अतएवैतत्कर्मास्मत्कुलोचितंनभवति अकृतागसांयक्षाणामयंवधस्तेत्वयाआरब्धः ॥८॥ नतुमद्भ्रातृहंतारएतेउपरेक्षाः कथ
मनागसस्तत्राह ॥ नन्विति ॥ अंगहे भ्रातृवत्सल भ्रातुरुत्तमस्ययोवधस्तेनाभितप्तेनत्वयाएकस्ययक्षस्यापराधेनहेतुनातस्यापराधिनःसंगात्संबं
धाद्बहवोहताः घातिताः ॥९॥ आत्मानंमनः असंगृह्य अनियम्य परागृह्येतिपाठेपराभवविषयंदेहमात्मत्वेनगृहीत्वापशवोयथादेहाभिमाने
नान्योन्यंघ्नंतितथाभूतानांवैशसंहिंसेतियदयंभगवद्भक्तानांसाधूनांमार्गोनभवति ॥१०॥ मतंभगवद्भक्तानामयंमार्गोनभवतीतिममतच्चित्तमित्य

नास्मत्कुलोचितंतातकर्मैतत्सद्विगर्हितम् । वधोयदुपदेवानामारब्धस्तेकृतैनसाम् ॥८॥ नन्वेकस्यापराधेनप्रसंगा
द्बहवोहताः ॥ भ्रातुर्वधाभितप्तेनत्वयांगभ्रातृवत्सल ॥९॥ नायंमार्गोहिसाधूनांहृषीकेशानुवर्तिनाम् ॥ यदात्मानं
पराग्गृह्यपशुवद्भूतवैशसम् ॥१०॥ सर्वभूतात्मभावेनभूतावासंहरिंभवान् ॥ आराध्यापदुराराध्यंविष्णोस्तत्पर
मंपदम् ॥११॥ सत्वंहरेरनुध्यातस्तत्पुंसामपिसंमतः ॥ कथंत्ववद्यंकृतवान् अनुशिक्षन्सतांव्रतम् ॥१२॥

चाह सर्वभूतात्मभावेनेति ॥ आवसंत्यस्मिन्नित्यावासः ॥ आवसतीतिवा आसवः भूतानामावासंधारकमंतरात्मानंचइतरैरब्रह्मात्मकस्वतंत्र
वस्तुदर्शिभिः दुराराध्यंहरिंसर्वभूतात्मभावेनसर्वभूतांतरात्मत्वेनाकाराध्यपरःसंसर्वोत्कृष्टंतत्प्रसिद्धंविष्णोःपदंलोकंआपप्राप्तवानस्मिन्नतः
दुर्लभमप्राप्तमपिभगवतादत्तत्वात्प्राप्तप्रायमितिमत्वानवेत्युक्तं ॥११॥ हरेरनुध्यानाद्भजनात्सःहरिभक्तस्त्वंतत्पुंसांहरिभक्तानामपिसंमतःभा
गवतोत्तमत्वेनसंमतःसतांसाधूनांव्रतंअनुसिक्षन् अनुशिक्षयन्लोकस्येतिशेषःकथमवद्यंवक्तुमप्यनर्हंपापंकृतवान्भगवद्भक्तस्यभिनरामे
तदनुचितमित्यर्थः ॥१२॥

भक्तद्रोहेण भगवद्भक्तैः कोविरोधस्तत्राह ॥ नितिस्वेति ॥ तितिक्षया अपराधिषु सहनेन करुणया परदुःखासहिष्णुत्वेन ॥ अखिलजंतुषु नरतमभावेन
अवस्थिते पुंसि आत्मसाम्यबुद्धिकृतमहिंसाचरणेन समत्वेन देहाकाशान प्रकृतिपरिणामत्वेनजीवान् ज्ञानैकाकारत्वेन परमात्मानं तु सर्वांतरात्मत्वेनेत्ये
वंरूपसमत्वेन वा सर्वात्मा भगवान् संप्रसीदति ॥ सर्वात्मेति हेतुगर्भं भगवतः सर्वात्मकत्वादेतन्सर्वांतरात्मतया देवमनुष्यादिरूपेणावस्थितत्वात्स
र्वेषां शरीराणामीश्वरशरीरत्वेन शरीरकृतो द्रोहः शरीरिण्यात्मन्येव भगवति पर्यवस्यतीति भक्तद्रुहे भगवान्नप्रसीदतीत्यर्थः ॥१३॥ भगवत्प्रसाद
फलमाह ॥ प्रसन्नइति पुरुषः सर्वात्मब्रह्मोपासनपरः पुमान् तितिक्षादिभिर्भगवति प्रसन्ने सति प्राकृतैः कामक्रोधादिभिर्जीवदशायां विमुक्तः

तितिक्षया करुणया मैत्र्या चाखिलजंतुषु ॥ समत्वेन च सर्वात्मा भगवान् संप्रसीदति ॥१३॥
संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ॥ विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ॥१४॥
भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह ॥१५॥

अंते अजीवात्मकृतेर्नितरांमुक्तः निर्वाणं निरतिशयानंदरूपं ब्रह्म ऋच्छति प्राप्नोति ॥१४॥ एवं सर्वभूतसुहृत्त्वादीन् भगवत्प्रसादहेतून् प्रसादफ
लभूतान् ब्रह्मप्राप्तिं चाभिधाय तत्त्वोपदेशमंतरेण आत्ममरणदुःखितमप्यासन्नमनः प्रशाम्यतीत्यभिप्रेत्य भ्रातुर्हननकर्तृत्वं नापि पुत्राणां तत्
कर्तृत्वं किंतु दैवमेव कारणमिति वक्तुं भ्रात्रादिशरीराणामुत्पत्तिमरणादिकं यथावद्विवेचयन् तद्द्वारकं ईश्वरस्यानंतविविधशक्तिमत्त्वमाह ॥ भू
तैरिति पंचभिर्भूतैः पृथिव्यादिभिरारब्धः देवमनुष्यादिशरीररूपेण परिणतः योषित्पुरुषश्चेत्यस्य द्विविधो जनः प्रसिद्धः तयोर्योषित्पुरुषयो
रन्योन्यव्यवायात् पुत्रादीनां भूतिरिह भवति तस्माद्भूतं प्राणिजातमित्यर्थः पंचभूतपरिणामरूपं स्त्रीपुरुषात्मकशरीरद्वयसंबंधाद्भूतमपि प्रा

णिजातं पंचभूतात्मकमेवेति भावः ॥१५॥

एवं व्यष्टिसर्ग उक्तः ॥ अथ सर्वशरीराणां पंचभूतारब्धत्वेपि कदाचन सृष्टिः तैः शरीराणां स्थितिकारणं संहारणं च किं तत्र द्वयं कदाकदावा ईश्वरकर्मसं
बंकिंरूपमित्यत आह ॥ एवमिति एवं यथा स्त्रीपुंसात्मको जनः तथैवायं सर्वमप्येव परमात्मनः मायायाः परमात्माधिष्ठितायास्तच्छरीरभूताया माया
गुणानां सत्वादीनां व्यतिकरात् तारतम्येन संबंधात् हे राजन् ध्रुवसर्गः सृष्टिः स्थितिः संहारश्च प्रवर्तते ॥ तत्र रजसो वृद्धावितरयोर्ह्रासे सर्गः ॥ सत्व
सवृद्धावितरयोर्ह्रासे स्थितिः तमसो वृद्धौ तु संयमः ॥ त्रयाणां साम्ये त्वितया भाव ॥ १६ ॥ ननु स्त्रीपुंसात्मकशरीराणां वैषम्येण संबंधानां गुणानां वा ज
डत्वेन प्रवृत्तिः स्वतो नास्ति सम सृष्ट्यात्मना कथं परिणाम सामर्थ्यमपि कथं देवमनुष्यादिवैचित्र्यं सुखदुःखतारतम्यं चेत्यत आह ॥ निमित्तमात्रमि
ति ॥ निमित्तमेव निमित्तमात्रं न तु निमित्तमित्यर्थः तत्र गुणानां महदाद्याकारेण परिणामे देवादिवैचित्र्ये सुखदुःखयोश्च निर्गुणः सत्वादि

एवं प्रवर्तते सर्गः स्थितिः संयम एव च ॥ गुणव्यतिकराद्राजन् मायया परमात्मनः ॥ १६ ॥ नि
मित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ॥ व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ १७ ॥

गुणरहितः ॥ पुरुषर्षभः ईश्वरः निमित्तमात्रं गुणानां परिणामस्य तेषां तत्स्वाभाव्यनिबंधनत्वाद्देवादिवैचित्र्यस्य सुखदुःखतारतम्यस्य च
कर्मनिबंधनत्वादीश्वरः साधारणकारणं कालाकाशादिवदित्यर्थः ॥ निमित्तत्वमेव दृष्टांतत्वेन विशदयति । यत्र परमात्मनि निमित्ते ॥ अ
यस्कांतसंनिधौ लोहवत् इदं व्यक्ताव्यक्तं ॥ अव्यक्तं प्रधानं तत्कार्यं महदादि व्यक्तं कार्यकारणात्मकं विश्वं भ्रमति प्रवर्तते अत्र लोके मृ
त्कुलालयोर्विभिन्नयोरिव निमित्तोपादानत्वदर्शनादुपादानस्य परमात्मनो जगत्स्रष्ट्यादिनिमित्तत्वानुपपत्तिरिति मा माशंकां निराचिर
कीर्षुरि मात्रपदं प्रयुक्तं न तु उपादाननिराचिकीर्षया परमात्मनो मायायागुणव्यतिकरादित्युपादानत्वाभिधानात् ॥ संबंधसामान्याभिधायिर

न्या अपि विवक्ष्याः यस्य व्यक्तं शरीरमित्यादि श्रुतेरनुसारेण शरीरात्मभावरूपसंबंधविशेषपर्यवसानाच्छरीरस्य कार्योपयोगपृथक्सिद्धाकारत्वात् म्लस्नाता॰
दिविशिष्टस्यादिकार्यभूतघटादीनामिव महदादिकार्याणां प्रकृत्यादिशरीरकपरमात्मकार्यत्वात् अत्र च निर्गुणादस्येनेनसत्वादिगुणवश्यत्वायतनकर्तृत्वसु
खदुःखादिभागजीववैलक्षण्यमभिप्रेतम् ॥१७॥ न हेवं विषदयति मद्गति भगवान् हेयप्रतिभटशाणिधाद्गुणपः कालशक्त्या कालात्मिकया स्वापृथक्सिद्धका
र्योपयोगिविशेषणभूतया शक्त्या गुणक्षोभहेतुभूतया यो गुणानां सत्वादीनां प्रवाहः सर्गः तेन विभक्तवीर्यः विभक्तं कर्मीयत देवमनुष्यादिवैचित्र्येण सु
खदुःखतारतम्येन च व्यवस्थापितं वीर्यं शक्तिः जगदितियावत् एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं
जगदितिउक्तत्वात् अत्र स्वामित्वमध्याह्रियते । विभक्तवीर्यः स्वामिति दूरं करोति स्रजतीत्यन्वयः ॥ गुणक्षोभनिनिमित्तकालप्रकृतिपुरुषशरीरको हं जग
त्स्थानंतविविधविचित्रस्थिरत्रसरूपः स्वामिति संकल्पेनेदं जगत्स्रजतीत्यर्थः यद्वा गुणप्रवाहेणेति हेतौ तृतीया ॥ हेतुश्चात्र फलमध्यय

सर्वत्र खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥१८॥

वेन वसतीति वत् न तु अत्र गुणप्रवाहेण गुणप्रवाहार्थं प्रवाह । शब्देन गुणकार्यं सृष्ट्यादित्रयं विवक्षितं सृष्ट्याद्यर्थं विभक्तं वीर्यं सृष्ट्याद्युपयु
क्तसामर्थ्यं तेन सः ब्रह्मविष्णुरुद्ररूपोऽभ्येत्यर्थः ॥ अकर्तैव देवादिवैचित्र्ये सुखदुःखादौ चाकर्तैव देवादिवैचित्र्यादेस्तत्तज्जीवादृष्टायत्तत्वात्
इदं जगत्करोति उत्पादयति तथा अहंतैव स्वयं हननादयुनाश्रयः एव । हंति ॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्तारमपि मां विद्ध्यक
र्त्तारमव्ययम् । प्रधानकारणीभूतायतो वैसृजस्तक्ष्यइतिस्मृतेः हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हंति न हन्यते
इति श्रुतेश्च । अत्र कर्तृत्वं हंतृत्वं च प्रयोजकरूपेण अकर्तृत्वं तु । प्रयोज्यरूपेणेति विवेकः ननु इदमर्घमानं कर्तृत्वं चैकस्मिन्कथमुपपद्यतेतत्र
आह । विभूम्नः भगवतः अमात्वेवविजिज्ञासितव्य इति तेः चेष्टा दुर्विभाव्या अप्रतर्क्या खलु ॥१८॥

प्रयोजकमित्त्वमेव विशदयति । सइति । सः कालः कालशरीरकः परमात्मा जनेन पित्रादिना प्रयोजककर्त्रा जनं उत्पत्युमुखं पुत्रादीन् जनयन् आदिकृत अंतकं
विनाशोन्मुखं मृत्युना प्रयोज्यकर्त्रा मारयन् स्वयं तु अनादिः उत्पत्तिरहितः नाशरहितः अनंतः अंतकरः पित्रादिद्वारा जनकः मृत्यादिद्वारा अंतकरः नु सा
क्षात् अतः साक्षात्कर्तृत्वं चैकस्मिन् विविधविचित्रानंतशक्तिमती ईश्वरउपपन्नमिति भावः ॥१९॥ ननु प्रयोजयितृत्वमपि कथमीश्वरस्योपपन्नं वैष
म्यनैर्घृण्यादिप्रसंगादित्याशंक्याह तत्तत्कर्मानुरूपं प्रयोजयितुः पक्षपाताभावादुपपन्नमेव प्रयोजयितृत्वमित्याह । नवा इति मृत्योः संसारात्परस्य स्पृष्ट
संसारस्येत्यर्थः । यद्वा मृत्युशरीरकस्य योमृत्युमंतरे संचयन् यस्य मृत्युः शरीरमिति श्रुतेः परस्य परमात्मनः समं यथा भवति तथा प्रजाः कर्मभूताः विश

सोनंतोंतकरः कालोनादिरादिकृदव्ययः ॥ जनंजनेन जनयन्मारयन्मृत्युनांतकम् ॥१९॥
नवैस्वपक्षोस्यविपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनुधावंत्यनीशा य
था रजांस्यनिलं भूतसंघाः ॥२०॥ आयुषोपचयं जंतोस्तथैवोपचयं विभुः । उभाभ्यां रहितः स्वस्थो दुःस्थस्य वि

तः तत्तत्कर्मानुरूपनियमनार्थमंतरात्मतया प्रविशतः । न स्वपक्षः नापि विपक्षो वास्ति पक्षपाताभावं दृष्टांतेनोपपादयति । तमिति । यथा रजांसि
धावमानमनिलमनुसरंति धावंति तथा अनीशाः अनियंतारः कर्मानुरूपं नियाम्या इत्यर्थः भूतसंघास्तत्तत्कर्मानुसारं धावमानं नियंतारं प
रमात्मानमनुसरंति धावंति प्रवर्तंते यथाहुर्मंतलम्व आरिपुरजांस्यनुनेतुर्नवायोर्वैषम्यमस्त्येवं परमात्मनोपीत्यर्थः ॥२०॥ कर्मानुरूपनियमनमेवो
पपादयति । आयुष इति । विभुः सर्वान्तरो भगवान् जंतोः कर्मवशस्य कर्मायत्तसुखदुःखादिभाजः आयुषः अपचयं ह्रासं तथा उपचयं वृद्धिं च स्वय
मुभाभ्यामुपचयापचयाभ्यां रहितः अतएव स्वस्थः स्वेनैव हेयप्रतिभटकल्याणैकतानस्वभावेन स्थितः विदधाति करोति एवमुत्पत्तिमरणयोर्हेता

एवं सर्वभूतात्मानं स्वसंकल्पकृतेन जगदुद्भवस्थितिभवलयं सर्वज्ञं सर्वशक्तिं वाद्यपरिमितोदारगुणसागरं तं तत्कर्मानुरूपं जगन्नियंतारं सर्वभूतसुहृदं प
रमात्मानमविज्ञाय एतमेव कालकर्मादिरूपेण विवदंति केचिदित्याह ॥ केचिदिति ॥ एनं सुखदुःखादिहेतुं केचित्कर्म पुण्यापुण्यरूपं कर्मेति वदंति हे नृप
अपरे स्वभावं प्रकृतिपुरुषयोः स्वरूपान्यथाभावः स्वभावान्यथाभावरूपपरिणामस्वभावं वदंति ॥ एके कालं सत्वादिगुणक्षोभहेतुं कालं वदंति परे पु
र्वदैवं विधिं अपरे उत अपरे पुनः पुंसः परमपुरुषस्य कामं संकल्पं वदंति ॥ अयमेव पक्षः श्रेयान् पुण्यापुण्यरूपस्य कर्मणस्तन्त्रमाह दृष्टस्यापि भगवन्नि
ग्रहानुग्रहरूपत्वेन तत्संकल्पानतिरिक्तत्वात् कालस्वभावयोरपि तत्संकल्पायत्तत्वात् ॥ पुंसो जीवस्य काम इति व्याख्याने तु पुंसो दुःखविषयस्य कामा
नुपपत्तेः अतोऽपयोक्ता एवमसाधु ॥ २२ ॥ पुंसः काममिति पक्षस्यैव साधुत्वं ज्ञापयन् काममस्तु दुर्ज्ञेयत्वमाह ॥ अव्यक्तस्येति हे तात अव्यक्तस्याव्यक्तेरिंद्रियैर्न

केचित्कर्म वदंत्येनं स्वभावमपरे नृप । एके कालं परे दैवं पुंसः काममुतापरे ॥ २२ ॥ अव्य
क्तस्याप्रमेयस्य नानाशक्त्युदयस्य च ॥ न वै चिकीर्षितं तात को वेदाथ स्वसंभवम् ॥ २३ ॥

व्यक्तत्वं स्पष्टत्वं क्तः अतएवाप्रमेयस्य देशादिभिरपरिच्छिन्नस्य । ऐंद्रियकं हि सर्वं देशकालादिभिः परिच्छिद्यमानं [[दृश्यते]] ॥ अनेन विशेषणद्वयेन प्रकृतिपु
रुषवैलक्षण्यसिद्धिः प्रकृतेर्व्यक्तत्वात् पुरुषस्याणुत्वात् उभयवैलक्षण्यपादकं विशेषणांतरमाह ॥ नानाशक्तीनां विविधशक्तीनां परास्य शक्ति
र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः उदयः अभिव्यक्तिर्यस्मात् तस्य भगवतः चिकीर्षितं कर्तुमिच्छाविषयं कथंभूतं स्वसं
भवं स्वस्य लोकस्य संभवं जगदुत्पत्तिरूपं संभवं भवग्रहणं संहारादीनामप्युपलक्षणं अथानंतरः को लोके वेद न कोपीत्यर्थः प्रकृतिपुरुषवि
लक्षणस्यानंतविविधशक्तेः परमपुरुषस्य कर्तृता संकल्पविषयं जगदुत्पत्तिस्थितिसंहारादिरूपं व्यापारं एवंविध इति तत्वतः कोपि न जानाति
त्यर्थः तथा च श्रुयते क इत्था वेद यत्र सः क इह प्रवोचत् कुत आयाता कुत इयं विसृष्टिरित्यादिकाः अत्र भगवत्स्वरूपस्यैवानिंद्रियत्वात्संकल्पवि

एवमुपपादितं भगवतएवोत्पत्तिमरणादिनिमित्तत्वं प्रकृतेनोपसंहरति । नचैतइति हे पुत्रक एते धनदस्य कुबेरस्यानुगाभृत्याः त्वद्भ्रातुर्हंतारो न भवंति किंतु पुंसः क
र्मवश्यस्य विसर्गादानयोः उत्पत्तिमरणयोः दैवमीश्वर एव हि कारणम् ॥२४॥ नन्वीश्वरस्यैदुत्वमादिकारणं न हि जीववशोपि सत्वादिगुणविशिष्टत्वान्
तद्युक्तो जगद्व्यापारलक्षणक्रियाश्रयत्वाच्च गुणकर्मभिर्बध्येत तत्राह ॥ सइति ॥ यद्यपि स एवेश्वरो विश्वं सृजति अवति रक्षति हंति च तथापि अनहंका
रात् देहात्मनोस्तादात्म्याभिमान अहंकारः तदभावात् गुणकर्मभिः गुणानां सत्वादीनां कर्मभिः गुणकार्यभूतैः कर्मभिर्नाज्यते न बध्यते यद्यपि जगदु
त्पत्त्यादीन् गुणकार्यभूतान् व्यापारान् करोतीश्वरः तथापि स्वशरीरभूतप्रकृतिपुरुषात्मकेषु देवादिपदार्थेषु स्वसंकल्पकृतोसत्तिस्थितिलयेषु

नैवैते पुत्रक भ्रातुर्हंतारो धनदानुगाः ॥ विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥२४॥ स ए
वं विश्वं सृजति स एवावति हंति च ॥ तथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः ॥२५॥ ए
ष भूतानि भूतात्माभूतेशो भूतभावनः ॥ स्वशक्त्या मायया युक्तः सृजत्यति च पाति च ॥२६॥

ह

तादात्म्याभिमानाभावात् स्वयमजत्वभावत्वाच्च न कर्मभिर्बध्यते जीवस्तु कर्मणा संकुचितज्ञानत्वेन जडत्वाभावाद्देवादिशरीरेषु स्वतादात्म्याभि
मानात् बध्यत इत्यर्थः ॥२५॥ एवं भ्रात्रादिशरीराणामुत्पत्तिमरणादिनिमित्तस्य चानंतविविधविचित्रशक्तियोगमत एव नित्यमुक्तत्वं चाभिहि
तं ॥ अथ यस्यैवंभूतो भगवांस्तमेव रागद्वेषादिभिर्विमुक्तस्त्वं सर्वात्मना भजस्वेत्याह ॥ एषइत्यादिना । य एष भगवान् भूतात्मा भूतानां देवमनुष्या
दीनामात्मा । स किं जीवः नेत्याह भूतेशः ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठतीत्युक्तरीत्या विहृद्विदात्मकभूतानामंतः प्रविश्य तत्तत्कर्मानुरूपं भि

येनानकेवृत्तं भूतेशा एव अपितु तत्कारणं चेत्याह भूतभावयत्युत्पादयतीति भूतभावनः यद्वा भूतानि भावयति सृष्ट्यादिभिः सत्त्वादिमंति करोतीति भूतभावनः तथाभूतानां सतां स्थितिनिमित्तमिति हेतुगर्भोर्थः कारणत्वमपि न निमित्तत्वेन अपितु विशिष्टविषेणेत्याह ॥ स्वशक्त्या कार्योपयोगिस्वदृष्ट्यकस्मिदविशेषणाभूतया मायया युक्तः माया वयुनं ज्ञानमिति ज्ञानपर्यायोप्यत्र मायाशब्दो जीववाची अनेन निर्विकारत्वश्रुतिविरोधोपि परिहृतः विकाराणां पुरुषगतत्वात् भूतानि सृजति अत्ति संहरति पाति रक्षति च ॥२६॥ तमुक्तविधं मृत्युं अभजतां बंधकम् । भजतां त्वमृतं मोचकं दैवं स्वतेजसा विद्यमानं जगतां परमयनं प्राप्यप्रापकम् ॥ आधारं च सर्वात्मना सर्वप्रकारेण मनोवाक्कायैरित्यर्थः सर्वात्मकब्रह्मभावेनेति वा ॥ यद्वा प्राप्यप्रापकमाधारश्चेति तु व्याप्तेन दैव जगत्परायणमित्यनेनाभिप्रेतं उपेहि शरणं गच्छ । युक्तं चैतदित्याह यस्मै भगवते विश्वसृजः शरश्चतुर्मुखमरीच्यादयः बलिं पूजां हरंति कुर्वंति विश्व

तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम् ॥ यस्मै ब
लिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः ॥२७॥

सृजो हरंतीत्यनेन सर्वेश्वरेश्वरत्वमुक्तम् । विश्वसृजो हि सर्वेषामीश्वरास्तेषामपि पूज्य इति तत्सिद्धिः ननु विश्वसृजो हरंतु बलिं तस्यापि गोब्राह्मणादिपूज्यत्वादित्याशंक्यां निराकर्तुं दृष्टांतमाह । गावो बलीवर्दाः यथा नसि नासिकायां दाम्ना सूत्रेण यंत्रिताः प्रोताः पुरुषस्य कर्म कुर्वंतस्तथा तद्वशंगता बलिं हरंति ॥ अनेन सर्ववशत्वसिद्धिम् । यस्य वशे सर्वं वर्त्तते स सर्ववशी तु स्यात् तथा च श्रूयते ॥ सर्वस्य वशी सर्वस्येशानः एष भूतपालः एष सेतुर्विधरणः एषां लोकानामसंभेदाय न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगम् । स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति योयमित्थीनस्तस्य न तदनुवर्त्तनं युक्तमिति भावः ॥२७॥

॥ विध ॥

नवतु विशिष्यतइ जनमेवपुत्रवात्सल्यं तत्रैवाप्यनलत्वादित्याह । यइति ॥ यो भवान् पंचवर्षाणि अस्य पंचवर्षः सन् सपत्न्या मातुर्वचसा भिन्नं मर्म हृदयं यस्य
सः जननीं सुनीतिं विहाय वनं प्रतिष्ठस्तत्र तपसा प्रत्यगक्षं प्रत्यंचि अक्षाणीन्द्रियाणि यस्मिन् कर्मणि यथा तथा आहृतेन्द्रियमित्यर्थः क्रियाविशेषणमि
दं यं भगवंतं आराध्य त्रिलोक्या मूर्ध्नि उपरि शाश्वत पदं स्थानं लेभे लब्धवान् ॥ २८ ॥ तमेवात्मानं परमात्मरूपं कर्तृ च्छरीरभृत जीवात्मदृशी अन्विच्छ अनुव
र्तस्वेत्यन्वयः अन्वेषणप्रकारमेवाह । अंगेति हे ध्रुव यस्मिन् जीवात्मनि इदं असत् देवमनुष्यादिरूपं संततपरिणामवृत्त्या सच्छब्दवाच्यं सततपरिणा
मित्येव वस्तुन उत्तरोत्तरावस्थाप्राप्तौ पूर्वपूर्वावस्थात्यागात् सर्वदा असदिति व्यपदेष्टुमनर्हत्वात् । नद्युक्तं श्रीवैष्णवपुराणे मही घटत्वं घटतः कपालि
का चूर्णरजस्ततो अणुः जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु मन्दावगतं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ॥ अनासीपर

यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा । वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥
तमेवमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम् । आत्मानमन्विच्छ विमुक्तं आत्मदृग्यस्मिन्निदं भेदमसत्प्रतीयते ॥ २९ ॥

मार्थिक प्राकैरभ्युपगम्यते ननु नाशिनः संदेहो नाशिद्रष्योपपादितमिति ॥ विश्वं प्रतीयते ॥ असदित्यस्य विशेषणं त्वेतु अस्मिन् जीवे इदं विश्व
मसत् प्रतीयते अंगमानमेव प्रतीयते स्वतो जीवे देवमनुष्याद्यात्मकं विश्वमविद्यमानमपि पुण्यापुण्यरूपकर्मणा प्रतीयते न तु मिथ्या प्रतीय
यतइत्यर्थः ॥ तस्मिन् मुक्तविग्रहे निरवयवे आत्मनि जीवे व्यपाश्रितं व्याप्य स्थितं निर्गुणं निरस्तहेयगुणगणकं निस्समाभ्यधिकं अक्षरं निर्विकारं
निर्मुक्तं नित्यमुक्तं तमात्मानं एवं उक्तप्रकारेण अन्विच्छेत्यर्थः ॥ २९ ॥ नन्वपामितएव मया भवान् किमधुनाभजस्वेत्युच्यते इत्याशंक्याया
त्मनिरस्ताहंममाभिमानेन त्रिवर्गलिप्सनात्वयोपासितो भगवानत एव प्राहुतं स्यान मनाइत्यानी निर्हेतुकभक्तिं विधाय मोक्ष्यसीत्याह

त्वमिति प्रत्यक् जीवस्तस्यात्मनि जीवांतरात्मनि प्रत्यक् आत्मा शरीरं यस्येति वा । पूर्णषाड्गुण्ये त्रिविधपरिच्छेदरहिते आनंदमात्रे आनंदैकरसे न तु क्वापि जडद्रव्यर्थः
उपपन्नसमस्तशक्तौ उपगताशेषज्ञानबलक्रियादिशक्तौ परमपुरुषे त्वं परमां अहेतुकामव्यवहितेत्युक्तविधां भक्तिं शनकैः समाहितचित्तः विधाय तदा ममाह
मित्यभिमानाभ्यां प्ररूढमत्यन्तमविद्यात्मकं ग्रंथिं विशेषेण निर्मूलं छेत्स्यसि ॥३०॥ यदर्थं तत्त्वोपदेशस्तमाह । यच्छेति श्रेयसां पुरुषार्थानां परं केवलं प्रतीपं प्रतिकू
लं रोषं भूयसा श्रुतेन तत्त्वश्रवणेन अगदेन औषधेन आमयं रोगं यथा तथा उपसंहरेत्यर्थः ॥३१॥ रोषस्य श्रेयःप्रतीपत्वमेव प्रपंचयति । येन रोषेणोपसृ

त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ । भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाह
मिति प्ररूढाम् ॥३०॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं । श्रुतेन भूयसा राजन्नगदेन यथामयम् ॥३१॥ येनोपसृष्टात्पुरुषाल्लो
क उद्विजते भृशम् । न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥३२॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतं । यज्जघ्निवान्पुण्य
जनान्भ्रातृघ्नानित्यमर्षितः ॥३३॥ तं प्रसादय वत्साशु संनत्या प्रश्रयोक्तिभिः । न यावन्महतां तेजः कुलं नोऽभिभविष्यति ३४

ष्टाद्व्याप्तात्पुरुषाल्लोकः भृशं नितरामुद्विजते बिभेति लोकोद्वेजनात् अधर्मात्पुरुषार्थनाश इति भावः आत्मनः स्वस्याभयं निःश्रेयसमिच्छन् बुधो
विद्वान् तद्वशं न गच्छेत् न प्राप्नुयात् ॥३२॥ किंच गिरिशस्य रुद्रस्य यो भ्राता कुबेरस्तस्य हेलनं अवमानं त्वया कृतं यत् यतः पुण्यजनान् यक्षान् भ्रातृ
घ्नानिति बुध्या अमर्षितः क्रुद्धः जघ्निवान् घातितवान् । भ्रातृघ्नाविति स्पष्टे निशब्दाये प्रथमांतत्वं यद्यपि स्यात् भ्रातृघ्ना इति तु स्याज्जघ्निवानिति क्रो
डीकारात् तथापि पुण्यजनविशेषणत्वं दृष्ट्या द्वितीया प्रयुक्ता ॥३३॥ तं धनदं संनत्या प्रणत्या येन प्रश्रयोक्तिभिर्विनयवाग्भिः हे वत्स आशु प्रसाद
य प्रसन्नं कारय । महतां धनदादीनां तेजः अस्माकं कुलं यावन्नाभिभविष्यति न नंसति ततः पूर्वमेवाशु प्रसादयेत्यर्थः ॥३४॥

मन्यु कि मुपसंहरति ॥ एवमिति ॥ स्वायंभुवो मनुः पौत्रं ध्रुवमेवमुक्तप्रकारेणानुशास्य आदिश्य तेन ध्रुवेणाभिवंदितः अभिमतः ऋषिभिः सह स्वपुरं ययौ ॥ ३५ ॥
इति एकादशो ध्यायः ॥ एवं पितामहेनात्वायंभुवेनानुशिष्टो ध्रुवः पुण्यजनवधान्निवृत्तः कुवेराच्च ध्रुवरः स्वधर्माराधितगोविंदो गुणाखिलक्षितिमं उत्तो
ध्रुवक्षितिनिर्वेभवेन्याह मुनिर्द्वादशेन ॥ ध्रुवमिति ॥ मनुपदेशेनापगतक्रोधं अतएव वैशसात् यक्षाणां वधान्निवृत्तं प्रतिबुध्य ज्ञात्वा भगवान् धनेश्वर
स्तत्र ध्रुवसंनिधावागतश्चारणादिभिः संस्तूयमानः बद्धांजलिं ध्रुवं अभ्यवदत् उवाच ॥ १ ॥ उक्तमेवाह ॥ भो भो इति षड्भिः हे क्षत्रियदायाद क्षत्रियपुत्र

एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवम् ॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ ॥ ३५ ॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोध्यायः ॥ मैत्रेय उवाच ॥ एवं निवृत्तं प्रतिवुध्य
वैशसादपेतमन्युं भगवान् धनेश्वरः ॥ तत्रागतश्चारणयक्षकिंनरैः संस्तूयमानो ऽभ्यवद
त्कृतांजलिं ॥ १ ॥ धनद उवाच ॥ भो भो क्षत्रियदायाद परितुष्टोस्मि तेनघ ॥ यत्त्वं पितामहादेशाद्वैरं दुस्त्य
जमत्यजः ॥ २ ॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव ॥ काल एव हि भूतानां प्रभुरप्ययभावयोः ॥ ३ ॥

ध्रुवक्रोधत्यागनिमित्तं हर्षातिशयात् द्विरुक्तिः हे अनघ यत् वधनिमित्तपापरहित ते तुभ्यं परितुष्टोस्मि कुतः यत् यस्मात्पितामहस्य स्वायंभुवस्यो
पदेशात् अनुशासनात् दुस्त्यजमविवेकैः मन्युं अजः ॥ २ ॥ यक्तवानसि ॥ २ ॥ तदेवाह अनघः पुण्यजनहननकर्तृत्वनिमित्तपापसंबंधानर्हत्वमाह नेति ॥ भवान्य
क्षान्न हतवान् नापि यक्षास्त्वद्भ्रातरं हतवंतः कुतः हि यस्मात् भूतानामप्ययभावयोः मरणोत्पत्योः कालः कालशरीर ईश्वर एव प्रभुः कारणमित्य
॥ र्थः ॥ ३ ॥

ननुहंतत्वं न तत्युक्तं स्वैरमादिकं च मया पन्हेष्वा परोक्षमनुभूयमानमपुहस्ते स्वरणावकथंहंतेमुचतेतत्राह। अहंत्वमिति। पुरुषस्याज्ञानात् देहविलक्षण
स्य याथात्म्यज्ञानाभावात् अत देहः तस्य धावात् अस आनादिरिति पाठेप्ययमेवार्थः॥ अहंत्वमितिनेत्यध्याह्रियते सामर्थ्यात् देवादिदेहेषु संसारेषु जीवेषु
च अहंतात्वंहंतारसेवंरूप अतएवापार्थी अर्थप्रस्य। अहंत्वमितिप्रतीतोयोर्थो विषयः। प्रत्यग्रूपस्तद्रहिताहंतेतिप्रतीयोर्थो विषयः प्रत्यग्रूपस्तद्र
हिताहंतेतिप्रतीतोयोयोविषयस्तद्रहिता च अस्य याज्ञानविपरीतज्ञानरूपेतियावत्। बुद्धिः स्वाप्नीवस्वाप्नधीरिव आभाति। धर्म्मन्तरे धर्मान्तरप्रतीतिरस्य
थाज्ञानं यथापीतः शंख इति शुक्लोपि निम्बः प्रतीते धर्म्मतरस्य धर्मन्तरत्वेन प्रतीतिर्विपरीतज्ञानं यथा पेहं रजतमिति शुक्लत्वाश्रयस्य धर्मिणो रजतत्वाश्र
यत्वेन प्रतीते। हंताहमिति ज्ञानं तदुभयविधमपि अहमर्थस्य देहरूपधर्मिणोहमर्थात्मरूपधर्म्मान्तरत्वेन प्रतीतेर्विपरीतज्ञानरूपत्वं अहंयथायेदेहेच

अहंत्वमित्यपार्थाधीरज्ञानात्पुरुषस्य हि॥ स्वाप्नीवाभात्यतज्ज्ञानाद्यथा बंधविपर्ययो ॥४॥

हंतत्वादिरूपधर्मान्तरप्रतीते स्यात्मयाज्ञानरूपत्वं च॥ आभातिप्रतीयत इत्यर्थः। प्रतीतेः प्रमितिसाधारणं ज्ञानं आत्मनो हंतत्वादिकं भगवतागीतं
यएनं वेत्तिहंतारं यश्चैनं मन्यते हंतं। उभौ तौ न विजानीतो नायं हंति न हन्यते इति॥ यद्यप्यहंतुरात्मनो ज्ञानाद्धंतत्वादेः प्रतीतिमात्रं तथापि देहस्यतद्द्र
स्य वेत्तिचेत॥ मैवं देहस्यापि नित्यं जातमृतस्य तद्भावात्। न याचोक्तं अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं। तथापि त्वं महाबाहो नैनं शोचितुमर्हसी
ति नित्यं मृतमिति हेतुगर्भं नित्यं मृतत्वात् पुनस्मरणकर्तृत्वकर्मत्वप्रयुक्तशोको न कार्य इत्यर्थः। एवं च हन्तृकर्तृत्वकर्मत्वानाश्रययोर्देहात्म
नोरहंतत्वादिबुद्धिरस्य याज्ञानविपरीतज्ञानजनकानाद्यविद्यात्मकाज्ञानः कार्यत्वात्स्वाप्नबुद्धिरिव बाधितविषयेतिभावः॥ अज्ञानस्यानात्म

मात्मबुद्धिरूपविपरीतज्ञानजनकत्वमुक्तं ॥ अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः अविद्यातरुसंभूतं बीजमेतद्द्विधास्थितमिति ॥ अत्र स्वाप्नीवापार्थी
भातीमनेनदृष्टांतेनधियोबाधितविषयत्वं विवक्षितं विषयस्यापि बाधो नाम तत्र प्रवृत्तिबंध एव न तत्त्वमस्य स्वप्नदृष्टांतदार्ष्टांतिकयोरुभयोरपि
ज्ञानतद्विषयोः पारमार्थ्याततत्त्वयथा स्वाप्नानां गजतुरगादीनां न तत्त्वरथा न रथयोगा न पंथानो भवंतीति ॥ अथ रथान्रथयोगान्पथः सृजत इ
तिश्रुतेरीश्वरस्य स्वप्नानास्वप्नदृष्टैकानुभाव्यानां तत्कालमात्रावस्थायिनामपि नापरमार्थानामपि ते पुत्तलिकत्वे न गजतुरगाद्यर्थिनः प्रवृत्तिप्रतिबंधरूपो
बाध एवं देहे आत्मभ्रांतिनिमित्तकोपाधित्मया प्रवर्तितुमिष्टोः प्रवृत्तिप्रतिबंधरूपो बाधः ॥ आत्मनि देहे च अहंत्वादिनिमित्तशोकादौ प्रवृत्ति
प्रतिबंधरूपो बाधस्तु भयत्रानुगतोऽर्थः कोऽङ्गीकर्तव्य देहात्मबुद्धिः स्वाप्नधीवत्तात्त्विकसुखदुःखादिमात्रहेतुरपि तत्त्वतो न तु जन्ममरणादिरूप
संसृतिहेतुत्वेन महदनर्थकारि चेत्याह यथेति यथा अहंत्वमिति बुध्याबुधः जन्ममरणादिरूपः संसारस्तत्प्रयुक्तो विपर्ययः स्वाभाविकापहतपाप्म
त्वाकारविपरीतानपहतपाप्मत्वाद्याकारश्च भवतर इत्यर्थः अयं भावः यद्यप्युपरोक्षं तथापत्तेश्चानुभूयते अहंत्वादिकं तत्प्रयुक्तस्वेदश्रमादिकं
च तथापि देहात्मनोरुभयोरपि अहंता चेत्सम्यते हंतुं य एनं वेत्ति हंतारम् ॥ अथ चैनं नित्यजातमित्यादिप्रमाणैरहंत्वादिबुद्धेरज्ञानमूलत्वप्रतिपादना
त ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेत्यादिभिरीश्वरस्यैव कालप्राशीरकस्याहंत्वप्रतिपादनाच्च स्वेदश्रमादेश्च संहारकतयापीश्वर
एव कालाभिम्नवान् यो विभर्ति तस्मै भस्मात्मने नमः इत्युक्तिभ्यः मिहारककाविमवदुपपत्तेः न कोऽपि प्रमाणबाध इति ॥ ४ ॥ ॥ १० ॥ ॥

तत्तस्मात्कालशरीरकस्य भगवतस्तवोत्पत्तिमरणादिहेतुत्वात्तमेव भगवंतं सर्वाणि भूतानि पृथिव्यादीनि आत्मा जीवश्च विग्रहः शरीरं यस्य तमधोक्षजं स
र्वभूतात्मविग्रहमित्यनेनैव यत्तेष्वपि भगवदात्मकत्वबुद्धिः कार्येति विवक्षितं भजस्वेत्युत्तरेणान्वयः ॥ अभवाय मुक्तये हे ध्रुव ते तुभ्यं भद्रं मंगलमस्तु गु
णगुहात्मनीतिशेषः भजनप्रकारमाह ॥ सर्वभूतात्मभावेन विरहितेच्छरीरकत्वेन प्रकारेण अधोक्षजं अधः कृताः पराहृताः अक्षजा इंद्रियव्रतयो
यस्मात्तं इंद्रियागोचरमित्यर्थः ननु अधोक्षजश्चेत्कथं भजनीयस्तत्राह ॥ भजनीयौ अंघ्री चरणौ यस्य तम् ॥ अतींद्रियत्वेपि योगयुग्मनसा ध्येयचर
णमित्यर्थः ननु स्मदादिवत्तस्यापि संसारित्वात्कथं ममभवाय भजस्वेत्युक्तं तेन तत्राह ॥ भवच्छिदं भवं संसारं छिनत्तीति तम् ॥ न केवलं स्वयमसंसा

तत्त्वाहं ध्रुव भद्रं ते भगवंतमधोक्षजम् । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम् ॥ ५ ॥
भजस्व भजनीयांघ्रिमभवाय भवच्छिदं । युक्तं विरहितं शक्त्या गुणमय्यात्ममायया ॥ ६ ॥

रीत्येव अपि तु भजतामपि भवच्छिदमित्यर्थः ॥ ननु प्रकृतिसंबंधतत्कार्यादिकमेव हि संसारः एवं च जीववत्सर्वभूतात्मविग्रहमिति प्रकृतिसंबंधाभिधा
नात्कथं तस्य भवच्छित्त्वं तत्राह सत्वादिगुणमय्या शक्त्या कार्योपयुक्तया अपृथक्सिद्धविशेषणभूतया आत्मनः स्वस्य संबंधिन्या मायया प्रकृत्या यु
क्तनियंतृत्वेन युक्तं न या विशेषेण रहितं नाद्धीमेन तया विरहितमित्यर्थः ॥ जीवो मायापरवशः इति संसारी परमेश्वरस्तु तस्याः प्रभुरित्यसंसा
रीतिभावः ॥ ५ ॥ ६ ॥

एवं परमपुरुषार्थलक्षणमोक्षसाधनत्वेन प्रकृतिपुरुषशरीरकस्यानन्तेश्वरस्य भगवतो भक्तिं विंदेहीत्युपदिश्य तन्मनः परिशीलनाय त्रिवर्गेनं प्रलो
भयति ःवृणीहीति। हे औत्तानपादे त्वं पद्यनाभो नेम नीषितं तं कामं वरं अविशंकितः असंकोचेन वृणीहि वरय धर्मादीनां त्रयाणां मध्ये यं त्वं वेक्षितं त
द्वृणीहीत्यर्थः। त्रिवर्गवरणं नवानुचितमिति यं जयनव्विशनषि॥ अंग हे ध्रुव परं केवलं परे ब्रह्मादिभिरप्यर्थ्यमानं ते दृत्सहौ अंबुजनाभस्य भगवतः पा
दौ तयोरनंतरं अव्यवहितं चिंत्वामिमित्यर्थः तां शुश्रुम॥७॥ एवं त्रिवर्गैः प्रलोभितो महाभागवतो ध्रुवस्त्रिवर्गमनादृत्य भगवच्चरणारविंदभक्तिं हार्दमेवा
वृणीदित्याह मुनि। स इति। राजराजेन कुबेरेण वरं वरणाय चोदितः प्रवर्तितः। स ध्रुवः महाभागवतः भागवतश्रेष्ठः महामतिः धर्मादिषु लास्थिम

वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदे विशंकितः॥ वरं वराहीं बुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम
७॥ मैत्रेय उवाच॥ स राजराजेन वराय चोदितः ध्रुवो महाभागवतो महामतिः॥ हरौ स वव्रेऽचलितां स्मृतिं यया तरत्य
यत्नेन दुरत्ययं तमः॥८॥ तस्य प्रीतेन मनसा तां दत्वैडविडस्ततः॥ पश्यतोंतर्दधे सोपि स्वपुरं प्रत्यपद्यत॥९॥

तिः हेतुगर्भमिदं विशेषणद्वयं भागवतानां त्रिवर्गस्यानिरयप्रायत्वादिविभावः॥ हरौ भगवति अचलितां दृढां स्मृतिं वव्रे स वराय चोदित इत्यनुवा
दरूपं दृष्टव्यम्। वाक्यं अनः स वव्र इति न चोदस्यापोनरुक्त्यं हृदयाया॥ स्मृतेः फलमाह॥ यतः अचलितायाः स्मृतेः दुरत्ययं दुरतिक्रमणीयमपि त
मः तमः॥ कार्यं संसारात्मकं वं धं नरतित्यपोहति॥८॥ ऐलविलः कुबेरः प्रीतेन मनसा तुष्टेन मनसा तां भवत्स्वचलितां स्मृतिं दत्त्वा तस्य ध्रुवस्य पश्य
तः सतः अंतर्दधे अंतर्हितवान्। सोपि ध्रुवोपि स्वपुरं प्रत्यपद्यत अगात्॥९॥ अथानंतरं॥ मखरिहविक्षिणैः समग्रदक्षिणैः क्रव्यपुरोडाशादिक्रियाकरवि

व्यापारः देवता इंद्रादिस्तेषां संबंधमात्रे षष्ठी द्रव्यादिसंबंधिभिः द्रव्यादिसमवायहेतुभिरिति यावत् क्रतुभिः कर्मसाध्यं आराध्यमिति यावत् न केवलं कर्मैव अपि तु कर्मणां फलप्रदं यज्ञानां ईशं प्रयोजयितारं चायजत यष्टवान् काम्यकर्मफलप्रदमिति पाठे विहितप्रतिषिद्धयोः फलमित्यर्थः ॥१०॥ न केवलं यज्ञैरेवायजत अपि तु महाद्युपदेशानुसारेण सर्वात्मकत्वेन भगवंतमभजत चेत्याह सर्वेषामात्मनि अंतःप्रविश्य प्रशासनेन धारके अत एव सर्वे सर्वशब्दवाच्ये । सत्व इति पाठे स्तुतः सत्वं अपरिच्छिन्नं सद्विग्रहविशिष्ट इत्यर्थः ॥ असत इति हेतुः सत्वादिगुणरहित इत्यर्थः ॥ अच्युते आश्रितत्रातरि ऐकांती स्वे भगवति तीव्रौघां अविच्छिन्नप्रसरां भक्तिमुद्वहन् कुर्वन् आत्मनि स्वस्मिन् सर्वेषु भूतेषु चावस्थितमात्मत्वेनावस्थितं भगवंतं तमेवाच्युतं ददर्श

अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः ॥ द्रव्यक्रियादेवतानां कर्मकर्मफलप्रदम् ॥१०॥ सर्वात्मन्यच्युतेसर्वे तीव्रौघां भक्तिमुद्वहन् ॥ ददर्शात्मनि भूतेषु तमेवावस्थितं विभुं ॥११॥ तमेवशीलसंपन्नं ब्रह्मण्यं दीनवत्सलं । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥१२॥ षड्विंशाद्वर्षसाहस्रं शशास क्षितिमंडलम् । भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥१३॥

ईशसाक्षात्कृतवान् ॥११॥ प्रजाः शीलसंपन्नं सुस्वभावं सद्वृत्तादियुक्तं ब्रह्मण्यं ब्राह्मणमेवापरायणं दीनेषु वत्सलं दोषानपेक्षया रक्षयारक्षं धर्ममर्यादानां पालकं तमेव ध्रुवमेव पितरं मेनिरे पितरमिवामन्यंतेत्यर्थः ॥१२॥ भोगैः सुखानुभवैः पुण्यक्षयं अभोगैर्दुःखानुभावैरशुभक्षयं पापक्षयं च कुर्वन् पुण्यपापयोरुभयोरपि स्वफलजननद्वारा ब्रह्मप्राप्तिविरोधित्वेन अनुभवेनैव पुण्यपापे विधुन्वन्नित्यर्थः षड्विंशाद्वर्षसाहस्रं वर्षाणां सहस्राणि एव साहस्राणि ततः समाहारद्विगुः षडधिकविंशतिसहस्रसंख्याकं वर्षपर्यंतमित्यर्थः क्षितिमंडलं शशास अनुशिष्टवान् ॥१३॥

वहुसवत्सरवः सवाः संवत्सरा यस्मिन् तं त्रिवर्गोपयिकं त्रिवर्गसाधनं कालं अविकलेंद्रियः । अव्याहतेंद्रियः तथापि महात्मा जितेंद्रियो नीतापुत्राय
नृपासनमहान् ॥१४॥ ततइदं देहं मनुष्याद्यात्मकं विश्वं आत्मनि जीवे मायारचितं प्रकृतिसंसर्गकृतं तदपि अविद्याशब्दवाच्यमुत्सत्याप्रकृतिवाचीप्रकृ
तिपरिणाममतः स्वप्नगंधर्वनगरोपमं स्वाप्नगंधर्वनगरमिवस्थितं मन्यमानः ॥१५॥ तथा आत्मा देहः स्त्रियो दाराः अपत्यानि पुत्रादयः सुहृदः स्वजना
न ऋद्धः संपत्तिराज्यश्रियविलं चतुरंगवलयुक्तं सैन्यं कोशं धनं रमणीयाः परिविहारभुवः परितो विहारभुवः प्रतिविहारः भुवइत्यपिपाठेप्यय
मेवार्थः ॥ जलधिमेखलां यस्मात तज्जंबूद्वीपात्मकं भूमंडलं च सर्वं कालोपसृष्टं कालेनोपद्रुतं अस्थिरमिति यावत् आकलय्य विचार्य सः

एवं बहुसवं कालं महात्मा विचलेंद्रियः ॥ त्रिवर्गोपयिकं नीत्वा पुत्रायाधान्नृपासनम् ॥१४॥ मन्यमानइदं विश्वं माया
रचितमात्मनि ॥ अविद्यारचितस्वप्नगंधर्वनगरोपमम् ॥१५॥ आत्मापत्यसुहृद्बलमृद्धकोशमंतःपुरंपरिवि
हारभुवश्चरम्याः ॥ भूमंडलंजलधिमेखलमाकलय्यकालोपसृष्टमिति संप्रययौ विशालां ॥१६॥ तस्यां विशुद्धकर २
णःशिववार्विगाह्य बद्ध्वासनं जितमरुन्मनसाहृताक्षः । स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो न्यसृजत्समाधौ

धुवविशालां बदरिकाश्रमं ययौ । १६ । तत्र कृतमष्टांगयोगमाह । तस्यामिति । तस्यां विशालायां शिवं वा निर्मलं पवित्रं च वारि विगाह्य प्रविश्य अ
नेन स्नानादि नियम उक्तः विशुद्धकरणः विशुद्धेंद्रियः अनेन प्राग् यमादयो यमा उक्ताः बद्धानि आसनानि स्वस्तिकादीनि येन सः ॥ जितो मरु
त्प्राणो येन सः मनसा आहृतानि प्रत्याहृतानि अक्षाणि श्रोत्रादीनीन्द्रियाणि येन एवमासनादीनि स्फुटमेवोक्तानि स्थूले भगवत्प्रतिरूपे भग
वद्दिव्यविग्रहे दिव्यात्मस्वरूपापेक्षया स्थौल्यमत्र विवक्षितं दधार मनो निवेशितवान् एवं धारणा उक्ता ध्यानं भगवत्प्रतिरूपमव्यवहित । विजा

तीयप्रत्ययांतररहितः ॥ आयततरिवात्मस्वरूपं ईतत्मदिति निर्देशो ब्रह्मणस्त्रिविधः ॥ स्मरतइति स्मरणान समाधौ व्यसृजत् अनुसंहितवान् तद्भगवत्प्रतिरूपं
व्यसृजत् ॥ विसृष्टवान् ॥ दिव्यविग्रहं विसृज्य दिव्यात्मस्वरूपमनुपसंहितवानित्यर्थः ॥ शुभाश्रये मनसो निवेशमात्रं धारणा शुभाश्रयगतकांतिसौ
कुमार्यादिगुणचिंतनं ध्यानम् ॥ तज्जनितानंदातिशयात्मास्वरूपं समाधिरितिभेदः ॥ १७ ॥ एवमजस्त्रं नितं भगवति प्रकर्षेण भक्तिं वहन् कुर्वन् अ
सौ ध्रुवः ॥ आत्मानं न सस्मार मनुष्यत्वादिबाह्याकारविशिष्टत्वेन न स्मृतवान् यतो मुक्तिलिंगः सक्तदेहात्माभिमानः तत्र हेतवः आनंदवाष्पकल

भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदवाष्पकलया मुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयः पुलकाचि
तांगो नात्मानमस्मरदसाविति मुक्तलिंगः ॥ १८ ॥ स ददर्श विमानाग्र्यं नभसोवतरद्ध्रुवः ॥ विभ्राजय
द्दशदिशो राकापतिमिवोदितम् ॥ १९ ॥ तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजे
क्षणौ ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ ॥ २० ॥ ❀ ❀

याबिंदुप्रवाहेणाभिभूयमानः विक्लिद्यमान द्रव हृदय यस्य सः पुलकैर्व्याप्तांगः ॥ १८ ॥ स ध्रुवः उद्यंतं उदितं राकापतिमिव पौर्णिमा चंद्र
मिव दशदिशः विभ्राजयन् नभसः अवतरत् अवरोहत् विमानश्रेष्ठं ददर्श ॥ १९ ॥ अनु अनंतरं तत्र विमानाग्रे देवप्रवरौ ददर्शेत्यनु
षंगः तौ विशिनष्टि किशोरौ यौवनारंभजुषौ गदामवष्टभ्य स्थितौ किरीटादिभिः सहितेचारुकुंडले ययो ॥ २० ॥

उत्तमगीयः पुण्यश्लोको भगवान् तस्य किंकरौ विज्ञाय मधुद्विषः पारिषत्प्रधानाविति हेतोः ॥ साध्वसेन संभ्रमेण विस्मृतपूजाक्रमः केवलं तस्य नामानि गृ
णन् संहृतांजलिर्बद्धांजलिर्ननाम ॥ २१ ॥ कृष्णस्य पादयोर्निविष्टं चेतना चित्तं यस्य प्रश्रयेण विनयेन नम्रा प्रह्वीभूता कंधरा यस्य तं ध्रुवमुपसृ
त्य समीपमागत्य पुष्करनाभस्य पद्मनाभस्य भगवतः संमतौ भृत्यौ सुनंदनंदौ सस्मितं स्मितेन सहितं यथा तथा प्रीत्या प्रीतिपूर्वमूचतुः ॥ २२ ॥ हे राज
न् ते तुभ्यं भद्रमस्तु नोऽस्माकं वाचमवहितः सावधानचित्तस्त्वं शृणु किं तत्राह यो भवान् पंचवर्षः तपसा देवं भगवंतमतीतृपत् तर्पितवान् ॥ २३ ॥

विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः ॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानावि
ति संहतांजलिः ॥ २१ ॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपसृत्य सस्मि
तं प्रत्यूचतुः पुष्करनाभसंमतौ ॥ २२ ॥ सुनंदनंदावूचतुः ॥ भो भो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु ॥ यः पंचव
र्षस्तपसा भवान्देवमतीतृपत् ॥ २३ ॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः ॥ पार्षदाविह संप्राप्तौ नेतुं
त्वां भगवत्पदम् ॥ २४ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परं ॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रह

तस्याखिलजगन्निर्मातुश्चतुरस्य सर्वेश्वरेश्वरस्य शार्ङ्गिणो भगवतः पार्षदावावां भगवत्पदं प्रति नेतुमिह संप्राप्तौ ॥ २४ ॥ सुदुर्जयं त्वदितर
रैर्दुःखेनाप्यसाध्यं विष्णुपदं त्वया जितमाश्रितं सुदुर्जयं त्वमेवाह ॥ सूरयः सर्वेषामुपरि शादवस्थिताः सप्तर्षिप्रभृतयः ॥ यत्पदमप्राप्यैव प
रं केवलं विचक्षते पश्यंति तत् याय यत्पदं चंद्रादयः सोमप्रभृतिग्रहाद्यृक्षप्रदक्षिणं यथा भवति एवं परियंति परितो भ्रमंति ॥ २५ ॥

नैतत्पितृभिर्मन्वादिभिः तथान्यैरपि अंग हे ध्रुव कदाचिदप्यनास्थितम् ॥ अनधिष्ठितमतस्तद्वजगतां वंद्यं विष्णोः संबंधि परमं सर्वोत्कृष्टं तत्त्वयाजि
तं पदं स्थानमातिष्ठ अधितिष्ठ ॥ २६ ॥ हे आयुष्मन् उत्तमश्लोकमौलिना उत्तमश्लोकमुख्येन भगवता एतद्विमानश्रेष्ठं उपस्थापितं प्रेषितं एतद्विमा ॥ त २ ॥
नाग्रं अधिरोढुं त्वमर्हसि ॥ अत्रायुष्मन्निति संबोधनं शरीरयात्राभिप्रायकं ॥ अत्र वैकुंठपरमपदविष्णुपदादिशब्दा भगवत्स्थानसाम्यात्त
रमध्ये श्रीविष्णुविमानविषये ध्रुवलोके प्रयुज्यंते ॥ तत्रापि हि भक्त्यानुजिघृक्षया भगवान् सर्वदा संनिहितः भक्त्यानुग्रहाद्देवपार्षदविमा

अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित् ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदम् ॥ २६ ॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना
उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥ २७ ॥ मैत्रेय उवाच ॥ निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतां वाचमुरुक्रमप्रियः ॥
कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशिषमभ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च । इयेष तदधि-
ष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥ २९ ॥ तदा दुंदुभयो नेदुर्मृदंगपणवादयः । गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३० ॥ स च स्व-
र्लोकमारुक्षन् सुनीतिं जननीं ध्रुवः । अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम् ॥ ३१ ॥ छ छ छ ॥

नादिश्रेष्ठमनुपपन्नं ॥ २७ ॥ वैकुंठनियोज्यमुख्ययोर्भगवत्पार्षदप्रवरयोः मधुच्युतां अमृतस्राविणीं वाचं निशम्य भगवत्प्रियो ध्रुवः कृतमं
गलस्नानः कृतं नित्यकर्म मंगलकरणं च येन सः मुनीन्प्रणिपत्याशिषमभ्यवादयत् वाचयामास ॥ २८ ॥ विमानं श्रेष्ठं परीत्य परिक्रम्य तदेव
रूपं पुनर्हिरण्मयं ज्योतिर्मयं बिभ्रत् सन् तद्विमानाग्रमधिष्ठातुमियेष ऐच्छत् ॥ २९ ॥ पेतुः पतितवत्सः स च ध्रुवः स्वर्लोकं आरोक्ष्यन् दीनां मातरं
हित्वा अंग दुर्गं त्रिविष्टपं यास्ये इत्येवं जननीमन्वस्मरत् ॥ ३० ॥

कन्यया जरया ग्रस्तमात्मानं शरीरं अरिभिर्विषयादिभिर्दूषितान् पांचालान् विषयांश्च वीक्ष्य दृष्ट्वा अपारचिंतामापन्नः तस्य पुरादिविप्रीणं
तारेः प्रतिक्रियां प्रतिकारं परिहारोपायं न लेभे ॥८॥ कालकन्यया हेतभूतया यातयामान् निःसारानपि कामानभिलषन् दीनः कृप
णः विगता आत्मनो गतिः पारलौकिकः ऐहिकः पुत्रादिस्नेह श्रेयस्य । पुत्रदारान् इंद्रियपरिणामबुद्धीः लीलयानुपलंहयन् ॥९॥ गंधर्वै
रहोरात्ररूपैर्यवनैर् राध्यादिभिश्चाक्रांताम् । कालकन्यया अवमर्दितां पीडितां पुरीमकामतः अनिच्छयापि राजा पुरंजनो हातुं त्यक्तुं प्र

आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् । दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियाम् ॥८॥ कामान
भिलषन् दीनो यातयामांश्च कन्यया । विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥९॥ गंध
र्वयवनाक्रांतां कालकन्योपमर्दितां । हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥१०॥ भय
नाम्नोग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः । ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥११॥
तस्यां संदह्यमानायां सपौरः सपरिच्छदः । कौटुंबिकः कुटुंबिन्या उपतप्यत सान्वयः ॥१२॥

चक्रमे उपक्रांतवान् ॥१०॥ भयनाम्नो योग्रजो भ्राता प्रज्वारः स उपस्थितः पुरंजनपुरीमधिष्ठितः भ्रातुर्भयनाम्नः प्रियं कर्तुमिच्छया
कृत्स्नां तां पुरीं ददाह ॥ प्रज्वाराख्यो वैष्णवज्वरः शरीरं प्रविश्य भस्मं तेजयत्सर्थः ॥११॥ तस्यां पुर्यां नितरां प्रज्वारेण तप्यमानायां भार्यासहितः
भृत्यवर्गसहितश्च कुटुंबेन सह दीयतीति कौटुंबिकः कुटुंबिन्या सह महिष्या सह सान्वयः पुत्रादिसहितः उपतप्यत ॥१२॥

भा॰ च॰

॥१७९॥

कालकन्यया पुर्यां ग्रस्तायां सत्यां यवनैरुपरुद्धायतनः नाम यस्य स पुरपालः प्रजागरः प्रज्वारेण संसृष्टः अन्वतप्यत पुरपालः प्राणः
१३ ॥ पुरुकृच्छ्रं दुःखं वेपथुर्यस्य पुरिरिति पाठे पुर्यामुषितुमवस्थातुं न शशाक नाशक्नोत् किंतु ततः पुर्यां अग्निसहिताद्वृक्षको
टरादिव गंतुमैच्छत् ॥१४॥ यदा गंधर्वैः शिथिला अवयवा यस्य ॥ हृतं पौरुषं सामर्थ्यं यस्य ॥ तदायं हे राजन्यवनैः शत्रुभिः रुपरुद्धः रु
रोध व्याधादिभिर्निरुद्धमार्गः घर्घरध्वनिं चकारेत्यर्थः ॥१५॥ दुहित्राहीन् दध्यौ ध्यानवानित्युत्तरेणान्वयः दुहितॄरिति देहानुबंधिचिं

यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया ॥ पुर्यां प्रज्वारसंसृष्टः पुरपालोन्वतप्यत ॥१३॥ न शे
के सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ॥ गंतुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥१४॥ शि
थिलावयवो यर्हि गंधर्वैर्हृतपौरुषः ॥ यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥१५॥ दुहितॄः
पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ सत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदम् ॥१६॥ ॥त॥
अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही ॥ दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥१७॥

तामिश्रायर्कं ॥ जामयः पौत्रस्नुषाः ताश्च जामातारः दुहितॄणां पतयः पार्षदाः भृत्याश्चेति द्वंद्वः तान् सत्वमात्रेणावशिष्टं भोगस्तु प्राग
वक्षीणः यत्किंचिद्गृहादिरूपं वस्तु ॥१६॥ तच्चाहंममाभिमानविषयं कृत्वा गृहेषु कुमतिः कुत्सिता मतिर्यस्य आसक्तबुद्धिर्गृही पुरंज
प्रमदया सह विप्रयोगे विश्लेषे उपस्थिते प्रतीते सति दध्यौ बुध्यात्मिकां प्रमदां विहाय गमिष्यामि उत सहैवेति चिंतामकरोदित्यर्थः

॥ ९ ॥

॥१७९॥

आनमेवाह। मयिलोकांतरंगतवतिमतिइयमनाथाकुटुंविनीवालकांस्त्वमनुशोचंती कथंवर्तिष्यते मय्यनाशितेऽभोजितेनभुंक्तेएवंमुत्तर
त्रापिभर्त्सितेमर्त्सनेकृतेभयाधृतवाकनियतावाग्यस्याःसामौनंविभर्तीत्यर्थः॥१८॥अविज्ञविवेकिनंमांप्रवोधयतिविवेचयति
वुधितेप्रांतरंगतेप्रोकेनकर्षितागृहमेधीयंकर्मगृहस्थधर्मंकिंनेष्यत्यनुवर्तिष्यति॥युक्तमेतद्यतोवीरसूःपुत्रवती॥किंवामद्वि
रहमसहमानामरिष्यति॥१९॥दारकाःपुत्राःदारिकाद्दुहितरश्च अपरायणाःनविद्यतेपरमयनमाश्रयोयेषांतेऽपरायणाः
मयिगतेसतिकथंनुवर्तिष्यंतेभिन्नानौर्येषांतेपुरुषाःउदधौसमुद्रेइवेति॥अत्रलोकांतरंगतवतीत्यनेनसर्वेंद्रियपरिणाम

लोकांतरंगतवतिमय्यनाथाकुटुंविनी॥वर्तिष्यतेकथंत्वेकावालकाननुशोचती॥१८॥
नमय्यनाशितेभुंक्तेनास्नातेस्नातिमत्परा॥मयिरुष्टेतुसंत्रस्ताभर्त्सितेयतवाग्भयात्॥१९॥
प्रवोधयतिमाविज्ञंव्युषितेशोककर्शिता॥वर्त्मैतद्गृहमेधीयंवीरसूरपिनेष्यति॥२०॥

हेतुभूताजीवेकायतावुद्धिर्लोकांतरंगच्छताजीवेनसहगच्छतीत्युक्तनेत्याशंकोत्यापितावत्स्यैतद्गृहमेधीयमित्यर्द्धेनसहैव
गच्छतीत्युक्तंतथाकथंदारकाइत्यनेनपरिणामपरिणामिनतुद्धिव्रतिकरणानिइंद्रियाण्यपिकिंसहैवगच्छंतिउतनेति
संशय्यसहैवगच्छंतीत्युक्तंभवति॥एतदेवकथासौहृदयायपरोक्षमभिधीयते॥तथाचगीतंभगवता॥मनःषष्ठानींद्रियाणि
प्रकृतिस्थानिकर्षति॥शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः।गृहीत्वैतानिसंयातिवायुर्गंधानिवाशयादितिवुद्धेर्मनोवृत्तिविशे

षमात्रवर्तेनमनसःसहगमनकथनेनवुद्धेरपि
गीतंभवतिइतिगम्यते॥२०॥

एवंभूपमवाचुद्यामोचेतन्मनदृहृणिंशोकानहंवस्तुतः अपहतपाप्मत्वादिगुणांकदिपिहतत्वात्एवंपुरंजनंगृहीतुंपुमविश्लेषयितुंकृतधीनिश्चितवु
द्धिर्मयतामास्तु:प्राप्त:॥ २१ ॥ यथात्वंकंखकीयकर्मानुगुणंस्थानंप्रतिवचनैःपणुवध्यीयमानःतदाऽनुप्रथाःप्राणाइंद्रियाणिचशोचतः
यवनैःपीडितास्तनएवातुराःशोचंतोन्वद्रवन्ननुसृतमगतवंतःतथाचश्रुतिःतमुत्क्रामंतंप्राणोनुत्क्रामतिप्राणमनुत्क्रामंतंसर्वेप्राणा
अनुत्क्रामंतीति प्राणोज्येष्ठःप्राणःसर्वेप्राणाइंद्रियाणीत्यर्थः॥ २२ ॥ यवनेरूपरुद्धःपुरीस्थूलशरीरंतुविहायेवगतःभुजंगवद्दयमा

~~नैकांतरंगतवतिसपद्मनायाकुटुंबिनी॥ वर्तिष्यतेकथंतेकालकानानुशोचती॥ २१ ॥ लो~~
~~कान्नाभिनेपुत्रेनास्मानेत्याश्रितमसदा॥ मयिदृष्टेतुसंतेनायन्शीतेवत्सवामयात्॥ २२ ॥~~
~~कर्थघ्यातिमाविर्नेष्णुपितेमांकवर्शिना॥ वर्धैवल्कद्रमेधीर्यंवीरसरपिवेप्याति॥ २३ ॥~~ क
थंनुदारकादीनाशरिआवापरायणाः॥ वर्तिष्यंतेमयिगतेभिन्ननावइवोदधौ॥ २४ ॥

नेदृत्तकोरंविहाययथाभुजंगमोगच्छतितद्वदित्यर्थः यदागतस्तदातमेवतन्मनानंतरमेवपुरीविशीर्णाशिथिलासतीप्रकृतिंमहा
भूतांगताप्राप्तवती॥ कथापक्षेतुद्वारापन्नाद्दयःसर्वेपुरंजनविश्लेषमसहमानास्तेनैवसहविनष्टा अभूवन्पुरीचविनष्टाऽभूदित्य
र्थः॥ २३ ॥ वलीयसापवनेनप्रसभंपुरःपुर्याःविकृष्यमाणःतमोऽज्ञानंमाविष्टःस्वस्वायंस्वेनसहवर्तमानंसहदृत्तिर्हिसखुर्दर्भः
सुहृदंविपुलापराधत्वेपिकिंचिदानुकूल्येनारिरक्षावुद्धिमंतंपरमात्मानंनाविदन्नसस्मार॥ २५ ॥ ॥ ॥ ॥

अदयालुनाहृदयारहितेनानेन येकर्मेंद्रियव्यापाररूपेयज्ञेयेपशवः संज्ञप्ताहिंसिताः मेपशवः ॥ आत्मवैशसं स्वविषयेहतं द्रोहं स्मरंतः अतएव क्रुधाः कुठारसदृशैः शृंगैरेनं छिंदंति ॥ २५ ॥ अनंतपारे ऽपारे तमसि नरके मग्नः अतएव गतविवेकः शाश्वतीः समाः संवत्सराः कालाध्वनोरत्यंतसंयोग इति द्वितीया ॥ आर्त्तिं दुःखमनुभूय प्रमदासंगदूषितः प्रमदासंगेन दूषितचित्त इत्यर्थः प्रमदात्र देहानुबंधिनी भार्यापि विवक्षिता नबुद्धिरूपा बुद्धिसंगस्य संसारमनुवर्त्तमानत्वेन सर्वेषां सर्वदा स्त्रीजन्मापत्तेः ॥ २६ ॥ तां भार्यामेव मनसास्मरन्नंतकाले स्मरन्ननंतरं राजसिंहस्य विदर्भस्य वेश्मनि प्रमदोत्तमा बभूवेत्यन्वयः एवं तिर्यगादिरूपेण संसरतो जीव

विक्रुष्यमाणः प्रसभं यवनेन बलीयसा ॥ नाविंदत्तमसाविष्टः सखायं सुहृदं पुरः ॥ २४ ॥ तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना ॥ कुठारैश्छिंदंति क्रुद्धाः स्मरंतोऽमीवमस्य तत् ॥ २६ ॥ अनंतपारे तमसि मग्नो नष्टस्मृतिः ॥ समाः शाश्वतीरनुभूयार्त्तिं प्रमदासंगदूषितः ॥ २७ ॥

स्यादृष्टविशेषपरिपाकवशान्मनुष्यजन्मप्राप्तस्य तत्रापि जाग्रत्स्वप्नसुषुप्त्यवस्थासु दोषाननुकीर्त्य पुनर्दैवात्कदाचित्संजातविवेकस्यापि प्रबलकर्मरूपप्रतिबंधवशादजस्तमःप्रचुरबुद्धिपारवश्येन देहे देहानुबंधिविषया अहंममाभिमानग्रस्तस्य जरामरणाद्यवस्थासु दोषानभिधायेदानीं देहानुबंधिप्रमदास्मरणनिमित्तस्त्रीजन्मप्राप्तिं तत्रापि प्राक्तनकदाचित्कयादृच्छिकपुण्यवशात्सुकुलप्रसूतिं ततो महाभागवतभर्तृसंबंधं तत्सेवाप्रकारं ततस्तेन तु एतस्य भगवतः प्रसादाज्ज्ञानोदयं चाह ॥ तत्र कथापद्धतेर्विदर्भादिपदानां श्रोत्रगणवार्थः आध्यात्मपक्षे तु विदर्भस्य विशिष्टदर्भोपलक्षितं कर्म यस्य तस्य राजंते सत्कर्मानुष्ठानेनेति राजानः क

तामेव मनसा गृह्णन्बभूव प्रमदोत्तमा अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि २८ उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः युधि निर्जित्य राजन्यान्पाण्ड्यः परपुरंजयः २९। ७

मीनुष्ठानपरः तेषामभ्यासिंहस्य वेश्मनि गृहे प्रमदा बभूव पुरंजनः कर्मविशेषेण विशिष्टकुले स्त्रीत्वं प्राप्त इत्यर्थः ॥२७॥ तां वैदर्भी विदर्भस्य दुहितरं वीर्यं भगवद्भक्तियोगानुष्ठानसामर्थ्यमेव पणः शुल्कं बंधनं यस्यास्तां भागवतमेव वृणवानीत्येवं संकल्पवतीं मलयध्वजः मलयापर्वतोपलक्षितदक्षिणदेशः तत्र ध्वजइव दर्शनीयः सहि विष्णुभक्तिप्रधानो देशः तत्र मुख्यो भागवत इत्यर्थः तथा पांड्यः पांडा बुद्धिनिश्चयात्मिका तां महतीति पांडाः परस्य आत्मनः पुरं पुरवासः स्थानं शरीरं ॥ अयं यदिदमस्मिन्ब्रह्मपुरं इति श्रुतेः तज्जयतीति पुरंजयः देहगुणाद्यजिनइत्यर्थः युधि इंद्रियजयरूपे युद्धे राजन्यान् जितेंद्रिया न्निर्जित्य जितेंद्रियश्रेष्ठोभूदित्यर्थः ॥ उपयेमे ॥ यद्यप्यत्र राज्ञो जाता वैवेति वा चेदिति ज्ञातोनियमितो यं यत्नमयः तदंतो राजन्यशब्दः क्षत्रियजातीयवचनस्तथाप्यत्र गौणी वृत्त्या जितेंद्रियपरः क्षत्रियजातीयो हि

तस्यां स जनयांचक्र आत्मजामसितेक्षणाम् ॥ यवीयसः सप्त सुतान्सप्त द्रविडभूभृतः ॥२८॥ ए
कैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् ॥ भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परम् ॥२९॥ ॥

जयेन राजन इति नियगुणयोगाज्जितेंद्रिये तस्य वृत्तेः संभवात् ॥२८॥ समलयध्वजस्तस्यां वैदर्भ्यामसितेक्षणे श्रीकृष्णे ईक्षणं दृष्टिर्यया तां श्रीकृष्णसेवारुचिरूपामात्मजां संजनयांचक्रे ॥ वैदर्भी भागवतसंगेनकृचिरभूदित्यर्थः तथा यवीयसः आत्मजाया ॥ अनुजातान्सप्तसुतान् श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनमर्चनं वंदनं दास्यमित्येवंरूपान् ॥ सख्यात्मनिवेदनियोस्तु भगवदनयापितत्वेछेत्तैकानुसंधानरूपयोर्भगवतैव उत्तरत्रोयस्समाणयोरिदानीमनुत्पत्तेः ॥ सप्तैवेत्युक्तं भगवद्धर्मरूपातच्छ्रवणकीर्तनादिकं जातमित्यर्थः द्रविडभूमिपालकान् द्रविडभूमिर्हि श्रवणादिभिरेव सुरक्षिता स्तीति प्रसिद्ध ॥२९॥

भा०प्र०
६

त्यसमाधत्ते। तेजोवारिमृदां यतो विनिमय इति विनिमयः परस्परं मिश्रीकरणं। तेजोवारिमृदां तेजोवन्नानां विनिमयः। यतो ब्रह्मणः चतुर्मु
खादेरित्यर्थः। अयं भावः। तावत्त्रिवृत्करणं ह्यंडस्यार्थं॥ नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना॥ नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य
कृत्स्नशः॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यंडमुत्पादयंति ते इत्यादिभिर्वैष्णववाक्यैस्तस्यावगमात्। अंडे
उत्पन्ने तत्र चतुर्मुखोत्पत्तिः। तदंडमभवद्धैमं। तस्मिन् जज्ञे स्वयं ब्रह्मेति स्मरणात्। एवं चांडोत्पत्तेः प्राक् त्रिवृत्करणं परमात्मकर्तृकमेवे
ति। तत्कर्तृकं कर्तृकं नामरूपव्याकरणमपि परमात्मकर्तृकमेवेति तस्यैव जगत्कारणत्वं न तु जीवप्रधानयोरिति। तर्हि यद्यपरो हितमि
स्यादित्रिवृत्करणोपदेशश्रुतिविरोध इति चेन्नैवं। तत्रत्यछांदोग्यतर्कलिङ्ग्यादिषु न त्रिवृत्करणप्रदर्शनं। किंतु श्वेतकेतोः शुश्रूषोरंडां
तर्वर्तित्वेन तस्य बहिःस्थवस्तुषु त्रिवृत्करणप्रदर्शनायोगात् त्रिरूपाणां भिन्नानां कार्यभूते अग्न्यादिषु त्रिवृत्कृतभूतकार्यत्वप्रदर्शनाया
ग्न्यादीनां भूतत्रयात्मकत्वमात्रमुपदिश्यते॥ यद्येतिपाठे यथाविनिमयः॥ यत इति शेषः स्मादनुषंगः। नन्वेवमपि न ब्रह्मोपादानकारणं
तद्धि अथपरा यया तदक्षरमधिगम्यते॥ निष्क्रियं निष्कलं शांतं निरवद्यं निरंजनमित्यादिभिर्निर्विकारमवगतं॥ उपादानकारणत्वं च भा
व्यवस्थाविशेषवतः प्रागवस्थायोगित्वरूपं तच्च ब्रह्मणि नोपपद्यते॥ तथा सति ब्रह्मणो विकाराश्रयत्वापत्तेरुक्तश्रुतिविरोधप्रसंगा
दित्याशंकामभिप्रेत्याह॥ यत्र त्रिसर्गो मृषेति। त्रयाणां सत्वरजस्तमसां सर्गः। सृज्यत इति सर्गः॥ कर्मणि घञ् इति घञ्। गुणत्रयसृष्टः प्रपंचो
यस्मिन्॥ यत्स्वरूपेण्यैवा मिथ्या नास्तीति यावत्। त्रिसर्गस्य सत्वादिगुणगतत्वेन न तस्य ब्रह्मस्वरूपगतत्वमिति विकाराभावान्न निर्गु
णश्रुतिविरोध इति भावः॥ ननु विकाराश्रयत्वरूपं कारणत्वं निर्विकारत्वं चेत्युभयं परस्परविरुद्धं कथमेकस्मिन्नुच्यत इति चेत्। शृणु

न
६

ना ॥ विनिमय इत्यंतेन द्वितीयाध्यायार्थरूपं वस्तु निर्दिश्यते ॥ सूरय इत्यनेन द्वितीयाध्यायाद्याधिकरणार्थानां तेजोवारिमृदां यतो विनि
मय इत्यनेन तदाध्यायांत्यस्य संज्ञामूर्तिक्लृप्त्यधिकरणस्य चात्र प्रत्यभिज्ञानात् । एवं वाक्यशेषार्थः । सूरयः कपिलहिरण्यगर्भकणभक्षाक्ष
पादक्षपणकपशुपत्यादयः । सांख्ययोगादितंत्रप्रणेतारः ॥ प्रकृत्याद्युपादानत्वनिमित्तमात्रेश्वरवादिनो यं प्रतिमुह्यंति । ईश्वरस्य सूक्ष्म
चिदचिद्विशिष्टस्य जगद्रूपेण परिणामं । तदुपयुक्तसर्वशक्त्यादिगुणयोगं चाजानंतः ॥ प्रधानस्योपादानत्वं वदंतस्तन्निर्वोढुं चासमर्था
व्याकुलीभवंतीत्यर्थः ॥ यदिति पाठे यस्मिन् विषयभूते ब्रह्मणि मुह्यंतीत्यर्थः ॥ तेने ब्रह्म हृदा य आदिकवय इत्येतदपि द्वितीयाध्याया
र्थनिर्देशपरमिति केचित्संप्रदायः ॥ तत्र न प्रयोजनवत्त्वाधिकरणार्थप्रत्यभिज्ञानात् ॥ यद्वा । प्रतिपिपादयिषितार्थप्रामाण्यजि।
ज्ञासायां वेदांतानामेव तत्प्रमापकत्वं वक्तुं ॥ कृत्स्नस्य वेदस्यानादिनिधनाविच्छिन्नसंप्रदायासंभाव्यदोषगंधतां पूर्वतंत्रनिर्णीतां स्मा
रयितुं तेने ब्रह्म हृदा य आदिकवय इत्युक्तम् ॥ एवं कारणत्वासंबंधव्यवच्छेदरूपायोगव्यवच्छेद उक्तः ॥ अथान्येषु प्रधानादिषु कारण
त्वसंबंधव्यवच्छेदरूपान्ययोगव्यवच्छेदाक्षेपपरिहारौ सूचयन् ध्येयं परमात्मानं विशिनष्टि ॥ तेजोवारिमृदां यतो विनिमय इति अत्रै
वमाशंक्यते । तावत्पुरुषस्याकारणत्वं नोपपद्यते कारणत्वावगमात् ॥ तथाहि ॥ तावद्धंताहमिमास्तिस्रो देवता । अनेन जीवेनानुप्रवि
श्य नामरूपं व्याकरवाणीति । तेषां त्रिवृतं । त्रिवृत्करणं नामरूपव्याकरणे समानकर्तृके प्रतीयेते ॥ त्रिवृत्करणं च । हिरण्यगर्भरूपसमा
ष्टिजीवकर्तृकं नामरूपव्याकरणं चतुर्मुखरूपे ब्रह्मांडांतर्वर्त्यश्वादिव्यपदेशात् । यदग्नेरोहितं रूपं तेजसस्तद्रूपमित्यादिभिः । त्रिवृत्करण
मग्न्यादित्यचंद्रविद्युत्सु । एवं च त्रिवृत्करणैककर्तृकं नामरूपव्याकरणमप्यंडाधिपतिचतुर्मुखकर्तृकमेवेति तमिममाक्षेपमभिप्रे

त्वयि कृतः प्रसंग अनेर्थायमाभूदित्याह संग इति ॥ अधिया अज्ञानेनासत्सु विहितः कृतो यः संसृते र्हेतुः स एवाधिया कृतोपि संगः साधुषु भवाद्द्रोषु कृतामच्चिः संगत्वायाविरागत्वायैव कल्पते कल्पितः अनन्तो वैराग्यमेव जनयतीत्यर्थः धियेति वा छेदः तदा बुद्धिपूर्वको यः सत्सु चितः संसृते हेतुः ॥ किमुताधिया साधुषु कृत भयाविधो पि संगः निःसंगत्वायैव भवतीत्यर्थः ॥५५॥ इह लोके यत्कर्म यस्य पुंसः स्वभावतः प्रवृत्तमपि कर्म धर्माय न कल्पते विसर्गतः वृत्तमप्याहारं विहारं चेष्टितं निद्रादिरूपं कर्म युक्ताहारविहारस्य युक्तचेष्टस्य नित्यशः युक्तस्वप्नावबोधस्य योगो भवति दुःखहेत्व इति गीतासु तानि कान्येव सेवेत व्रतानुपेया दित्यादि प्रागुक्तानुमत द्रव्यकालादि विशेषविपर्ययसत्यसत्वायपरिहारेण

संगो यः संसृतेर्हेतुरसत्सु विहितोधिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥५५॥ नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपद सेवायै जीवन्नपि मृतो हि सः ॥५६॥ ७

भगवद्धाराधनरूपकर्मयोगाख्य धर्म निवृत्तये न भवेदित्यर्थः स च धर्मः विरागाय विगतो रागो यस्मात्स ज्ञानयोगः रस्योपस्य परं दृष्ट्वा निवर्तत इति भगवतैव गीतत्वात ॥ तस्मै न कल्पते चेदित्यर्थः ॥ तस्य भक्तियोगांतस्य ज्ञानयोगांगत्वमनुपपन्नं तथापि कर्मण एककर्मयः प्रपेदकर्मणि च कर्मयदस्तु कदाचित्कर्मयोग ज्ञानयोगयोः परस्परयोः परस्परोपकर्तृत्वमप्यस्तीति बोध्यम् ॥ स च धर्मो विरागश्च तीर्थपदस्य भगवतः सेवायै भक्त्यै न कल्पते चेत्सजीवन्नेव मृतो हि जीवकृतवः खल्वित्यर्थः ॥५६॥

भा·तृ·

॥२५४॥

त्मानं प्रति निर्विद्य निमज्जेंद्रियार्थेष्वेव सक्तं मह्यं भगवतो मायया दैवीद्येषा मायामयी ममेसुक्त विधया हृदं वंचिता मोहितायाहं विमुक्तिदं मुक्तिः
साधनत्वा बन्धं त्वां प्राप्यापि वंधनात्संसारान्न मुमुक्षे यमो कुरु क्षानकृतवत्यस्मि ॥५७॥ इति तृतीयस्कंधे त्रयोविंशः ॥२३॥ एवं निर्विद्यंतीमा
यां प्रमाहक ईमहत्याह मैत्रेयः ॥ एवमिति ॥ निर्वेदकथयंती मनोदुहितरं शालिनी स्वगर्हिणी प्रति मुनिः कर्दमस्दयालुः शुक्लाभिव्या
हृतं मह च त्वां प्राकल्यतेति भगवद्वचनेस्मरन्नाह ॥१॥ उक्तिमेवाह त्रिभिः ॥ हे राजपुत्रि अनिंदिते निद्याचारे आत्मानं प्रतीत्यं मा

साहं भगवतो ननं वंचिता मायया दृढं ॥ यात्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ॥५७॥ इति श्रीम भा· तृती
यस्कंधे त्रयोविंशोध्यायः ॥२३॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्ला
भिव्याहृतं स्मरन् ॥१॥ ऋषिरुवाच ॥ मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते ॥ भगवांस्ते ऽक्षरो गर्भम
दूरात्संप्रपत्स्यते ॥२॥ धृतव्रतासि भद्रं ते दमेन नियमेन च ॥ तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥३॥

खिदः खेदं माकार्षीः अक्षरो निरस्त प्राकृतगुणो भगवाननंतकल्याणगुणगणो हरिरदूरादाशु तेतव गर्भं प्रत्स्यते ॥२॥ नेतु भद्रं मं
गलमस्तु धृतं व्रतं भगवदाराधनरूपं व्रतं यया सा सती त्वं दमेन वा इंद्रियनियमनेन नियमेनांतरिंद्रियनियमनेन पातिव्र
त्येन चितत पसा द्रविणेन हिरण्यादीनां दानैश्च श्रद्धया परिक्षितं भगवदाराधनत्वरया चेश्वरं भगवंतं भज ॥३॥

॥२५४॥

त्वया आराधितः सन् शुक्लो भगवान्महीयं पश्यो वितन्वन्विस्तारयन्नौदर्यः त्वदुदरे जातः ब्रह्मभावनः नवब्रह्मोपदेष्टा अत्रत्वा ते हृदयग्रंथिमज्ञा
नं छेत्ता छेत्स्यतीति ॥४॥ एवमुक्त्वा देवहूतिस्तथाकरोदित्याह मैत्रेय देवहूतिरपि प्रजापतेः कर्दमस्य संदेशं निदेशं गौरवेण सम्यक् श्र
द्धयाविश्वस्य कूटस्थं निर्विकारं गुरुं मज्ञाननिवर्तकं पुरुषं परमपुरुषमभजत ॥५॥ बहुतिथे बहुतरे काले गते सति भगवान्मधुसूदनः
तस्यां देवहूत्यां कर्दमसंबंधि वीर्यमापन्नः प्राप्तः दारुण्यग्निरिव जज्ञे कर्दमवीर्यं संश्लिष्टजीवविशेषमाविष्टः ॥ अवततारेत्यर्थः

स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः ॥ छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥४॥ मैत्रेय उवाच ॥
देवहूत्यपि संदेशं गौरवेण प्रजापतेः ॥ सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुम् ॥५॥ तस्यां बहुतिथे काले
भगवान्मधुसूदनः ॥ कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥६॥ अवादयंस्तदा व्योम्नि वादित्राणि
घनाघनाः ॥ गायंति स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ॥७॥ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः ॥ प्रसे
दुश्च दिशः सर्वा अंभांसि च मनांसि च ॥८॥ प्रथममावेशावतारो जामदग्न्यवत् ॥ आवेशावतारो नाम जीवांतरगततया व्यवस्थितस्यै
व भगवतो जीवद्वारा ज्ञानशक्त्यादिगुणविशेषाभिव्यक्तमाविर्भावः तावतैव तस्मिन् जीवे स्वस्यामेषां वेश्वरत्वाभिमानः ॥६॥ तदावतरणस
मये व्योम्नि वादित्राणि शंखमृदंगदुंदुभ्यादीन्यवादयन्नध्वनयन् देवा इति शेषः घनाघना इत्येकं पदं वर्षंतो मेघाः अभवन्नित्यर्थः
सगंधर्वाः किन्नरादयः गायंती स्म गीतवंतः अप्सरसः मुदा हर्षेण नृत्यंति ॥७॥ खेचरैर्दिविजैरपवर्जिता मुक्ताः सुमनसः पुष्पाणि

पेतुः पतितवंतः सर्वा दिशः अंभांसि जलानि मनांसि सर्वेषां चित्तानि च प्रसेदुः प्रसन्नान्यभवन् ॥ ८ ॥ सरस्वत्या परिवेष्टितं तत्कर्दमाश्रमं
स्थानं प्रति स्वयंभूर्ब्रह्मानुमुनयो मरीच्यादिभिः साकमभ्यगच्छत् ॥ ९ ॥ हे शत्रुहन्विदुर अंशेन स्वापृथक्सिद्धविशेषणेन सत्वेन नित्यासंकुचितज्ञा
नगुणेन परब्रह्मैव तत्वानां प्रकृतिपुरुषेश्वराणां संख्यानया यात्म्यकथनं तेन विज्ञप्त्यै ज्ञापनाय प्रकृत्यादियाथात्म्यकथनेन तद्याथा
त्म्यं लोकं प्रति तु मित्यर्थः ॥ जातमवतीर्णं भगवंतं विद्वान् जानन् दृष्ट्वा स्वरानुजो ब्रह्मा भगवद्रोवेषावसारत्वाद्भगवद्दृष्ट्या ब्रह्मणः स्वरा

ततः कर्दमाश्रमपदं सरस्वत्या परिश्रितं ॥ स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ॥ ९ ॥ भगवंतं परब्रह्म सत्वे
नांशेन शत्रुहन् ॥ तत्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥ १० ॥ सभाजयन्विशुद्धेन चेतसा तच्चिकीर्षितं
प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ॥ ११ ॥ ब्रह्मोवाच ॥ त्वयामेपचितिस्तात कल्पिता निर्व्यलीकतः ॥ यन्मे
संजगृहे वाक्यं भवान्मानदमानयन् ॥ १२ ॥

ट् तत्र कर्दमं वसंतं प्रयुक्तम् ॥ १० ॥ तस्यावतीर्णस्य भगवतः चिकीर्षितं विशुद्धेन मन
सा सभाजयन् संमानयन् अभिनंदयन्निति यावत् ॥ अत एव प्रहृष्यमाणैरसुभिरिंद्रियैरानंदाश्रुपूर्णरोमांचितगद्गदस्वरादियुक्तेनेत्यत्व
स्वागारीद्रियैरुपलक्षितः कर्दमं च कारणाद्देवहूतिं च प्रतीदं वक्ष्यमाणमभ्यधादभ्यभाषत ॥ ११ ॥ तत्र त्वयेति पंचभिः ॥ कर्दमं प्र
त्याह हे तात पुत्र त्वया अपचितिः पूजा निर्व्यलीकेन प्रेमातिशयेन मम मह्यं कल्पिता विहिता रोहिकापचितिर्मया कल्पिते तत्र हे मानद
भवान्वाक्यं मद्वचः मानयन् जगृहीतवानिति यत्तदेव महापचितिः ॥ १२ ॥ ॥ ॥

तदाक्यकरणमात्रेण मया चितिः कल्पितेत्याह ॥ पितरि पुत्रैः कार्या शुश्रूषा अपचितिरेतावत्येव यद्गुरोः पितुर्वचः वाक्यं गौरवेण वाढमनु
मन्यतां गीः किं येन इति प्रजाः सृजेति मया अभिहितस्त्वं तथैवाकरोः अतो मदपचितिः कल्पितेति भावः ॥१३॥ हे वत्स सुमध्यमाः शोभनांगाः
इमाः तव सत्यः साधुशीलाः नव दुहितरः स्वैः प्रभावैः वंशैः सर्गमनेकधा इतरप्रपत्परंपरामिष्टं ह यिष्यंति वर्द्धयिष्यंति ॥१४॥ अतस्त्व
मृषिमुख्येभ्यो मरीच्यादिभ्यः आत्मजाः दुहितरः तत्र दुहितृरुचिशीलानतिक्रमेण परिदेहि प्रपद्य ॥ अद्याधुनाभु

एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः । वाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥१३॥ इमा दुहितरः सत्यस्तव वत्स सु
मध्यमाः । सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यन्त्यनेकधा ॥१४॥ अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचिः । आत्मजाः
परिदेह्यद्य विस्तृणीहि यशो भुवि ॥१५॥ वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया । भूतानां शेवधिं देहं बिभ्राणं क
पिलं मुने ॥१६॥ ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः । हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥१७॥ एष
मानवि ते गर्भं प्रविष्टः कैटभार्दनः । अविद्यासंशयग्रन्थिं छित्त्वा गां विचरिष्यति ॥१८॥

यशः विस्तृणीहि वितर
तु ॥१५॥ तव पुत्रस्तु साक्षादीश्वर इत्याह ॥ हे मुने स्वमायया आत्मोपसंकल्पेनावतीर्णः किमर्थं भूतानां शेवधिं निधिं देहं बिभ्राणं नि
धिर्विवाभीष्टप्रदीनायदेहि बिभ्राणं कपिलमाद्यं जगत्कारणं परमपुरुषमेवाहं वेदं जानामि ॥१६॥ देवहूतिं प्रत्याह ॥ हे मानवि मनुपुत्रि
कैटभार्दनः कैटभारिर्भगवान् ज्ञानविज्ञानयोगेन जीवपरयथात्म्यज्ञानयोगोपदेशेन कर्मणां शुश्रूषतां पुंसामनादिपुरुषपापक

श्री-ड.

॥१५६॥

शेणांजतामसत्वानि उद्दरन्नुत्सारयितुमित्यर्थः तेन त्वद्गर्भं प्रविश्य जातः कथंभूतः हिरण्यकेशः हिरण्यवत्प्रकाशमानाः केशा यस्य सः पद्मा कारामुद्रा रेखा यस्मिंस्तत् मदांबुजं यस्य सः एष अविद्यादेहात्माभिमानः संशयः भ्रमः आत्मकृत्स्वतन्त्रात्माभिमानः उभयात्मको यस्तं वृंध छित्त्वा हृतमज्ञानं तत्स्थितानि रस्य गां भूमिं विचरिष्यति ॥१७॥१८॥ अयं त्वत्सुतः सिद्धगणानां योगिसमूहानामधीशः सांख्याचार्यैः बुद्ध्यावधारणीयं आत्मतत्वं संख्यं तत्प्रतिपादकं शास्त्रमपि सांख्यमेव तस्याचार्यैः स्वयमनुष्ठाने नोपदेष्टारः तैः सुसंमतःऽव

अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः ॥ लोके कपिल इत्याख्यां गंता ते कीर्त्तिवर्द्धनः ॥१९॥ मैत्रेय उवाच ॥ तावाश्वास्य जगत्स्रष्टा कुमारैः सहनारदः ॥ हंसो हंसेन यानेन त्रिधामपरमं ययौ ॥२०॥ गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः ॥ यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः ॥२१॥ मरीचये कलां प्रादादनुसूयामथात्रये ॥ श्रद्धामांगिरसेयच्छत्पुलस्त्याय हविर्भुवम् ॥२२॥ पुलहाय गतिं युक्तां क्रतवे च क्रियां सती ॥ ख्यातिं च भृगवेयच्छद्वसिष्ठायाप्यरुंधतीम् ॥२३॥

इत्यतः लोके कपिल इत्याख्यां नामधेयं गंता गमिष्यति प्राप्स्यतीत्यर्थः ॥१९॥ तावुभावाश्वास्य विश्वासं नीत्वा जगत्स्रष्टा हंसो ब्रह्मा कुमारैः सहेति शेषः सहनारदः नारदसहितः हंसेन पानेन वाहनेन त्रिधाम्नः स्वर्गादेः परमं उपरिस्थितं सत्यलोकं प्रति ययौ ॥२०॥ शतधृतौ ब्रह्मणि गते सति हे क्षत्तः तेन ब्रह्मणा चोदित आदिष्टः कर्दमः स्वदुहितॄः विश्वसृजां विश्वस्रष्टृभ्यः यथोदितं यथानुरूपं प्रादात्समर्पयच्छत ॥२१॥ कस्मै कां प्रादादित्याह मरीचये इति मरीचय अंगिरः पुलस्त्य पुलह क्रतु भृगु वसिष्ठ यथासंख्यं कलादिका अनुसूया श्रद्धा हविर्भू गति क्रिया ख्यातिरुंधती इत्याख्या दुहितॄः प्रायच्छदित्य

पथा शंप्याय ज्ञः क्रतुर्वितन्यते विस्तार्यते बहुयज्ञवर्द्धिनीत्यर्थः ईप्सितमोयः ईप्सितः महाधिकारान्स्त्रीसहितान्मरीच्यादीन्समलालयद्दे
वाहिकस्त्रीभरणादिप्रदानेन न संतोषितवानित्यर्थः ॥२४॥ हस्तत्तः विदुर ततः कृतदारास्ते मरीच्यादय ऋषयस्तं कर्दमं निर्ममा
नुज्ञाप्यानंदिं हर्षमापन्नाः प्राप्ताः संतः स्वस्वमाश्रममास्थानं प्रातिष्ठ्याविशन् ॥२५॥ हे भरतर्षभ स च कर्दमः त्रीणि युगानि ज्ञानश
क्त्यादिगुणयुग्मानि यस्य तं भगवंतं कपिलरूपेणावतीर्णमाज्ञाय विविक्ते एकांते उपसंगम्य समीयमेत्य प्रणम्य मधुरा

थ्ययर्थवाणीरेदराक्षांतिं यया यज्ञो वितन्यते ॥ विसर्पमानः कृतोद्वाहसदारान्समलालयत् ॥२४॥ ततस्ते ऋषयः क्षत्तः कृत
दारा निमंत्र्य तम् ॥ प्रातिष्ठन्नंदिमापन्नाः स्वंस्वमाश्रममंडलम् ॥२५॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्
विविक्त उपसंगम्य प्रणम्य समभाषत ॥२६॥ कर्दम उवाच ॥ अहो पापच्यमानानां निरये स्वैरमंगलैः ॥ कालेन
भूयसा नूनं प्रसीदंतीह देवताः ॥२७॥ बहुजन्मविपाकेन सम्यग्योगसमाधिना ॥ द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं
॥२८॥

भरं यथातथ्यं भाषत ॥२६॥ भाषणमेवाह अहो इत्यष्टभिः तव सामान्येन देवताप्रसादो दुर्लभ इत्याह ॥ स्वीयैरमंगलैः दुःकृतैः नि
रये संसारे पापच्यमानानां भृशं दह्यमानानां भूयसा कालेन देवताः प्रसीदंति प्रसन्ना भवंति नूनं निश्चय ॥ अहो इत्याश्चर्यम् ॥२७
वाद्यज्ञानमाजो वरस्वरूपस्त्वं भक्तेषु सौलभ्यं प्रदर्शयन्नस्मद्गृहागण्यवशान्नयनविषयतां गतोसीत्याह ॥ बहुभिः साहित्यान्त्रयेण बहुभि
र्जन्मभिर्विपक्वेन परिपाकदशामापन्नेन बहुजन्मानुष्ठितज्ञानकर्मयोगाभ्यामनुगृहीतेनेत्यर्थः सम्यग्योगसमाधिनासम्यग्योगो

भा॰द॰
॥१५७॥

भगवद्भक्तियोगेनोपासितेन समाधिना वैनोकाग्रेण यस्मात्तव परं स्वरूपं स्मृत्वांगारेषु रागादिरहितेषु हृदयस्थानेषु द्रष्टुं साक्षात्कर्तुं प्रतंते॥
अनेन प्राकृतमन आद्यगोचरत्वमुक्तं॥२८॥ तत्तव भगवान्भवान्हेलनं कथमहं निःसमाभ्यधिको ग्राम्याणां गृहेषु निरयप्राप्तेषु जा-
येषु त्वं ज्ञानमनवगणय्य ग्राम्याणामनोऽस्माकं गृहेषु जातोऽवतीर्णो भक्तसुलभस्य भवतस्त्विदमुक्तिमेवेत्याह॥ यस्त्वं नाम भक्तानां पक्षपोषप-
तीति तथा॥ तेऽनेन भक्तसौलभ्यमुक्तं॥२९॥ स्वीयं वाक्यं सत्यं चाहं स्वांशकलयेत्यादिवाक्यं सत्यं कर्तुं मम गृहेऽवतीर्णोसि इदं संकल्पित-

स एष भगवानद्य हेलनं न गणय्य नः॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः॥२९॥ स्वीयं वाक्यमृतं कर्तुम-
वतीर्णोसि मे गृहे चिकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्द्धन॥३०॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव
यानि यानीह रोचंते स्वजनानामरूपिणः॥३१॥

करणमस्मज्ज्ञाप्यमेवेति भावः अवतारप्रयोजनमाह॥ ज्ञायतेऽनेनेति
ज्ञानं ज्ञानसाधनं सांख्यं तंतत्र तच्चिकीर्षुः कर्तुमिच्छुः॥ भक्तानां मानं वर्द्धयतीति तथा सन्॥ अवतीर्णोसि साधूनां परित्राणं तुलो-
कानुज्ञाविषयां सांख्यं तत्र च कर्तुमवतीर्ण इत्यर्थः॥३०॥ पुनः भक्तानुग्राहकत्वमस्य पुनरेवाह तान्येवेति अरूपिणः कर्मा-
यत्ते देहवमनुष्यादिरूपरहितस्य तव यानि चतुर्भुजादिरूपाणि स्वजनानां स्वभक्तानां रोचंते तान्येव रूपाणि तेन वाप्यभिरूर
पाणि स्वजनाननुगृहीतुमेव तदुचानुसारेण दिव्यानि रूपाणि विभर्षीत्यर्थः॥३१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥१५७॥

सर्वसौलभ्यादिगुणविशिष्टत्वेनपुनः॥शरणव्रज्योपयुक्तकल्याणगुणांतरविशिष्टत्वेनप्रस्तुवन्शरणंव्रजतिक्षम्यांसुरभिःसुधीभिः
तत्वबुभुत्सयाध्यानगताधिकप्रकृतिपुरुषेश्वरयाथात्म्यबोधुमिच्छयासदायासदाऽभिवादनयोग्यपादपीठंयस्यतंऐश्वर्यादिभि
ःपूर्णंतत्त्वावबोधःज्ञातंश्रीलेजः॥एवंभूतंत्वांप्रपद्येशरणंव्रजे॥२२॥परंप्रकृतिपुरुषविलक्षणंप्रधानंप्रकृतिशरीरंपुरुषंजी
वशरीरकंकालंशरीरकंअनेनकारणावस्थप्रकृतिपुरुषकालशरीरकत्वमुक्तंअथकार्यावस्थतच्छरीरकत्वमुच्यते॥महांतंश
महाच्छरीरकंविहितंत्रयाणांसत्वरजस्तमसांहृद्यतनंयस्मिन्कार्यावस्थाजीवेनच्छरीरकंइत्यर्थःशरीरवाचकशब्दःशरी

रांमहर्षिभिस्तत्वबुभुत्सयाध्यामसदाभिवादार्हणपादपीठं॥ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रियांपूर्त्तमहं
प्रपद्ये॥२२॥परंप्रधानंपुरुषंमहांतंकालंकविंत्रिदृत्तंलोकपालं॥आत्मानुभूत्यानुगतप्रपंचंस्वच्छंदशक्तिंक
पिलंप्रपद्ये॥२३॥

रिपर्यंतमभिधत्तेइत्यत्रोपपत्तिःपूर्वमेवासकृदुक्ता॥अनेनकार्यावस्थकारणावस्थाचिदचिदंतरात्मत्व
मने [illegible] नकारणत्वमुक्तं॥तदुपयुक्तसर्वज्ञत्वादिगुणयोगमाह॥कविंसर्वज्ञंस्वच्छंदशक्तित्वादियुक्तपालकत्वमाहलोक
पालंलोकंचिदचिदात्मकंप्रपंचंपालयतीतितंसंहर्तृत्वमुच्यते॥आत्मानुभूत्यानुगतप्रपंचइति॥आत्मनःस्वस्यानुभूत्या
संहारायुपयुक्तज्ञानशक्त्याऽनुगतःस्वस्मिन्लीनःप्रपंचोयस्यतम्॥आत्मानुभूत्येतिपूर्वत्राप्यत्वेतिकाकाक्षिन्यायात्

ततश्चजगाम्यतत्वोपयुक्तस्वकीयज्ञानशक्त्यालोकपालमिमर्षः॥एवंविधंकपिलंत्वांप्रपद्ये॥३३॥एवंभगवंतंप्रस्तुत्याभिप्रेतमावेदय
तिआस्माइति प्रजानामधिपतिंत्वामहमाभिपृच्छेस्माइश्वरभिपृच्छामिस्मत्समर्थः किंतदित्यत्राहत्वयाप्रजारूपेणत्वयाऽवतीर्णाःऋ
णतादितंऋणत्रयंयेनः आप्तः अनुः मतः कामः सांसारिकोभोगोयेनसोऽहंइदानींत्वामेवाहृदियुंजन्ध्यायन्ततएवविगतः

आस्माभिपृच्छेऽपतिंप्रजानांत्वज्जानांत्वयावतीर्णर्णउताप्तकामः॥परि
व्रजत्पदवीमास्थितोहंचरिष्येत्वांहृदियुंजन्विशोकः॥३४॥

शोकःतापत्रयजनितःदुःखंयस्यसः वीतशोकमितिपाठांतरंतदात्वामित्यस्यविशेषणम्॥तच्चपरिहतपापत्वादिगुणाष्टर
कोपत्यत्तरणहदीत्यनेनरहहरविद्याप्रत्यभिज्ञानात् परिव्रजतांतुर्याश्रमिणांपदवीमार्गसंन्यासधर्ममाश्रितःचरिष्येसंर
चरिष्यामि॥३४॥ ॥ ॥ ॥ श्री रा धो ॥ ॥

भा.स्क.

॥१७८॥

नैसैनिकाः कदाचिद्विहारं भक्तपारब्धावसाने जरसा पन्नगेन जीर्णप्राणेन पालितां भौमे भर्मस्थां भवे भौगैः शब्दादिविषयभोगैराढ्यां पुरंजनपुरीं हरत्यधुः॥२॥ कालकन्याजरापि पुरंजनपुरीं बलाद्बुभुजे पुरंजनपुरंजरयाधिग्रस्तं मभ्रदित्यर्थः कालकन्यां विशिनष्टि यया कालकन्यया भिभूतः पुरुषः निस्सारतां प्राप्नुयात्॥३॥ यां कालकन्ययोपभुज्यमानां सकलां पुरंजनपुरीं यवनाः सर्वतो दिशं द्वार्भिः प्रविश्य च ज्वरादिभिरोगरूपेणाप्रविश्य भृशमधिकं प्रार्दयन्पीडितवंतः॥४॥ तस्यां पुर्यां यवनादिभिः प्रपीड्यमानायां ममेयं पुरीत्यभिमानी पुरंजनः कु

नासकदातुरभसा पुरंजनपुरं नृप॥ हरत्यधुर्भौमभोगाढ्यां जरत्पन्नगपालितां॥२॥ कालकन्यापि बुभुजे पुरंजनपुरं बलात्॥ यया भिभूतः पुरुषः सद्यो निःसारतामियात्॥३॥ तयोपभुज्यमानां वै यवनाः सर्वतो दिशम्॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीम्॥४॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः॥ अवापोरुविधांस्तापान्कुटुंबी ममताकुलः॥५॥ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः॥ नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात्॥६॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान्

पुत्रान्पौत्रानुगामात्यान्जायां च गतसौहृदाम्॥७॥

टुंबे वृद्धींद्रियमनः आदिरूपे या ममता तया आकुलः आक्षिप्तचित्तः बहुविधांस्तापान्क्लेशानवाप॥५॥ कन्यया वृद्धयोपगूढः दृढतरं संश्लिष्टः विषयेष्वेवात्मा चित्तं यस्य तादृशः कृपणः अत एव नष्टश्रीर्जीनाशिका यस्य यवनैर्बलात् हृतं ऐश्वर्यं उत्थानादिसक्तिरूपं यस्य सः तस्य तितिक्षियां न लेभे इति तृतीयेनान्वयः॥६॥ विशीर्णां शिथिलं स्वपुरं तथा प्रतिकूलाननपेक्षितविषयप्राणाननादृतानादरमकुर्वाणान्स्वाधीनत्वाभावात्पुत्रानिंद्रियपरिणामरूपान्पौत्रान्सुप्रापुण्यकर्मरूपान्तदनुगानिंद्रियाणामात्मानिंद्रियदेवताः गतं सौहृदं स्नेहः यस्यास्तां जायां तस्या अपि स्वाधीनत्वाभावात्॥७॥

॥१७८॥

प्रज्वारोवैस्मवज्वरः त्वांप्रणेष्यतिलोकं प्रतिप्रापयिष्यति ॥ अत्रप्रज्वार इतिमारकोवैस्मवज्वरोविवक्षितः नमाहेश्वरज्वरस्तस्यबाधंतः
पातित्वेनमारकत्वाभावात् प्रज्वारोममभ्राताभवतित्वंचमेभगिनीस्वसाभवउभाभ्यांप्रज्वारकालकन्याभ्यांयुवाभ्यांसहाहंभीमसैनिकःय
वनसेनानायकः अव्यक्तगतिः सन्लोकेचरामि ॥ ३० ॥ अत्रकालस्यादुहितेत्यादिश्लोकद्वयेनजरायालोकविद्वेषविषयत्वमु
क्तं ॥ कदाचिदवमानेत्यादिनाश्लोकत्रयेणनारदस्यजरानाक्रांतत्वमुक्तं ॥ एतच्चनैष्ठिकसनकादीनामप्युपलक्षणं । स्वस्यसापत्यस्तकथ
ंतस्यावर्जनीयत्वाभिप्रायकं ॥ ततोविहितत्वं कन्येत्यादिनाजराधिव्याधिप्रज्वारभयानांपूर्वस्योत्तरोत्तरहेतुत्वमन्योन्यसाहित्येनमरणहेतु

प्रज्वारोयंममभ्राताव्वंचमेभगिनीभव ॥ चराम्युभाभ्यांलोकेस्मिन्नव्यक्तोभीमसैनिकः ॥ ३० ॥ इतिश्रीमद्भा
गवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांचतुर्थस्कंधे पुरंजनोपाख्यानेसप्तविंशतितमोध्यायः ॥ २७ ॥ श्रीना
रदउवाच ॥ सैनिकाभयनाम्नायेवर्हिष्मन्दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यांविचेरुरवनीमिमां ॥ १ ॥

त्वंचोक्तं ॥ जरादीनांपरस्परभाषणादिकथनंतेषांमूर्तिमत्वाभिप्रायेणनदृधिष्ठातृदेवताभिप्रायेणवाउपपन्नं ॥ इतिश्रीभागवतेचतुर्थे
सप्तविंशः ॥ २७ ॥ एवंजरादीनांउत्तरोत्तरहेतुत्वंसंभयमतिहेतुत्वंचाभिधायेदानीमेतेसर्वेपुरंजनपुरीमाविश्यपीडयंतोविक्षावयामा
सुरितिवदन् ॥ येयंचापिस्मरन्भावंत्यजत्यंतेकलेवरम् ॥ तंतमेवैतितिकौंतेयसदातद्भावभावितइत्युक्तरीत्याकथापद्मेपुरंजनस्मरा
न्तःस्त्रीचिंतयाजन्मप्राप्तिकथनव्याजेनाध्यात्मपक्षेपिजीवस्यकर्मप्राप्तस्त्रीत्वप्राप्तौतत्रपुनरदृष्टविशेषाद्भागवतसंगतिरीश्वरप्रसा
दंचाहमप्तविंशेननारदः हेवर्हिष्मन्भयनाम्नोयेसैनिकाःसेनायांभवाःदिष्टकारिणःआदेशकारिणःईश्वरस्यतिशेषःप्रज्वार

भा॰ च॰

॥१२३॥

तथाहं न प्रमाद्येयाद्युस्मद्दावितिः॥ लोकतो वेदतश्च पदेयत्वेन ग्राह्यत्वेन च उपपन्नं तं प्रार्थ्यं तं याच्यमानाय यो न ददाति यच्च ददीयमानं यो ने
च्छति न गृह्णाति तौ मोढौ असद्ग्रहावसद्ग्रहौ वा स ह्यर्थः॥ अवग्रहो भिमान आग्रहो वा यद्वोल्लावतएव वालावज्ञौ कर्मभ्रष्टावनुशोचंति॥ इमौ
प्रत्यनुशोचंति मं तद्दृस्तर्थः॥२४॥ हे भद्र भजंती मां भजस्व ममपि दयां कुरु योरुषः पुरुषेण कर्तव्यो धर्मः एतावानेव॥ किं न ह्यु शार्तानि उ
कंपते॥२६॥ कालकन्यायो दितं वचः॥ श्रुत्वा सपवनेश्वरो भयनामादेव गुह्यं॥ मरणं तद्दिप्राणिनां वैराग्यं पातु इदयया देवे गुप्त

हादिमावनुशोचंति वालावसद्ग्रहौ॥ यल्लोकशास्त्रोपपन्नं तं न राति न तद्दिच्छति॥२५॥ अथो भजस्व मां भद्र भ
जंती मे दयां कुरु॥ एतावान्पौरुषो धर्मो यदार्तानु नुकंपते॥२६॥ कालकन्योदितं वचो निशम्य यवनेश्वरः॥ चि
कीर्षुर्देवगुह्यं स सस्मितं तामभाषत॥२७॥ मयानिरूपितस्तुभ्यं पतिरात्मसमाधिना॥ नाभिनंदति लोकोयं त्वाम
भद्रामसंमताम्॥२८॥ त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितं॥ याहि मे पृतनायुक्ताः प्रजानाशं प्रणेष्यसि॥२९॥

ते॥ कर्तुमिच्छः स्मितेन सहितं यथा तथा सम भाषतः॥२७॥ तुभ्यं मया आत्मसमाधिना चित्तैकाग्र्येण वहुधा विचार्यं तस्यर्थः लोक
रूपः पतिर्निरूपितो निश्चितः कोसौ इत्यत्राह याच्यमानो ल्लोकस्त्वाम भद्रामसतमां नेच्छति॥२८॥ अतो व्यक्तगतिः कुतः प्राप्तेत्यल
क्षितगतिः सती कर्मनिर्मितं लोकमाक्रम्य भुंक्ष्व एवं सर्वोपि हि लोकः॥ न वपतिः स्यादित्यर्थः न चैवं त्वया शंकनीयं मां प्रतिकू
लां लोको हनिष्यतीति यस्मात्त्वमेव लोकस्य नाशं करिष्यसीत्याह॥ याहीति यामदीया पृतनाय नानां सेनात याया युक्ता हि॥२९॥

॥१२१॥

अनभिनंदने हेतुं वदन् तन्निमित्तं गुणनामधेयमाह॥ दौर्भगेन दुःखं भग सौंदर्यं यस्माद्भवति स दुर्भगः स एव दौर्भगः तेनात्मना स्वरूपेण लोके दुर्भगेति विश्रुता प्रख्याता तां विशिनष्टि या कालकन्या ययातिपुत्रेण पुरुणा वृता सती तुष्टा तस्मै राजर्षये पूरवे वरं राजासनरूपमदात्। ययातिर्देवयानीगमनक्रुद्धशुक्रशापाज्जरां प्राप्य पुत्रानुवाच मां जरां गृहीतेति तां च ज्येष्ठाश्चत्वारो जनगृहुः पूरुस्तु जग्रहे ततो ययातिस्तस्मै राज्यं ददाविति जरे वा हादिसुक्तम्॥२०॥ कदाचित्सा कालकन्या भूर्लोके पर्यटंती ब्रह्मलोकात्सत्यलोकात्स

दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा॥ या तुष्टा राजर्षये तु वृतादात्पूरवे वरम्॥२०॥ कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम्॥ वव्रे बृहद्व्रतं मां तु जानती काममोहिता॥२१॥ प्रत्याख्याता मया सा तु कालकन्या विशांपते॥ मयि संरभ्य विपुलमदाच्छापं सुदुःसहम्॥२२॥ स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने॥ ततो विहतसंकल्पा कन्यका यवनेश्वरं मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिं॥२३॥ ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिं॥ संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति॥२४॥

सत्यलोकान्महीं भूमिं गतं प्राप्तं मां बृहद्व्रतं नैष्ठिकं जानत्यपि काममोहिता सती वव्रे॥२१॥ ततो मया प्रत्याख्याता मयि संरभ्य क्रोधं कृत्वा विपुलं महान्तं दुस्सहं दुरतिक्रमणीयं शापमदात्॥ शापमेवाह हे मुने त्वं यतो मद्याच्ञाविमुखस्ततः एकत्र चिरेण स्थातुं नार्हसीति॥२२॥ ततो विहितसंकल्पा भग्नमनोरथा कालकन्यका आधयो व्याधयश्च यवनास्तदमीडाकारित्वात्तेषां ईश्वरं मयाउपदिष्टं नाम्ना भयं भयनामानं यवनपतिमासाद्य वव्रे॥२३॥ वरणप्रकारमेवाह॥ ऋषभं इति। हे वीर यवनानां ऋषभं ईश्वरं त्वामीप्सितं पतिं वृ

भा.स्क.
॥१७६॥

चंडवेगस्यानुचरास्ते गंधर्वाः पुरंजनस्य पुरीं यदाहर्तुमारेभिरे आरब्धवंतः तत्र पुर्यां यः प्रजागरः प्राणः सुषुप्त्यवस्थायामपि प्राणव्यापारात्प्रजा
गर इत्युक्तेः प्रत्यषेधन्नवारयत् यावत्प्राणव्यापारस्तावच्छरीरस्यावैकल्येनावस्थानात्प्रत्यषेधदित्युक्तम् ॥१५॥ स एकः प्रजागरः सप्त
भिर्विंशत्या सप्तविंशतिसंख्याकैः भूतपंचकतन्मात्रपंचकज्ञानेंद्रियपंचककर्मेंद्रियपंचकप्राणादिप्राणचतुष्टयमनोबुद्ध्यहंका
रात्मकैः शरैः शतं समा इति प्रारब्धोपलक्षणं यावत्प्रारब्धावसाने पुरंजनपुरस्याध्यक्षः पालः वली गंधर्वैः सह युयुधे युद्धं चकार

सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे वली ॥१६॥ क्षीय
माणे स्वसंबंधे एकस्मिन्बहुभिर्युधि ॥ चिंतां परां जगामार्त्तः सराष्ट्रपुरवांधवः ॥१७॥ स
एव पुर्यां मधुभुक् पंचालेषु स्वपार्षदैः ॥ उपनीतं वलिं गृह्णन् स्त्रीजितो नाविदद्भयं ॥१८॥
कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती ॥ पर्यटंती न वर्हिष्मन् प्रत्यनंदत कश्चन ॥१९॥

शरीरं न विस्रंसयामासेत्यर्थः ॥१६॥ बहुभिः साकं युधि एकस्मिन्स्वसामर्थ्ये क्षीयमाणे सति मनवत्सरावसान् इत्यर्थः ॥ शब्दादिभिः सहि
तः प्रजागरः परां चिंतामवाप शरीरं त्रावयामीति चिंतामवापेत्यर्थः ॥१७॥ स पुरंजनः मधुभुक् स्वपार्षदैरिंद्रियैः पंचालेषु शब्दादि
विषयेषु मध्ये उपानीतं वलिं शब्दाद्यमृतमं विषयग्रहणं अनुभवन् स्त्रियावुद्ध्या जितो वशीकृतः भयं मृत्युभयं नाविंदत् आलोचित
वान् ॥१८॥ काचित्कालस्य दुहिता जरारूपा काचिदस्ति सा त्रैलोक्यां वरं पतिं इच्छंती पर्यटत् हे वर्हिष्मन् तां कालकन्यां कोपि पुमान्न

नानाकामनानाभर्त्तान् शब्दादिविषयान् कामयमानः पशुमारकैः हिंसाप्रधानैरत एव घोरैः क्रतुभिः कर्मेंद्रियव्यापाररूपैरीजितः कृतसंकल्पः क
र्मेंद्रियव्यापारान् कृतवानित्यर्थः तेषां प्राधान्यं पंचसूनादिहिंसागर्भत्वात्पशुमारकैरित्युक्तं । देवादीनीजेयष्टवान् । देवशब्दो देवाधिष्ठितें
द्रियपरः इंद्रियाण्येताश्रीदित्यर्थः पितृन्भूतपतीनिति दृष्टांताभिप्रायकं । यथा भवान् देवपितृभूतपतीनिजे तथायं देवानीजे इत्यर्थः ॥
११ युक्तेषु हृदयतनाभिसंधियुक्तेषु कर्मसु प्रसक्तस्य नितरामासक्तस्य कुटुंबे बुद्धिर्तदृत्या दावासक्तचित्तस्य स वै कालः जरासमयः आससा
द प्राप्तः देहहद्रूपेण मुक्तं कालं विशिनष्टि यः कालः प्रियया योषितां परस्परमप्रियकरः ॥ १२ ॥ चंडवेग आशुवेगः संवत्सररूपः कालः प्रमि

ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान् पितॄन् भूतपतीन् नानाकामो यथा भवान् ॥ ११ ॥ युक्तेष्वेवं प्रमत्तस्य कु
टुंबासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ १२ ॥
गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति
सर्वकामविनिर्मिताम् ॥ १३ ॥ ते चंडवेगानुचराः पुरंजनपुरं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥ १४ ॥

दः सहिं गंधर्वीणां गंधर्वाश्च गंधर्वश्च पुमान् स्त्रियेत्येकशेषः तेषामधिपतिः तस्य बलिनः प्रसह्यायुर्हरतः चंडवेगस्य भृत्याः षष्ट्यधिक
शतत्रयदिवसात्मकाः गंधर्वाः परोक्षमायारूपधनापहारित्वाद्गंधर्वरूपत्वेन रूप्यंते ॥ १२ ॥ न यातादृशीरस्य चंडवेगस्य संबंधिन्यः ता
दृशः आर्षत्वाच्च सप्तम्येदितीया षष्ट्युत्तरशतत्रयसंख्याका गंधर्व्यः रात्र्यात्मिकाः मैथुन्यः द्विवसौ च मिथुनीभूय स्थिताः सिताश्चासिता
श्च शुक्लकृष्णपक्षीयाः परिवृत्त्या परिभ्रमणेन सर्वैः कामैः शब्दादिभिः नतकरणैश्च विनिर्मितां पुरीं शरीरं विलुंपंति अपहरंति अपहर्तुं

त्वः शीलं राजसतामसस्वभावः अनंतसुखादिव्यक्तिजनकत्वमौदार्यं तद्रूपश्च योगुणाः तेनोपेता युक्ताः अजीजनदित्यनुषंगः सर्वा अपि
दुहितरो दशाधिकशतं पौरंजन्यः पुरंजनस्यापत्यत्वात्पौरंजन्य इत्युक्तम् ॥ हे प्रजापते ॥ अत्र पुत्रसंख्यावाहुल्यमात्राभिप्रायात् दुहितृसंख्या
च पुत्रेभ्योन्यूनत्वेन न गार्हस्थ्यसौंदर्यार्थी ॥ ७ ॥ सः पचंति विषयान्व्यक्तीकुर्वंत्यनुभावयंतीति पंचालाः इंद्रियाणि तत्सर्वपांचालाः प्रज्ञा
दित्वान्स्वादयैर्णानेषां पतिकारणधियो जीव इत्यर्थः पित्रोर्वंशं विशेषेण वर्द्धयंतीति तान् इंद्रियपरिणामरूपान् दारैरीहाभिः चिंता
रूपाभिर्भार्याभिः संयोजयामास ॥ तथा दुहितॄः वरैः रुचितैर्विषयभोगरूपैः पतिभिः संयोजयामास ॥ ८ ॥ पुत्राणां पुत्राः पुण्यपुण्य

शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ॥ ७ ॥ स पंचालपतिः पुत्रान् पितृवंशविवर्द्धनान् ॥ दारैः संयो
जयामास दुहितॄः सदृशैर्वरैः ॥ ८ ॥ पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतम् ॥ यैर्वै पौरंजनो वंशः
पंचालेषु समेधितः ॥ ९ ॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्ववध्यत ॥ १० ॥

रूपकर्मरूपाः एकैकस्य शतं सततम् ॥ शतशब्दो वाहुल्याभिप्रायकः अभवन् पौत्रान्विशिनष्टि ॥ यैः पौत्रैः पौरंजनो वंशः संसाररूपः पांचा
लेषु शब्दादिविषयेषु निमित्तेषु निमित्तमिह फलं शब्दादिविषयभोगार्थ इत्यर्थः समेधितः संवर्द्धितः यद्वा वंशः इंद्रियपरिणामत
द्वंद्वत्वबुद्धिवृत्तिरूपपुत्रपुत्र्यादिरूपो वंशः शब्दादिविषयेषु कर्मभिरेव समेधितः इत्यर्थः ॥ ९ ॥ तेषु तस्य पुरंजनस्य रिक्थहारेषु पु
त्रेषु गृहं शरीरं कोशः अहंममाख्योऽहंकारः अनुजीविन इंद्रियप्राणादयः तेषु निरूढेन रूढमूढेन ममत्वेन ममकारेण विशेषेण

महार्हे तल्पे उत्कृष्टशय्यायां हृदये शयानः अधितिष्ठन् कालरंहः कालवेगं दुरत्ययं संसारिणो ऽवर्जनीयं दिवानिशेत्येवं रूपेणानवबुबुधे नानुसं
हितवानित्यर्थः कया पकृष्टेतस्य शोर्थः ॥३॥ महार्हे तल्पे उत्कृष्टशय्यायां हृदये महिष्या भुज एव उपधिरुपधीयते ऽस्मिन् शिर इत्युपधिरुपधा
नं उच्छीर्षकं यस्य सः शयानः अनेन बुद्धिपारवश्यं सूचितं । अवायतः विषयीभूतात्तमोभिभूतः अज्ञानतिरोहितः तामेव महिषीमिव बुद्धि
संगकृतं वैषयिकसुखं एव पुरुषार्थमेवमनुते न तु निजमात्मस्वरूपं न तत्परं परमात्मस्वरूपं च नानुमनुते इत्यर्थः ॥४॥ तया महिष्या एवं
तया रवसे नरममाणस्य संसरतः अतएव कामेः शब्दादिभिरनुभूयमानेः कश्मलं मलिनं चेतो यस्य हे राजेंद्र नवं नूतनं वयः क्षणार्द्ध

तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः ॥३॥ शयान उन्न
द्धमदो महामना महार्हतल्पे महिषीभुजोपधिः ॥ तामेव वीरोमनुते परं यतस्तमोभिभूतो न निजं परं च यत् ॥४॥ तयैवं
रममाणस्य कामकश्मलचेतसः ॥ क्षणार्द्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ॥५॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पु
रंजनः ॥ शतान्येकादश विराडायुषोर्द्धमथात्यगात् ॥ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः ॥६॥

मिव व्यतिक्रांतं देहविशिष्टस्येव भोक्तृत्वाद्देहाभिप्रायेणानवं वयो व्यतिक्रांतमित्युक्तं पश्चात्तरेप्ययमेवार्थः ॥५॥ तस्यां महिष्यां पुरंजनः
पुत्रानिंद्रियपरिणामरूपानेकादशशतानि अजीजनत् उत्पादयामास आयुषः ॥ हे विराट् इति संबोधनं पुरुषायुषः शतसंवत्स
रात्मकस्यार्द्धं पंचाशद्वर्षात्मकमतिक्रांतमभूत् इदमपि देहाभिप्रायेणोक्तम् ॥६॥ दुहितॄरिंद्रियपरिणामानंतरभाविनीर्बुद्धि
वृत्तिरूपाः दशाधिकशतं पित्रोर्जीवबुद्ध्योः आन्तृण्णं इंद्रियपरिणामानां च यशस्करीरनुकूलाः अनुकूलो हि यशस्करो न तु प्रतिकू

स्मिन्नियमः यदपि यथोपदेशं आख्यानमित्यादि तदपि न अप्रसिद्धपदत्वमात्रकथनेन तदनुकूलतया प्रसिद्धत्वमस्त्वीनां पदानां व्याख्यातुं
शक्यते तथा वक्त्रास्तत्वमुत्पत्तिप्रदर्शनात् यदपि प्रोक्तं प्रतिपदमध्यात्मयोजनादुर्घटा निःप्रयोजना चेति तत्र निःप्रयोजनत्वं यथोपदे
शं व्याख्यानेषु पुरंजनादिष्वप्यविशिष्टं जीवस्य स्त्रीपुरुषवासनानादार्ढ्ये न विचित्रा संसृतिर्भवति ईश्वरप्रसादलब्धज्ञानेन मोक्ष इत्यु
क्तैव चातितात्पर्येण पंचाध्याया वैयर्थ्यमस्य स्यात् दुर्घटा चेति परमवशिष्यते । तत्रात्यंतदुर्घटं यत् पदमध्यात्मपक्षे तु विहायान्या
नि पदानि सर्वाणि न स्पष्टं व्याख्येयान्येवानुपयुक्तं पदमगत्या कथासौंदर्यायेति वक्तुं युक्तं यत्र श्लोकस्थानां सर्वेषामपि पदानां

स राजा महिषीं राजन् सुस्नातां रुचिराननां ॥ कृतस्वस्त्ययनां तृप्तामभ्यनंददुपागताम् ॥२॥

दीर्घं गंभात्वं मुखं सुदति सुभ्रु अनुरागभारेत्यादौ तत्र पदसंघात्मकवाक्यार्थद्योतमस्य कस्यचिदुपयुक्तार्थस्य योजना कर्त्तव्या । १
तथाहि हे राजन् स राजा पुरंजनः सुस्नातां कृतमंगलस्नानां रुचिरं उज्ज्वलमाननं यस्याः कृतं स्वस्त्ययनं मंगलं कुंकुमसिंदूरादिभि
र्यस्यास्तां तृप्तां स्वादुअन्नपानादिभिः उपगतां समीपगतां महिषीमभ्यनंदत् सुस्नातरुचिरांबरादिभिः सुंदरतरां महिषीमभिनं
दयन् तिष्ठेदेवं राजन्नित्येवं बुद्धिमनुकूलामभ्यनंदत् इत्यर्थः तया महिष्या उपगूढः आश्लिष्टः परिरब्धा महिष्याः कंधरा येन स अ
नेन जीवबुद्ध्योरन्योन्यं दृढतरसंबंधः सूचितः एकत्वेनानुसंधानं च व्यज्यते रहसि एकांते अनुकूलैः गुह्यभाषणैः शब्दादिविषयविं
तनैरपकृष्टचेतना विवेको यस्य प्रमदैव प्रमादालस्यकारिणी बुद्धिरेव परिग्रहो न विवेको यस्य सः ॥२॥

यथाधर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विप
रीतांश्च बुद्धिः सा पार्थ तामसी ॥ उक्तविधरजस्तमःप्रचुरा सती बुद्धिः प्रसह्य वशीकृत्य संसारयामासेत्याह ॥ इत्थमिति ॥ हे महाराज इत्थं
दैवात्कदाचित्संजातविवेकमपि पुरंजनं विभ्रमैर्धर्माधर्मकार्याकार्यादिविषयकैर्विभ्रमैर्भ्रमजननद्वारैः समर्थः सम्यक्प्रानैः स्वव
शमानीय पुरंजनी रजःप्रचुरा बुद्धिः पतिं रमयती स्वकार्यप्रवणं कुर्वती स्वयं रेमे व्यापृतवती । कयापह्नेतु सम्यग्विभ्रमैर्विलासै
रस्यास्य इमं । केचिदत्र प्रतिपदं कथंचिदध्यात्मपक्षे योजयितुं शक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासनाद्वारा देहेन विचित्र
वासंसृतिर्भवतीत्येतावदेव कथातात्पर्यं दर्शितं क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमंदधी ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगु

श्रीनारद उवाच ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिम् ॥ १ ॥

णं भवतीति वदता तत्राद्यौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता तत एकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्य परमेश्वरप्रसादाल्लब्धज्ञानेन
मोक्ष इत्युक्तं ननु तद्देवयथोपयोगव्याख्यानमिति पंचाध्याय्यर्थः प्रतीयते प्रतिपदमध्यात्मयोजनादूषितानिःप्रयोजना चेति स्व
प्रौढिख्यापनमनादृत्य यथोपयोगमेव व्याख्यास्याम इत्याहुः तत्र प्रतिपदमध्यात्मयोगो नुपयुक्तश्चेत्किमर्थं तत्कथनमिति इष्ट
त्वं न च कथासौहृदयीयेति वक्तुं शक्यमध्यात्मोपयुक्तांशकथनेनैव तत्सौहृद्यलाभाद्धन्यथा कथासौहृदयार्थमप्यनुपयुक्तांशानां
बहूनां सत्वेन तेषामपि कथानापत्तेः यदपि क्वचित्पुमानित्यादि तत्र क्वचित्पुमानित्यादिग्रंथस्य निगमनपरत्वेन प्रधानप्रति
पाद्यस्यैव निगमनीयत्वेन तस्य प्रतिपदमध्यात्मयोजनाभावे प्रमाणत्वाभावान्नहि यावंतोर्थाः कथितास्ते सर्वे निगमनीया इ

नास्यात्र हानन्सहायोऽहं न द्विरोधिनो न पश्यामि विवेकिना मयाऽसाध्यं त्रिलोक्यामन्तर्बहिश्च न विद्यते । मुररिपुप्रसादश्च यस्तु विवेकिनो ममानुवृ
त्याग एवेत्यनुसंदधे ॥२४॥ नेतनवचनं श्रुतः पूर्वं कदाचिदपि विनितिलकं तिलकरहितं न पश्यामि इदानीं तु मलिनं विगतहर्षसंरंभेण क्रोधावेशेन
भीमं भयंकरमविमृष्टमनुज्ज्वलमप्यनेरागं स्नेहस्यन्तया तेसुजातौ स्तनौ अपि शोकाश्रुभिरुपहतौ च तथा विंबफलाकारमधुर ॥ विगतः
कुंकुमपंकतुल्यः ताम्बूलरागो यस्मिन् तादृशं पश्यति कुत एवं जात इति शेषः व्यवसायात्मिका बुद्धेरभिव्यक्तेः प्रारंभदशायामविषहता
तादृशावस्थां तां प्रियां नादरनिमित्तं क्रोधेनात्मानमनलंकुर्वतीं शोचतीं स्त्रियमिवोत्प्रेक्षते इत्यर्थः ॥२५॥ तस्मात्कृतं किल्बिषमपराधो ये

वक्त्रं न ते वितिलकं मलिनं विहर्षसंरंभभीममविमृष्टमपेतरागम् । पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं वि
गतकुंकुमपंकरागं ॥२५॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य । का देवरं वशगतं कुसुमा
स्त्रवेगविस्रस्तपौंस्यमुशती न भजेत कृत्ये ॥२६॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने षड्विंशतितमोऽध्यायः ॥२६॥

न तनस्य किल्बिषमेवाह स्वैरं स्वातंत्र्येण त्वामपृष्ट्वा मृगयां गतस्य मे प्रसीद प्रसन्ना भव ॥ देवं देवनं क्रीडां रातीति दहातीति देवरः कोन
तं कामवेगेन विस्रस्तं गतं पौंस्यं धैर्यं यस्य तं ॥ अत एव वशगतं का स्त्री कामयमाना कृत्ये कर्तुं योग्येऽर्थे न भजेतेत्यर्थः विवेकाभावा
द प्रसन्नस्य मम नस्वमावस्थाऽभवत् नो विवेकात्मबुद्धियुक्तोऽहं प्रसन्नो वर्ते यम् । एवमहंममाभिमानौ विहाय वशं गतं कार्यीपादकं मां
व्यवसायात्मिका बुद्धिरपीहानुवर्तिष्यतीत्यनुसंहितवानित्यर्थः ॥२६॥ इति चतुर्थे षड्विंशः ॥२५॥ एवं जाग्रत्स्वप्नसुषुप्त्यादिभिरव॰
स्थाभिः संसरतो दुर्लभोऽपि कदाचिद्देवात्संजातपरितापस्याविवेकात्मकबुध्युदय उक्तः ॥ इदानीमेवं संजातविवेकमपि अनंतवासनारुचिम

कुतः यतः प्रभुणास्मे घर्पितो दंडः परमोनुग्रहः अस्माकं हितायैव भवतीत्यर्थः यस्तु दंडितो विषीदति सोज्ञ इत्याह बाल इति ॥ अमर्षणः
दंडनमर्षनीत्यमर्षिणः हे तन्वि न द्वेधोः स्वामिनः कृतं शिक्षाकरणमनुग्रह इति न वेद स बालो मूर्ख अज्ञ इत्यर्थः ॥ अतो मम शिक्षार्थमेव स्वा
मिनी तं विमुच्याहमित्यर्थः अधुना पश्चात्तु स्वामिनी वन्माइ इत्क्षणेकौ तायावुध्या विवेकात्मिकया इतः पूर्वमनुदयोस्म इत्यनुग्रहार्थ एवतोहमिदा
नीं विवेकालाभनिमित्तपश्चात्तापयुक्तः नामेवानीवाहतवानित्यन संदधदित्यर्थः ॥२२॥ हे मुग्ध इति हे सुभ्रु हे मनस्विनि सा त्वमस्माकं स्वामिन्यतः
स्वानां नो मुखं प्रहर्षीय कीदृशमनुरागभारेण व्रीडया च यो विलंबो मंपरस्तेन विलसद्धसितावलोको यस्मिन् नीलालकाएवालयस्तै रूप

परमोनुग्रहो दंडोस्मेसु प्रभुणार्पितः। बालो न वेद तत्तन्वि बंधुकृत्यममर्षणः ॥२२॥ सा त्वं मुखं सुदति सुभ्रु अनुरागभारव्रीडावलंब
विलसद्धसितावलोकं। नीलालकालिभिरुपस्कृतमुन्नसं नः ॥ स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यं ॥२३॥ तस्मिन्न दध्ये दम
महं तव वीरपत्नी योन्यत्र भूसुरकुलात्कृतकिल्विषस्ते। पश्येन वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासा
त्॥२४॥

कृतं भूषितं उच्चनासिकं वल्गुवाक्यं यस्मिन्निरतिशयसौंदर्ययुक्तया प्रियया याउक्तविधमुखावलोकनसंजातमानंदमनुभूयमानइ
वाहं स्थिरे निरतिशयसुखापादकविवेको हृदये मुखी न्यस्तु संक्षितवानित्यर्थः ॥२३॥ हे वीरपत्नि वीरस्य मम भार्ये यस्ते तुभ्यं कृतकिल्वि
षः कृतापराधः तस्मिन्नहं ब्राह्मणकुलादन्यत्र कुलेपि मुररिपुदासादन्यत्र च दमं दंडं दधे करोमि मे त्वत्सहायस्य मम मत्कुद्धस्य सतः त्रैलो
क्याद्बहिरितिशेषः त्रिलोकाद्बहिर्भ्रांतस्यो जैसे मुदितं विगतभयं च पुरुषं न पश्यामि। महीयं व्यवसायात्मिका बुद्धिं मम संप्रतिह्नि

भा॰स्कं॰

॥१७२॥

ततः श्लक्ष्णया मृद्व्या वाचा विदूयता परितप्तेन ज्ञानं हृदयेन मनसा सांत्वयन्ननुनयन्नेयस्याः प्रियायाः प्रेमसंरंभः प्रणये स्वस्मिन्यः कोपः त
स्य लिंगं कारणमात्मनि मनसि नाभ्यगात् न निश्चितवान् विवेको हृदयसाधनभूतसाहरणमन्विछन् तावदेतावत्कालं तद्धृदये कारण
मन्वेषयन्नपि तन्नाभ्यगादित्यर्थः। तस्मादेवायं तत्वादितिभावः॥ १९॥ ततः पुरंजनः अनुनये सांत्वने कोविदः कुशलः॥ अनुनये॥ कोवि
दे इति॥ तृतीयांतपाठे नुवाक्यैरिति विशेषणमध्याहार्यम्॥ शनकैर्महिषीमनुनिन्ये सांत्वयामास॥ अनुनयप्रकारमेवाह॥ पादयुग

सांत्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता॥ प्रेयस्याः प्रेमसंरंभलिंगमात्मनि नाभ्यगात्॥ १९॥
अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः॥ पस्पर्श पादयुगलमाह चोत्संगलालिताम्॥ २०॥
नन्वेवं कृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे॥ कृतागस्स्वात्मसात्कृत्वा शिक्षादंडं न युंजते॥ २१॥

लं पस्पर्श प्रियायाः पादौ गृहीतवान्॥ तत उत्संगारोपणादिना लालितामाह॥ अथवात्मपक्षे नु नुनये स्ववशीकारे कोविदैर्निपुणैः
उपायैः स्वयमेव मनुनिन्ये यस्पर्श पादयुगलं मिन्मने नाद्यप्रभृति विवेकां बुद्धिमनुसृत्यैव वर्तेयमिति प्रतिज्ञातवानित्युक्तं भवति
उत्संगलालितामाह मनेन स्ववशीकृतया विवेकात्मिकया बुध्या एवमनुसंहितवानित्युक्तम्॥ २०॥ येपदम् इति॥ हे शुभे ईश्व
राः स्वामिनः येषु कृतापराधेषु भृत्येष्वात्मसात्कृत्वा मदधीना शानेऽतो न दंड्या इति मत्वा शिक्षार्थं दंडं न कुर्वंति ते भृत्या मंदभा
ग्याइत्यर्थः॥ २१॥

॥१७२॥

सा ललना क्व वर्तते । कथंभूता ललना व्यसनार्णवे दुःखसमुद्रे मज्जंतं मां पदे पदे स्थाने स्थाने स्वयं प्रज्ञां दीपयंती बोधयंती सती उद्धर-
ते व्यसनार्णवात् यथा विरहव्याकुलं पुमांसं प्रौढा प्रिया तदनुकूलाचरणहितोपदेशादिना शोकमपनुद्य सुखयति तद्वद्विवेकात्मि-
का बुद्धिरपि पदे पदे हिताहिते प्रकाशयंती पुमांसमुद्धरति ईदृशी बुद्धिः क्व वर्तते इति प्रश्नेन तस्मिन्नावर्तते इति व्यज्यते ॥१६॥
हे नरनाथ त्वत्प्रियाया व्यवस्यति निश्चिनोति तन्न जानीमः यदर्थं वै मनस्समापन्ना तद्दौमनस्यहेतुं न जानीमः त्वत्प्रियां तु जानीमः इत्या-

क्व वर्तते सा ललना मज्जंतं व्यसनार्णवे । या मामुद्धरते प्रज्ञां दीपयंती पदे पदे ॥१६॥ रामा ऊचुः । नरनाथ न
जानीमस्त्वत्प्रियाया व्यवस्यति । भूतले निरवस्तारे शयानां पश्य शत्रुहन् ॥१७॥ पुरंजनः ।
स्वमहिषीं निरीक्ष्यावधुतां भुवि । तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥१८॥ ॥

हुः हे शत्रुहन् निरवस्तारे आस्तरणरहिते भूतलेऽवधूतशयने शयानां पश्य प्रपेति यथा पक्षे एषु । अध्यात्मपक्षे त्वबाधितेंद्रियवृत्तीनां
सर्वासां निश्चयात्मकबुद्धिमूलकत्वात् यापींद्रियवृत्त्यासा न तु देतीत्यालोच्य यदनादरवशात् प्रियाना हृता सती वमतिमुखी अ-
भूदित्यनुसंहितवानित्यर्थः आदरो बुद्धेः शिक्षणं ॥१७॥ पुरंजनो भुवि पतितां महिषीं निरीक्ष्य तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्य
सः परमं महद्वैक्लव्यं शोकं पारवश्यं ययौ । अहो मदीयेयं बुद्धिरेतावंतं कालमेवं विपरीताभूदिति वैक्लव्यं ययावित्यर्थः ॥१८॥

उचितमाहारेण त्वत्रः धृपाले पश्वगारे शिभिर्दृष्टः सुहृत्त्वः त्वत्प्रिहदर्शिमां सुतरां दृशः अतएव कंदर्पेण कृष्टं वशीकृतमानसं यस्य सः गृहे मेधि
नः स्वस्य संवेधिनी गृहिणी गृहमस्या अस्तीति तां स्वाश्रय एव स्थितां वरारोहां स्त्रियं नक्ष्य च एनां दर्शय यथाकाम परवशः स्वगृहे एवक्व
चिदंतर्हितां प्रियां नापश्यत् ययार्थं जीवो विकाल्मबुद्धिलिप्सापरवशस्तां स्वाश्रय स्थितां न लब्धवानित्यर्थः ॥ हे वैदिषत्प्राचीनवर्हिः
विमनाइव वृद्धं भविनगतांऽइवांतःपुरस्त्रियः तस्य ॥ स्वीरष्टच्छत्सुरंजनः तदलाभनिमित्तवैमनस्य बुद्धिमत्त्वकेंद्रियवृत्तीः पप्रच्छ
केंद्रियवृत्त्या बुद्धिः सात्विकी स्यादिति परिशीलितवानित्यर्थः ॥१२॥ प्रश्नमेवाह अपीति त्रिभिः हे रामाः स्त्रियः सेश्वरीणां स्वामि

तत्रोहृष्टः सुहृत्तस्त्वकंदर्पाकृष्टमानसः ॥ नक्ष्य च एव वरारोहां गृहहिणीं गृहमेधिनी ॥१२॥ अंतःपुरःस्त्रि
योऽपृच्छद्विमनाइव वेदिषत् ॥ अपि वः कुशलं रामाः सेश्वरीणां यथापुरा ॥ न तथैतर्हि रोचंते गृहेषु गृहसंप
दः ॥१४॥ यदि न स्यात्गृहे माता पत्नी वा पतिदेवता ॥ व्यंगेरथइव प्राज्ञः को नामासीत दीनवत् ॥१५॥

नीसहितानां वः युष्माकमपि कुशलं ॥ अपि शब्दः प्रश्ने ॥ कुशलप्रश्ने हेतुर्हि यस्मात् गृहेषु यथापुरा महिष्या व्यापारदशायां गृहसं
पदः यथैवमे चंते न तथैतर्हि दानीं रोचंते विवेकाभावेन नकोऽपि पुरुषस्य गुणः प्रकाशते ऽतो विवेकः किमु देष्यतीति चिंतितवानित्यर्थः
॥१४॥ गृहेषु माता वापि देवताय स्याः सा पत्नी वाय दि न स्यात् तर्हि व्यंगे च क्राग्वादिरहिते रथइव प्राज्ञः बुद्धिमान् को नाम पुरुषो
दीनवदासीत निवसेदित्यर्थः विवेकाभावे देहत्यागो वरं इति भावः ॥१५॥

शशान्वराहान्निमारिकयनं शवादिभिर्देनेनतद्वांतरभेदेन चविषयैर्वैविअज्ञापनायकथापहृतेनत्नौंद्दर्यायमेध्यान्विहितानन्मानविहितां
श्वविषयाच्चिनिघ्नन्नात्मसात्कुर्वन्व्यापृतकरणत्वाच्छ्रममध्यगात्प्राप्तवान् ॥१०॥ एवं राजस्मात्वुद्देः कार्यभूतां जाग्रदवस्थां तामस्याका
र्यभूतां स्वप्नावस्थां चाभिधायेदानीं विज्ञानं कुर्वीत संचितविवेकः कथमुद्देतीति विविक्तायां प्रणयकलहनिमित्तक्रोधाविष्टप्रियानुनः
यनकं यन व्याजेन संसारिणो जीवस्य विवेकात्मकसात्त्विकबुद्देर्दौर्लभ्यं द्योतयन्प्रवृत्तिं च कार्याकार्ये भयाभये। वंधं मोक्षं च या वेत्ति बु
द्धिः सा पार्थ सात्त्विकी सुक्ता सात्त्विबुध्या लाभद्द शायांहे वा तद्दलाभिनिमित्तपरितापोदयं ततस्तल्लिप्सोरं ततस्तद्दुचितसाधनैस्तल्ल

शशान्वराहान्महिषानावयान् रुरुन्शलकान् ॥ मेध्यानन्यांश्च विविधान्विनिघ्नन् श्रममध्यगात् ॥१०॥
ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् ॥ कृतस्नानोचिताहारः संविवेश गतक्लमः ॥११॥ आ
त्मानमर्हयां चक्रे धूपालेपस्रगादिभिः ॥ साध्वलंकृतसर्वाङ्गो महिष्यामादधे मनः ॥१२॥

ध्येंच द्योतयन्कथापहृतेनत्नौंद्दर्यायतां बुद्धिमाह ॥ वीतैर्नेद्रियवृत्तीरंतःपुरस्त्रीत्वेन परिकल्प्य तद्दनुनयप्रकारमाह तत इत्यादि
ना क्षुत्तृड्भ्यामशनापिपासाभ्यां परिश्रांतः स्वाप्नप्रशरीरेपि तत्तयोरनुवृत्तेरेवमुक्तं। ततः स्वाप्नविषयानुभवरूपमृगयायाः निवृत्तः
स्वदेहं पुरत्वकल्पितजाग्रद्देहगतहृदयस्थानमेयिवान्प्राप्तः ततः कृतं स्नानं उचितमाहारं च येन सः अत एव गतश्रमः सम्यगुपवि
ष्टवान् ॥११॥ ततो धूपादिभिरात्मानमलं चकार ततः साधु सम्यगलंकृतानि सर्वाण्यंगानि येन सः महिष्यां मन आदधे निहितवानित्य
र्थः कथापहृतेसष्टोर्थः ॥१२॥

भा.च.

॥१७०॥

यएवंविद्वान्हिंसायाविषयभोगस्यचरागप्राप्ततांनित्रिमंचविद्वान्कुर्वीतहिंसांविषयभोगंचकुर्यान्नवानकुर्य्याद्रागप्राप्तत्वेनावश्यकत्वाभावा
दितिभावः रागप्राप्तस्यानियमेवहिपत्नेप्रसवायाभावमात्रंक्रियंतेनादृष्टं ॥ अतःसुतरांरागप्राप्तस्यत्यागेनप्रत्यवायइतिनवेत्सुक्तंतेनैवंनियतेनक
र्मणाज्ञानेनएवंकृतेनकर्मणायज्ज्ञानंभवतितेनहेतुनासःकर्त्तानलिप्यतेपापैरितिशेषः यद्वासविद्वान्ज्ञानेनरागप्राप्तानांत्यागोपादेयविवेक
ज्ञानरूपेणहेतुनाकर्मणाःनाहिपापरूपकर्मणानलिप्यते ॥७॥ अन्यथानियतंकर्मकुर्वाणः अहंममाभिमानारूढःकर्मभिरनादिपुण्या
पुण्यकर्मभिरनुबध्यतेवशीक्रियते । ततःकर्मपारवश्याद्गुणप्रवाहेसंसारेपतितःनष्टहेयात्मविवेकःअधोनरकंव्रजति ॥८॥ एवंप्रासंगि

एवंकर्मनियतंविद्वान्कुर्वीतमानवः ॥ कर्मणातेनराजेंद्रज्ञानेनसनलिप्यते ॥७॥ अन्यथा
कर्मकुर्वाणोमानारूढोनिबध्यते ॥ गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः ॥८॥ तत्रनिर्भि
न्नगात्राणांचित्रवाजैःशिलीमुखैः ॥ विप्लवोभूद्दुःखितानांदुःसहःकरुणात्मनां ॥९॥

कंपरिसमाप्यप्रकृतांमृगयामनुवर्णयतितत्रेति । विचित्रवाजानानाविधवासनारूपाविचित्रपक्षाः येषांतेवासनाभिरूपोद्वलि
बलितैरित्यर्थः शिलीमुखैः पुण्यापुण्यकर्मभिर्हेतुभूतैः निमित्तानामनुभवेनजीर्णानिगात्राण्यवयवायेषांतेषांमृगाणांविषयाणां
विप्लवोनाशःकरुणात्मनांकृपालूनांदुःसहोभूत । कामिभिरनुभवजीर्णत्वर्यवान्विनष्टवान्शब्दादिविषयाननुसंदधतांसर्वभू
तसुहृदांज्ञानिनांविषयविप्लवोमनसापिस्मर्तुमसह्योभूदित्यर्थः कथापक्षेस्पष्टोऽर्थः ॥९॥

तत्र च वने दृप्तः गर्वितः स्वात्प्रदेहः परवशः इत्यर्थः आत्ताः स्वीकृता इषवः वासना रूपाः कार्मुकः कर्तृत्वाद्याभिनिवेशो यस्य ॥ अतदर्हां त्यागानार्हां जायां विवेकिनिकां सात्त्विकीं बुद्धिं विहाय । त्यागहेतुः मृगं पतइतिमृगाः शब्दादिविषयास्तेषु यद्व्यसनं मलाभनिमित्तं दुःखं तेन लालस अन्वेषणासक्तः मृगयां विषयान्वेषणरूपां अत्र जायाविहायाः मासुरीमाश्रित्याने न निंद्रियास्तमोगुणकार्यत्वमुक्तं चत्वारः कृष्या पक्षेऽस्यैवार्थः ॥४॥ आसुरीं तामसीं वृत्तिं बुद्धिं आश्रित्य घोरात्मा घोर आत्मा चित्तं यस्य सः रजोगुणकार्यक्रोधाविष्टः कामविरोधिषु क्रुद्ध इत्यर्थः ॥ अत एव निरनुग्रहः विरोधिष्वनुग्रहरहितः निःप्रीतः कार्यज्ञमैः विषयस्थानि ध्यापादकैरिति यावत् । वाणैः कर्मवास

चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः ॥ विहाय जायामतदर्हां मृगव्यसनलालसः ॥४॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ॥ न्यहन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥५॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने ॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥६॥ ॥

नारूपैः शरैः वनेषु भोगस्थानेषु वनगोचरान्वनगोचरमृगतुल्यान् दैवोपसादितानित्यर्थः न्यहन् हात्मसात्कृतवान् । कथापक्षे तु स्पष्टमेव ॥५॥ नन्वासुरीं वृत्तिमाश्रित्य मृगयानिंदानयुक्ता कथापक्षे राज्ञस्तस्य विहितत्वात् अध्यात्मपक्षेऽपि दैवोपसादितविषयभोगो विहित एवेत्यत्राह तीर्थेष्विति त्रिभिः मृगया पारगस्या प्रवृत्तत्वात्समाविधीयते किंतु नियम्यते मृगयाप्रवृत्तिः संकोच्यते इत्यर्थः । नियममेवाह दधनुर्हरणीयति । लुब्धो रागी सन् यदि निहन्यात् तर्हि तीर्थेषु श्राद्धादिष्वेव निमित्तेषु तत्रापि प्रतिदृष्टेषु विहितमांसकेषु एवेति तत्रापि राजैव मेध्यानेव वन एव यावदुपभोगमेवेति । नान्यथेत्यर्थः अध्यात्मपक्षेऽपि जीवस्य यावदुपभोगमेव विषयभोगो नियम्यते इति भा

॥ च ॥

॥ टी: ४ ॥

भवादिति भावः द्वावहंकारममकारौ ईषे के इंडिके यस्य तम् । द्वे पुण्यपापे चक्रे यस्य तं तथैकं प्रधानम् अक्षो यस्य तं त्रयो गुणाः वेणवो ध्वजा यस्य तं पंच प्राणा बंधुराणि वंधनानि यस्य तथाभूतम् ॥१॥ पुनः कीदृशं एकं मनो रश्मिः प्रग्रहरज्जुर्यस्य तं एका बुद्धिर्दमनः सारथिर्यस्य एकं हृदयं नीडं रथिन उपवेशस्थानं यस्य । द्वौ शोकमोहौ कूबरं युगबंधनस्थानं यस्य पंच शब्दादयो विषयाः प्रह्रियंते प्रक्षिप्यंते आयास्मंते यस्मिन् तं सप्त धातवो वरूथाः चर्माद्यावरणानि यस्य तं ॥ पंच कर्मेंद्रियाणि विक्रमा गतिप्रकारा यस्य तथाभूतम् ॥२॥ हैमोपस्करं सुवर्णाभरणं स्वर्णाभरणविशिष्टत्वात् देहस्य रथिसंभवाभिप्रायेण हैमोपस्करमित्युक्तं कथासौ ईयी यवा एवमनुपयुक्तं कथासौ ईयीयेति

पंचप्रहरणं सप्तवरूथं पंचविक्रमं ॥२॥ हैमोपस्करमारुह्य स्व
र्णवर्माक्षयेषुधिः ॥ एकादशचमूनाथः पंचप्रस्थमगाद्वनं ॥३॥

दृढत्वं स्वर्णमयं वर्म कवचं रजोगुणो हंति यस्य ॥ अक्षयेषुधिः इषवो बाणा धीयंते यस्मिन्निति इषुधिर्निषंगः अक्षय इषुधिरनंतवासना अयोहंकारो यस्य स तत्र बुद्धिपूर्वकप्रवृत्तिहेतुः संस्कारविशेषो वासना सा चाज्ञानवासना कर्मवासना प्रकृतिसंबंधवासना चेति त्रिप्रकारा ॥ अविद्यानामाज्ञानानादृत्यास्य याज्ञानविपरीतज्ञानरूपेण त्रिविधमज्ञानं प्रकृतिसंबंधः स्थूलसूक्ष्मरूपाचित्संबंधः स च देहमनुष्यादिदेहभेदेन बहुविधः सजातीयकर्मारंभे छा हनिः सा च विषयभेदाद्बहुप्रकारा पुण्यापुण्यरूपेण द्विविधं कर्मेंद्रियं ॥ एकादशेंद्रियरूपसेनायाः सेनापतिः पंच शब्दादयो विषयाः प्रस्थास्मन्वो यस्मिंस्तद्वनं भोगस्थानमगात् ॥३॥

५८॥ आसतीमासीना मासि यां जनयंतीमनु स्म आस्ते ॥५९॥ एवं सो चतीमनु शोचतीं त्वादेरर्थः ॥६०॥ एवं महिष्या वृत्या विप्रलब्धः विशेषेण विमो
हितः अत एव सर्वां प्रकृतिरक्तो धाघात्मस्वभावः वंचितायस्य सः स्वकस्वभावइत्यर्थः नेच्छन्ननिच्छन्नपि क्लैब्यात्मारवश्यादनुकरोति यथा
क्रीडार्थो मृगः ॥६१॥ इति श्री चतुर्थे पंचविंश ॥२५॥ एवं सुषुप्तवस्था जाग्रद्दवस्थां चाभिधायेदानीं स्वप्नावस्थामाह द्दशभिः ॥ सइति ॥ सपु
रंजनः एकदा सुषुप्तं वनं रं महानिष्वासो धनुः कर्तु स्वभो कृतात्यून भिनिवेशोयस्य सः रथमारुह्य पंचप्रस्थं वनमगादिति तृतीयेनान्व
कचि चकर्णोति स्म रावं त्सां पश्यंत्या मनु पश्यति । कचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित ॥५८॥ क्वचिच्च शोचती जाया
मनु शोचति दीनवत् ॥ अनु हृष्यति हृष्यंत्यां मुदितामनु मोदते ॥५९॥ विप्रलब्धो महिष्येवं सर्वप्रकृतिवंचितः ॥ नेच्छन्न
नुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥६०॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पंचविंशतितमोध्यायः ॥२५॥ श्रीनारद उवा
च ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगम् ॥ द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरम् ॥ एकरश्म्येकदमनमेकनीडं द्वि
यः रथशब्देनात्र शरीरं विवक्षितम् ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इंद्रियाणि हयाना
हुरिमादि श्रुत्या उपासनानि हत्तो शरीरादीनां रथादि भावेनाम्नात्र निरूपितत्वात्च शरीरमत्रोचितत्वात् स्वप्ने विवक्षितम् ॥ तद्विनदानी
मेव स्वप्ने हष्टपुण्यपापानुरोधेनेश्वरसृष्टं भवति । जाग्रद्देहस्य तु प्रातः संवत्सरोपभोग्यपुरत्वेनोक्तत्वात् रथं विशिनष्टि । पंचाश्वं पंचज्ञा
नेंद्रियाणि चक्षुरादीनि अश्वायस्य तं आशुगं शीघ्रगति कं ॥ अनेनापि स्वाप्नमेव शरीरमत्र विवक्षितं इत्यवगम्यते ॥ जाग्रद्देहस्याशुत्वासं

त्वपा वाचिः स्त्रैते तंतुभिः स्वनिवासमंतेकरं डंविर्माय स्वनिर्गमनद्वारं तन्मुखमप्यज्ञानेनपिधायतत्रैववदिनश्यतितद्वत्वाणिपादयोर्निंछिर
द्रत्वाज्ञानाभावाद्यत्नोनिर्वा कुंचेशक्रताविमुच्येते। ताभ्यांद्वाभ्यांमत्ताणवतांइंद्रियवतांदेहानामधिपतिः पुरंजनयातिगछत्यागछतिकरोति
कर्मकरोतिच॥५४॥ अंतःपुरंहृदयंगतः प्रविष्टः हृदिह्ययमात्माप्रतिष्ठितनतइतिश्रुतेः सपुरंजनः यदाविषूचीनेनमनसाविषयंगच्छतिस
र्वतोव्याप्रियतइतिविषूचीनंइतिश्रुतेः समन्वितोभवतितदाजायाबुद्धिरात्मजाइंद्रियवृत्तयः ताभ्यांउद्भवंमोहाद्दीनाममतंयाति। मोह

क्वचित्पिबंत्यांपिबतिमदिरांमदविह्वलः॥ अश्नंत्यांक्वचिदश्नातिजक्षत्यांसहजक्षति॥५५॥
क्वचिद्गायतिगायंत्यांरुदत्यांरोदितिक्वचित। क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति॥५६॥
क्वचिद्धावतिधावंत्यांतिष्ठंत्यामनुतिष्ठति॥ अनुशेतेशयानायामन्वास्तेक्वचिदासतीं॥५७॥

प्रमादहर्षाः तमः सत्वरजः कार्याणिमनोगुणाः अनुत्तरिंद्रियस्यानुक्तिः सर्वेष्वंतर्भावात॥५५॥ एवमिंद्रियस्थानेविषयाणांगोणनामार
निकार्याणिचाभिधायमनः पर्यंतसर्वेंद्रिययुक्तस्यबुद्धिपारवश्यमाह एवंइति॥ अत्र अतएवकामप्रवणामात्मामनोयस्य॥ कर्मसुकामसा
धनेषुकर्मस्वासक्तः अतएवदैवेनवंचितः महिषीबुद्धिर्यस्ययद्यदीहेतुव्याप्रियेतयद्यच्छंदादिविषयंप्रतीद्रियाणिप्रवर्त्तयतीत्यर्थः तत
देवान्ववर्त्ततानुवर्त्तितवान॥५६॥ अनुवर्त्तनमेवोपपादयतिचतुर्भिः क्वचिदिति। पिबंत्यांपानेव्याप्रियंत्यांबुद्धौप्रियासामुत्पादयंत्यांसत्या

नाचितो पुरुषः दक्षिणा पांचालं दक्षिणद्वारगमनं पांचालं पंचते व्यक्तीकरोतीति पांचालं पञ्चते व्यक्तीतियतः इति वा पांचालं ॥ पचिव्यक्तीकरणे इ
त्यस्मात् मिविशिविडिमगणिकृतिकृपिपलिपंचिभ्यः कालजित्यौणादिकलच प्रत्ययांतः पंचालप्रादः ततः प्रज्ञादित्वात्स्वार्थेऽणप्रवृत्ति
धर्मप्रकाशकशास्त्रात्मकं राष्ट्रं याति ॥ ५० ॥ एवं पुर्या उत्तरेण उत्तरस्मादिति देवहूर्नाम द्वाः तया पुरंजनः श्रुतिधरान्वितः उत्तरपंचालं
याति ॥ यद्यपि प्रवृत्तिनिवृत्तिसनवोधिनः शब्दाः संति संसारिणो जीवस्य श्रोत्रं तथापि श्रोतव्यानां मध्ये प्रवृत्त्यवबोधिशास्त्रात्मक
शब्दस्यैव श्रवणमत्वाभिप्रायेण दक्षिणपांचालमुत्तरं पांचालमित्युक्तं एवं पूर्वत्रापि याति सोऽयमित्यादि युद्दृष्टव्यम् ॥ ५१ ॥ पुर्याः प
निरृतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ वैशसं नाम विषयं लुब्धकेन समन्वितः ॥ ५१ ॥ अंधावमीषां पौराणां निर्वाक्पेशस्कृ
तावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥ ५२ ॥ स यर्ह्यंतः पुरगतो विषूचीनसमन्वितः ॥ मोहं प्रसादं हर्षं वा याति
जायात्मजोद्भवम् ॥ ५३ ॥ एवं कर्मसु संसक्तः कामात्मा वंचितोऽबुधः ॥ महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥ ५४ ॥
अथासुरी नाम द्वाः अस्य तेजिष्पते इंद्रियं द्रम्मसुरं मेढ्रं ततः स्वार्थेणि इति द्वाणजित्यादिना ङीप् तया पुरंजनः दुर्मदेन दुरुहदुरः
मदो यस्य तेन उपस्थेंद्रियेण समन्वितं ग्राम्यकं ग्राम्यस्य जनानां कर्म मैथुनादिकं याति ॥ ५२ ॥ पुर्याः पश्चान्निरृतिर्नाम द्वाः निरृतिर्नि
र्गमः सस्तु द्वारस्त्वाद् इह निरृतिः तया पुरंजनः लुब्धकेन पाय्विंद्रियेण तेनोत्क्रांतस्पर्शः स्वप्राप्तेर्लुब्धकः साम्यं तेन समन्वितः वैश
सं नारकं दुःखं याति ॥ ५३ ॥ अमीषां पौराणां पुर्याः संबंधिनां द्वाराणां मध्ये उभौ द्वौ पादपाणी अंधावज्ञौ निर्वाक्पेशस्कृतौ वाक्पेश
देनात्र वागिंद्रियाधिष्ठानं मुखरूपं छिद्रं लक्ष्यते छिद्रपेशस्कृतमस्मान्निर्वाक्पेशस्कृता विमुच्यते । ये शस्कृन्नाम हि कीटविशेषः

भा. ष.

॥१६७॥

वहूरनश्चिरत्नमर्थं व को ऽह्ननहस्तुक्तेः परोक्षवादत्वाय पणावहूहनौ विषयौ पुरराट् पुरंजनः रसज्ञो रसनेन्द्रियं विपणो वागिन्द्रियं ताभ्यामन्वितो या
ति ॥४९॥ पुर्याद्दक्षिणेन दक्षिणस्यां दिशि पितृयाणन यतो ऽथ यं पितृहूर्नाम द्वाः पितॄन्न जहाति गच्छन्नयेति पितृहूः उहां गतौ इत्यस्मान्निष्पत्तेः कू
रिति कूस्मय यो वा हूत्तकान्त पितृलोकप्राप्तिसाधनभूतायागादिक्रियातद्बोधिनी त्रयी पूर्वभक्तिस्थपितृहूशब्दार्थः तत्र दक्षिणकर्णस्य वला
धिकत्वाद्दक्षिणां प्रथमं त्रिवर्गश्रवणपच्च प्रवृत्तिप्राप्तस्वस्य श्रवणे प्रवर्त्तत इति प्रथमं श्रोतव्यपितृलोकप्राप्तिसाधनकर्मप्रकाशकोत्तरशास्त्र
श्रवणसाधनत्वाद्वामकर्णो देहः ननूत्तरभागतदर्थश्रवणस्यापि वत्ताधिक्याद्दक्षिणकर्णेनैव प्रथमं प्रवर्त्तेत इति कथमेतदुच्यत इ
ति चेत् । एवं तर्ह्यतरण्वगुणनामधेयवत्त्वात् पूर्वभागतदर्थानां शास्त्रप्राधान्येन दक्षिणकर्णेनैव विधानमुत्तरभागतदर्थानां तु वामकर्णे

॥ या ॥

आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥५०॥ ॥

प्राधान्येन श्रवणविधानं चानुमीयते । यथा दक्षिणं दीक्षितः पूर्वमाक्षे सव्यं हि मनुष्या अंजत इत्यत्र हि स्पष्टार्थत्वान्मनुष्याः सव्यनयनांजनं कुर्व
न्तुरित्येवं प्रमाणांतरेणाप्राप्तस्य सव्यनयनांजनस्य सिद्धवन्निर्देशानुपपत्तेः सव्यनयनस्यांजनेन दृष्टिविशेषाल्लाभात् प्रसिद्धव
न्निर्देशानुपपत्त्या मनुष्यैः सव्यनयनांजनं कर्तव्यमिति विधिरनुमीयतेऽनन्तरं । यथा वा तस्मादपि वध्यं प्रपन्नं न प्रतिगच्छंतीति श
रणागतस्य प्रत्यर्पणे प्रमाणान्तरेणाप्राप्तमपि तस्मादिति प्रसिद्धवन्निर्देशानुपपत्त्या शरणागतो न प्रत्यर्पणीय इति विधिरनुमीय
ते तद्वत्सर्वोत्तरभागयोर्यथाक्रमं दक्षिणोत्तरकर्णप्राधान्येन श्रवणमन्यतोऽप्राप्तमप्यनेनैव सिद्धवन्निर्देशगुणनामधेयवलेन
विधीयत इति निरवद्यं पुरंजनः पितृहू द्वारा श्रुतिधरः श्रोत्रेन्द्रियेण श्रुतं श्रवणविषयं शब्दं धरत्यवगच्छतीत्यनेनेति व्युत्पत्तेः ते

॥१६७॥

॥नामानि॥

नवनामुखतश्चमुख्याद्वार्ग्र पंचद्वारः पौरस्त्याः पूर्वदिक् भगवाएकादक्षिणतयाएकोत्तरादेपश्चिमेपाश्चिमदिग्भवे। हेनृपतेतुभ्यंममूषांद्वारांनामानि
निशुष्वंवर्णिये॥४५॥ खद्योताखद्योतवदल्पप्रकाशावामनेत्ररूपा आविः प्रकटंमुखंयस्याः साबहुप्रकाशाद्दक्षिणनेत्ररूपास्वानुभवा
वृतत्प्रकाशाधिकामवगंतव्यम्। एनेद्वावैएकत्रनिर्मितेलग्नेताभ्यांखद्योताविर्मुखाभ्यांद्वाभ्यांद्युमत्सखः द्युमान्सूर्यः तदधिष्ठेयंचक्षु
रिंद्रियमपिद्युमतदेवसख्यायस्पसः यद्वाद्युमतःसखाद्युमत्सखः राजाहः सविभ्यएच्चचक्षुषासहितइत्यर्थः विभ्राजितमालोकादिना

नलिनीनालिनीचप्राक्द्वारावेकत्रनिर्मिते॥ अवधूतसखस्ताभ्यांविषयंयातिसौरभम्॥४६॥
मुख्यानामपुरस्ताद्द्वास्तयापणबहूदनौ॥ विषयौयातिपुरराड्रसज्ञविपणान्वितः॥४७॥ पितृहू
र्नृपपुर्याद्वार्दक्षिणेनपुरंजनः॥ राष्ट्रंदक्षिणपंचालंयातिश्रुतधरान्वितः॥४८॥ देवहूर्नाम
पुर्याद्वाउत्तरेणपुरंजनः॥ राष्ट्रमुत्तरपंचालंयातिश्रुतधरान्वितः॥४९॥ ॥०॥

प्रकाशरूपंजनपदंविषयंयात्यवगच्छति। कयापश्चेतुखद्योतादिशब्दाअप्यकर्णादिशब्दवत्केवलसंज्ञाशब्दाइत्यवगंतव्यम्। जन
पदंदेशंनयातिगच्छतीत्यर्थः॥४७॥ नलनालशब्दौच्छिद्रवचनौ नलमस्याअस्तातिनलिनीएवंनालिनीवामदक्षिणनासिकोऽत्रा
पिसंज्ञाभेदादेवकार्यमूनाधिकंपूर्ववज्ज्ञेयम्॥ अवधूतयतीयंपयतीत्यवधूतोवायुस्तत्सखोद्यधिष्ठतोघ्राणःताभ्यांद्वानलनि
नालनिभ्यांसौरभम्॥गंधंविषयंयाति। ४८ मुख्याप्रधानाअस्यमुखंपाद्वाःपूर्वदिग्भवातयामुख्ययाद्वारायणःपणनंव्यवहारःभावण

॥रू॥

चिच्छब्देन ब्रह्मणश्चोक्तस्यात् एषा विश्पतद्वारा ह्लादिनी मा विश्राहिमर्थः प्रशास्खद्वापर्यंकवत्समुच्चयेन नारी पुरीतत् ब्रह्मणोहितजीवस्य सुषुप्ति स्थानं नतु विकल्पेन । अथ यत्रैतत्सुषुप्तः समस्तं संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सुप्तो भवति ॥ अथ यदा सुषुप्तो भवति यदा न कस्य च वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेत इति । तथायंत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवतीति च याणामपि सुषुप्तिस्थानत्वाश्रवणात्कार्यभेदेन समुच्चये संभवति पाक्षिकवाधगर्भेर विकल्पस्यान्याय्यत्वात् । संभवति च प्रासादखद्वापर्यंकवन्नाड्यादीनां कार्यभेदः तत्र नाडी पुरीततोप्रासाद ॥ स्वद्वास्थानीयो ब्रह्म च

पंचद्वारस्तुपो रस्यादृक्षिणेकात घोत्तरा ॥ पश्चिमे मेते अमर्षा तेनामानिन्द्रपवर्णये ॥४४॥ स्व
धोनाविमुखी च प्राक्द्वारावेकत्र निर्मिते ॥ विश्राजितं जनपदं याति ताभ्यां द्युमत्सेरवः ॥४५॥

पर्यंकस्थानं ततो ब्रह्मैव साक्षात्सुषुप्तिस्थानम् ॥४४॥ श्चो ब्रह्मणि निमित्तं हृदिनी पुरीततदशानी जाग्रदवस्थां प्रतिपादयति सप्तेत्यादि यावद्ध्यायसमाप्तिः तत्र नवभिर्द्वाभिः पुरी लक्षितलक्षिणामिति द्वारत्वेन रूपितानां चक्षुरादीन्द्रियस्थानानां इंद्रियाणं चगोणनामानि तत्कार्याणि न विषयांश्चकथयन्नाह । सप्तेति तस्याः पुरः पुर्याः सप्तद्वारः उपरि क्लृप्ताः चक्षुर्द्वयश्रोत्रद्वयनासिकाद्वयमुखं चेति द्वे द्वारावधः कृते कल्पिते गुदं लिंगं चेति । किमर्थमेवं कल्पितानीत्यत्राह तस्याः पुर्याः यः कश्चन ईश्वरः तस्य द्वयगासंज्ञकेण विषयान् प्रशासीत् प्रतिगमसर्थं विषयानः वगंतुमित्यर्थः संसारिणो जीवस्य स्वपरयाथात्म्यज्ञानाभावान्मनुष्यशरीरस्यानियतत्वाच्चयः कश्चनेत्युक्तं । कथायपत्ते विषयशब्दो देशपरः देशान्प्रतिगमनार्थमित्यर्थः ॥४५॥

हेमहाभुजभुजंगभोगयोःसर्पदेहाकारयोःनवभुजयोःकस्मात्स्त्रीयोमनःनसक्तोन्नासक्तंभवेद्योभवान्नाथवर्गःदीनानांस्तोमाःतेषामा
धिमलमनर्थंअपोहितुंसर्वत्रचरति।तेनहेतुनाऽपोह्नितुंघृणयोद्गतःप्रतिष्ठापयितोयःस्मितपूर्वकोवलोकस्तेन।४१।एवंसंबंधदार्ढ्य
स्थापनायनयोःसंवादमभिधायोपसंहरन्तयोर्व्यापारमाहनारदः।तौदंपतीपुरंजनपुरंजन्यौमिथोन्योन्यंसमयंसंकेतंसमुह्यसमुदी
र्यदेहावमोन्यदृढतरंसंवंधमर्थः हेराजन्प्राचीनवर्हीःतांपुरींप्रविश्यशतंसमाःसंवत्सरान्मुमुदाते।४२।एवंजीववुध्योःजीवक
र्मानुरूपैर्वास्यपरमपुरुषसंकल्पायनदृढतरसंवंधंतत्प्रयुक्तंदेहसंवंधंचपारोक्ष्यरूपेणाभिधायप्रत्युषोःप्राचीनवर्हिषःप्राप्य

श्रीनारदउवाच॥इतितौदंपतीतत्रसमुह्यसमयंमिथः॥तांप्रविश्यपुरींराजन्मुमुदातेशतंसमाः॥४२॥उपगीयमानंललितंतत्र
तत्रचगायकैः॥क्रीडन्परिवृतःस्त्रीभिर्ह्रदिनीमाविशच्छुचौ॥४३॥सप्तोपरिकृताद्वारःपुरस्तस्यास्तुद्वेअधः।पृथग्विषयगत्य

परब्रह्मव्यतिरिक्तैवेतस्यजननार्थंप्राप्यतस्माजननार्थंसंसरतोजीवस्याहीजाग्रत्सुषुप्तिस्वप्नमरणावस्थासुदोषानुद्घाटयितुंजाग्रदाद्य
वस्थाःप्रतिपिपादयिषुःकथाव्याजेनतावत्समासतःसुषुप्त्यवस्थामाहउपगीयमानइतिललितंयथाभवतितथागायकैरुपगी
यमानःपुरंजनःस्त्रीभिःपरिवृतस्तत्रतत्रक्रीडन्शुचौआषाढेक्रीडानिमित्तश्रमापनोदनायह्रादिनींसरसीमविशदितिकथाप
क्षेर्थःपक्षांतरेतुजाग्रदवस्थायांस्त्रीभिरिंद्रियवृत्तिभिरिंद्रियवृत्तिभिस्तत्रतत्रक्रीडन्शब्दादिविषयाननुभवन्शब्दादिविषयान
नुभवन्नुव्यापृतकरणत्वात्तत्प्रयुक्तश्रमनिर्हरणायशुचौह्रदिनीमाविशदित्यर्थःह्रादिनीशब्देनपुरीतदाख्यानाडीविवक्षिताप्युर

भा०-च०

॥१६५॥

पितृसुतैः असत्वस्तनविदं स्वोभवं स्वस्तनं कात्तांनरानुभाव्यं स्वर्गादिभोगफलेननवेतीत्यसत्वस्तनविदं । एते वे निश्चयास्तातस्यानयस्य परमा
त्मान इति ॥ वासुदेवे मनो यस्य जपहोमार्चनादिषु ॥ तस्मै नतरामो मे त्रेय यदेवेंद्रत्वादिकं फलमिति स्वर्गादिसुखस्य मुमुक्षोर्हेयत्वादित्यर्थः
पशुपशुतुल्यमिति निंदति ॥ ३८ ॥ एवं निवृत्तिधर्मस्य निंदित्वा प्रवृत्तिस्वभावं स्तौति ॥ धर्म इति ॥ अत्र प्रवृत्तिमार्गे धर्मः स्वर्गादिसाधनो
यागादिरूपो धर्मः न याऽर्थकामो प्रजानंदः पुत्रमुखमस्तं मोक्षः कीर्तिः विशोका निर्दुःखा विरजा निरस्त निर्मलाल्लोकाः पुण्यलोका

धर्मो ह्यत्रार्थकामौ च प्रजानंदो मृतं यशः ॥ लोका विशोका विरजा यान्न केवलिनो विदुः ॥ ३८ ॥ पितृदेव
र्षिमर्त्यानां मृतानामात्मनश्च ह ॥ स्नेमं वदंति शरणं भवेस्मिन् यद्गृहाश्रमः ॥ ३९ ॥ का नाम वीर विख्यातं वदा
न्यं प्रियदर्शनम् ॥ न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयम् ॥ ४० ॥ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया
न मज्जेद्भुजयोर्महाभुज ॥ यो नाथवर्गाधिमलं घृणोद्धृतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥

॥ न ॥

असिद्धं तीशेषः लोकान्विशिनष्टि यान् लोकान्केवलिनो निवृत्तिधर्मस्यानविदुः ॥ ३९ ॥ किं चास्मिन्भवे गृहाश्रमं इति यद्धेतत्पि
त्रादीनां स्नेमा हि शरणमाश्रयं वदंति । पित्रादीनां गृहाश्रमिणमाराधकमाश्रित्यावस्थानात् ॥ ४० ॥ हे वीर विख्यातं कामित्वेन
प्रसिद्धं वदान्यं त्यागिनं कामार्थविहितमपि सर्जंत इत्यर्थः ॥ अतएव प्रियेषु शब्दादिविषयेषु दर्शनं दृष्टिर्यस्य तं । कथापद्ध्ते
विख्यातं यशस्विनं वदान्यं दानशीलं प्रियदर्शनं सुंदरं इत्यर्थः ईदृशं त्वादृशं निःसमं पतिं दैवात्प्राप्तं मादृशीभिः समानार

॥१६५॥

यमहं करवाणि तु यथा इति तत्राह। एतेनगणकाद शमहाभटाः ताः ललनाश्च मे मम सखायः सख्यश्चानुवर्त्तिनो भृत्या इत्यर्थः॥ अनेनेंद्रिया
णां तद्वृत्तीनां चैतन्यैकायनत्वमुक्तं। यस्त्वं ष्टंकोपंनेहिः पुरःसर इति तत्राह॥ मयि सुप्तायां सत्यामयं नागः पुरीं पालयन् जागर्त्ति। अनेन बुद्धी
न्द्रियमन आदिषु सर्वेषु सुप्तेषु निर्व्यापारेषु सत्स्वपि प्राण आपारोक्षतीति सर्वापेक्षया प्राणस्य प्राधान्यमुक्तम्॥२५॥ आस्तानामगोत्रादि
दिष्ट्या पुर्यामागतोस्यनेन मनुष्यदेहसंबंधो दैववशतो दुर्लभ इत्युक्तम्॥ अतस्ते भद्रं तावद्ग्राम्यानिंद्रियग्राह्यान् शब्दादीन वाप्स्यसि हे
अरिंदम अहं स्वबंधुभिः सखिभिरिंद्रियैः सहेत्यर्थः तान्ग्राम्यान्भोगांस्तेतुभ्यं उद्वहिष्यामि संपादयिष्यामि॥२६॥ विभो नवद्वारांद्र

दिष्ट्यागतोसि भद्रं ते ग्राम्यान् कामानभीप्ससे॥ उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम॥३५॥
इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो॥ मयोपनीतान् गृह्णानः कामभोगान् शतं समाः॥३६॥
कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदं॥ असंपरायाभिमुखमश्वस्तनविदं पशुम्॥३७॥

तां पुरीं शतं समाः संवत्सरान् मया उपनीतान् प्रापितान्कामान् गृह्णान् अधितिष्ठस्व मनुष्यदेहप्रवेशाभिप्रायेण शतमित्युक्तम्
संसारिणो जीवस्य प्रतिस्वभाववत्वात्त्रिवृत्तिनिंदापूर्वकं तत्संगमभिनंदयति पंचभिः कं न्विति। त्वत्तोन्यं कं रमये क्रीडयाम्यनेन
निवृत्तिमार्गनिष्ठो न वुद्ध्यधीन इत्युक्तम्। तत्र हेतुः अरतिज्ञं नैष्ठिकं विरक्तमित्यर्थः अत एवाकोविदं अनिपुणमनिषिद्धस्यापि
सुखस्य त्यागिनमसंपरायाभिमुखं संपरायो मनुष्यस्तदनभिमुखं मरणान्न भीतमिति वा॥ कृतकृत्याः प्रतीक्षंते मृत्युं प्रियमिवातिथि

त्वं ह्रीरिति॥ यस्याः स्त्रवांघ्रिकामनयैवाज्ञाः कामायस्यतं पतिं मुनिवद्वने रहः एकांते विचिन्वती त्वं वराहं विचिन्वती ह्रीः भूमिः उत पुरं विचि
न्वती भवानी आहोस्वित् ब्रह्माणं विचिन्वती वाक् सरस्वती अथवा विष्णुं विचिन्वती रमा लक्ष्मी रसि यदि रमा तर्हि पद्मकोशः करात्प्रा
प्तकपतितः करागे पद्मकोशाभावात् रमेमर्थः एवं रमादिरूपेणोत्प्रेक्षोक्तिः रमादीनां विस्वादिवानादिभिः हृदतः संबंधख्यापनाय कथा
सौहार्दाय वा॥ एवमग्रेप्यनुप्रयुक्तं कयासौहार्दायेति द्रष्टव्यम्॥ २८॥ एवं ह्रियाद्यस्तमसेवेन संभाव्या सां मध्ये कापि त्वं न भवसीत्याह

इहाद्य संतमात्मानं न विद्म मततः परं॥ येनेयं निर्मिता वीर पुरी शरणमात्मनः॥ ३३॥ एते
सखायः सख्यो मे नरा नार्यश्च मानद॥ सुप्तायां मयि जागर्ति नागोयं पालयन् पुरीं॥ ३४॥

नासाविति॥ हे वरोरु आसां ह्रीभवानीवाग्रमाणां मध्ये अन्यतमा नासि न भवसि॥ तत्र हेतुः यत स्त्वं भुवः स्पृशसि स्पृशंती निमेषस्पृ
क् न ह्रीरमादीनामन्यतमा देवता भुवः स्पृशंतीति भावः॥ अतो मत्प्रार्थितं कुर्वित्याह॥ अर्हसीति॥ अहं भ्रं कर्मणा अनल्पकर्म
णा वीर वरेण वीरे श्रेष्ठेन मया साकं सह इमां पुरीं नवमुखी मलंकर्तुं शोभयितुमर्हसि परं लोकं वैकुंठं यज्ञपुंसा विष्णुना सह श्री
लक्ष्मीरिव मया सह पुरीं प्रविश्य सुखमनुभवेत्यर्थः॥ २९॥

थंजितं देहे श्रेरं यौवनोपक्रमो याभ्यां ॥ समौ च तौ निर्गतावंतरावसंश्लिष्टावविसर्पौ स्तनौ व्रीडया लज्जया वस्त्रांतेन निग्रहंतीमाच्छादयंती ॥ गज इव गच्छतीति तां गजगामिनीं ॥ २४ ॥ व्रीडया सहितं यत्स्मितं तेन शोभनां मुदारां प्रतिवीरः पुरंजनः प्रेम्णा चैवोद्भ्रमंती भ्रुवौ यस्मिंस्तेन स्नि ग्धेनापांगबाणपुंखेन स्पृष्टो यस्य कटाक्षबाणस्य तेन स्पृष्टो विद्धः सन् ललितं यथा तथाह ॥ तयोः संवादोक्तिः संबंधद्वाभ्यां येति ज्ञा तव्यं ॥ २५ ॥ हे पद्मदललोचने का त्वं यद्ज्ञातीयके ति प्रश्नः कस्य संबंधिनी पुत्री असि कुतः स्थानादिहागतासि हे सति इमामुपपुरीम स्याः पुर्याः समीपे किं कर्तुमिच्छसि ॥ २६ ॥ एतेऽनु पश्चादनुवर्तिनः के एकादश महाभटाः बुद्धिमनसोर्वृत्तिकृतभेदमाश्रित्य म

नासां वरोर्वन्यतमा भुवि स्पृक् पुरीमिमां वीरवरेण साकं ॥ अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥ २८ ॥ यदेष तेऽपांगविखंडितेंद्रियः सव्रीडभावस्मितविभ्रमद्भ्रुवा ॥ त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेमानुगृहाण शोभने ॥ २९ ॥ त्वदाननं सु भ्रु सुतारलोचनं व्यालंबिनीलालकवृंदसंवृतं ॥ उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ॥ ३० ॥ इत्थं पुरंज नं नारी याचमानमधीरवत् ॥ अभ्यनंदत तं वीरं हसंती वीर मोहिता ॥ ३१ ॥ न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ ॥ आत्मनश्च पर

नसा सह इंद्रियाणां एकादशत्वादेकादश ते महाभटा रूपो येषां ते इत्युक्तं ॥ हे सुभ्रु एताः ललनाः का इति हृत्स भिप्रायेण प्रश्नः तासामानंत्यादेता इति निःसंख्याको निर्देशः पुरः सरति गच्छतीति पुरःसरो हिः सर्पः कः प्राणो वा भ्रियमाणोऽनतरनु सर्वेंद्रियव्यापारात्पुरः सर इत्युक्तं ॥ बुद्धिस्वरूप त्वात् ॥ तत्संबंधकारणेन तत्कार्यं विवित्सु प्राचीनबर्हिरादिलोकाभिप्रायकं कात्वमिति प्रश्नकथनं ॥ ज्ञानकर्मोभयेंद्रियाणां प्रवृ त्तिर्बुद्ध्यायत्ता उत इति संशयनिराचिकीर्षाभिप्रायकं कथनेनु यया इति प्रश्नकथनं बुद्धिरपि प्राणायत्तप्रवृत्तिर्व्यापनायको यं ते हिः

पु॰टी॰स्कं॰४ अ॰२५ ॥ २४० ॥

श्रीमद्भागवतेस्कंधे ४ ॥ २४९ ॥

श्री.कृ.

॥१६३॥

पंचशीर्षाणिपंचवृत्तयोयस्मिंस्तेनाहिनाप्राणेनप्रतिहारेणपालकेन॥अहेर्वायुभक्ष्यत्वेनतत्सुखत्वाद्‌हिनेत्युक्तं॥सर्वतोगुप्तंरक्षितंपर्यंता
नामवैषांइंद्रियाणांप्राणाधीनवृत्तित्वादहिनागुप्तमित्युक्तं ऋषभंपतिमन्वेषमाणां॥अनेनचेतनैकधार्यत्वंनगरस्योक्तंचविवक्षितं॥अ
ग्रेसामितिवुद्धेरुक्ततेनेनमहत्संबंधरक्षायामप्रौढप्रमदेवकार्याक्षमत्वेपितत्प्रोक्तास्तीतिसूचयति॥कामरूपिणीमितेनेनगंधरसादि
ज्ञानभेदभिन्नतांसूचयति॥२१॥तदेवप्रपंचयतिमुनासामितिवुद्धिवृत्तयोहिगंधरसादिज्ञानभेदेनतद्वीतरभेदेनचवहुविधाः
नामिवुद्धिवृत्तिभिस्तस्याःमुनसत्वाहिरूप्यते॥मुनाग्रंसोभनानासागंधात्मिकाघ्राणेंद्रियवृत्तिर्यस्यास्तां॥एवमग्रेपिदंतकपोलाननश्रोणि

स्निग्धिताघांगपुंस्त्वेनस्पृष्टःप्रेमोभ्रमद्भ्रुवा॥२४॥कात्वंकंजपलाशाक्षिकस्यासीहकुतःसति॥इमामुपपुरींभीरुकिंचिकीर्षसि
शंसमे॥२५॥कएतेनुपयायेतएकादशमहाभटाः॥एतावाल्ललनासुभ्रुकोयंतेहिपुरःसरः॥२६॥त्वंह्रीर्भवान्यस्यथवाग्र
मापतिंविचिन्वतीकिंमुनिवद्रहोवने॥त्वदंघ्रिकामाप्तसमस्तकामंकःपद्मकोशःपतितःकराग्रात्॥२७॥

पि

पादस्तनादिव्यापारजन्महर्षादीनामंवुद्धिवृत्तित्वाभासिःमुदंततादिरूपत्वंक्रियते॥नासिकादंतकपोलाननकर्णश्रोणिपादस्तनादिविशे
षणभूतानांशोभनत्वसमत्वनिम्नत्वादीनामपिस्वविशेष्यभूतनासिकाद्येगंधादिवृत्तिद्वारावुद्धिविशेषत्वंद्रष्टव्यं॥समौविन्यस्तौरचि
तौकर्णौनाभ्यांकुंडलश्रोभाद्दधतीं॥अन्यत्रमयंहिसौम्यमनइतियतःश्रुतेस्तदन्नमस्त्याहिस्युस्तनुसारेणश्यामांइत्युक्तंकुंडलश्रीसंबंधः
कुंडलालंकृतकर्णाधिकरणश्रोत्रेंद्रियश्रवणहेतुद्वारा॥२२॥एवंपिशंगनीवीकेनकमेखलासंबंधोपिस्तननाभिनितंबव्यापारज
न्यहर्षादिवृत्तिद्वारेतिद्रष्टव्यं नूपुरैःक्वणद्भिःपद्मचलनेनपुरगमनसंबंधोपिपादेंद्रियप्रतिहारा॥कथापदृश्यएवंनूपुरेरितिव

॥२४॥ ॥१६३॥

यन्मुखं वीक्ष्य रसोऽपि मुखं न भवति तत्स्वमाननमुन्नीय मह्यं दर्शय॥ आननं विशिनष्टि शोभने भ्रुवौ यस्मिन् सुतारे कनीनिके यस्मिन् व्यालंबिनो दीर्घा
येनीलालकालेषां वृंदेन संवृतं वल्गूनि वाचकानि वाक्यानि यस्मिन् शुचिस्मितं यस्मिन्। शुचिस्मिते इति पाठे संबोधनम्॥३१॥ एवमधीरव
द्विजितेंद्रियवद्याचमानं पुरंजनं नारी प्रमदा वीरं दृष्ट्वा मोहितासती वीरं तं मोहयंती अभ्यनंदत्ता नेनान्योन्यपारं तं व्यसनवत॥३२॥ यस्तृष्टे
कस्यासीति अनेन कस्य पुत्री जातेति का त्वमिति किंस्वरूपा किंनामासीति तन्न जानाति इति॥ आत्मनो मम परस्य तव वा पितृकर्तारं स्वस्यापरं सम्यग्न
विद्मः कर्तारं विशिनष्टि गोत्रं नाम च यत्कृतं येन कर्त्राकृतं भवति॥३३॥ इहास्यां पुर्यां मधुना संतं वसंतमात्मानं पुरीमेतः प्रविष्टं न वियंता

अन्वेषमाणा मृषभमप्रौढां कामरूपिणीं॥ सुनासां सुदतीं बालां सुकपोलां वराननां॥२१ समविन्यस्तकर्णाभ्यां विभ्रतीं कुं
डलश्रियं॥ पिशंगनीवीं सुश्रोणीं श्यामां कनकमेखलां॥२२॥ पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव॥ स्तनौ व्यंजितकैशोरौ
समवृत्तौ निरंतरौ॥२३॥ वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीं॥ तामाह ललितं वीरः सव्रीडस्मितशोभनां॥०॥

रं त्वां जानीमः तव आत्मनः त्वत्तः मत्तश्च परं विलक्षणं पुरुषं न विद्मः कोऽसौ परः यं न विद्म इति वहसितत्वाह। हे वीर आत्मनस्त्व
व मम च शरणं इयं पुरी येन निर्मिता तमिमर्थः इहाद्य संतमात्मानं विद्म इत्यनेन केवलं संसारिणो जीवस्य बुद्धिः न तत्स्वरूपमवि
द्याद्यावभासं गृह्णातीति तनुयाथात्म्येन सुकं न विद्म वयं वीर कर्तारं न ततः परं येनेयं निर्मिता वीर पुरीत्यनेन जीवस्य करणक
लेवरादि संपादकं चतुरं कृत्स्नजगद्दृश्यविभवलयलीलं प्रकृतिपुरुषविलक्षणं परमपुरुषमायातत्तस्त्वतश्च न विषयीकरो

रिभावेनरूप्यंतेयद्वादेहानुवंधिवर्गोत्रवाह्योपवनत्वेनरूप्यतेतत्रसंसारीपुमान्द्रुमःद्रुमवत्तद्भावविकारात्मकदेहसंहृष्टत्वात्तमाश्रिताःस्त्रियोलताद्रुमस्य
लताइतिषष्ठीसमासःतदाश्रितानामपत्यानिविहंगकुलंयोषित्संगिनालिकुलमपत्यादीनांमधुरालयानिकोलाहलःवापीकूल्यातटाकादीन्याजीवि
कादिरूपाणिजलाशयहिमनिर्झरनलिन्यादिरूपेणरूप्यंते कुसुमाकरप्रदेनपुष्पवाटिकादीनिविवर्तितानि च। चलत्प्रवालविटपेत्याम्रपनसा
दिफलजातिवृक्षौविवर्तितौ। आरण्यकमृगव्रातैरित्यनेनप्रपाल्यश्वशुरादयोवांधवाविवर्तिताःतेह्यारण्यकमृगवत्प्राणतुल्यंधनापहारिणः
धनापहारित्वमपितेषांनहिंसयाकिंतुसांत्वेनेतिद्योतयितुंमुनिव्रतैरितिविशेषणंयत्रयस्मिन्नेवंभूतेवाह्योपवनेकोकिलकूजिततुल्यकू
लत्राद्यपत्यादिमधुरगीतिभिःपांथःनिवृत्तिमार्गनिष्ठोपिस्वात्मानमहमिवदेहानुवंधिवर्गेआसक्तिंप्रापितमिवमन्यते॥१८॥ तत्रोपवनेआ

नानारण्यमृगव्रातैरनावाधेमुनिव्रतैः॥ आहूतंमन्यतेपांथोयत्रकोकिलकूजितैः॥ यदृच्छयागतां
स्तत्रददर्शप्रमदोत्तमाम्॥१९॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः। पंचशीर्षाहिनागुप्तांप्रतीहारेण

सकौवुद्धींद्रियसंख्ययोपगतोददर्शयद्यप्यत्रजीवस्यबुद्ध्यासहसंवंधदशायांवहिर्वाह्योपवनरूपदेहानुवंधिवर्गसंवंधाभावेनवुद्धेस्तत्रासक्तिर्ना
स्तितथापिभविष्यद्देहानुवंधासक्त्यभिप्रायेणकथांसोदर्श्यैवंवर्णितमित्यवगंतव्यम्। यदृच्छयागतामित्यनेनजीववुद्ध्योःसंवंधोनस्वसं
वंधोनस्वसंकल्पकृतःकिंतुदैवकृतइतिसूच्यते॥ याप्राकारादियुक्तापुरीयस्याःपुर्यावाह्योपवनेकोकिलकूजितैःपांथआत्मानमाहूतं
मन्यतेतांयदृच्छयागतांपुरींतस्मिन्नुपवनेप्रमदांचददर्शेतिवान्वयप्रकारः॥ अस्मिन्पक्षेमानुषदेहस्यदुर्लभत्वंसूचितं॥ कथापक्षेतु
स्पष्टोर्थःप्रमदोत्तमाविशिनष्टिदशभिःज्ञानकर्मेंद्रियैरेकैकंशतमनंतावृत्तयःतासांनायकैःपतिभिर्भृत्यैःसहायांतीमभिमु

सभासमाजस्थानं । चत्वरं चतुःपथः रथ्याराजमार्गः आक्रीडायतनं द्यूतादिस्थानं आपणो हट्टः चैत्यं जनानां विश्रामस्थानं ध्वजैः सुपताकाभिर्विद्रुम
वेदिकाभिश्च युक्तानां । अत्र हर्म्यस्थलीत्वेन रूपितमेव हृदयं पुनः सभाचत्वरक्रीडायतनगुणयोगात्सभादिभावेन रूप्यते हृदि ह्ययमात्मा प्रति
ष्ठित इति जीवस्य हृदयस्थानत्वमवगतं जीवाश्रितत्वाच्चेंद्रियप्राणानां सर्वेंद्रियकेंद्ररूपत्वाद्धृदयस्य सरूपत्वात्तत एव चत्वररूपत्वमपि परमा
वः क्रीडास्थानत्वात्क्रीडायतनं च चक्षुरादीनींद्रियस्थानानि हट्टः तेभ्यो हि प्राणादीनां कृष्यानुभवति पुरंजनः सुषुम्णा रथ्या राजवर्त्म छन्नो
जीवस्य मुक्तिमार्गत्वात्सुषुम्णाया पुरीतत् चैत्यं जीवस्य सुषुप्तौ विश्रामस्थानत्वात् द्वादशधा नाडिचक्रं अस्याः कर्णिकाः विद्रुमवेदिकाः ध्वजपताकाः क
नतलपाटनलानि । १६ । एवं देहं पुरभावेन रूपयित्वा विषयवर्गं देहानुबंधिकलत्रापत्यादिवर्गं वाह्योपवनं रूपयति पर्याप्त्येति वाह्योपवने प्रम
सभाचत्वररथ्याभिराक्रीडायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ १७ ॥ पुर्यास्तु वाह्योपवने दिव्यद्रुमलताकुले
नदद्विहंगालिकुलकोलाहलजलाशये ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि ॥ १८
संदर्भेति चतुर्थेनान्वयः दिव्यद्रुमाश्लिष्टलताभिराकुले नदतां विहंगकुलानामलिकुलानां च कोलाहलो येषु ते जलाशया यस्मिन् तस्मिन् । १७
हिमनिर्झराणां विप्रुषः बिंदवस्तद्वता कुसुमाकरसंबंधिना वायुना चलंतः प्रवालविटपाः प्रारवा येषां ते द्रुमैः नलिनीतटेषु संपत्समृद्धिर्यस्मि
न् । १८ । नानाविधैररण्यमृगसमूहैरनाबाधे नकुतबाधारहिते । न च हेतुः मुनिव्रतैरहिंस्रैर्यत्रोपवने कोकिलकूजितैः पांथः स्वात्मानमाहू
तं इव मन्यते एवं विषयवर्गो वाह्योपवनत्वेन रूपितः तस्य शरीराद्बहिष्ट्वात् कोलाहलशब्देन प्रावदस्य कुसुमाकरवायुशब्दाभ्यां गंधस्पर्शयोः
चलत्प्रवालेति सौंदर्यवर्णनेन रूपस्य । जलाशयहिमनिर्झरनलिनीशब्देन रसस्य च प्रत्यभिज्ञानाच्च । तद्विशेषाः स्रक्चंदनादयो दिव्यलतना

आ.बृ.

॥१६१॥

एकदास्म कृतविशेषपरिपाकदशायां हिमवतो दक्षिणेषु सानुषु कर्मतत्फलोत्पत्तियोग्येषु कर्मक्षेत्रेषु भारतवर्षेषु इत्यर्थः पुरं मनुष्यशरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्मिन् अंधपङ्ग्वादिदोषरहितां इत्यर्थः कयापत्तेव क्षमाणप्रकारादिसर्वेन्द्रियोपयुक्तानवभिर्द्वाभिर्नवभिः रंध्रैस्सर्वैर्यथोक्तदयनात्मिकादयमुखपापूपस्थरूपलक्षितां पक्षांतरे स्पष्टं हृद्दृशौ अभिव्यक्तसर्वेंद्रियसविषयोगभोगापयुक्तं मनुष्यशरीरमुपलक्ष्यवानित्यर्थः ॥१३॥ कानि लक्षणानीति विवित्सायां तानि वदंस्तां पुरीं मनुवर्णयति त्रिभिः प्राकारेत्यादि ॥ यद्यप्यत्र प्राकारादिस्ताधर्म्येणारूपणीयाः पदार्थाः शरीरेण संततयापि किंचित्साहृश्यमवलंब्य कथा सोऽदर्थाय प्राकारादीननुवर्ण्यते

सएकदा हिमवतो दक्षिणेष्वथ सानुषु ॥ ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम् ॥१३॥ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ॥ स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतोगृहैः ॥१४॥ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ कॢप्तहर्म्यस्थलां दीप्तां श्रिया भोगवतीमिव ॥१५॥ ॥

परिखैरिति पुंस्त्वमार्षम् ॥ अस्य या परवाग्निंगतायां परिखाभिरिति स्यात् ॥ अक्षाः गवाक्षाः अत्र त्वगादयः प्राकारत्वेन रूप्यंते रोमपंक्तिरुपवनं स्कंधो परिभागो ह्यालः रुधिरौघः परिखाः नवरंध्राणि प्रक्षाः अक्षिपक्ष्म तोरणं स्वर्णादिशृंगैः शिखरैर्युक्ता ये गृहास्तैः संकुलां व्याप्ताम् ॥ अत्र मलाधारादीनि षट्चक्राणि गृहत्वेन रूप्यंते राजसत्वादिभावाः शृंगत्वेन विवक्षितः ॥१४॥ नीलादिभिः कॢप्ता हर्म्यस्थली यस्याः ॥ हर्म्यस्थलीति हृदयं विवक्षितं हृदयगताः शांतेक्वनाड्यः केसरा वा नीलादिभावेन रूप्यं ॥ अतो नानाकारनाडीभिर्व्याप्तत्वा

॥१६१॥

ज्ञातं वेदितुं जीव प्रेरणादिलक्षणं यस्य सः जीवः परं तं अस्यानुभवं विहित्वादिति भावः॥ कथापक्षे तु राजवत्सस्यापि विपुलकीर्त्यादियुक्तइत्यर्थः
॥ स पुरंजनः प्रभुः करणाधिपत्वात् करणं भोगायतनं शरीरं एकदापक्षिनिवासस्थानमन्वेषमाणः पृथिवीकर्मफलोदयतद्भोगायतनप्र
देशं परिणामरूपं ब्रह्मांडं वभ्राम देवादिस्थावरांत शरीरेष्वनुप्रविष्ट॥ प्रकृतिमंडले संसमृतीत्यर्थः कथापक्षे भूमंडलस्य पुराण्यनुप्रवि
श्य पतत्रतत्त्वकौचितान्तं निवसन्हृतवान् पृथिवी च चारेत्यर्थः॥ यदा च स्वस्यानुरूपं शरणं देवमनुष्यादिशरीरं नाविंदत नालभत किंतु
तिर्यक्कपादपादि शरीरमविंदत विमनाइव वभूव॥ पारयादिमशरीरेषु चैतन्यानभिव्यक्तेर्विमनाइवेत्युक्तं निश्चेतनमइवाभूदित्यर्थः

सोन्वेषमाणः शरणं वभ्राम पृथिवीं प्रभुः॥ नानुरूपं यदाविंदद्दभूत्सविमनाइव॥११॥ न
साधु मेने ताः सर्वाः भूतले यावतीपुरः॥ कामान्कामयमानोसौ तस्य तस्योपपत्तये॥१२॥

ननु दुःखितमनाइति देहात्माभिमानिनो जीवस्य निहीनशरीरस्यापि प्रीतिविषयत्वात्॥ कथापक्षे तु दुःखितमनाइवेत्यर्थः॥११॥
कामान् भोग्यान् शब्दादीन्सर्वानपि कामयमानोसौ पुरंजनः तस्य तस्य शब्दादेर्विषय॥स्योपपत्तये लब्धये भूतले यावत्यः पुरस्ताः
सर्वाः पुरः साधु न मेने शब्दादिसर्वविषययोपभोगोपयुक्तशरीराणि कामयमान॥ केषुचिच्छरीरेषु केषांचिदिंद्रियाणामनभि
व्यक्तत्वादनभिव्यक्तकतिपयेंद्रियशरीराण्यनुप्रविशन् तत्र सर्वविषयलाभाभावात्तानि न साधु मेन इत्यर्थः कथापक्षे तु तत्र पुरिके
षांचिद्भोग्यवस्तूनां सत्वेपि सर्वेषामभावान्न साधु मेन इत्यर्थः॥१२॥

सक्रियमाणस्तत्वोपदेशः सुप्रतिष्ठितः स्यादिति तत्र जीवो राजत्वेन शरीरं पुरत्वेन परमात्मा सखित्वेन बुद्धिर्भार्यात्वेन च निरूप्यते। तत्र पुरंजनादीन्स्व
यमेवेतः पंचमाध्याये व्याख्यास्यति॥ तथापि सुखग्रहणाय किंचिद्व्याख्यास्यामः तत्र हे राजन् पुरं शरीरं जनयति निर्मापयतीति पुरंजनः क
श्चिद्राजा स्वकर्मभिः पुरस्थानीयशरीरोत्पादकजीवस्थानीयो विवक्षितः॥ आसीदित्यनेन निरूपणीये जीवे आदिमत्त्वाविवक्षिता। तं विशिन
ष्टि बृहच्छ्रवाः बृहद्विस्तृतं श्रवः कीर्तिर्यस्य निर्वाणमयमेवायमात्मा प्रजापतिवाक्ये अपहती वाक्ये अपहतपाप्मा विजरो विमृत्युर्वि
शोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः स्थाणुरचलोयं सनातनः
इति श्रुतिस्मृतिप्रसिद्धकल्याणविशिष्टः इत्यर्थः तस्य पुरंजनस्याविज्ञातः नामधेयं यस्य तथाभूतः कश्चिद्विज्ञानचेष्टितः सखा आसी
त्॥ अत्र परमात्मस्थानीयं मित्रं परमात्मा हि जीवस्य मित्रं श्रूयते। माता पिता भ्राता निवासः शरणं सुहृद्गतिः नारायण इति। एवं हि
ताचरणशीलं सखायं परमात्मानं तदाऽज्ञामतिलंघ्य संसारी जीवः नामतोपि न जानाति किमुत स्वरूपं गुणविभूतिभिरिति ख्या
पनाय अविज्ञाननामेत्युक्तं यद्वा सख्येत्यनेनाभिप्रेतं यद्दोषानवेक्षणेन हिताचरणशीलत्वं तत्ख्यापयितुमविज्ञाननामेत्युक्तं॥ अ
विज्ञान इति गतिबुद्धिशब्दार्थस्य ख्यातिकर्तरि क्तः अविज्ञातेत्यर्थः अविज्ञाता सहस्रांशुरिति अविज्ञातप्रशादोहि नाम सहस्रभगव
न्नामतया विनियुक्तं॥ तत्त्वस्याश्रितान्स्वसमत्वेनानुसंधाय तद्धितैषिणः परोऽपारकारुण्यपरवशा आश्रितदोषान्न जानाती
त्यविज्ञातेत्यभियुक्तैर्व्याख्यातम्। एवं च विपुलापराधवत्वेपि संश्रयणमात्ररूपकिंचिदानुकूल्येन निरिरक्षिषुरित्यर्थः इह त्वविज्ञा
तशब्दः कर्तृसाधनः क्तांत इति विशेषः॥ अविज्ञानचेष्टित इति छेदे जीवेनाविज्ञातं चेष्टितं अंतःप्रविश्य नियमनादिरूपं य
स्य सः इत्यर्थः कथापक्षे तु अमैरविज्ञानचेष्टित इत्यर्थः विज्ञानचेष्टित इति छेदे तु प्रसिद्धं जगद्व्यापाररूपं चेष्टितं यस्य सः यद्वावि

ननुउद्वैनुम्रियतेनमरिष्यसिदेवानदृहदेशिपथिभिःस्वर्गेभिःपत्रंपंतिसुकृतोनापिदुष्कृतःतत्रत्वादेवःसविताद्धात्वेतियागीयसंज्ञ
पनस्याहिंसात्वाभावश्रवणात्रहात्विकदुःखजननत्वेपिहीमपश्रुजन्मनिवर्त्तनद्वारास्वर्गोपभोगभोगपमुद्दरतरजन्मसंपादकत्वेननदा
त्विकदुःखादिजनकोधयान॥कर्णछेदनक्षारादिकर्मकारपितृचिकित्सकपित्रादिवद्धितकारिणिसंज्ञपितरिपश्रूनांकोधासंभ
वाच्चकथमेवमुच्यतेइतिचेन्नकर्वृफलेषुवैराग्यजननार्थत्वेनान्यपरत्वात्तद्दुक्तेः॥अतएववैराग्येणाद्ययायान्यापदेशमुखेनाध्यात्मो
पदेशात्मकेतिहासंप्रस्तौतिप्रतिजानीते।अत्रेति॥अत्रनिरतिशयपुरुषार्थतत्साधनमाद्यज्ञानरूपेसंकटेनतत्वहितपुरुषार्थनिष्पत्तीयकं

अत्रेतिकथयिष्यामिइतिहासंपुरातनम्॥पुरंजनस्यचरितंनिबोधगदतोमम॥९॥आसीत्पुरं
जनोनाममराजाराजन्बृहच्छ्रवाः॥तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः॥१०॥

पुरातनंपुरंजनाख्यराजचरित्रात्मकंइतिहासंतेतुभ्यंकथयिष्ये॥गदतःइतिहासंसम्यक्कथयतःममसकाशान्निबोधअवहि
तमनाःशृणु॥९॥एवंप्रतिज्ञायेतिहासंप्रस्तौति॥आसीदिति॥अत्रान्यापदेशेनाध्यात्मोपदेशःक्रियते॥ननुसाक्षादेवाध्यात्मोप
देशःकिंनक्रियतेसाक्षान्तदुपदेशेपिवैराग्योदयसंभवात्उच्यतेदेहात्माभिमानस्वतंत्रात्माभिमानग्रस्तस्यतंहितपुरुषार्थाद्यन [त्व]
भिज्ञस्यवैषयिकमेवसुखंपरमपुरुषार्थमभिमानस्यहठागतेतोपदेशःक्रियमाणोपिनसुप्रतिष्ठितःस्यादिमालोच्यविस्म
मम्मत्तत्स्त्रीपुनपुंसकगर्भजन्मजरामरणजाग्रत्स्वप्नसुषुप्त्याद्यात्मकसंसारमनुवर्ण्यतत्रदोषानुद्घाट्यहेयताबुद्ध्युत्पादनद्वा

भा॰ च॰

॥ १५८ ॥

एवं केवलकर्मणा मपुरुषार्थसाधनेनतांप्रतिबोधितः उद्विग्नमनाराजा हवेतिहे महाभागकर्मभिराहितात्राधीर्यस्य सोहं परं श्रेयो नजानाम्यत
स्त्वंविमलमंतःकरणानैर्मल्यापादकं ज्ञानं मेमह्यं ब्रूहि उपदिशयेनज्ञानेनाहंकर्मरूपाद्बंधनाद्बंधपाशान्मुच्येयमुक्तोभवेयम् ॥ ५ ॥ कूटध
र्मेषु अतिवात्स्य ॥ धर्मेष्ववर्जनीयप्रवृत्तिधर्मेष्वितिपावत् ॥ अतएव संसारद्वारेषु भ्राम्यन्भ्रमतोकुर्वन्पुत्रादिष्वर्थे धीःपुरुषार्थबुद्धिर्यतएव
मूढोमाहृशः परं श्रेयोनविंदते ॥ ६ ॥ कर्मफलेषु वैराग्यं उत्पाद्यतत्रस्वविद्यामुपदेष्टुं योगानुभावेनयज्ञपशूनस्मैप्रदर्शयन्नाह ॥ भोभोइ

राजोवाच ॥ नजानामिमहाभागपरंकर्मापविद्धधीः ॥ ब्रूहि मेविमलंज्ञानं येनमुच्येयकर्मभिः ॥ ५ ॥ गृहेषु
कूटधर्मेषुपुत्रदारधनार्थधीः ॥ नपरंविंदतेमूढोभ्राम्यन्संसारवर्त्मसु ॥ ६ ॥ श्री भ भ वा वा भोभोः
प्रजापतेराजन्पशून्पश्यत्वयाध्वरे ॥ संज्ञापितान्जीवसंघान्निर्घृणेनसहस्रशः ॥ ७ ॥ एते त्वां
संप्रतीक्षंतेस्मरंतोवैशसंतव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ॥ ८ ॥ ८ ॥ ॥ ॥ ॥

ति ॥ हे हे प्रजापतेराजनत्वआत्मनस्त्वश्रोतृलाभप्रयुक्तादरात्संभ्रमाद्वा भोभोइतिद्विरुक्तिः यद्वा हे प्रजापते हे राजन्नितिविशेषणा
द्वयाभिप्रायेणद्विरुक्तिःनिःकरुणेनत्वयाऽध्वरेसंज्ञपितान्मारितान्जीवसंघरूपान्पशून्सहस्रशःपश्य ॥ ७ ॥ एतेपशवः
तववैशसंत्वत्कृतांपीडांस्मरंतःत्वांसंपरेतंमृतंप्रतीक्षंतेकदायंमरिष्यतीतिप्रतीक्षंतइत्यर्थःयदाचत्वंमरिष्यसितदैतेपशवउत्थितमन्यवः
संजातक्रोधाः अयःकूटैर्लोहवद्दृढविशीर्योःशृंगैस्त्वांछेत्स्यंतीति ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ १५८ ॥

इति श्रीचतुर्थे चतुर्विंशे भाष्ये २३॥ एवं रुद्रोपदिष्टभगवत्स्तोत्रं तदाराधनप्रकारेषु प्रचेतस्सु तपश्चरत्सु प्राचीनबर्हिर्नारदोपदिष्टाध्यात्मपारोक्ष्यः पुत्रेष्वारोपितमहाभारो भगवंतमुपास्य तल्लोकमगादित्याह मुनिः पंचभिरध्यायैः इत्युक्तप्रकारं संदिश्य उपदिश्य भगवान् रुद्रः बर्हिषदैः सम्यक् पूजितः राजपुत्राणां प्रचेतसां पश्यतां सतां तत्रैवांतर्हितवान् ॥१॥ ततः रुद्रेण गीतं भगवत्स्तोत्रं जपंतः प्रचेतसो वर्षाणामयुतं दशसहस्रं वर्षपर्यंतं जले तस्थुः पाकं पचतीति वन्हिर्दैत्याः तपश्चक्रुरित्यर्थः ॥२॥ प्राचीनबर्हिषं इति॥ हे क्षत्त विदुर ततः

इति श्रीभागवते महापुराणे चतुर्थस्कंधे चतुर्विंशोऽध्यायः ॥२४॥ श्रीमैत्रेय उवाच ॥ इति संदिश्य भगवान् बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥१॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥२॥ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥३॥ श्रेयस्त्वं कतमद्राजन् कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥४॥

आत्मविज्ञानदो भगवान् आगम्य केवलं कर्मस्वेवासक्तचित्तं प्राचीनबर्हिषं बोधितवान् ॥३॥ बोधनप्रकारमेवाह श्रेय इति । अप्रचेतसो कथामसमाप्यैवांतरा प्राचीनबर्हिषः कथाऽवशिष्टा प्रस्तूयते इत्यवगंतव्यम् ॥ हे राजन् आत्मनः स्वस्य कर्मणाऽनुष्ठीयमानेन यत् पारिकर्मीणकं तमत्र श्रेयः किं वा श्रेयः साधनमीहसे इच्छसि दुःखनिवृत्तिः सुखावाप्तिश्च हि इष्यते न हि इह कर्मणि तदुभयं नेष्यते केव

श्रेयसामपि मध्ये ज्ञानस्यैव निरतिशय पुरुषार्थरूपमोक्षसाधनत्वेन निरवद्यातिशयत्वं वदन्नन्तत्साधनतामस्य स्तोत्रस्याह ॥ श्रेयसामिति द्वाभ्यां सर्वेषामपि श्रेयसां मध्ये ज्ञानं भगवद्भक्त्यात्मकं ज्ञानमेव निःश्रेयसं नितरां श्रेयः स्वरतम् ॥ कुतं ज्ञानिनो भगवद्भक्त्यात्मकज्ञानवंतः उपायांतरैर्दुस्तरमपि अस्मनाणीवं दुःखसागरात्मकं संसारं तरंति ॥ ७५ ॥ यः पुमान् मयागीतमिदं स्तोत्रं श्रद्धया युक्तः अधीयान अध्ययनं कुर्वाणः उपायांतरैर्दुराराध्यमपि हरिमाराधयति हरिविषयां भक्तिं लभंत इत्यर्थः ॥ ७६ ॥ ततो मयायजीतं

श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परं ॥ सुखं तरंति दुष्पारं ज्ञाननौर्व्यसनार्णवम् ॥ ७५ ॥ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम् ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७६ ॥ विंदते पुरुषोमुष्मात् यद्यदिच्छत्यसत्वरन् ॥ मद्गीतगीतात्सुप्रीतात् श्रेयसामेववल्लभात् ॥ ७७ ॥ य एतत्कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥ ७८ ॥ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः परमात्मनः स्तवम् ॥ जपंत एकाग्रधियस्तपो महत्चरध्वमंते तत आप्स्यथेप्सितम् ॥ ७९ ॥

तस्य गीतात् भावेकः गानाद्धेतोः सुप्रीताच्छ्रेयसां सर्वपुरुषार्थानां वल्लभात् अमोरमुष्मादक्ताराधितात्परमपुरुषाद्यद्यच्छ्रेयः इच्छति असत्वरन्नस्थिरः सन्नन्तत्सर्वं विंदति लभते ॥ ७७ ॥ यः पुमानिदं कल्य उषसि उत्थाय प्रांजलिः शृणुयादन्यान् श्रावयेद्वा समर्त्यः सर्वैः कर्मरूपैर्बंधनैर्मुच्यते मुक्तो भवति ॥ ७८ ॥ हे नरदेवनंदनाः मयागीतमिदं परमपुरुषस्य स्तवं जपंतः समाहितचित्ताः तपश्चरध्वं कुरुत

त्मस्थं धर्मं स्ववर्णाश्रमोचितं धर्ममनुतिष्ठंतः भगवत्यर्पितांतःकरणाः संतत्यर्थः ॥ ६९ ॥ असकृत्पौनःपुन्येन हरिं ध्यायंतो गृणंतः स्तुवं
तः तमेव सर्वभूतेष्ववस्थितमात्मस्थं पूजयंतो नरा आत्मतयावस्थितं भगवंतं पूजयध्वं सर्वभूतेहि ष्ववस्थितं ह्यनेनात्मना तदेतदात्म्यमिदं स
र्वमिति श्रुत्यर्थोनुसंधीयते ॥ आत्मानमिमनेनेनतदात्मेति श्रुत्यर्थः आत्मस्थमिमनेनेन तत्त्वमसीति श्रुत्यर्थोनुसंहितः अत एव तस्य
त्वाहतुपदप्रतिपादि एव हिंसाधर्व इति श्रुपत्तु धर्म उक्तः ॥ ७० ॥ योगादेशं नामेन स्तोत्रमासाद्य पावतः प्राप्य मनसा धारयंतः समाहितचि

त्तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ॥ पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिम् ॥ ७० ॥ योगादेशमुपा
साद्य धारयंतो मुनिव्रताः ॥ समाहितधियः सर्वे एतदभ्यसताहृताः ॥ ७१ ॥ इदमाह पुरास्माकं भगवान्विश्वसृक्
पतिः ॥ भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षताम् ॥ ७२ ॥ तेवयं चोदिताः सर्वे प्रजासर्गे प्रजेश्वराः ॥ अने
न ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥ ७३ ॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् ॥ अचिराच्छ्रेय आप्नोति

ताः मौनव्रतनिष्ठाः आदृता आदरयुक्ताः सर्वे यूयमभ्यसत ॥ ७१ ॥ स्तोत्रस्य संप्रदायिकत्वमाह इदमिति ॥ विविश्वसृजां मरीच्या
दीनां पतिर्विश्वस्रष्टा ब्रह्मा आत्मजानां सृष्टुमिच्छतां भृग्वादीनामस्माकं पुरा आह उपदिष्टवान् ॥ ७२ ॥ तेउपदिष्टास्तोत्रा वयं प्रजा
सर्गे निमित्ते प्रचोदिताः अनेन स्तोत्रेण निरस्ताज्ञानाः विविधाः प्रजाः सिसृक्षन्सृष्टवंतः ॥ ७३ ॥ पुमान्समाहितचित्तो वासुदेवः
परमयनं प्राप्य प्रापकमाधारश्चयस्य तथाभूतः इदं नित्यदा जपन्नाशु स्वसमाहितं श्रेयः प्राप्नोति ॥ ७४ ॥ ॥ ॥ ॥ ॥ ॥

वैः भ्रशं प्रमत्तं विषयेषु शब्दादिषु कालन्नम मति कामुकं प्रात्रेपि विषयेषु प्रवृद्धलोभं जनमप्रमत्तः कालरूपस्त्वं सहसा वल्लादंतको भिपद्यसे प्राप्नो
षि यथा क्षुधा लेलिहानः जिह्वया एकांतो सृक्कणी परि लिहन्न् सर्पो मूषक भिवेत्यर्थः ॥६६॥ स वं सर्वो त्कृष्टत्वात्पंडितो बुद्धिमान् भवेत्तर्हि को वा त्वत्पदाब्जं विजहा
ति न को पीत्यर्थः कुर्वन्नतः यस्त्वावमनोऽनादरो न मम मं तेन व्ययमानं केतनं शरीरं यस्य त्वत्परिचर्यां विना दृष्ये व शरीरं मन्वान इति भावः अत
एवास्मद्गुरुर्विशंकया त्वत्पदाब्जमेवार्चयति आराधयति स्म कोसौ नतु गुरु यां मामर्चयति स्मत माह यदिति यस्य हि ब्रह्मणो नोपप
त्तिः हिननिष्पत्तिं विना मनवश्चतुर्दश मनवो यस्य दिवसनिष्पत्तिरूपाः संति स ब्रह्मैवास्मद्गुरुः पितेत्यर्थः ॥६७॥ अतस्त्वमेव प्राप्य इति वदन्नु

प्रमत्तमुच्चैरिति कृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं ॥ त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोहिरिवाखुमंतकः ॥६६॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेवमानव्ययमानकेतनः ॥ विशंकयास्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥६७॥ अथ त्वमसि नो ब्रह्मन्परमात्मन्विपश्चिताम् ॥ विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः ॥६८॥ इदं जपत भद्रं वो विशुद्धा नृपनंदनाः ॥ स्वधर्ममनुतिष्ठंतो भगवत्यर्पिताशयाः ॥६९॥

पसंहरति ॥ अथेति हे ब्रह्मन्परमात्मन्कृत्स्नं विश्वं रुद्रभयात् त्वदात्मक स्य रुद्रस्य भयात् ॥ ध्वस्तं नाशं प्राप्नं तत विपश्चितां नोऽकुतश्चिद्भयाना
म् कुतोपि भयं यस्याः सा ऽकुतश्चिद्भया गतिरसीति कृत्स्नं विश्वं रुद्रभयादिति पृथोक्ता निर्देशो रुद्रांतरसामान्याभिप्रायकः ॥६८॥ एवं स्वस्मै
ब्रह्मणा पठितं स्तोत्रेण भगवंतं प्रसादयेत्यपि प्रचेतोभ्यः उपदिश्य तस्मिन्स्तोत्रे तदर्थे तान्प्रोत्साहयन्नाह इदमिति हे नृपनंदनाः विस्रब्ध
विश्वासयुक्ताः कर्मविद्भिः इदं भगवत्स्तवनं जपत अर्थतः शब्दतश्चानुसंदधध्वं अनेन जपेन वः युष्माकं भद्रं मंगलं भविता ॥ तद

त्वं पुरुषवद्वस्तुकं तत्त्वपुरुषशब्दप्रवृत्तिनिमित्तं दर्शयन्पुरुषशब्दवाच्यतामाह ॥ सृष्टमिति यतः यो भगवान्स्वशक्त्या प्रकृतिरूपया सृष्टमिदं चतुर्वि
धं देवमनुष्यतिर्यक्स्थावरभेदेन पुरं शरीरमात्मनोऽंशकेनांशभूतेन जीवेन जीवांतरात्मतया पुरमनुप्रविष्टः अथो ऽतः तं भगवंतं अं
तः पुरस्थानः जीवांतरात्मतया संतं पुरुषं विदुः पुरुषशब्दवाच्यं विदुः तथा चोक्तं ॥ पुंसंज्ञे वै शरीरेस्मिन्शयनात्पुरुषो हरिः शकारस्य षका
रो ऽयं व्यत्ययेनेति ॥ कोसावात्मनोंऽशः यदंतदात्मतया पुरमनुप्रविष्टः तत्राह यः जीवः हृषीकैरिंद्रियैः सारघं सारघा मधुमक्षिका सा
रं पुष्पादिगतं घ्रंति गच्छंति प्राप्नुवंतीति व्युत्पत्तेः ॥ अत्र सारघशब्दस्तदुपार्जितमधुनि लाक्षणिकः मधुकरोपार्जितमाध्विव मधुकर

सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ॥ अथो विदुस्तं पुरुषं संतमंतर्भुंक्ते हृषीकैर्मधुसारघं यः ॥ ६४ ॥ स
एष लोकानतिचंडवेगो विकर्षसि त्वं खलु कालयानः ॥ भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः ॥ ६५ ॥

स्थानीयैरिंद्रियोपार्जितशब्दादिभोग्यजातं भुंक्ते ऽनुभवतीति समस्तार्थः ॥ अत्र जीवांतरात्मतयानुप्रवेशकथनं नियतदेशकालकर्मा
द्यनुगुणेन जगद्रक्षणार्थानुप्रवेशाभिप्रायकम् ॥ ६४ ॥ अथ संहर्तृत्वमुपपादयति ॥ स इति ॥ य एष कालशरीरकस्त्वमत्युग्रवे
गः कालवेगमनुसंदधानामायुःक्षयनिमित्तं भयोत्पातादालक्ष्यमाणरूपः अविषह्यवेगो वायुर्मेघपंक्तीरिव भूतैरेव भू
तानि कालयानः पीडयन् विकर्षसि संहरसि ॥ ६५ ॥ विकर्षणप्रकारमेवाह प्रमत्तमिति ॥ इति कृत्यमेव कर्तव्यमिति चिंतया

॥ भा०स्कं०८ ॥

॥ १५६ ॥

अविक्रियत्वस्यनेनतुउपादानकारणत्वमुपपत्तिंविभर्तीतिभर्तृत्वंस्वपयतीतिसंहर्तृत्वंचेतित्तद्वेदोपपादयतिचतुर्भिः तत्रतत्त्वमितुपादानमुपपा
दयतित्वंउक्तविधस्वरूपरूपगुणविभूतिस्त्वंपुरुषआद्यआदौसृष्टेः पूर्वंभवः आद्यः सृष्टेः पूर्वंप्रलयदशायामासीदित्यर्थः कथंभूत?
आसमित्यत्राह सुप्तशक्तिः सुप्ताः स्वस्मिन्लीनाः शक्तयः चिदचिदादिशक्तयोयस्य ॥ अतएवएकः असहायः वद्धमाणनामरूपविभाग
निबंधनवहुत्वप्रतिसंबंधिनामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टत्वनासहायएवावस्थितइत्यर्थः ॥ ततस्तयास्वापृथक्सिद्धवि
शेषणभूतयाशक्त्यारजःसत्वतमइतिद्वैवर्णं ॥ तदपेक्षयाविभिद्यतेइत्येकवचनंरजःसत्वतमांसिविभिन्नानिविभक्तान्यभवन् ॥ एतद

त्वमेकआद्यःपुरुषःसुप्तशक्तिस्तयारजःसत्वतमोविभिद्यते ॥ महानहं
खंमरुदग्निवार्धराः सुरर्षयोभूतगणाइदंयतः ॥ ६२ ॥ श्रीरामानमः

त आदेर्महान्महतोहंकारस्त्रिविधः ततोभूतादिसर्गः ॥ क्रमेणखमाकाशः ततोमरुद्वायुस्ततोग्निः ततोव आपः ततोधरापृथिवीतेभ्यः
स्वादिभ्यः पंचीकृतेभ्योन्यानिद्वारासुरावृत्तयाहयः ॥ अपयोमरीच्यादयः अन्येमनुजतिर्यगादयः अभवन् ॥ सृष्टेः पूर्वंस्वस्मिन्नुपसंहृ
॥ र ॥
तचिदचिच्छक्तिनामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकस्त्वमेकएवकारणतयावस्थितोपेक्षितकर्तृकरणाद्युपकरणजातः स
र्वतः सर्वशक्तिः स्वलीलैकप्रयोजनः स्वात्मिकांमायांजीवद्वारानुप्रविश्यमायाशरीरकस्वात्मानमेवसंकल्पमात्रेणमहतादिपृथिव्यं
तसमष्टिरूपेणदेवादिचतुर्विधव्यष्टिभूतरूपेणचपरिणमय्यतत्पर्यंततन्नामरूपभागासीदित्यर्थः ॥ ६२ ॥ ॥ ॥ ॥

॥ रामः ॥

॥ १५६ ॥

कर्मवश्यत्वमुक्तम्॥ अथैवेनश्लोकद्वयेनब्रह्मवनंब्रह्मसवृक्षआसीद्यतोद्यावापृथिवीनिष्टतक्षुः मनीषिणोमनसाब्रवीमिवःपरंध्यतिष्ठद्भु
वनानिधारयतीतिश्रुत्यर्थउक्तः अत्रकिंस्विद्वनमित्यादिनावृक्षशब्दोपलक्षितमुपादानंवनशब्दोपलक्षितमाधार॥ यदध्यतिष्ठदि
तिनिमित्तंचकिमितिप्रश्नपूर्वकंब्रह्मणएवोपादानत्वनिमित्तत्वादिनान्यस्यैतिप्रतिज्ञापूर्वकोत्तरत्वमस्यवाक्यस्यावगम्यते। यतोवृक्षश
ब्दोपलक्षितोपादानाद्ब्रह्मणोद्यावापृथिव्युपलक्षितंकृत्स्नंजगन्निष्टतक्षुः निष्टतक्षुःससर्जेत्यर्थः॥६१॥ ईदृशभगवत्स्वरूपविषय
कंभक्त्यात्मकंज्ञानंभागवतसंगादेवलभ्यतइत्युक्तम्॥ इदानींभागवतसंगवतांवर्णाश्रमोचितानभिसंहितधर्मानुष्ठानमात्मयाथा

क्रियाकलापैरिदमेवयोगिनः श्रद्धान्विताःसाधुयजंतिसिद्धये॥ भूतेंद्रियां
तःकरणोपलक्षणंवेदेचतंत्रेचतएवकोविदाः॥६२॥ श्रीरामजी

त्म्यज्ञानयोगश्चभक्त्यंगमित्याह॥ क्रियाकलापैरितियेयोगिनःप्रकृतिविविक्तात्मयाथात्म्यज्ञानयोगएषामस्तीतियोगिनः श्रद्धायु
क्ताःसंतःक्रियाकलापैःस्ववर्णाश्रमोचितकर्मअनभिसंहितफलैरिदमेवोक्तविधमेवभगवत्स्वरूपंसिद्धयेमुक्तयेसाधुसम्यग्य
जंतिआराधयंति॥ इदंकथंभूतंभूतादिभिरस्माकंतैःसूक्ष्मतमैरपेहपलक्ष्यतेइत्युपलक्षणं अप्राकृतोक्तविध दिव्यमंगलविग्रह
विशिष्टमित्यर्थः तएवयोगिनःवेदेकर्मयोगप्रकाशकेतंत्रेआत्मयाथात्म्यज्ञानयोगप्रकाशकेसांख्यतंत्रेचकोविदाःकुशला
भवंति॥६२॥

ग्रंहोपहेत्वभावाद्वहिर्ह्रासादिदोषैर्नस्पृशति। यथा जलाधारेषु विषयेषु वस्तुतोनवस्थितस्तत्र दृश्यमानोप्यंशुमान् दोषहेत्वभावान्न तद्व
द्धिह्रासादिभिर्न स्पृश्यते न ह्रदिति ९ ॥एवं बिम्बाधारत्वमुक्तं अथ बिम्बस्य निमित्तमुपादानं च कारणत्वं एवेत्याह। यइति यो भवानिदं विश्वं स्वा
त्मकं बहुरूपया बहुधा परिणामशीलया मायया सृजन् बिभर्ति पुनः क्षपयति संहरति तथाप्यविक्रियः निर्विकारः कथंभूतया मायया आत्म
दुःस्थया आत्मसु जीवेषु दुःस्थया दुष्टाश्रया भवति तथा स्थितया संसाररूपानर्थकारित्वेन स्थितयेत्यर्थः यया आत्मदुःस्थया मायया यद्यस्मा
दीश्वराद्भेदबुद्धिः स्वनिष्ठबुद्धिः सदिव सदर्थविषयज्ञानमिव भवति तं त्वा आत्मतंत्रं प्रतीमहि प्रपद्यामीत्यर्थः तत्रात्मदुःस्थयेति जीवे
षु दुःस्थत्वं वदतानेन परमात्मनि अनर्थकारित्वमुक्तं यद्भेदबुद्धिः सदिवेति स्वतंत्रात्मभ्रमहेतुत्वमुक्तं ॥इदं देहात्मभ्रमहेतुत्वस्याप्युपल

यो माययेदं पुरुरूपयासृजन्बिभर्ति भूयः क्षपयत्यविक्रियः यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगव
त्प्रतीमही ॥६१

क्षणं। अविक्रिय इत्यनेनानुपादानत्वमुक्तं। निषेधो हि प्रसक्तिपूर्वकः प्रसक्तिश्चोपादानत्वे न निमित्तस्य विकारप्रसक्त्यभा
वात् अवस्थाविशेषवतः प्रागवस्थायोगोप्युपादानत्वं तत्तस्यावस्थायोगित्वप्रयुक्तविकारप्रसक्तौ चेतन्निषेधोक्तिः विकारस्य स्वाष्ट
यकृति द्वविशेषणीभूतचेतनाचेतनगतत्वाद्विशेष्ये विकाराभावादविक्रिय इत्युक्तं ननु निमित्तकारणस्यापि कुलालादेः स्वेहस्त्र
मादिविकारदर्शनात्तदवस्थस्मिन्नपि निमित्तत्वप्रयुक्तविकारो निषिध्यत इति चेन्न ॥तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोसृजतेति श्रु
त्यासंकल्पमात्रेण भगवत्सृजतो विकारप्रसक्त्यभावात्सृजन्निति निमित्तत्वमुक्तं। कर्तृत्वमेव हि निमित्तत्वम् ॥तत्र विशिष्टत्वाकारेणो
पादानत्वं निष्कृष्टविशेष्याकारेण निमित्तत्वमिति विवेकः बिभर्ति क्षपयतीति रक्षितृत्वं चतमस्येत्युक्तं भवति ॥आत्मतंत्रमित्यनेनाऽ

तर्वं निरतिशयमुक्तवतसंगस्य अथातो हेतो रनघाव यं हरा वं प्रीयस्तव कीर्त्तितीर्थयोः गंगात योः क्रमेणांतर्बहिः स्नानाभ्यां विधूतः पाप्मा येषामत
एव भूतेष्वनुक्रोशः ॥ कृपा सुसत्वं सत्वोत्तरं चित्तं शीलं मार्जवादिकं च येषां संतितेषां संगमोऽस्माकं स्यादेतदेवनोऽस्माकं त्वदनुग्रहः ॥५८॥ त्वद्भ
न मपि भागवत संगादेव भवतीत्याह ॥ नेति ॥ येषां भागवतानां भक्तियोगेनानुगृहीतं विशुद्धं सत्वप्रधानं मतं यस्य पुंसः चित्तं बहिरर्थाः शब्दा
दिवाह्यविषयाः तेषु विभ्रमं न भवति प्राप्नोती भ्रांतिमत्वं भवति ॥ तमोरूपायां गुहायां च नाविशल्लीनं स्यात्तदा स मुनिः ते गतिं स्वरूपं म
जसा सुखेनाविचष्टे जानाति ॥५९॥ गतिं विशेषेण प्रपद्यते ॥ यत्रेति द्वाभ्यां ॥ इदं कृतत्वं चिदचिदात्मकं विश्वं यत्राधारभूते त्वत्स्वरूपे व्यज्यते

अथानघांघ्रेस्तव कीर्त्तितीर्थयोरंतर्बहिः स्नानविधूतपाप्मनां ॥ भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोऽनुग्रह
एषनस्तव ॥५८॥ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् ॥ यद्भक्तियोगानुगृहीतमंजसा
मुनिर्विचष्टे ननु तत्र ते गतिम् ॥५९॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् ॥ तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतं
॥६०॥

यत्तं यच्च त्वत्स्वरूपं विश्वस्मिन् कृत्स्नप्रपंचे एव भाति प्रकाशते व्याप्नोति ॥ तदेव ब्रह्माख्यं तत्त्वमिति सर्वः यत्रेदमित्यनेनाधारत्वमुक्तं
कथमस्य त्वस्याधारत्वमिति शंकायामभिव्यापकत्वरूपमाधारत्वमित्याशयेन विश्वस्मिन्नवभाति यदित्युक्तं ॥ आधारो हि त्रिविधः औप
श्लेषिको वैषयिकोऽभिव्यापकश्चेति सर्वं व्याप्यावस्थितस्यापि व्याप्यवस्तुगतदोषास्पर्शे दृष्टांतमाह ॥ ज्योतिराकाशइव विस्तृतमि
ति विस्तृतमाकाशइव ज्योतिः सूर्यादिरिवेति दृष्टांतद्वयमभिप्रेतं ॥ तथा च भयं दृष्टांतीकृत्वमभियुक्तैः आकाशमेकं हि यथा घटादिषु पृ
थग्भवेत् यथैको ह्यनेकस्याः जलाधारेष्विवांशुमानिति ॥ अयमभिप्रायः घटकटकादिषु दृष्टि ह्रासः पृथक् पृथक् संयुज्यमानमप्याका

॥भा॰ च॰॥
॥१५५॥

परमभक्तिमतानुभवान्लभ्यइत्याह ॥ भवानिति ॥ सर्वदेहिनांदुर्लभोपिभवान्भक्तिमताप्रशंसायांमतुप् ॥ परमभक्तिमतालभ्यएवदुर्लभत्वमेवास्वाराज्येति ॥ आत्मविदांमुक्तभक्तियोगनिष्ठानांगतिःप्राप्यस्त्वंस्वाराज्यस्यस्वेनराजतइतिस्वराट्तस्यभावःस्वाराज्यंकैवल्यमपादानस्यसंबंधिसंबंधिमात्रविवक्षयाषष्ठीस्वाराज्यादप्यभिमतःस्पृहणीयःस्वाराज्यंहिसर्वस्याऽभिमतंननेतोप्यभिमतस्त्वमित्यर्थः ॥५४॥ अतोनीवस्पृहणीयत्वात्त्वत्तोन्यत्किंचित्कांक्षामीत्याह ॥ तमिति ॥ तंदुराराध्यंउपायांतरैराराधयितुमशक्यंभवंतंसतामपिदुरापयादुःसाध्ययाएकांतभक्त्याऽव्यभिचारिण्याभक्त्याआराध्यत्वत्पादमूलंविनाबहिरन्यस्वर्गादिसुखंकोवावांछेन्नकोपीत्यर्थः ॥५५॥

भवान्भक्तिमतालभ्योदुर्लभःसर्वदेहिनां ॥ स्वाराज्यस्याप्यभिमतःएकांतेनात्मविद्गतिः ॥५४॥ तंदुराराध्यमाराध्यसतामपिदुरापया ॥ एकांतभक्त्याकोवांछेत्पादमूलंविनाबहिः ॥५५॥ यत्रनिर्विष्टमरणंकृतांतोनाभिमन्यते ॥ विश्वंविध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥५६॥ क्षणार्द्धेनापितुलयेनस्वर्गंनापुनर्भवं ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ॥५७॥

तत्रहेतुःयत्रपादमूलेअरणंशरणंप्रविष्टंपादमूलेशरणंगतमित्यर्थः ॥ कृतांतःकालोमत्पापंवशीकृतइतिनाभिमानंकरोतिकिंकुर्वन्वीर्यप्रभावःशौर्यमुत्साहःताभ्यांविस्फूर्जितयाक्षुभितयाभ्रुवाविश्वंविध्वंसयत्राशयन् ॥५६॥ त्वत्पादमूलंप्रपन्नस्यकृतांतभयाभावःकियानयंलाभःयावतात्वद्भक्तसंगलेशएवसकलपुरुषार्थश्रेणीशिरसउपरिवर्तीत्याह ॥ क्षणार्द्धेनेति ॥ भगवतस्तवसंगिनोत्वद्भक्तानामित्यर्थःतेषांसंगस्यक्षणार्द्धेनापिनस्वर्गंतुलयेयसमानंनगणयामिनवाऽपुनर्भवंमोक्षंभागवतसंगस्यस्वर्गमोक्षतोनसमृद्धौकिंपुनर्मरणशीलानामाशिषः ॥ आशीर्विषयपुत्रपश्वाद्यइत्यर्थः ॥५७॥

॥रामः॥
॥१५५॥

स्वर्णमयी मेखला यस्मिन् । अंघ्री च जंघे च उरू च निम्ने अनुन्नते जानुनी च समे मे स्वाहभिः जान्वादिभिः शोभनं दर्शनं यस्य ॥५१॥ एवं विग्रहमनुव
र्ण्य तद्दर्शनं प्रार्थयते ॥ यदेति । शरदि यमप्रतंतस्य यानि यत्लाशानि तद्द्रोचिर्यस्य न पदा चरणेन नोस्माकमंतरघमंतः स्थितं पापहेतुमज्ञानं
गव कांतिभिर्विधुन्वता ऽपनयता शरत्प्रस्यानीय चरणस्य पलाशस्थानीयांगुलीस्थनखरोचिभिरघं विधुन्वता पदा ऽपास्तः निरस्तः
साध्वसः भक्तानां भयं यस्मिन् तत्स्वीयं परं रूपं । यद्वा उक्तविधेन पदोपलक्षितस्त्वमयास्तसाध्वसं स्वीयं परं पद्यते ऽवगम्यत इति पदं रूपं
दर्शय । यतस्त्वमेव तमोजुषामज्ञानिनां गुरुमार्गगुरुर्गुरुमार्गप्रदर्शको भवसि ॥५२॥ न मांसचक्षुरभिवीक्षते तं ॥ न चक्षुषा पश्यति

यदाशरत्स्वप्रपलाशरोचिषा नखद्युभिर्नीतरघं विधुन्वता ॥ प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरोर्मार्गगुरुस्त
मोजुषां ॥५२॥ एतद्रूपमनुध्येयमात्मवुद्धिमभीप्सतां । यद्भक्तियोगो भयदः स्वधर्ममनुष्ठितां ॥५३॥

कृष्णेनैवं हृष्टमनीषा मनसाभिक्लृप्त इति प्राकृतचक्षुरादिभिरग्राह्यं योगपरिशुद्धमनोग्राह्यमप्राकृतं मदीयरूपम परिशुद्धमन
स्त्वं कथं प्रदर्शयेति प्रार्थ्यसे इत्याशंकायामाह । एतदिति । एतदुक्तविधं तव रूपमात्मशुद्धिमंतः करणनैर्मल्यमभीप्सतामस्मा
कं केवलमनुध्येयमेव एतद्रूपस्य ध्यानविषयत्वमेव प्रदर्शयेति प्रार्थयते न तु साक्षात्कार इति भावः किं ध्यानविषयत्वमात्रं सा
ध्यं तत्राह । यतः ध्यानविषयात्तवद्रूपात् ध्यानं योगांगत्वेन स्ववर्णाश्रमोचितधर्ममनुतिष्ठतां पुंसामभयदः साक्षान्मोक्षसाध
नभक्तियोगः परमभक्तियोगो भवति । ध्यानयोगोऽपि परज्ञानप्रणाड्या परमभक्तियोगरूपेण परिणमतीत्यर्थः ॥५३॥

लं यस्मिन् सरोरुहविमले नेत्रे कुंडले यस्य ॥४७॥ स्फुरंति किरीटहारादीनि यस्मिन् तं शंखादिभिः लसमाकरद्धिर्लक्ष्म्या रस्मिन् सतीनितया ॥४८॥ सिंहस्कंधत्विषद्वति
द्विनीयावहुव्रीहिः वचनं सिंहस्य स्कंधपरितः प्रसरंतः केशा इव सर्वतनुस्त्विषो विभ्रती यासा भगाग्नी वा तस्याः कौस्तुभो यस्मिन् । यद्वा सिंहस्येव
योस्कंधौ तयोस्त्विषः कुंडलहारादिदीप्ति विभ्रदिति । पृथग्विशेषणं सोभगयुक्तग्रीवायां कौस्तुभो यस्मिन् सोभागग्रीवायस्य सकौस्तुभो यः
स्मिन्निति वहुव्रीहिगर्भो वा वहुव्रीहिः । श्रिया हेतुभूतया आक्षिप्तस्तिरस्कृतो निकषाश्मा सुवर्णरेखांकितो निकषपाषाणो येन तादृशेन
उरसा उल्लसत् शोभमानं यद्वा श्रिया उपलक्षितेन निकषोपर्युपरक्तं सुवर्णरेखासदृशश्रिया उपलक्षितेनेत्युरोविशेषणं आक्षिप्तः

स्फुरत्किरीटवलयहारनूपुरमेखलम् । शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥४८॥ सिंहस्कंधत्विषो विभ्रत्सौभगग्रीवकौस्तुभम् । श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥४९॥ पूररेचकसंविग्नवलिवल्गुदलोदरं । प्रतिसंक्रामयद्विश्वं नाभ्यावर्त्तगभीरया ॥५०॥ श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलं । समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं ॥५१॥

शंकितः निकषाश्मा येन तेन उरसा उल्लसत् शोभमानं लक्ष्मीसहितं श्यामं वक्ष । कनकनिकषरेखान्वितमश्मानं शंकयतीत्यर्थः
पूरकरेचकाभ्यां श्वासोच्छ्वासाभ्यां संविग्नाश्चपलाः वलयस्ताभिर्वल्गु सुंदरं दलवदश्वत्थपत्रसदृशमुदरं यस्मिन् यद्वा सृष्ट्यापूर्यते पा
ल्यते इति वा जगत्संहरते नतरेचकं न पूर्णमसमर्थं यस्मिन् संविग्नसमर्हा वलयो यस्मिन् दलवदुदरं पूरकरेचकसंविग्नवलिदलोदरं यस्मि
न्निति त्रिपदो बहुव्रीहिः । पूर्वयोः कर्मधारये द्विपदो वा बहुव्रीहिः यतो नाभिद्वारा निर्गतं विश्वं नतं आवर्त्तवद्गभीरया नाभ्या प्रतिसंक्राम
यत् पुनः प्रवेशयदिव स्थितं गंभीरनाभिद्वारेण बहिर्गतं विश्वं अंतर्निवेशयतीव स्थितमित्यर्थः ॥५०॥ श्यामयोः श्रोण्योः नितंबयोरधिकं रोचिष्णु पीतं दुकूलं तत्र

यितुं शक्यं किंचिच्च वस्तु दूरस्थमेवादि चक्षुरादिभी रनुभवितुमशक्यमप्येवंविधमिति वा चावक्तुं शक्यं किंचिद्विकायेनानुभवितुं शक्यं यया सन्नि
कृष्टघटपटादिकं ताद्वैविधवस्तु शरीरे यस्य सर्वः ॥४३॥ एवं पारमैश्वर्यापादकानुगुणगणविशिष्टभगवंतं नमस्कृत्य तदीयदिव्यमंगलविग्रहदर्श
नं प्रार्थयमानो विग्रहं च वर्णयति दर्शनमिति नवभिः भागवतैरर्चितं तेरूपं दिदृक्षूणां द्रष्टुमिच्छूनां नास्माकं दर्शनं देहीत्यन्वयः रूपं विशिन
ष्टि ॥ स्वानां भक्तानां प्रियतमं सर्वेषां इंद्रियाणां ये गुणाः ॥ असाधारणधर्माः श्रवणस्पर्शनदर्शनघ्राणनादयः तैरंजनं अभिव्यंग्यं यथा तथा
देहादिक्रियाविशेषणम् । यद्वा सर्वेषां इंद्रियाणां अप्राकृतानां तद्गुणानां शब्दादीनां च अंजनमभिव्यक्तिर्यस्मिन्नतदिति सर्वकर्मा सर्वका र

दर्शनं नो दिदृक्षूणां देहि भागवतार्चितं । रूपं प्रियतमं स्वानां सर्वेंद्रियगुणांजनम् ॥४४॥ स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसं
ग्रहं । चार्वायतचतुर्बाहुं सुजातरुचिराननम् ॥४५॥ पद्मकोशपलाशाक्षं सुंदरभ्रु सुनासिकम् । सुद्विजं सुकपोलास्यं स
मकर्णविभूषणम् ॥४६॥ प्रीतिप्रहसितापांगमलकै रूपशोभितम् । लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलम् ॥४७॥

मः सर्वगंधः सर्वरस इति श्रुतेः ॥४४॥ स्निग्धः प्रावृषि वर्षिनो यो घनस्तद्वत् श्यामः सर्वेषां सौंदर्याणां संग्रहो यस्मिन् चारवः सुंदरा आयता आ
जानुलंबिनश्चत्वारो बाहवो यस्मिन् । सुजातं सुकुमारं सुंदरमाननं यस्मिन् ॥४५॥ पद्मस्य कोशे मध्ये यानि पलाशानि तद्वदक्षिणी यस्मिन् सुं
दरे भ्रुवौ यस्मिन् शोभना नासिका यस्मिन् । शोभना द्विजा दंता यस्मिन् सुकपोलमास्यं यस्मिन्निति बहुव्रीहिः समौ कर्णावेव विभूषणे यस्मिन्
कुंडले यो रंगेव इस माणत्वात ॥४६॥ प्रीत्या प्रहसिताविवापांगौ यस्मिन् अलकैः कुंतलै रूपशोभितं लसतनं पंकजकिंजल्कवत्पिशंगं दुकूर

॥भा॰ च॰॥
॥१५२॥

प्रवृत्तायनिवृत्तायचकर्मणोप्रवृत्तिनिवृत्त्यात्मकर्मरूपायपितृदेवायप्रवृत्तिकर्माराधनतत्फलप्रदपितृदेवादिशरीराय धर्मविपाकायधर्मो
त्तानमिमंहितफलभगवदाराधनरूपः तस्यविपाकः फलंतस्मैनिवृत्तिधर्मफलरूपायेत्यर्थः तथाम्रत्यवेदुःखदायदुःखप्रदमृत्युरूपाय
५१ हे आसीषामीशयदाकेईश आशिषांधर्मादीनांकारणात्मनेफलप्रकाशकायमनवेसर्वज्ञायस्वायंभुवादिमनुरूपायवामनंतराधिदे
वतायवामंत्ररूपायवाद्यावंसर्वात्मकत्वेननमस्कृत्यसमाप्तान्नमस्करोतिवृहतेस्वरूपेणगुणैश्चनिरतिशयवृहत्वायधर्मायकृत्स्नायकृत्स्ना
सिद्धरूपधर्मसदः अप्युक्तंतेनयाचमहाभारतेयेचवेदविदोविप्राये चाध्यात्मविदोजनाः तेवदंतिमहात्मानंकृत्स्नंधर्मसनातनमिति

प्रवृत्तायनिवृत्तायपितृदेवायकर्मणे ॥ नमोधर्मविपाकायमृत्यवेदुःखदायच ॥५१॥ नमस्तेआसीषामीशमनवेकारणा
त्मने ॥ नमोधर्मायवृहतेकृत्स्नायाकुंठमेधसे ॥५२॥ पुरुषायपुराणाययसांख्ययोगेश्वरायच ॥ शक्तित्रयसमेतायमीढुषेहंकृ
तात्मने ॥ चेतआकूतिरूपायनमोवाचोविभूतये ॥५३॥

अकुंठमेधसे अप्रतिहतज्ञानाय ॥५२॥ पुराणपुरुषायकपिलाद्यंशावतारादिरूपेण
नमस्करोति ॥ सांख्येश्वरः कपिलः योगेश्वरोहिरण्यगर्भः तद्रूपाय ॥ शक्तित्रयंसर्गादिसामर्थ्यंतद्युक्तायब्रह्मेंद्ररुद्रकालरूपायेत्यर्थः
मीढुषेमिहसेचनेवर्षप्रदसूर्यात्मकपर्जन्यायतपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिचेतिपर्जन्यस्यापिभगवद्विभूतित्वगानात् ॥ अ
हंकृतअहंकारतत्त्वंतस्यात्मनेचेतआकूतिरूपायचेतसः ॥ आकूतिस्वरूपंतदेवयस्यरूपंसततयोक्तस्तस्मै ॥ यस्माहंकारःशरीरंयस्यमनः
शरीरमितिश्रुते ॥ वाचोविभूतयेवाक्प्रपंचायपद्वाचेतआकूतिःशरीरंचयस्यरूपंसततथोक्तस्तस्मैमनोवाक्कायरूपत्रयात्मनेमनआदिवि
षयरूपायेत्यर्थः इदमनुक्तरूपसंग्राहकंकिंचिदिवस्तुक्षीरशर्करादिगतमाधुर्यादिवदेवंविधमितिवाचाकतमशक्यमपिमनसाचिंत

रिरसावां अवगुणपरिणामरूपत्वात् रसोऽहमप्सु कौंतेय इति रसस्तद्भिन्नतिर्वगणनात् सर्वरसात्मन इत्युक्तेः इदं शब्दः स्पर्शो रूपात्मकत्वस्याप्युप
लक्षणम् ॥ ३ ॥ स्थवीयसे स्थूलाय विशेषाय पृथिव्यात्मने गंधरूपायेत्यर्थः ॥ पुण्यो गंधः पृथिव्यां चेति गीतावचनात् एवं गंधरसादिभो
ग्यरूपेणान्नादिहेतुत्वमुक्तं अथ भोग्यभोगोपकरणभोगस्थानादिरूपेणाद्दृविद्धत्वमाह समस्तसर्वात्मदेहाय सर्वमचेतनजातं भोगोपकरण
भोगस्थानरूपं सर्वं आत्मानो भोक्तारो जीवाश्च देह ॥ शरीरं यस्य यस्मै ॥ प्रकारांतरेणापिवृत्तिदत्वमाह ॥ सहः प्रवृत्तिसामर्थ्यं इंद्रियशक्तिः
ओजः तेजः बलं धारणसामर्थ्यं देहशक्तिस्तद्रूपाय सह आदिरूपेणामर्थ्ये पिवृत्तिदायेत्यर्थः ॥ एवमाकारेण जगद्वृत्तकत्वमित्याह
त्रैलोक्यपालाय उक्तविधया त्रैलोक्यांतर्गतकृत्स्नजगत्पालायेत्यर्थः ॥ ३९ ॥ एवं जगद्रूपाद्दानत्वतत्तदंतरात्मत्वदृनन्यत्वतत्संहर्तृत्वा

सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे ॥ नमस्त्रैलोक्यपालाय सह ओजोबलाय च ॥ ३९ ॥ अर्थलिंगाय नभसे
नमोंतर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ ४० ॥

दिभिस्तद्देकासाधारणैर्धर्मैः सर्वोत्कर्षं नमस्कृत्य
अथ चिदचिदात्मकं सर्वमपि वस्तु तच्छरीरमेवाऽतस्ततो नोत्कृष्टमस्तीत्यभिप्रायेण सर्वात्मकत्वेन नमस्करोति । शब्दलिंगायेति
शब्द आकाशगुणः स लिंगं शरीरं यस्य तस्मै नभसे आकाशरूपाय च इदं वाय्वादितन्मात्रशरीरकत्वस्याप्युपलक्षणं ॥ शब्दादिषु नि
यमनपूर्वकं व्याप्य तच्छरीरकत्वे स्थितायेत्यर्थः ॥ व्याप्तिर्वैद्यामग्निरिव न बहिरेव तिलेषु तैलमिव नांतरेव किंत्वंतर्बहिश्चेत्याह
अंतर्बहिरात्मने इति ॥ अतति संततमविच्छेदेन व्याप्नोतीत्यात्मा अंतर्बहिश्च व्याप्य स्थितायेत्यर्थः तथा च श्रूयते ॥ अंतर्बहिश्च तत्स
र्वं व्याप्य नारायणः स्थित इति ॥ पुण्याय यज्ञदानादिरूपपुण्यशरीराय अमुष्मै तत्साध्यस्वर्गादिलोकरूपाय लोकाय एतल्लोकरूपाय भू

पुष्करावगुणः ॥ अथवा त्रिसमस्तकामोऽपि स्वाश्रितान् समीहितकामप्रदानेन सम्यक् पालयति न तु दरिद्रः ॥ ३६ ॥ अस्मद्दपि जगद्वरण्योपमुक्तं गुण
जातमाह । स्वर्गापवर्गयोः द्वारापसाधनभूताय इदं प्रापूर्तं वहुधा जातं जायमानं विश्वं विभर्ति भुवनस्य नाभि ॥ अमृतस्यैषसेतुरित्यादिश्रुते
सेतुरिव सेतुर्लम्भकः प्रापकः सेतुर्हिंतीर्णतरप्रापकः स्वर्गापवर्गद्वारत्वमेवोपपादयन्नमस्करोति त्रिसमसदाम्शुचिषु योगिचित्तेषु सीदति
रमतइतित्रिशुचिसत् योगिभिर्नित्यमुपास्यत्वेन तत्समीहितापवर्गप्रदात्वं इत्यर्थः हिरण्यं वीर्यं यस्य सोऽग्निस्तस्मै अग्निरूपाय चतुर्णां हो
तॄणामयं चातुर्होत्रः ॥ चतुर्भिः होतृभिः साध्यः तस्मै तं तन्वे यज्ञाय तद्रूपायेत्यर्थः यज्ञरूपत्वं यज्ञाराध्यत्वं तत्फलदत्वादिभिः स्वर्गद्वारा

स्वर्गापवर्गद्वाराय नित्यंशुचिसदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ॥ ३७ ॥ नम ऊर्जे इषे त्रय्याः प
तये यज्ञरेतसे त्वाग्निहाय च जीवानां नमः सर्वरसात्मने ॥ ३८ ॥

येत्यर्थः ॥ ३७ ॥ ऊर्व पितॄणामन्नं इषु देवानां तद्रूपाय ऊर्गिडा
दिरूपेणापि त्राहीनां तत्त्रिमायादयनन्तं तयीमिरूपेण यः फलदस्तस्मै इत्यर्थः ॥ त्रय्याः वेदस्य पतये रक्षकाय प्रतिपाद्यापच यज्ञस्य
रेतः फलं तद्रूपाय अच हिरण्यरूपायेत्साह्वनीयाद्यग्निरूपत्वमुक्तं चातुर्होत्रायतंतवइति द्रव्यक्रियामंत्राद्यात्मकयज्ञरूपत्वम
औजेंइषइतियज्ञाराध्यदेवतारूपत्वं त्रय्याः पतयेइतिस्वर्गापवर्गतत्साधनप्रकाशकवेदकारणत्वमेवं स्वर्गापवर्गद्वारत्वं
स्वर्गद्वारशब्देनैहिकलौकिकसुखसाधनत्वमभिप्रेतं तदुपपादयन्नमस्करोति ॥ जीवानां वृत्तिदायश ॥ शब्दस्पर्शादिविषयानु
भवजसुखप्रदायेत्यर्थः ॥ तदुपपादकं सर्वरसात्मनइति ॥ सर्वे रसाः कटुम्ललवणमाधुर्यादयः तदात्मने तद्रूपायेत्यर्थः ॥ कदा

विश्वप्रबोधायविश्वंप्रबोधयतिधर्मादिपुरुषार्थतत्साधनप्रकाशकवेदाख्यशास्त्रोपदेशेनबोधयतीतिविश्वप्रबोधस्तस्मैविश्वोजी
वपित्रदुसमर्थः नकेवलमुपदेशमात्रेणापितुव्यूहविभवांतर्यामित्वादिरूपेणविभवमलत्वसाध्वसाधुनिग्रहानुग्रहदेहेंद्रियादिसंजीव
पितृत्वादितिभिश्चेत्याह॥प्रद्युम्नाय॥दुष्टनिग्रहसाध्वनुग्रहैकप्रयोजनरामकृष्णादिरूपप्रद्युम्नव्यूहाय॥अंतरात्मनेसर्वदेशकाला
वस्थासुपुरुषस्तद्वजगदंतःप्रवेशपूर्वकंप्रशासनेनभर्वेनमसोविदितत्रिः नतत्रगुणविशेषविशिष्टत्वाभिप्रायेण॥अनिरुद्धायअनिरुद्ध
व्यूहायहृषीकाणांइंद्रियाणांपतीशेमन॥इंद्रियाणिचतदात्मनेतद्रूपायसर्वात्मकत्वेविशिष्टहृषीकेंद्रियग्रहणं अनिरुद्धोपासन
स्यानकृतं॥तथोचारुंतत्तीये॥यहिद्रुद्धनिरुद्धाख्यंहृषीकाणामधीश्वरं शारदेंदीवरश्यामंसंराध्यमृषिभिःशनैरिति॥उक्तस्यजगद्रूप

नमोनमोनिरुद्धायहृषीकेशेंद्रियात्मने॥नमःपरमहंसायपूर्णायनिभृतात्मने॥३६॥ ॥

त्वाद्देजीवस्येवदेवादिरूपत्ववत॥कर्मायतत्वशंकायामाह परमहंसामहिनास्तिकर्मारब्धंपुण्यापुण्यरूपमलमाश्रितेष्वस्मिंश्चेति
हंसः ततः कर्मधारयाच्चतुर्थी अपहतपाप्मत्वमर्थः पूर्णाय अंतर्बहिश्चव्याप्यावस्थितायनिरस्तनिरुपाधिकांतर्बहिर्व्याप्तिकृतंजगद्रूपत्वं
नभवतः सोपाधिकंजीवस्यतुदेवादिशरीरेष्वभिव्याप्तिःपिप्पलंस्वाद्वत्तीतिश्रुतेः कर्मकृतेतितस्यदेवादिरूपतमसोपाधिकमितिनतःप
रमात्मनोवैलक्षण्यसिद्धिः यद्वापरमहंसायशोकरहितायनिभृतात्मने अतएवनिर्हृतात्मने अपहतपाप्मनेइतिपाठेत्वयमुद्दिश्य
र्थाय अतएवपूर्णायसर्वदांतर्बहिश्चव्याप्यस्थिताय॥यद्वापूर्णायव्यापकायनिभृतात्मनेअवाप्तसमस्तकामाय अयमपिजगद्रूपेणप

॥भा॰ष॰॥
॥१५०॥

चिद्दचिद्विशिष्टब्रह्मस्वरूपप्रपंचव्यपदेशव्यपदेश्य इति युक्तं कारणात्मत्वस्य सर्वव्यपदेशहेतुत्वं। एवं चेदृशं सर्वात्म सर्वकारणत्वप्रयुक्तं सर्वा
त्मकत्वं त्वय्येवैकांतिकमिति त्वमेव सर्वोत्कृष्ट इति॥२३॥ अस्मदस्मत्कार्यापारकं गुणजातं वदन् तद्विशिष्टं नमस्करोति। नम इति पंकजनाभा
यत्नोकात्मकं पंकजं नाभौ यस्य तस्मै एवं कार्यावस्थप्रपंचरूपत्वमुक्तम्। कारणावस्थाप्रपंचरूपतामाह। भूतसूक्ष्माणां क्रियाणां चात्म
ने आश्रयाय उभयनिर्वाहकं अंतरात्मत्वं तन्नयुक्तदोषास्पृष्टत्वं चाह। वासुदेवाय वासुश्चासौ देवश्च तस्मै सर्वत्रासौ समस्तं च वसत्यत्रे
ति वैयतइत्युक्तकर्त्रधिकरणव्युत्पत्तिनिरुक्तवासुदेवशब्दवाच्यसर्वांतरात्मत्वगुणविशिष्टाय तथापि देवाय तद्व्याप्यगतदोषास्पर्शनेन
दीप्यमानाय अत एव शांताय अशनायापिपासाशोकमोहजरामृत्युभिरूर्मिभिर्विरहिताय अत एव कूटस्थाय निर्विकाराय अत एव स्व

नमः पंकजनाभाय भूतसूक्ष्मेंद्रियात्मने। वासुदेवाय शांताय कूटस्थाय स्वरोचिषे॥२४॥ संकर्षणाय सूक्ष्माय दुरं
तायांतकाय च। नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने॥२५॥ रोचिषे नित्यासंकुचिततयापरिच्छिन्नस्वप्रकाशाय

२४। कारणावस्थप्रपंचात्मकत्वस्य प्रपंचसंहारपूर्वकत्वाज्जगत्संहर्तृत्वगुणविशिष्टतामाह। संकर्षणाय सम्यगित्येकीकारे अविभक्त
नामरूपत्वेन कर्षणाय कर्षणं यः संकर्षयति स्वस्मिन् जगदुपसंहरतीति यावत् तस्मै। केनाकारेण संहर्तृत्वं तत्राह। अन्तकाय मुखाग्निनालो
कदाहकाय अत एव सूक्ष्माय नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टाय एवं भूतायापि दुरंतायापि दुरंताय अंतरहिताय अनु
पसंहार्यायेत्यर्थः उपसंहारो हि कार्यस्य कारणेन सह संश्लेषः तस्य कारणांतराभावेनानुपसंहार्यकारणानां काष्ठाभूतोऽर्थः फलितः
एवं कार्यावस्थाकारणावस्थप्रपंचरूपत्वं तद्गुणयुक्तं नमस्कृत्य जगदुत्पत्तिकर्तृत्वतदुपयुक्तगुणविशिष्टं नमस्करोति। नम इति

॥राम:॥
॥१५०॥

स्वरूपरूपस्वभावेस्त्वत्सर्वोत्कृष्टत्वंभक्तानुग्रहार्थमेव नस्वार्थमितिवदन्नसर्ववीतरागत्वगुणविशिष्टंनमस्करोति ॥ जिनमिति ॥ हे आत्मविदुर्य
आत्मवतांज्ञानिनांधुर्यश्रेष्ठकतेनवजितमुत्कर्षः ॥ स्वरूपेणगुणैश्चनिरतिशयोत्कर्षः जितमितिभावेक्तः स्वस्तये आत्मविदामितिशेषः
यद्वा आत्मविदुर्यायोगीस्वगात्मेषांस्वस्तयेसुखायत्वामुपासीनानांनिरतिशयानंदावहाः स्वरूपरूपगुणभक्तानुग्रहैकप्रयोजनाद्
अतोमेत्वामुपासीनस्यममस्वस्तिः त्वदनुभूतिसंभूतंसुखं अस्तु नत्वमतांप्राप्नुयादित्यर्थः मेस्यापित्वेनावतिष्ठत्वित्यर्थः ननुविषया
नंदवदनुभूतिसंभूतानंदोपिक्षणिकएवस्यात्तत्राह ॥ गाधमात्सिद्धरूपेणभगवतासिद्धंसंसिसंसाध्यत्वेनविषयाणामस्थिरत्वात्तद
नुभवसंभूतानंदोप्यस्थिरः नत्वतुसिद्धरूपत्वात्त्वानित्यमनुभवतोममत्वदनुभवसंभूतानंदः स्थापीतिभावः अत्र परमात्मानंदसा

तदुवाच ॥ जितंत आत्मविदुर्यस्वस्तयेस्वस्तिरस्तुमे ॥ भवताराधसाराद्धं सर्वस्मा आत्मनेनमः ॥ २३ ॥

भवभूतनतद्विषयभक्तेः स्थैर्यप्रार्थितेननुममकथंसर्वोत्कृष्टताममापिदेवादीनांमध्येऽन्यतमत्वादित्यत्राह सर्वस्मात्मनेनमइतिसर्वस्मै
प्रपंचरूपाय ॥ तत्रहेतुः आत्मनइतियथादेवमनुष्यादिशरीरस्यात्मतयानुप्रविष्टोजीवः देवोयमितिदेवादिसामानाधिकरण्येनव्य
पदिश्यतेतद्वत्सर्वस्यात्मायः पृथिव्यांतिष्ठन्य आत्मनितिष्ठन्नितिविविदंचिदंनरात्मतयावस्थितस्तस्यापदेशेनव्यपदेश्यत्वान्निमित्त
मितिपुत्रकात्मात्वस्यसर्वत्वव्यपदेशहेतुत्वंयद्वा आत्मनः आकाशः संभूतइत्यत्रैवात्मशब्दः कारणपरः तथाचायमर्थः कार
णंहिमृद्द्रव्यंकार्यात्मनापरिणतंमृद्द्रव्यंघटइतिकार्याभेदेनव्यपदिश्यतेतथासूक्ष्मचिदचिद्विशिष्टः कारणभूतः परमात्मास्थूल

सर्वैरुक्तत्वमेवाह ॥ स्वधर्मनिष्ठ इति ॥ पुमान् शतजन्मभिरिति ॥ केवलस्ववर्णाश्रमधर्मनिष्ठः विरिंचितां विरिंचिसालोक्यसाम्यं वा एति मामित्यत्राप्येवं ततः परं ततः परस्तात् मामेति अथ अनंतरं भागवतः निवृत्तधर्मानुष्ठानपरः अव्याकृतं चचक्षुरगोचरमगम्यं वकुमयोग्यं वा वैष्णवं विष्णोः संबंधि परं स्थानं एति अहं विबुधाः ब्रह्मेंद्रादयश्च कलात्यये स्वस्वाधिकारांते यथा प्राप्नुवंति तथेत्यर्थः ॥ २९ ॥ अथ यत् नु यूयं भागवताः स्थ भवथ अतो मम भगवान् यथा प्रियस्तथा प्रियः एवं यूयमपि प्रिया भवथ भागवतानां भागवतेभ्यः मे अन्यः प्रियः कश्चिन्नास्ति ॥ ३० ॥ तदहं

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिंचितामेति ततः परं हि मां ॥ अव्याकृतं भागवतोथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥ २९ ॥ अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ॥ न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित् ॥ ३० ॥ इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं ॥ निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह तान् शिवः ॥ बद्धांजलीन् राजपुत्रान्नारायणपरो वचः ॥ ३२ ॥

वक्ष्यमाणं जप्तव्यं श्रूयतामित्यन्वयः जप्तव्यं विशिनष्टि ॥ विविक्तं असंकीर्णं यद्वा विविक्तं कर्तृ रिक्तः विवेचकं प्रकृतिपुरुषं विलक्षणत्वेन परमात्मविवेचकमित्यर्थः अत एव पवित्रं अत एव मंगलं धर्मादिपुरुषार्थसाधनं निःश्रेयसकरं मुक्तिसाधनं अत एव परं वः युष्मभ्यं वदामि ॥ ३१ ॥ इत्येवं वदामीति प्रतिज्ञापूर्वकमनुक्रोशहृदयः कृपायुक्तहृदयः ॥ भगवन्नारायण एव परः प्राप्यप्रापकश्च यस्य सः ॥ शिवः बद्धानि अंजलिपुटानि यैस्तान् राजपुत्रान् प्रति वचः वाक्यमाह ॥ ३२ ॥

तत्र मृदंगादिभिरन्वितं दिव्यैर्मार्गभेदैः प्रकारभेदैः मनोहरं गांधर्वं गानमाकर्ण्य ते राजपुत्राः विसिस्मियुः विस्मयं प्राप्ताः ॥२३॥ तदैव तस्मात्सरसो
विनिर्गच्छंतं विबुधानुगैः गंधर्वकिन्नरादिभिः उपगीयमानममरश्रेष्ठं सप्रमथगणं तप्तहेमराशिसदृशं कांतिनीलः कंठो यस्य तं प्रसादा
भिमुखं त्रिलोचनं रुद्रं वीक्ष्य संजातहर्षाः प्रचेतसः प्रणेमुः नमस्कृतवंत ॥२५॥ स भक्तवत्सलो भगवान् गिरीशः प्रपन्नान्नमस्कुर्वाणान्
धर्मज्ञान्विनयादि शीलसंपन्नान् प्रचेतसः स्वदर्शनप्रीतान्स्वयमपि प्रीत उवाच ॥२६॥ उक्तमेवाह ॥ यूयमिति यावदध्यायसमाप्तिः

तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरम् ॥ विसिस्म्यू राजपुत्रास्ते मृदंगपणवान्वितं ॥२३॥ तर्ह्येव सरसस्तस्मान्निष्क्रामंतं
सहानुगम् ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥२४॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनम् ॥ प्रसादसुमुखं
वीक्ष्य प्रणेमुर्जातकौतुकाः ॥२५॥ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञान्शीलसंपन्नान्प्रीतान्प्रीत उवा
च ह ॥२६॥ रुद्र उवाच ॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितं ॥ अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥२७॥ यः परं
रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥२८॥

यूयं वेदिषदः प्राचीबर्हिषः पु
त्राः वः युष्माकं चिकीर्षितं भगवदाराधनं च विदितं वः अनुग्रहाय युष्माननुग्रहीतुं मे मम दर्शनं कृतं कारितं मयेत्यर्थः ॥२७॥ अनु
ग्रहकारणमाह ॥ य इति ॥ त्रिगुणात्मकात्तमसः प्रधानात् क्षेत्रज्ञाच्च साक्षात्परं विलक्षणं रंहसस्यादिति पाठे त्रिगुणात्कार्याव
स्थात् सूक्ष्मात् कारणावस्थाच्च तमसः प्रधानात् क्षेत्रज्ञाच्च परमित्यर्थः भगवंतं प्रकृतिपुरुषवैलक्षण्यापादकपूर्णज्ञानादिषाड्गुण्यं वासुदेवं यः
प्रपन्नः स मे प्रियः भगवद्भक्तस्य सर्वोत्कृष्टत्वादिति भावः ॥२८॥

ननु मुनीनां किं तपसा तेन घोररूपात् हिंस्यात् शंकयाह। योयं भगवान् उत्पत्त्यादि ज्ञानवान् हरः आत्मारामत्वेन लोकसंचारप्रयोजनरहितोपीत्यर्थः दीनलोकस्य राधसे सिद्धये दीनाननुग्रहीतुमिति यावत् शक्त्या स्त्रिया सह युक्तः घोरया मूर्त्या उपलक्षितो विचरति॥१८॥ एवमापृष्टो मुनिस्तत् यथावद्वक्तुमुपक्रमते। प्रचेतस इति साधवः प्रचेतसः पितुः प्राचीनबर्हिषः वाक्यं प्रजाः सृजतेति वाक्यं शिरसाधाय अतिगौरवेण शिरसानुमोद्य सरस्पर्शं तपसा दृतचेतसः प्रतीचीं दिशं प्रति प्रययुः॥१९॥ समुद्रमुपसमुद्रात् किंचिन्न्यूनं उपोधि के चेति कर्मप्रवचनीयत्वेन द्वितीया

आत्मारामोपि यस्त्वस्य लोककल्पस्य राधसे॥ शक्त्या युक्तो विचरति घोरया भगवान् भवः॥१८॥ मैत्रेय उवाच॥ प्रचेतसः पितुर्वाक्यं शिरसादाय साधवः॥ दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः॥१९॥ ससमुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयम्॥२०॥ नीलरक्तोत्पलांभोजकल्हारेंदीवराकरं। हंससारसचक्राह्वकारंडवनिकूजितम्॥२१॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपं। पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवं॥२२॥

द्वितीया समुद्रसमीपे वा विस्तीर्णं सुशोभनं महत् तत्र एकं सरः॥ अपश्यन्। महत्त्वमेवस्पष्टयति महतां ज्ञानीनां मन इव स्वच्छं निर्मलं प्रसन्नाः सलिलाशया यस्मिन्॥२०॥ नीलोत्पलादीनां आकारं जन्मस्थानं उत्पलानि रात्रिविकासीनि अंभोजानि दिनविकासीनि कल्हाराणि ईषत् विकासीनि इंदीवरं नीलोत्पलं तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्था हंसादिभिः विकूजितं च काकाः चक्रवाकाः॥२१॥ मत्ताये भ्रमरास्तेषां सौस्वर्येण मधुरस्वरेण हृष्टरोमाणो लतांघ्रिपा यस्मिन् उपश्लिष्टलताग्रः हृष्टरोमाण इव अंघ्रिपा यस्मिन् तदित्यर्थः

प्राचीनवर्हिषःसकाशात्शतद्रुत्यादशपुत्राअभवन्भवन्पुत्रान्विशिनष्टि॥तुल्यंनामकर्माचारोयेषांतेधर्मस्नाताःधर्म्मेनिस्नाताःधर्मपारगाइ॥
तियावत्॥निस्नातशब्दोहिसर्वेचविवक्षितानुष्ठानांतरभावंवभूतस्तानस्यनियमांतगमनमाह॥प्रचेतसःप्रचेतोनामान॥१३॥प्रजासर्गेपि॥
त्राउपदिष्टाःप्रथमंतपश्चर्तुंवनमपरमपमाविशन्दशसंख्यावर्षाणांवत्सराणांसहस्राणितपसांपतिंभगवंतंतपसाआर्चन्अर्चिया
मासुः॥१४॥पथिमार्गेदृष्टेनप्रसीदतागिरिशेनरुद्रेणयदुक्तमुपदिष्टंतद्ध्यायंतस्तदर्थंध्यायंतश्चसमाहितचित्ताःपूजयंतश्चअर्चनिति

प्राचीनवर्हिषःपुत्राःशतद्रुत्यादशाभवन्॥तुल्यनामव्रताःसर्वेधर्मस्नाताःप्रचेतसः॥१३॥पित्रादिष्टाःप्रजासर्गेत
पसेवनमाविशन्॥दशवर्षसहस्राणितपसार्चंस्तपस्पतिम्॥१५॥यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता॥तद्ध्या
यंतोजपंतश्चपूजयंतश्चसंयताः॥१६॥विदुरउवाच॥प्रचेतसांगिरित्रेणयथासीत्पथिसंगमः॥यच्चाप्याहहरः
प्रीतस्तन्नोब्रह्मन्वदार्थवत्॥१७॥संगमःखलुविप्रर्षेशिवेनहिशरीरिणाम्॥दुर्लभोमुनयोदध्युरसं
गाद्यमभीप्सितं॥१७॥

पूर्वेणान्वयः॥१५॥गिरिशेनोक्तंध्यायंतइत्याद्युक्तंतत्रकिमुक्तंगिरिशेनेतिपृच्छतिविदुरःयदायस्मिन्का
लेपथिगिरित्रेणसहप्रचेतसांसंगमआसीत्हेब्रह्मन्प्रीतोहरोरुद्रअर्थवत्पुरुषार्थसाधनंयदाहतन्नोअस्मभ्यंवद॥१६॥
शिवसंगमस्यदौर्लभ्यमाह॥हेविप्रर्षेशरीरिणांप्राणिनांसंसारेशिवेनसाकंसंगमदुर्लभःदुःखेनापिलब्धुमशक्यःमुनयःअ
भीप्सितंनाप्तुमिष्टंयंशिवंअसंगात्विषयांतरसंगत्यागात्दध्युरेवकेवलंनतुप्रापुःतेनशिवेन॥१७॥ ० ०

॥ भा॰ च॰ ॥

॥ १४७ ॥

हे विदुर हविर्धानाद्धं तर्धीन पुत्रात् हविर्धानी तज्जार्या वर्हिषदादीन् षट् सुतान् ॥ असूत ॥ ८ ॥ हे महावाहो हविर्धानिः हविर्धीनस्यापत्यं वर्हिषत् प्रजापालनपरः क्रियाकांडेषु योगेषु च निस्नातः निष्ठितो भूत हे कुरूद्वह ॥ ९ ॥ क्रियाकांडेषु निस्नातत्वमेवाह ॥ यस्येति इदं वसुधातलं देवयजनं यज्ञवाटं वितन्वतः तत्र देशे एको यज्ञः कृतस्तत्समीपएव देशे पुनर्यज्ञांतरं कुर्वत ॥ प्राचीनाग्रैः कुशैः कृत्स्नं वसुधातलमास्तृतमासीत् अतएव प्राचीनवर्हिरित्युच्यते ॥ १० ॥ स प्राचीनवर्हिः समुद्रस्य पुत्रीं देवदेवेन ब्रह्मणा उपदिष्टां श

हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान् ॥ वर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् ॥ ८ ॥ वर्हिषत्सुमहाभागो हार
विर्धानिः प्रजापतिः ॥ क्रियाकांडेषु निस्नातो योगेषु च कुरूद्वह ॥ ९ ॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः ॥ प्राची
नाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥ १० ॥ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम् ॥ तां वीक्ष्य चारुसर्वांगीं कि
शोरीं सुष्ठ्वलंकृतां ॥ परिक्रमंतीमुद्वाहे चकमेग्निः शुकीमिव ॥ ११ ॥ विबुधासुरगंधर्वमुनिसिद्धनरोरगाः ॥ विजि
ताः सूर्यया दिक्षु क्वणयंत्यैव नूपुरैः ॥ १२ ॥

तद्रुतिं दुस्मास्थ्यां उपयेमे ॥ तां विशिनष्टि ॥ कैशोरी वालां चारूणि सुंदराणि सर्वाण्यंगानि यस्यास्तां सुष्ठु अलंकृतां उद्वाहे विवाहे परिक्रमंती अग्निं यां शतद्रुतिं अग्निः चकमे शुकीमिव अयमर्थः सप्तर्षीणां सत्रे तज्जायीदर्शनेनाग्निः ॥ कामदृशो भूत तं च तज्जार्या स्वाहानाम सप्तर्षिभार्यारूपधारिणी सती रमयामास रमयित्वा च तद्रेतः शुकीरूपेण समरस्तं वेनिधाया गच्छत् तां च यथा सप्तर्षिभार्याभ्रांत्याग्निकामितवान् तद्वदिति स्तुकीमिति पाठे स्तोकस्तोकं घृतधारामिवेत्य

॥ १४७ ॥

इयोरश्वमेधे अश्वं विजयावसरे ताक्ष्यादंतर्धानगतिं तिरोधानगतिं लब्ध्वा अंतर्धानसंज्ञितः अंतर्धानाख्योऽभूत् विजिताश्वस्यैव अंतर्धान इति नामांतरमित्यर्थः ॥ अंतर्धानसंज्ञितो विजिताश्वः शिखंडिन्यां सुसंमतं अपत्यत्रयं आधत्त उत्पादयामास ॥३॥ अपत्यत्रमेवाह । पावक इति पुरा यो वसिष्ठस्य शापः तस्मात् अग्नयः गार्हपत्याहवनीयदक्षिणाग्नयः पावकादिरूपेण मनुष्येषूत्पन्नास्ते पुनर्योगगतिं अग्नित्वं प्राप्ताः ॥ आहवनीयत्वादेः संस्काररूपत्वात् एषां मनुष्यरूपेणोत्पत्तिः न हि तावत् अभिमानिदेवतानामुत्पत्तिरत्र विवक्षिता ॥४॥ नभस्वत्यामन्यस्यां भार्यायां अंतर्धानो

अंतर्धानगतिं शक्राल्लब्ध्वांतर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतम् ॥३॥ पावकः पवमानश्च शुचिरित्यग्नयः पुरा ॥ वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ॥४॥ अंतर्धानो नभस्वत्यां हविर्धानमविंदत ॥ य इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥५॥ राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणाम् ॥ मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ॥६॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामाप कुशलेन समाधिना ॥७॥ ॥ ॥

विजिताश्वः हविर्धानं पुत्रं लेभे अंतर्धानं विशिनष्टि यः अंतर्धानोऽश्वहर्तारं विद्वान् जानन्नपि न जघ्निवान् एतेन शक्रादंतर्धानगतिलाभे कारणं सूचितं ॥५॥ राज्ञां वृत्तिं करादानं दंडशुल्कादिभिरतिदारुणां परपीडात्मिकां मन्यमानः दीर्घसत्रानुष्ठानव्याजेन विससर्ज हेत्याश्चर्ये ॥६॥ तत्रापि दीर्घसत्रेऽपि हंसं स्वात्मानं क्लेशहंतीति हंसं शुद्धं वा परमात्मानं परमपुरुषं आत्मदृक् प्रकृतिविलक्षणं ब्रह्मात्मकस्वात्मयाथात्म्यज्ञानी सन् यजन् कुशलेन विघ्नानुपहतेन समाधिना भगवल्लोकमवाप ॥७॥ ॥ ॥ ॥ ॥ ॥

यद्रूपेवंविधानि बहूनिफलानितयापिस्वकाम्यफलसंगः भगवतिभक्तिंउद्वहन्कुर्वन्वैचित्र्यावीर्याणांवैचित्र्यावीर्यशालिनां अभिमतं
महतोभवतोमहात्म्यस्यसूचकंवैन्यस्य चरितंश्रृणुयात्श्रावयेत्पठेत्त्वाएवंचेदस्मिन्भगवतिकृतमतिर्मर्त्यः पार्थिवींपृथुनालब्धांग
तिं आप्नुयात्॥३८॥ यद्वदंपृथुचरितंअस्यादरेण अनुदिनंश्रृणवन्पृथुपयन्कीर्तयन्विमुक्तास्वफलासंगः समर्त्यः भवसिंधोपोतोभवन्॥

मुक्तान्यसंगोभगवत्स्यचलांभक्तिमुद्वहन्॥ वैन्यस्य चरितंपुण्यं श्रृणुयाच्छ्रावयेत्पठेत्॥३७॥ वैचित्र्यवीर्याभिमतंमह
न्माहात्म्यसूचकं॥ अस्मिन्कृतमतिर्मर्त्यः पार्थिवींगतिमाप्नुयात्॥३८॥ अनुदिनमिदमादरेणश्रृण्वन्पृथुचरितंप्र
थयन्विमुक्तसंगः॥ भगवतिभवसिंधुपोतपादेसचनिपुणांलभतेमतिमनुष्यः॥३९॥ इतिश्रीभागवतेमहापुराणेपा
रमहंस्यांसंहितायांवैयासिक्यांचतुर्थस्कंधेत्रयोविंशोध्यायः॥२३॥ मैत्रेयउवाच॥ विजिताश्वोधिराजासीत्पृथुपुत्रः पृथु
श्रवा॥ यवीयेभ्योददात्काष्ठा भ्रातृभ्योभ्रातृवत्सलः॥१॥ हर्यक्षायादिशत्प्राचींधूम्रकेशायदक्षिणां प्रतीचींवृक
संज्ञायसयोद्राविडसेविभुः॥२॥ पोपादौयस्यतस्मिन्भगवतिनिपुणांमतिंलभेत॥३८॥ इतिश्रीचतुर्थत्रयोविंशोध्यायः॥२३॥ एवं
कालेनपृथुचरितमभिधायतत्संततिंतच्चरितंचाभिधातुमुपक्रमतेमुनिः विजिताश्वइतिविजिताश्वः पृथोःपुत्रःविपुलकीर्तिः अ
धिराज आसीत्भ्रातृवत्सलोविजिताश्वःयवीयोभ्यःकनिष्ठेभ्यःभ्रातृभ्यःकाष्ठादिशः अदात्॥१॥कांकाष्ठांकस्मैअदादित्याह॥ हर्यक्षा
यप्राचींधूम्रकेशायदक्षिणांदिशंवृकसंज्ञायप्रतीचींदिशंतुरीयायद्रविणसेउदीचींदिशंविभुर्विजिताश्वः॥ आदिशदत्तात्॥२॥

एतच्छ्रुतिकीर्तनश्रवणाश्रावणफलमाह ॥ यः पुमान् सुमहत्पुण्यसाधनमिदं चरितं मवहितमनाः समाहितचित्तः श्रद्धया पठेत् शृणुयात्
श्रावयेद्वा स दृष्टयोः पदवीं गतिं इयात प्राप्नुयात् ॥ ३१ ॥ आनुषंगिकफलमाह ॥ ब्राह्मणः ब्रह्मवर्चस्वी भवेत् राजन्यः क्षत्रियः पठनादिकं कुर्व
न् जगतीपतिर्भवेत् वैश्यः विट्पतिः वैश्यानां पतिः शूद्रः उत्तमतां सजातीयेषु प्राप्नुयात् ॥ ३२ ॥ नरो नारी वा हृता आदरेण युक्ता त्रिः कृत्वः
त्रिवारमिदमाकर्ण्य अप्रजः सुप्रजः विद्यारूपद्रविणवलादियुक्तपुत्रवान् भवेत् निर्धनः धनवतां मध्ये श्रेष्ठः अनभिव्यक्तकीर्तिः

य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत् ॥ श्रावयेच्छृणुयाद्वापि स दृष्टयोः पदवीमियात् ॥ ३१ ॥ ब्राह्मणो ब्रह्मवर्चस्वी क्ष
त्रियो जगतीपतिः ॥ विट्पतिस्तु भवेद्वैश्यः शूद्रः उत्तमतां लभेत् ॥ ३२ ॥ त्रिः कृत्व इदमाकर्ण्य नरो नार्यथवा हृता ॥ अ
प्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥ ३३ ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः ॥ इदं स्वस्त्ययनं पुंसाममंगल्य
निवारणं ॥ ३४ ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम् ॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्ध
येतद्धनुश्राव्यं चतुर्णां कारणं परम् ॥ ३५ ॥ विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् ॥ वलिं तस्मै हरंत्यग्रे राजानः पृथवे
यथा ॥ ३६ ॥

विपुलकीर्तिः मूर्खः ज्ञानविधुरः पंडितो भवेत् ॥ ३३ ॥ स्वस्ति मंगलं ईयते अनेनेति तथा अमंगलं निवारयतीति तत् धाधन्यं
धनसंपादकं यशस्करं आयुष्करं स्वर्गसाधनं कलिदोषहरम् ॥ ३४ ॥ धर्मादीनां सिद्धिं सम्यगभीप्सुभिः पुंभिः चतुर्णां धर्मादीनां परं कार
णं साधनमेतत् चरितं श्रद्धयानुश्राव्यम् ॥ ३५ ॥ एतत् चरितं श्रुत्वा राजा संग्रामाभिमुखो यातितस्मै अभियात्रे वलिं हरंति ॥ तथा राजानः

इत्याश्चर्येर्हर्षेर्वा याव भूः भुभुजां राज्ञां पतिं पतिस्वभर्त्तारं सर्वात्मना सर्वप्रकारेण भेजे प्राप्ता यज्ञेशं भगवंतं श्री रूपिणीव भूरिव ॥२५॥ तस्मात्तेषां सती अ
र्चिः पश्यतो नभस्यनत्यदुर्विभाव्येन चिंतयितुमप्यशक्येन कर्मणा यतिपारार्थ्यादिना पतिं स्वभर्त्तारं वैन्यं पृथुमनुस्तत्यो र्ध्वं व्रजति नूनम् ॥२६
भगवानपद्यते गम्यते ऽनेनेति भगवत्पदं भगवत्प्राप्तिसाधनं नैष्कर्म्यं निवृत्ति धर्म्यं यविघुक्तत्रिवक्तं चलायुषोपि साधयंति तेषां भगवद्भ
क्तानां अन्यद्देवादिपदं किमु दुर्लभं न किंचिदित्यर्थः ॥२७॥ अभक्तांस्तो चयति सइति य पुमानपवर्ग्यमपवर्गसाधनं मानुष्यं मनुष्यंजन्म हृत्क्ले

शेषानूनं व्रजत्यनूर्ध्वमनु वैन्यं पतिं सती ॥ पश्यताऽस्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥२६॥ तेषां दुरापं किं त्वन्यन्मर्त्या
नां भगवत्पदम् । भुवि लोलायुषो ये वै नैष्कर्म्यं साधयंत्युत ॥२७॥ स वंचितो बतात्मध्रुक् कृच्छ्रेण महता भुवि । लब्ध्वा
पवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥२८॥ मैत्रेय उवाच ॥ स्तुवंतीषु अमरस्त्रीषु पतिलोकं गता वधूः ॥ यं वा आत्मविदां
धुर्यो वैन्यः प्रापाच्युताश्रयः ॥२९॥ इत्थंभूतानुभावोसौ पृथुः स भगवत्तमः ॥ कीर्तितं तस्य चरितमुद्दामचरितस्य ते
॥३०॥

ग्गादुःसाध्येन महता कर्मपरिपाकेन भुवि लब्ध्वापि विषयेषु विषज्जते स वंचितो दैवेन वंचितो निरखेदे ॥२८॥ एवं सुरस्त्रीषु स्तुवंती
षु सतीषु वधूरर्चिः पतिलोकं गता प्राप्ता कोसौ पतिलोकः आत्मवतां ज्ञानिनां धुर्यः श्रेष्ठ वैन्यः पृथुः अच्युताश्रयं भगवतो निवास
भूतं वैकुंठाख्यं यं लोकं प्राप तं लोकं गतेत्यर्थः ॥२९॥ उपसंहरति ॥ इत्थमिति ॥ भगवत्तमः भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं
गतिं ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति उक्तविध भगवतां मध्ये श्रेष्ठः असौ पृथुरित्थंभूतानुभावः उक्तविधप्रभावसंपन्नः उद्दा

श्रीवंवथद्भर्तुर्व्रतेस्थंडिलशयनादिरूपंतस्मिन्व्रतेयानि शातयाभर्तृशुश्रूषयाद्दृषीणांमीयं आपीदेहपात्रार्कदग्धलाद्याहाररूपातयाचक

श्चीअतापि अर्चिर्दुःखंनाविंदतयतःप्रेयसःप्रियतमस्यपृथोः॥करस्पर्शनादिरूपंयत्सन्मानंतेननिर्वृता॥२०॥आत्मनःस्वस्याःपृथिव्याश्च

पत्युःपृथोःदेहंविपन्नानिविगतानिअखिलानिचेतनादीनिबुद्धीन्द्रियप्राणादीनियस्मिन्तथाभूतमालक्ष्यदृष्ट्वाकिंचिद्विलप्यचसास

अर्चीवभर्तुर्व्रतधर्मनिष्ठयाशुश्रूषयाचार्षदेहयात्रया॥नाविंदतार्त्तिंपरिकर्षितापिसाप्रेयस्करस्पर्शनमाननि

र्वृतिः॥२०॥देहंविपन्नाखिलचेतनादिकंपत्युःपृथिव्याश्चपितस्यचात्मनः॥आलक्ष्यकिंचिच्चविलप्यसासतीचि

तामथारोपयदद्रिसानुनि॥२१॥विधायकृत्यंह्रदिनीजलाप्लुतादत्वोदकंभर्तुरुदारकर्मणः॥नत्वादिविस्थान्त्रिद

शांस्त्रिःपरीत्यविवेशवह्निंध्यायतीभर्तृपादम्॥२२॥विलोक्यानुगतांसाध्वींपृथुंवीरवरंपतिम्॥तुष्टुवुर्वरदादेवै

र्देववध्वःसहस्रशः॥२३॥कुर्वत्यःकुसुमासारंतस्मिन्मंदरसानुनि॥नदत्स्वमरतूर्येषुगृणंतिस्मपरस्परम्॥२४॥

देव्यऊचुः॥अहोइयंवधूर्धन्यायावैवंभूभुजांपति॥सर्वात्मनापतिंभेजेयज्ञेशंश्रीर्वधूरिव॥२५॥ नी अर्चिःतंदेहं आद्रि

सानुनिचितामारोपयत॥२१॥ततस्तत्कालोचितंकृत्यंचविधायह्रदिन्याःसरस्याजलेष्वाप्लुतासतीउदारकर्मणोभर्तुःउदकंदत्वादिविस्था

नदिदशान्नत्वाभर्तुःपादंध्यायतीचितांत्रिःपरीत्यप्रदक्षिणीकृत्यवह्निंविवेशः॥२२॥वीरश्रेष्ठपतिंपृथुमनुस्यृत्यगतांसाध्वींविलो

क्यवरदादेववधूःसहस्रशःतुष्टवुः॥२३॥तथातस्मिन्मंदरसानुनिकुसुमवर्षंकुर्वत्यःअमरतूर्येषुदेवदुंदुभ्यादिषुनदत्सुस

स्तुपरस्परंरटंतिस्म अभावंत॥२४॥भावत्वमेवा

ह अहोइतिइयंवधूः॥अर्चिर्धर्म्माकृताथा अहो

र्थः ॥ अनलएववहुवचनैतद्यमर्थः ॥ भूतादिर्वैकारिकैतैजसनामानि उपसंहृतकार्याणि उत्क्रम्य आत्मनि आत्मा चित्तं तदनुग्राहकं महत्तत्वे सं
दधे अनुसंहितवान् भूतादिनासमुत्क्रम्येतिपाठेनानितन्मात्राणि भूतादिनानामसाहंकारेणकारणभूतेनसह समुत्क्रम्य तस्मिन् विलाप्य इत्य
र्थः ॥ तत्यस्यकारणवस्तुनासह संश्लेषरूपत्वात्साहित्यविवक्षयात्ततीयांतं भूतादिमहतीत्यन्वयः ॥१७॥ तं महान्तं सर्वगुणविन्यासे बीजे गुणवै
षम्यहेतुभूतमायामये प्रधाने न्यधात् प्रधाने न्यधादित्यर्थः तच्चाव्यक्तमायामये अविद्यसमष्टिसंसृष्टे जीवे न्यधादित्यर्थः ॥ महानव्यक्तेली
यतेइतिश्रुत्यनुरोधात् अनुशायो भक्तोशिष्टं कर्म तद्वाननुशायी पूर्वसंस्कृतिः प्रायो अनुशायी क्षीणप्रायदोष इत्यर्थः जीवः ॥ असौ पृथुः

तं सर्वगुणविन्यासं जीवे मायामये न्यधात् ॥ तं चानुशयमात्मस्थमसावनुशयी पुमान् ॥१८॥ ज्ञानवैराग्यवीर्येण स्वरूपस्थो जहात्प्रभुः ॥ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनं ॥ सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः ॥१९॥

तं अविद्यसमष्टिसंसृष्टं आत्मस्थं स्वस्वरूपस्थं नितरां प्रकृतिसंबंधविमुक्तं अनुसंहितवानित्यर्थः ॥१८॥ ततो ज्ञानवैराग्यबलेन अ
नुशायं भुक्तावशिष्टं पूर्वोत्तरभेदेन संचितानभ्युपगतबुद्धिपूर्वकभेदेन च भिन्नं पुण्यपापात्मकं कर्म अजहत् अत्याक्षीत् ततः प्रभुरकर्मवशेषाभूत्वा
स्वरूपस्थपरमात्मकाविर्भूतगुणएकः स्वस्वरूपेणावस्थितोभून्मुक्तोभूदित्यर्थः ॥ अथार्चिनाम्नी पृथोः पत्नी महाराजस्य स्त्री सुकुमारी
अतदर्हावनगमनादि क्लेशमनर्हत्यपि पतिमनुसरत्सवनं गता प्रतिष्ठा अतदर्हत्वमेवाह ॥ यस्या अर्चिषः पद्भ्यां भुवः स्पर्शनं पद्भ्यां भुवमस्पर
स्पर्शंतीमहाभोगशालिनी सा त्वात्पद्भ्यां वनं प्रविष्टवतीत्यतदर्हत्वमुक्तम् ॥१९॥

खानि इंद्रियाधिष्ठानानि देहे दिवि च तानि द्रवं देहस्य जलं तोये महाभूते यथास्थानं यथाकारणं विभागशः । असंकरेण अयूयुजत एवं देहस्य भूतांशानां
महाभूतसमष्टिना अनुसंधानमुक्तं अथ पृथिव्यादीनां उत्पत्तिक्रमेण लयानुसंधानमुच्यते क्षितिं महाभूतमंभसि महाभूते अयूयुजदित्य
नुषंगः तत् अंभः तेजसि अहः तेजः वायौ अमुं नभस्याकाशे ॥१६॥ तदेवं तामसाहंकार्याणां आकाशपर्यंतलयमुक्त्वा सात्विकाहंकारकार्याणां
लयानुसंधानमाह ॥ इंद्रियेषु मन इति । सविकल्पकज्ञाने मनस इंद्रियेराकर्षणात् तेषु लयानुसाधनमुक्तं न तु तत्कार्यत्वात् वैकारिकत्वा
न्मनसः ॥ यदुक्तं गीतासु इंद्रियाणां हि चरतां यन्मनोनुविधीयते इति अत्रापि इंद्रिये विषयाकृष्टैराकृष्टं ध्यायतां मन इति । तानींद्रियाणि त
न्मात्रेषु अत्रापींद्रियाणां वैकारिकत्वेपि तेषां शब्दादितन्मात्रेराकर्षणात् तन्मात्रेष्विमुक्तम् ॥ अयमर्थः तामसाहंकारकार्याणां पृथिव्या

खान्याकाशे द्रवं तोये यथास्थानं विभागशः । क्षितिमंभसि तत्तेजस्स वायौ नभस्यमुं ॥१६॥ इंद्रियेषु मनस्तानि तन्मात्रे
षु यथोद्भवं । भूतादिनामून्युत्कृष्य महत्यात्मनि संदधे ॥१७॥

दीनां ॥ आकाशपर्यंतलयमभिधाय तद्धर्माणां च मनस आकृ
ष्टत्वेन च मन इंद्रियार्थानां उत्तरोत्तरानुवर्तित्वं न कार्यकारणयोरिव प्रदर्शयितुं लयानुसंधानकीर्तनमिति परमार्थतः इंद्रियाणां वै
कारिकेहंकारे आकाशस्य शब्दस्य भूतादौ लय इति विवेकः तेजसस्य तु अहंकारस्य वैकारिकभूतादोरनुग्रहमात्रमेव न तु कार्या
न्तरमस्ति न तत्कार्यत्वं लय उक्तः यथोद्भवं यथाप्रवृत्ति मन आदीनामुत्तरोत्तराधीनप्रवृत्तिकत्वात् इंद्रियेषु न भइत्यपि पाठो दृश्यते नन
म ॥ आकाशांश शब्दादितन्मात्रेषु इंद्रियविषयेषु विषये न तद्वदुपचारात्प्रयुक्ताः ॥ भूतानां तन्मात्रेषु यथोद्भवं लय इत्यर्थः तानि तन्
मात्राणि यथोद्भवं उद्भवे भवति कस्मात् उद्भवस्तस्मादिति उद्भवः कारणं भूतादाविस्यर्थः ॥ भूतादि शब्दो वैकारिक तैजसयोरपि प्रदर्शना

रःयेनवयुनेनज्ञानेनइदंप्रकृतिसंबंधःअच्छिनत्तदपिज्ञानंतत्यजेतस्मात्अनिसंजदंशरीरमनुसंधायतदन्योस्मीतिहिविवेकज्ञानमुदेतितत्र
शरीरमपिप्रतिसंबंधितयाबुद्धिस्थंस्यात्योगकाष्ठायांब्रह्मात्मस्वात्मनिसाक्षात्कृतेदेहप्रतिसंबंधितयाज्ञानाभावात्तस्यजइत्युक्तंनहिकेव
लंघटइत्यनुभवेपराहमपरप्रतिसंबंधितयाज्ञानमनुवर्ततेनत्वहमित्यर्थःएवमेकाग्रतायांहेतुमाह॥तावदिति॥भगवत्कथासुरतिंयावन्नकु
र्यात्तावद्योगगतिभिरप्रमत्तोनभवतिअच्युतभगवत्कथानांप्रमादःस्यादेवअस्यभगवत्कथारतिवान्प्रमादइत्यर्थः॥१२॥सवीरश्च

छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेच्छिनदिदंवयुनेनयेन॥तावन्नयोगगतिभिर्यतिरप्रमत्तोयावद्ग
दाग्रजकथासुरतिंनकुर्यात्॥१२॥एवंसवीरप्रवरःसंयोज्यात्मानमात्मनि॥ब्रह्मभूतोदृढंकालेतत्याजस्वंक
लेवरं॥१३॥संपीड्यपायुंपार्ष्णिभ्यांवायुमुत्सारयंछनैः॥नाभ्यांकोष्ठेष्ववस्थाप्यहृदुरःकंठशीर्षणि॥१४॥
उत्सर्पयंस्ततोमूर्ध्निक्रमेणावेश्यनिस्पृहः॥वायुंवायौक्षितौकायंतेजस्तेजस्ययूयुजत्॥१५॥ सःपृथुःआत्मा

नमात्मनिपरमात्मनिसंयोज्यसमर्प्यस्वतःसिद्धंअपृथक्सिद्धसंबंधंअनुसंधायेत्यर्थःआविर्भूतगुणाष्टकतयाब्रह्मप्रकारंप्राप्तःअभ्यु
पगतप्रारब्धावसानकालेस्वशरीरंतत्याजब्रह्मभावप्राप्तेःकलेवरानंतरभावित्वेपिसिद्धवदभिप्रायकृतःपूर्वकालनिर्देशः॥१३॥कले
वरत्यागपूर्वकब्रह्मभावप्राप्तिप्रकारमेवोपपादयति॥संपीड्येति॥गुल्फाभ्यांपायुंगुदंसंपीड्यसंनिरुध्यमूलाधाराद्वायुंशनैरुत्सारयन्ऊर्ध्वं
नयन्नाभ्यामवस्थाप्यततःहृदयादिषुकोष्ठेषुस्थानेषुअवस्थाप्यहृदयादीनांदेकंप्राणपंगत्वात्तत्रशीर्षेभ्रूमध्येभ्रूवोर्मध्येप्राणमावे
शसम्पितिस्थितेः॥१४॥तंचततःमूर्ध्निब्रह्मरंध्रेउत्सर्पयन्क्रमेणब्रह्मरंध्रेचावेश्यनिस्पृहः॥अणिमाद्यैश्वर्यादिकमपिस्यात्इतिस्पृहानिविध्य

तितिक्षुः शीतोष्णादिसहः यतवाक् मौनव्रतः दांतः दमयुक्तः ऊर्ध्वरेताः शांतः जितानलः जितप्राणः एवंभूतः कृष्णं भगवंतमारिराधयिषुः एवं
विधमुत्तमं तप आचरत् ॥७॥ क्रमानुरूढेन शनैः ॥ अभ्यस्तेनेन तपसा ध्वस्तानि कर्माणि यस्य प्राणायामैः ॥ अमलः आशयोंतःकरणं यस्य संनिरु
द्धः प्रत्याहृतः षडिंद्रियवर्गो येन भिन्नानि बंधनानि असनानि यस्य ॥८॥ सनत्कुमारो यं उत्कृष्टं अध्यात्मिकं योगमाह तेनैव योगेन पुरुषर्षभः
पृथुः पुरुषं अभजत ॥९॥ भगवद्धर्मिणः निवृत्तधर्मिणः श्रद्धया ततः यत्नं कुर्वतः साधोः पृथोः भगवति पूर्णषाड्गुण्ये ब्रह्मणि अनन्यविष

तितिक्षुर्यतवाक् दांत ऊर्ध्वरेता जितानिलः ॥ आरिराधयिषुः कृष्णमचरत्तप उत्तमम् ॥७॥ तेन क्रमानुरूढेन ध्वस्त
कर्मा मलाशयः ॥ प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नसंशयः ॥८॥ सनत्कुमारो भगवान् यदाहाध्यात्मिकं परम्
योगं तेनैव पुरुषमभजत्पुरुषर्षभः ॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ॥ भक्तिर्भगवति ब्रह्मण्यनन्यविष
या भगवतः परिकर्मशुद्धसत्वात्मनस्तदनुसंस्मरणानुपूर्त्या ॥ ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशय
पदं निजजीवकोशम् ॥११॥ ॥

याऽव्यभिचारिणी भक्तिरभवत् ॥१०॥ भगवत्कर्मणा परिचर्यया शुद्धसत्वात्मनः शुद्धसत्वमन
सः तस्य पृथोः तस्य भगवतः संस्मरणं पूर्वापरक्रमभक्तिः तस्यानुपूर्त्तिः परिपूर्णता तया जातं यत् परज्ञानं विरक्तिश्चोद्भूत् तत्कीदृशं ज्ञानं ये
न निशितेन ज्ञानेन संशयस्थानं निश्चेतुमशक्यस्वरूपं जीवकोशं अहंकृतिं तत् चिच्छेद स्वस्मिन् असंबद्धमकरोत् तादृशं ज्ञानमुद्भूदित्य
र्थः ॥११॥ छिन्नान्यधीः छिन्ना प्रकृतिधीः देहात्मबुद्धिरहितः अधिगता आत्मगतिः आत्मस्वरूपमाध्यात्म्यं येन अत एव निरीहः निष्कामः

निष्पादितः ईश्वरादेशः प्रजापालनादिरूपो येन यदर्थं यत् लोकपालनाद्यर्थं जज्ञिवान् जातः तत्सर्वं कृतवेसर्थः ॥२॥ आत्मजेषु आत्मजां पुत्रीं क्ष
तौंम्ब मिंकथंभूतौ विरहात्तयोर्विश्लेषाद्दुःखितामिव स्थितां विमनस्प्रजासु विमनः सुचिंतातुरासु सतीषु सदारः सभार्यः एकः असहायः ॥३॥
तत्रतपोवने उपात्ताः स्वीकृताः आत्मनो नियमाः शमदमादयः येन ॥ अत्तोभ्यनियम इति पाठे विद्वेनीशापयितुमशक्या नियमा यस्य वैखान
सानां वानप्रस्थानां सुसम्मते उग्रेन तपसि आरब्धः प्रवृत्तः कर्दमितः स्वस्य धरामंडलस्य विजये पूर्वं यथा महता यत्नेन प्रवृत्तः ॥४॥ उग्रेन तपोव

जगन्नलस्तु पश्चापि वृत्तिहो धर्मभृत्तनाम् ॥ निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥२॥ आत्मजेष्वात्मजां न्यस्य
विरहाद्दुःखितामिव प्रजासु विमनः स्वैकः सदारोऽगात्तपोवनम् ॥३॥ तत्रात्मुपात्तनियमो वैखानससुसम्मते ॥ आरब्ध
उग्रेन तपसि यथा स्वविजये पुरा ॥४॥ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित् ॥ अब्भक्षः कतिचिन्मासान् वायुभक्ष
स्ततः परं ॥५॥ ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः ॥ आकंठमग्नः शिशिरे उदके स्थंडिले शयः ॥६॥ ॰

नः पतितं कंदमूले निश्चिभिः कंदाद्यलाभे कदाचित् तृणाद्यशनः ॥ यदा कांश्चिन्मासान् कंदाद्याहारः कांश्चित् तृणाद्यशनः कांश्चिदब्भक्षः ।
ततः वायुभक्ष एव ॥५॥ ग्रीष्मे ऋतौ चतुर्दिक्षु चत्वारोऽग्नयः उपरि सूर्यस्तेषां तपस्तापो यस्य वर्षासु ऋतौ आसारं धारासंपातं सहते इत्यासा
रषाट् मुनिः सदा प्रभाष्य यमं शीलनपरः शिशिरे ऋतौ उदके आकंठमग्नः स्थंडिले शयः दर्भादिभिः परिस्तृतभूमिशयः ॥६॥ ॥

अविपक्षतया भगवान् भक्तराट् हरिः इव बलं शरीरबलं ओजः इंद्रियबलं महः देहकांतिः ॥ सौंदर्येण कंदर्प इव मृगराट् सिंह इव मनस्वी स्वैरी ॥ पूर्णे ॥ मनुः
मनुः स्वायंभुवः अजः चतुर्मुखः प्रभुत्वे ब्रह्मवादे वेदवादे बृहस्पतिरिव आत्मवत्वे यद् अधीनं सर्वं हि धनवान् यद् अधीन आत्मा स आत्मवान् स्वाधी
नत्वे स्वयं ॥ ३० ॥ गोषु गुरुषु विप्रेषु च विष्वक्सेनानुवर्तिषु च भक्तः ह्रियादिभिः परार्घ्यो द्यमे आत्मतुल्यः निरूपम ॥ ३१ ॥ त्रैलोके तत्र तत्र पुरग्रामादि
वासिभिः पुंभिः ऊर्ध्वं उच्चैर्गीतया गीत्या स्त्रीणां कर्णरंध्रेषु प्रविष्टः सतां कर्णरंध्रेषु रामः सीतापतिरिव ॥ ३२ ॥ इति श्री भागवते द्वाविंशोध्यायः ॥ २२ ॥

अविपक्षतया देवो भगवान् भक्तराडिव ॥ कंदर्प इव सौंदर्ये मनस्वी मृगराडिव ॥ पूर्णे ॥ वात्सल्ये मनुवन्नृणां प्रभुत्वे
भगवानजः ॥ बृहस्पतिर्ब्रह्मवादे आत्मवत्वे स्वयं हरिः ॥ ३० ॥ भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु ॥ ह्रिया प्र
श्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ३१ ॥ कीर्त्योर्ध्वं गीतया पुंभिः त्रैलोक्ये तत्र तत्र ह ॥ प्रविष्टः कर्णरंध्रेषु स्त्रीणां रामः
सतामिव ॥ ३२ ॥ इति श्री भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां चतुर्थस्कंधे द्वाविंशोध्यायः ॥ ॥ २२ ॥ मैत्रेय
उवाच ॥ इष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान् ॥ आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः ॥ १ ॥ श्री रामः

एवं सर्वगुणसंपन्नः संपालितलोकः ॥ आसीदित्युक्तं अथ यात्मजेष्वारोपित राज्यभरः ॥ सभार्यः प्रविष्टतपोवनः कुमारोयदिशाध्यात्मयोगः
निष्ठः आत्मपरमपुरुष आसीत् तत्सलीतल्लोकमगादिति एष वृत्तांतमुपसंहरति ॥ इष्ट्वेति वैन्यः आत्मवान् स्वर्गस्वाराज्यादीनामस्थि र
स्थिरत्वज्ञानवान् ॥ आत्मानं प्रवयसं वृद्धं दृष्ट्वा तपोवनमगादित्युत्तरेणान्वयः ॥ आत्मना स्वेन वर्द्धितः अशेषः स्वानुसर्गः स्वविषयवस्त

नुसर्गः व्यष्टिसर्गः यस्य ॥ १ ॥

पुत्रानित्यन्वयः सर्वेषां इंद्रादीनां पृथक् प्रत्येकं यो योऽसाधारणगुणस्तान् सर्वानेक एव अच्युतात्मन अच्युतस्य परमात्मनो या जगत्स्थि
तिस्तस्या गोपीथाय रक्षणाय स्वस्वे काले उचितकाले दधौ दधार ॥५४॥ मनोवाक्कायैः सौम्यैर्गुणैः प्रजाः संरंजयन् राजेति नामधेयं मधा
त दधार अपरः सोमराज इव सोमस्त्वासौ राजा च सोमराजः सइव लोकरंजनात्सोमस्त्वं द्वौ राजेति नाम यथा धात्तेन यथार्थं ॥५५॥ लोक
पालासाधारणगुणानुचितकालेष्वेक एवाधारि इत्युक्तं तदेवोपपादयति सूर्यवदित्यादिना यावदध्यायसमाप्तिः भुवः वसुधनं

मनोवाङ्वृत्तिभिः सौम्यैर्गुणैः संरंजयन्प्रजाः ॥ राजेऽसधान्नामधेयं सोमराज इवापरः ॥५५॥ सूर्यवद्विसृज
न्गृह्णंस्तपन्भुवो वसु ॥ दुर्धर्षस्तेजसा वाग्निर्महेंद्र इव दुर्जयः ॥५६॥ तितिक्षया धरित्रीव द्यौरिवाभीष्टदो
नृणां ॥ वर्षति स्म यथाकामैः पर्जन्य इव तर्पयन् ॥५७॥ समुद्र इव दुर्बोधः सत्वेनाऽचलराडिव ॥ धर्मराडिव शि
क्षाया मास्त्रयो हिमवानिव ॥ कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा ॥ मातरिश्वेव सर्वात्मा बलेन महसौजसा

॥सा॥५८॥

गृह्णन्विसृजन्सौ सूर्य इव प्रातः प्रतपन् आर्त्तान्कुर्वन् तेजसा अग्निरिव दुर्धर्षः ॥ परैरभिभवितुमशक्यः महेंद्र इव दुःखेनापि
जेतुमशक्यः ॥५६॥ तितिक्षया सहनेन धरित्रीव अपराधतितिक्षासमये धरित्रीतुल्यः नृणामभीष्टदानावसरे द्यौः स्वर्ग इव पर्ज
न्य इव तर्पयन्नृणां कामान्वर्षति स्म ॥५७॥ समुद्र इव दुर्बोधः अपरिच्छेद्यः सत्वेन अचलराडिव मेरुरिव ऐश्वर्ये हिमवानिव
स हिमान् हि रत्नाकरः मघवानिवेति पाठे इंद्र इव वरुण इव गुप्तार्थः गुप्तमंत्रः मातरिश्वा वायुरिव सर्वात्मा सर्वगः बलेन

एवमुपासनांगत्वेन कर्मयोगमकरोदित्युक्तं तेन च कर्मयोगं फलसंगकर्तृत्वत्यागात्मयाथात्म्यानुभवपूर्वकमकरोदित्याह ॥ फलमिति ॥ ब्रह्मणि फलं संन्यस्य फलस्य ब्रह्मार्पणतामनुसंधाय न तु स्वानुष्ठीयमानकर्मायत्तत्वामित्यर्थः ॥ तया निर्विषंगः ममेदं कर्मेति मतिरहितः ॥ अनेन संगत्याग उक्तः कर्माध्यक्षं कर्मसु कर्तृत्वाभिमानिनं आत्मानं परमगात्मानं प्रकृतेः परं मन्वानः कर्तृत्वाभिमानः प्रकृतिसंसर्गकृतो न तु स्वभावत इत्येवं मन्वान इत्यर्थः ॥ अकरोदिति पूर्वेणान्वयः ॥ ५१ ॥ सः पृथुः गृहेषु भोगस्थानेषु वर्त्तमानोपि साम्राज्यश्रियान्वितोपि सन्निहितभोग्यभोगोप

फलं ब्रह्मणि विन्यस्य निर्विषंगः समाहितः ॥ कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम् ॥ ५१ ॥ गृहेषु वर्त्तमानोपि स साम्राज्यश्रियान्वितः ॥ नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ॥ ५२ ॥ एवमाध्यात्मयोगेन कर्माण्यनुसमाचरन् ॥ पुत्रानुत्पादयामास पंचार्चिष्यात्मसम्मितान् ॥ ५३ ॥ विजयाश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम् ॥ सर्वेषां लोकपालानां दधारैकः पृथग्गुणान् ॥ गोपीथाय जगत्सृष्टेः काले स्वे स्वे च्युतात्मकः ॥ ५४ ॥

करणेपि निरहंमतिः ॥ देहात्मभ्रमरहितः ॥ अतएवं इंद्रियार्थेषु नासज्जत नासक्तोभूत् यथार्कः स्वप्रभया पंकादिषु व्याप्रियमाणोपि न तेन लिप्तस्तथेत्यर्थः ॥ ५२ ॥ एवमध्यात्मयोगेन भगवद्भक्तियोगेन अध्ययनेन वा सतीति वा देवत्वर्थे [illegible] तृतीया अध्यात्मयोगार्थमित्यर्थः यद्वा प्रकृतिविविक्तात्मयाथात्म्यज्ञानयोगपूर्वकं कर्माणि अनुदेशकालानुसारेण समाचरन् अर्चिषि अर्चिनाम्न्यां भार्यायां आत्मसंमितानात्मतुल्यान् समस्तानि पाठे आत्मानुकूलानित्यर्थः ॥ पुत्रानुत्पादयामास ॥ ५३ ॥ पुत्रान्प्रति निर्दिशति विजिताश्वमित्यर्थेन विजिताश्वादि

भा॰ चु॰
॥१५०॥

सत्यपिसत्वेसर्वस्वेनापिनगुणाःप्रत्युपकर्तुंशक्यइत्याह। येषामिति॥ आत्मवादे अध्यात्मविचारेणकांततोनित्यंयेननिगमिभिः निगमानुसारिभिः येषु
आभिः इहश्रीदुस्तरमहाव्यसनात्मकसंसारार्णवनिस्तरणोपायभूतानः अस्मभ्यंप्रतिपादितातेनपूर्वं अदभ्रकरुणाः स्वकृतेन आर्तोद्धरण
कर्मणातुष्यंतु॥ कोनामतत्कृतमुपकारंप्रतिस्वयमुपकरोतिउदपान्नंतोयांजलिंविनाउदकप्रदानपूर्वकमंजलिबंधनमेवतस्यप्रत्युपका
रइत्यर्थः॥४७॥ आध्यात्मयोगंपांति॥ अनुष्ठानानुष्ठापनाभ्यामित्यात्मयोगपतयस्तेसनकादयः॥ आदिराजेनपृथुनापूजिताः संतः तदीयंत

येषीदृशीभगवतोगतिरात्मवादएकांततोनिगमिभिः प्रतिपादितानः॥ तुष्यंत्वदभ्रकरुणाः स्वकृतेननित्यंकोनामतत्प्रतिका
रोतिविनोदपात्रं॥४७॥ त आत्मयोगपतय आदिराजेनपूजिताः॥ शीलंतदीयंशंसंतः खेऽभूवन्मिषतांनृणाम्॥४८
वैन्यस्तुधुर्योमहतांसंस्थित्याध्यात्मशिक्षया॥ आप्तकाममिवात्मानंमेन आत्मन्यवस्थितः॥४९॥ कर्माणिचयथाका
लंयथादेशंयथाबलं॥ यथोचितंयथावित्तमकरोद्ब्रह्मसात्कृतम्॥५०॥

योः संबंधिशीलंप्रशंसंतः नृणांमिषतांपश्यतांसतां
ते अभवन् खमाकाशमारूढाइत्यर्थः॥४८॥ धुर्यःश्रेष्ठोवैन्यस्तुमहतांसनत्कुमारादीनां॥ अध्यात्मदीक्षयाहेतुभूतयायासंस्थितिर्निष्ठातया
आत्मन्येवावस्थितः परमात्मोपासननिष्ठः आत्मानमाप्तकामं अवाप्तसमस्तकाममिवमेने॥४९॥ तथापरमात्मोपासनांगत्वेनदेशाका
लादिकमनतिक्रम्यकर्माणिवर्णाश्रमोचितानिब्रह्मार्पितंयथाभवतितथा अकरोत्॥५०॥ ० ॥ ० ० ० ० ० ०

॥रामः॥
॥१५०॥

आर्त्तानां तत्र यातु गतानां अनुकंपिना हरिणा पूर्वं मे मह्यमनुग्रहः कृतः हे ब्रह्मन् भगवन् तमनुग्रहमापादयितुं निष्पादयितुं यूयमत्रागताः ॥४२
दयालुभिर्भवद्भिर्यन्मे मीहितं कार्त्स्न्येन निष्पादितं अत्रोपदेशे तुभ्यं मदीयं किं देयमस्तीत्याह ॥ साधूच्छिष्टमिति ॥ आत्मना देहेन सर्वं मदीयं साधू
नामुच्छिष्टं साधूनामनुग्रहलब्धमित्यर्थः अतो भवदनुग्रहाल्लब्धं भवद्भ्यः किं ददे गुरुदक्षिणार्थं किं ददेन ह्यनुग्रहादपि त्रातं तं पुनस्तेभ्यो
दीयत इत्यर्थः ॥४३॥ यद्यप्येवं तथापि राज्ञो भक्तस्यैवं मया निवेदितं स्वीकुरुतेत्याह ॥ प्राणा इति प्राणाः असवः गृहाः धनानि सपरिच्छदाः

राजोवाच ॥ कृतो मेऽनुग्रहः पूर्वं हरिणार्त्तानुकंपिना ॥ तमापादयितुं ब्रह्मन् भगवान् यूयमागताः ॥४२॥ निष्पादितश्च
कार्त्स्न्येन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ॥४३॥ प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरि
च्छदाः ॥ राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥४४॥ सेनापत्यं च राज्यं च दंडनेतृत्वमेव च ॥ सर्वलोकाधिपत्यं च वे
दशास्त्रविदर्हति ॥४५॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ॥४६॥

सोपकरणाः गृहाः राज्यं बलं मही कोशः महान्कोशः पद्माकारवालकोश इत्युक्तं यद्वा कोशः रत्नभांडादिरूपः रैशब्दस्तु अतिरिक्तधनपरः
इतिशब्दः प्रकारे एवंविधमन्यत्सर्वमपि निवेदितं तुभ्यं मयेति शेषः ॥४४॥ ननु मद्योग्यमेव मह्यं समर्पणीयं तत्राह ॥ सेनापत्यं सेनानायक
त्वं दंडनेतृत्वं दंडनायकत्वं तथा सर्वलोकाधिपत्यं वेदशास्त्रविदर्हति ॥४५॥ एतदेवोपपादयति ब्राह्मणः स्वयमेव स्वीयमेवान्नं भुंक्ते स्वीय
मेव वस्त्रादिकं वस्ते परिधत्ते ददाति च क्षत्रियादिभ्यः तस्यैव ब्राह्मणस्यानुग्रहेण लब्धमन्नं क्षत्रियादयो भुंजते ॥४६॥ ० ॥ ० ॥

भा॰स्कं॰

॥१३८॥

र्थः प्रपद्ये अनुसंदधे यथान्तर्निहितो भगवान् स्वेन रूपेण तिष्ठति इह मन्त्रे भगवतः स्वेन तत्त्वं विग्रह द्वारकं न तत्त्वव्यवधानेन एव क्षेत्रज्ञरूपस्य भगवतः क्षेत्रज्ञत्वा
दैवकर्म सर्वं धा ज्ञानादिकं न तत्त्वप्रव्यवधानेन तस्य र्थः ॥३८॥ एवं क्षेत्रज्ञशरीरे त्वेना वस्थानं निर्दोषत्वं चोक्तं अथ स्वेन रूपेण वस्थितिमाह। यस्मादिति
यद्ध्यानुष्यमुपदिष्टं भगवद्भक्तियोगं सर्वे विमुमुक्षवोऽनुतिष्ठति अतस्त्वमपि तमेवानुतिष्ठेत्याह। यस्मादिति॥ रिक्तेषु भगव द्व्यतिरिक्तेषु मतिः रि
क्तमति अभगवदात्मकत्वबुद्धिविनिवृत्त्या नेरिक्तमतिर्येषां ते न रिक्तमतयः तमेव मन्वाना इत्यर्थः विरुद्धस्रोतोगणाः निरुद्धः प्रत्याहृतः स्रोतोग
णाः इंद्रियवर्गो यैस्ते संतः साधवः यस्य भगवतः पादपंकजयोः पलाशा इवांगुलयस्तेषां विलासः कांतिस्तस्याः। भक्त्या कर्म च आशयश्च कर्मा

यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः। तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं
भज वासुदेवम्॥३९॥ कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति। तत्त्वं हरेर्भगवतो भजनीयमं
घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं॥४०॥ मैत्रेय उवाच॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा। दर्शितात्मगतिः सम्यक्प्र
शस्योवाच तं नृपः॥४१॥

शयं आशयो वासना ग्रथितं स्वसंवद्धं उद्ग्रथयंति मोचयंति तस्मात्त्वमपि तमेव अरणं शरणं करणे ल्युट् स्वप्र
पकमित्यर्थः॥ वासुदेवं भजस्व भगवद्भक्तिं विना तरणं संसारार्णवो दुस्तर॥३९॥ अतस्तमेव भजस्वेत्युपसंहरति कृच्छ्र इति॥ अप्लवेशां ईश्वराख्यप्ल
वरहितानां षड्वर्गनक्रं षडिंद्रियवर्गग्राहं भवार्णवं इह दुःखेन ये तितीर्षयंति तर्तुमिच्छंति तेषां महान् कृच्छ्रः क्लेशः तत्तस्मात्त्वं हरेर्भगवतः
भजनीयमनुत्तमाराध्यं अंघ्रिं उडुपं प्लवं कृत्वा व्यसनं दुःखात्मकं दुस्तरार्णं तर्तुमशक्यं भवार्णवं उत्तर पारं गच्छ॥४०॥ आत्ममेधसा ब्रह्मविदा ब्र
ह्मपुत्रेण सनत्कुमारेण दर्शिता आत्मनो गतिस्तत्त्वं यस्य स नृपः पृथुः सम्यक्प्रशंसां कृत्वा तं कुमारमुवाच॥४१॥ ॥ ॥ ॥ ॥ ॥

॥राम॥

॥१३८॥

र्वमचिंद्रिकाणाम विमत्वमुक्तम ॥ अथ पारमहंस्यचर्यायेमुपदिशन् प्रकृतिप्राकृतविलक्षणस्य नित्यस्यात्मस्वरूपस्य भगवदात्मकत्वेनानुसंधा
नमाह ॥ तदिति त्रिभिः तस्मात् देहेन्द्रि असवः प्राणाः धिषणात्मप्रसादेन ज्ञानद्वारभूतं मन उच्यते देहेन्द्रियप्राणमनोभिरावृतानां देहाद्यात्मकानामिर
मर्थः तस्थुषां स्थावराणां जगतां जंगमानां च क्षेत्रविदः क्षेत्रज्ञाः स्थावरजंगमानां तस्या जीवाः तपति अन्तरात्मतया नियच्छतीति तत्पः तस्य भावस्तत्ता
तया जीवानन्तरात्मतया यः हृदि स्थितः प्रसकृत्स्वसैभासमानः ॥ अनेन पराचीः चेतनाद्वैलक्षण्यमुक्तं चकास्ति स भगवानहमस्मीत्येवं हि भग
वदात्मकोहमस्मीति वुध्यस्वेत्यर्थः ॥ यद्वा देहेन्द्रियप्राणमनोभिरावृतानां स्थावरजंगमदेहस्य चेतनानां यः क्षेत्रवित् अहंकारममका र
रास्पदे शरीरे चित्तेतेपोनीति क्षेत्रवित्तपः तस्य भावस्तत्ता तया जीवरूपतया परागर्थविलक्षणः प्रत्यग्भूतो हृदि चकास्ति तं जीवात्मानं

तत्त्वेनैंद्र जगतामथ तस्थुषां च देहेन्द्रियासुधिषणात्मभिरावृतानां यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽ
स्मि ॥ ३७ ॥ यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुति स्रजि वाहिबुद्धिः ॥ तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं प्रत्यूढ
॥ कर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥
स भगवानस्मीत्येवं हि भगवदात्मकोहमस्मीति वुध्यस्वेत्यर्थः तत्त्वमसि अयमात्मा ब्रह्मेत्यादिवदयं सामाना
धिकरण्येनानुसंधानातन्निर्देशः शरीरविषय बुद्धिशब्दादीनां शरीरिपर्यंतत्वमाकृतिनयेन खंडो गौरित्यादिवद्बोध्यं ॥ ३७ ॥ ननु भगवतः क्षेत्रज्ञ
शरीरत्वेन तद्रूपतया वस्थितो क्षेत्रज्ञगतदोषप्रसक्तिर्मैवमित्याह ॥ यस्मिन्निति ॥ यस्मिन्निति क्षेत्रज्ञरूपे माया विवेकविधुति मायायाः सकाशा
जीवपरयोः विवेकस्तस्य विधूननहेतुः ॥ विवेकज्ञानविरोधि सदसदात्मतया कार्यकारणरूपेण इदं देवमनुष्यादिनानाविधरूपजातं स्र
जि सर्पवुद्धिरिव विभाति जीवतादात्म्येन प्रतिभातीत्यर्थः तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं स्वतः प्रकृतिसंबंधकर्मरहितस्वप्रकाशस्वरूपं
तथापि प्रत्यूढकर्मकलितप्रकृतिं प्रत्यूढा अनादितया रूढमूलयत्कर्मतेन कलिला मिश्रा प्रकृतिर्यस्मात्तं स्वसंसृष्टकर्मभिश्रवासनमित्य

शब्दादिविषयप्रेयस्त्वं यद्यपि अतः परतरः पुंसः स्वार्थव्यतिक्रमः स्वपुरुषार्थविरहः लोके नास्ति ॥३२॥ विषयध्यानतत्संयोगयोरनर्थकारित्वमुप
संहरति ॥ अर्थेंद्रियेति द्वाभ्यां ॥ अर्थेंद्रियाणि शब्दाद्यर्थविषयाणि श्रोत्रादीनि तेषामर्थस्य शब्दादेरभिध्यानं नृणां सर्वार्थापह्नवः ॥ सर्वपुरुषार्थवि
लोपी अर्थः स्वर्गादिसाधनभूतयागादेरपि तदेकमनस्केन कार्यत्वात् सर्वपुरुषार्थविरोधित्वमुक्तं येन शब्दाद्यभिध्यानेन ज्ञानाद्भ्रंशितः ॥ ज्ञानं शास्त्र
जं विज्ञानं तु उपासनात्मकं तयोः समाहारद्वंद्वः तस्माद्भ्रंशितः मुख्यतां स्थावरतां आविशति प्राप्नोति ॥३३॥ तीव्रं अनर्थकृत्तमः ॥ अज्ञानं तितीर

अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ॥ भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम् ॥३३॥
न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः ॥ धर्मार्थकाममोक्षाणां यदत्यंतविघातकम् ॥३४॥
तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते ॥ त्रैवर्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ॥३५॥ परेऽवरे
च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेमं ईशविध्वंसिताशिषाम् ॥३६॥ श्रीरामः

र्षुः तर्तुमिच्छुः कर्हिचित्संगं न कुर्यात् ॥ यद्विषयासंजनं धर्मादीनामत्यंतविघातकम् ॥३४॥ धर्मादिभिः साकं मोक्षस्य तुल्यवन्निर्देशात् स्येतर
पुरुषार्थसाम्यं वारयति ॥ तत्रापीति तत्रापि चतुर्णां मध्ये मोक्ष एव पुरुषार्थः आत्यंतिकतया अंतमतीत्य वर्तमानतया नित्यत्वेनेष्यते ॥ इत
रस्त्वेतरद्वाविषयो भवति त्रैवर्गरूपार्थः कृतांतः कालः तद्भयसंयुतः ॥३५॥ अनित्यतामेवाह । परावरे उत्कृष्टापकृष्टरूपा ये भावाः पदार्थाः
आब्रह्मस्तंबपर्यंताः ॥ गुणव्यतिकरात् गुणवैषम्यरूपसृष्टेः ॥ अनुपश्चाद्भवंति न तु प्रलये अतएव ईशेन कालरूपेण परमात्मना वि

॥३६॥ ॥ रामः ॥

अचद्दृढा रतिर्नैष्ठिकी रतिरिति। अंतराविशयानुचिंतनं रतिविरोधीत्यवगम्यते तस्य च विरोधित्वं संगादिजननद्वारेति संगः प्रतिषिद्धः असंग आ
त्मन्यात्तिरिति असंगः सदृतस्यनात्मनि ज्ञानविरागरंहसेति तद्विषयचिंतनायाः संगादिद्वारा रतिविरोधित्वमुपपादयति ॥ इंद्रियैरित्यादिना
ध्यायतां विषयांश्चिंतनं कुर्वतां विषयैः शब्दादिभिः आकृष्टानि यानींद्रियाणि तैर्मन आकृष्टं आक्षिप्तं सत् बुद्धेः पुरुषार्थतत्साधनव्यव
सायात्मिकाबुद्धेः चेतनां तत्संबंधिज्ञानं पुरुषार्थतत्साधनविषयां व्यवसायरूपां बुद्धिं वृत्तिं हरति ॥ तत्र दृष्टांतः स्तंबः तीरस्थकुशादिस्तंबः
केनचिद्दीर्घक्लेशाय यानीरशोषित्वहेतुतया ह्रदात्तोयमपि आवयति तद्वदिति ॥ यद्वा स्तंबो यथा मूलेन तोयं ह्रदादुपहरति ॥ चिंतनाविषयश

इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ॥ चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ॥ ३० ॥ भ्रश्यत्य
नुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ॥ तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥ नातः पर
तरो लोके पुंसः स्वार्थव्यतिक्रमः ॥ यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ३२ ॥

ब्दादिविषयाक्षिप्तैर्वा इंद्रियाक्षिप्तमनसि शब्दादिविषयेषु अत्यपरे सति मोक्षतदुपायानवसातुं बुद्धिर्न शक्नोतीत्युक्तं भवति ॥ ३० ॥ एवं व्यवसा
येभ्रष्टे सति अनुस्मृतिरूपासनं योगकालानुसंधानं भ्रश्यति तदनुग्राहकं कालांतरेषूपास्यसंशीलनरूपं चिंतनं च भ्रश्यति। एवं स्मृतिक्षये उपा
सनाक्षये सति ज्ञानभ्रंशः स्वपरयाथात्म्यज्ञानभ्रंशो भवति तद्रोधकं ज्ञानभ्रंशकं कवयः सूरयः आत्मन एव हेतोरात्मापह्नवः आत्मनस्तिरोधा
नं प्राहुः उपासनाविच्छेदादात्मरूपस्य भगवच्छेषतयाविषयहीवभासनत इत्यर्थः ॥ ३१ ॥ योन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं
चौरेणात्मापहारिणेति रणतेह्येवमाह ॥ नात इति ॥ आत्मनः हेतोः स्वस्य व्यतिक्रमात् स्वस्वरूपातिलंघनात् स्वस्वरूपं विहाय आत्मनोन्यस्य प्रेयस्त्व

क्तिमार्गभक्तियोगानुष्ठानप्रकारं वेद भर्गोपमुः परिचर्याप्रकारं चाह हित्वेत्यादिप्रतिमनोदधद्धृत्पंतेन ग्रन्थेन ॥ महिरिं भगवतस्तेवाहर्षरूपं ई
क्षणं ज्ञानं यस्याः सा वैदर्भी सुखानसुखप्रदा वगृहानसुखशब्दस्तत्साधनेषु उपचारात्प्रयुक्तः अत एव पुंस्त्वं त्यक्त्वा पांड्यं शंलयध्वजम
न्वधावत्ता नुसरन्गानवती यथा रजनीकरं चंद्रं ज्योत्स्ना चंद्रिका ॥३३॥ तत्राकुलाचले चंद्रमसां ताम्रपर्णी प्रसिद्धा नदी तस्याः पुण्यैः सलि
लैरात्मनः स्वस्योभयतोंतर्बहिश्चमलं मज्जनपानादिभिः शोधयन्तप आस्थित इत्युत्तरेणान्वयः ॥३४॥ कंदादिभिः पूर्वं पूर्वी

कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ॥ वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थितः ॥३४॥
शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये । सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः ॥३५॥ त
पसा विद्यया पक्वकषायो नियमैर्यमैः ॥ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥३६॥
आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ॥ वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिम् ॥३७॥

लाभे उत्तरोत्तरे वर्त्तमानः देहधारणं कुर्वाणः पश्चाच्छनैः गात्रकर्षणं शरीरशोषणं तप अनशनं तप आस्थित इत्यर्थः
३५ ॥ ततः समदर्शनः शीतोष्णादिमितचित्तविकाररहितः शीतोष्णादिद्वंद्वान्यजयत् ॥३६॥ तपसा कर्मयोगेन विद्यया ज्ञानयोगेन च प
क्वः निरस्तः कषायः कषायरागद्वेषादि निवर्स पुण्यापुण्यात्मकं पापं यस्य स यमैः नियमैः विजितान्यक्षाणीन्द्रियाण्यनिलं प्राणं आ
शयोंतःकरणं च येन स ब्रह्मणि परमात्मनि आत्मानं प्रत्यगात्मानं मनो वा युयुजे ॥ अधिकरणस्यैव करणत्वविवक्षया ब्रह्मणात्मा
नं युयुजे ब्रह्मात्मकं स्वात्मानमनुसंहितं वानित्यर्थः ॥३७॥

हे राजन् तेषां पुत्राणां एकैकस्यार्बुदमर्बुदं पुत्रा अभवन् श्रवणकीर्तनादीनां प्रत्येकमनेकप्रकारा अभवन्नित्यर्थः येषां वंशधरैर्यतः प्रसृतैः संप्रदा
यभेदैर्मन्वंतरमतः परं च मही भोक्ष्यते अनुभूयते श्रवणकीर्तनादीसंप्रदायभेदैर्मही व्याप्तेत्यर्थः ॥३०॥ अगस्त्य अगस्त्योपलक्षितो मुमु
क्षुर्दृढव्रतां नाम अव्यभिचारिणीं दुहितरं भगवत्सेवारूपां भक्तिमुपयेमे स्वीकृतवान् ॥ दुहितरं विशिनष्टि यस्यां दुहितरि इध्मवाहात्मजः
इध्मवाह समिधा पाणिं तेन तत्पूर्वकं रूपसत्तिर्लक्ष्यते गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिप्रसिद्धसमिद्वाहन
ति ॥ अत सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमाद्वासनानुसारेण प्रवेशान्नासंतो ननु भूतोर्थः कस्यापि कश्चिदस्तीत्यर्थः ॥ नन्वि
हजन्मनि जन्मांतरे वाननुभूतार्थ एव मनोरथविषय इत्युक्तं यद्येवं तर्हि मुक्तानंदोपि मुमुक्षोः कदाचिन्मनोरथविषयो भवेदिति सो
पि पूर्वमनुभूत एव स्यादस्त्विति चेन्न पुनर्जन्मानुपपत्तेः न च पुनरावर्तत इति श्रुतेः ॥ अनावृत्तिः शब्दादिति सूत्रस्य च विरोधप्र
संगाच्चैव । प्रकृतिपरिणामात्मकदेहानुभाव्यानामेवानुभूतानां मनोरथविषयत्वासंभवाभिप्रायत्वात्तदुक्तेः ॥ अस्तु वा मुक्तानंदोपि
मनोरथविषयस्तथापि मनोरथविषयीभवन्मुक्तानंदः सोश्नुते सर्वान्कामान्सह ब्रह्मणेत्यादिवाक्यावगतनिरतिशयानंदरूपत्वेन
परोक्षमेव मनोरथविषयो भवेदनुभवोपि पूर्वं शब्दजन्यप्रमितिविषयत्वेन परोक्षमेव स्यादत एव हि यद्रूपं यया दृगात्मनः य

॥१९९॥

तदेमनोरथविषयः स्यादित्यर्थः ॥ अनुभूतार्थ एव मनोरथः इहजन्मन्यननुभूतार्थविषयमनोरथो वासनया सा च पूर्वानुभवादनुभवश्च
देहयोगेनेति पूर्वजन्मसिद्धिः ॥ जन्मतारतम्यस्य निर्हेतुकत्वायोगात्कर्मतारतम्यसिद्धिश्चेत्यर्थः ॥ ६६ ॥ मन एवेति ॥ इदानीं सदसद्रुचिवि
शेषाच्चित्रं मन एव मनुष्यस्य पूर्वरूपाणि शंसति प्रकृष्टाप्रकृष्टवासनानिमित्तसत्त्वादिगुणप्रचुरपूर्वदेहयोगाननुमापयति ॥ भवि
ष्यतो देहयोगान् मम भविष्यतः वर्तमानसत्त्वादिगुणप्रचुरदेहयोगांश्च शंसति ॥ मतिसत्त्वे कनिष्ठं इति वक्ष्यमाणत्वात् ॥ यद्वा न भविष्य
त् अभविष्यन् वर्तमानमनुष्यरूपाणीत्यर्थः ॥ भद्रं ते इति सम्यगवधारणार्थमादिस्याभिनंदति ॥ ६७ ॥ अननुभूतार्थानां मनोरथा।

मन एव मनुष्यस्य पूर्वरूपाणि शंसति ॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥ ६७ ॥ अ
दृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते ॥ यथा तथानुमन्तव्यं देशकालक्रियाश्रयं ॥ ६८ ॥

विषयत्वं नानुभूतं क्वचानेनेति व्यतिरेकमुखेनाभिधायान्वयमुखेनाप्याह ॥ अदृष्टमिति ॥ इहजन्मनि क्वचिददृष्टमश्रुतं च म
नसि दृश्यते मनोरथगोचरे भवतीत्यर्थः ॥ तेनाकारेण मनोरथगोचरं तत्पूर्वोऽनुभवश्चेत्यत्राह ॥ यथा तथेति ॥ देशकालक्रियाश्रयं
देशाश्रयं कालाश्रयं क्रियाश्रयं च रूपं यथा यथा येन येन प्रकारेण बुद्धिस्थं भवति तथानुमन्तव्यम् ॥ नन्वेवंभूतमपि कार्त्स्न्येन न व
कुशाक्यं बुद्धिस्थानां रूपाणां मानं स्यादित्यर्थः ॥ मम निवासदेश ईदृशः स्यादेवंविधः कालो भवेदेहमेवं करवाणीति मनुष्याणाम
संभावितमर्थविशेषं मनोरथसहस्रं यथारुचि मनसि वर्तते इति यावत् ॥ ६८ ॥ ततः किं पूर्वजन्मनः कर्मणश्च सिद्धावित्यत्राह ॥ सर्व

नाहि

नेहमितिदेहेतुकस्मात् नेहमिति श्रीमानजीवः अक्षमिंद्रियमर्थाः ॥ शब्दादयः गुणाः सत्वादिः एतैर्यावद्रूढः आवृतः ॥ रूढ इति पाठे यावद्बुध्या
दयो रूढः संबंधो यस्येति तावदहं ममेति भावो अवधीयते अवधिवशाच्चर्यते स्वरूपतिरोधायको ऽहं ममाभिमानो न निवर्त्तते किंतु अनुव
र्त्तत इत्यर्थः ॥ ७१ ॥ किमतः संसारिणो जीवस्य बुध्यादिभ्यो विलक्षणस्वस्वरूपमपरोक्षं नावभासत इति यतो ऽहमर्थोपज्ञानाद्देहं बुद्धिविष
यत्वेनावभासमानो देहः सुषुप्त्यादौ नावभासत इत्याह ॥ सुप्तीति ॥ उपतापश्चादेनातिशयितदुःखसंभवे होविवक्षितः ॥ मृत्युर्मरणं प्र
ज्वारोज्वरः उपलक्षणमेतत् ज्वरादिमले मरणे चेति यावत् ॥ एतास्ववस्थासु प्राणायनस्य प्राणाश्रयस्य जीवस्य विघाततः ज्ञानस्या

सुप्तिमूर्छोपतापेषु प्राणायनविघाततः ॥ नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥ ७२ ॥ ग
र्भे बाल्येप्यपौष्कल्यादेकादशविधं तदा ॥ लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ॥ ७३ ॥

तिसंकोचात्सहितज्ञानसंकोचापरपर्यायस्तदानीं विघातः संभवति तेनाहमिति ज्ञानं नेहते न स्फुरति देहेहं बुद्धिर्नास्ति देहप्रतिपत्त्य
भावादित्यर्थः ॥ ७२ ॥ ननु सुषुप्त्याद्यवपि ज्ञानकर्मोभयेंद्रियगणस्य मनसश्च सद्भावादहमिति ज्ञानं कुतो नेहते तत्राह गर्भ इति ॥
पुनः तरुणस्य स्फुटं पदेकादशविधं लिंगं कर्मज्ञानेंद्रियमनः आत्मकं लिंगं व्यापारहेतुर्न तंतन गर्भे बाल्ये अपि शब्दात्सुषुप्त्यादौ चा
पौष्कल्याद्पुष्कलशक्तित्वान्न दृश्यते नाभिव्यक्तं न प्रायं भवतीत्यर्थः सतो प्यनभिव्यक्तौ दृष्टांतः कुह्वाममावास्यायां चंद्रमसो
लिंगं रूपमिवेति तदहमित्यर्थः ॥ ७३ ॥

याययानुभूतवं देशकालक्रियाश्रयमेनुक्तं यादृग्रूपेण पूर्वमनुभूतं तादृग्रूपेणैव मनोरथविषयोभवतीति हितदर्थः॥ ततश्चेदानीं मनोरथवि
षयस्यापि मुक्तानंदस्य सोप्यनुभूते इत्यादि मुक्तानंदप्रकारणावगतप्रकारैर्वैशिष्ट्येन परोक्षमेव मनोरथविषयत्वात्तस्य पूर्वानुभवोपितादृश एव
कल्प्यत इत्यपरोक्षमनुभूयमान एव मुक्तानंदपुनर्भवाभावहेतुरिति न श्रुतिसूत्रादिविरोधः॥ नच देशकालादयोप्यपरोक्षं न मनोरथविष
या इति तेषामपि पूर्वं परोक्षा एव पूर्वानुभव इति न कस्यापि साक्षात्पूर्वानुभवोनुमीयत इति वाच्यम्॥ अपरोक्षं प्राकृतदेहानुभवयोग्यानाम
पि परोक्षानुभवकल्पनायामानाभावात्कल्पकस्य परोक्षविषयमनोरथस्य परोक्षं वानुभूतवस्तुविषयकत्वदर्शनादिति॥६९॥ इदमेवाभि

सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्त्मनि॥ तमश्चंद्रमसीवेदमुपरज्यावभासते॥७०॥ ना
हं ममेति भावोयं पुरुषे व्यवधीयते॥ यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान्॥७१॥

प्रेत्याह॥ सत्वैकनिष्ठ इति॥ सत्वैकधुरे मनसि भगवत्पार्श्ववर्त्तिनि भगवद्भजनोपक्रमं कुर्वाणे सति तमः अज्ञानं चंद्रमसुदिते सति तमः
स्तिमिरमिव उपरज्या अवभासते उपरागवद्बाधावभासते ज्ञानशवलमवभासते चंद्रोदये हि आदित्योदय इव निःशेषं तमःक्षयः अ
पितु जोत्स्नामिश्रं तमः एवं भगवद्भजनोपक्रमदशायां ज्ञानमज्ञानशवलं वर्त्तते प्राक्तनजन्मज्ञानस्य परोक्षरूपत्वाद्ब्रह्मस्वरूपवदानंद
दादयः परोक्षमेव विषया भवंतीत्यर्थः देहात्मभ्रमस्य देहसंबंधाधीनसुखदुःखादेश्चापरोक्षत्वात्ते साक्षादनुभवविषया एवेति
भावः॥७०॥ किंवक्तव्यं संसारदशायां ब्रह्मस्वरूपतदानंदादिकमपरोक्षं नावभासते इति यतः स्वात्मस्वरूपमेवापरोक्षं नावभास

भा-चु-

॥२१॥

तेतु शोकं विमुंचमानेन नत्भयं दुःखं चाविंदत् सुपातदेहत्यागस्यानिष्टत्वात् ॥७६॥ अनिष्टतामेवाह यथेयं प्रसिद्धात्तृणजलौकास्वावष्टभ्यत्तृणं
हित्वा नोपयाति तृणांतरं प्रति न गच्छति किंतु तदेव तृणमुपयाति दृढतरं श्लिष्यति एवं म्रियमाणोपि जनः मरणे प्राग्देहाभिमतिं न त्यजतीत्य
र्थः नापयातीति पाठे यथा दैववशात् प्राप्तं नापयाति मनसा मुक्तुं नेच्छति ॥७७॥ देहाभिमानपरित्यागस्यावधिमाह यावदिति ॥ कर्मणांऽवधा
नेन कर्मभिस्तिरोधानेन यावद्देहादन्यमात्मानं नाविंदते तावत्संसृतेरित्यर्थः ॥ प्रकरणार्थमुपसंहरति मन इति हे मनुष्येंद्र भूतानां भ
वभावनं जन्महेतुर्मन एव ॥७८॥ तदेवोपपादयति ॥ अक्षैरिंद्रियैश्चरितान् सर्वमुपभुक्तान् विषयान् स्वप्ने न मनसा ध्यायन् कर्माण्यस

॥७७॥

यथा तृणजलूकैवं नापयात्यपयाति च ॥ म्रियमाणोपि प्राग्देहाभिमतिं जनः ॥ यावदन्यं न विंदेत व्यवधानेन कर्मणां
मन एव मनुष्येंद्र भूतानां भवभावनम् ॥७८॥ यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत् ॥ कर्मण्यविद्यायां बंधः
कर्मण्यनात्मनः ॥७९॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥८०॥

कदाचिनुते करोति सति कर्मण्यविद्यायां बंधः अविद्याया इति पंचमी कर्मणि सति तत्कृतदेहेनाहंकारममकाररूपाविद्ययात्मनो बंधः
स्यात् सर्वाविद्यया बंधः कर्मकृतकर्म च विषयानुभवहेतु अविद्यया कर्म कर्मणा चाविद्येत्यनादिः प्रवाह इत्यर्थः ॥ तन्मोचनोपायमाह
अत इति ॥ तस्य देहविलक्षणस्य ब्रह्मात्मकस्य स्वात्मनो वबोधार्थं सर्वात्मना करणत्रयेण हरिं भगवंतं भजस्व ॥ आत्मा परोक्ष्यमपि
भवत्प्रसादादेव भवतीति भावः कथं भक्तो जानीयात्तत्राह ॥ विश्वं चिदचिदात्मकं जगद्भगवदात्मकं प्रपश्यन् ॥ विश्वस्य तदात्मकत्वे हेतुं वद
न्नहरिं विशिनष्टि यतो हरेर्हेतोर्विश्वस्य स्थितिरप्ययो नाशश्चोत्पत्तिर्भवंति ॥ हरेर्विश्वस्य स्थित्यादिकारणत्वाद्धर्यात्मकं विश्वं प्रपश्यती

ष्टः ॥ स्थित्यादीनां तदात्मकत्वे हेतुत्वं श्रुतं सर्वं खल्विदं ब्रह्म तज्जलानिति ॥८०॥

॥२१॥

ननु यदि गाभीदं लिंगमेकादशविधमनभिव्यक्तं तर्हि न व्यापारान्तं संसृतिर्नस्यादित्यत आह अर्थे इति अनभिव्यक्तशक्तित्वादिंद्रियाणां न व्यापाराभा
वादर्थे शब्दादिविषये ऽभावेति शब्दादिविषयानुभवाभावेपि विषयान् ध्यायतः वर्त्तमानसमीपे भूते लट् प्रत्ययादेशः विषयध्यानप्रयुक्त
वासनाविशिष्टस्येत्यर्थः संसृतिस्तद्रागानुवृत्त्या संसारो न निवर्त्तते ऽनुवर्त्तते यथा स्वाप्नपदार्थानां प्रबोधदशायामविद्यमानत्वेपि स्वप्नार्थैः
ज्ञानतत्संचितसुखदुःखाद्यनर्थागमस्तद्वदित्यर्थः ॥ तथा च श्रुति यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिं
स्वप्ननिदर्शन इति अथ स्वप्ने पुरुषं कृष्णं कृष्णदंतं पश्यति स एनं हंतीत्यादिका ॥७४॥ एवं प्रसंगात्तरमभिधाय पुनरपि स्मरणाय

अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्त्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ॥७४॥
एवं पंचविधं लिंगं त्रिवृत् षोडशविस्तृतं ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥७५॥
अनेन पुरुषो देहानुपादत्ते विमुंचति ॥ हर्षं शोकं भयं दुःखं सुखं चानेन विंदति ॥७६॥

देहात्मनो रागकारणं वहन् देहसंबंधस्य उत्तरोत्तरदेहसंबंधधारानपर्यहेतुत्वमाह ॥ एवमिति ॥ पंचविधं पंचप्रकारं पंचभूतात्मकं षो
डशविस्तृतं एकादशेंद्रियतन्मात्रपंचकोपेतं त्रिवृत् त्रिगुणात्मकं लिंगशरीरं एवंभूतमिति देहाकारउक्तः जीवस्वरूपमाह
एष इति ॥ चेतनया युक्तः एष जानामिति ज्ञानाश्रयतया स्फुटतरमवभासमानो हमर्थो जीव इत्यभिधीयत इत्यर्थः ॥७५॥ अनेन लिंगे
न युक्तः तादृशानीमवभासमानः स पुरुष ईदृशान् बहून् देहानुपादत्ते विमुंचति तत्कृत हर्षशोकादिकं च विंदति ॥ आगामि सुखविषयं
ज्ञानं हर्षः ॥ आगामि दुःखविषयं ज्ञानं भयं तत्र देहानुपादत्ते जीव अनेन उपाधीयमानेन रमणीये देहे न हर्षं सुखं च विंदन् अनभिम

॥गर॥

दुःशकमिमद्भुतमिमर्थः मयातुभ्यमभिहितनयापुंसः हेत्वज्ञस्य स्त्रियाश्रमः ॥ गरहस्याश्रयत्वेन रूपितः संसारश्चकथितः ॥ अमुत्र परलोके संशयः फलानुभवविषयो भवदीयः संशयश्छिन्नः निरस्तः ॥ ६२ ॥ इति श्री चतुर्थे एकोनत्रिंशोध्यायः ॥ २९ ॥ एवं प्रचेतसां वृत्तांतमसमाप्यैवांतरे प्राचीनबर्हिषो वृत्तांतमुक्तं ॥ इदानीं तद्वृत्तांतशेषं शुश्रूषया पृच्छति विदुर ॥ ये इति ॥ हे ब्रह्मन्मैत्रेय ये प्राचीनबर्हिषः पुत्रास्त्वयाभिहिताः ते रुद्रगीतेन स्तोत्रेण हरिं प्रतोष्य तोषयित्वा कां सिद्धिं फलमापुः प्रापुः ॥ १ ॥ हे बार्हस्पत्य मैत्रेय कस्यापि विद्यायां बृहस्पतेर्मैत्रेयः शिष्यः

अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतम् ॥ एवं स्त्रियाश्रमः पुंसश्छिन्नोमुत्र च संशयः ॥ ६३ ॥ इति श्रीभागवते महापुराणे चतुर्थे स्कंधे नारदप्राचीनबर्हिःसंवादे पुरंजनोपाख्याने एकोनत्रिंशोध्यायः ॥ २९ ॥ विदुर उवाच ॥ ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १ ॥ किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ २ ॥ श्रीमैत्रेय उवाच ॥ प्रचेतसोंतःरुदधौ पितुरादेशकारिणः ॥ जपयज्ञेन तपसा पुरंजनमतोषयन् ॥ ३ ॥ दशवर्षसहस्रांते पुरुषस्तु सनातनः ॥ तेषामाविरभूत्कृच्छ्रं शांतेन शमयन्रुचा ॥ ४

यदृच्छया गिरिशं प्राप्य कैवल्यनाथस्य मोक्षाधिपतेर्भगवतो यः प्रियो रुद्रः तस्य पार्श्ववर्तिनः तेनानुगृहीताः प्रचेतसः नूनं मोक्षं प्रापुरेव नतः पूर्वं विहात्र लोके परत्र लोके वा किं प्रापुः ॥ २ ॥ एवं माण्डोमुनिः प्रचेतसां कथाशेषमाह ॥ प्रचेतस इति ॥ पितुराज्ञाकारिणः अंतरुदधौ समुद्रजलमध्ये रुद्रगीतजपयज्ञेन तपसा तपः आलोचनेन निदिध्यासनेन च निरंजनमपहतपाप्मानं परमपुरुषमतोषयन् ॥ ३ ॥ सनातनः परमपुरुषः दशवर्षसहस्रांते दशसहस्रसंख्यातावत्सरपर्यंततपश्चर्यां तेषां कृच्छ्रं श्रमं तपःक्लेशं रुचा कांत्या शमयन्‌ शां

॥ श्रीमद्भागवते महापुराणे चतुर्थस्कंधे ... ॥२०२॥

संवादमुपसंहरति मुनिः ॥ भगवतानां मध्ये मुख्यः ॥ भगवान्नारदो हंसयोर्जीवपरयोर्गतिं स्वरूपं प्रदर्श्य उपदिश्य प्रपन्नं प्राचीनवर्हिषमामंत्र्या
नुज्ञाप्य ततो ब्रह्मलोकमगात् ॥ ८१ ॥ ततः प्राचीनवर्हिः प्रजासर्गे एतद्रक्षणे च स्वपुत्राननुज्ञाप्य स्वयं तपश्चर्तुं कपिलाश्रममगात् ॥ ८२ ॥ तत्र चास्य
समधीरो वशीकृतेन्द्रियः एकाग्रचित्तः विविक्तो भगवच्चरणांवुजं ध्यायंस्तद्भक्त्या तत्साम्यतां तेन साम्यं यस्मिन्निति वहुव्रीहिः तत्साम्यं प्रवर्तात् इत्यर्थः इ
यादगात् ॥ तत्साम्यतामिति पाठे तेन भगवता साम्यतां समानतां तत्साधर्म्यमित्यर्थः ॥ ८३ ॥ श्रवणश्रावणादिफलमाह एतदिति ॥ हे अनघ देवर्षि

श्रीमैत्रेय उवाच ॥ भागवतमुख्यो भगवान् नारदो हंसयोर्गतिं ॥ प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोऽगमत् ॥ ८१ ॥ प्राचीनवर्ही
राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥ ८२ ॥ तत्रैकाग्रमना वीरो गोविंदचरणांवुजम्
विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात् ॥ ८३ ॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ ॥ यः श्रावयेद्यः शृणुयात्स
लिंगेन विमुच्यते ॥ ८४ ॥ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं ॥ यः कीर्त्यमानमधिगच्छति पार
मेष्ठ्यं नास्मिन् भवे भ्रमति मुक्तसमस्तवंधः ॥ ८५ ॥

णा गीतमेतदध्यात्मपारोक्ष्यं यः पुरुषं श्रावयेच्छृणुयाद्वा स लिंगेन संसृतिहेतुना मनसा दुःखेन हेतुना वंधेन वा विमुच्यते मुक्तो भवेदित्य
र्थः ॥ ८४ ॥ एतदध्यात्मपारोक्ष्यं मुकुंदयशसा युक्तं इति शेषः ॥ अत एव भुवनं पवित्रीकुर्वाणं नारदमुखान्निर्गलितमात्मशौचं मनःशोधकं
पारमेष्ठ्यं सर्वोत्कृष्टफलदं कीर्त्यमानं कथ्यमानं यः पुमानधिगच्छति स पुमान्निरस्तसमस्तवंध अस्मिन्भवे संसारे न भ्रमति ॥ ८५ ॥ उक्ता
र्थानुपसंहरति । अद्भुतमिमम् अध्यात्मपारोक्ष्यम् अध्यात्मस्यात्मतत्त्वस्य पारोक्ष्यं परोक्षवादो यस्मिन् तत एवाद्भुतमाश्चर्यमध्यात्मस्य पारोक्ष्यं

भा॰च॰

॥२॰३॥

तौ बलोकोयस्मस आह ॥७॥ हेन्द्रपनंदनाः यूयं मे मतः वरं वृणीध्वं वः भद्रमस्तु ॥ परस्परसौहार्देनापृथग्धर्मीस्तुल्यधर्मीणः यूयं वः युष्माकं सौहृदेनाहं तुष्टः
॥८॥ यो नरः अनुदिनं सायं प्रातः ध्यायायां युष्माननुस्मरति तस्य नरस्य भ्रातृष्वात्मसाम्यमात्मना तुल्यं स्वात्मनीव प्रीतिः तथा भूतेषु सौहृदं च भविष्यति
॥९॥ ये नराः सायं प्रातः समाहितचित्ताः संतो मद्गीतेन मां स्तुवंति तेभ्योप्यहं कामवरान्काम्यं तदिति कामाः तान्वरानभीष्टान्वरां प्रज्ञां च ददास्ये किं
पुनः युष्माकम् ॥१०॥ यद्यस्मा यूयं पितुरादेशमाज्ञां मुदायुक्ताः संतोऽग्रहीष्ट गृहीतवंतः अतो वः युष्माकं उशती कमनीया कीर्त्तिर्लोकाननुभ

श्रीभगवानुवाच ॥ वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः ॥ सौहार्देनापृथग्धर्मास्तुष्टोहं सौहृदेन वः ॥८॥ ॥
योनुस्मरति संध्यायां युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ॥९॥ ये तु मां रुद्रगीतेन सायं
प्रातः समाहिताः ॥ स्तुवंत्यहं कामवरान्दास्ये प्रज्ञां च शोभनां ॥१०॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उ
शती कीर्त्तिर्लोकाननु भविष्यति ॥११॥ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयि
ष्यति ॥१२॥ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना ॥ तां चापविद्धां जगृहुर्भूरुहा नृपनंदनाः ॥१३॥

विष्यति प्राप्स्यति लोकेषु विस्तारिष्यति इत्यर्थः ॥११॥ कंडोर्मुनेर्दुहितरं यूयं उद्वहतेति वक्ष्यमाणस्तावत्कंडुं तत्कन्यां च प्रस्तौति ॥ भवितेति ॥ वि
श्रुतनामा पुत्रः गुणैर्विश्रुतः पितुर्नीवमो न्यूनः विश्रुतापश्रमः भविता भविष्यति इत्यर्थः ॥ यो वै श्रुतः एतां त्रिलोकीमात्मवीर्येण संतानेन पूर
यिष्यति ॥१२॥ वै श्रुतस्य कंडोः इसः काशात् प्रम्लोचया तपोनाशार्थमिंद्रेण प्रेषितया प्रम्लोचाख्ययाऽप्सरसा स्त्रिया कन्या कमललोचना लब्धा
तां कन्यामपविद्धां पुनः स्वर्गं प्रतिगच्छंत्या प्रम्लोचया त्यक्तेपत्यकां भूरुहा वृक्षा जगृहुर्दुहितरम् ममन्वत इत्यर्थः ॥१३॥

पुरुषं विशिनष्टि सुपर्णेति सार्द्धद्वयेन। सुपर्णस्य गरुडस्य स्कंधे आरूढः तमुपलक्षयति। मेरोः शृंगमंबुदो नीलमेघ इवेति। पीतं पिशंगं वासो व
स्त्रं यस्य सः मणिः कौस्तुभः ग्रीवायां यस्य सः दिशः वितिमिराः प्रकाशबहुलाः कुर्वाणः॥५॥ पुनः कीदृशः काशिष्णुनेति। कनकमयशोभ
नवर्णं विभूषणं तेनात एव काशिष्णुना भ्राजिष्णुना प्रकाशस्वभावेनेत्यर्थः भ्राजमानं कपोलवदनं यस्य सः प्रकाशमानकिरीटयुक्तः अ
ष्टायुधैः शंखचक्रगदापद्मशार्ङ्गशरखड्गखेटैः पद्मस्यायुधानंतर्भूतत्वेपि छत्रिन्यायेनायुधशब्दः प्रयुक्तः परशुपाशांकुशाद्यस्य तमो

सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः॥५॥ काशिष्णुना कनकवर्ण
विभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिन्न
रगीतकीर्तिः॥६॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रियापरिवृतो वनमालयाद्यः॥ बर्हिष्मतः पुरु
ष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः॥७॥

वान्नाष्टमो विवक्षितः अष्टायुधैरित्यनेनाष्टभुजत्वमपि विवक्षितं अनुचरैः पार्षदैः मुनिभिः सुरेंद्रैर्ब्रह्मादिभिश्चासेवितः गरुड एव कि
न्नरः तस्य वेदात्मकपक्षध्वनिर्गरुडकिन्नरशब्दविवक्षितः तेन गीता कीर्तिर्यस्य सः यद्वा गरुडा गरुडजातीयाः किन्नराश्च तैः गीता की
र्तिर्यस्य सः॥६॥ पीना अत्र आयता अष्टौ भुजास्तेषां मंडलं समूहः तन्मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्यास्तया वनमालया परि
वृतः आद्यः आदौ भवः जगत्कारणभूतः पुरुषः प्रपन्नान् बर्हिष्मतः सुतान् प्रति पर्जन्यनादवद्रुतं नादो यस्यास्तया वाचा सघृणः कृपायु

किंचनव्यवहितिः यतः यस्मात्त्वत्तः आश्रवणात् श्रुतः सर्वज्ञोहमीश्वरस्त्वद्ब्रह्मवादिभिः प्रवक्तृभिः निमित्तभूतैः श्रोतॄणां हृद्धृदयेन व्यवस्यति पदं च तत्र वदयति प्राप्नोति। न व्यवहितश्चेते यज्ञ इति पाठे तु यद्धेष्ठ परब्रह्म भूतं मां कथयद्भिः यज्ञो मद्रूपात्मना ज्ञानयज्ञो न व्यवहितश्चेत् न भवतीत्यर्थः। यज्ञं विष्णिन ष्टि यतो ज्ञानयोगात्मज्ञतिं गताः प्राकृते मोहादिभिर्युक्ता न भवंतीत्यर्थः॥२०॥ एवं भगवतोक्ताः प्रचेतसस्तं एव जनार्दनमग्रतास्थितमाह मैत्रेयः। एवमुक्तप्रकारेण ब्रुवाणं पुरुषार्थानां आश्रयं सुहृत्तमं जनार्दनं। तस्य जनार्दनस्य दर्शनेन ध्वस्त

न व्यवहृदयेयज्ञो ब्रह्मैतद्ब्रह्मवादिभिः॥ न मुह्यंति न शोचंति न हृष्यंति यतो गताः॥२०॥ श्रीमैत्रेय उवाच॥ एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः॥ तद्दर्शनध्वस्ततमोरजोमला गिरागृणन् गद्गदया सुहृत्तमम्॥२१॥ प्रचेतस ऊचुः॥ नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः॥२२॥ ॥ ॥ ॥

स्तानि कामक्रोधादीनि रजआदिकार्याणि पापानि मलानि येषां ते प्रांजलयः वद्धांजलयो गद्गदगिरा गृणन् तुष्टुवुः॥२१॥ क्लेशानामाध्यात्मिकादिदुःखानां नाशो यस्मात् उदारगुणाह्वयस्य आह्वयैर्नामभिर्निरूपिता सन्निरूपितोदारगुणाह्वयः तस्मै मनोवचसोर्वेगादपि पुरोग्रतो वेगो यस्य वायुमनसागोचराय इत्यर्थः सर्वेषामक्षाणामिंद्रियाणां मार्गैर्वृत्तयः तैरगतः अविषयीकृतः अध्वा प्राप्त्युपायो यस्य

हेन पवनं दवाः स्रुधा क्षामा याः पीडितायाः अतो रोरूयमाणायाः तस्याः कन्यायाः मुखे वनस्पतीनां राजा सोम इति प्रसिद्धः अमृतस्त्राविणीं देशिनी
तर्जनीं अंगुलिं निदधे निहितवान्। अनेन प्रसव सोमगर्भसंभवे नाम्रताहारेण च तस्या लावण्यं तन्मस्वेददौर्गंध्यादिराहित्यं चोक्तं ।१४
मानमुखं दूर्मा येन पित्रा व हिंस्यतां युष्माभिं प्रजासर्ग आदिष्टा आज्ञापिताः अतस्तत्र प्रजासर्गोद्यं तंतोस्यां तां पतिमां कांक्षंती कन्यामुद्वहत वि
रं विलंबं माकुरुत ।१५। ननु बहूनां कथमेका भार्या स्यात्तत्राह। अपृथग्धर्मः शीलं येषां सर्वेषां वः युष्माकमर्पितो भवन्त्वा नायो यया ऽपृ
थग्धर्मः शीलं च यस्याः सेयं सुमध्यमा पत्नी भूयात्। धर्मः शीलयोरैक्यान्मध्वाक्याच्च न दृष्टविरोध इति भावः ।१६। दिव्यानां देवमान

नां श्यामायां मुखे राजा सोमः पीयूषवर्षणीं। देशिनीं रोरूमानायां निदधे स दयान्वितः ।१४। प्रजाविसर्ग आदिष्टाः पित्रा मामनु
वर्त्तता। तत्र कन्यां वरारोहां तामुद्वहत मा चिरं ।१५। अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा। अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिता
शया ।१६। दिव्यवर्षसहस्राणां सहस्रममहतौजसः। भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम ।१७। अथ मय्यनपायिन्या भ
क्त्या पक्वगुणाशयाः। उपयास्यथ मद्धाम निर्विद्य निरयादतः ।१८। गृहेष्वाविशतां चापि पुंसां कुशलकर्मणां। मद्वार्त्तायातयामानां न बंधा

परिछिन्नानां वर्षसहस्राणां सहस्रं कालममितौजसः। अमिततेजः इंद्रियशक्तिर्येषां ते यूयं भौमा भोक्ष्यथ ।१७। अनंतरमव्यभिचारि
ण्या मयि भक्त्या पक्वगुणः धर्मकामादिमलः आशयो अंतःकरणं येषां ते। अतो निरयात्संसारान्निर्विद्य निर्वेदं लब्ध्वा पक्वगुणाशया इति
पाठे शांतसत्वादिगुणवासनाः मद्धाम मत्स्थानं उपयास्यथ प्राप्स्यथ ।१८। ननु भौमभोगासक्तानां न स्वत्प्रक्तिः कथं भविष्यतीति
तत्राह। गृहेष्वाविशतां प्रविष्टानामपि कुशलमनभिसंहितफलं कर्म येषां मद्वार्त्तायातयामानां मत्कथाक्षपितकालानां गृहा बंधा

भा॰ चु॰ ॥२०५॥

सम्यानसतीं यस्येति वा ॥ यद्यपीदं विशेषणद्वयं वासुदेवायेमनेनैवावगतं तथापि तन्निर्वरणरूपं द्वयं व्याख्येयम् । साक्षिणे सर्वसाक्षाद्द्रष्टे
तुभ्यं नमो पुंस्त्राहिकरवाम ॥ २६ ॥ भगवद्दर्शनेनैवात्मनाम वा प्रसमस्तपुरुषार्थतामाहुः रूपंदुति अशेषाणां क्लेशानां संक्षयो यस्मात्तद्देव
रूपं भवता तापत्रयातुराणामस्माकमाविष्कृतं प्रकटीकृतं इतोन्यत्किमनुकंपितम् । लि ॥ इयमेव त्वया कर्तव्याऽनुकंपेत्यर्थः अतो नास्मा
भिर्वरणीयोस्तीति भावः ॥ २७ ॥ हे अमंगलनिरासक वत्सले प्रभुभिर्दीनेषु भाव्यं कर्तव्यं एतावदेव किं तदित्यत आह अस्मदीयाएतदिति बुद्ध्या
उचितकालेऽनुस्मर्यते इति यत् तत्तयानुरूपमपि दर्शितमिति ॥ २८ ॥ येनानुस्मरणेन क्षुल्लकानां क्षुद्राणामुपशांतिः दुरितोपशांतिर्भव

रूपं भगवता त्वेतदशेषक्लेशसंक्षयम् ॥ आविष्कृतं नः क्लिष्टानां किमन्यदनुकंपितम् ॥ २७ ॥ एतावत्त्वं हि प्रभुभिर्भाव्यं दीने
षु वत्सले ॥ यदनुस्मर्यते काले स्वबुद्ध्याभद्ररेधन ॥ २८ ॥ येनोपशांतिर्भूतानां क्षुल्लकानामपीहताम् ॥ अंतर्हितो
ऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥ असावेव वरोऽस्माकमीप्सितो जगतः पते ॥ प्रसन्नो भगवान्येषामपव
र्गगुरुर्गतिः ॥ ३० ॥ वरं वृणीमहेऽथापि नाथ त्वत्परतः परात् ॥ न ह्यंतो यद्विभूतीनां सोऽनंत इति गीयते ॥ ३१ ॥

ति ॥ किं चेहतां कामयमानानां नोऽस्माकमंतर्हृदयेऽन्तर्यामित्वेन स्थितो भवान् आशिषः कामान् कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः ॥ तथा
पि वरं वृणुध्व चेत्तर्हि येषामस्माकं भगवान् प्रसन्नः असावेव वरः कुतः यतस्त्वमपवर्गगुरुः मुक्तिसाधनोपदेष्टा गतिरपवर्गः साध
नभूत अथ ॥ ३० ॥ यद्यप्येवमथापि हे नाथ परतो देहविलक्षणाद् आत्मनः परात् विलक्षणात् त्वत्तः प्रकृतिपुरुषविलक्षणादित्यर्थः वरं
वृणीमहे ॥ कं वरं वृणुतेति विविक्षायां तदीयानंतगुणगणानुकथनानुश्रवणपरायणानां भगवतानां संगमिति वक्तुं तावदनंत

॥२०५॥

शुद्धाय कर्मोपाधिरहिताय शांताय षडूर्मिषट्करहिताय। तत्र हेतुः स्वनिष्ठया स्वस्मिन्निष्ठाऽविच्छेदः अविच्छिन्नस्वानुभूत्याऽपार्थेऽवगतपुरु
पार्थभूतस्वस्वरूपज्ञानरहिते मनसि विलसत्तारस्परवैलक्ष्ण्येन स्फुरद्द्वयं देहात्मनोर्द्वयं येषां ते विलसत्द्वयाः स्वस्वरूपज्ञानविधु
रेपि मनसि भगवतोऽसाद्दर्शाद्देहात्मज्ञानसंपन्नाद्दस्मर्थः तेषां जीवानामात्मने निरतिशयप्रीतिविषयाय जगतः स्थितिलयोत्पत्ति
घुनिमित्तभूताय जगत्स्थित्याद्यर्थं गृहीतामायासंकल्पात्मकं ज्ञानं मायावपुर्ज्ञानमिति ज्ञानपर्यायत्वान्मायाशब्दस्य गुणैस्तमोरज
सीएवेति विग्रहः इयक्तिघनेहीवस्य स्थित्यर्थं स्वेच्छोपात्तप्राकृतदिव्यमंगलविग्रहः लयार्थमुत्पत्त्यर्थं तु तमोरजःप्रधानरुद्रब्रह्मविग्र

शुद्धाय शांताय नमः स्वनिष्ठया मनस्यपार्थविलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमाया
गुणविग्रहाय ॥२३॥ नमो विशुद्धसत्त्वाय हरये हरिमेधसे ॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्व
ताम् ॥२४॥ नमः कमलनाभाय नमः कमलमालिने ॥ नमः कमलपादाय नमस्ते कमलेक्षण
॥२५॥ नमः कमलकिंजल्कपिशंगामलवाससे । सर्वभूतनिवासाय नमो युक्ष्महि साक्षिणे ॥२६॥

हृत्तस्मै इत्यर्थः ॥२३॥ स्थित्यर्थं विशुद्धसत्त्वतनोः प्राकृतत्वशंकापरिहाराय प्रायः विशुद्धसत्त्वायेति । हरये बंधहारिणे हरिमेधसे दुरितहारिम
नीषाविषमायसर्वभूतांतरात्मने आनंदरूपाय सात्वतां भक्तानां प्रभवे ॥२४॥ कमलं जगदुत्पत्तिस्थानात्मकं नाभौ यस्य ॥ कमलमाला (
स्यास्तीति तस्मै आर्षो मत्वर्थीय इति भाव इति उपाविदितपरिकरणात् कमलवत्पादौ कमलौ सुगंधिसुंदरौ च यस्य कमलदलवद्विशाले
ईक्षणी यस्य तस्मै ॥२५॥ कमलकिंजल्कवत्पिशंगममलं वासो वस्त्रं यस्य सर्वभूतानां निवासायाधाराय सर्वाणि भूतानि निवासो वा

तंतावद्वकानांत्वद्भक्तानांसमागमःसंसाराद्भीतस्यकिंनरोचेतरोचेतैवेत्यर्थः॥३७॥सत्संगस्यफलमस्माभिरेवानुभूतमित्याहुः वयंत्विति हेभ
गवन्तत्प्रियस्यत्वत्सखस्यभवरूपस्यसुचिकित्सिकरुद्रस्यक्षणमात्रेणसंगमेनभिषक्तमंसृतिरूपरोगनिवारकंत्वांगतिंशरणं
गताःप्राप्ताःस्म॥३८॥एवंसत्संगंवृत्वावरांतरंवृणुतेयन्नइतिद्वाभ्यां।यदस्मदीयमध्ययनादिकंतदेतत्सर्वंसर्वान्तरात्मनः॥परमपु
रुषस्यतवपरितोषणायवृणीमहेत्वत्परितोषणायभवत्वितिमन्वयः॥नोऽस्माभिःप्रसादिताःप्रसादंप्रापिताःसंततमनुवृत्त्यागुर

तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया।भीतस्यकिंनरोचेततावकानांसमागमः॥३७॥वयंतुसाक्षाद्भगवन्भवस्यप्रियस्यसख्युः
क्षणसंगमेन।सुदुश्चिकित्स्यस्यभवस्यमृत्योर्भिषक्तमंत्वाद्यगतिंगताःस्म॥३८॥यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्चवृद्धा
श्चसदानुवृत्त्या॥आर्यानताःसुहृदोभ्रातरश्चसर्वाणिभूतान्यनसूययैव॥३९॥यन्नःसुतप्तंतपएतदीशनिरंधसांकाल
मदभ्रमप्सु।सर्वंतदेतत्पुरुषस्यभूम्नोवृणीमहेतेपरितोषणाय॥४०॥मनुःस्वयंभूर्भगवान्भवश्चयेऽन्येतपोज्ञानवि
शुद्धसत्वाः॥अदृष्टपाराअपियन्महिम्नःस्तुवंत्यथोत्वात्मसमंगृणीमः॥४१॥

वोवृद्धाविप्राश्चप्रसादिताःआर्यागुर्वादयोनताःनमस्कृताःतथासुहृदादयः॥अनसूययैवप्रसादिताःनिरंधसांनिरन्नानांनो
स्माकमदभ्रंबहुकालमप्सुजलेषुयत्सुतप्तंतपःएतदध्ययनगुर्वादिप्रसादननमस्कारतपआदिकम्॥३९॥४०॥किंचाजानताम् ॥न॥
स्माकंत्वत्स्तुतिर्नायुक्तेत्याहुःमन्वादयःतत्रभवोरुद्रःतथायेनयोज्ञानाभ्यांकर्मयोगज्ञानयोगाभ्यांविशुद्धसत्वामंतःकरणंयेषां
तेतवमहिम्नोऽदृष्टपारायैस्तेतथाभूताःअपित्वात्मात्मसमंस्वमत्यनुरूपंयथायेनयथास्तुवंत्योथोवयमपिगृणीमइत्यर्थः॥४१॥

भागवतसंगलभ्यत्वद्गुणानुभवमेतेरेणांने न वृणीमह इत्याहुः पारिजाते मकरंदनिर्भरे लब्धे मतिसारंगो भृंगोऽन्यं न सेवते एवं त्वदंघ्रि
मूलं निरतिशयसुखावहमासाद्य किं वृणीमहे न किमपीत्यर्थः ॥३२॥ एतदेव प्रार्थयाम इत्याहुः ते तव मायया स्पृष्टा मोहिताः सतो
वयं स्वकर्मभिरिह संसारे यावद्भ्रमाम तावद्भवतः प्रसंगो येषां तेषां भागवतानां संगः प्रतिजन्म नोऽस्माकं स्यादित्येष एव वरोऽस्मा
भिर्वरणीयः ॥३३॥ ननु राज्यभोगस्वर्गापवर्गान् हित्वा किमिदं प्रार्थ्यते तत्राहुः तुलयामेति । भगवत्संगिनां संगस्य लवेनापि लेशे
नापि स्वर्गादिकं न तुलयाम न तुल्यमन्यामहे किमुत मर्त्यानां मरणशीलानामाशिषः राज्यभोगादिरूपास्तुलयाम इत्यर्थः ॥३४॥

पारिजातेंऽजसा लब्धे सारंगोऽन्यन्न सेवते ॥ त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥३२॥ यावत्ते मायया स्पृष्टा भ्रमाम इ
ह कर्मभिः ॥ तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ॥३३॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य
मर्त्यानां किमुताशिषः ॥३४॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः ॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥३५॥
यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ॥ प्रस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ॥३६॥ ॥छ॥

सत्संगस्य श्रैष्ठ्यं प्रपंचयति । यत्रेति त्रिभिः यत्र भागवतेषु मृष्टाः ॥ कर्त्तरिक्तः पापशोधिका ॥ मधुरा वा कथा भगवत्कथा ईड्यंते
प्रस्तूयंते । यतः येभ्यः कथाभ्यः श्रूयमाणाभ्यः तृष्णाया विषयवुभुक्षायाः ॥ प्रशांतिः ॥ यत्र सत्संगे सति भूतेषु निर्वैरभावः
यत्र सत्संगे सति कश्चन उद्वेगः भयं च नास्ति ॥३५॥ यत्र सत्सु कथासु मुक्तसंगैः सद्भिः पुनः पुनः भगवान्नारायण एव न्यासि
नां संन्यासिनां गतिर्निरोपायः स्तूयते ॥३६॥ तेषां सतां तीर्थानां गंगादीनां पावनेछया गंगादीनपि पवित्रीकर्त्तुमिछया पद्भ्यां चर

भा.च.
॥२०७॥

ते च प्रचेतसः ब्रह्मण आज्ञया मारिषाख्यां स्त्रियमुपयेमिरे । यस्यां मारिषायामजन्मनो ब्रह्मणः स एव योनिः तस्मात्प्राचेतसो दक्षो महद्वज्ञानादुद्भव हेलनाद्धेतो
रजन्मुत्पादितः प्रचेतोभिरिति शेषः ॥४८॥ कोसावजनि योऽजनयोनिजः मारिषायां जातस्तत्राह । चाक्षुषे मन्वंतरे प्राप्ते पूर्वमन्वंतरसकाले नो यद्दु
ते सति दैवेनेश्वरेण चोदितः सन् इष्टाः प्रजाः यः ससर्ज स दृष्टवान् सनाम्ना दक्षः ॥४९॥ तस्मिन् दक्षशब्दस्य प्रवृत्तिनिमित्तमाह । य इति । यो जायमानः
स्वया रुचा प्रभया सर्वेषां तेजस्विनां तेजोयुक्तानां तेज उपादत्त । आच्छादितवान् तस्माद्दाक्ष्यात्स्वर तेजः प्रच्छादनसमर्थत्वात्कर्मणा च निमित्तेन

चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥४८॥ यो जायमानः स
र्वेषां तेजस्तेजस्विनां रुचा । स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥४९॥ तं प्रजासर्गरक्षायामनादि
रभिषिच्य च । युयोज युयुजेन्यांश्च स वै सर्वप्रजापतीन् ॥५०॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रिंशोऽध्या
यः ॥३०॥ श्रीमैत्रेय उवाच ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितं । स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन्गृ
॥हात् ॥१॥

कर्मणि दक्षत्वाच्च दक्षं दक्षमब्रुवन् लोका इति शेषः ॥५०॥ पंचकर्मदाक्ष्याद्दक्षमब्रुवंस्तमादिर्भगवान् ब्रह्मा प्रजानां सर्गे रक्षायां च युयोजादिदेश । सद
क्षोऽन्यान्मरीच्यादीन् प्रजापतीन् स्वस्वव्यापारे युनियुक्तवान् ॥५१॥ इति श्री चतुर्थस्कंधे त्रिंशोऽध्यायः ॥३०॥ एवं तपस्तोषितप्रत्यक्षितपरमात्मनः प्रचेत
सो मारिषामुपगम्य तस्यां पुत्रमुत्पादयामासुरित्युक्त्वा मध्य भगवतादिष्टदिव्यवर्षसहस्रपर्यंतानुभूतराज्यभोगा आत्मजारोपितराज्यभाराः प्रविष्टजाज
लाश्रमाः नारदोपदिष्टात्मपरमात्मयाथात्म्या उपासितपरमात्मानस्तत्पदमापुरिति वदन्नुपसंहरति त्रिंशेन मुनिः ततः दिव्यं वर्षसहस्राणां सह

एवमात्मनः स्तुतिमर्हतामाविष्कुर्वन् स्तुवंतोनमस्कुर्वंति । समायसर्वभूतसमायवैषम्यरहितायेत्यर्थः ॥ तत्रहेतुः शुद्धायापापविशुद्धाय । पापहेतुकंहिवैषम्यं परमपुरुषायशुद्धसत्वमूर्त्तयेवासुदेवायवामनः ॥ ४२ ॥ एवंप्रचेतोभिरभिष्टुतोभगवान्प्रीतः तत्स्तुत्यातथेत्याहत्वद्वरणानुस्मरणादिषुसिद्धिरस्त्वित्याह । स्वलाघवएषानुभवेनात्रप्राचिनुत्वंरुषियेषांतेषांमतएवस्वयानमनिष्ठतांप्रचेतसांस्तामनपवर्गवीर्य्यः अपारपराक्रमोभगवान्शरणएववत्सलः स्वलोकंप्रतिययौ ॥ ४३ ॥ अथप्रचेतसउदन्वतःसमुद्रस्यजलान्निर्गतस्यगांस्वर्गरोढु

नमः समायशुद्धायपुरुषायपरायच ॥ वासुदेवायसत्वायतुभ्यंभगवतेनमः ॥ ४२ ॥ श्रीमैत्रेयउवाच ॥ इतिप्रचेतोभिरभिष्टुतोहरिःप्रीतस्तथेत्याहशरणवत्सलः ॥ अनिच्छतांयानमतृप्तचक्षुषांययौस्वधामानपवर्गवीर्य्यः ॥ ४३ ॥ अथनिर्यायसलिलात्प्रचेतसउदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नांगांगांरोद्धुमिवोच्छ्रितैः ॥ ४४ ॥ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्यपितामहः ॥ आगतः शमयामासपुत्रान्वर्हिष्मतोनयैः ॥ ४५ ॥ तत्रावशिष्टायेवृक्षाभीताद्दुहितरंतदा ॥ उज्जह्रुस्तेप्रचेतोभ्यउपदिष्टाःस्वयंभुवाः ॥ ४६ ॥ तेचब्रह्मणआदेशान्मारिषामुपयेमिरे । यस्यांमहदवज्ञानादजन्मजनयोजिनः ॥ ४७ ॥

मिवोच्छ्रितैरुन्नतैर्द्रुमैर्गांमहींछन्नांवीक्ष्यद्रुमेभ्योऽकुप्यन् । तथाहिप्राचीनवर्हिषःप्रव्रजितत्वादराजकत्वस्याद्यभावात्द्रुमैश्छन्नाभूत ॥ ४४ ॥ निरस्तावीरुधः यस्मात्तथाभूतांकर्त्तुंसंवर्त्तकेकल्पांतेऽप्यसमयेनाशेनउपस्थितेसतियथातथाहेराजन्रुषास्वमुखेभ्यःअग्निवायूअमुंचन ॥ ४५ ॥ ताभ्यांद्रुमान्भस्मराशीक्रियमाणान्तान्प्रचेतसःवीक्ष्यचतुर्मुखः आगत्यनयैःरुक्तिभिर्वर्हिष्मतःसुतान्शमयामासप्रशांतानकरोत ॥ ४६ ॥ तत्रतेषुप्रशांतेषुसत्स्वविशिष्टायेवृक्षावृक्षाभिमानिदेवताःभीताःसंतःस्वयंभुवोपदिष्टा

इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रिंशत्तमोध्यायः ॥ ३० ॥

शिवेनाधोक्षजेन च यद्धात्म्यमुपदिष्टं तद्गृहेषु प्रसक्तानां ततः प्रायशः क्षपितं विस्मृतं ॥६॥ तद्विस्मृतं तत्त्वानां प्रकृतिपुरुषेश्वरतत्त्वानामर्था
नां पुरुषार्थानां च दर्शकं ज्ञानं यस्मिंस्तद्ध्यात्मं ज्ञानं नोस्मभ्यं प्रद्योतय प्रकाशय येन त्वया प्रद्योतितेनाध्यात्मज्ञानेन दुस्तरं भवार्णवं मंज
सा सुखेन तरिष्यामः ॥७॥ इत्येवं प्रचेतसा पृष्ट इति प्राधान्याद्देवकस्य निर्देशः प्रचेतोभिः पृष्ट इत्यर्थः भगवत्याविष्टं आसक्त आत्मा मनो यस्य
स भगवान्नारदः मुनीन्द्रमनन्वशीलान्प्रचेतसः प्रत्यब्रवीत् ॥८॥ अहो गृहप्रसक्त्या हरिसेवां विना सर्वं जन्मकर्मादिकं व्यर्थीकृतमिति

यदादिष्टं भगवता शिवेनाधोक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वा
र्थदर्शनम् ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरम् ॥७॥ श्रीमैत्रेय उवाच ॥ इति प्रचेतसो पृष्टो भगवान्नारदो मुनिः
भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥८॥ श्रीनारद उवाच ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥
नृणां येन हि विश्वात्मा सेव्यते हरिरीश्वरः ॥९॥ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वा त्रयीप्रोक्तैः पुं
सोपि विबुधायुषा ॥१०॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुणया बलेनेंद्रियराधसा ॥११॥

तान्दर्शो चन्माह तज्जन्मेति च तुर्भिः येन जन्मादिना विश्वात्मा हरिः सेव्यते तदेव जन्मकर्मादिकं भगवत्सेवाविधुरं तु व्यर्थं ॥९॥ शौक्लं यो
नं विशिष्टयोन्युत्पत्तिरूपं सावित्रं उपनयननिमित्तं जन्म याज्ञिकं यज्ञदीक्षया जन्म एभिस्त्रिभिर्भगवत्सेवाविधुरैः किं साध्यमस्तीति न या
त्रयीविहितैः कर्मभिः पुंसः विबुधानां इव दीर्घायुषापि ॥१०॥ वचोभिर्वाग्विलासैर्निपुणया सूक्ष्मया बलेन निहबलेनेंद्रियाणां राध

त्वंते उमन्व विवेकात्मकज्ञाना अधोक्षजस्य भाषितंवचःस्मरंतःस्वपुत्रेदृढे भार्यांविसृज्यभार्यायोपणमात्मजाधीनं कृत्वागृहात्प्राव्रजन् ॥ १ ॥
ब्रह्मसत्रेणज्ञानयज्ञेनस्यमतविधिनावाहीतिताः संकल्पितब्रह्मसत्रावभूवुरित्यर्थः ब्रह्मसत्रं विशिनष्टि सर्वभूतात्ममेधसेति ॥ सर्वेषु भूते
ष्वात्मापरमात्माधीज्ञानं यस्मिंस्तेन सर्वात्मकब्रह्मोपासनात्मकज्ञानेनेत्यर्थः प्रथमांतपाठे प्रचेतसांविशेषणं सर्वात्मकब्रह्मोपासन
युक्ताब्रह्मेहीतिनास्त्रवाह ॥ प्रतीच्यांदिशिवेलायांसमुद्रतटेयत्रजाजलिनामकऋषिःसिद्धोऽभून्मुक्तोवभूव ॥ २ ॥ तान्प्रचेतसः निर्जिताः
प्राणमनोवचोदृशोयैस्तेजितमासनंयैस्तेशांताःनिरभ्रोपाराःसमानाममलाधारादारम्भकरजवोविग्रहायेषांपरेब्रह्मणियोजितःऊर्मि

हीतिताव्रह्मसत्रेणसर्वभूतात्ममेधसा ॥ प्रतीच्यांदिशिवेलायांसिद्धोऽभूद्यत्रजाजलिः ॥ २ ॥ तान्निर्जितप्राणमनोवचोदृशोजि
तासनान्शांतसमानविग्रहान् ॥ परेमलेब्रह्मणियोजितात्मनः सुरासुरेड्योददृशेस्मनारदः ॥ ३ ॥ तमागतंतउत्थायप्रणिप
त्याभिनंद्यच ॥ पूजयित्वायथादेशंसुखासीनमथाब्रुवन् ॥ ४ ॥ प्रचेतसऊचुः स्वागतंतेसुरर्षेद्यदिष्ट्यानोदर्शनंगतः ॥ तववंक्र
मणंब्रह्मन्नभयाययथारवेः ॥ ५ ॥

त्यात्मानं पुंजीतेत्युक्तरीत्यासमर्पितः आत्माअन्यगात्मायैस्तेतान्सुरासुरैरीड्यःस्तुत्योनारदःदृदृशेदृष्टवान् ॥ ३ ॥ सम्यगुत्थायप्रणिपत्यदंड
वत्प्रणम्यगोत्रसत्रनामादिकं संकीर्त्ययथाविधिपूजयित्वासुखेनमृदुलेआसनेआसीनमब्रुवन्नूचुः ॥ ४ ॥ उक्तमेवाह ॥ स्वागतमितिहेसुरर्षे
नेत्वयास्वागतंदिष्ट्यादैववशेननोस्माकंदर्शनंगतःप्राप्तहीयचतुर्विषयोगतः हेब्रह्मन्तववंक्रमणंसंचरणंचरणंलोकानामभवाय
भक्तिसाधनोपदेशेनरक्षणायनविद्यतेभवोयस्मात्तस्मै ॥ ययारवेःचंक्रमणंतद्वत् ॥ सूर्यस्यचंक्रमणंहिसमीहितसाधनानुष्ठायनेनलोक

यावन्तत्वैंद्रियाणां तत्त्रिर्भवति न नु तत्त्विंद्रियेषु रूपगवलेपनेन तथाऽप्युते ज्ञा भगवदास्तथं संसर्वाहं तत्त्व पुष्पफलादयो ऽणसर्व देवताहि एसा
धं फलं साधयति ॥१४॥ कुतः सर्वकारणत्वाच्चेति सहृष्टांतमाहृहाभ्यां । यथैव वार आपः वर्षकाले सत्यौघभवंति उद्भवंति ग्रीष्मे च तस्मि
न्नेव प्रविशंति ॥ अस्या प्रसिद्धत्वेन दृष्टांतांतरमाह यथा भूतानि स्थावरजंगमात्मकानि भूमावेव प्रभवंति प्रविशंति च तथा गुणप्रवा
हः गुणपरिणामरूपः प्रपंचः हरावेव कारणभूतेऽद्भवति नो भवति च ॥१५॥ एवं सर्वकारणत्वं उक्त्वा मयस्सर्वात्मतामाह ॥ न हेतं जग
दात्मनः परं परं वा समस्थानं । ग्रहादिसाम्यव्याहृत्य मधर्ममाह सवितुर्यथा प्रभेति सवितुः प्रभेव कृत्स्नं जगत्परमात्मनोऽपृथक् सिद्धवि
शेषणं शरीरमित्यर्थः जगतो नित्यत्वात्तन्निरूपितमात्मत्वमपि परमात्मत्वमपि परमात्मन्यनियतमित्याशंकां निराकर्तुं जगद्विशिनष्टि

यथैव सत्यौघ भवंति वारः पुनश्च तस्मिन् प्रविशंति काले । भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥१५॥
एतत्परं तत्त्वजगदात्मनः परं सद्धिभानं सवितुर्यथा प्रभा ॥ यथा सवोजाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः ॥१६॥

सद्धिभानं सच्छिद्रष्टायांस्थूलतया सद्धिभानमित्यनेन सद्धृत्संहारदृष्टायां सूक्ष्मतया नाभानमिति विवक्षितं । स्थूलसूक्ष्मध
र्मिनिवृत्तत्वेऽपि द्रष्टृत्वनित्यत्वमनेनाभिप्रेतं एतद्देवस्य ऐयितुं सद्भानाभानयोर्दृष्टांतमाह यथेति ॥ असुशब्देन प्राणायतनव्यापाराः
णींद्रियाणि लक्ष्यंते ॥ असवः कदाचिज्जाग्रति व्याप्रियंते कदाचित्सुप्तशक्तयः निवृत्तव्यापाराः केऽहत्य त्राह द्रव्येति द्रव्यं भूतपं
चकं ज्ञानक्रियाशब्दाभ्यां ज्ञानेंद्रियाणि कर्मेंद्रियाणि च लक्ष्यंते । इंद्रियभूतसंघातरूपदेवमनुष्यादिदेहात्मभ्रमात्ययेषु त्वावित्य
र्थः नहि निद्रायां देहात्माभिमानः यथा प्राणा जाग्रति सुषुप्ते च त्रयश्च भवंति । एवं जगत आविर्भवति रोभाव निमित्ते भानाभानेन त्वे

॥२०९॥

योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण चतुर्थाश्रमाध्ययनाभ्यां श्रेयःसाधनैरन्यैर्व्रतैश्च य आत्मदा बलदा
इति श्रुत्युक्तरीत्यात्मपर्यन्तप्रदानचतुरः आश्रितेभ्यो यो हरिर्भगवान्न तत्र जन्मादिषु नाप्तिर्ये जन्मादिभिर्नाराध्यस्तैः किं प्रयोजनमित्यर्थः
॥११॥ ननु जन्मादीनां प्रतिनियतफलानां भगवत्सेवावैधुर्यमात्रेण कुतो निष्फलता तत्राह श्रेयसामिति ॥ अर्थतः वस्तुतः सर्वेषामपि
श्रेयसां परमात्मा हरिरवधिः पराकाष्ठा हरेरन्यच्छ्रेयो नास्तीत्यर्थः ॥ यतो हरिः सर्वेषां प्रियः निरतिशयप्रीतिविषयः निरतिशया
नंदरूपप्रीतिविषयत्वं हि परमं श्रेयः प्रियत्वे हेतुरात्मा आत्मा हि निरतिशयप्रीतिविषयस्य प्रत्यगात्मनः संबंधादेहादयस्त

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थ
तः ॥ सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥१३॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च
यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥१४॥

दद्र पश्वादिकं संबंधं संबंधपारंपर्येण व्यवस्थितप्रीतिविषयं तस्मात्प्यात्मेत्यर्थः ॥ न केवलं प्रिय एव किंतु स्वात्मपर्यंतपुरुषार्थमदश्च
बलिप्रभृतिभ्यस्तथा महादानं प्रसिद्धं ॥१३॥ किं च तत्फलसाधनतयेंद्रादिदेवताराधनमपि भगवत्सेवपर्यवस्यतीति तस्य सर्वदेवतात्म
त्मत्वात् अतः साक्षात्तदाराधनमेव सर्वदेवताप्रीतिद्वारा समीहितपुरुषार्थहेतुरिति सदृष्टांतमाह ॥ यथेति ॥ तरोर्वृक्षस्य मूलनिषे
चनेन जलसेकेन स्कंधादयः यथा तृप्यंति न तु प्रत्येकं स्कंधादिसेचनेन तत्र स्कंधा मूलात्पृथग्विभागाः भुजास्तेषां विभागाः शा
खाः तेषामपि विभागा उपशाखाः एवमुपलक्षणं तत्र पुष्पफलादयोपि तृप्यंति ॥ यथा च प्राणोपहारात्प्राणाद्याहुतेर्भोजनादिति

भा·द·
॥२१०॥

कीदृशं तद्ब्रह्मस्वरूपं यद्भजद्भिर्मुच्यत इ।ति विविक्तायां प्रकृतिपुरुषविलक्षणं सत्यं ज्ञानमनंतं इति स्वरूपशोधकवाक्यावगतं ब्रह्मस्व
रूपं तेष्वेवोपलब्धं तद्भवतीत्याह ॥ निरस्तसंकल्पविकल्पं मानसबुद्धिसुखेच्छाद्वेषादिविकल्परहितं इत्यर्थः ॥ अनेन बद्धजीवव्यावृत्तिः।
अद्वयं द्वयः समुदायः तद्रहितं स्वजातीयद्वितीयवस्त्वभावात् ॥ यथा न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतेः अद्वितीयं इत्यर्थः ॥ अने
न मुक्तजीवव्यावृत्तिः ॥ तेषां सजातीयसद्भावात् ॥ द्वयापवारोपरमोपलंभनं द्वयशब्देन द्वैतं विवक्षितं तद्देवापवारः ब्रह्मज्ञानवा
र्धकं देवमनुष्यादिभेदापवारविरामे उपलंभनं यस्य ॥ तथोक्तं देहात्मभ्रमनिवृत्तौ उपलभ्यं इत्यर्थः ॥ अजस्य निर्वृत्तं नित्यानंद।

द यया सर्वविन्मंते पुमंतु त्स्यायेन केनवा ॥ सर्वेंद्रियोपशांत्या च तुष्यत्यात्मा जनार्दनः ॥ १९ ॥

र्धकं नित्यानंदस्वरूपं वा अतोपि प्रागुक्तार्थ उचितः अनादिमध्यांतमिति नित्यत्वस्य कथितत्वात् अजस्य सद्भावस्य पुनरुक्तिप्रसं
गात् ॥ संज्ञप्तिमात्रं चिदेव जडस्वरूपमनुयाद इप्रापूर्वोक्तज्ञानेन भजतः निरस्तसंकल्पविकल्पमिति पदेन विशोकोविजिघत्सो
पिपासः ॥ अस्थूलमनण्वह्रस्वमिति वाक्योक्तप्रकृतिपुरुषवैलक्षण्यं एवं द्रमलत्वमुक्तं ॥ अनादिमध्यांतमिति सत्वमुक्तं निर्वि
कारत्वं हि सत्यत्वं ॥ संज्ञप्तिमात्रमिति ज्ञानप्रशादार्थमुक्तं अजस्य निर्वृतं इत्यनेन सएको ब्रह्मण आनंद इति ब्रह्मेत्याद्यर्थ उक्तः समाभ्य
धिकराहित्यवाचिना द्वयप्रादेनानंतत्वमुक्तं सद्वितीयं हि सर्वदेशादिभिः परिच्छिन्नमतो द्वितीयत्वादनंतत्वसिद्धिः ॥ १९ ॥

॥२१०॥

नरेवदूर्शनांतरेणसाधयति यथानभसीति यथानभस्याकाशेऽभ्रतमःप्रकाशाभवंतिकदाचिद्विभातामवंतिकदाचिन्नविभातामवंतिनहि
भावाभावमात्रेणआदीनाममसनाशंकिंतुशक्तयाएवंहेभ्रयाःप्रवाहमानाःरजस्तमःसत्वमित्येवंरूपा अमूःशक्तयःकार्योपयोग्यपृथ
क्सिद्धविशेषणाभत्ताःपरेब्रह्मणिकयाचिद्भवंतिचप्रवहद्रनिप्रवाहःवेदाःप्रमाणमितिवच्छक्तयःप्रवहद्रूत्तुक्तं॥१७॥तेनाव
स्थानांस्थूलत्वसूक्ष्मत्वादीनामनित्यत्वेपितदाश्रयस्यप्रकृतिपुरुषात्मकःद्रव्यस्यनित्यत्वात्तस्यपरमात्मानंप्रतिनियतशरी

यथानभस्यभ्रतमःप्रकाशाभवंतिभूपानभवंत्यनुक्रमात्॥एवंपरेब्रह्मणिशक्तयस्त्वमूरजस्त
मःसत्वमितिप्रवाहः॥१७॥तेनैकमात्मानमशेषदेहिनांकालंप्रधानंपुरुषंपरेशम्॥स्वतेजसा
ध्वस्तगुणप्रवाहमात्मैकभावेनभजध्वमद्धा॥१८॥ ॥ ॥ ७ ५ ॥

रत्वेनाशेषदेहिनामेकमात्मानंकालंकालशरीरकंप्रधानप्रकृतिशरीरकंपुरुषंजीवशरीरकंप्रकृतिसंबंधयुक्तसंसा
रित्वशंकानिरस्यति॥स्वतेजसास्वप्रकाशेनध्वस्तः॥निरस्तःगुणप्रवाहोदयःसंसारोयस्मिन्यंतत्तयाप्रकृतिसंबंधोनतुजीवस्ये
वबध्यतयेतिभावःएवंभूतंपरेशंब्रह्मादीनामपीशमात्मैकभावेनसर्वात्मकत्वेनसर्वेषामात्मनामेकांतरात्मत्वेनेतिवुद्ध्यासा
क्षाद्भजध्वम्॥१८॥

इमं संवादमुपसंहरति मुनिः इतीति त्रिभिः हे राजन् विदुर य मभिप्रायेण राजन्निति संबोधनं ॥ इत्युक्त्वा अन्याश्च भगवत्कथाः प्रचेतसः
प्रति श्रावयित्वा स्वायंभुवो नारदो मुनिः सत्यलोकं ययौ ॥ २४ ॥ ततस्ते प्रचेतसः नारदमुखान्निःसृतं सकललोकाघहरं भगवद्यशो
निशम्य भगवच्चरणारविंदं ध्यायंतस्तल्लोकमापुः ॥ २५ ॥ हे क्षत्तः त्वं मां प्रति यत्पृष्टवान् प्रचेतसां नारदस्य च संवादरूपं हरिकीर्तनं
तत्तुभ्यं मयाभिहितं ॥ २६ ॥ स्कंधार्थमुपसंहरन्नुत्तरस्कंधप्रवृत्तिनिमित्तं मतशंकामुत्थापयन्नाह शुकः एष इति द्वाभ्याम् ॥ मानवस्य म

श्रीमैत्रेय उवाच ॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥
२४ ॥ ते पि तन्मुखनिर्यातं यशो लोकमलापहम् ॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः ॥ २४ ॥ एतत्ते
भिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥ २५ ॥ श्रीशुक उवाच ॥ य एष
उत्तानपदो मानवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥ २६ ॥ यो नारदादात्मविद्याम
धिगम्य पुनर्महीम् ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥ २७ ॥

नुपपन्नस्य उत्तानपद एष वंशोनुवर्णितः अथ प्रियव्रतस्य उत्तानपादानुजस्य नृपाणां संमतं वंशं निबोध शृणु ॥ २७ ॥ ननु दशवर्षभु
क्त्वायैः समासनस्तच्चरित्रमाह ॥ यः प्रियव्रतः प्रथमं विरक्तो वनं प्रविष्टः नारदादात्मविद्यामधिगम्य प्राप्य पुनर्महीं भुक्त्वा परिपाल्य
पुत्रेभ्यः ऐश्वर्यं संविभज्य भगवत्पदं समगात् सम्यक्साधनोपसंहारेणागात् ॥ २८ ॥

तदेवं सत्वज्ञानत्वानं हृत्वा मलत्वविशिष्टं शोधकवाक्यावगतं परमात्मस्वरूपमुक्तं॥ अमुमेवमुक्ताया हृष्टाः साधनाम्याह॥ यदयेति॥ सर्वेषु भावचेषुय
यो वैतत्सकामोपयोगिन्याद्यया येन केनचिद्दैवात्लब्धेनान्नादिना श्रेतवीर्येंद्रियनिग्रहेण चानुगृहीतया हृष्णा जनार्दनस्तुष्यति॥२०॥ ततस्तु
ष्टो भगवान्नकदाचित्स्वजनीत्याह॥ अपहृताविरस्ताः सकलाईषणाः कामायस्मात्स चासाव मलात्मा मनस्तस्मिन्नेवंविधे सतिमनसि निरंतर
मेधितया भावनया भक्त्या उपहूतः संविधापितः सन्त्रक्षरो हरिः छिद्रवत्स्थपक्तिद्रवन्नतोन सरतिना पयाति॥ किं कुर्वन्नात्मनो निजजनवशग
त्वं स्वभक्ताधीनत्वं यन्नगच्छन्॥२१॥ सतां वश्योमावसतांपूजामपिनगृह्णातीत्याह॥ नेति॥ अधनाश्चात्मधनाश्च भगवद्भक्तास्तेप्रियायस्य सच

अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः॥ निजजनवशगत्वमात्मनोयन्नसरतिच्छिद्रवदक्षरः सतां हि
२०॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः॥ श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु
२१॥ श्रियमनुचरंतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यः स्वपूर्णः॥ न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञ
॥सं॥२२

ममप्रिय इति भगवदुक्तेः भक्तसंगजन्यानंदरसज्ञः सहरिः कुमनीषिणां कुत्सितमतीनां इज्यां न भजति न गृह्णाति॥ के कुमनीषिणस्तत्राह श्रुताही
नां मदाः श्रुतादिनिमित्तमदास्तैरंधा अकिंचनेषु विरागिषु सत्सु ये पापं तिरस्कारं विदधति कुर्वंति॥२२॥ भक्तपराधीनत्वमेव प्रपंचयंस्तं को
भजेदित्याह श्रियं इति॥ अनुचरंतीमनुवर्तमानामपि श्रियं तदर्थिनः तान् श्रियमर्थिनवा तस्याः श्रियोर्थिनः श्रीकटाक्षलेशकांक्षिणः द्वि
पदान्नरेंद्रान्विबुधान्देवांश्च निजभक्तवर्गरक्तः भगवान्न भजति नानुवर्तते कुतः यः स्वपूर्णः स्वत एवावाप्तसमस्तकामत्वान्नश्रियादीन्भ

जति एवं भजनममुं भक्तवत्सलं रसज्ञः पुमान्कथमु
द्विसृजेत॥२३॥

विदुरमैत्रेयसंवादमुपसंहरति वादरायणिः॥ इदं स्थितिभिः कौषारविणा मैत्रेयेण उपवर्णितमजितस्य भगवतो वादः गुणानुवादः सतां कथा स्वतस्समाहारः रूपं इदं तृतीयतुरीयस्कंधात्मकं निशाम्य विदुरेन भावेन स्नेहेनया अश्रुणां कला मात्रास्ताभिराकुलचित्तः स्तत्रा विदुरः मुनेर्मैत्रेयस्य चरणं मूर्ध्नि हरेः स्मरणात् दधार धृत्वा उदधात् ॥२९॥ ततः हे तात महायोगिन् करुणात्मना दयालुना सोऽयं तमसः संसारस्य पारः पारमाप्तिहेतुः उपायः दर्शितः यत्र तमसः पारे वर्त्तमाने नरः किंचनैर्गम्यो भवति हरिः ॥३१॥ इत्येवं वदन्तान मप्रणम्य तमनुज्ञाप्य स्वानां ज्ञा

इत्थं तु कौषारविणोपवर्णितां ध्रुवान्निशम्याजितवादसत्कथाम्॥ प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः॥ २९॥ विदुर उवाच॥ सोऽयं तेन महायोगिन् भवता करुणात्मना॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः॥३०॥ इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयम्॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः॥३१॥ एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनां॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात्॥३२॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकत्रिंशोऽध्यायः॥३१॥

तीनां दिदृक्षुः कर्मणि परीक्षान्द्रष्टुमिच्छुः ज्ञानयोगेन पूर्णान्तःकरणः गजः साह्वयं हास्तिनपुरं ययौ॥३१॥ विदुरमैत्रेयश्रवणादिफल माह॥ एतदिति॥ हे राजन् हरावर्पित आत्मा मनो येषां राज्ञां स्वायंभुवमन्वादीनां एतच्चरित्रं यः शृणुयात्स आयुरादीन्प्राप्नुयात्॥ स्वस्तिगतिं मुक्तिं तत्र स्वस्तिगतिः प्रधानफलं आयुरादयः॥ आनुषंगिकफलानि॥ स्वस्तीति पृथक्पदं वा गतिं मुक्तिं स्वस्ति मंगलम्॥३२॥ इति श्रीमद्वीरराघवलिखितायां श्रीमद्भागवतचंद्रचंद्रिकायां चतुर्थस्कंधव्याख्यायां एकत्रिंशोऽध्यायः॥ ३१॥ संवत्॥१९०५॥

श्लो० १७६४८ टीका ६३०० संख्या ॥

॥२१२॥

हे भगवन्मह्यं यत्प्रतिश्रुतं तत्सर्वं उपोवाह उपावहत् संपादितवान् । तथापि प्रपन्नायामे अभयं दातुमर्हसि ॥ अभयप्रदानं करोषीति चेत्क यथामी
ति भावः ॥५१॥ ईतत्किमित्यत आह हे ब्रह्मन् दुहितृभिः समाः वयःशीलादिभिः तुल्याः पतयः तासां भर्त्तारः तुभ्यं त्वया ॥ विभक्तिव्यत्यय आर्षः
विमृग्या अन्वेषणीयाः त्वयि वने प्रव्रजिते सति गते सति मम विशोकाय यः विगतः शोको यस्मात्स विशोकः ॥ ब्रह्मज्ञानं तरति शोकमात्म
विदिति श्रुतेः तेन तदुपदेशोत्तक्ष्णतेन तस्मै कश्चित्सुतः स्यात्किमित्यर्थः कच्चिदिति पाठांतरं तदा किंस्यात्सुत इति शेषः ॥५२॥ एवं स्वाभिप्रेतं

देवहूतिरुवाच ॥ सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतम् ॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि ॥५१॥ ब्र
ह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः ॥ कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम् ॥५२॥ एताव
तालं कालेन व्यतिक्रांतेन मे प्रभो ॥ इंद्रियार्थप्रसंगेन परित्यक्तपरात्मना ॥५३॥ इंद्रियार्थेषु सज्जंत्या प्र
संगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ॥५४॥ निवेद्याथ संसारस्य निर्वेदमावेदयंत्याह एता
वदध्यायं ॥ हे विभो इंद्रियार्थेषु शब्दादिविषयेषु ॥ प्रसक्तः प्रसंगेन परित्यक्तः अनुपासितः परात्मा परमात्मा यया तस्या मे मम व्यतीतेनातिक्रांतेन
एतावता गतेन वर्षपरिमितेन कालेनालम् ॥५३॥ ब्रह्मकृतमनुशोचत्याह इंद्रियार्थेषु सज्जंत्या आसक्ताया मे मया मे मया त्वयि प्रसंगः प्रकृष्टसंगः कृ
तः तथापि परं भावं उत्कृष्टं भावमजानंत्या अपि मे ममाभयाय अस्तु स्मात् ॥५४॥

क्रियाकालो गतः इत्थं चाहमेवमिति योगानुभावेन योगप्रभावेन कामासक्तयोर्दंपत्योः रममाणयोः सतोः शतं शरदः संवत्सरा मनागीषत्
कालं इव व्यतीयुः अतिक्रांताः ॥४६॥ आत्मवित् जीवपरमात्मयाथात्म्यवित् कर्दमः तां प्रियां आत्मनः ॥ स्वदेहार्द्धरूपेण अतिप्रीत्या आत्मना मनसा
भावयन् चिंतयन् सर्वसंकल्पवित् मायावद्रूपसंकल्पं जानन् विभुः तया कर्तुं समर्थः स्वं स्वरूपं वीर्यं नवधा विधाय विभज्य तत्क्षेत्रे त
स्याः पत्न्यां आधत्त निहितवान् ॥४७॥ ततः अनंतरं सा देवहूतिः सद्य आशु स्त्रियं स्त्रीः प्रजाः ॥ अपत्यानि सुषुवे प्रसूतवती कथंभूता

एवं योगानुभावेन दंपत्यो रममाणयोः ॥ शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ॥४६॥ तस्यामाधत्त
रेतः स्तां भावयन्नात्मनात्मवित् ॥ नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ॥४७॥ अतः सा सुषुवे सद्यो देव
हूतिः स्त्रियः प्रजाः ॥ सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ॥४८॥ पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती ब
हिः ॥ स्मयमाना विक्लवेन हृदयेन विदूयता ॥४९॥ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया उवा
च ललितां वाचं निरुध्याश्रुकलां शनैः ॥५०॥ प्रजाः ताः सर्वा नव स्त्रियः चारूणि सर्वाण्यंगानि अवयवा यासां लोहितोत्पल
सरकोत्पलस्येव गंधो यासां ताः ॥४८॥ तदा पत्नीसमनंतरं प्रव्रजिष्यंतं पतिं आलक्ष्य वितर्क्य कमनीया सा सती देवहूतिः बहिः स्मयरे
याना ईषद्धसमाना अंतः स्तुतिविक्लवेन व्याकुलितेन चेतसा विदूयता परितप्यमानेन हृदा मनसा ॥४९॥ अधोमुखी नखा एव मणयः ते
षां श्री शोभा यस्मिंस्तेन पदा चरणेन भुवं लिखंती अनेन दूरं तावच्चिंता सूच्यते ॥ अश्रुकणान् शनैः निरुध्य ललितां मधुरां वाचं उवाच

भा॰त्र॰

॥१५२॥

भ्राजिष्णुना प्रकाशमानेन महीयसा श्रेष्ठेन कामगेन विमानेनानिल इव सर्वत्राप्रतिहतगत्या चरन्वैमानिकान् लोकानत्यशेतातिक्रम्य स्थितः ॥४१॥ कीदृशो यमुनेः प्रभाव इति न विस्मयनीयमित्याह । किमिति । यैः पुंभिस्तीर्थपदः भगवतः व्यसनात्ययः तापत्रयनाशनश्चरणः पादः आश्रितः तेषामुद्दामचेतसां योगपरिगृहमनसां पुंसां किं दुरापादनं दुःप्रापं किमस्तीत्यर्थः ॥४२॥ स्वसंस्थया द्वीपवर्षादिसंस्थानेन यावान्भूगोलस्तावंतं बह्वाश्चर्यमतिविस्मयनीयं भुवो गोलं तस्यै भार्याया दर्शयित्वा महायोगी कर्दमः पुनः स्वाश्रमाय न्यवर्त्तत स्वाश्रमं प्रत्यागतवान् ॥४३॥

भ्राजिष्णुना विमानेन कामगेन महीयसा ॥ वैमानिकानत्यशेत चरल्लोकान्यथानिलः ॥४१॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् ॥ यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ॥४२॥ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया ॥ बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्त्तत ॥४३॥ विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम् ॥ रामां निरमयन् रेमे वर्षपूगान्मुहूर्त्तवत् ॥४४॥ तस्मिन्विमान उत्कृष्टां शय्यां रतिकरीं श्रिता ॥ न चाबुध्यत तं कालं पत्यापीच्येन संगता ॥४५॥

नवधात्मानं विभज्य नवधा पत्युः सुखं संपादयिष्यामीति मनसा स्ववीर्यं विभज्येत्यर्थः सुरते उत्सुकां उत्साहवतीं मनोः पुत्रीं रामां स्वस्त्रियं विशेषेण रमयन्वर्षपूगान्वर्षगणान्मुहूर्त्तवद्रेमे ॥४४॥ तस्मिन्विमाने उत्कृष्टां निरतिशयसुखस्पर्शां रतिकरीं रतिवर्द्धिनीं शय्यां श्रिता अपीच्येन सुंदरेण पत्या भर्त्रा संगता संयुक्ता सती तमनेकवर्षसमूहात्मकं कालं नाबुध्यत एतावान्कालो गलत इति न ज्ञातवती ॥४५॥

॥१५२॥

हे अविचहत्त्व विदुर जितमारिषड्वर्गः कर्दमः ॥ जातः भावः संविवाहात्मा ग्वत ॥ आत्मनः स्वस्मात् रूपं बिभ्रतीमत एव विशेषेण भ्राजमानं संवीतो
रुचिरौ यस्याः ताद्दृशौ स्तनौ यस्याः तादृशं रूपं विशेषेण यस्याम् ॥ शोभने वाससी यस्यास्ताम् ॥३७॥ अलुप्तमहिमाः लुप्तप्रभावः प्रियया भार्यया अनुपक्त अनुसंगतः
विद्याधरीभिः रूपं चीर्णं शुश्रूषितं वपुर्यस्य स मुनिः कर्दमस्तस्मिन्विमाने बभ्राज राजत यद्दृष्टांतः उत्कच कुमुद्गणवान् विकसत्कुमुद्गण
वानपीच्यो दर्शनीयः ताराभिरावृतो नभस्थः उडुपति पूर्णचंद्र इवेति पूर्णचंद्र इव नभ इव स्त्रियः कुमुद्वतीवतीसां नेत्राणि ॥

स्तनं रुचिरं तत्स्याना विभ्राजं नीमपूर्ववत् ॥ आत्मनो बिभ्रंती रूपं संवीतरुचिरस्तनी ॥३६॥ विद्याधरीसहस्रेण सेव्य
माना सुवाससम् ॥ जातभावा विमानं तदारोहयदमित्रहन् ॥३७॥ तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याध
रीभिरुपचीर्णवपुर्विमाने ॥ बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ॥३८॥ तेनाष्ट
लोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु ॥ सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरंध
नदवल्ललनावरूथी ॥३९॥ वैस्रंभके सुरवने नंदने पुष्पभद्रके ॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥४०

इति ज्ञेयम् ॥३८॥ तेन विमानेन अष्टलोकपालानां विहाराय यस्मिन्सः कुलाचलेंद्रो मेरुः तस्य द्रोणीषु दरीषु कथंभूतासु अनंगस्य सखा मा
रुतः शीतसुगंधमंदानिलः तेन सौभगं सौंदर्यं यासु धुधुनी गंगा तस्याः पातेन शिवः ॥ स्वनो यासु ललनावरूथी स्त्रीरत्नसमूहवान् मुनिर्धनद इव कु
बेर इव रेमे ॥३९॥ वैस्रंभकादिषु देवोद्यानेषु मानसे सरसि रतः प्रीतः सन् रामया स्त्रिया सह रेमे रमितवान् ॥४०॥

स्रजं बिभ्रतं विरजं निर्मलं मंबरं वासो यस्य तं विरजं मलहीनं कृतं स्वस्त्ययनं मंगलायुष्मकन्याभिः समानितम्॥३०॥ स्नातं उद्वर्तनक्षालितं कृतंशि
रः॥ स्नानमभ्यंगो येन तं सर्वैराभरणैर्भूषितमलंकृतं एतदेव प्रपंचयति निष्कं पदकं ग्रीवायां यस्य तं॥ कूजंती कांचनमयेन नूपुरे यस्य तम्॥३१
श्रोण्योर्नितंबयोरध्यस्तया धृतया कांच्या कांचनमय्या बहुनिरत्नानि यस्यां तया कांच्या मेखलया महार्हेण रुचकेन मंगलद्रव्येण च कुंकुमादि
नातद्दुंकृते विम्बप्रकाशेन रुचके मंगलद्रव्ये ग्रीवाभरणं दंतयोरिति भूषितम्॥३२॥ सुभ्रुवा शोभनया भ्रुवा सुदता सुष्टु दरं दंतपंक्त्या श्लक्ष्णा स्नेग्ध

स्नानं कृतशिरःस्नानं सर्वाभरणभूषितं॥ निष्कग्रीवं वलयिनं कूजत्कांचननूपुरम्॥३१॥ श्रोण्योरध्यस्तया कां
च्या कांचन्या बहुरत्नया॥ हारेण च महार्हेण रुचकेन च भूषितम्॥३२॥ सुदता सुभ्रुवा श्लक्ष्णस्निग्धापांगेन चक्षु
षा॥ पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम्॥३३॥ यदा सस्मार ऋषभमृषीणां दयितं पतिम्॥ तत्र चास्ते
सह स्त्रीभिर्यत्रास्ते स प्रजापतिः॥३४॥ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा॥ निशाम्य तद्योगगतिं संशयं प्रत्यप
द्यत॥३५॥ मनोहरः स्निग्धो पांगः प्रांतो यस्मिन् पद्मकोशस्पृधा पद्मकोशस्पर्धिना चक्षुषा नेत्रेण सुभ्रुवा चक्षुषेति जातावेकवचनम्॥ त
या नीलैरलकैः लसन्मुखं यस्य तं तं॥३३॥ एवंभूतमात्मानं दृष्ट्वा यदा ऋषीणां ऋषभं श्रेष्ठं दयितं प्रियं पतिं भर्तारं सस्मार स्मृतवती तदा य
त्र सः प्रजापतिः कर्दमः आसीत् तत्रैव यमपि स्त्रीभिः सहास्ते उपविवेश तस्थौ॥३४॥ भर्तुः पुरस्तादग्रे स्त्रीसहस्रैर्वृतमात्मानं निशाम्य दृ
ष्ट्वा तस्य भर्तुर्योगनिर्योगप्रभावं प्रतिसंज्ञा प्रत्यपद्यत कीदृशी यं योगगतिरिति संशयं प्राप्तवती स्थितः॥३५॥

हे अमित्रहन्विदुर ज्ञितमात्रिवद्दुर्विमसः कर्दमः ॥ जातः भावः संविवाहाभ्याग्वत ॥ आत्मनः स्वस्यारूपं विभ्रतीमत एव विशेषेण भ्राजमानं संवीतौ
स्तनौ यस्याः तां ध्यानरेह पविप्रोषयाम ॥ शोभमनेवासमीयस्यास्ताम ॥३७॥ अलुप्तमहिमा ऽलुप्तप्रभावः प्रियया भार्ययानुरक्त अनुसंगतः
विद्याधरीभिरुपचीर्णं शुश्रूषितं वपुर्यस्य समुनिः कर्दमः तस्मिन्विमाने वभ्राज रराज तत्र दृष्टांतः उत्कचकुमुद्गणवान्विकसत्कुमुद्ग
णवानपीच्यो दर्शनीयः तारकाभिरावृतो नभस्थः उडुपतिः पूर्णचंद्र इवेति पूर्णचंद्र इवः नभ इव स्त्रियः कुमुदानीव तासां नेत्राणि

सतां कृतमलस्नानां विभ्राजंतीमपूर्ववत् ॥ आत्मनो विभ्रंती रूपं संवीतरुचिरस्तनीं ॥३६॥ विद्याधरीसहस्रेण सेव्य
मानां सुवाससम् ॥ जातभावो विमानं तदारोहयदमित्रहन् ॥३७॥ तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याध
रीभिरुपचीर्णवपुर्विमाने ॥ वभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ॥३८॥ तेनाष्ट
लोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु सिद्धैर्नुतो धुधुनिपातशिवस्वनासु रेमे चिरंध
नदवल्ललनावरूथी ॥३९॥ वैस्रंभके सुरवने नंदने पुष्पभद्रके ॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥४०

इति ज्ञेयम् ॥३८॥ तेन विमानेनाष्टलोकपालानां विहारा यस्मिन्सः कुलाचलेंद्रो मेरुः तस्य द्रोणीषु दरीषु कथंभूतासु अनंगस्य सखा मा
रुतः शीतसुगंधमंदानिलः तेन सौभगं सौंदर्यं यासु धुधुनी गंगा तस्याः पातेन शिवः ॥ स्वनो यासु ललनावरूथी स्त्रीरत्नसमूहवान्मुनिर्धनद इव कु
वेर इव रेमे ॥३९॥ वैस्रंभकादिषु देवोद्यानेषु मानसे सरसि रतः प्रीतः सन् रामया स्त्रिया सह रेमे रमितवान् ॥४०॥

भा-तृ°

||१५१||

तज्जं विचित्रं तद्विरजं निर्मलं अंबरं वासो यस्यां तं विरजं मलहीनं कृतं स्वस्त्ययनं मंगलं यस्य कन्याभिः सम्मानितम् ||३०|| स्नातं उद्धृतनः क्षालितं कृतं शि-
रः स्नानं नमस्यं योषेन नं सर्वैराभरणैर्भूषितमलंकृतं एतदेव प्रपंचयति निष्कं पदकं ग्रीवायां यस्य तं || कूजंती कांचनमयेन नूपुरेण यस्य तम् ||३१||
श्रोण्योर्नितंबयोरध्यस्तया धृतया कांच्या कांचनमय्या बहूनि रत्नानि यस्यां तया कांच्या मेखलया महार्हेण रुचकेन मंगलद्रव्येण च कुंकुमादि-
ना तदुक्तं विश्वप्रकाशे रुचके मंगलद्रव्ये ग्रीवाभरणे दंतयोरिति भूषितम् ||३२|| सुभ्रुवा शोभनया भ्रुवा सुदता सुंदरदंतपंक्त्या श्लक्ष्णाः स्निग्धा-

स्नातं कृतशिरस्नानं सर्वाभरणभूषितं | निष्कग्रीवं वलयिनं कूजत्कांचननूपुरम् ||३१|| श्रोण्योरध्यस्तया कां-
च्या कांचन्या बहुरत्नया | हारेण च महार्हेण रुचकेन च भूषितम् ||३२|| सुदता सुभ्रुवा श्लक्ष्णस्निग्धापांगेन चक्षु-
षा | पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ||३३|| यदा सस्मार ऋषभमृषीणां दयितं पतिम् | तत्र चास्ते
सह स्त्रीभिर्यत्रास्ते स प्रजापतिः ||३४|| भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा | निशाम्य तद्योगगतिं संशयं प्रत्यप-
द्यत ||३५||

मनोहरः स्निग्धोऽपांगः प्रांतो यस्मिन् पद्मकोशस्पृधा पद्मकोशस्पर्द्धिना चक्षुषा नेत्रेण सुभ्रुवा चक्षुषेति जातावेकवचनम् || त-
था नीलैरलकैश्च लसन्मुखं यस्य तं ||३३|| एवंभूतमात्मानं दृष्ट्वा यदा ऋषीणां ऋषभं श्रेष्ठं दयितं प्रियं पतिं भर्तारं सस्मार स्मृतवती तदा य-
त्र सः प्रजापतिः कर्दमः आस्ते तत्र स्वयमपि स्त्रीभिः सहास्ते उपविवेशेत्यर्थः ||३४|| भर्तुः पुरस्तादग्रे स्त्रीसहस्रैर्वृतमात्मानं निशाम्य दृष्ट्वा त-
द्भर्तुर्योगनिर्योगप्रभावं प्रति संशयं प्रत्यपद्यत कीदृशीयं योगगतिरिति संशयं प्राप्तवतीत्यर्थः ||३५||

||१५१||

मलपंकेन संछन्नमत एव विवर्णो मलिनो यस्मिंस्तदंगं शरीरं च बिभ्रती सती शिवानां निर्मलानां जलानामाशयः आश्रयः सरस्वत्या परिशोभित
मिति शेषः एवंभूतं तथा वेतन्मध्यस्थमित्यर्थः सरः बिंदुसरः आविवेश प्रविष्टवती ॥ २५ ॥ सा अंतः सरसि निमग्ना सती तत्र वेश्मस्थां मंदिर
स्थाः दश शतानि कन्यकाः ददर्श कथंभूताः सर्वाः किशोरवयसः उत्पलस्येव देहगंधो यासां ताः ॥ २६ ॥ तां देवहूतिं दृष्ट्वा दश शतानि स्त्रियः स
हसा आशु उत्थाय जलस्थाद्वेश्मनो बहिर्विनिर्गत्य प्रांजलयः वयं तुभ्यं कर्मकरीर्न अस्मान् शाधि अनुशिक्षय किं दास्यं करवामेति प्रोचुः

अंगं च मलपंकेन संछन्नं शबलस्तनम् ॥ आविवेश सरस्वत्याः सरः शिवजलाशयम् ॥ २५ ॥ सांतःसरसि वे
श्मस्थाः शतानि दश कन्यकाः ॥ सर्वाः किशोरवयसो ददर्शोत्पलगंधयः ॥ २६ ॥ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांज
लयः स्त्रियः । वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किं ॥ २७ ॥ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम्
दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः ॥ २८ ॥ भूषणानि परार्ध्यानि वरीयांसि द्युमंति च ॥ अन्नं सर्वगुणोपे
तं पानं चैवामृतासवम् ॥ २९ ॥ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरं विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानि
तम् ॥ ३० ॥

२७ ॥ महार्हेण श्रेष्ठेन केन स्नानेन स्नानयोग्येन सुगंधेन तैलादिना तां मनस्विनीं देवहूतिं स्नापयित्वा मानदाः स्त्रियः अस्यै देव
हूत्यै एव निर्मलेन नूतनेन ददुः द्वे वस्त्रे ॥ २८ ॥ तथा परार्ध्यानि श्रेष्ठतमानि द्युमंति दीप्तिमंति वरीयांसि तत्प्रियाणि भूषणानि ॥ सर्वगुणो
पेतं अन्नम् अमृतस्वादमास्वं मादकं पानपेयं चास्यै ददुः ॥ २९ ॥ अथ सा देवहूतिः स्वमात्मानं देहमादर्शे दर्पणे ददर्शेति शेषः कथंभूतं स्रग्विणं

कृत्रिमानपि हंसादीन्स्वांस्वजातीयान्मन्यमानैर्हंसानां पारावतानां च सम्मूहैस्तत्र तत्राधिरुह्याधिरुह्य च निकूजितम् ॥२०॥ यथोपजोषं यथासुखं
रचितैः कल्पितैः विहारस्थानादिभिर्युक्तमिति शेषः ॥ यद्वा विहारस्थानादिभिरात्मानं स्वस्य मायाविनोपि विस्मापनमिव विस्मयजनक
मिवावस्थितमाविचीकरदिति पूर्वेणान्वयः तत्र विहारस्थानं क्रीडाप्रदेशः विश्रामं शयनं गृहं सर्वं प्राउपभोगस्थानं प्राङ्गणं गृहाद्ब
हिरचितं प्राकारा गवाक्षाः ॥२१॥ ईदृगेवंविधं तद्गृहं विमानं नातिप्रीतेनाप्रतिसंतुष्टेन चेतसा पुश्यंती देवहूतिस्स्वयं सर्वभूतानामाश

हंसपारावतव्रातैस्तत्र तत्र निकूजितम् ॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥२०॥ विहारस्थानविश्र
मसंवेशप्राङ्गणाजिरैः ॥ यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥२१॥ ईदृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा
सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयम् ॥२२॥ कर्दम उवाच ॥ निमज्ज्यास्मिन्ह्रदे भीरु विमानमिदमारुह
इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणाम् ॥२३॥ मैत्रेय उवाच ॥ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा ॥ सरजं बि
भ्रती वासो वेणीभूतांश्च मूर्द्धजान् ॥२४॥ यमभिप्रायं जानातीति स कर्दमः स्वयं प्रावोचत ॥२२॥ हे भीरु इदं तीर्थं शुक्लकृतं शुक्लेन
भगवता कृतमानंदाश्रुनिपातेन कृतं नृणामाशिषां कांक्षितानां कांक्षितानां प्रापकमतोस्मिन् ह्रदे विंदुसरसि निमज्ज्य स्नात्वा हि इदं विमानं
चारुह अधिरोह ॥२३॥ सा कुवलयेक्षणा देवहूतिः भर्तुः कर्दमस्य वचः समादाय गृहीत्वा सरजं मलिनं वासः वस्त्रं वेणीभूतान्मूर्द्धजा
न्केशान् ॥२४

विचित्राणि माल्यमालानि निर्माणायोग्यानि युक्तानि यासु ताभिः मंजु मधुरं यथा तथा शिंजंतः ध्वनंतः षडंघ्रयो भ्रमरा यासु ताभिः स्रग्भिरलंकृतम्
दुकूलैः क्षौमैः धौतैः कौशेयैः स्यैश्च नानाविधैर्वस्त्रैर्विशेषेण राजितम् ॥१५॥ उपर्युपरि विन्यस्तेषु विरचितेषु गृहेषु पृथग्विभक्तं कलितैः
कशिपुभिः शय्याभिः कांतं कमनीयं तथा पर्यंकादिभिश्च कांतं ॥१६॥ तत्र तत्र भित्त्यादिषु विनिक्षिप्तैर्विरचितैर्नानाविधैः शिल्पैरुपशो
भितं महामरकतस्थलीं इंद्रनीलमणिमयभूम्यां रचिताभिर्विद्रुमवेदिकाभिर्जुष्टं युक्तं स्यमेति पाठे तया विद्रुमवेदिभिश्च युक्तम् ॥१७

स्रग्भिर्विचित्रमाल्याभिर्मंजुसिंजत्षडंघ्रिभिः॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम्॥१५॥ उपर्युप
रि विन्यस्तनिलयेषु पृथक्पृथक्॥ क्षिप्तैः कशिपुभिः कांतं पर्यंकव्यजनाशनैः॥१६॥ तत्र तत्र विनिक्षि
प्तनानाशिल्पोपशोभितम्॥ महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः॥१७॥ द्वाःसु विद्रुमदेहल्या भातं व
ज्रकपाटवत्॥ शिखरेष्विंद्रनीलेषु हेमकुंभैरधिष्ठितम्॥१८॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः
: जुष्टं विचित्रवैतानैः महार्हैर्हेमतोरणैः॥१९॥

यद्वाःसु द्वारेषु विद्रुममयदेहल्या उदुंबरेण भातं शोभितं वज्रखचितकपाटयुक्तं
इंद्रनीलमणिमयेषु शिखरेषु वर्णमयकलशैरधिष्ठितम्॥ चक्षुष्मंतः इव ये पद्मरागा अग्र्याः श्रेष्ठाः वज्रभित्तिषु खचितास्तैर्युक्तम्॥ तथा विचि
त्रैर्वैतानैः महार्हैः अनर्घ्यैः हेममयतोरणैश्च जुष्टं ॥१८॥ १९॥

सभंगसंगोयस्मिन्समयः कालोभिहितः सभ्यात् यस्मादरीयसि प्रेम्णोसतीनां यतो गुणप्रभवः गुणविस्तरो भवति॥ अतः पुत्रोत्पन्नो गुणविस्तारे
जाते सति हृष्टिं प्रपश्य वितरामी यदुक्तं तत्सर्वं भवेत्॥१०॥ अंगसंगार्थमितिकर्तव्यतां च संपादयेत्याह॥ तत्रेति हे ईश तत्रांगसंगे इति कृत्यं
इतिकर्तव्यतां साधनकलापं यं यथोपदेशं कामतंत्रोक्तानुसारेण उपशिक्ष संपादय॥ किं तर्हि इति कृत्यं प्रदुपाशिक्षणीयं तत्राह॥ येनैषमे
वहृतः उत्पादितः यो मनोभवः कामस्तेन धर्षितायाः॥ पीडितायामिमया अतिमिरिरंसया मच्छरीरं तुमिच्छया कर्शितः अत एव दीनः एष आर

तत्रेति कृत्यमुपशिक्षय यथोपदेशं येनैषमे कर्शितोतिरिरंसयात्मा॥ सिध्येत ते कृतमनोभवधर्षितायाः दीनस्तदी
शभवनं सदृशं विचक्ष्व ॥११॥ मैत्रेय उवाच॥ प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः॥ विमानं काम
गं क्षत्तस्तर्ह्येवाविरचीकरत् ॥१२॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम्॥ सर्वर्द्ध्युपचयोदर्कं मणि
स्तंभैरुपस्कृतम् ॥१३॥ दिव्योपकरणोपेतं सर्वकालसुखावहं॥ पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं ॥१४

आरेहः येनेति कृत्सेन तसिध्येत क्वाप्यपि देत्यादि परिहारेण स्वस्थानं भोगस्थानं इदं भोगपाही नाम पुष्पलक्षणं विचक्षणं विचक्ष्व कल्पय॥११ एवमु
क्तः कर्दमो भोगवहीनस्तजाहित्वा ह मैत्रेयः हे क्षत्तः प्रियायाः प्रियमन्विच्छन्कर्तुमिति शेषः कर्दमः योगं उक्तयोगमायामाश्रितः कामं यथे
ष्टं गच्छतीति तद्विमानं तर्ह्येव तत्क्षणमेवाविरचीकरत् आविर्भावयामास॥१२॥ तदेवं विमानं वर्णयति नवभिः सर्वकामदुघं सर्वाभिलाषितार्थ
प्रदं दिव्यमानुषं सर्वाः दीनां सर्वसंपदां उपचयस्तस्मादर्कं उत्तरोत्तराभिवृद्धिर्यस्मिन्मणिमयैः स्तंभैरुपस्कृतं॥१३॥ दिव्यैरुपकरणैः परिकरैः

इतरभोग्यभोग्यानां तुच्छत्वं वंरस्वसंपादितानामेव सर्वोत्तमत्वमाह अन्य इति पुरुक्रमस्य भगवतः पादसेवया उद्दिजृंभः विक्षेपः ते न विभ्रंशिनाः
अर्थरचनाः प्रयोजनाभिलाषा ये पुंसे अन्ये पुनः किं तैः किमिति तु कालरयः अर्थः अतो यत्त्वं सिद्धासि पतिपारार्थ्यादिधर्मेण मदनुग्रहविषयासि ततस्त्वं न
रैर्दुरधिगम्याचरुः आर्यान्निजधर्मैः पतिपारार्थ्यादिभिर्दुग्धे तेन प्रपूर्यते सा आद्य इति यावत् ताभिर्भवान् भोगविस्तारान्नृपविक्रियाभिर्न्दपायां सार्व
भौमान्नमयि विक्रिया भोगाभिलाषो यामुताभिर्भेभ्यादिसंपद्भिरिति शेषः भुंक्ष्वानुभव॥ ८॥ तत्रैवमुक्तादेवहूतिस्तमुवाचेत्याह मैत्रेय
ः एकेन एवमिति ब्रुवाणं भाषंते अखिलया योगमायाविचित्रसर्वकारि स्वसंबंधि सामर्थ्यापरंपर्यायाः प्राक्तनः तासां विद्यास्वकार्ये

अन्ये पुनर्भगवतो भ्रुव उद्दिजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य॥ सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान्
दिव्यान्नरैर्दुरधियान्नृपविक्रियाभिः॥ ८॥ मैत्रेय उवाच॥ एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षण
मवेक्ष्य गताधिरासीत्॥ संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाह॥ ९॥ देवहूति
वाच॥ राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः॥ यस्तेऽभ्यधायि समयः सकृदंगसंगो
भूयाद्गरीयसि गुणः प्रसवः सतीनाम॥ १०॥ जननप्रवर्त्तनानुगुणं ज्ञानं न तस्मिन्विचक्षणं निपुणं पतिमवलोक्य देवहूतिर्गताधि
गतमनोव्यथा आसीत्॥ ततः संप्रश्रयः विनयः प्रणयः प्रेम ताभ्यां विह्वलया गद्गदया गिरा वाचा ईषद्व्रीडासहितो योवलोकस्तेन विलस
द्धसितं यस्मिंस्तत् हासननं मुखं यस्याः सा सती आह उवाच॥ ९॥ उक्तमेवाह राद्धमित्याद्धमिति॥ हे द्विजवर अमोघाः सप्रयोजना या योगमा
याः पूर्वोक्तास्तासामधिपे विभौ त्वय्येतत्तव उक्तं सर्वं राद्धं सिद्धमेवेत्यवैमि जानामि॥ वते तिहर्षे हे भर्त्तः ते तव यायः सकृदयत्यजननपर्यं

यसः गरीयस्त्वेनानुसंहितान् यद्वा दैवभावेनानुसंहितात् श्रेष्ठतमात् मनुः भर्तुराशिषमपत्यप्राप्तिरूपामाशिषपुरुषार्थमाशासानां प्रार्थयंती व्रतच
र्यापातातिव्रतेन कर्शितां तत्र तत्रापि भूयसा कालेन क्षामामतिकृशांगीमित्यर्थः ॥५॥ उक्तिमेवाह त्रिभिः हे मानिनि परमया शुश्रूषया परया भ
क्त्या च मपि समानमेव कुर्वन्त्यास्ते तुभ्यमयाधुनाहं तुष्टः प्रीतोस्मि देहिनामतीव सुहृत् प्रियतमो देहः स्वदेहः समुचितः स्नाद्योपि देहः म
दर्थे क्षपयितुं कर्शितुं नावेक्षितः उपेक्षितः उचितमपि देहमनादृत्य मदर्थे क्षपितमित्यर्थः ॥६॥ स्वधर्मनिरतस्य स्ववर्णाश्रमधर्मेषु नि

स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम् ॥ दैवाद्गरीयसः पत्युराशासानां महाशिषः ॥४॥ कालेन भूयसा क्षामां कर्शितां व्र
तचर्यया ॥ प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ॥५॥ कर्दम उवाच ॥ तुष्टोहमद्य तव मानवि मानदायाः शुश्रू
षया परमया परया च भक्त्या ॥ यो देहिनामयमतीव सुहृत्स देहो नापेक्षितः समुचितः क्षपितुं मदर्थे ॥६॥ ये मे स्व
धर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः ॥ तानेव ते मदनुसेवनयावरुद्धान् दृष्टिं प्र
पश्य वितराम्यभयानशोकान् ॥७॥

रतस्य मे मया तपः कर्मयोगः समाधिश्चित्तैकाग्र्यं विद्या भगवदुपासना ॥ आत्मयोगः प्रकृतिविविक्तात्मया
याथात्म्यज्ञानयोगः एतैर्विजिताः लब्धा भगवत्प्रसादहेतुकाः प्रसादा इति पाठांतरं तदा सत्तपआदिभिर्हेतुभिर्यो भगवत्प्रसादस्तस्माद्धेतोः
निर्जिता ये भोग्यभोगोपकरणभोगस्थानादयस्तानेव न विद्यते भयं ध्वंसं तीति अभयं यावद्भोगाभिलाषं येषु तान् ॥ अत एवाशोच्यानित्यर्थः
मदनुसेवनया मत्सेवया ऽवरुद्धानन्त्वया स्वीकृतान्प्रपश्यनेतद्दिव्यां दृष्टिं वितरामि ददामि ननु सर्वोपभोगादीननादृत्य स तपः आदि

एवंवर्णितं मनुचरितं निगमयंस्तद्रूपमचरित्रमनुस्मारयति ॥ एतदिति ॥ वर्णनीयस्य कथनीयकीर्तेरादिराजस्य मनोरद्भुतं विस्मयनीयमेतच्चरित्रं
तेनानुमंवर्णितं मयेति शेषः ॥ अथ तस्य मनोरपत्यं देवहूतिस्तस्या उदयं प्रभवं उत्कर्षं वा शृणु मत्त इति ॥३९॥ इति तृतीये द्वाविंशः ॥२२॥ तदपत्ये
देवहूत्याख्यांकन्यामेव वर्णयितुमारभते मैत्रेयः पितृभ्यामनु शतरूपाभ्यां प्रस्थिते गमनं कृतवति साध्वीङ्गितकोविदा पत्युरभिप्रायज्ञा देवहू
तिः प्रभुं भवं रुद्रं भवानीव पतिं कर्दमं प्रीत्या पर्यचरत्सेवितवती ॥१॥ एतदेव प्रपंचयति द्वाभ्याम् ॥ विश्रंभेण विश्वासेनात्मशौचेनांतःक

एतत्त आदिराजस्य मनोश्चरितमद्भुतं ॥ वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥३९॥ इति श्रीमद्भागवते महापु
राणे तृतीयस्कंधे द्वाविंशोऽध्यायः ॥२२॥ मैत्रेय उवाच ॥ पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा ॥ नित्यं
पर्यचरत्प्रीत्या भवानीव भवं प्रभुः ॥१॥ विश्रंभेणात्मशौचेन गौरवेण दमेन च ॥ शुश्रूषया सौहृदेन वा
चा मधुरया च भोः ॥२॥ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं ॥ अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत्

रणस्य शौचेनेशमेनेत्यर्थः गौरवेण सर्वातिशयबुद्ध्या दमेन बाह्येन्द्रियनिग्रहेण शुश्रूषया हिताहितयोः श्रोतुमिच्छया सौहृदेन मधु
रया वाचा च पतिमतोषयदिति तृतीयेनान्वयः ॥२॥ कामादीन्विसृज्य तत्र दंभः कापट्यम् अघं निषिद्धाचरणं मदो गर्वः ॥ अप्रमत्ता अनवधान
रहिता उद्यता अनिर्वेदा चरणे दक्षा तेजीयांसमतिशयतेजस्विनं ॥ संपत्नं पतिं कर्दमममतोषयत् ॥३॥ स वै देवर्षिवर्यः कर्दमः तामनुकर्तमा
नामानवीं मनोः पुत्रीं देवहूतिं प्रेम्णा गद्गदस्वरया वाचा गिरापीडितैः ॥ अविनिःसृतवाक्कृपयाऽब्रवीत् ॥ कथंभूतां मानवीं देवादपि गरी

तद्विनं यद्यस्मान्नशेकुः न समर्था अतस्तस्य यामा अयातयामा आसन्नित्युत्तरेणान्वयः ॥३४॥ विष्णोः कथाः शृण्वतः ब्रुवतः कथयतः कुर्वतः
भगवदाराधनमिति शेषः ध्यायतः विष्णुमिति शेषः तस्य मनोः स्वांतरं मन्वंतरावच्छिन्नं कालं यापयंतीति ये ते यामाः कालावयवाः प्रहराः अ
यातयामाः सफला आसन् ॥ यामा इत्यनेनैकस्मिन्नपि यामे भगवदाराधनाभावो नाहि संत्वचितम् ॥३५॥ समनुरेवं भगवत्कथाश्रवणकीर्तन
तद्ध्यानतदाराधनादिभिर्युगानामेकसप्ततिपरिमाणं स्वांतरं कालं वासुदेवे प्रसंग आसंगस्तेन परिभूतं गतित्रयं ऊर्ध्वंगच्छंति सत्त्वस्था मध्ये

अयातयामास्तस्यासन्यामाः स्वांतरयापनाः ॥ शृण्वतोध्यायतोविष्णोः कुर्वतोब्रुवतः कथाः ॥३५॥ सएवं
स्वांतरंनिन्ये युगानामेकसप्ततिं ॥ वासुदेवप्रसंगेन परिभूतगतित्रयः ॥३६॥ शारीरामानसादिव्या वैया
सेयेचमानुषाः भौतिकाश्चकथंक्लेशा बाधंतेहरिसंश्रयम् ॥३७॥ यः पृष्टोमुनिभिः प्राह धर्मान्नाना
विधान्शुभान् नृणांवर्णाश्रमाणांच सर्वभूतहितः सदा ॥३८॥ तिष्ठंति राजसा ॥ जघन्यगुणवृत्तिस्था अधोगच्छंति
तामसा इत्युक्तं गतित्रयं येन सः निन्ये यापयामास यद्वा गतयो लोकप्राप्तास्तासां त्रयविरस्ताध्यात्मिकादितापत्रयइत्यर्थः ॥ शत्रुव्याघ्रचो
रसर्पादिभूतप्रभवाः एते आधिभौतिकाः ये च सर्वे मानुषैरनुभाव्याः क्लेशाः हरिः संश्रयः ॥ आश्रयः ॥ आश्रयो यस्य तं कथं बाधेरन्
आश्रितक्लेशहरं भगवतां अयं मनुं न कथंचिदपि बाधेरन्नित्यर्थः ॥३७॥ हरिसंश्रयमित्यनेन सत्त्वचित्तं तस्य ज्ञानाति प्रायमाह य
इति ॥ सर्वभूतहितः यो मनुर्मुनिभिः पृष्टः नृणां तत्रापि वर्णाश्रमाणां चातएव नानाविधान् शुभान् स्वर्गापवर्गसाधनभूतान् धर्मा

ततएवभगवान्मनुः कुशकाशरूपं वर्हिरास्तीर्यतोभगवतोवराहाद्भुवः स्थानंप्रतिष्ठांलब्धावानभूवान् तमेव यज्ञपुरुषमयजत् यज्ञैराराधितवान् अनेनेदमेववर्हिष्मतीशब्दस्य प्रवृत्तिनिमित्तंयत्कुशकाशरूपवर्हिषामुक्तत्वमितिसूक्तं भवति ॥३०॥ विभुर्मनुर्यांवर्हिष्मतीनामपुरीनिर्विश्य पूर्वसमावसत्तस्यांपुर्यामाध्यात्मिकाधिदैविकरूपतापत्रयरहितंभवनंस्वगृहंप्रविष्टःसभार्यः सपुत्रश्चान्याविरोधतः वर्णाश्रमप्रयुक्तभगवदाराधनरूपधर्माविरोधेनकामान्बुभुजेऽनुवभूव ॥३२॥ एतदेवप्रपंचयतिसंगीयमानेत्यादिषड्भिः प्रत्यूषेषुप्रत्यूषतुः

कुशकाशमयंवर्हिरास्तीर्यभगवान्मनुः ॥ अयजद्यज्ञपुरुषंलब्धास्थानंयतोभुवः ॥ ३१ ॥ वर्हिष्मतीनामपुरीयानिर्विश्यसमाविसत् ॥ तस्यांप्रविष्टोभवनंतापत्रयविनाशनम् ॥ सभार्यः सप्रजः कामान्बुभुजेऽन्याविरोधतः ॥ ३२ ॥ संगीयमानसत्कीर्तिः ॥ सस्त्रीभिः सुरगायकैः ॥ प्रत्यूषेष्वनुवद्धेनहृदाशृण्वन्हरेः कथाम् ॥ ३३ ॥ निष्णातंयोगमायासुमुनिंस्वायंभुवंमनुम् ॥ यदाभ्रंशयितुंभोगानशेकुर्भगवत्परम् ॥ ३४ ॥

सस्त्रीभिः स्त्रिभिः सुरगायकैः सुरागंधर्वाकिन्नरादयः तएवगायकास्तैः संयक्गीयमानासतीतिनिर्मलाकीर्तिर्यस्यसोपि अनुवद्धेन प्रेमानुबद्धेनहृदाहरेः कथाः शृण्वन्कामान्वुभुजइतिपूर्वेणान्वयः ॥३३॥ मुनिमुभाश्रयंसंसीलनपरंभगवद्गुणानुचिंतनपरंस्वायंभुवमनुंभोः कामभोगाः योगमायासुभगवदाश्चर्यशक्तिकार्येषुकामेषुनिष्णातमासक्तंयथातथा भ्रंशयितुंईषदपिपा

गच्छंतमनुवर्णयति द्वाभ्यां ऋषिकुल्यायाः ऋषिकुलहितायाः सरस्वत्याः उभयोः सुरोधसोः शोभनतटयोः उपशांतानां शमदयादिगुणसंपन्ना नामृषीणामाश्रमेषु संपदः भगवदाराधनोपयुक्ताः तुलसीपुष्पफलादिसमृद्धीः पश्यन् तस्य इति पूर्वेणान्वयः ॥२७॥ आयांतमागच्छंतं पतिमनुमभिप्रेत्य ज्ञात्वा प्रजाः प्रहर्षिताः ब्रह्मावर्ताद् गीतसंस्तुतिमृदंगादिवाद्यध्वनिभिः प्रत्युजग्मुः ब्रह्मावर्ता निति द्वितीयांत पाठे ब्रह्मावर्तान् आयांतमित्यन्वयः प्रजापतिमिति समस्त पाठे प्रजानां पातिं तं मनुं ब्रह्मावर्तस्यालोकाः प्रत्युदीयुरित्यन्वयः ॥२८॥ का

उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ॥ ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः ॥२७॥ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजाः पतिं गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः ॥२८॥ बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता ॥ न्यपतन्यत्र रोमाणि यज्ञस्यांगं विधुन्वतः ॥२९॥ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीजिरे ॥३०॥ सो पुरीं यां प्रत्यस्थोदित्युक्तमिमत्राह बर्हिष्मती नाम पुरी कथंभूता सर्वाभिः संपद्भिरैश्वर्यैः युक्ताः सा पित्कुतेत्यत आह यत्र यस्यादिवराहस्यांगं शरीरं विधुन्वतः कंपयतः सतः रोमाणि तनूरुहाणि यत्रापतंस्तत्रेम र्थः ॥२९॥ पतितानि रोमाणि किं जातानीत्यत्राह ॥ तान्यवपतितानि रोमाणि शश्वदाह रिहर्णा कुशाः काशाश्चासन् तत्र जाताः किं तेषामु पयोग इत्यत्राह यैः कुशैः काशैश्च यज्ञघ्नान् यज्ञविरोधिनो राक्षसान् पराभाव्य यज्ञमीजिरे कृतवंतः पाकं पचतीतिवन्निर्देशः ॥ यद्वा यज्ञं भगवंतं ईजिरे इष्टवंतः भगवदाराधनयज्ञेषूपयुक्ता इत्यर्थः ॥३०॥

न्वविदुरकर्दमयदेवहूत्येवावभाषेउक्तवान् ॥ अनंतमरविंदनाभंभगवंतंधियोपगच्छन्नचिंतयन्नतस्तूष्णींमौनेनासीत्स्थितवान्मंदहासेनशोभि
तंयन्मुखंतेनदेवहूत्याश्रितंलुलुभेमोहितमभवत् ॥२१॥ अतोनंतरंसमनुःमहिष्याभार्ययायाःदुहितुश्चव्यवसितंनिश्चितंनिस्फुटंव्यक्तंय
थातथाज्ञात्वागुणगणैराढ्यायपुंकायतस्मैकर्दमायतुल्यावयःशीलादिभिस्तुल्यांप्रहर्षितःसंहृष्टोदत्तवान्प्रधर्षितइतिपाठेगुणविवश
इत्यर्थः ॥२२॥ महाराजस्यमनोस्तनयाप्रातरूपापारिवर्हानुयायनरूपान्भूषादीन्वासांसिवस्त्राणिपरिच्छदाःक्रीडोपकरणानिवर्हंपत्योर्दु

सोऽनुज्ञात्वाव्यवसितंमहिष्यादुहितुःस्फुटम् ॥ तस्मैगुणगणाढ्यायददौतुल्यांप्रहर्षितः ॥२२॥ शतरूपामहा
राज्ञीपारिवर्हान्महाधनान् ॥ दंपत्योःपर्यदात्प्रीत्याभूषावासःपरिच्छदान् ॥२३॥ प्रत्तांदुहितरंसम्राट्सदृक्षा
यगतव्यथः ॥ उपगुह्यचबाहुभ्यामौत्कंठ्योन्मथिताशयः ॥२४॥ अशक्नुवंस्तद्विरहंमुंचन्बाष्पकलांमुहुः
आसिंचत्तववत्सेतिनेत्रोदैर्दुहितुःशिखाः ॥२५॥ आमंत्र्यतंमुनिवरमनुज्ञातःसहानुगः ॥ प्रतस्थेर
थमारुह्यसभार्यःस्वपुरंनृपः ॥२६॥

हितृजामात्रोःपर्यदात् ॥२३॥ सदृक्षायसदृशायप्रत्तांदत्तांदत्तादुहितरंसम्राट्मनुःगत
व्यथःनिरस्तदुहितृपतन्वेयदुःस्वंबाहुभ्यामुपगूह्यालिंग्यऔत्कंठ्येनपुत्र्यांप्रेमातिशयेनउन्मथितःक्षुभितःआशयोंतरणंयस्य
स्यसः ॥२४॥ अतएवतस्यादुहितुर्विरहंविश्लेषमशक्नुवन्सोढुमितिशेषः ॥ अतएवमुहुःवाष्पकलाः ॥ नेत्रांबुकणान्मुंचन्हेअंब
हेवत्सेतिसंबोधयन्नेत्रजलैर्दुहितुःशिखामासिंचत् ॥२५॥ मुनिवरंकर्दममामंत्र्यानुज्ञाप्यतेनानुज्ञातःसभार्योरथमारुह्यनृपोमनुः

सहानुगःस्वपुरंप्रतिप्रतस्थेइत्यन्वयः ॥२६॥

अतउक्तहेतुभ्यः सेयमनजः वीर्यं यावद्विभृयात्तावता समयेन कालेन साध्वीमिमां नाभिप्रेष्यस्वीकरिष्ये॥ अपत्यजननावधिकीकरिष्यत्यर्थः
अत अनंतरं पारमहंस्ये परमहंसाश्रमे मुख्याः प्राधान्येनोपादेयाः शुक्लेन भगवता प्रोक्तान् विहिंस्रान् हिंसारहितान् सात्विकान् धर्मान् विवे
कविमोकादीन् बहु मन्ये अनुष्ठास्यामि अपत्योत्पत्त्यनंतरं निवृत्तिधर्मनिष्ठास्यामि॥ अपत्योत्पत्त्यनंतरं निवृत्तिधर्मनिष्ठोहं इमां प्रक्ष्मा
मीति भावः॥३१॥ अयं भाषावंधो न केवलं मयैव कृतः॥ किंतु समस्तजगदुदयविभवलयलीलेन भगवतैव निर्दिष्ट इत्याह यत इति
एवं देवतिर्यङ्मनुष्यस्थावरादिभेदेन विचित्रं विश्वं यतो भगवतः॥ अभवदुदपद्यत यत इति हेतौ पंचमी हेतुत्वस्य निमित्तोपादान

अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे॥ अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान् बहु
मन्येविहिंस्रान्॥३१॥ यतोभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते॥ प्रजापतीनां पतिरेष मह्यं प
रं प्रमाणं भगवाननंतः॥३२॥ मैत्रेय उवाच॥ स उग्रधन्वन्नियदेवाबभाषे आसीच्च तूष्णीमरविंदनाभम्
धियोपगृह्णन्स्मितशोभितेन चेतो लुलुभे देवहूत्याः॥३३॥

साधारणत्वान्नया च यतो निमित्तभूतादुपादानभूताच्चेत्यर्थः॥ य
त्र यस्मिन्कारणभूते भगवति संस्थास्यते संहारं यास्यति यत्र यस्मिन्नंतः प्रविश्य प्रशासनेन धारके भगवति प्रशासनितव्यत्वेन धार्यत्वेन
धार्यत्वेन चावतिष्ठतेति स एष प्रजापतीनां ब्रह्मादीनामपि पतिरनंतः सत्यं ज्ञानमनंतमिति उक्तलक्षणो भगवान् परं केवलं प्रमाणं अस्मदुक्त
भाषावंधे प्रमाणमित्यर्थः तथैव भगवताभिहितं नेहृदयमिमारभ्येति भावः॥३२॥ कर्दमोक्तिमुपसंहरति मैत्रेयः स इति हे उग्रधन्व

हेनारेवनेतवास्याः पुत्र्याः यः समाम्नायविधौ वेदरूपचोदनायां प्रतीतः प्रख्यातः स कामः विवाहः भयात् एवं तद्विज्ञापितमनुमन्यनाईत्तस्मोहहते
नप्रहंतस्मोहतिगरहीष्याम्यपितस्याः सौदर्यवयः शीलादीन् श्रुत्वास्यामेव कृतनिश्चयः ॥ भगवन्नादिष्टप्रतीक्ष इति वदन्तां वर्णयति
क इत्यादिना तेमार्वभौमस्मनवतनयां को नाम नाद्रियेत ॥ कथंभूतां स्वयैवाभरणादिभिर्विना कांत्या सौदर्येण श्रियं भूषणादिकृतशोभां
क्षियतीमिव स्थितां भूषणांगीमित्यर्थः ॥ १६ ॥ किंच हर्म्यपृष्ठे प्रासादोपरि क्वणतोर्नूपुराभ्यां शब्दं कुर्वतो रंघ्रोः पादयोः शोभा यस्यास्तां वि

कामः सभयात्वरदेवतेः स्यापुत्र्याः समाम्नायविधौ प्रतीतः ॥ क एव तेतनयां नाद्रियेत स्वयैव कांत्या क्षियतीमिव
श्रियम् ॥ १६ ॥ यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविक्लवाक्षीम् ॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्वि
लोक्य संमोहविमूढचेताः ॥ १७ ॥ तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टाम् वत्सां ममेमां स
वपदः स्वसारं को नानुमन्येत बुधोभियाताम् ॥ १८ ॥ क्रीडतीं कंदुके विकले चंचले अक्षिणी यस्यास्तां यां नवकन्यां विलो
क्य संमोहेन विमूढं व्याकुलं चित्तं यस्य सः ॥ विश्वावसुर्नाम कश्चिद्गंधर्वः स्वाद्विमानादपतत्तस्मा पतत्तां को नानुमन्येतेत्युत्तरेणान्वयः
१७ ॥ पुनः कथंभूतां प्रार्थयंतीं यतिमितिशेषः ललनानां ललामं योषितां श्रेष्ठं भूषणभूतां श्रेष्ठामित्यर्थः ॥ असेविनावनुपासितौ र
श्रियो लक्ष्म्याश्चरणौ यैस्तैरदृष्टां हे मनो कां मनोस्तव वत्सां पुत्रीं उत्तानपदः तव पुत्रस्य भगिनीं स्वयमेव प्राप्तां बुधः कुशलः कोना
नुमन्येत नानुमन्येत नांगीकुर्यात् ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰ टी॰

तस्माद्देहि जाग्र्यमया श्रद्धयोपाहृतां समर्पितां नवृग्रहमेधस्योपयुक्तकर्मसु सर्वात्मना सर्वप्रकारैरनुरूपामनुकूलामिमां कन्यां प्रतीछ प्रतिगृहा
ण ॥११॥ प्रतिग्रहप्रसंगस्यानशंकयातं प्रोत्साहयन्नाह त्रिभिः उद्यतस्य हि दैवात्स्वतः प्राप्तविषयस्य कामस्याभिलाषस्य प्रतिवादः प्रत्याख्या
नं निर्मुक्तसंगस्यापि न शक्यते कर्तुमिति शेषः कामासक्तस्य किंपुनः प्रतिवादो न शक्यत इति किं पुनर्वक्तव्यमित्यर्थः ॥१२॥ प्रतिवादे दोषं
माह य इत्यत्राह यः पुमानुद्यतं काममनादृत्य पश्चात्कृपणाशं कृपणामभियाचते स्फीतं प्रवृद्धमपि तस्य पुंसो यशः क्षीयते नश्यति अव

तस्मात्प्रीतो द्विजाग्र्येमां श्रद्धयोपहृतां मया ॥ सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ॥११॥ उद्यतस्य हि कामस्य प्रतिवा
दो न शस्यते ॥ अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः ॥१२॥ य उद्यतमनादृत्य कीनाशमभियाचते ॥ क्षीय
ते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥१३॥ अहं त्वाश्रृणवं विद्वन्विवाहार्थं समुद्यतम् ॥ अतस्त्वमुपकु
र्वाणः प्रत्तां प्रतिगृहाण मे ॥१४॥ ऋ रु च बाढमुद्वोढुकामोहमप्रत्ता च तवात्मजा ॥ आवयोरनुरूपोसावा
द्यो वैवाहिको विधिः

ज्ञया परावमानेन मानः बहुमानश्च हतः विनष्टो भवेत् ॥१३॥ ननु समं त्वद्युक्तं सर्वपरिवोढुकामस्याहं तु न तादृश इ
त्यत्राह ॥ अहमिति ॥ हे विद्वन्त्वामुद्वाहार्थं समुद्यतं यतमानमहमश्रृणवं श्रुतवान् ॥ अतस्तस्मादुपकुर्वाणः नैष्ठिकेतर ब्रह्मचारी सा
वधिकब्रह्मचर्यवान्त्वं मे मया प्रत्तां दत्तां कन्यां प्रतिगृहाण ॥१४॥ एवं मनुना विज्ञापितः कर्दमस्तद्युक्तमंगीकुर्वन्नाह ॥ बाढमिति ॥ ऋष
िः बाढमित्यंगीकारे अहमुद्वोढुकामः परिणेतुकामः तवात्मजा पुत्री अप्रत्ता कस्मैचिदप्रतिश्रुता चात आवयोरनुरूप आद्यः आ

अकृतात्मनामकृतसुकृतानां दुर्दर्शः दृष्टमात्रयो भगवान्मे मया दिष्ट्या सम्प्रापेन दृष्टः ॥ भवतः शिवं मंगलकरं पादरजमे शीर्ष्णा शिरसा स्पृ
ष्टं नम् ॥ ६ ॥ अनुशिष्टोनुशिक्षितः महाननुग्रहोनुशासनादिरूपः त्वयाकृतः ॥ अपावृतैः रन्ध्रैः कर्णरंध्रैरुशतीरुशत्यः कमनीयाः
गिरः दिष्ट्या जुष्टाः ॥ ७ ॥ एवमात्मनः कृतार्थतामावेद्य तं प्रसादयन्स्वाभिप्रेतं निवेदयति । स इति सप्तभिः दुहितरि स्नेहेन परिक्लिष्टः आत्मा
मनो यस्य तस्यात एव दीनस्य मम मया श्रावितं विज्ञापितं स भगवान्कृपया श्रोतुमर्हसि ॥ किं तदित्यत्राह द्वयं देवहूतिः प्रियव्रतोत्तान

दिष्ट्या मे भगवान्दृष्टो दुर्दर्शो योऽकृतात्मनाम् ॥ दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवम् ॥ ६ ॥ दिष्ट्या त्वयानुशि
ष्टोहं कृतश्चानुग्रहो महान् ॥ अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ॥ ७ ॥ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो
मम ॥ श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम ॥ अन्विच्छती पतिं युक्तं
वयः शीलगुणादिभिः ॥ ९ ॥ यदा तु भवतः शीलश्रुतरूपगुणो वयान् ॥ अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्च
या ॥ १० ॥

पदोः स्वसा भगिनी मम दुहिता ॥ प्रियव्रतोत्तानपादोः स्वसेत्यनेन पुत्रीकरणशंका निरस्ता ॥ मम दुहितेत्यनेन क्षत्रियकन्यात्वं योग्यत्वं द
र्शितम् ॥ वयः शीलादिभिर्युक्तं पतिमन्विच्छतीत्यनेन स्वयंवरेति सूचितं ॥ ९ ॥ तदेव विशदयति ॥ यदा तु यदैव भवच्छीलादीन्नार
दोपदेशाद् श्रवणेन त्वय्येव त्वयि कृतः निश्चयः त्वं वै वाहं भर्त्तेति निश्चयो यया सा तथा ॥ १० ॥ ७ ॥ ७ ॥ ७

उक्तिमेवाह त्रयोदशभिः मदीयेयं कन्या परिणीयेति विज्ञापयिष्यंस्तावद् घुम्नः स्मरत्स्वं वंश धर्मं स्वैरेण ब्रह्मणा पूर्वमेव संघटितः इत्याह मनुः ब्रह्मे तिसार्धद्वयेन छंदोमयो वेदः स चतुरः ब्रह्मास्यमुखात्त्रयः कर्मयोगाः विद्याभगवदुपासनीयोगो ज्ञानयोगः एतैर्युक्तान् अलं पटान्विषयेष्व नात्मनान् युष्मान्वेदमयान् ब्राह्मणानात्मपरीप्सया वेदमयस्यात्मनः रिरक्षया आत्मज्ञान श्रद्धया वा ब्रह्मशरीरकः परमात्ममुखा दसृजत ॥१॥ तेषां ब्राह्मणानां त्राणपरक्षणायास्मात् क्षत्रियान्सहस्रपात्सर्वतः पाणिपादादिकार्यकर्ता भगवान् हरेः सहस्राङ्गुज

मनुरुवाच ॥ ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया ॥ छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् ॥२॥ तत्त्राणायासृजच्चास्मान्दोः सहस्रात्सहस्रपात ॥ हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ॥३॥ अतो ह्यन्योऽन्य मात्मानं ब्रह्म क्षत्रं च रक्षतः ॥ रक्षति स्माव्ययो देवस्सयसदसदात्मकः ॥४॥ तव संदर्शनादेव छिन्ना मे स र्वसंशयाः ॥ यत्स्वयं भगवान्प्रीत्या धर्ममाह रिरक्षिषो ॥५॥ सहस्रादसृजत् तस्य ब्रह्मणः हृदयं ब्रह्मकुलं क्षत्रं क्षत्रियकु लमंगं प्रचक्षते ॥३॥ अतो वेदपालनाय ब्राह्मणान् ब्राह्मणपालनाय स्मान्स्वयमेव स्वयं ननतः ब्रह्म क्षत्रं वा सत्त्वं चान्यान्यं मिथः आत्मानं रक्षतः एवं परस्परं रक्षितृणमाणो उभयमपि सदसदात्मकः कार्यकरणरूपः एव मप्यव्ययः कार्यगतविकारैरस्पृष्टः य दा सदसदात्मकः चेतनाचेतनशरीरक अतएवाव्ययः ॥ नहीशरीरगतैः विकारैः सरीरस्पृश्यते यो देवः स रक्षति ॥४॥ तस्मै स्वाभि प्रायं निवेदयितुकामः तद्दर्शनादिकं स्तौति त्रिभिः तद्दर्शनादेव मे सर्वसंशयाः एष आर्येविषयाछिन्ना हे भगवन्कई मम द्यस्मात्

स्वसैन्यानां चरणैः क्षुण्णं संघट्टितं भुवो मंडलं वेपयन् कंपयन् महतीं सेनां विकर्षन्सूर्य इव यर्हि न पर्यटसे ॥५३॥ तथैव वर्णाश्रमप्रयुक्ता भगवता रचि
ता कल्पिताः सर्वे सेतवः धर्ममर्यादाः हे राजन् दस्युभिः धर्मविरोधिभिर्भिद्येरन् त्वं स्वपेः न वर्तेति खेदे ॥५४॥ व्यंकुशैः निःप्रतिपक्षैः लोलुपै
ः केवलमर्थकामपरायणैः नृभिरधर्मश्च समेधेत वर्द्धेत त्वयि शयाने सति अयं लोकः दस्युग्रस्तः विनंक्ष्यति नशिष्यति ॥५५॥ अतो लोक
रक्षणमेव त्वदटनस्य प्रधानं प्रयोजनम् तथापि हे वीर त्वं यदर्थमिहास्मदाश्रमे आगतः तत्प्रयोजनं त्वां प्रतिपृच्छे वयं न त्वदागम

स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः ॥ विकर्षन्महतीं सेनां पर्यटस्यंशुमानिव ॥५३॥ तथैव सेतवः सर्वे वर्णाश्रम
निबंधनाः ॥ भगवद्रचिता राजन्भिद्येरन्बत दस्युभिः ॥५४॥ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः ॥ शया
ने त्वयि लोकोऽयं दस्युग्रस्तो विनंक्ष्यति ॥५५॥ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः ॥ तद्वयं निर्व्यलीकेन
प्रतिपद्यामहे हृदा ॥५६॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कर्दम व प्र ना क विंशोऽध्याय ॥२१
मैत्रेय उवाच ॥ एवमाविष्कृताशेषगुणकर्मोदयो मुनिम् ॥ सव्रीड इव तं सम्राडुपारतमुवाच ह ॥१॥

तत्प्रयोजनं निर्व्यलीकेन निष्कपटेन हृदा पवित्रेण प्रतिपद्यामहेऽङ्गीकुर्महे ॥५६॥ इति श्रीवीरराघवविरचिते तृतीयेमेकविंशोध्यायः ॥२१॥ एवं
कर्दमेनोक्तो मनुस्तमुवाचेत्याह मैत्रेय ॥ एवमिति ॥ आविष्कृतानां गुणानां कर्मणां च उदय उत्कर्षो यस्य स अत एव सव्रीड इव स्वकीर्तिश्र
वणाल्लज्जित इव सम्राट् मनुरुपारतं निवृत्तधर्मनिष्ठं तं मुनिमुवाच हेति हर्षे ॥१॥

गृहीतप्रतिगृहीतमर्हणपूजनं येन तमासीनमुपविष्टं संयतं स्ववाक्यश्रवणेन सम्यक्पतमानं मुनिः कर्दमः श्लक्ष्णया मधुरया गिरा स्वागत
प्रश्नरूपया वाचा नृपं प्रीणयन् तर्पयन्निति विवक्ष्यमाणप्रकारेणाह जगाद ॥४९॥ हे देव मनो तेनव चंक्रमणं पर्यटनं सतां रक्षणाय असतां
वधाय च यद्यस्मात्त्वं पालिनी जगत्पालिनी हरेर्भगवतः शक्तिः हरेर्जगत्पालकशक्तियुक्तस्त्वमित्यर्थः प्रसंगात्स्तं तं भगवंतं प्रणमति
यइति यो विभुरर्कादीनां रूपाणि भिन्नापुत्रकस्येदं शरीरमिति वदभेदसंसर्गे षष्ठी ॥ अर्कादिरूपाणि सरीणिस्थाने नं तत्र द्वचितजगत्य

गृहीतार्हणमासीनं संयतं प्रीणयंमुनिः ॥ स्मरन्भगवदादेशमित्याह श्लक्ष्णया गिरा ॥४९॥ कर्दम उवाच ॥
नूनं चंक्रमणं देव सतां संरक्षणाय ते ॥ वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ॥५०॥ योऽर्केन्द्वग्नीन्द्र
वायूनां यमधर्मप्रचेतसाम् ॥ रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ॥५१॥ न यदा रथमास्थाय
जैत्रं मणिगणार्पितम् ॥ विस्फूर्जंश्चंडकोदंडो रथेन त्रासयन्नघान् ॥५२॥

रिपालनावसरे आधत्से बिभर्षि
तस्मै विसत्त्वे शुक्लाय निर्मलाय ते तुभ्यं भगवते नमः ॥५१॥ एवं विष्णुं प्रणम्य मुनिर्मनोरागमनप्रयोजनं प्रष्टुकामः प्रथमं तत्प्रश्नेन
जगद्रक्षणाय पर्यटनं मां किमर्थमागतोसीति किं पृच्छसीति मा वादीत् इत्यभिप्रायेण प्रधानप्रयोजनं जगद्रक्षणमेवानुषंगिकमिहाग
मनप्रयोजनं यत्किंचिदस्ति चेत्कथ्यतामित्याह यावदध्यायसमाप्ति नेति ॥ न यदा जैत्रं जयशीलं मणिगणैरर्पितं स्वचितं रथमास्था
याधिरुह्य चंडः परेषां भयजनकः कोदंडो धनुर्यस्य सः विस्फूर्जन्कोदंड इति शेषः द्वितीयांतपाठे तु कर्मधारयः चंडकोदंडं वि

॥१४२॥

कारंडवादिभिः पक्षिभिः वल्गुमधुरं मुहुरयं यथा तथा कूजितम् ॥४३॥ तथाहरिणादिभिर्मृगैर्वृतं तत्र क्रोडः सूकरः श्वाविच्छल्यकः मर्कोमर्क
टः ॥ तद्विशेषो गोपुच्छः हरिः सिंहः नाभिः कस्तूरीमृगः ॥४४॥ महानुगः सम्भृतः अद्रिराजो मनुः तत्तीर्थश्रेष्ठं प्रविश्य तस्मिंस्तीर्थे हुतः हु
ताशनो येन तं कृताग्निकार्यमित्यर्थः ॥ आसीनमुपविष्टं मुनिं ददर्श ॥४५॥ पुनर्मुनिं विशिनष्टि सार्द्धद्वयेन ॥ तपसि चिरमुग्रो युग्यो योगो प्रस्
तेन वपुषा विद्योतमानं भगवतः स्नेहयुक्तं यद्दृश्यांगावलोकनं कटाक्षप्रसरणं तस्मात्तस्य भगवतो आहृतं भाषणमेवामृतमयस्यचं

कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥४३॥ तथैव हरिणैः क्रोडैः
श्वाविद्गवयकुंजरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥४४॥ प्रविश्य तत्तीर्थवरमाद्रिराजः सहानुगः
ददर्श मुनिमासीनं तस्मिन्हुतहुताशनम् ॥४५॥ विद्योतमानं वपुषा तपसुग्रयुजा चिरम् ॥ नातिक्षामं भ
गवतः स्निग्धापांगावलोकनात् ॥४६॥ तद्व्याहृतामृतकलापीयूषस्रवणेन च ॥ प्रांशुं पद्मपलाशाक्षं जटिलं ची
रवाससम् ॥ उपसंसृत्य मलिनं यथार्हणमसंस्कृतं ॥४७॥ अथोटजमुपायातं नृदेवं प्रणतं पुरः ॥ सपर्यया प्रत्यगृ
ह्णात्प्रतिनंद्यानुरूपया ॥४८॥

ष्यकलातन्मयापीयूषं तस्य स्रवणेन च नातिक्षामं तपसा कृशमपि नातिकृशमित्यर्थः ॥४६॥ प्रांशुं उन्नतं
जटिलं संजातजटं उपसंसृत्य समीपमागत्य मलिनं ददर्शेति पूर्वेणान्वयः अर्ह्यते नेनेत्यर्हणं महारत्नं तद्वदसंनिर्णिक्तं यथा मलिनं भवति त
द्वत् ॥४७॥ अथानंतरं उटजं पर्णशालामुपायातं प्राप्तं पुरः पादयोः समीपे प्रणतं नमस्कुर्वंतं नृदेवमनुप्रतिनंद्याशीर्भिरभिनंद्यानुरूपयास

ष वा यत्तस्मिन्नहनि हे सुधन्वन् विदुर शांतिव्रतस्योपशमं शीलस्य मुनेराश्रमस्थानं प्रति उपायाद्रुयामात ॥ ३७ ॥ आश्रमपदं वर्णयति सप्तभिः
यस्मिन्निति ॥ प्रपन्नवत्सले मे भृशमत्यंतमर्पितया निहितया कृपया संपरीतस्य सम्यक्व्यारितो व्याप्तस्य भगवतो नेत्राद्बाष्पविंदवः आनंदाश्रूणि य
स्मिन्सरस्यपतन् ॥ ३८ ॥ तत्सरः विंदुसरो नाम इति प्रसिद्धं इदमेवं विंदुसरः शब्दस्य प्रवृत्तिनिमित्तं यद्वारि हर्षविंदुनिपतनतो ततरावधित्वमि
ती सर्घः कथमभूतं सरस्वत्या नद्या परिश्रितं वलयितं पुण्यसाधनं शिवं ममृततुल्यं जलं यस्मिंस्तन्महर्षिगणैः सेवितम् हरहरहः पस्यृतत्सर

तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत् ॥ उपायादाश्रमपदं मुनेः शांतिव्रतस्य तत् ॥ ३७ ॥ यस्मिन्भगवतो
नेत्रान्न्यपतन्नश्रुविंदवः ॥ कृपया संपरीतस्य प्रपन्नेर्पितया भृशम् ॥ ३८ ॥ तद्वै विंदुसरो नाम सरस्वत्या परि
प्लुतम् ॥ पुण्यं शिवामृतजलं महर्षिगणसेवितम् ॥ ३९ ॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः ॥ सर्व
र्तुफलपुष्पाढ्यं वनराजिश्रियान्वितम् ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम् ॥ मत्तबर्हिनटाटोपमाह्व
यन्मत्तकोकिलम् ॥ ४१ ॥ कदंबचंपकाशोककरंजबकुलाशनैः ॥ कुंदमंदारकुटजैश्चूतपोतैरलंकृतम् ॥ ४२ ॥

प्लुतं ॥ ३९ ॥ कूजंतः पुण्या मृगा द्विजाः शकुनयश्च येषु तैः पुण्यानां द्रुमाणां लतानां च जालैः समूहैः सर्वर्तुषु षट्स्वृतुषु यानि फलानि पुष्पाणि
वनेराज्या शोभिनी या वनराजिर्वनपंक्तिस्तस्याः श्रिया शोभयाऽन्वितं युक्तं ॥ ४० ॥ मत्ता मधुपानमत्ता ये भ्रमरास्तेषां विभ्रमा विलासा य
स्मिन् मत्ता वर्हिणो मयूरा एव नटास्तेषामाटोपो न्हसमसंभ्रमो यस्मिन्नाह्वयंतो मिथः मत्ताः कोकिला यस्मिंस्तत् ॥ ४१ ॥ कदंबादिभिः पु

एवंकर्दममाभाष्यस्वस्थानंगतिभगवानित्याहमैत्रेयः प्रत्यक्षुप्रत्याहृतेष्विंद्रियेषुजायते आविर्भवतीतिप्रत्यगक्षजोभग क्षजोभगवान्तंकर्द
ममनुभाष्यानंतरंसरस्वत्यानद्यापरिश्रितात्परिवेष्टिताद्बिंदुसरसःबिंदुसरोवरतीर्थस्थात्कर्दमाश्रमाज्जगाम॥३३॥ कथंजगामेत्यत्राह। निरी
क्षतइति॥ तस्यकर्दमस्यनिरीक्षतःपश्यतःसतः अशेषाःसिद्धेश्वरैः॥ सर्वयोगीश्वरैरभिष्टुतः॥ सिद्धस्तुतःसिद्धःमार्गःकल्याणगस्वरूपप्र
कारोयस्यसःपत्ररथेंद्रोगरुडःतस्यपक्षैरुच्चारितंउदीर्णंअतिव्यक्तेसामनीबृहद्रथंतरेयस्मिन्तंस्तोमंसामाम्नामाधारणाभूतमकसमुदायं

मैत्रेयउवाच॥ एवंतमनुभाष्याथभगवान्प्रत्यगक्षजः॥ जगामबिंदुसरसःसरस्वत्यापरिश्रितात्॥३३॥ निरीक्षतस्त
स्यययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः॥ आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितंस्तोममुदीर्णसाम॥३४॥ अथ
संप्रस्थितेशुक्लेकर्दमोभगवानृषिः॥ आस्तेस्मबिंदुसरसितंकालंप्रतिपालयन्॥३५॥ मनुःस्यंदनमास्थायशात
कौंभपरिच्छदं आरोप्यस्वांदुहितरंसभार्यःपर्यटन्महीम्॥३६॥

बृहद्रथंतरेपक्षौस्तोमआत्मेतिश्रुतेः आकर्णयन्श्राव
यन्स्ययौजगाम॥३४॥ गतेभगवतिकर्दमःकिमकरोदित्यपेक्षायामनंतरवृत्तांतमाह॥ अथेत्यादिना शुक्लेभगवतिसंप्रास्थितेसंप्रस्थिते
सम्यक्प्रयातेसतिभगवान्कर्दमऋषिस्तंकालंदिदृक्षुस्वापरप्राप्तइतिदिष्टकालंप्रतिपालयन्प्रतीक्षमाणःबिंदुसरस्तीरेआस्ते
स्मउपविष्टःकिल॥३५॥ मनुःस्वायंभुवःशातकौंभाःसर्वर्णमयाःपरिच्छदाअलंकारायस्मिंस्तंस्यंदनंरथमास्थायाधिष्ठायात्मस्थैर्यः
तत्रस्वांदुहितरमारोप्यसभार्यःशतरूपयासहितःमहींदुहितुःपत्यन्वेषणार्थंपरितःसंचरन्॥३६॥ भगवान्सदहःसमाहितप्रान्चिर्दि

अनंतरसंयोगेद्वितीया॥तेहृदयंचिरंसम्यग्गाढंतेभोगास्तत्राभावस्संवत्संवत्सरपर्यंतंसान्पवधन्पवधन्पकंम्याहेब्रह्मन्त्वामस्मृक्षणवत्का
लंमंस्यिष्यति अनुभविष्यति॥वयामवहुवर्षपर्यंतंकामान्सेवमाना क्षणमात्रमिवानुभविष्यतीत्यर्थः॥२६॥याहेदेवहूतिःतेतयात्मभूतः
मामनाथवंस्यम्निन्वीर्येनवधाप्रसविष्यति तदीयेवीर्येत्वहूतसत्त्वामुनवसुपुत्रीषुकश्यपयःमरीच्याद्योऽजसाम्रु आत्मनःपुत्रान्॥आत्मा
वैपुत्रनामासीतिश्रुतेः आधास्यतिउत्पादयिष्यंति॥२५॥त्वमेममनिदेशमाज्ञांसम्यगनुष्ठायपरिपाल्यउशन्तमःकमनीयमहाराधन

यान आत्मन्यतंवीर्येनवधाप्रशविष्य॥वीर्यंत्वदीयेऋषय आधास्यंत्यंजसात्मनः॥२६॥त्वंचसम्यगनुष्ठायनिदेशं
मेउशत्तमः॥मयीतीर्थीकृताशेषक्रियार्थोमांप्रपत्स्यसे॥३०॥कृत्वादयांचजीवेषुदत्वाचाभयमात्मवान्॥मयात्मा
नंसहजगद्द्रक्ष्यस्यात्मनिचापिमाम्॥३१॥सहाहंस्वांशकलयात्वद्वीर्येणमहामुने॥तवक्षेत्रेदेवहूत्यांप्रणे॥
ष्येतत्त्वसंहिताम्॥३२॥निष्टःमपितीर्थीकृतः॥तीर्थशब्देनपात्रमुच्यतेतेनहार्तंलक्ष्यते॥तीर्थीकृतःसमर्पितः अशेषक्रियार्थःसमस्त
क्रियाफलंयेनसमांप्रपत्स्यसेप्राप्स्यसि॥३०॥आत्मवान्जितांतःकरणस्त्वंभूतेषुचराचरात्मकेषुदयांकृत्वाऽभयंचदत्वामय्यंतःप्रविष्यधा
रकेमपिकृत्स्नंचराचरात्मकंजगदात्मानचसहैवद्रक्ष्यसिव्याप्तंधार्यंचद्रक्ष्यसिव्याप्तंधार्यंचद्रक्ष्यस्यात्मनिधार्येस्वात्मनिचमांधारकंव्यापकं
चद्रक्ष्यसीत्यर्थः॥३१॥स्वांशकलयास्वांशेनहाहंचत्वद्वीर्येणाधारभूतेनहेमहामुनेतवक्षेत्रेक्षेत्रभूतायांदेवहूत्यामवतीर्य तिशेषःतत्त्व
संहितांतत्त्वानाप्रकृतिपुरुषेश्वराणांस्वरूपंविवेचनींसंहितांप्रणेष्यकथयिष्यामि॥३२॥

॥१५०॥

हेप्रजाध्यक्षमदर्हणंमदाराधनंजातुकदाचिदपिहिव्यर्थंनस्यात्एवमपिसंगृहीतःसम्यग्गृहीतःएकाग्रीकृतःआत्मामनःयैस्तेषुभवद्विधेषुभ
वादृशेषुसुतरामपिमदर्हणंनमृषैवस्यात्संगृभीतात्मनामितिपाठेतुसंगृभितात्ममदर्हणंनमृषैवभवद्विधेषुसुतरामपिनमृषैवेतियोज्यं
२४॥यःप्रजापतेर्ब्रह्मणःपुत्रःसम्राट्सार्वभौमोविख्यातःमंगलंमंगलाचारोयस्यसश्रौतस्मार्तसदाचारनिष्ठोमनुःस्वायंभुवमनुःब्रह्मावर्त्तं
ब्रह्मावर्त्ताख्यंदेशमध्यवसन्अधिष्ठायवसन्सप्तअर्णवाःसमुद्राःयस्यांतांमहींपृथ्वींशास्तिधर्मतःपालयति॥२५॥सचराजर्षिर्मनुःशतरूप

नैवंजातुमृषैवस्यात्प्रजाध्यक्षमदर्हणं॥भवद्विधेष्वतितरांमयिसंगृहीतात्मसु॥२४॥प्रजापतिसुतःसम्राट्मनुर्वि
ख्यातमंगलः॥ब्रह्मावर्त्तंयोधिवसन्शास्तिसप्तार्णवांमहीं॥२५॥सचेहविप्रराजर्षिर्महिष्याशतरूपया॥आ
यास्यतिदिदृक्षुस्त्वांपरश्वोधर्मकोविदम्॥२६॥आत्मजामसितापांगींवयःशीलगुणान्वितां॥मृगयंतीं
पतिंदास्यत्यनुरूपायतेप्रभो॥२७॥समाहितंतेहृदयंयत्रेमान्परिवत्सरान्॥सात्वांब्रह्मन्नृपवधूःकाममाशुभ
जिष्यति॥२८

याशतरूपाख्ययामहिष्याभार्ययायासधर्मकोविदःधर्मेषुमहाराधनरूपेषुकुशलःत्वांदिदृक्षुःद्रष्टुमिच्छुःपरश्वःइतोना
गतेद्वितीयेह्न्यागमिष्यति॥२६॥आयातुममकिमित्यतआह॥असितापांगीमतिनीलकनीनिकायुक्तनेत्रीवयसाशीलेनस्वभावेनसद्गुणा
चगुणैर्जितेंद्रियत्वादिभिश्चान्वितांयतीस्वानुरूपंभर्त्तारंमृगयंतीदूतप्रेषणादिभिःपरिशीलयंतीमात्मजांदेवहूत्याख्यांतनयामनु
रूपायवयःशीलादिभिःरनुरूपायतेतुभ्यंदास्यति॥२७॥हेप्रभोवशेषप्रिययत्रयस्यांमनुकन्यायांइमान्यावतःपरिवत्सरान्संवत्सरान्

विप्रेरेण भगवान् विज्ञप्तिः तः हृदः मयेति शेषः नंदेवानुग्रहाय त्वमरप्रायणरूपानुग्रहार्थं भवानस्तुस्मादितिनिश्चिनोमीत्यध्याहारः अस्त्विति
पावेतु क्रियापदमात्रमध्याहर्तव्यम् ॥ २० ॥ ननु स्वात्मानुभवानंदपूर्णमुदासीनं मां कथं जगत्कारणं प्रतिपादितवानसीत्याशंकां परिहरन्
स्तुतिमुपसंहरति ॥ नमस्तस्मै इदनुग्रहैकनिरंतं त्वामभीक्ष्णं पुनः पुनः नमामि ॥ कथंभूतमनुभूत्या स्वात्मानुभवेन उपरतः अनपेक्षितः ।
क्रियार्थः ॥ जगद्व्यापाररूपक्रियाप्रयोजनं यस्य तमपि स्वमायया स्वलीलांसंकल्पमात्रेण वर्त्तितंलोकतंत्रंजगद्व्यापारो येन तम् ॥ अ

नंत्वानुभूत्योपरतक्रियार्थं स्वमायया वर्त्तितलोकतंत्रं ॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षं ॥ २१ ॥
मैत्रेय उवाच ॥ इत्यप्रतीकं प्रगृणतो जनार्दनः स्त्वमावभाषेव च सामृतेन ॥ सुपर्णपक्षोपरि रोचमानः प्रेमास्मितोद्वी
क्षणविभ्रमद्भ्रूः ॥ २२ ॥ श्रीभगवानुवाच ॥ विदित्वा तव चैत्यं मे पुरैव समयोजि तत् ॥ यदर्थमात्मनियमैस्त्वयैवाहं स
मर्चितः ॥ २३ ॥
सायसिस्वल्पमप्यस्य धर्मस्य त्रायतेमहतोभयात्मुक्तिरीमार्ईपन्नवदीयाराधनं कुर्वमपि पुरुषे कामान्वर्षतीतितथा
तं ॥ अल्पावनमनीयं पारसरोरुहं यस्य तम ॥ २१ ॥ एवं कर्दमेन स्तुतः तेन निवेदिताभिप्रायं स्वभगवांस्तमुवाचेत्याह ॥ मैत्रेय इत्येवं वलीकं
विगतालीकं सत्यं यथा तथा ॥ अथवालीकमितिपाठेप्ययमेवार्थः प्रगृणतः प्रकृष्टगुणविशिष्टत्वेन स्तुतः सुपर्णस्य गरुडस्य पृष्ठोपरिस्कं
धदेशे रोचमानः प्रकाशमानः प्रेमास्मितेन उद्वीक्षणेन च विभ्रमंत्यस्य सो भ्रुवनाभो भगवानमृततुल्येन वचसा ॥ तं कर्दमं प्रत्याबभाषे
उवाचेत्यर्थः ॥ २२ ॥ उक्तिमेवाह इदाभिः ॥ विदित्वेति ॥ तव चैत्यमभिप्रायं विदित्वा मे मया तत्त्वदभिप्रेतं पुरैव समयोजि संघटितं ॥ किंत

हिमत्राह ॥ यदर्थं यत्कृमालाभार्थमात्मनो नियमैः श्रमैः
माहिमिः त्वया इहमेव समर्चितः सम्यगाराधितः ॥ २३ ॥ ॥ २३९ ॥

शक्त्यंतरात्वाह यच्छक्तिद्वया अनयोर्योगमायया स्वशरीरभूतया द्वारेण आत्मन्यधिस्वात्मन्येवाह ॥ नामरूपविभागार्हं चेतनाचेतनात्मकं जग
गत्सृजसि पासि रक्षसि पुनर्ग्रसिष्यसे हरति ॥ मायाद्वारेणात्मसृजसीति सद्वारकापादानत्वकथनेन सर्गाद्यत्र विकाराणां द्वारभूतप्रकृतिगतत्वा
द्वगमात् ॥ निर्विकारश्रुतिविरोधः परिहृतः आत्मनि सृजसीत्यनेनाधारांतराभावात्त्रिः तथा च श्रुतिः ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावा
पृथिवी निष्टतक्षुरिति ॥ अनया श्रुत्याभिन्निमित्तमुपादानमाधार उपकरणानि च स्वयमेवेत्युक्तम् ॥ तदेवोर्णनाभिदृष्टांतेन स्पष्टयति भग
वन् ऊर्णनाभो यथा स्वमनः ऊर्णनाभिर्लूतात्संतन्वानः कीटविशेषः स यथा स्वशक्त्या सृजते तं तु निर्विशेषः पुनर्ग्रसिष्यति तथा त्वमपि स्व
शक्तिभिरेव स्वाश्रयशक्तिद्वविशेषणाभ्यां तैः प्रकृतिपुरुषकालसर्वज्ञत्वसर्वशक्तित्वादिभिः सृजसि रक्षसि पुनः संहरसीत्यर्थः तस्माज्ज

नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं ॥ अनुग्रहायास्त्वयि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः
॥२०॥

गत्कारणमात्मैनत्वं तु मत्वा मेव कामलोकाननुसरन्परिबोद्धुकाम उपेयिवानहमिति भावः ॥ २९ ॥ ननु कुत एतत्केचित्कामकामिनो
ऽप्येवं त्वत्पदाभिलाषिणः इत्यत्राह ॥ नैतदिति ॥ हे अधीश यन्मायया प्रकृत्या स्वसंकल्पेन वाहमहंकारं तस्माद्भूतसूक्ष्मं भूतान्याकाशादीनि तस्य
आकाशादीनि च तनुषे सृजसि भूतसूक्ष्ममिति समाहारद्वंद्वः ॥ नस्तनुषे भूतसूक्ष्ममिति पाठे तु भूतानां सूक्ष्मं कारणमहंकारमित्यर्थः
कारणान्हि कार्यीभूतसूक्ष्ममिति सूक्ष्मशब्देनाहंकार उक्तः मायया भूतसूक्ष्मं सृजसीति यत्तेन ते पदं तव स्थानमेप्सितं नाभिलषितं त्वत्स्पर्शाहंकार
वशवर्त्यहं स्यामिति स्वत्पदं नाभिलषितं इत्यर्थः वने निर्वेदे यद्यप्यहमहंकारः अतस्तत्पदं नाभित यापि मामनुगृह्णतस्तव सदृशमपि मह्यं द्दास्यती
ति मे प्रतिभातीत्याह ॥ अपि तथापि मम पात्वत्पदे नाभिलषितेपि यर्हि यदा लसत्तुलस्या लसंती तुलसीमाला यस्यास्तया मालया आश्चर्य

कारणमुपपादयति ॥ एक इति ॥ स्वयमेकः सन् एकशब्देन सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति कारणत्वपरा श्रुतिः स्मारिता ॥ तथा चाय
मर्थः सृष्टेः प्रागेकत्वं नामरूपविभागानर्हसूक्ष्मचिदचित्प्रकारकत्वशरीरः सन्नुपादानत्वेन विद्यमानः अत्रापि श्रुताविव एवकारार्थ इदं गर्भमिदं
एकत्वमेव उपादानकारणांतरस्पृशः एकत्वं च सृष्ट्यनंतरं तद्भाविनामरूपविभागनिबंधनबहुत्वप्रतिसंबंधिनामरूपविभावाधीनत्वमे
वाविवक्षितं न तु प्रकृतिपुरुषादिरहितत्वम् ॥ एक अद्वितीय इत्यस्याप्युपलक्षणं ॥ तथा च निमित्तकारणांतरस्पृशः सनिमित्तकारणांतरस्पृ
शः सन्नित्यनेन कारणत्वेनावस्थितस्य प्रमाणसंबंधार्हत्वरूपसत्तायोगित्वात् कथनादसत्कार्यवादो निरस्तः ॥ एक इत्यनेन उपलक्षिताद्विती
यपदेन चोपादाननिमित्तत्वोपयुक्तसर्वज्ञत्वादयो धर्मा आक्षिप्यंते एवं च मृत्कुलालयोरिव निमित्तोपादानयोर्भेद एव नाभेद इपद्यत इ

एकः स्वयं सन् जगतः सिसृक्षयाद्वितीययात्मन्नधियोगमायया ॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवन् स्वशक्तिभिः ॥१९॥

तिशंकापत्तेः मृदस्सर्वज्ञत्वात् कुलालस्यासर्वज्ञत्वाच्च निमित्तत्वोपादानत्वयोरुभयोरपि मृत्कुलालयोरन्यतरस्मिन्नसंभ
वः इह तु ब्रह्मणः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी यः सर्वज्ञः सर्वविदिति ॥ सर्वज्ञत्वसर्वशक्तित्वाद्यनंतकल्याणगुणाकरत्वेन
कीर्तितस्यैवोपादानत्वं निमित्तत्वं चोभयमप्युपपन्नमेव एवं च नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टत्वाकारेणोपादानत्वेन प्रकृति
पुरुषकालनियंतृत्वाकारेण निमित्तं चतुरुपयुक्तसर्वज्ञत्वादिगुणविशिष्टत्वेन च सृष्टेः प्राग्विद्यमानः जगतः नामरूपविभागार्हस्थू
लचिदचिद्विशिष्टब्रह्मात्मकजगतः सिसृक्षया स्वपुमिक्षया हेतुया ॥ अनेन तदैक्षत बहु स्यामित्यस्यार्थो विवृतः ॥ द्वितीयया स्वरूपतः स्वभा
भावतश्च स्वस्मादत्यंतभिन्नया योगमायया युज्यते इति योगमाया स्वसंबंधिनी स्वशरीरभूतेत्यर्थः तया मायया प्रकृत्या ॥ अद्वितीयमेतदपि हेतु

५५

तेनजराक्षुद्भ्रमिः जरामरणादिक्षुत्पिपासादिपरिवृत्तिर्भ्रमं ततः भ्रमिः भ्रमणं तदंतदित्यर्थः एकवचनमार्षंजरात्तुदुपेणायस्येतिकालचक्रविशेष
णंकालचक्ररूपविशेष्यविशेषणत्वमार्थसिद्धम् ॥ अस्मिन्पक्षेये आश्रितायेषामायुरितिसंबंधः तेनवत्संवत्सरात्मकंकालचक्रंजगदार
च्छिद्य धावदित्यर्थः तेषामायुः सकलमित्युक्तंभवति ॥ तेजराक्षुद्भ्रमिरितिपाठेः अजराक्षभ्रमिरितिच्छेदः ॥ अजरअनुपरतः अक्ष
भ्रमिरक्षभ्रमणंयस्येति चक्रविशेषणमेव ॥ यद्वा ऽजरोऽविशीर्णः अक्षोयस्यस चासौभ्रमिर्यस्येत्यर्थः ॥ अजरमत्तरं ब्रह्मतस्मिन्नक्ष
रूपेश्वभ्रमिर्भ्रमणंयस्येतिवा ॥ कथंभूतंकालचक्रं त्रयोदशारमधिमाससहिताद्वादशमासा आरायस्यतत् त्रिशतषष्टिश्च अहो

तेनेजराक्षभ्रमिरायुरेषां त्रयोदशारंत्रिशतंषष्टिपर्व ॥ षण्नेम्यनंतच्छदियत्त्रिणाभि करालस्रोतोजगदाच्छिद्य
धावत् ॥ १८ ॥

रात्राणिपर्वाणियस्य शतशब्देविभक्तेरलुगार्थः षट् ऋतवोनेमयोयस्य अनंताः क्षणलवादयो छदाः पत्राणियस्यसंती
तिनया त्रिणाभिसमाधिन्मनगतिवंनिभाणि चातुर्मास्यान्येवनाभयोऽरप्रायस्यकरालंतीव्रस्रोतोवेगः यस्यतत् इह शंत्वदात्मकलाचक्रंकेवल
संमारिणामेवायुराच्छिद्य धावन्नहृयानदायुर्हरति ॥ ननुत्वद्गुणानुभवपराणामतः कालचक्रंशरीरकुस्माश्रितकामदुघस्यभवएव
पारकत्वंउपेयिवान् अहमितिभावः ॥ १८ ॥ ननुब्रह्मरुद्रादिषु सत्स्वपितान्नना दृत्यमत्पादमूलमेवकिंविशेषणेयेपि वानित्याशंकायांकथ्यध्य
यः कारणंतुध्येयइतिश्रुतेर्वक्ष्यत्राद्यरूपेणजगत्कारणत्वस्यवोपास्यत्वाभिधानात् जगत्कारणभूतस्त्वमेवोपास्यइत्यभिधास्यन्तावत्

पराजन्मकर्मफलप्रदं ॥ क्रियाविशेषवहुलां गैश्वर्यगतिं प्रति इति त्वदुक्तरीत्या कामात्मानः ॥ त्रैवर्गिकमेव फलं वहुमन्वानास्त्रैवासक्ताः अ-
हमपि लोकान्सांसारिकलोकाननुगतोऽनुसृतः हे शुद्ध निर्मल भगवन् अनिमिषाय कालस्वरूपिणे तुभ्यं वलिं गृहाण मोचित धर्मरूप
वलिं हरामि ॥ यद्यप्यहं हेयोपादेयविवेकसंपन्नस्तथापि त्वन्निदेशानुवर्त्तमानस्त्रिया चतुर्मुखेन प्रजाः सृजेत्यनुशिष्टोहमत एव गृहमेधी पिरे-
व धर्मैस्त्वामाराधयितुं त्वां प्रार्थयामीति भावः ॥ अनिमिषायेति हे नुगर्भ यस्त्वं कालरूपेण प्रांसारिकानां निरर्थकमायुः क्षपयस्यतोहं सांसारि-

लोकांश्च लोकाननुगतान्पशूंश्च हित्वाश्रितास्ते चरणातपत्रम् ॥ परस्परं त्वद्गुण-
वादसीधुपीयूषनिर्वापितदेहधर्मा ॥१७॥ ४ ॥६ ४॥ ४

कथमानुतिष्ठन् कालात्मकालात्मकान्नोभीतः सन्नसमहायुषः सद्युर्यं चिकीर्षुः पितृनिदेशं च पालयन् कालरूपातुभ्यमेव वलिं प्र-
जां वहामि तव प्रजां करोमीत्यभिप्रायः ॥१६॥ अनिमिषायेत्यनेनाभिप्रेतं सांसारिमेव हृथायुःक्षपयितृत्वं व्यतिरेकमुखेनाप्याह द्वाभ्याम्
ये लोकाः संसारिणस्तदनुगतान्यान्यान्हित्वात्यक्ता परस्परं मिथः तत्र त्वद्गुणानां वादः ॥ कथनं तदेव साधुमधुरं पीयूषममृतं तेन निर्वापि-
ता निरस्ता देहधर्मा जरामरणादयो यैस्ते तव चरणमेवातपत्रं तापत्रं निवर्त्तकत्वादातपत्रस्वरूपं आश्रितास्ते ॥१७॥

न तु धर्मादिष्वनन्यमनाव पुरुषार्थः न तु मर्दन मिमत्राह यदति। तेमायया ये हतमेधसः मोहितबुद्धयस्ते जनाः भवः संसारः स एव सिंधुः समुद्रः तस्मिन्मो
तं नौकारूपं त्वच्चरणारविंदं कामलवाप काम्यंत इति कामाः सुखानि तेषां लवार्थं य उपासते निरपेपिनिरयप्राये पिनी चयोनौ ये कामाः सु
गान्कामास्तेषां नत्सुखलेशानपि राशिं ददासि। तथापि ने सुमेरुमामासाद्य वराटिकाद्यन्वेषयंत इव नित्यनिरतिशयानंदजलधिं त्वां प्रपद्य
आनंदलेशमाशासानास्ते मायाहतबुद्धय एव अतो धर्मादिषु पुरुषार्थेषु स्पृहया त्वां भजन्मूर्ख एवेति भावः ॥ १४ ॥ यो हं काम कामिनो निंदया
मि सोहमपि कामकामि त्याह। न याहमपि गृहाश्रमे धर्मधेनुं गार्हस्थ्यावर्द्धिनीं समानशीलां मत्समानधर्मादिष्वनुकूलशीलामित्यर्थः भार्या

ये मायया तेहतमेधसस्त्वत्पादारविंदं भवसिंधुपोतं उपासते कामलवाय तेषां राशीष्काकामान्निरपेऽपि ये स्युः ॥ १४ ॥
तथापि चाहं परिवोढ काम समानशीलां गृहमेधधेनुं। उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रियस्य
१५। प्रजापते स्तव वचः साधीश तंत्या लोकः किलायं कामहतोनुबद्धः। अहं च लोकानुगतो वहामि वलिं च शुक्लानिमि
षाय तुभ्यं ॥ १६ ॥
परिवोढु कामः उद्वोढुमिच्छन्नत एव दुराशयः दुष्टांतःकरणः कामदुघांघ्रियस्य कल्पवृक्षवदर्पितार्थदस्य तवाशे
षमूलमशेषपुरुषार्थानां मूलं कारणं उपेयिवान्प्राप्तवानस्मि। १५। नन्वेवं हेयोपादेयविभागकुशलस्त्वं कथं कामकामी मामुपेयिवानि
त्याह। प्रजापतेरिति हे अधीश प्रजापतेस्तव वचसा वेदात्मिक वचो रूपया तंत्या दाम्ना ऽयं लोकः सांसारिको लोकः कामहतः। कामेर
भिहतः अनुबद्धः पशुरिव बद्धः यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः कामात्मानः स्वर्ग

किरीटं धारयतीति किरीटि कुंडलानि धारयतीति कुंडलि शंखचक्रगदाधरं वहंतं श्वेतोत्पलं क्रीडनं क्रीडासाधनं यस्य तं एकेन करेण लीलार्थं श्वेतोत्पलं वहंतमित्य र्थः मनःस्पर्शि स्मितेक्षणं चित्तापहारिहासयुक्तावलोकनयुक्तम् ॥१०॥ गरुत्मतो गरुडस्यांसदेशे स्कंधप्रदेशे विन्यस्ते निहिते चरणपद्मे ये नतम् वक्षसि श्रीर्यस्य तं कौस्तुभं कंधरायां यस्य तं खे आकाशे वास्थितं भगवंतं दृष्ट्वा ॥११॥ जातहर्ष इति लब्धदर्शनप्राप्तिरूपो मनोर थो येन सः अतएव जातउत्पन्नः हर्षः आनंदो यस्य सः क्षितौ भूम्यां मूर्ध्ना शिरसा पपात दंडवत्प्रणनाम इत्यर्थः ततः प्रीतिरेव स्वभावो यस्य सः आत्मा मनो यस्य सः कृतांजलिर्यैर्नमः गीर्भिस्तत्स्वरूपरूपगुणमहात्म्यप्रतिपादिकाभिर्गीर्भिर्वचोभिरभ्यगृणात्स्वाभिप्रेतं निवेद

किरीटिनं कुंडलिनं शंखचक्रगदाधरम् ॥ श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम् ॥१०॥ विन्यस्तचरणां भोजमंसदेशे गरुत्मतः दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरम् ॥११॥ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः ॥१२॥ कर्दम उवाच ॥ जुष्टं बताद्याखिल सत्वराशेः सांसिध्यमक्ष्णोस्तव दर्शनान्नः यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः ॥१३॥ ॥

यन्निवेदितवानित्यर्थः ॥१२॥ नवो वाहनवभिः ॥ जुष्टमिति हे ईड्य स्तुत्य अखिलसत्वराशेः परिपूर्णशुद्धसत्वमयस्य तव दर्शनान्नोऽस्माकमक्ष्णोर्नेत्रयोः सांसिध्यं सिद्धिविषयभूतं फलमद्य जुष्टं प्राप्तम् ॥ बतेति हर्षे यदा तव दर्शनमिति यावत् तदा नोऽस्माकं सांसिध्यं संसिद्धिस्तपसः फलाव्यवहित साधनं तव दर्शनं तया सांसिध्यं यस्फलं त्वद्दर्शनरूपं तदक्ष्णोर्दृशि भूम्ना जुष्टं इत्यर्थः दर्शनस्य सांसिध्यत्वमुपपादयति ॥ यस्य तव दर्शनं योगरूढाः योगारूढाः आरूढो योगे येस्ते प्राप्तयोगाः इत्यर्थः सद्भिः सात्विकैर्बहुजन्मभिरपि यतस्तत्वं प्रार्थयंते ॥ जन्मभिराशासते प्रार्थयंते आरूढयोगे बहुजसंतस्त

एवमापृष्टो मैत्रेयः तद्व्याचष्टे अनुपूर्वं चरित्रं वक्ष्यमाणं तावद्देवहूत्याख्यभार्यालाभाय कर्दमस्य तपश्चर्याप्रकारमाह द्वाभ्यां ब्रह्मणा च
तुर्मुखेन प्रजाः सृजेति युक्तो भगवान्कर्दमः सरस्वत्यां नद्यां सहस्राणां दश समाः दशसहस्रसंवत्सरान् यस्तेपे चकार या कं पचतीति व
चित्रं देशः ॥६॥ ततस्तस्मिन्नपसि कर्दमः समाधिश्चित्तैकाग्र्यं तेन युक्तेन क्रियायोगेन स्ववर्णाश्रमोचितानभिसंहितफलभगव
दाराधनरूपक्रियायोगेन तया भुवा तुल्यरूपोपासनया च प्रपन्नानां वरदाशुषं वरप्रदं हरिं प्रपेदे निषेवे ॥७॥ कृतयुगे ताव

मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः ॥ सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥६॥ ततः
समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥७॥ तावत्प्रसन्नो भग
वान्पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥८॥ स तं विरजमर्काभं सितपद्मोत्पलस्रजम् ॥ स्नि
ग्धनीलालकव्रातवक्त्राब्जं विरजोऽम्बरम् ॥९॥ [illegible]
[illegible] दशसहस्रवर्षपर्यंतपश्चर्यांते पुंडरीकाक्षो भगवांस्तथा प्रसन्नः तपसा तोषितः हे
क्षत्तः शाब्दं पंचोपनिषन्मंत्रवेद्यं ब्रह्म सौम्यसौकुमार्यलावण्ययौवनाद्यनंतकल्याणगुणाकरं वपुर्दिव्यमंगलविग्रहं दधद्बिभ्र
त् कर्दमं प्रति दर्शयामास स्वात्मानमिति शेषः यद्वा तमिति विग्रहापेक्षया पुल्लिंगनिर्देशः तं विग्रहं दर्शयामासेत्यर्थः ॥८॥ तमेव भ
गवंतमनुवर्णयन्नंतु प्रणम्यात्मोषीदित्याह चतुर्भिः स इति स कर्दमस्तं भगवंतं दृष्ट्वावक्ष्यमाणं तं विरजं विरजं निर्मलमर्काभमर्क
समतेजस्विवाभ यस्य तं सितानां पद्मानामुत्पलानां च स्रजो माला यस्य तं स्निग्धा नीलाश्च ये अलकाः कुंतलास्तेषां व्रातो वक्त्राब्जमुखक

एवमसाधारणान्सृष्टिभेदानाकर्ण्य प्रकृतं स्वायंभुवमनुचरित्रं तद्वंशं च पृच्छतीति विदुरः ॥ स्वायंभुवस्य मनोः परम उत्तमः संमतः सतामिति शेषः क
थ्यतां ॥ यत्र वंशे मैथुनेन कर्मणा प्रजा एधिरे ववृधुः ॥१॥ स्वायंभुवस्य मनोः पुत्रौ प्रियव्रतोत्तानपादौ धर्मेण यथा तद्वर्णाश्रमधर्माननतिक्रम्ये
त्यर्थः ॥ सप्तद्वीपवतीं पृथिवीं यथा जुगुपतुः यथा रक्षितवन्तौ तत्प्रकारश्च कथ्यतामित्यर्थः ॥२॥ तस्य स्वायंभुवस्य दुहिता पुत्री देवहू
तिरिति विश्रुता त्वत्तो मयेति शेषः ॥ हे ब्रह्मन्ननघेति द्वे संबोधने ॥ कर्दमस्य प्रजापतेः पत्नीति त्वयोक्ता च ॥३॥ योगलक्षणैः शमदमादि

विदुर उवाच ॥ स्वायंभुवस्य च मनोर्वंशः परमसंमतः ॥ कथ्यतां भगवान्यत्र मैथुनेनैधिरे प्रजाः ॥१॥ प्रियव्रतोत्ता
नपादौ सुतौ स्वायंभुवस्य वै ॥ यथा धर्मं जुगुपतुः सप्तद्वीपवतीं महीं ॥२॥ तस्य वै दुहिता ब्रह्मन् देवहूतीति विश्रु
ता ॥ पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयाऽनघ ॥३॥ तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कति
धा वीर्यं तन्मे शुश्रूषवे वद ॥४॥ रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः ॥ यथा ससर्ज भूतानि लब्ध्वा भार्यां च
मानवीं ॥५॥

भिर्युक्तायां तस्यां देवहूत्यां महायोगी परिपक्वभगवदुपासनात्मकयोगनिष्ठः स वै कर्दमः कतिधा कतिभिः प्रकारैः ॥ वी
र्यं ससर्ज कस्यपत्यान्यसृजदित्यर्थः ॥ तच्छुश्रूषवे श्रोतुमिच्छवे मह्यं वद कथय ॥४॥ हे ब्रह्मन्मैत्रेय भगवान् षाड्गुण्यपूर्णः रुचिर्दक्ष
श्चतुर्मुखस्य सुतः मानवी मनुपुत्री आकूतिं च भार्यां लब्ध्वा भूतान्यपत्यानि यथा ससर्ज तत्प्रकारं मे वदेति पूर्वेणान्वयः ॥५॥ ॥

तेभ्यो मनुष्येभ्यः स ब्रह्मा आत्मनः तन्मपुरुषाकारं पुरं देहमससृजद्ददौ आत्मवत्पुरुषाकारदेहविशिष्टानकरोदित्यर्थः पुरा पुरुषाकारदेहेनत
द्विशिष्टेन रूपेणेत्यर्थः ॥ ये पुरा सृष्टा इति हेतुगर्भं यतः पुरुषाकारदेहविशिष्टेन सृष्टा ॥ अनन्तरं पुरं दृष्ट्वा प्रजापतिं प्रशशंसुः ॥ ४९ ॥ प्रशंसा
मेवाह ॥ अहो इति हे जगत्स्रष्टः त्वया कृतं निर्मितं एतत्सुरुषाकारशरीरं महो सुकृतम् ॥ यस्मिन्नोषधै देहे क्रियाः स्वर्गापवर्गसाधन
भूताः ॥ क्रिया निष्ठिताः सर्वाः क्रियाः पौरुषशरीरसाध्या इत्यर्थः अतः साकं पौरुषशरीरे एतस्मिन्नन्नमोपजातं अदामहे ऽभवेम

तेभ्यः सोऽसृजत्स्वीयं पुरं पुरुषमात्मवान् ॥ तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिः ॥ ४९ ॥ अहो एतज्ज
गत्स्रष्टः सुकृतं बत ते कृतम् ॥ प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदामहे ॥ ५० ॥ तपसा विद्यया युक्तो योगे
न सुसमाधिना ॥ ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥ ५१ ॥ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदाद
जः ॥ यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥ ५२ ॥ इति श्रीमद्भागवते म० तृतीये विंशोऽध्यायः ॥ २० ॥

५१ ॥ विद्या भगवदुपासना तपः विवेकादिसाधनसम्पन्नं ताभ्यां युक्तः हृषीकाणामिन्द्रियाणामीशः जितेन्द्रियो वा ऋषिर्ब्रह्मा योगेन प्र
कृतिविविक्तात्मयथाज्ञानयोगेन तत्समाधिना चित्तैकाग्र्येण च ऋषीनृषिरूपा अभिमताः प्रजाः ससर्ज ॥ ५१ ॥ अजः ब्रह्मा स्वस्य
देहस्य शरीरस्य एकैकमंशं तेभ्य ऋषिभ्योऽदाद्ददौ किं तच्छरीरं यस्य एकमंशमंशमदादित्यत आह ॥ यच्छरीरं तपो विद्या समाधियोगाः
र्द्धी काः ऋद्धिरणिमाद्यैश्वर्यं विरक्तिविपर्ययेषुनिःस्पृहत्वं एभिर्युक्तमित्यर्थः ॥ ५२ ॥ इति तृतीये विंशोऽध्यायः ॥ २० ॥ ॥ ॥

तेतु किंनराइयः परमेष्ठिनायस्त्यक्तं तत्स्वरूपं कायां जगृहुरत एव ते किन्नराः किंपुरुषाश्च परस्परं मिथुनीभूय बिंबप्रतिबिंबयोर्यादृशो भिमा
नस्तमभिमानं हित्वा तमेव ब्रह्मणमुपतस्थिरे कर्मभिस्त्वेष्टितस्तुतिरूपैः स्तोत्रैर्गायंतो बभूवुः आत्मभासं विलोकयन्निति पाठे त्वात्मभासं
स्वप्रकाशं विलोकयंतमात्मानं स्वविशेषत्वेन त्वाभिन्नं मन्यमानस्तेन प्रसन्नेनात्मनात्मप्रकाशेनासृजदित एव ते ततः सृष्टाः मानाख्य
कर्मणि यस्य रंगुणप्रधानभावेनाभिन्नप्रयोजनात्मनो मिथुनीभूय गायंतो बभूवुरित्यर्थः ॥४५॥ भोगवत्तां सौकुमार्यवतां देहेर्ध्यवता

ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना ॥ मिथुनीभूय गायंतस्तमेवोषसि कर्मभिः ॥४५॥ देहेन वै भोगवता ⸗
शयानो बहुचिंतया ॥ सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ॥४६॥ येऽहीयंतामुतः केशा अहयस्तेऽङ्ग जज्ञिरे ⸗
सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकंधराः ॥४७॥ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः ॥ तदा
मनून्ससर्जांते मनसा लोकभावनान् ॥४८॥

वा बहुचिंतया शयानः सर्गेऽनुपचिते अप्रवृद्धे सति क्रोधात्तद्वपुः भोगक्रोध
बहुचिंतारूपं विससर्ज ॥४६॥ येऽमुतः भोगवतो देहाद्ये केशा अहीयंत प्रच्युताः ते केशा अहयो जज्ञिरे अंग हे विदुर ॥ प्रसर्पतः पाद्दा
द्यावुंचनैः प्रचलतोऽमुष्माद्देहात्सर्पा अनुप्रजज्ञिरे प्रसर्पतो जातत्वाद्देवतेनातेनागानगच्छंतीत्यनेन अगा नागा अतिवेगादृत्सर्पः
क्रोधासक्तकाया ज्ञातत्वात्क्रूराः बहुचिंताकांता भोगवंतो जातत्वाद्भोगाः सुखस्पर्शदेहा दीर्घाश्च शयानाज्जातत्वाद्दीर्घकंधराः ॥४७॥ स
आत्मभूर्यदात्मानं कृतकृत्य इव मन्यमान आसीत्तदांते साक्षात्सकलसर्गांते मनसा लोकभावनान्प्रजा असृजत् ॥४८॥

प्रभुर्भगवानजो ब्रह्मा आत्मानमूर्जस्वंतं बलवंतं मन्यमानः साध्यान्गणान् साध्याख्यान्गणान् गणानां पितृगणानिति भेदाविवक्षया सामानाधिक
रण्यनिर्देशः पितृगणांगणांश्च परोक्षेणाभिमुखमसृजत् ॥४१॥ आत्मसर्गमात्मानं ध्यानं पितृणां च सर्ग उत्पत्तिर्यस्मात्तं तत्कायं ब्रह्मण
ः ॥ पूर्वकायं पितरः प्रतिपेदिरे पितर इति साध्यानामुपलक्षणं ऊर्जस्वंतोऽभवन्निति भावः अत ऊर्जस्वंतं द्दृष्टिसिद्धिं ऊर्जं तदित्याह कव
यः कर्मकुशलाः साध्येभ्यश्च पितृभ्यश्च यद्धूर्जं वितन्वते यज्ञरूपं संति साध्यान्संसोधकोविशांतं तनुमन्वसितभ्यज्ञेरिति द्वितीयस्कंधो
क्तरीत्यारक्तातित्वसंततिदृष्ट्यादिभिरात्मनो बलसंपादनाय साध्यान्पितृंश्च यजंतीत्यर्थः ॥ यद्वा ऊर्जं प्राणानं प्रसन्नं प्रहृष्टजननं

ऊर्जस्वंतं मन्यमान आत्मानं भगवानजः ॥ साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ॥४१॥ ते त्वात्मसर्गं तत्कायं
पितरः प्रतिपेदिरे ॥ साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ॥४२॥ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत्
तेभ्योऽददात्तमात्मानमंतर्धानाख्यमद्भुतम् ॥४३॥ स किंनरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ॥ मानयन्नात्मना
त्मानमात्माभासं विलोकयत् ॥४४॥

तदंतं मन्यमानः साध्यादीनसृजत् इत एवेहामुत्र च हित्वाति तं संततमादिभिरिहामुत्र च प्रा
णानसिद्धजिर्जितवदित्यर्थः ॥४२॥ स ब्रह्मा तिरोधानेन स्वेतरैरदृश्यत्वस्य प्रत्यक्षशक्त्या सिद्धान्विद्याधरांश्चासृजत्तेभ्यः सिद्धविद्याधरे
भ्यः तममंतर्धानाख्यमात्मानं कायमद्भुतमाश्चर्यं ददौ तैः तदंतर्धानशक्तिप्रधाना अभवन्नित्यर्थः ॥४३॥ प्रभुर्ब्रह्मात्मात्माभासमात्मास
तिबिंबं विलोकयन्नात्मानं प्रतिबिंबरूपं कायं मानयन्प्रत्यात्म्येन प्रतिबिंबेन किंनरसहितान्किंपुरुषानसृजत् ॥४४॥

भगवानन्तर्धीभावेनाभिप्रायविशेषेण गंभीरं यथा तथा प्रहस्यात्मानं देहमात्मनास्वयं जिघ्रन्कांत्यासौंदर्येण गंधर्वाप्सरसां चगणान्
ससर्ज प्रहसनं त्वात्मानघ्राणं च सौंदर्यानुभवाय चातुर्यविकारः ॥३७॥ तां कांतिमतीं कांतिबहुलां प्रियां स्वाभिमतां ज्योत्स्नांशा वंतध्यारू
पां तनुं विससर्ज ॥ तानेव गंधर्वाप्सरसांगणान् तान्मिप्राचांश्च सृष्टामोमुख्यायेषां ते प्रीतास्तां तनुमाददुः ॥३८॥ भगवान् ब्रह्मा आत्मा
नेंद्रेण आलस्येन भूतगणान् तान् पिशाचांश्च सृष्टा गतान्मुक्तकेशान् दिग्वाससः दिगंवरान् भूतान् पिशाचांश्च तान्वीक्ष्य दृशौ नेत्रे अमील
यन्निमीलितवान् ॥३९॥ तद्विसृष्टस्यक्त्वं जृंभणं निद्रोन्मादरूपं चतुर्विधः तत्रालस्यादीनां उत्तरोत्तरं हेतुत्वं सच यन्निद्रोन्मादयोस्वरूपं च

प्रहस्य भावगंभीरं जिघ्रन्त्यात्मानमात्मना ॥ कांत्या ससर्ज भगवान्गंधर्वाप्सरसांगणान् ॥३७॥ विससर्ज तनुं तां वै ज्योत्स्नां
कांतिमतीं प्रियां ॥ त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ॥३८॥ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा ॥ दिग्वा
ससो मुक्तकेशान्वीक्ष्य चामीलयद्दृशौ ॥३९॥ जगृहुस्तद्विसृष्टां तां जृंभणाख्यां तनुं प्रभोः ॥ निद्रामिंद्रियविक्लेदो
यया भूतेषु दृश्यते ॥ येनोच्छिष्टान्धर्षयंति तमुन्मादं प्रचक्षते ॥४०॥ कथय भूतपिशाचा ॥ चतुर्विधं तंद्रिप्रधानत्व
माह ॥ जगृहुरितिद्वाभ्यां ॥ ब्रह्मणा विसृष्टां प्रभोर्ब्रह्मणस्तां जृंभणाख्यां तनुं जगृहुः पाददुः तेन च तुर्विध्यस्य चनापतदेवांतर
भेदेन जृंभणाख्यामिति निर्देशः ॥ यया जृंभणाख्यया इंद्रियविक्लेदः इंद्रियविरमत्वं इंद्रियैः ॥ सं भूतेषु दृश्यते तां निद्रां प्रचक्षते इ
त्युत्तरत्रान्वयः येनेंद्रियविक्लेदेन उच्छिष्टान् परिभूतान् धर्षयंति सहते स्वार्थेणि च ॥ तं धर्षणामुन्मादं इति प्रचक्षते भूतपिशा
चास्सपत च तुर्विधतंद्रिप्रधाना इति भावः ॥४०॥ ॥ ० ॥ ९ ॥

मयितमनसांवाकंयहेशाल्विनिसुंदरिपतत्पतंगंउत्पत्यपतंतकंदुकंमुहुः करतलेनघृत्वाप्रवपादपद्मंएकत्रनजयतिनतिष्ठति
इहतिः स्तनयोर्भागद्वीतंकृशंतवमध्यंविषीदतिक्लिश्यतिश्रीम्यतिवा॥दृष्टिश्रांतामंदंप्रसरत्तिसमसिखासमूहः शोभनकेशक
लापः सुसिखावधानेतिपाठेशोभनकेशानविकीर्यमाणानवधानेत्पर्यः अत्रचात्संगच्छन्त्यर्यएवपतंगः मेघविछेदेरामध्य
विभागः तारकरूपादृष्टिः तमएववेकेशादिश्रमराएवालकाइत्याद्यूह्यम॥३५॥इत्युक्तरीत्याप्रमदायतीस्त्रीवाचरंतीसायंतनी
संध्याप्रलोभयंतीमोहयंतीस्त्रियंमत्वामूढधियोमोहितबुद्धयोऽसुराजगृहुरुपादद्धुः ननुकथंछायाप्रभालोलुपानांब्रह्म

नैकत्रतेजयतिशालिनीपादपद्मं घृत्वामुहुः करतलेनपतत्पतंगं॥मध्यंविषीदतिबृहत्स्तनभार
भीतं श्रांतेवदृष्टिरमलासुसिखासमूहः॥३५॥मैत्रेयउवाच॥ इतिसायंतनींसंध्यामसुराः
प्रमदायतीम्॥प्रलोभयंतींजगृहुमत्वामूढधीयःस्त्रियः॥३६॥ ॥ ॥ ॥

णोपात्तत्वात्कानांग अहः संध्याकालरूपत्वंकालोहिछायादीनामपिपरिछेदकः तेभ्योविलक्षणएवसत्वंछायोहिराअहः संध्या
कालैः परिछिद्यंतेऽभः परिछेद्यपरिछेदकयोरभेदविवक्षयाछायांरात्रिंप्रभामहः लोलुप्यंसंध्यामित्यभेदेनिर्देशः परमा
र्थनत्सुयंयंधर्ममुपादायथात्मानस्रजत्तेनतत्तेनरूपमप्रधानाजाताः रात्र्यादिकालविशेषाणांनिद्रादितमः कार्यादिहेतुत्वान्स्व
गुणानुसारेणतत्तत्कालविशेषमेवव्यवहारायोपाददुरित्यभिप्रायः॥३६॥ ॰ ॥ ॰ ॥

भा० त०

॥१३२॥

संमुह्यमानानामसुराणां प्रलापमाह पंचभिः अहो इत्याश्चर्ये रूपकारः स्थैर्यं लावण्यं वयः यौवनं कामयमानानामस्माकं मध्ये ऽकामेवाकाम
यमानेव विसर्पयं विगच्छति ॥३१॥ बहुधा वितर्कयंतः रूपगुणैरीदृशमस्या रूपादिकमित्यूहयंतः प्रमदाकृतिं स्त्रीस्वरूपत्वेन कल्पितां तां सं
भावमभिसंभाव्य सत्कृत्य विस्रंभात्प्रणयात्कुमेधसः बुद्धयोऽसुराः पर्यपृच्छन् ॥३२॥ पृच्छामेवाह त्रिभिः कासि किं देवता उत मानुषी उ
तान्यकस्य संबंधिनी असि हे रंभोरु रंभाकदलीतद्वद्रूपस्याः हे भामिनि कोपने आस्मन्मध्ये तेतव को वार्थः किं प्रयोजनं रूपेण

अहो रूपमहो धैर्यमहो अस्या नवं वयः ॥ मध्ये कामयमानानामकामेव विसर्पति ॥३१॥ वितर्कयंतो बहुधा तां
संध्यां प्रमदाकृतिं ॥ अभिसंभाव्य विस्रंभात्पर्यपृच्छन्कुमेधसः ॥३३॥ अ उवाच कासि कस्यासि रंभोरु को वार्
थस्तेऽत्र भामिनि ॥ रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥३३॥ या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव ॥
उत्सुनोषीक्षमाणानां कंदुकक्रीडया मनः ॥३४॥ ॥ ॥ ॥

रूपद्रविणमनर्घ्यवस्तु तदेव पण्यं क्रयार्हं तेनैतत्समर्पणेन दुर्भगान् भाग्यहीनान् नोऽस्मान् विबाधसे क्लेशयसे ॥३३॥ किं जाति
कुलादिप्रश्नेन या वा काचिद्भवसि हे अबले दिष्ट्या ऽस्मद्भाग्यवशेन दर्शने जातं ईक्षमाणानां पश्यतां नोऽस्माकं मनः कं
दुकक्रीडया उत्सुनोषि हरसि मुष्णासीति यावत् ॥३४॥ ॥ ॥

॥१३२॥

नाशनः बाधाविवर्धकः किलतत्रानामस्यावनाश्रितौ पादौ येषां तेषां तव पादपद्मनाश्रितानां त्वमेव क्लेशदः क्लेशसंपादकः ॥२७॥ विविक्ताध्यात्म
दर्शनः विविक्तं विशदं यथा तथाध्यात्मदर्शनः पराभिप्रायज्ञः स भगवानस्य ब्रह्मणः कार्पण्यं क्लेशमुपधार्य ज्ञात्वा घोरामतिकालुष्यरू
पामात्मतनुमात्मनो भावं विमुंच्येत्याहेति शेषः एवमुक्तो भगवता ब्रह्मा तां तनुं भावं विमोच विससर्ज ॥२८॥ सा तेन विसृष्टा तनुः सायं
तनी संध्या बभूव सा चक्रामोऽर्कवेला ॥ असुरा राजसत्वात्स्त्रीलंपटाः यतस्तां संध्यामेव स्त्रियं कल्पयित्वा संमुमुहुरित्याह त्रिभिः तांस

सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ॥ विमुंचात्मतनुं घोरामित्युक्तो विमुमोच ह ॥२८॥ तां क्वणच्चर
णांभोजां मदविह्वललोचनाम् ॥ कांचीकलापविलसद्दुकूलच्छन्नरोधसाम् ॥२९॥ अन्योन्याश्लेषयोत्तुंग
निरंतरपयोधराम् ॥ सुनासां सुद्विजां स्निग्धहासलीलावलोकनाम् ॥२९॥ गूहंतीं व्रीडयात्मानं नीलालक
वरूथिनीम् ॥ उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियम् ॥३०॥

धां रूपां स्त्रीत्वेन कल्पितां तनुं कथंभूतां क्वणच्चरणांभो
जां नूपुरध्वनियुक्तचरणकमलां मदेन विह्वले लोचने यस्यास्तां कांचीकलापेन मेखलारत्नभूषणेन विलसद्दुकूलं क्षौमवा
सस्तेन छन्नं पिहितं रोधः नितंबवदेशो यस्यास्ताम् ॥२९॥ अन्योन्याश्लेषेण परस्परोपमर्देन उत्तुंगावुन्नतौ निरंतरौ श्लिष्टौ
पयोधरौ स्तनौ यस्यास्ताम् सुनासां तिलकपुष्पतुल्यनासिकां सुद्विजां कुंदकुड्मलसदृशरदनपंक्तिं स्निग्धो हासो यस्मिंस्तल्लीला
वलोकनं यस्यास्ताम् ॥२९॥ व्रीडया लज्जया आत्मानं देहं गूहंतीं वस्त्रांचलेनाच्छादयंतीं नीलामलकानां चूर्णकुंतलानां वरूथः समूहो

यस्यास्तां स्त्रियमुपलभ्य मत्वा सर्वेऽसुराः हे धर्मवि
दुर संमुमुहुः ॥३०॥

भा॰द॰
॥२३१॥

प्रभया छायाप्रतियोगिन्या तेजसा स्वर्गः दिवं प्रकाशमानः ब्रह्मा प्रमुखतः प्रासृजत् । यां याः देवता असृजन् । ते देवाः देवयन्तः द्योतमानाः वि सृष्टां त्यक्तां अहः अहोधर्मरूपां प्रभां अहारिषुः गृहीतवन्तः ॥२२॥ देवः ब्रह्मा जघनतः जघनात् अतिलोलुपान् अतीवकामासक्तान् देवान् असुरान् सृजति स्म तेन लोलुपेन भावेन असृजत् । अदेवाः अतिलोलुपतया अतिकामासक्ततया मैथुनाय एनं ब्रह्माणं अभिपेदिरे अभितः प्राप्ताः ॥२३॥ स भगवान् ब्रह्मा हसन् निरपत्रपैः निर्लज्जैः असुरैः अन्वीयमानः अभिपद्यमानः अतएव क्रुद्धः भीतः तरसा आशु पराप तत् ॥

देवताः प्रभया या याः दीव्यन् प्रमुखतोऽसृजत् ॥ ते हार्षुः देवयन्तो विसृष्टां तां प्रभामहः ॥२२॥ देवोऽदेवान् जघन तः सृजति स्मातिलोलुपान् ॥ त एनं लोलुपतया मैथुनायाभिपेदिरे ॥२३॥ ततो हसन् स भगवान् असुरैर्नि रपत्रपैः ॥ अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥२४॥ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम् ॥ अनु ग्रहाय भक्तानामनुरूपात्मदर्शनम् ॥२५॥ पाहि मां परमात्मंस्ते प्रेक्षणेनासृजं प्रजाः ॥ ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो ॥२६॥ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः ॥ त्वमेकः क्लेशदस्तेषामनासन्न पदां तव ॥२७

यथावत् ॥२४॥ स ब्रह्मा भक्तानामनुग्रहाय अनुरूपं तत्तद्भक्तबुद्ध्यनुरूपं आत्मानं दर्शयतीति तं प्रपन्नदुःखहरं वरदं अभी ष्टार्थदं हरिं भगवन्तं अभिव्रज्य समीपं एत्य आहेति शेषः ॥२५॥ उक्तिमेवाह द्वाभ्यां हे परमात्मन् मां पाहि पालय तेन तव प्रेक्षणेन संकल्पे न प्रजा अहमसृजं ताः त्वत्संकल्पेन मया सृष्टाः पापा इमा असुररूपाः प्रजाः यभितुं मैथुनं कर्तुं मां उपाक्रामन्ति परिवेष्टिते ॥२६॥ हे

॥२३१॥

कान्तौ संस्थानं विन्यासं संस्थानं विन्यासं स्वया आधारया संस्थया देवादिनामरूपात्मकया कल्पयत्तनवान्॥१७॥छायया तमोगुणेन पंचपर्वा
णमाह॥तामिस्रमित्यर्द्धेन॥तामिस्रादिस्वरूपं तु पूर्वमेव प्रपंचितं १८ एवं साधारणीं सृष्टिमुक्त्वासाधारणान्सृष्टिभेदानाह विससर्जेत्यादिना
यावदध्यायसमाप्ति॥नाभिनंदन् अनभिनंदन्स्तमोमयं तमःप्रचुरं कायं तमःप्रचुरं कायं छायारूपां तनुं विससर्ज॥सर्वत्र तनुत्यागो नाम त
दहंकारपर्यायभावत्यागो विवक्षितः ग्रहणं च तत्तद्भावापत्तिः यक्षरक्षांसि विसृष्टात्कायात्समुत्पन्नानि यक्षरक्षांसि तमेव

ससर्ज छाययाविद्यां पंचपर्वाणमग्रतः॥तामिस्रमंधतामिस्रं तमो मोहो महातमः॥१८॥विससर्जात्मनः
कायं नाभिनंदंस्तमोमयं॥जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम्॥१९॥क्षुत्तृड्भ्यामुपसृष्टास्ते तं
जग्धुमभिदुद्रुवुः॥मा रक्षतैनं यक्षध्वमित्यूचुः क्षुत्तृडर्दिताः॥२०॥देवस्तानाह संविग्नो मा मां यक्षत रक्ष
त अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ॥२१॥

कायं स्वात्मनां क्षुत्तृषोः क्षुत्पिपासयोः समुद्भवो यस्यास्तां रात्रीरूपधर्म
रूपेण परिणाम्य मायां जगृहुः॥१९॥ते यक्षादयः क्षुत्तृड्भ्यामुपसृष्टाः पीडितास्तं कायं जग्धुमत्तुमभिदुद्रुवुरभ्यधावन् यतो व
यं क्षुत्तृड्भ्यामर्दिताः ततएनं कायं पितेति कृपया मा रक्षत नेत्येके ऊचुः परे पुनः पितरमपि तं रयक्षध्वं भक्षयतेत्यूचुः॥२०॥देवो ब्र
ह्मा संविग्नः भीतः नास्य त्रातारो इति मां मत्कायं मा यक्षत न भक्षयत किं तु रक्षत तेभ्य आह अहो हे यक्षरक्षांसि यूयं मे प्रजाः पुत्रा बभू
विथ जाताः एवं तमःस्वभावाज्जाता इत्यर्थः तत्र ये यक्षध्वमित्यूचुस्ते यक्षा ये तु मा रक्षतेत्यूचुस्ते राक्षसा इति विज्ञेयम्॥२१॥

स्त्रिलिंगकः पंचमहाभूतज्ञानकर्मेंद्रियात्मकः भूतादिरहंकारः वियदादीन्याकाशादीनि आदिशब्देन तन्मात्राणि ज्ञानेंद्रियाणि कर्मेंद्रियाणि
चोक्तानि पंचशः प्रत्येकं पंचसंख्याकानि ससर्ज ॥१३॥ तानि च वियदादीनि एकैकशः परस्परमसमेतानि भौतिकं मंडं स्रष्टुमसमर्
थान्यभूवन् अथ तानि दैवयोगेन भगवदनुवेशेन संहृत्य समेत्य मानेन पंचीकरणं विवृत्तितम् हैमं प्रकाशबहुलं मंडं ब्रह्मांडमसृजन्
॥१४॥ अंडकोशः निरात्मकः अधिष्ठातृचेतनरहितः अब्धिसलिलं सलिले अनेनांडसृष्टेः प्रागुदकसृष्टिरपि सिद्धा अशयिष्टाध्यवसत् त
मंडकोशमीश्वरो निरुद्धः साग्रं संपूर्णं संवत्सरसहस्रमन्ववात्सीत् जलवेष्टिते जलपूर्णेऽडे भगवानध्यशेत इत्यर्थः ॥१५॥ कोसौ भगवान्

तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम् ॥ संहत्य दैवयोगेन हैममंडमवासृजन् ॥१४॥ सोऽशयिष्टाब्धिस
लिलमंडकोशो निरात्मकः ॥ साग्रं वै वर्षसाहस्रमन्ववात्सीतमीश्वरः ॥१५॥ यस्य नाभेरभूत्पद्मं सहस्रार
र्कोरुदीधिति ॥ सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥१६॥ सोनविष्टो भगवता यः शेते सलिलाशये
लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ॥१७॥

सोन्ववात्सीदित्यत्राह ॥ यस्योदशयानस्य भगवतो नाभेः सकाशात्सहस्र
संख्याकादित्यवदुरु प्रकाशं पद्मं अभूत् स ईश्वरो वात्सीदित्यर्थः कीदृशं पद्मं यन्नाभेरभूदित्यत्राह ॥ सर्वेषां जीवानां देवादीनां निकायः समूहः त
स्यौकः स्थानं पद्मं यत्र पद्मे स्वराट् ब्रह्मा स्वयमभूत् स्वयं अभूदित्यर्थः ॥१६॥ स ब्रह्मा भगवताऽनुप्रविष्टः संकल्परूपज्ञानेनेत्यर्थः कोसौ भगवान्येना
नुप्रविष्ट इत्यत्राह ॥ सलिलाशये गर्भोदकस्थानं यः शेते तेनेत्यर्थः भगवतानुप्रविष्टो ब्रह्मा यथापूर्वं पूर्वकल्पानुसारेण लोकसंस्थां लो

कथं इति स्वायंभुवमेव प्रकारं मुनिमुखाच्छ्रुत्वा विभ्रिं चीषयाविकल्पयति सद्वितीयाः सभार्याः किमसृजत् ॥ किंशब्दः ॥ प्रश्ने उताहोस्वित्कर्मसु सृ
ष्ट्यादिव्यापारे सुस्वतंत्रा भार्यानिरपेक्षा अहोस्वित्सर्वे मरीच्यादयः ॥ संहताः परस्परसापेक्षाः इदं विश्वं समकल्पयन् सृजन्ति ॥ ११ ॥ एवमा
पृष्टो मैत्रेयः सर्गभेदान्वितिपिपादयिषया पूर्वोक्तां महदाद्युत्पत्तिं विद्यापंचपर्वतामसृष्टिमनुवदति सप्तभिः दैवेनेति ॥ दुर्वितर्केण चित्यप्रभावे
मैदैवेनेश्वरेण कर्त्रा परेण प्रकृतिपुरुषविलक्षणेन परमात्मकेनानिमिषेण च कालेन च हेतुना जातः क्षोभः कार्योन्मुखरूपव्या
पारो यस्य तस्माद्भगवतः भगवत्संबंधिनः तच्छरीरभूतादित्यर्थः गुणत्रयात्मकात्प्रधानान्महत्तत्वमासीत् ॥ अत्र भगवतो गुणत्रया

सद्वितीयाः किमसृजन्स्वतंत्रा उत कर्मसु ॥ अहोस्वित्संहताः सर्वे इदं स्म समकल्पयन् ॥ ११ ॥ मैत्रेय उवाच ॥ दैवेन दुर्वितर्केण परेणानिमिषेण च ॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥ १२ ॥ रजःप्रधानान्महतस्त्रिलिंगो दैवचोदितात् ॥ जातः ससर्ज भूतादिर्वियदादीनि पंचशः ॥ १३ ॥

दित्यनेन न ब्रह्मात्मकप्रधानस्यो
पादानत्वकथनेन ब्रह्मणः सृष्ट्यादिव्यापारे उपकरणांतरनैरपेक्ष्य ॥ अनिमिषेण गुणत्रयादिति कालप्रधानयोः स्पष्टं प्रागपि सद्भावा
वगमेन तदा विजातीयवस्तुसत्वं दुर्वितर्क्येणेत्यनेन निमित्तत्वोपादानत्वोपयुक्ताचिंत्यसर्वज्ञत्वसर्वशक्तिसत्यकामत्वादिप्रभावत्वाव
त्वावगमेन स्वगतभेदसत्वं तयोरुपलक्षणत्वेन सजातीयजीवेन इत्सत्वं चोक्तं भवति ॥ १२ ॥ रजइति दैवेन भगवता चोदितात् रजःप्रधा
नान्महतः स्वतः सत्वप्रधानेपि महतः कार्योन्मुख्यदशापारं जसः तमसस्तयोरुभयोरप्यनुग्राहकत्वेन रजःप्रधानादित्युक्तं जात

नैमिषं निमिष क्षेत्रमयनं स्थानं तेषां तैः नैमिषक्षेत्रवासिभिः शौनकादिभिरेवमुक्तप्रकारेण पृष्ट उग्रश्रवाः सूतः भगवत्यर्पितं निहितमध्यात्मं अंतःकरणं येन सः तान्नैमिषायनान्प्रति श्रूयतामित्याह ॥ एवंविधानि वचनानि गतद्वंद्वं यथा स्यात्तथा नैकात्म्यज्ञानेन भगवता बादरायणेन स्वकृतग्रंथस्य तत्त्वज्ञोत्तवक्तृकमेण भविनी प्रवृत्तिमालोच्य तत्संदर्शनार्थं समस्तानि ॥ अत इदं वचनं द्वैपायनीयमेवेति सांप्रदायिकाः तच्छिष्यप्रशिष्यैः संदर्भीय विरच्य यस्मस्तानीत्यर्थः ॥ ७ ॥ एवमापृष्टः सूतो वृत्तवाराहकथाश्रवणजातहर्षो विदुरः प्रष्टुं तं स्वा

श्रम उवाच ॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः ॥ भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ॥ ७ ॥ सूत उवाच ॥ हरेर्धृतक्रोडतनोः स्वमायया निःशम्य गोरुद्धरणं रसातलात् ॥ लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह भारतः ॥ ८ ॥ विदुर उवाच ॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् ॥ किमारभत मे ब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ॥ ९ ॥ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥ १० ॥

यंभुवचरितं प्रक्ष्यमाणः परमप्रकृतान्प्रजासृष्टिभेदान पृष्टुं दिग्मात्रैकेन ॥ हरेरिति ॥ स्वमायया स्वसंकल्पेन धृतक्रोडतनोर्धृतवराहरूपस्य हरेस्ताली लालीला रूपं रसातलाद्गोर्भूमेरुद्धरणमवज्ञया हतं हिरण्याक्षं च निशम्य श्रुत्वा संजातहर्षो विदुरः मुनिं मैत्रेयमाह ॥ ८ ॥ उक्तिमेवाह त्रिभिः ॥ प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा प्रजासर्गे निमित्ते प्रजापतीन्सृष्ट्वा किमारभत किकुर्वत मे मह्यं प्रब्रूहि हे ब्रह्मन् तत्त्वमव्यक्तमार्गवित् व्यक्तमव्यक्तमतीन्द्रियं तस्य मार्गस्वरूपं वेत्तीति तथा न त्त्वं ॥ ब्रवीतु इत्यर्थः ॥ ९ ॥ मरीच्यादयो ये विप्राः स्वायंभुवो मनुश्चैव ते वै ब्रा

किंच महत्वे माहात्म्ये द्वैपायनाद्वैपायनदेहजो विदुर अनवर अन्यूनः सर्वात्मना समस्तभावेन माता पिता भ्राता निवासः शरणं सुहृदिति श्री
नारायण इत्युक्तभावेनेत्यर्थः ॥ कृष्णं भगवंतमाश्रितः तत्परान् भगवत्परांश्चानुव्रतोऽनुवर्तमानः सेवमान इत्यर्थः ॥ ३ ॥ एवं विदुरं प्रस्तुत्य
तत्प्रश्नः मनुपृच्छतीति किमित्यादिभिस्त्रिभिः तीर्थानां गंगादिपुण्यतीर्थानां सेवया त्रिषवणस्नानादिना विरजाः धूतबाह्याभ्यंतरमलः वि
दुरः कुशावर्तमित्यादिभिस्त्रिभिः तीवर्त्तं विल्वकनीलपर्वतकनखलाख्यानि पंचतीर्थानि गंगाद्वारे संति ॥ तत्र कुशावर्ते आसीनं तत्वविद्वरं
मैत्रेयं उपगम्य किं समपृच्छदनुपृष्टवानित्यर्थः ॥ ४ ॥ यत्किमन्वपृच्छत् किं न दिष्टमत्राह हे सूत तयोर्विदुरमैत्रेययोः संवदतोः संवादं कु

द्वैपायनादनवरो महित्वे तस्य देहजः ॥ सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ॥ ३ ॥ किमन्वपृच्छन्मैत्रे
यं विरजास्तीर्थसेवया ॥ उपगम्य कुशावर्त्त आसीनं तत्वविक्तम ॥ ४ ॥ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः
कथाः ॥ आपो गांगा इवाघघ्नी हरेः पादांबुजाश्रयाः ॥ ५ ॥ ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः रसज्ञः
को नु तृप्येत हरिलीलामृतं पिबन् ॥ ६ ॥ र्वतोऽमलाः शुद्धा एव लोकपाविन्यः प्रवृत्ता अभवेयुः अमलत्वे हेतुः अंतः हरेर्भगवतः पादांबुजाश्रयाः
पादांबुजप्रसृताः ॥ अघघ्नाः उपस्पृशानामघनिवर्तकाः गांगा गंगासंबंधिन्यः आप इतिवेति ॥ ५ ॥ कीर्तन्योदारकर्मणः कीर्तनीयजगदुद्धा
रादिविस्तरचेष्टितस्य भगवतस्ताः कथा नोऽस्मभ्यं कीर्तय कथय ते तुभ्यं भद्रं मंगलमस्तु पुनः पुनः भगवत्कथामेव किं पृच्छसीत्याह र
सज्ञः भगवत्कथारसज्ञः हरेर्लीलैवामृतं तत्तत्पिबन् को नु तृप्येत न कोपीत्यर्थः अतोऽतृप्यन्पृच्छामीत्यभिप्रायः ॥ ६ ॥

रमेवस्तेनापिवक्तं ननुविदुरपृष्टंनापिमैत्रेयेणोक्तं स्तेनेनवक्तव्यं सतशौनकसंवादस्यशुकपरीक्षितसंवादरूपत्वात यापिविदुरप्रश्नेनैव
पारीक्षितप्रश्नोपिपृष्टस्मायइत्यभिप्रेत्यसाक्षाद्विदुरप्रश्नमेवपृच्छतिशौनकः महीइतिहे सौतेसूतस्यरोमहर्षणस्यपुत्रमहींभूमिंप्रति
ष्ठीयथास्थानमथास्यप्रापपश्चात्स्वायंभुवोमनुरवरमर्वाचीनंजन्मयेषांतेषांमार्गोयमस्पतेइतिमार्गः धर्मादिचतुर्विधरूपःपुरुषार्थ
स्तस्मैकानिद्वाराण्युपायानन्वतिष्ठदनुष्ठितवान् यद्यदाचरतिश्रेष्ठ इतिन्यायेनकाम्युरुपार्थोपायान्लोकमर्यादापालनायस्व
यमन्वतिष्ठदितिस्पष्टः ॥१॥ एवंप्रकृतमनुचरित्वंपृष्ट्वापरमप्रकृतप्रजास्पष्टिभेदाः वैदुरिकप्रश्नेनैवपृष्टप्राया इत्यभिप्रेत्यवैदुरिक

क्षत्तामहाभागवतः कृष्णस्यैकांतिकः सुहृत ॥ यस्तत्याजाग्रजंकृष्णेसापत्यमघवानिति ॥२॥ छ

प्रश्नपिपृच्छिषयाप्रथमंविदुरंप्रशंसतिक्षत्तेत्यादिद्वाभ्यां क्षत्ताविदुरः महाभागवतः निरतिशयभगवद्भक्तियुक्तः ॥ अतएवकृष्ण
स्यभगवतः एकांतिकः असाधारणसुहृन्निरतिशयप्रीतिविषयः ॥ अत्रप्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइतिभगवदुक्त
ीत्याभगवानपितस्यसुहृदितिबोध्यं सुहृत्त्वमेवस्पष्टयतियः क्षत्तासायत्यंदुर्योधनाद्यपत्यसहितमग्रजंधृतराष्ट्रंकृष्णेभगव
त्युघवान्कृतापराध इतितत्याजत्यक्तवान् श्रीकृष्णस्तोकंमंत्रनादरात्भगवत्प्रियेषुधर्ममर्यादानुवर्तिषुपांडुतनयेषुद्रोहाचरणे
चकृष्णेऽघवानितिभावः ॥२॥

णतद्विरण्यक्षवधप्रत्तांतरूपं भगवच्चरितं महापुराणसंपादकमत एवाल्लंभशं पवित्रं धर्म्यं धनसंपादकं यशस्यं यशः संपादकमायुषः आ
शिष्यं प्रार्थितपुरुषार्थानां च परं पद्यंतेऽनेनेति पदं चं तद्साधनम् युधि युद्धे प्राणानामिंद्रियाणां च शौर्यवर्द्धनं सामर्थ्यवर्द्धनं एवमस्वां
तरफलमुक्तं प्रधानफलमाह ॥ अंगहेराजन् श्रावतां नृणां मंते देहांते नारायणो गतिः फलं तत्प्राप्तिरेव फलमित्यर्थः ॥३८॥ इति तृ
तीये एकोनविंशः ॥१९॥ द्वितीयस्कंधांते यथासौ भगवान्स्तत स्तत्ना भागवतो भमद्दत्यादिना विदुरमैत्रेयसंवादे शौनकेन पृष्टे राज्ञा
परिक्षिता पृष्टे पदवो च दित्यादिना तयापृष्टे एवं विदुरमैत्रेयसंवादो राज्ञा पृष्टः शुकेनोक्तः अतो राजशुकप्रश्नोत्तरानुसारेणैव र

एतन्महापुराणमलं पवित्रं धर्म्यं यशस्यं पदमायुराशिषाम् ॥ प्राणेंद्रियाणां युधि शौर्यवर्द्धनं नारायणोंऽते गतिरंग शृण्व
तावताम् ॥३८॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे एकोनविंशोऽध्यायः ॥१९॥ शौनक उवाच ॥ महीं प्रति
ष्ठामध्यास्य सौते स्वायंभुवो मनुः ॥ कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनाम् ॥१॥ विदुरमैत्रेयसंवादं वर्णयामीत्यु
पक्रम्य सुतेनैकोनविंशाध्यायगणेन वर्णितेसति पुनः शौनकः सर्वे स्वायंभुवः सम्राडित्यादिना विरएएयद्वाख्यभार्यया साकमि
ति मैत्रेयेणोपक्रांतं स्वायंभुवचरित्रं प्रष्टुकामः परमप्रकृतानादशमाध्यायादौ अंतर्हिते भगवति ब्रह्मा लोकपितामहः प्रजाः ॥ससर्ज
कतिधा देहिकामानमीर्दि भुरिति विदुरएष्टानदेहिकमानसिक प्रजासृष्टिभेदान्कांश्चिन्मैत्रेयेणाव्यर्णितानेवसतमुखाद्राश्रु
त्वावशिष्टानंतद्वेदानप्रकृतमनुचरितं च पृच्छति शौनकः नवभिः श्लोकैः यद्यपि परीक्षित्प्रश्नएव शौनकेन पृष्टव्यः शुकोत्त

र्त्तकीर्त्तीनामन्येषामपि कथामात्रश्रुत्या मोहो भवेत् किं वक्तव्यं तस्य भगवतः कथामुपश्रुत्य मोहो भवेदिति किं पुनर्वक्तव्यमित्यर्थः ॥३४॥ एवं केमुत्यन्यायेन भगवत्कथाश्रवणादानंदावाप्तिमभिधायाश्रितार्त्तिनिरसनैकशीलस्याश्रितसुलभस्याप्यर्थितपुरुषार्थदस्य भगवतः कथां कृतघ्नं मंतरेण को न सेवेतेत्याह द्वाभ्याम् यद्वेति ॥ क्षेपेण मकरेण ग्रस्तं गृहीतं स्वचरणांबुजं ध्यायंतं गजेंद्रं करेणूनां हस्तिनीनां क्रोशंतीनां रुदंतीनां यो भगवानंहसः क्लेशात् तरुण ग्रसनदुःखात् अमोचयत्त्याजयितवानित्यर्थः ॥३५॥ तं भगवंतं कथंभूतं मनन्यशरणैः रक्षणांतररहितैः रुभिर्नरैः ऋजुभिरुपायैः निःशेषसुखेनाराधयितुं शक्यमसाधुभिर्दुराराध्यं कृतज्ञः को न सेवेत कृतघ्नानंतरेण सर्वोपि सेवेतैवेत्यर्थः

यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणांबुजं ॥ क्रोशंतीनां करेणूनां कृच्छ्रतोऽमोचयद्द्रुतम् ॥३५॥ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥ कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥३६॥ यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः ॥ शृणोति गायत्यनुमोदतेंऽजसा विमुच्यते ब्रह्मवधादपि द्विजाः ॥३७॥

र्थः ॥३६॥ एवं भगवत्कथासर्वैरप्यपारेयेत्यभिधाय प्रकृतहिरण्याक्षवधवृत्तांतश्रवणकीर्तनानुमोदनफलं सर्वोत्तरं प्रधानं चाह ॥ यद्वेति द्वाभ्यां महदद्भुतं भृशं विस्मयनीयं कारणसूकरात्मनः जगदुद्धरणहेतुसूकरशरीरस्य भगवतो विक्रीडितं क्रीडारूपं हिरण्याक्षवधं यो द्विजः शृणोति गायति कथयति अनुमोदते ऽभिनंदति वा स अंजसा आशु ब्रह्मवधाद्ब्रह्मवधाद्ब्रह्महत्याख्यमेधोर्भ्योनापरं पुण्यपापयोरितिनिरतिशयपापत्वेनकीर्तिता ब्रह्मवधादपि विमुच्यते ॥३७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अतिदुष्करमिदं भगवताकृतमितिनित्वयानविस्मयः कार्यइत्याह ॥ मयेति हे सुमित्र विदुर कृतावतारस्य धृतवराहरूपस्य हरेश्चेष्टितं मेमया ते तुभ्यमनूक्तमनुक्रम्यो
क्तं ॥ यथायथा ऽनायासेनैवामारितं कथितं तथाउदारविक्रमउरुपराक्रमः हिरण्याक्षः मृधेयुद्धे क्रीडनवत् क्रीडनमिवनिराकृतः भगवतेतिशे
षः यथाहिरण्याक्षइतिपाठे यथायेन प्रकारेण क्रीडनवद्भगवताहिरण्याक्षोनिराकृतः तं प्रकाकारमतिक्रम्यैव यथानूक्तं गुरूक्तिमन
तिक्रम्य हरेश्चेष्टितं मया ऽवादीतिनिगमः नपरत्वेनान्वेतव्यम ॥३२॥ एवं निशम्यवाचोवदतोमुनिरित्यादिनोपक्रांतं भगवच्चरित्रप्रसक्ता
नुप्रसक्तं स्वायंभुवमनुचरित्रतदनुप्रसक्तवराहचरित्रप्रश्नोत्तररूपं विदुरमैत्रेयसंवादमुपसंहरतिभगवान् श्रीशुकः यावदध्यायं इत्यु

मयायथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितं ॥ यथाहिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः
॥३२॥ सूत उवाच ॥ इति कौषारवाख्याताम् आश्रुत्य भगवत्कथाम् ॥ क्षत्तानंदं परं लेभे महाभागवतोन्रप ॥३३॥ अन्येषां
पुण्यश्लोकानामुद्दामयशसां सतां ॥ उपश्रुत्य भवेन्मोदः श्रीवत्सकस्य किं पुनः ॥३४॥

क्तप्रकारेणकौषारवाख्यातां
मैत्रेयकथितां भगवत्कथां भगवत्कथागर्भां स्वायंभुवकथामित्यर्थः ॥ भगवत्कथायाएवप्राधान्येकथनीयत्वाद्भगवत्कथामिति नि
र्देशः यद्वा भगवत्कथानिगमनेनैव तदुपक्रमरूपा स्वायंभुवकथानिगमितप्रायैवेत्यभिप्रेत्य भगवत्कथामित्युक्तं ॥ आश्रुत्याकर्ण्य
महाभागवतः क्षत्ताविदुरः उत्कृष्टमानंदं लेभे हे नृप परीक्षिद्राजन् ॥ महाभागवतइतिहेतुगर्भं यतोसौ क्षत्ता महाभागवतस्ततो भग
वत्कथामाश्रुत्यपरमानंदं लेभे इत्यर्थः ॥३३॥ एतदेव कैमुत्यन्यायेनाह ॥ अन्येषामिति पुण्यशीलानां पुण्यैकाचाराणां उद्दामयशसांउद्दी

योगसमाधि
एतदेव प्रपंचयति यद्योगिनोऽसतः अचेतनपरिणामाल्लिंगाद्देहान्मुमुक्षया मोक्तुमिच्छया मोक्तुमिच्छया संसारनिवृत्तये इत्यर्थः
योगेन यद्वा कर्मज्ञानयोगाभ्यां मुक्तोयः समाधिस्तेन यद्वा युज्यते इति योगो विवेकविमोकादयः तद्युक्तोयः समाधिस्तेन रहसा कांते यं भगवं
ते ध्यायंतिभजंति तस्यैव भगवतः पदादेनं दैत्यश्रेष्ठो हतः वराहपूर्वपादयोरेव करत्वाकारेण हन्निति चाविरुद्धं ॥ मुखं भगवतो मुखं प्र
पश्यंस्तनुशरीरं उत्ससर्ज तत्याज हीत्वा अर्थैर्य ॥२८॥ एतौ हिरण्याक्षहिरण्यकशिपू अस्य भगवतः पार्षदौ शापाद्ब्राह्मणशापात् सज्जतिमसु
रयोनिं यातौ प्राप्तौ पुनः कतिपयैर्जन्मभिः स्थानं भगवतस्थानं प्रपत्स्येते गमिष्यतः ॥ २९ ॥ एवं तत्संस्थितिं प्रशस्य भगवंतं प्रणमंतः

एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिं ॥ पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः ॥ २९ ॥ नमो नमस्तेऽखिलयज्ञतंतवे
स्थितौ गृहीतामलसत्त्वमूर्तये ॥ दिष्ट्याहतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ॥ ३० ॥ एवं हिरण्याक्ष
मसह्यविक्रमं समादयित्वा हरिरादिसूकरः ॥ जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादिभिः ॥ ३१

आहुर्देवाः ॥ अखिलयज्ञतंतवे समस्तयज्ञोत्पत्तिहेतवे प्रतनवे प्रवर्तकायेत्यर्थः ॥ स्थितौ जगद्रक्षणनिमित्ते गृहीता त्वच्छेशोपाता अमलारजस्तमोभ्यामन
नुविद्धा सत्त्वमूर्तिर्येन तस्मै तेनेन नमो नमः आहरणाविरुक्तिः जगतां लोकानां अरुंतुदः मर्मच्छेता अयमसुरः दिष्ट्या दैवाद्धतः हे ईश त्वत्पादयोर्भक्त्या वयं नि
र्वृताः ॥ सुखिताः ॥ वत्याहक्तिरेवाभिलषितं श्रेयः साधनी अतएव वयं निरस्तशत्रवः सुखिता इति भावः ॥३०॥ एवं विदुरेण तेनैव तु मुनिश्रेष्ठ हरिणाय
सम्यक्छित्वा हत्वा छित्वा एवं हिरण्याक्षवधवृत्तं सप्रपंचमभिधाय तन्निगमयति मैत्रेयो द्वाभ्यां असह्यविक्रमं हिरण्याक्षमेवयुक्तप्रकारेण साधयि
त्वा निहत्य आदिसूकरः भगवान्पुष्करविष्टरादिभिः समीडितः संस्तुतः अखंडितः अनंतः उत्सवो यस्मिन् तं स्वं स्वीयं लोकं वैकुंठं जगा

तदा भर्तुः कश्यपस्यादेशं लोकभावनो भगवानवतीर्योऽस्यां इत्येवंरूपं निर्देशं स्मरंत्या दितेर्हृदि सहसा आशु वेपथुः कंपः समभवदुत्पन्नः स्तनाद्रक्तं
रुधिरं च प्रसुस्रुवे ॥२३॥ स्वमायासु विनष्टासु असुरः भूयः ॥ पुनः स्वाभिमुखमागत्य रुषा केशवं उपगूहमानः बाह्वंतरे निधाय संघटयन्नमुं केशवं
बहिर्बाहुमध्याद्बहिरवस्थितं ददर्श ॥२४॥ वज्रसारैर्वज्रवद्दृढैर्मुष्टिभिर्निघ्नंतं ताडयंतं तमसुरं करे करेण हस्तेन कर्णमूलेऽहन् जघान यथा

तदा दितेः समभवत्सहसा हृदि वेपथुः स्मरंत्या भर्तुरादेशं स्तनाच्चासृक्प्रसुस्रुवे ॥२३॥ विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवं रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः ॥२४॥ तं मुष्टिभिर्विनिघ्नंतं वज्रसारैरधोक्षजः ॥ करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः ॥२५॥ स आहतो विश्वसृजा ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः ॥ विशीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो लुलितो नभस्वता ॥२६॥ क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम् ॥ अजादयो वीक्ष्य शशंसुरागता अहो इमं को नु लभेत संस्थितिम् ॥२७॥ यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया ॥ तस्यैष दैत्यऋषभः पदाहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ॥२८॥

मरुत्पतिरिंद्रस्त्वाष्ट्रं विश्वरूपं ॥२५॥ विश्वसृजा
भगवताऽवज्ञया निमित्तभूतया आहतः सोऽसुरः भगवता वहेलनं तत्राथ निमित्तमित्यवज्ञयेत्यनेन सूचितं परिभ्रमद्गात्रं शरीरं यस्य
विशीर्णा विच्छिन्ना बाहवो यस्य सोऽपतत् यथा नभस्वता वायुना लुलित उत्पाटितः नागेंद्रः महाद्रुमः ॥२६॥ क्षितौ भूम्यां शया
नेन याप्यप्रतिहततेजस्कं भयंकरदंष्ट्रं परिदष्टाधरोष्ठं तमसुरमागता अजादयो ब्रह्मादयो दृष्ट्वा शशंसुः तदेवाह आश्चर्यं इ

भा॰ स॰

॥१२५॥

मायाः प्रपंचयति ॥ प्रववुरित्यादिभिश्चतुर्भिः प्रचंडाः प्रचंडवेगा वायवः पांसवं पांसुकृतं तमः ऐरयन्प्रसृतवंतः संतः प्रववुः ग्रावाणः अ
श्मानि दिग्भ्यः क्षेपणैः यंत्रविशेषैः प्रहिताः प्रयुक्ता इव निपेतुः ॥ १८ ॥ पूयं दुर्गंधि अस्त्रं कुरक्तं विट् विष्टा सृपादीन सकृत्पुनः वर्षद्भिः ॥ सवि
द्युत्स्तनयित्नुभिः विद्युत्सहितं यथा तथा धनयद्भिर्मेघैर्द्यौः नष्टभगणोऽस्मनेन चतुर्मुखोक्तसंध्यावेलातिक्रमः सूचितः अह्नि नक्षत्राणाम
संभवादिति भावः ॥ १९ ॥ गिरयः पर्वताः नानायुधमुचः नानायुधानि मुंचतः प्रत्यदृश्यंत अभवन् तथा यातुधान्यश्च प्रत्यदृश्यंत कथंभूता दिग्वा

प्रववुर्वायवश्चंडास्तमः पांसवमैरयन् ॥ दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥ १८ ॥ द्यौर्नष्टभगणाभ्रौघैः सविद्युत्
स्तनयित्नुभिः ॥ वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत् ॥ १९ ॥ गिरयः प्रत्यदृश्यंत नानायुधमुचोऽनघ ॥ दिग्वा
ससो यातुधान्यः शूलिन्यो मुक्तमूर्द्धजाः ॥ २० ॥ बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः ॥ आततायिभिरुत्सृष्टा हिंस्रा
वाचोऽतिवैशसाः ॥ २१ ॥ प्रादुःकृतानां मायानामासुरीणां विनाशयत् सुदर्शनास्त्रं भगवान्प्रायुंक्त दयितं त्रिपात् ॥ २२

ससः दिगंबराः शूलिन्यः ॥ शूलधारिण्यः मुक्ताः प्रसारिता मूर्द्धजाः केशा याभिस्ताः ॥ २० ॥ तथा आततायिभिर्हिंसाशीलैर्बहुभिर्यक्षरक्षोभिः प
त्तिभिः पदातिः पत्त्यादिभिश्चोत्सृष्टाः प्रयुक्ताः अतिवैशसा असुग्राहिंस्राः क्रूराः छिंधि भिंधीत्येवंरूपाः वाचः प्रत्यदृश्यंत अश्वादिशब्दा
देरश्वाद्यारूढा उच्यंते ॥ २१ ॥ प्रादुःकृतानां प्रादुर्भूतानामासुरीणामसुरसंबंधिनीनां मायानां विनाशयत् विनाशयितुं मायामिति द्वितीयार्थे
षष्ठी ॥ विनाशनमिति पाठे तु यथाश्रुतैव षष्ठ्युपपन्ना दयितं स्वस्य निरतिशयप्रियं सुदर्शनास्त्रं त्रियाद्भगवान् ॥ त्रिपाच्छब्देन त्रिपाद्विभूतिमानु

॥१२५॥

ओजसा वीर्येण दैत्यानां मध्ये महाभटेन महासुरेणार्पितं प्रयुक्तं उदीर्णा उद्गता दीधितयो यस्य तत् दंतःखे आकाशमध्ये च
कालस्य काशशानं तत् त्रिशूलं निशातनेमिना विशितधारेण चक्रेण चिच्छेद हरिरिंद्रो यथा उज्झितं तार्क्ष्यपतत्रं तार्क्ष्येणोज्झितं सत्पक्षपक्षमिवेत्यर्थः
दुरात्मनु देवान्विजित्य गरुतकलशानयता गरुडेनेंद्र प्रयुक्तस्य वज्रायुधस्य मोघस्य मानं हातुं पन्नमेकं सत्कृतं चेंद्रो वज्रेण चिच्छेदेतीतिहासो
ऽनुसंधेयः ॥१४॥ आरिणा चक्रेण स्वशूले बहुधा कृत्ते छिन्ने सति प्रवृद्धरोषो यमसमोऽसुरः प्रसेत्याभिमुखमागत्य स्वकठिनतरमुष्टि

नरोजसा दैत्यमहामरार्पितं चकासदंतःखउदीर्णदीधिति ॥ चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितं
१४ ॥ वृक्णे स्वशूले बहुधारिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत ॥ प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यांतरधीय
तासुरः ॥१५॥ तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः ॥ नाकंपत मनाक्कापि स्रजा हत इव द्विपः ॥१६॥ अथोरुधाऽसृज
न्मायां योगमायेश्वरे हरौ ॥ यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥१७॥ नाविभूतिमत्त्वात् लक्ष्मी आश्रयभूतं विस्तीर्णं
हरेर्भगवनः उरः प्रहृत्य प्रताड्यांतरधीयत अंतर्हितवान् ॥१५॥ हे क्षत्तः तेनासुरेणेत्थं मुष्टिना आहतस्ताडित आदिवराहो भगवान्मना
गीषदपि नाकंपत न चलितवान् स्रजा पुष्पदाम्ना हतो गज इवेति ॥१६॥ अथ यातर्धानानंतरं योगमायेश्वरे युज्यंते इति योगाः तासां मा
यानां ईश्वरे स्वसंबंधिनी नामाश्चर्यशक्तीनां नेतरि हरौ भगवत्युरुधा बहुधा मायाः असृजत ॥ कथंभूता मायाः ॥ या असृजद्दिसु च्चेते
तत्राह यां मायां विलोक्य दृष्ट्वा त्रस्ता भीताः सर्वाः प्रजाः अस्य विश्वस्योपसंयमं प्रलयं मेनिरे मन्यतम् ॥१७॥

भा०तृ०

॥१२४॥

ततआयुधमादत्स्वगृहाणयटस्वयतस्त्वमवश्यंजिगीषसिइत्याहहचोक्तवांश्चएवमुक्तःसंअसुरःतयापदाताडितयापुनर्गदांत
यागदयाभूयःपुनर्भगवंतंताडयन्भृशंव्यनदत्नादंचकार॥१०॥तामसुरेणप्रयुक्तामापततीमागच्छंतीगदांवीक्ष्यभगवा
न्समवस्थियथावदेवावतिष्ठन्प्राप्तांस्वसमीपंप्राप्तां॥यदागरुत्मान्पन्नगींसर्पइवलीलयाजग्राह॥११॥एवंस्वपौरुषेस्ववी
र्येप्रतिहतेविहतेसतिहतःविगतोमानोगर्वोयस्यसोऽसुरःअतएवविगतप्रभःविनष्टतेजाःहरिणादीयमानामपिगदा

आहचायुधमादत्स्वघटस्वत्वंजिगीषसि॥इत्युक्तःसतयाभूयस्ताडयन्व्यनदद्भृशम्॥१०॥तांसआ
पततींवीक्ष्यभगवान्समवस्थितः॥जग्राहलीलयाप्राप्तांगरुत्मानिवपन्नगीम्॥११॥स्वपौरुषेप्रति
हतेहतमानोमहासुरः॥नैच्छद्गदांदीयमानांहरिणाविगतप्रभः॥१२॥जग्राहत्रिशिखंशूलंज्वल
ज्ज्वलनलोलुपम्॥यज्ञायधृतरूपायविप्रायाभिचरन्यथा॥१३॥नैच्छद्गृहीतुमितिशेषः॥१२॥किंतुत
त्रिशिखंत्रिस्रःशिखाअग्रभागायस्यतंज्वलनयोज्वलनअग्निस्तद्वल्लोलुपंस्वकार्यकरणव्यग्रंशूलंधृतवराहरूपाय
यज्ञायतन्मूर्तयेजग्राहप्राहिणोत्यज्ञायधृतरूपायेतिसर्वयज्ञलिंगेसर्वयज्ञभोक्तरितत्फलप्रदेस्वेच्छोपात्ताप्राकृतदिव्य
वराहरूपेभगवतिशूलस्यस्वकार्याकरणंएतदेवदृष्टांतेनस्पष्टयति॥विप्रायब्रह्मविदेप्रमुद्दिश्यअभिचरन्मारणार्थ
यागंकुर्वन्यथानमारयतितथाइत्यर्थःज्वलन्समिद्धः॥१३॥

॥१२४॥

ते भगवतास्त्वं दितिपुत्राभिधेवदितिपुत्र इति नाम्नाभ्यवह्रियमाणेन स्वपार्षदमुख्येन विषज्जमानं विशेषणसंगं प्राप्नुवंतमग्र
ग्रचक्रसंभ्रमयुक्तचक्रं प्रतिदृष्टेति शेषो वा ॥ अतद्विदां चक्रप्रभावमविदां खेचराणां चित्रा बहुधा वाचः अमुमसुरं जहि ते
तुभ्यं स्वस्त्यस्त्वित्येवमादिकाः तत्र युद्धदेशे आसन् स्म बभूवुरित्यर्थः ॥ ६ ॥ स असुरः पद्मपलाशाक्षमात्तरथांगचक्रं येन तं भ
गवंतं निशाम्य दृष्ट्वाऽग्रतो व्यवस्थितं च विलोक्यामर्षेण क्रोधेन परिप्लुतानि क्षुभितानीन्द्रियाणि यस्य सः पुरुषाक्रोधेन स्व

तं व्यग्रचक्रं दितिपुत्राभिधेन स्वपार्षदमुख्येन विषज्जमानं ॥ चित्रा वाचोऽतद्विदां खेचराणां तत्र
स्मासन् स्वस्ति तेऽमुं जहीति ॥ ६ ॥ स तं निशाम्यात्तरथांगमग्रतो व्यवस्थितं पद्मपलाशलोचनम् ॥ विलो
क्य चामर्षपरिप्लुतेन्द्रियो रुषा स्वदंतच्छदमादशच्छ्वसन् ॥ ७ ॥ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्नि
व ॥ अभिप्लुत्य स्वगदया हतोसीत्याहनद्धरिम् ॥ ८ ॥ पदा सव्येन तां साधो भगवान्यज्ञसूकरः ॥ लील
या मिषतः शत्रोः प्राहरद्वातरंहसम् ॥ ९ ॥ स्वदंतच्छदं स्वाधरोष्टमादशन्नसमंतादष्टवान् ॥ ७ ॥ करालदंष्ट्रः भयं
करदंष्ट्रोऽसुरः चक्षुर्भ्यां दहन्निव संचक्षाणः समकंपप्रपश्यन्नभिद्रुत्याभिमुखमागत्य हरिं भगवंतं हतोसीत्युच्चरन्स्वगदया
ऽहनत्प्रजघान ॥ ८ ॥ यज्ञसूकरः यज्ञमूर्तिर्गादिसूकरो भगवान्वातरंहसं वायुवेगां तामसुरप्राप्तामेव गदां सव्येन पदा वा
मपादेन शत्रोर्मिषतः पश्यतः सतः लीलया प्राहरत् ॥ ९ ॥

अतो धर्मेभ्यं तेज्ञानम॥ द्रव्यमयिनित्यमिमेवेति धर्मिनोपि कूटस्थनोपयति : पृथिव्यादीनां तु स्वरूपस्वभावतस्त्वविकारइति न कूटस्थत्वं अ
त आत्मनः॥ सततमेकरूपत्वात् देहस्य प्रतिक्षणपरिणामित्वात् पुरुषार्थत्वरूपत्वाद्देहप्रयुक्तासु हृष्टासु प्राप्तासु संपत्सु विपत्सु च सत्स्वपि यस्त्व
त्वयि विवेचनं च तनुगानं न विक्रियेत संपद्यपत्ययुक्त हर्षशोकाभ्यां न युज्यत इत्यर्थः कथं सति शरीरे तत्प्रयुक्ते हर्षशोकाऽसंबंधस्तत्राह मयि
निरतिशयप्रीतिविषये वर्द्धमानहृदये सति सौहृदप्राशेन सुहृद्भावधर्मो निरतिशयप्रेमोच्यते तेन प्रीतिरूपमुपासनं लसनेव दृढभावेन तस्य विजा
तीयप्रत्ययानन्तराव्यवहितत्वं तथा च प्रत्ययान्तराव्यवहितमद्विषयनिरतिशयप्रीतिरूपभक्त्या विस्मृतदेहधर्मो हर्षशोकाभ्यां न युज्यत इत्यर्थः
सं च सति॥१३॥ अतः सुखदुःखे च देहप्रयुक्ते समः समत्वं माम मम कथं संभवेत्तत्राह विजितेंद्रियाशयः वशीकृतबाह्येंद्रियान्तःकरणः जिते

श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात्षष्ठमंशं हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति॥१४॥ एवं द्विजा
ग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः॥ ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः॥१५॥

द्रियस्य नत्वसुखदुःखयोः साम्यं संभवेदेवेत्यर्थः अतएव समानामधमोत्तमाः यस्य समः तिर्यङ्मनुजदेवादिषु देहातिरिक्तसर्वात्मसामान्या
नुसंधानपरस्तेषां च ब्रह्मात्मकत्वेन साम्यधीत्वं अखिललोकरक्षणविधत्वं कथमेकेन मया तत्कर्तुं शक्यं तत्राह॥ मयेश्वरेणऽपाश्रि
ताः संपादिताः अपमत्वादयोयेऽखिला लोकास्तैः संयुतः॥१४॥ ननु मम मुमुक्षोमनुत्साह्यकि मखिललोकरक्षणविधस्वेसु च तेन तत्राह
श्रेयइति द्वाभ्यां प्रजापालनमेव श्रेयः साधनं समीहितपुरुषार्थसाधनमित्यर्थः कुतः यत् यस्मात् प्रजापालनात् सांपराये देहवियोगे प्रजाभि
र्दत्तं तत् सुकृतं तस्य षष्ठमंशं हर्ता हरति अन्यथा लोकरक्षणाभावे प्रजानामरक्षिता प्रसुतप्रजापीडनादिनाहृतं करं स्वामित्वग्राह्यभागं हरःत

तस्मात् यदि प्रजाः पालयसि धर्मतत्त्वज्ञानं वा मुक्तिरपि सुलभा स्यादित्याह ॥ एवमिति ॥ द्विजाग्र्याणामनुमतश्चासावनुवर्तनश्च यस्य पाठे नुमतोनुवर्तन
श्च धर्मप्रधानः अनभिसंहितफलस्ववर्णाश्रमोचितधर्मप्रधानः ॥ अन्यतमः प्रजानां मध्ये अन्यतमः इव स्वस्मिन् स्वातंत्र्यमनारोपयेत्यर्थः ॥
अविनाशित्वात् यदि त्वाः भवेः तर्ह्यचिरेणाऽल्पेन कालेन गृहानुपगतान् सिद्धान् सनकादीन् अनुरक्ताः स्वस्मिन् अनुरागयुक्तान् लोकाः यस्य
स त्वं द्रक्ष्यसि ते न परिहृतत्वान्मनत्वं यास्यसीत्यर्थः ॥१६॥ किंच हे मानवेंद्र मत् सकाशात् कंचिद्वरं वृणीष्व तेन च गुणाः प्रश्रयादयः शीलं निर्मिन्त

वरं च मत्कंचन मानवेंद्र वृणीष्व तेहं गुणशीलयंत्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥१६॥ मै
त्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ॥ अनुशासित आदेशं शिरसा जगृहे हरेः ॥१७॥ स्पृशंतं पादयोः
प्रेम्णा व्रीडितं स्वेन कर्मणा । शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥१८॥ भगवानपि विश्वात्मा पृथुनोपहृतार्हणः ॥
समुज्जिहानया भक्त्या गृहीतचरणांबुजः ॥१९॥

गादिभावस्तैर्मे यंत्रितः वशीकृतोहं तद्रहितैस्तु मखैर्वा योगैः तपोभिः ॥ कृच्छ्रचांद्रायणादिभिर्योगेन वा नाहं सुलभः कुतः यत्यस्मात् समं चित्तं येषां
तेष्वेव वर्तितुं शीलमस्य सोहं ॥१७॥ स विश्वजित् पृथुः लोकगुरुणा विष्वक्सेनेन भगवता अनुशिष्टः ॥ हरेरादेशमाज्ञां शिरसा जगृहे अ
नीवाहतेवाभिसर्थः ॥१८॥ ततः पादयोः क्षमापयितुं स्पृशंतं स्वेन स्वीयेन अश्वहरणादिकर्मणा व्रीडितं लज्जितं शतक्रतुमिंद्रं प्रेम्णा परि
ष्वज्यालिंग्य तस्मिन् विद्वेषं विससर्ज अमाक्षीनाहेति विस्मये आह्नीपराधजनितविद्वेषं तदेव विससर्जेति विस्मयते ॥१९॥

नतो विश्वात्मा सर्वात्मा भगवानपि पृथुनाउपहृतं समर्पितं अर्हणं अर्घ्यादिकं यस्य समुज्जिहानस्य मुद्रिकया भक्त्या गृहीतौ चरणौ अंबुजे इव यस्य
प्रस्थानाभिमुखः स्वलोकं प्रतिप्रयाणाभिमुखोपि अनुग्रहेण विलंबितः संजातविलंबः सतां भक्तानां सुहृत् निरतिशयप्रीतिमान् एवं पृथुं पश्यन्
पद्मदलवद्विशाले अक्षिणी यस्य सः ॥ पद्मपत्रविशालाभ्यामक्षिभ्यां पश्यन्निति भावः न प्रतस्थे न ययौ विमृष्टार्थः ॥२०॥ २१॥ एवं भगवतो भक्तेपृथ्यो
कृपातिरेक उक्तः ॥ पृथोर्भगवति भक्त्युद्रेकमाह स इति द्वाभ्यां स आदिराजः पृथुः बद्धांजलिः नेत्राश्रुपूर्णलोचनः ॥ अत एव हरिं अवलोकितुं

प्रस्थानाभिमुखोप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम् ॥२०॥ स आदिराजो रचितांजलिर्ह
रिं विलोकितुं नाशकदश्रुलोचनः ॥ न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥२१॥ अथावमृज्याश्रुक
लां विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम् ॥ पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः ॥२२ पृथुरुवाच ॥
वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम् ॥ ये नारकाणामपि संति देहिनां तानीश कैवल्यपते वृणे न च ॥२३

नाशकत् न समर्थोऽभूत् ॥ बाष्पविक्लवः अधृष्टस्तूष्णीमवस्थितः सन् किंचिदपि नोवाच एकं तु अमुं हरिं हृदा उपगुह्य आहृत्य संश्लिष्य आलिं
ग्येति अधात् धृतवान् ॥२२॥ अथानंतरं अश्रुकलां अश्रुकणान् हस्तेनापमृज्य ॥ अतृप्तयोर्दृशोर्गोचरं विषयभूतं यदा चरणेन क्षि
तिं स्पृशंतं अयं भावः न खलु देवाः पदा भुवं स्पृशंति अतः कृपाया पारवश्यात् नं हरिमात्मानं विस्मृतवानिवेति उरंगद्विषो वैन
तेयस्य उन्नते अंसे स्कंधे विन्यस्तहस्ताग्रं येन तं पुरुषं परमपुरुषं आह उवाच ॥२३॥

भा.द.
॥१२०॥

मत्वयदुक्तं वरं वृणीष्वेति तत्राह वरानिति हे विभो वरदानां ब्रह्मादीनां ईश्वराद्वरदात्त्वत्तः सकाशात् बुधः ॥ अर्थकामादीनां सातिशयत्वं नश्वरत्वं च जानन् वरान् कथं वृणीते ॥ कीदृशान् ये वरा गुणविक्रियात्मनां सत्वादिगुणानुसारेण विक्रिया विकारः ॥ यस्मिन्नात्मनि स्वभावे आत्मा स्वभावो येषां नारकाणां संसारिणामपि देहिनां सन्ति तेषामपि भोग्या इत्यर्थः ॥ तस्मात् हे कैवल्यपते मुक्त्यधिपते मुक्तिप्रदेत्यर्थः हे ईश्वर सर्वांतरत्वात् क्षुद्रान् न वृणे ॥२४ तर्हि कैवल्यमेव वरय तत्राह ॥ नेति ॥ हे नाथ महत्तमानां भागवतानां अंतर्हृदयान्मुखद्वारेण निर्गतो भवत्पदांबुजमकरंदो यशः ॥ श्रवणादि सुखं यत्रास्ति नाहं तत्कैवल्यमपि तच्च कामयेन वृणे तर्हि किं कामयसे तत्राह ॥ तद्गुणश्रवणाय मे मह्यं कर्णायुतं कर्णानामयुतं अयुतं

न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणांबुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥२४॥ स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः ॥ स्मृतिं पुनर्विस्मृततत्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥२५॥ यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते सकृत् ॥ कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥२६॥

शादृशमानंत्यपरं गुणानामानंत्यादनंतगुणश्रवणार्थं अनंतश्रोत्राणि विधत्स्व देहि ॥ एष एव मयाभिमतो वर इत्यर्थः ॥२५॥ किं मद्गुणश्रवणसाध्यं यदर्थं कर्णायुतं प्रार्थयसे तत्राह ॥ स इति ॥ हे उत्तमश्लोक महतां वृद्धानां मुखाच्च्युतः सः भवतः पदांभोजयोर्या सुधा तस्या योलेशः तत्संबंधियोऽनिलो वायुः दूरादपि किंचिद्यशः ॥ श्रवणमात्राभिलष्यः विस्मृतं तत्त्ववर्त्म तत्त्वमार्गः यैः कुयोगिभिस्तेषामपि नः अस्माकं तद्विषयां स्मृतिं भक्तिं वितरति ददाति अतो वरैः ॥ पुरुषार्थांतरसाधनैरलं ॥२६॥

॥१२०॥

तद्विषयभक्तिर्वेदकृत्वा स्वगुणश्रवणस्य यदृच्छयापि त्वद्गुणानेव शृणुयामित्याह ॥ यश इति ॥ हे सुश्रवः शोभनकीर्त्ते सतां संगमे सति सकृद्य-
दपि यदृच्छयापि तेन तव यशः कीर्त्तिमेव परं शृणोमि सकृदपि यदृच्छापीत्यनेन असकृदस्मादरेण यशसः श्रोतव्यतास्त्यने ॥ तदुपपादयति
यः कश्चित्पुमान् गुणज्ञः सारग्राही चेत् सकृत् कर्मजडमनेक यत्विरमेत गुणानुश्रवणादिति शेषः ॥ अगुणज्ञः पशुस्त्वद्यशः सकृदाश्रुत्य
ततो विरमेदित्यर्थः गुणज्ञस्याविरामे सदृष्टान्तमुपपादयति । यत् यस्मात् श्री लक्ष्मी गुणानां भवदीयकल्याणगुणानां ग्रहेच्छया सम्सरणेच्छया
प्रववे त्वामिति शेषः यद्वा गुणानां सर्वपुरुषार्थानां संग्रहः स्वस्मिन् समाहारस्तदिच्छया कृतवद्यशः ॥ प्रववे इति नितरां वृतवती ॥२७॥ अतो ल-
क्ष्मीशितृत्वस्य परित्यागेन त्वामेवाहं भजामीत्याह ॥ अथेति ॥ हे भगवन् अखिलपुरुषोत्तम अखिलेभ्यो बद्धमुक्तेभ्यः पुरुषेभ्य उत्तम पंचमी भयेन ।

अथाभजे त्वाखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः ॥ अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः
२७। जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितं करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया
॥२८॥

तत्र पंचमीति योगविभागात् समासः अनेन जीवानामभजनीयत्वं विवक्षितं ॥ अखिलपुरुषोत्तमत्वे हेतुः गुणालयं त्रिविधेष्वपि चेतन-
ेष्वसंभावितनित्यनिरुपाधीकाननुपाधीनसर्वज्ञत्वसर्वशक्तित्वसर्वकारणत्वसमस्तलज्ञानानंदत्वादिकल्याणगुणाश्रयं त्वामेव पद्मकरेव
लक्ष्मीवत् लालसः अभजं भजेयमित्यर्थः ॥ ननु द्वयोरपि मां भजमानयोर्विरोधेन सहैव तव कलहः स्यात्तत्राह । एकपतिस्पृधोः एकस्मिन्
पतौ स्पर्द्धमानयोः । एकमर्थं अहंवतोरितियावत् ॥ आवयोः लक्ष्म्या मम च कलिः कलहो न स्यात् असंभावितः असंभवमेवोपपादय-
ति त्वच्चरणैकतानयोः । त्वच्चरणयोरेकतानो मनस एकाग्र्येण वृत्तिर्ययोः तयोः आवयोः तत्कलिर्विरोधेन तत्त्वज्ञानभवो इत्यर्थः विषयस्या

भवतु नस्मा कलिस्तथापि भजेय मित्याह ॥ हे जगदीश जगज्जनन्यं जगन्मातरि लक्ष्म्यां वैशसं विरोधः स्यादेव नत्र हेतुः यस्मात् कर्मणा नः समीहि
तमिष्ठं भवतितन्यापी द्रविरोधे पि मनक्षमानवत् अत्रापि वः पक्षपातस्त्व स्यादित्याह ॥ फल्गुतुच्छमपि उरुबहु करोषि यतो दीनेषु वत्सलः
त्वधिलेपि स्वस्वरूपाणावरतस्मन्न वतथा किंप्रयोजनं तोनाद्रियस इत्यर्थः ॥ यद्यानन्देतावन्तं कालं कर्मफलासंगेनानुष्ठितमधुना फलासंग
माबेपव इत्यमा भजतो प्येहिकं फलं दास्यस्येव तत्राह ॥ जगज्जनन्यामिति हे जगदीश कर्मणा यज्ञादौ जगज्जनन्या प्रकृत्या पन्नः अस्माकं
समीहित फलं न देशास भावनयी रूपं संसारासिप्रायेण वैशसमिति मुक्तं स्यादेव प्राकृतं फलं स्यादेवेत्यर्थः किंतु फल्गु अपि प्राकृतफलसाध
नं वेनतु तुच्छमपि यज्ञादि कर्म उरु करोषि तस्मिन्स्वाराधने केवे वतामायाद्युस्वविषयभक्त्यनुमादनद्वारानंतस्थिरमुक्तफलसाधनतासंभाव

अंबंसयत्त्वामतरवमाधवो बुद्वत्तमायागुणविभ्रमोदयं ॥ भवत्पदानुस्मरणादृतेसतां निमित्तमन्यद्भगवन्नविद्महे ॥ २९ ॥

वेनोद्वक मेवी त्यर्थः ॥ यतो भवान्दीनवत्सलः ॥ दोषा द्दृष्टि अयं भावः यद्यप्यनादि प्रकृतिसंबंधात् यज्ञादिकर्मणां त्वदाराधनरूपतामजानंतः
पशुपुत्रवइच्चन्नस्वर्गादिहिकामुष्मिक फलसाधनतामायातनश्चोदनाभ्यः ॥ प्रतिपन्नाम बुबुधकर्मानुतिष्ठामः तथापि त्वं दीनेषु दार
सिषु दोषादृष्टि फलाप्राप्तिवत्सोनंतस्थिरफलसाधनतामेव निष्पादयसीति ॥ जगज्जनन्यामिति पाठे प्राणिपूर्णभुवन इत्यर्थः फल्गु
त्वमेवोपपादयति ॥ स्वराववधितेस्व स्वरूपाणावाभिरतस्य स्वात्मारामस्येत्यर्थः तथा जनन्या किंप्रयोजनं स्वात्मारामस्य प्राकृतं फलं किमा
पिन भवति अतितुच्छमित्यर्थः स्वात्मारामस्य जगज्जगत्याफल्गु परलोकप्राप्तिरित्यर्थः ॥ २९ ॥ एवमैश्वर्यांतरे भ आत्मानुभवस्यातिश
ययुक्तः ततोपि भगवदनुभवस्यातिशये तंस्तवयन् स्वात्मानुभवपूर्वकभक्तियोगस्य कर्तव्यतां सोदाहरणमाह ॥

भजंतीति॥ अतएवकेवलकर्मणांफल्गुत्वादेवमाधवोनिष्कामा अथप्रसंगात्मतयायाथात्म्यज्ञानांतरंत्वांभजंतिकथंभूतंत्वुदस्तमायांगुणविभ्र॰
मोदयंमायायायेगुणारजस्तमआदयःतन्मूलकोयोभ्रमःदेहात्मभ्रमःस्वतंत्रात्मभ्रमश्चतस्यपउदयःउद्रेकःव्युदस्तःनिरस्तः॥मायागुण
विभ्रमोदयेनतंतद्भिन्नमायागुणभ्रमनिरासकमित्यर्थः॥निरतिशयानंदरूपमात्मानुभवंलब्ध्वापिमांभजंतेतत्राहहेभगवन्सतांभवत्स
दानुस्मरणात्तर्क्यतेत्वत्पदांबुजस्मरणंविनाअन्यत्किमितंफलंनविग्रहेनित्यनिरतिशयानंतानंदरूपेत्वच्चरणस्मरणसमुद्रेविशुद्धिव
केवलस्वात्मानुभवोप्यतितुच्छइतिभावः॥२९॥वरैःप्रलोभनरूपाल्लोभस्तवानुचितमित्याशयेनाह।मन्यइतित्वांभजंतेमांवरंवृणीष्वेति

मन्येगिरंतेजगतांविमोहिनींवरंवृणीष्वेतिभजंतमात्थयत्॥वाचानुतंत्यायदितेजनोसितःकथंपुनःकर्मकरोति
मोहितः॥३०॥त्वन्माययाद्धाजनईशखंडितोयदन्यदाशास्तऋतात्मनोबुधः॥यथाचरेद्बालहितंपितास्वयंतथात्वमे
वार्हसिनःसमीहितुं॥३१॥

पदाह। अवोचः तांतेनवागिरंजगतांविमोहिनींविषमिश्रपयःपानप्रलोभनवाक्यतुल्यांमन्येत्वद्भजनात्प्राप्त
संसाराणांहेवात्वद्भजनेसतिपुनस्तेषांवरप्रलोभनेसंसारहेतुमेवापादयसिभक्त्यानुग्रहैकशीलस्यदयालोस्तवतन्निग्रहोनुचितइति
भावः॥ अहोतेनैववचनत्वादृशमनुष्यपावधकावाचा॥ अपामसोमममृताअभूमअक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्या॰
दिकपायामिमांपुष्पितांवाचमितित्वदुक्तविधयावेदगिराजनोलोकःयदिअसितःअबद्धःस्यात्तपिजवंधनेआपाततःप्रतिपन्न
फलाशाविमुक्तोमुमुक्षुःस्यादित्यर्थःतर्हिकथंपुनःफलैर्मोहितःसन्कर्मप्रवृत्तिधर्मंकरोतीत्यर्थः॥३०॥त्वन्मायामोहितस्यपुनर्मोहनं
नोचितंकिंतुहितमेवचेष्टितव्यमित्याह॥त्वन्माययेति।हेईशत्वन्माययाअबुधःस्वात्मपरमात्मयाथात्म्यज्ञानविधुरःजनःलो॰

कः दैवात्त्वां भजन् कौतात्मनः समात्मवत्स्वत ॥ यदि अन्यत्तु अर्थकामादिकमाशास्ते तर्हि खंडितः पृथक्कृतः दूरीकृत एव स्यादित्यर्थः ॥ ईशे
तिहेतुगर्भं आमन्त्रणं ईशेन त्वया आत्मीयमैश्वर्यं दूरीकृतं स्यादिति शत्वमेव विहृतं स्यादिति भावः अतः स्वयमविज्ञापित एव बालहि
तं अत्र पुत्रहितं पिता यथा चरेत्तत्कुर्यात्त्वयानः समीहितं कर्तुमर्हसि ॥ ३२ ॥ एवं मुक्तो भगवान्तदुक्तमनुजग्राहेत्याह मुनिः हे राजन्
तदुक्तमनुजग्राहेत्याह मुनिः हे राजन् ते त्वया साधु वर्णितं यस्मात् आशिषः ऐहिकपुरुषार्थान्नाशासे नेच्छसि ॥ अतो भवान्मत्परः

श्रीमैत्रेय उवाच ॥ इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन्मयि भक्तिरस्तु ते ॥ दिष्ट्येदृशी धीर्मयि ते कृता यया मायां
मदीयां तरति स्म दुस्त्यजाम् ॥ ३१ ॥ तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते ॥ मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥ ३३ ॥
विदुर उवाच ॥ इति वैण्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः ॥ पूजितोऽनुगृहीत्वैनं गंतुं चक्रेऽच्युतो मतिम् ॥ ३४ ॥ देवर्षिपि
तृगंधर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥ ३५ ॥

स्वर्गापवर्गनरकान्समं यथा पर
एपनि अपवर्गो वै कैवल्यं नरकग्रहणं दृष्टांतार्थं नरकवत्स्वर्गापवर्गौ हेयो द्रक्ष्यसीत्यर्थः ॥ ३३ ॥ हे महाराज ते तुभ्यमहं प्रीतः यस्मात्त्वं श्रद्दधानः
विश्वसन् दुस्त्यजमपि रोषमत्यजः तन्महार्हेशं विश्वसनमेव मह्यं परमुत्कृष्टमर्हणमाराधनं ॥ ३४ ॥ इति पूर्वोक्तरीत्या आदिराजेन पृथुना
नुतः स्तुतः स विश्वभुग्भवान् तमादिराजं प्रत्याह ॥ उक्तमेवाह ॥ हे राजन्मपि ते तव भक्तिरस्तु वर्द्धतां दिष्ट्या दैववशेन ते त्वया मयि दृढा
शिधीर्भक्तिः कृता कथंभूता यया धिया दुस्त्यजामपि मदीयां मायां तरति स्म ॥ ३५ ॥

उपसंहरति। वैन्यस्य राजर्षेः प्रभोः अर्थवत् श्रण्वतामपि पुरुषार्थसाधनं वचः अभिनंद्यतेन पूजितः ताननैवैनं अनुगृह्य अच्युतो भगवान् गंतुं मतिं
चक्रे॥ ३६॥ नहास्वेहाहयः सर्वे राज्ञा यज्ञेश्वरधिया भगवदात्मकत्वधिया यथायोग्यं वाग्मादिभिः सभाजिताः पूजिताः ततः यज्ञभूमेः वैकुंठं भग
वंतमनुस्त्यगताः ययुः॥ ३७॥ ३८॥ सोपाध्यायस्य राज्ञः पश्यतः सतः अमुष्य राज्ञो मनो हरन्निव भगवान् स्वधाम प्रसगात्॥ ३९॥ अदृष्टाय चक्षुर्वि

यज्ञेश्वरधिया राज्ञा वाग्वित्तांजलिभक्तिनः। सभाजिता ययुः सर्वे वैकुंठानुगतास्ततः॥ ३६॥ भगवानपि राजर्षेः
सोपाध्यायस्य चाच्युतः। हरन्निव मनोऽमुष्य स्वधाम प्रययौ प्रभुः॥ ३७॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्म
ने। वासुदेवाय देवानां देवाय स्वपुरं ययौ॥ ३८॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे विंशोऽध्यायः॥ २०॥ मैत्रे
य उवाच। मौक्तिकैः कुसुमैः स्रग्भिर्दुकूलैः स्वर्णतोरणैः। महासुरभिभिर्धूपैर्मंडितं तत्र तत्र वै॥ १॥

षयतामप्रात्राय संदर्शितात्मने आत्मा येन तस्मै देवानां ब्रह्मादीनामपि देवाय वसंति यत्र भूतानि भूतात्मनीति निरुक्त वासुदेव परवाच्यायनमस्
कृत्य स्वपुरं ययौ॥ ४०॥ इति श्रीटीकायां विंशोऽध्यायः॥ २०॥ पुरं यया विमुक्तं तत्पुरं मनुवर्णयति मौक्तिकैरिति मौक्तिकैर्मुक्तादामभिः

स॰ स॰

॥१२३॥

वंदनकागहपुनैस्तोयैराईरिथ्याद्रयः ॥ अभिसंनीतितयातोकैर्यवांकुरैरचिंभिर्दीपैश्च ॥ २ ॥ पूगपोतैर्वीलपूगैः परिस्कृतमंगलद्रव्याणि दध्यादीनितैः
सहाभिजग्मुः राज्ञोभिमुखंयपुः सुशानिः निघर्षितानिकुंडल्यानियामांताः मृष्टाउज्वलाकन्याश्च अभीयुः ॥ ४ ॥ ततः शंखादिघोषेण ऋत्विजां वेद
घोषेण च सहवंदिभिः स्तूयमानो विगतस्मयः निरहंकारः वीरः पृथुः भवनं विवेश ॥ ५ ॥ तत्रतत्रउरथ्यादिषु पौरादिभिः पूजितः महायशाः विपुल
कीर्तिः पौरान् पुरवासिनजानपदान्देशवासिनश्च तत्तदीयपूजादिभिः प्रीतः तेभ्यो समीहितवरप्रदो भूत्वा यथायोग्यंपूजयामास ॥ ६ ॥ तथा गुणैर्महा

वंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् । पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् ॥ २ ॥ सवृंदैः कदलीस्तंभैः पूगपोतैः परि
ष्कृतम् तरुपल्लवमालाभिः सर्वतः समलंकृतं ॥ ३ ॥ प्रजास्तं दीपावलिभिः संभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्च मृष्ट
कुंडलमंडिताः ॥ ४ ॥ शंखदुंदुभिघोषेण ब्रह्मघोषेण चार्त्विजाम् । विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥ पूजितः पूजया
मासतत्रतत्रमहायशाः ॥ पौरान् जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥ ६ ॥ सएवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महा
न्महत्तमः ॥ कुर्वन्शशासावनिमंडलंयशः ॥ स्फीतंनिधायारुरुहेपरंपदं ॥ ७ ॥ सूत उवाच तदादिराजस्ययशोविजृंभितंगुणैर
शेषैर्गुणवत्सभाजितं ॥ क्षत्ता महाभागवतः सुदस्सते कौषारविंप्राहगृणंतमर्चयन् ॥ ८ ॥
तु अनतएवमहत्तमः पूज्यतमः अनन्यवानघचेष्टितः निर्दोषोत्तरव्यापारः एवमादीनि दोहनादीनि भूयांसि कर्माणि कुर्वन् भूमंडलंशशास अ
नुशिष्टवान् ततः स्फीतं विपुलं यशः इहलोके निधाय परंपदं वैकुंठम् आरुरोह अधिरूढवान् ॥ ७ ॥ एवं श्रुत्वा पृथुचरित्रः क्षत्ताएवमादिमादिश
दापत्तिनान्यत्तदुदारचेष्टितस्य पृथयापुनः प्राहेत्याह सूतः श्रुत्वेति । अशेषैर्गुणैर्विजृंभितं दुर्जितं गुणवद्भिः सभाजितं सत्कृतं अधिराजस्य पृ

उक्तमेवाह। सह निवाभ्यां। विप्रैर्ब्रह्मर्षिभिः राज्येभिषिक्तः लब्धं अशेषाणां अवितानां इंद्रादीनां अर्हणं येन सः वैष्णवं विष्णोः संबंधि तेजः वीर्यम्
बाह्वोः बिभ्रत् बिभ्राणः याभ्यां वैष्णवं तेजः पालिभ्यां गां दुदोह एवंभूतः किमकरोदिति प्रश्नः ॥९॥ अथ सौत्सुक्यमाविष्कुर्वन् प्रार्थयते को न्विति
अस्य पृथोः कीर्तिं अभिज्ञो न शृणोति। कथंभूतस्य यस्य विक्रमः पृथ्वीदोहनादिरूपः तस्य यदुच्छिष्टं तुल्यकामं अद्यापि अशेषभूपाः लोक-
पालैः सहिता लोकाश्च उपजीवंति तत्कर्म तदीयं शुद्धं निरवद्यं चेष्टितं मे मम ह्यं वद ॥१०॥ एवमुक्तो मुनिराह। गंगायमुनयोरित्यादिना यद्यप्य-

विदुर उवाच॥ सोभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः। बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां॥९॥ कोन्वस्य की-
र्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः॥ लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं
॥१०॥ श्रीमैत्रेय उवाच॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन्॥ आरब्धानेव बुभुजे भोगान् पुण्यजिहासया॥११॥

पि मुनिराहेत्याहेति एवंरूपं मूलवाक्यमपेक्षितं तथाप्यर्थसिद्धत्वात् न्लेसाधिगंतव्यम्॥ एवं प्रश्नेपि शुकवाक्यमर्थसिद्धं ज्ञेयं गंगायमुनयोर्म-
ध्ये नद्योरंतरा मध्ये स्थितं ब्रह्मावर्ताख्यं क्षेत्रं क्षेत्रे आवसन् उपान्वध्याङ्वसः इत्याधारस्य कर्मसंज्ञायां द्वितीया आरब्धानेव कर्मायतानेव भोगा-
न् स्वपूर्वसाधनानुष्ठानारब्धान्॥ तत्र हेतुः पुण्यजिहासया पुण्यक्षपणेच्छया मुमुक्षोः पापवत्पुण्यस्यापि स्वफलजननद्वारा मोक्षविरोधित्वे-
न पुण्यस्यापि जिहासितत्वात् बुद्धिमतः मोक्षविरोधिभोगसाधनत्वेन कर्मानुष्ठानासंभवादिति भावः॥ बुभुजे अनुभूतवान् ॥११॥

भा॰ च॰
॥१२४॥

सर्वत्रास्खलित अप्रतिहतः ॥ आदेशः आज्ञा यस्य सप्तद्वीपेषु एक एव दंडं धारयति तथा स्वसमान राजांतर रहित इत्यर्थः दंडधारणः किं सर्वत्र न ब्राह्मणकुलादन्यत्रापि किं तु अच्युतगोत्रतः अच्युतगोत्रात् अन्यत्र ज्ञातं तरे ष्वेपि भागवतानां कुलादन्यत्रेत्यर्थः ॥ १२ ॥ एकदा महासत्रे दीक्षा आसीत् महासत्रं संकल्प्य कृत्वा तत्र दीक्षितो भूदित्यर्थः । तत्र महासत्रे दिवौकसां देवानां ब्रह्मर्षीणां देवर्षीणां च समाजः सभा आसीदित्यर्थः हे सत्तम ॥ १३ ॥ तस्मिन् समाजे महत्सु दृश्येषु सर्वेषु यथायोग्यं पूजितेषु सत्सु स्वेनेति शेषः सदसः मध्ये उत्थितः सन् समंततः स्मैत्तं तेतिष

सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक् ॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ १२ ॥ एकदासीन्महासत्रे दीक्षा तत्र दिवौकसां ॥ समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥ १३ ॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥ १४ ॥ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः ॥ सुनासः सुमुखः सौम्यः पीनांसः सुद्विजःस्मितः ॥ १५ ॥ व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः ॥ आवर्तनाभिरोजस्वी कांचनोरुरुदग्रपात् ॥ १६ ॥

दीप्यमानः तेजिष्ठिनस्तिताराणां मध्ये उडुराडिव चंद्र इव स्थितः ॥ १४ ॥ प्रांशुरुन्नतः पीनावायतौ दीर्घौ भुजौ यस्य पद्मवदरुणे ईक्षणे यस्य शोभना नासिका यस्य । सुंदरं मुखं यस्य सौम्यः प्रसन्नः पीनौ अंसौ स्कंधौ यस्य शोभना द्विजा दंता यस्मिन् सस्मितं यस्येति बहुव्रीहिगर्भो बहुव्रीहिः ॥ १५ ॥ व्यूढं विस्तीर्णं वक्षः यस्य बृहंतौ पीनौ श्रोणी नितंबौ यस्य । वलिभिस्त्रिसृभिः मंजु सुंदरं दलवदश्वत्थपर्णवत् उपरि विस्तृतमधस्तात्संकुचितं मुदरं यस्य ॥ आवर्तवन्निम्ना नाभिर्यस्य ॥ ओजस्वी इंद्रियशक्तिमान् कांचनवदुज्ज्वलौ ऊरू यस्य उदग्रौ उन्नतौ पा

॥१२४॥

सस्नश्चवक्त्राश्चासितास्त्रिग्धाश्चमर्द्दजायस्यकंबुवत्त्रिरेखांकितकंधराकंधरः यस्य महाधने अनर्घ्ये दुकूल श्रेष्ठे परिधीयवसित्वा उप
वीयवसित्वा उपवीयउत्तरीयं कृत्वा ॥१७॥ नियमेनिमित्तेनस्नात्वानिस्नकानि अशेषभूषणानि येन अनगाचैनैरंगात्वैर्वनत्वात् अंजिताशेषेषवय
वेषु श्री स्वाभाविकशोभायेनश्रीमान् समुद्रायकांतिमान् कुशपाणिः पवित्रपाणिः कृतानि उचितानि कर्माणि येन ॥१८॥ शिशिरे संतापहरे
स्निग्धे चतारे ययो लस्ले अक्षिणी यस्य एवं भूतउर्वीशः स्वस्थान्तस्थानमंतो षयन्निव ईहेवत्तमाणवाक्यंउक्तवान् वाक्यं विशिनष्टि॥ चारुश्रोत्रापि

सस्नश्चवक्त्रासितस्त्रिग्धमर्द्दजः कंबुकंधरः॥ महाधने दुकूलाग्रे परिधायोपवीय च ॥१७॥ अंजिताशेषगात्रश्री
र्नियमेनस्नातभूषणः॥ कृताजिनधरः श्रीमान् कुशपाणिः कृतोचितः॥१८॥ शिशिरस्निग्धताराक्षः समेत्तत
समंततः॥ ऊ विवादिनि दमुर्वीशः स्वरः संहर्षयन्निव ॥ चारुचित्रपदंश्लक्ष्णं मृष्टं गूढमविक्लवं ॥१९॥ श्री रा
जोवाच॥ सभ्याः शृणुतभद्रं वः साधवो यदिहागताः॥ सत्सुजिज्ञासुभिर्धर्ममावेद्यंस्वमनीषितम् ॥२०॥

यं चित्राणि पदानि यस्मिन् श्लक्ष्णां प्रसन्नं मृष्टं शुद्धं अनपशब्दिनं गूढं गंभीरागाधार्थं अविक्लवं अव्याकुलं॥ १९॥ अयमस्मान्प्रतिस
र्वान्द्वव धर्मानुपदेशु मुत्सहत इतितुष्णां सभ्यामा कुर्वंतुरितिमनीषयास्ववाक्यश्रवणाय सभ्यान् प्रार्थयते सभ्या इति हे सभ्याः सभायां
उपविशंतः॥ अनुपविशान संबोधयति॥ इहसत्रभूमौ य आगतास्सर्वांश्चैतमामसत्येयरन्नितसभिप्रायेणविशिनष्टि। साधवइति॥ नाहंत्रः
किंतु जिज्ञासुः जिज्ञासितंमंविज्ञापयामीत्यभिप्रायेणाह। धर्मंजिज्ञासुभिः॥ स्वमनीषितं ज्ञेयंसत्सु सतां समीपे॥ आवेद्यं विज्ञापनीयं प्रजा

इदानीं प्रजारक्षणादिकं स्वस्यावश्यकमित्याह॥ अहमिति त्रिभिः धात्रा भगवता प्रजानां दंडधरत्वेनाहं योजितो नियुक्तः न केवलं दंडधरत्वेव किंतु रक्षितृत्वेन॥ आजीविकाप्रदत्वेन स्वेषु स्वस्ववर्णाश्रमोचितेषु सेतुषु धर्ममर्यादासु पृथक्पृथगसंकरेण स्थापयितृत्वेन च योजित इत्यर्थः॥२१॥ किं प्रजारक्षादिनाऽस्य फलं तत्राह॥ तस्येति॥ ब्रह्मवादिनः वेदार्थज्ञाः तस्य मम तदनुष्ठानेनोपदेष्टुः प्रजारक्षणादिना राज्ञः प्राप्यान् पुण्यलोकान् प्राप्यत्वेनाहुः ते लोकाः तस्य प्रजारक्षणादिनिष्ठस्य मे तदनुष्ठानात् प्रजारक्षणाद्यनुष्ठानात् कामसंदोहाः समीहितकामपूर्णा भवेयुः स्युरिति संभावनायां लिङ् तस्य मम स्युस्तेन प्राप्याः किं न लोकस्य प्राप्यत्वाभावान्नेत्याह॥ यस्येति॥ यस्य प्रजारक्षणादिनिष्ठस्य दिष्टदृक् प्रजारक्षणादिकर्मसाक्षी ईश्वरः

अहं दंडधरो राजा प्रजानामिह योजितः॥ रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक्॥२१॥
तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः॥ लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक्॥२२॥
य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन्॥ प्रजानां शमलं भुंक्ते भगं च स्वं जहाति सः॥२३॥
तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः॥ कुरुताधोक्षजधियस्तर्हि मेऽनुग्रहः कृतः॥२४॥

तुष्यति तस्मिन् तुष्टे मुक्तिरपि सुलभेति भावः॥२२॥ अन्यथा त्वनिष्टं स्यादित्याह॥ य इति॥ यो राजा धर्मेषु प्रजा अशिक्षयन् करं स्वामिग्राह्यभागमुद्धरेत् करं भागं गृह्णीयादित्यर्थः॥ तर्हि प्रजानां संबंधि शमलं पापमेव भुंक्ते सः स्वीयं भगं ज्ञानं ज्ञानशक्तिबलैश्वर्यादिकं च जहातीत्यर्थः॥२३॥ तत्तस्मात् हे प्रजाः भर्तुर्मम पिंडार्थं पिंडदानवत्परलोकहितार्थं स्वार्थं स्वप्रयोजनमेव स्वस्ववर्णाश्रमोचितधर्ममेवाऽसूयारहिताः कुरुत अनुतिष्ठत॥ अधोक्षजधियः भगवद्विषयकबुद्धयः तदर्पणबुद्ध्येति यावत्॥ तत्कुरुष्व मदर्पणमिति स्मृतेः॥२४॥

॥२५॥

यूयं तन्मदनुशासनं अनुमोदध्वं। किमनुमोदनमात्रसाध्यं तत्राह। कर्तुरिति॥ यस्मात्कर्तुः प्रयोज्यस्य शास्तुः प्रयोजकस्य अनुज्ञातुः॥ अनुमन्तुः तत्र प्रवर्त्तकत्वप्रयोजकत्वं प्रवृत्तस्य प्रवर्त्तकत्वमिति विवेकः। प्रेत्येति कृतस्य योगात्कर्त्रादिविषयीकर्त्रादिभिः प्रेत्य परलोकं प्राप्य तुल्यं फलमनुभूयत इत्यर्थः॥ अत्र यस्य तुष्यति दिष्टदृक् कृतेन तावोत्तु जधिय इति कर्मणां भगवदाराधनरूपत्वमाराधितात्कर्मभिस्तु भगवतः फलप्राप्तिरवगम्यते तत्र निरीश्वरवादिनां केषांचिन्मतं दूषयितुं तन्मतमनुपपन्नमित्युद्भावयन् ईश्वरसिद्धसाधयिषया तत्सद्भावं तावत्प्रतिजानीते॥ अस्तीति। ते हि निरीश्वरवादिनः एवमाहुः प्रकृतिपुरुषातिरेकेण ईश्वरस्य॥ कल्पितज्ञापकाभावान्न विद्यते प्रमाणाभावात्। न तावत्प्रत्यक्षेण तदविषयत्वात् तस्य नाप्यनुमानं प्रत्य

यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः॥ कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम्॥ २५॥
अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः॥ इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद्भुवः॥ २६॥

क्षोपलब्धसाध्यधर्माव्यभिचारिसाधनधर्मविषयत्वेनानुमानस्य प्रत्यक्षाविषये तदप्रवृत्तेः॥ नापि शब्दः॥ न तावल्लौकिकः॥ भ्रमप्रमादादिदोषसंस्पर्शसंभावनया तस्य प्रामाण्यनिश्चयायोगात्॥ नापि समस्तज्ञानमनन्तं निष्क्रियं निष्कलमित्यादिवैदिकशब्दः॥ लोके वृद्धव्यवहारादन्यत्रस्य शब्दस्यावबोधकत्वशक्त्यवधारणासंभवात्। व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्यरूपार्थ एव शब्दस्य प्रामाण्यमिति लौकिकव्युत्पत्त्यनुसारेण वैदिकशब्दानामपि कार्यवस्तुपरत्वेनैव व्युत्पत्तिनिश्चयात् सिद्धरूपे ईश्वरे तेषां प्रामाण्यासंभवात्॥ अनेनैवाऽस्मात्फलप्राप्तिश्चा

ष्टं बहुधा जातं । ब्रह्मविदाप्नोति परमित्यादिना ऐहिकं आमुष्मिकं ॥ ब्रह्मोपासनात्तत्प्राप्तिरूपं च फलं श्रुतमिति वाच्यं तस्य कर्मसु कर्तृभूतस्य प्रसंगात्मनो या
गात्म्यवेदनप्रतिपादनपरत्वात् अतः कर्तृसंस्कारद्वारेण विद्यायाः क्रतुशेषत्वात्तत्र फलश्रुतिरर्थवादमात्रं । न च विचित्रसृष्ट्यन्यथानुपपत्त्याई
श्वरसिद्धिस्तत्फलसिद्धिश्चेति वक्तुं युक्तं पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृतायाः ॥ प्रकृतेरेव पुरुषार्थानुरूपविचित्रपरिणामसंभवात् यथा
विषादिदूषितान्नपानादीनां औषधविशेषाप्यायितानां च दुःखहेतुभूतपरिणामविशेषवत् देशकालादिव्यवसायादर्शनं तद्वदिहेति संग्रहः हे
मतमः केषांचिद्दार्शनिकानां मते यज्ञपतिर्नाम यज्ञाराध्यस्तत्फलप्रदश्च स्वर्गाख्यः कश्चिद्दर्शितः तन्न तावद्विचित्रसृष्ट्यन्यथानुपपत्तिं प्रमाणयति
इहामुत्र चेति । इह लोके चामुष्मिंश्च लोके सोऽत्मा वत्सः प्रकाशबहुलाः भुवः विचित्राभोगभूमयः तद्भोक्तारो विचित्रशरीराश्च दृश्यन्ते ॥ एतच्च
दर्शनं ईश्वरमंतरेणानुपपन्नं । यदुक्तं प्रकृतेर्जीवकर्मानुगुणं विचित्रपरिणामासंभवात् यद्यनधिष्ठिताया अपि परिणामः संभाव्येत तर्हि प्र
लयदशायां तस्याः विचित्रपरिणामार्थमीश्वरानपेक्षणात् सततपरिणामस्वभावत्वेनापरिणामित्वेनावस्थानं न स्यात् । ईश्वराधिष्ठितत्वे तु
तस्य संकल्पत्वेन विचित्रसृष्टिनिरभावानुपपन्नो ॥ न च हेतुत्वं ज्ञाधिष्ठितत्वेनानुपपन्नमिति वक्तुं शक्यं । तेषामननुमतानां स्वेच्छयैव स्वानर्थावहार
पुण्यानुष्ठानपूर्वकपरमपादयुत्वादिशरीरापादनस्यासंभवात् । ईश्वराभ्युपगमे तु इष्टानिष्टं बहुधा जातं जायमानं यतः ॥ प्रवृत्तिर्भूतानां येन सर्व
मिदं ततं तस्य कर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवाः नानहं द्विषतः ॥ क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्वि
तु ऋतवीनां भगवान्पुरुषोत्तमो ऽवाप्तसमस्तकामः सर्वज्ञः सत्यसंकल्पस्स्वमहात्म्यानुगुणलीलाप्रवृत्त एतानि कर्माणि समीचीनान्येतान्य
समीचीनानीति कर्मद्वैविध्यं संविधाय तदुपादानोचितदेहेंद्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रविश्य स्वशा
सनावबोधि वेदाख्यं शास्त्रं च प्रदर्श्य तदुपसंहारार्थं चान्तरात्मतयानुप्रविश्यानुमंतृतया च नियच्छन् तत्र पुण्यरूपकर्मकारिणं स्व
शासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयति शासनातिवर्तिनं च तद्विपर्ययैर्योजयतीति सर्वमेवमुपपन्नं वैचित्र्यमिति भा

वुः नचसमंज्ञावमित्यादिशब्दः कर्मांगभूतप्रत्यगात्मयाथात्म्यविविच्येतद्वुत्तिवकुंशक्यं। कर्तुः प्रत्यगात्मनः शुद्धस्याशुद्धस्यचद्योतकत्वस्याविद्या
दिहेयसंबंधयोग्यस्यासंभावनीयस्वरूपस्वभावयोः विरस्तनिखिलहेयगंधानंतकल्याणगुणाकरस्वसंकल्पकृतजगदुदयविभवलयली
लसर्वशक्तित्वज्ञानानंदादिस्वरूपस्वभावैकांतयोः स्ववर्णनं तथाहि अपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः
सत्यसंकल्पः तदैक्षत बहुस्यां प्रजायेयेति। तत्तेजोसृजत यः सर्वज्ञः सर्ववित् यतोवाचोनिवर्तंते अप्राप्यमनसासहेति नचैषांवाक्यानां
सिद्धवस्तुः परत्वासंभवः याहृक्षिकत्वमुत्तरेपिशारीरकमीमांसायांसिद्धांतितत्वेनकार्यार्थएववुत्पत्तिरितिनिर्वंधस्यनिर्वंधनत्वात् फल
श्रुतिरर्थवादरूपेत्यपिनयुक्तिमत् अर्थवादादेः प्रतीयमानार्थस्याभावेपिरात्रिसत्रप्रतिष्ठाऽपगोरणशतयातनासाध्यसाधनभावप्रर्के

मनोरुत्तानपादस्यध्रुवस्यापिमहीपतेः॥ प्रियव्रतस्यराजर्षेरंगस्यास्मत्पितुःपितुः॥२७॥ ईदृ॥
शानामथान्येषामजस्यचभवस्यच॥ प्रल्हादस्यवलेश्चापिकृतमस्तिगदाभृता॥२८॥

मेवंनदृश्यपश्चुविशेषादेरर्थवादाद्युक्तस्यापिविवक्षितत्वादितिसंक्षेपः॥२६॥ केषांचिदिमुक्तानां लिकान्प्रदर्शयन् तेषामीश्वराभ्युप
गमोस्तीत्याह। मनोरिति॥ अस्मत्पितुःपितुः॥ अस्मत्पितामहस्यांगस्य॥२७॥ अजस्यचतुर्मुखस्यभवस्यरुद्रस्य। मन्वादीनांगदाभृताभ
गवताकृतंकर्मकर्तव्यंकर्मफलदानरूपंप्रयोजनमस्ति। मन्वादीनांमने आवश्यककर्मफलमुपगतमित्यर्थः॥२८॥ ननुचेतनस्यत
त्वाभाविनःकर्मणःफलप्रदत्वासंभवेस्यपूर्वाख्यशक्तिकल्पनाद्वाराकर्मणःफलसाधनत्वंस्यात् विधुदेशश्रुतदेवतायावाकिमीश्वरे
णेतिचेत्याशंकापरिहरन्दर्शयति। वर्गस्त्रिवर्गोधर्मादिः स्वर्गोधर्मफलं अपवर्गोमोक्षः एषांप्रायशः एकान्तहेतुनाएकमात्मास्व

भा॰ च॰

॥३२७॥

रूपं येषां तेषां भाव ऐकात्म्यं एकेनैव प्रदेयत्वरूपैकात्म्यतद्रूपेण हेतुना वर्णादीनामेकैकेनैव प्रदेयत्वस्य वर्णस्य तत्तत्स्य हेतुनाईश्वरोऽभ्युपगतो मन्वा
दिभिरित्यर्थः । तथा च श्रूयते दशपूर्वं बहुधा जातं ज्यायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमा इत्यादि स्मर्य
ते च । योयोयां यां तनुं भक्तः धर्मार्थकाममोक्षाख्यं य इच्छेदित्यादि । अर्थभावः । यजदेवपूजायामिति देवताराधनभूतयागाद्याराधभूताग्नि
वाय्वादिदेवतानामेव तत्तत्फलहेतुतया न भिन्नतस्मिन्नपि वाक्यस्य परदेशास्तावदृश्यते । वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा
देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यादिषु तत्रतत्र हि कामितसिद्धाधयि विनि फलसाधनत्वप्रकारोपदेशो वि
धपेऽद्वितएवेति नानात्वस्य शंकायुक्ता एवमपेक्षितेऽपि फलसाधनत्वप्रकारे प्राप्ता देवा वगते सति तत्सरित्यागेनाश्रुतापूर्वाख्यशक्तिकर

हैहयाद्रीन्नतेभ्यतोः श्रोध्यानधर्मविमोहितान् ॥ वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥२९॥

स्यनुपपन्नं । यद्वाद्याद्रीनां फलसाधनत्वं स एवैनं भूतिं गमयतीत्यादिना प्रतीनं तद्वाद्यादात्मनाराधनतया फलदापित्वेनावस्थितया परमपुरुषस्ये
वेति श्रूयते ॥ दशपूर्वमित्यादिकास्तदेवाग्निस्तद्वायुरित्यादिका चेति । अतोऽपूर्वस्यादेवतायावान फलसाधनत्वमिति । मन्वाद्युपादानं प्र
दर्शनमात्रं न तु परिगणनमित्याशयेनाह । हैहयाद्रीनिति ॥ धर्मे विमोहितान् धर्मस्वरूपतदनुष्ठानतत्साधनतत्फलसाधनादिकं अजा
नतान् अतएव शोध्यान स्मतो हैहयाद्रीन् ॥ आदिशब्देन प्रकारेण तत्सदृशानित्यर्थः वेदानान् ऋते विनासर्वेषां मतेईश्वरोऽस्त्वीत्यर्थः ॥२९

एवं केवलकर्मणां मन्त्रस्य चापूर्वस्य स्वातंत्र्येण देवतायाश्च फलसाधनत्वाभावः परमपुरुषस्यैव साधनभावश्चोपपादितः इदानीं तदंघ्रिप्रे
तस्य भगवत्पदारविंदभजनस्यैवानर्थनिराशकत्वपूर्वकपुरुषार्थापादकत्वमाह। यत्पादेति॥ तपः संताप आध्यात्मिकादिः तपः संताप इति
धात्वर्थानुरोधात् तद्वतां तापत्रयातुराणामित्यर्थः। यस्य भगवतः पादयोर्या सेवाभक्तिस्तस्यामभिरुचिरहरहः प्रवर्द्धमाना सती अनेकज
न्मभिः अनंतजन्मभिरुपचितं संवर्द्धितं धियो मनसः मलं सद्यः क्षिणोति क्षपयति तमेव भजतेति तृतीयेनान्वयः तस्मादस्यैव धर्मस्य महिमे

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः॥ सद्यः क्षिणोत्यन्वहमेधती सती यथा प
दांगुष्ठविनिःसृता सरित्॥३१ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान्
यदंघ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते॥३२॥

ति दृष्टांतेनाह। यथेति। यथानतस्यांगुष्ठविनिःसृता सरित् गंगा मलं क्षिणोति तद्वदित्यर्थः॥३१॥ किं मलक्षपणमात्रं नेत्याह॥ विनिर्धुतं नि
रस्तं अशेषं मनोमलं यस्य॥ असंगो वैराग्यं दृढं साधनसप्तकोपलक्षणं विज्ञानं प्रकृतेर्विविक्तात्मविषया यात्मवेदनं ताभ्यां विशिष्टं येनेदृशंतिवि
शेषः॥ अत्र भगवत् ज्ञानकर्मकृतोपकार इत्यर्थः। तदेव वीर्यं बलं यस्य भक्तियोगस्य सोऽस्यास्तीति तथा॥ यस्य भगवतोंऽघ्रिमूले कृतकेतनः कृत
स्थानः तदेकांतनिरतः अनेन भक्तियोगस्य विजातीयप्रत्ययानंतराव्यवहितत्वं विवक्षितं ईदृशः पुमान् क्लेशवहां जन्मजरामरणादिक्लेशका
रिणीं संसृतिं पुनर्न प्रतिपद्यते॥३२॥

तस्मात्स्वकर्मभिः वर्णाश्रमोचितैः ॥ पंचमहायज्ञादिभिः आत्मवृत्तिभिः शमोदमस्तपः ॥ शौचं क्षांतिरार्जवमेव चेत्यादिस्वात्मोक्तशमादिभिः मनोवचः
कायगुणैः ध्यानस्तुतिपरिचर्यादिभिः ॥ अमायिनो निष्कपटाः संतः ॥ कथंभूतं कामं समीहितं दोग्धि प्रपूरयतीति कामधुक् तदंघ्रिपंकजं यस्य ॥ यथा
धिकारावसितार्थसिद्धयः अधिकर्मण्यधिकृत्य क्रियते न साध्यते इति भुक्तिः यथाधिकारं स्वस्वसमीहितफलमनतिक्रम्यावसिता निश्चिता अर्थसि

तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ॥ अमायि
नः कामदुघांघ्रिपंकजं यथाधिकारावसितार्थसिद्धयः ॥३२॥

द्धिः फलसिद्धिः फलसिद्धिर्येषां ते स्वसमीहितार्थानुसारेण फलसिद्धिर्भाविनीति सेवं निश्चितबुद्धय इत्यर्थः ॥ निष्क्रियस्याप्यनुष्ठानोपयोगित्वा
त् संन्यासस्यानर्थावहत्वात् तथा च स्वधर्मेण नायं लोकोऽस्ति न परो न सुखं संन्यासात्मनः यज्ञस्थाश्रद्धधाश्च संन्यासात्मा विनश्यतीति स्मर
णात् ॥३२॥

ननु प्रतिकर्मणां द्रव्यदेवतादिभेदाद्देवभेदः अन्यथा कर्मैक्यमेव स्यात् । ततश्च प्रतिनियतसाधनोपसंहारप्रयासो व्यर्थः स्यात् । एवं च कृत्य
मेक एव देवतोद्देशेन सर्वकर्मानुष्ठानं कुरुतेत्य चुनेत त्राह ॥ अस्माविति ॥ अत्र गुणेश्वर इति च न तत्र मस्तपावेः गुणा इति छेदः भगवद्विशेषणं हे
यगुणरहितइत्यर्थः ॥ अनेकगुण इति शुभगुणविधानात् समस्तपावेत्वध्वर विशेषणं सत्वादिगुणान्वित इत्यर्थः ॥ कर्तृ दारान द्रव्ययोवो
धः न तत्वतत्वत ः स्वरूपेणाविज्ञानघनः विज्ञानशब्देन अनुकूलात्मकज्ञानं विवक्षितं घनशब्देन तस्यैव सांद्रत्वमभिप्रेतं विज्ञानैकस्वरूप इत्य
र्थः ॥ अगुणाः निरस्त हेयगुणाः ॥ अनेकगुणाः अनंतकल्याणगुणाः अवहननावेक्षणप्रशनादयः उक्तयो मंत्राः एवंविधत्वं त्रिष्वप्य
न्वेतव्यं ॥ एवंविधद्रव्यादिभिः अध्वरमन अध्वरस्य द्रव्यादिसंघातरूपत्वाद्द्रव्यादीनां भवच्छरीरत्वात् अध्वररूपोसि त्वमर्थः अर्थाशय

अस्माद्विद्वानेकगुणोगुणेश्वरः एवंविधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनस्वरूपतः
॥३२॥

लिंगनामभिः संपद्यते अर्थः अध्वरप्रयोजनं स्वर्गादिरूपं फलं तत्र आसयाः ॥ आश्रयाणिवलाशयकमलाशयइतिप्रयोगात् लिंगो
अग्नींद्रादिरूपशरीराणि नामानि वाचकाग्नींद्रादिशब्दाः ते संपद्यते ॥ अग्नींद्रादिलिंगस्य फलाश्रयत्वं फलं दानक्रियाया अग्नींद्राद्या
श्रितत्वाद्यो ध्यः अध्वरा धत्वेन तत्फलहेतेनावमतें इंद्रादिनामरूपात्मको भवतीत्यर्थः तथा च श्रुतिः यज्ञो वै विष्णुः तदेवाग्निस्तद्वायुस्तत्स
र्यस्तदु चंद्रमाद्रासग्नींद्रादिद्वारभेदेन द्रव्यादिभेदेन च कर्मणां भेदः अग्राह्यंतरात्मतया वसितस्य परमपुरुषस्यैकस्यैवाराध्यत्वफल
त्वाद्युपपत्तिः स्वारस्यत ः ॥ एक एव नाराधनत्वमस्य उपपन्नमितिभावः ॥३३॥

एवंच मंतदाशयधर्मदेवनारूपत्वमुक्तं ॥ अथ कर्मभोक्तृजीवरूपत्वं तत्फलरूपत्वं चाह ॥ प्रधानेति ॥ एषः भगवान् प्रधानं प्रकृतिः ॥ कालस्तद्गुणक्षो
भकः ॥ आशयो वासना धर्मः अदृष्टं एभिः संगृह्यते अस्मादिति तथा तस्मिन् शरीरे चेतनां प्राणाद्यनुभवरूपं ज्ञानं प्रतिपद्य जीवद्वारा प्रति
पद्य सर्वः तच्च जीवादिभिः सामानाधिकरण्ये च हेतुः विभुं य आत्मनि तिष्ठन्निति श्रुतेः आजीवोन आत्मतयावस्थानात् सर्वं जगदुपादानात्वा
दुपादानत्वस्य च भावावस्थाविशेषवत आगवस्थायोगित्वरूपत्वाज्जीवं प्रत्युपादानत्वेन च जीवधर्मभूतज्ञानसंकोचविकासरूपविकाराश्र
यत्वस्यापि जीवद्वारकत्वेन विभोः परस्य सत्वात् प्राणाद्यनुभवरूपचेतनां प्रतिपद्येत्युक्तं क्रियाफलत्वेन स्वर्गादिरूपतया विभाव्यते निश्चीयते ॥ ए

प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनां ॥ क्रियाफलत्वेन विभुर्विभाव्य
ते यथानलो दारुषु तद्गुणात्मकः ॥ ३४ ॥ अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञ
भुजामधीश्वरं ॥ स्वधर्मयोगेन भजंति मामकाः निरंतरं क्षोणितले दृढव्रताः ॥ ३५ ॥

वंच मंतदाशयानत्फलभोक्तृतत्फलरूपत्वमुक्तं ॥ न च कर्मादिगतदोषसंस्पर्श आशंक्यत इत्यभिप्रायेण दृष्टांतमाह ॥ यथेति दारुषु अनलो
ग्निर्यथा तद्गुणात्मकः दारुगतदैर्घ्यवक्रत्वादिमान् प्रतीयते तद्वत् वस्तुत एकरूपोप्यनलोधिष्ठानवैचित्र्याद्विचित्र इव प्रतीयते तथेत्यर्थः
सामानाधिकरण्येन व्यपदिश्यत इति ॥ ३४ ॥ न केवलं मत्प्रवृत्तानां भगवद्यजने प्रवर्त्तः स्वतः प्रवृत्तानां नित्यमभिनंदनेन प्रथयति अहो इति ॥ ये
भूतले मामकाः मद्विषयवासिनो जनाः दृढव्रताः दृढसंकल्पाः स्ववर्णाश्रमधर्मयोगेन यज्ञभुजामिंद्रादीनामपीश्वरं अंतरात्मान
गुरुं हितोपदेष्टारं हरिं त्वा अय यदुरिति हरिं निरंतरं भजंति ते अमी जनाः मम अनुग्रहं वितरंति कुर्वंति ॥ अहो इति हर्षे ॥ ३५ ॥

द्दृप्तेष्वमानेष्वपि भगवद्भक्तिरीर्हा यद्ब्राह्मणभक्तिं विधत्ते॥ माजातु इत्यष्टभिः॥ तत्र तावद्ब्राह्मणकुलस्य राजकुलनिग्रहाविषयत्वं प्रार्थयते। महद्भिः महत्स्वभावात्क्षमादिभिर्यद्राजकुलस्य तेजस्तस्मात्सकाशात् द्विजानां कुले भूतानां वा॥ अजितो भगवान् देवता येषां तेषां कुले जातु कदाचिदपि मा प्रभवेत् प्रभावेन करोतु कथंभूतेषु महद्भिर्भिर्विनापि स्वयमेव ममिति इत्यादिभिः दृप्तेष्वमाने॥ यद्वा राजकुलस्य ब्राह्मणकुलनिग्रहविषयत्वं प्रार्थयते॥ अजितदेवतानां द्विजानां कुलमिति क्षयादं महत्त्वेन तपसा कृच्छ्रादिना ब्रह्मोपासनया वा॥ आतिथ्यया अतिथ्याराधनया च कारात् क्षमदमादिसंग्रहः॥ राभिर्दृप्तेष्वमानेषु सत्सु तेषां तेजः महद्भिः राजकुलाद्धेतोः कदाचिन्मा प्रभवेत् महद्भिः प्रयुक्तगर्वसहितात् राजकुलाद्ब्राह्मणकुलमपि तं माभूदित्यर्थः

माजातु तेजः प्रभवेन्महद्भिस्तितिक्षया तपसा विद्यया च॥ दृप्तेष्वमानेजि
तदेवतानां कुले स्वयं राजकुलाद्द्विजानाम्॥३६॥ ७ ९ ७

कुलद्वयमन्योन्यं यथायोग्यमनुगृह्णात्विति भावः॥३६॥ यच्चरणाभिवंदनात् येषां चरणाभिवंदनात् हरिर्लक्ष्मीजगत्पवित्रं यशश्चावाप पयुरत्सेवया चेश्वरस्तु ख्यातिं न देव ब्रह्मकुले निषेव्यतामिति द्वयोरन्वयः हरिर्विप्रान्वर्षि। ब्रह्मण्यदेवः ब्राह्मणसेवापरायणानामन्वादीनामपि देवः पुराणः पुरुष इति। न चैवमीश्वरस्य लक्ष्मीयशआदिसंबंधस्य सोपाधिकत्वप्रसंगः भगवदितरेषां यश आदिसंबंधस्य ब्राह्मणसेवायत्तत्वे कैमुत्यन्यायेन तात्पर्यं तादृशस्य श्लोकस्यार्थवादत्वात् कुतस्य स्वार्थे तात्पर्याभावात् विधेस्तावकत्वात् न चार्थवादस्य स्वार्थे तात्पर्याभावे सतीतरेषामपि यश आदिसंबंधे पि तात्पर्यं मास्तीति वक्तुं शक्यं। ब्राह्मणसेवाविधिप्रयोज्जितफलसमर्थकत्वेन तत्र तात्पर्यनिश्चयात्

नह्यसत्तागुणेनज्ञेरो चनासंभवति। नच पयःपिबच्छिशुर्वा नेवर्द्धत इतिवानाद्युपलक्ष्य तेनवाचेत् असत्तापि गुणेन प्रयोजनाहप्रतेइति वाच्यं तत्रापि यद्य
प्रा अपि वित्तविश्वयत्नाद्यैः प्रवृत्तेः ॥ प्रवृत्त्यर्थं प्रेरणाया एवानुपपत्तेः तस्मात्त्वासत्तामजानतां बालानां पयःपानादिप्रवृत्त्यर्थं शिलावर्द्धनादिक
मसदपि फलत्वेन कीर्त्यते न चासत्त्वप्रसक्तत्वोवगंतं इह तु मन्वादिषु ब्राह्मणसेवकेषु यशःसंबंधस्यैव प्रत्यक्षानुल्यशास्त्रेणावगमादसत्तानिश्री
यक्रमप्रमाणेन रस्याभावात्। न च तेषां तत्संबंधे ब्राह्मणसेवातिरिक्तमदृष्टांतरमेव कारणमिति वक्तुं अदृष्टांतरस्यापि स्वस्ववर्णाश्रमैकांतर
निमित्तैमित्रिविकद्वर्वकयागजन्यत्वात् स्ववर्णाश्रमधर्मेषु ब्राह्मणसेवाया अप्यनुप्रविष्टत्वात् स्वराट् स्वतंत्रः अकर्मवश्यः तथापि विप्रप्रियः
विप्राधीनः बहुव्रीहिपक्षीनत्तु रुषसमास इ येनान्यो संभ्रपं प्रीतिविषयत्वलाभादिप यद्वा लक्ष्मणपाधीनत्वात्मारतं अस्य स्वतंत्रस्यापि स्वेच्छया पा

ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंदनात् ॥ अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥३७॥
यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः ॥ तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यतां ॥३८॥

रतं अपपुत्रेः ईश्वरस्तुष्यति ईश्वरस्याकर्मवश्यत्वेनाम देवमनुष्यादिसजातीयचेष्टां कुर्वतोपि न चेष्टायतनसुखदुःखाद्यस्पर्शित्वं न चैतद्विप्र
तिषिद्धं यच्चैष्वनंतस्य कर्मसुखाद्यस्पर्शनं चेति विप्रतिसिद्धमिति शंक्यं स्वर्गनारकव्यापारेषु तथादर्शनात् ॥ एवं चेश्वरस्य ब्राह्मणसेवानह
भावजन्यसुखाद्यस्पर्शिनोपि न सेवापरायणत्वकथनेन द्विजसेवाया आवश्यकत्वद्योतनाय स्वराडिति विशेषणं ॥ नन्वसेव्य यान्य(?)ः कथं तुष्येत तत्रा
ह ॥ अशेषगुहाशयः सेवकसेव्ययोरुभयोरपि हृदयगुहायां तदंतरात्मतया निविष्टत्वेन सेवाजन्यद्विजादिनिष्ठप्रीतिरपि द्विजातिद्वाराश्रयः से
वकनिष्ठसेवाश्रद्धादि कर्मवेक्ष्य तुष्यतीत्यर्थः कामं तुष्यतीत्यनेन न द्विजसेवातो अधिकस्तोषहेतुरस्तीति द्योत्यते तस्मात् द्विजसेवाया यशआ
दिहेतुत्वाच्च तद्धर्मपरैः द्विजसेवायाया यशआदिहेतुत्वाच्च तद्धर्मपरैः द्विजसेवैकशीलैः तदुपयुक्तं गुणमाह विनीतैः एकविशेषणोपादानेन द्वि

न्प्रसादेनेतिनियमं नरेणाम्योर्हेतुरनपेक्षितत्वान्निस्पृहचित्तं सर्वात्मनाकरणत्वेयेयेन ब्रह्मकुलं निषेव्यतां ॥३८॥ किंच प्रसादे सर्वदुःखानां हानिरस्योपजा
यते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठती मुक्तगीता सर्वादुःखहानिहेतुभूतस्य प्रसादस्य निवर्त्तकत्वादपि द्विजसेवापरायणत्वकथनेन द्विजसेवै
व कार्येत्याह ॥ पुमानिति येषां ब्राह्मणानां निगमं वेधरूपसेवया पुमान् अतिवेलं शीघ्रं स्वयमेव प्रयत्नान्तरेणैव प्रसीदतः आत्मनः मनसः शामं
शांतिं लभेत ननु तः शांतात्मन मनसः किमस्ति असाध्यमिति शेषः शान्तमनसा असाध्यं किंचिदपि नास्तीत्यर्थः किंच हविर्भुजां इंद्रादीनां मुखं ब्राह्मणसे
वयैव तन्मुखानां हविर्भुजां यज्ञाराध्य देवानामपि सेवा हेतुतास्मात ॥ ब्राह्मणोस्य मुखमासीदिति ब्राह्मणकुलस्य भगवदावेशावतारस्य ब्रह्मणो मु
खत्वान दाराधनेनैव हविर्भुगेनदात्मतयावस्थितः परमात्मा तुष्यतीति ब्राह्मणा एवाग्न्यादिभिराराध्या इति भावः ॥३९॥ नन्वग्निमुखा वै देवा इ

पुमांल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यंतशमं स्वतः स्वयं । यन्नित्यसंबंधनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥३९॥
अश्नात्यनंतः खलु तत्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः । न वै तथा चेतनया बहिःकृते हुतासने पारमहंस्यपर्यगुः ॥४०॥

ति देवानामग्निमुखत्वश्रवणात् अग्नौ हुतमेव हविर्भुगनन्तात्मभूतपरमात्मप्रीणनाय भविष्यतीत्यत्राह अश्नातीति ॥ सत्यमग्निरपि तन्मुखमिति
न यापि तत्वकोविदैर्ब्राह्मणानां भगवन्मूर्तित्वमशरीरत्वं जानद्भिः न ब्राह्मणान्वेदयितं रूपमेव चतुर्भुजमिति भगवद्वचनात् इज्यनामभिः आरा
ध्येंद्रादिनामभिः यस्य ब्राह्मणस्य मुखे श्रद्धयाहुतं हविरनंतो भगवान् यथा अश्नाति न तथा चेतनया रहिते हुताशने अग्नौ हुतं अश्नाति कुत
एवं भूतो येन त्वाह ॥ पारमहंस्यपर्यगुः परमहंसा भगवदुपासकाः तेषां भावः कर्म वा पारमहंस्यं ज्ञाननिष्ठितियावत् यद्वा चातुर्वर्ण्यपादिस्वाध्येय
परमहंसा एव पारमहंस्याः तान् परिसमन्तान् गच्छतीति तैः परितो गीयत इति वा अगुः गाङ् गताविति तस्मात् ऊर्ध्वान्तर्गे पादहंस तत्वाकुः

भ्रष्टेस्त्रैगुण्यादिकस्तत्रैप्राकृतमयनिर्देशात् तथात्वेन तदपि कुप्रमयस्यास्युपगमात्तुप्रमये अतोऽल्लोपइति चेत्यात्लोपः नचवतत्रापिसन्नवज्ञावस्यापिवि
धानात्तद्विलापत्तिः बहुत्वग्रहणात् न प्राबल्यात् ॥ यद्वा मरणे वा देशाद्गतिगणत्वात् कप्रत्ययः प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ज्ञानी त्वात्मैव मेमेव
मे मतमिति भगवद्विहितनुक्तेः नित्यानिरतिशयप्रीतिविषयापरमहंसान् अत्यादरेणावेशमाणत्वं नैवनित्यं संनिहित इति तत्सम्मान्स्वमुखेनस्तर
मिव भुंक्त इति भावः ॥४०॥ न केवलं चेतनत्वेन तु नाशनादिप्रेषः किंतु वेदतदर्थज्ञानानुष्ठानादिनापीत्याह ॥ यदिति ॥ यद्ब्रह्मकुलं विरजं रागा
द्युपेतं श्रमप्रमादादिपुरुषदोषविनिर्मुक्तं च सनातनमनादि ब्रह्मपरं ब्रह्मतत्त्वरूपप्रकाशकं वेदं च श्रद्धा उपासनायाम अध्ययनाध्यापनजपपाराय

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः ॥ समा
धिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥४१॥

णादिषु त्वरउपासनोपयुक्तानकर्मयोगेष्वयनाद्युपयुक्तकांडव्रतादिष्वकर्मयोगस्मकृच्छ्रादिरूपानशनादिगर्भत्वात्तपःशब्देनाभिधानयु
क्तेः ॥ मंगलत्वं विशुद्धाचारः मौनं वाङ्नियमः आरंभणसंशीलनं च ॥ संयमः ध्यानोपयुक्तशमदमादिः अध्ययनाद्युपयुक्तकरणनियमश्च
समाधिना ध्यानेन धारणया च अर्थदृष्टये अर्थः पुरुषार्थरूपं ब्रह्म अभिधेययज्ञोपासनाद्युपयुक्तकरणनियमश्च समाधिना ध्यानेन र
सिंश्चोके बिभ्रति धारयन्ति ब्राह्मणकुलं पुनर्ब्रह्मविशिनष्टि ॥ यत्र ब्रह्मणि परस्मिन् वेदे च इदं विश्वं परमात्मस्वरूपादिकं च आदर्श इवाव
भासते प्रकाशते ॥४१॥

तेषां ब्राह्मणानां पादसरोजरेणुं हे आर्याः॥ आयुः आ आयुः इत्यादि। प्रश्लेषेण बोध्यः। यावज्जीवमित्यर्थः। अधिकिरीटं मुकुटोपरि वहेयेति प्रार्थ
नायां लिङ्। किं तद्वहनसाधनं तत्राह॥ यं ब्राह्मणपादसरोजरेणुं नित्यदा बिभ्रतः वहतः। पुरुषस्य पापमाशु नश्यति॥ अमुं वहन्तं सर्वगुणाकर
त्वाद्गुणा भजंति आश्रयंते॥४२॥ तं च गुणानामालयं शुभगुणाश्रयं शीलमेव धनं यस्य तं कृतमुपकारं जानातीति कृतज्ञं वृद्धान् ज्ञानाधिका
न् आश्रयते इति तं सर्वाः संपदः वृणुते वृणीते। लट् आत्मनेपदे बहुवचनं तद् इति उत्पादादेशः॥ आभ्यस्तयोरात इत्याल्लोपः सम्यक् भजंते। उपसं

तेषामहं पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः। यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजंति॥४२॥ गुणा
यनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेनु संपदः। प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम्॥४३॥ श्रीमैत्रे
य उवाच॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः। तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः॥४५॥ पुत्रेण जयते लोका
निति सत्यवती श्रुतिः॥ ब्रह्मदंडहतः पापो यद्वेनोत्यतरत्तमः॥४६॥ ॐ नमो भगवते वासुदेवाय

हरतीति ब्रह्मकुलं द्विजकुलं गवां च कुलं सानुचरः सभक्तः भगवान् च मह्यं प्रसीदताम्॥४३॥ एवं वदंतं नृपतिं हृष्टाः पित्रादयः साधवः गुणा
न् तुष्टमनसः साधुवादेन साधु साध्विति वादेन तुष्टुवुः स्तुतवंतः॥४४॥ स्तुतिमेवाह॥ पुत्रेण लोकान् पुण्यलोकान् पिता जयति साधयती
ति श्रुतिः जनश्रुतिः सत्यवती अबाधिता पुत्रेणेति पुत्रशब्दावयवार्थविषयभूतेनेनमर्थः पुंसंज्ञकान्नरकात्त्रायते इति हि पुत्रः निदर्शयं

॥भा॰स्क॰७॥

॥१३२॥

तथाहिरण्यकशिपुरपिभगवन्निंदयातमोविविक्षुः प्रवेशमाशंकितः आशंसायांसन्वत्क्वय इतिसनंतात्सनाशंसभिक्षउरितिउः सूनोः प्रल्हाद स्यानुभावतः प्रभावात्तमः॥ नरकं अत्यगात् अतिक्रम्य भगवंतः अगादित्यर्थः॥४६॥ तस्मादेवीरश्रेष्ठपृथ्व्याः पतिस्त्वंशाश्वतीः समाः संवत्स रान् संजीवकालाध्वनोरत्यंतसंयोगइतिद्वितीया यस्यतवसर्वलोकानामेकस्मिन्नाद्वितीये भर्तर्यच्युते ईदृशी भक्तिरस्ति॥४७॥ हे पवित्रकीर्ते वयंत्वयैवनाथेनमुकुंदनाथाः त्वमाथत्वमेवास्माकं मुकुंदनाथ एतेवर्यम्वसितमित्यर्थः कुतः यो भवान् ब्रह्मण्यदेवस्य उत्तमश्लोकस्य विष्णोः

हिरण्यकशिपुश्चापि भगवन्निंदया तमः विविक्षुरत्यगात्सूनोः प्रल्हादस्यानुभावतः॥४६॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः यस्येहत्वच्युते भक्तिः सर्वलोकैकभर्तरि॥४७॥ अहो वयं स्माद्य पवित्रकीर्ते त्वयैव नाथेन मुकुंदनाथाः यदुत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथाव्यनक्तिः॥४८॥ नात्यद्भुतमिदं नाथ तवाऽऽजीव्या नुशासनम्॥ प्रजानुरागो महतां प्रकृतिः करुणात्मनाम्॥४९॥ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो॥ श्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः॥५०॥

कथाव्यनक्तिप्रकाशयति॥४८॥ नाथ तव आजीव्यानुशासनं राजानमाजीवंत्यु पजीवंतीत्युपजीव्याः तेषामस्माकं अनुशासनमिति यदिदं नात्यद्भुतम्॥ कुतः महात्मनां करुणात्मनां कृपास्वभावानां प्रजास्वनुरागः प्र कृतिः स्वभावः॥४९॥ हे प्रभो दैवसंज्ञितैः दैवापरपर्यायैः कर्मभिः श्राम्यतां संसरतां अतएव नष्टदृष्टीनां नः अस्माकं अधुना त्वया तमसः नरकस्य पारस्तीरमुपसादितः प्रापितः॥५१॥

॥राम:॥

॥१३२॥

ईश्वरहत्याप्रसंगमिति ॥ नमइति ॥ ब्राह्मणजातिं अधिष्ठाय यः क्षत्रं विभर्त्ति क्षत्रमाविश्य ब्रह्मकुलं विभर्त्ति तदुभयमाविश्य इदं विश्वं विभर्त्ति तस्मै
भगवतोपयुक्तगुणमाह विवृद्धसत्वाय रजस्तमोभ्यामनभिभूतसत्वप्रचुराय अत एव महीयसे परमपुरुषाय परमपुरुषविभूतिभूताय तु
नमः ॥ ५१ ॥ इति श्रीभागवते टीकायां एकविंशोध्यायः ॥ २१ ॥ यदुक्तं भगवता ह्रस्वेन कालेन गृहोपयातान्द्रष्टास्मि सिद्धानिति कुमारागमनं तेश्वतत्वो
पदेशश्चेति तद्विस्तरेण वर्णयितुं कुमारागमनमाह मुनिः जनेष्विति ॥ विपुलपराक्रमं पृथुं प्रसेवं जनेषु प्रगृणत्सु वदत्सु सत्सु पृथ्वीसेव वचोषांते

नमोविवृद्धसत्वाय पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य विभर्त्तीदं स्वतेजसा ॥ ५२ ॥ इति श्रीभागवते महापुराणे चतुर्थ
स्कंधे एकविंशोध्यायः ॥ २१ ॥ मैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यव
र्चसः ॥ १ ॥ तांस्तु सिद्धेश्वरान्राजा व्योम्नोवतरतोर्चिषा लोकानपापान्कुर्वंत्सासानुगोऽचष्ट लक्षितान् ॥ २ ॥ तद्दर्शनोद्ग
तान्प्राणान्प्रत्यादित्सुरिवोत्थितः ॥ ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव ॥ ३ ॥ गौरवाद्यंत्रितः सभ्यः प्रश्रयानतकंध
रः ॥ विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥

ते चत्वारो मुनयः तत्रोपजग्मुरित्यर्थः ॥ १ ॥ लोकानपापान्कुर्वंतः अर्चिषा लक्षितान्
सनकादय इति लक्षितान् व्योम्नः आकाशादवरोहतः तान्सिद्धेश्वरान्सानुगः सभ्यो राजा आचष्ट अद्राक्षीत् ॥ २ ॥ तेषां दर्शनेनोद्गतान्प्राणान्पुनः
प्राप्तुमिच्छुरिव ऊर्ध्वं प्राणाह्युत्क्रामंति यूनः स्थविर आगते प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इत्यन्वयमर्थः सूचितः प्राणास्तावत्तेजसाक्षि
ताः प्रत्युत्तिष्ठंति स्वयमनुत्तिष्ठतः प्राणहानिः स्यादिति भयादिव ससंभ्रमं सदस्यैरनुगैश्च यथेंद्रियेशः क्षेत्रज्ञः गुणान्शब्दादीननुरुद्धतीत्यान्तुकेय

॥भा.च॰॥
॥१३३॥

सद्यः प्रश्रयेण विनयेन नतनाकंधरा यस्य सः गृहीतमर्घ्यं ईहितं अर्घ्यमासनं येस्तान् यथाविधि पूजयांचक्रे ॥४॥ तत्पादशौचैः सलिलैर्मार्जितं क्षालितं
अलकबंधनं केशबंधनं येन सः तच्छीलवतां वृत्तमाचरन्मानयन्निव सत्यमाचरन् ॥५॥ हाटकासने सुवर्णासने स्वधिष्ण्ये वेदिकायां पावकानिवासनानुपवि
ष्टान् अथ हासमयाः प्रीतः वाक्यश्रवणत्वरादुपयुक्तः करणनियमनाभ्यां संयुक्तः भवाग्रजान् रुद्रात्पूर्वजान् सनकादीन्प्राह ॥६॥ उक्तमेवाह ॥ अ
हो इति हे शोभिः हे मंगलायनाः मे मया किं मंगलं किं पुण्यं अहो आचरितं कृतं यतः यस्य मयो योगिभिरपि दुर्दर्शानां दुःखेनापि द्रष्टुमशक्यानां वो युष्

तत्पादशौचसलिलैर्मार्जितालकबंधनम् ॥ तच्छीलवतां वृत्तमाचरन्मानयन्निव ॥५॥ हाटकासन आसीनान् स्वधि
ष्ण्येष्विव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥६॥ पृथुरुवाच ॥ अहो आचरितं किं मे मंगलं मंगला
यनाः ॥ यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ॥७॥ किं तस्य दुर्लभतरमिह लोके परत्र च ॥ यस्य विप्राः प्रसीदंति
शिवो विष्णुश्च सानुगः ॥८॥ नैव लक्षयते लोको लोकान्पर्यटतोपि यान् ॥ यथा सर्वदृशं सर्व आत्मानं येऽस्य हेत
वः ॥९॥ अधना अपि धन्या हि साधवो गृहमेधिनः ॥ यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥१०॥

स्माकं दर्शनमा
सीत् सुकृतमंतरेण मादृशानां भवद्दर्शनं न संभाव्यते इत्यर्थः ॥७॥ किमस्मद्दर्शनसाध्यं तत्राह ॥ यस्य पुंसः विप्रा भवादृशाः शिवो रुद्रो मंगल
रूपो वा विष्णुश्च प्रसीदंति तस्य इह परत्र वा लोके किं दुर्लभतरमस्ति सर्वं सुलभमेवेत्यर्थः ॥८॥ नैवेति लोकाननुपर्यटतो यान् युष्मान् लो
को नैव लक्षयेन न पश्यति यथा सर्वदृशं सर्वज्ञमात्मानं अस्य विश्वस्य हेतुभूताः ब्रह्मादयः सर्वेपि न लक्षयंते तेन तथेत्यर्थः ॥ यस्य हेतव
इति पाठे तु हेतवः ॥ ब्रह्मादयः सर्वे यस्य पत्नं बंधिनः यस्य वशे प्रभूताः तं सर्वज्ञमात्मानं यथा न लक्षयंति तथेत्यर्थः ॥९॥ तद्दर्शनेन स्वस्य ध

न्यतामाविष्करोति ॥ अधना इति ॥ गृहमेधिनः अध
ना अपि यदि साधवः तर्हि ते धन्या एव हि यतः येषां

॥१३३॥

ग्रहमेधिनांसाधूनांग्रहाः अर्हाः पूज्याभवाद्दृशैस्तैर्वैयावराणीयाः स्वीकार्याः॥ अंबुंजलंतृणंभूमिः ईश्वरोगृहस्वामी अपरेगृहवासिनोभृत्यादयश्चयेषुतयाभूताभवंति॥ १०॥ एवमन्वयमुखेनधन्यतामाविष्कृत्यव्यतिरेकमुखेनाप्याविष्करोति व्यालेति॥ अरिक्ताखिलसंपदः॥ अरिक्ताः पूर्णाः अखिलाः संपदः येषुताहृशा अपियद्गृहाग्रहमेधिनांग्रहाः पदितीर्थयाद्भगवान्तत्संबंधिनस्तीर्थपादीयाभागवतास्तेषांपादतीर्थैर्विवर्जितास्तर्हिगृहाग्रहाः आव्यालयः दुमाः सर्पावासचंदनदुमप्रख्याः॥ ११॥ एवमन्वयव्यतिरेकाभ्यांतदागमनेनस्वस्यधन्यतामभिधायतेषांस्वा

आव्यालयद्रुमा एतेष्परिक्ताखिलसंपदः॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः॥ ११ स्वागतंवोद्विजश्रेष्ठायद्व्रतानिमुमुक्षवः चरंतिश्रद्धयाधीराबालाएवबृहंतिवै॥ १२॥ कच्चिन्नः कुशलंनाथाइंद्रियार्थार्थवेदिनाम्॥ व्यसनाऽवापएतस्मिन्पतितानांस्वकर्मभिः॥ १३॥ भवत्सुकुशलप्रश्नआत्मारामेषुनेष्यते॥ कुशलाकुशलायत्रनसंतिमतिवृत्तयः॥ १४॥

गतप्रश्नपूर्वकंस्वाभाविकीधन्यतामाहस्वागतमिति॥ हेद्विजश्रेष्ठाः वः युष्माभिः स्वागतंकुशलमागतंकिंभवतामकुशलमस्तीत्यभिप्रायः यत्यस्मात्बालाएवभवंतः मुमुक्षवः अतएवधीराजितेंद्रियाः संतः बृहंतिव्रतानिचरंतियद्वाएषांवोव्रतानियुष्माभिर्दर्शितान्येवान्येमुमुक्षवः बृहंतिदीर्घकालनिर्वाह्यानिव्रतानिधर्मरूपव्रतानिचरंति॥ १२॥ कात्काभिप्रेतकुशलाभावमेवव्यनक्तिस्वस्यतावत्कुशलाभावंव्यनक्ति॥ कच्चिदिति॥ किमस्माकंकुशलंमस्तीत्यर्थः कथंभूतानांहेनाथाः इंद्रियार्थान्शब्दादीनिनेवार्थान्पुरुषार्थरूपान्विंदंतीतितथातेषां अतएवयस्मिन्पुष्पनेवीजानिसत्र्या वापः संसारस्तस्मिन्नूतकर्मभिः पतितानाम॥ १३॥ नन्वभ्यागतानांनः कुशलंकिंनपृच्छसेतत्राह॥ भवत्सुकुशलप्रश्नः नेष्यते॥ तत्रहेतुः आत्मारामेषुब्रह्मात्मकत्वात्मानुभवैकपरेषु॥ आत्मारामाणांकदाचिदकुशलसंभावनयाकुशलप्रश्नइष्यतांतत्राह॥ यत्रआत्मारामेषुकुशलरूपामतिवृत्तयः

ताविवेन्तसंति कुशला कुशलविषयचिंतनरूपमिति वृत्त्य योर्हि संगकामक्रोधसंमोहादिजननद्वारा सुखदुःखादिहेतव अनंतस्तासामेवाभावात् कुतो भवेन्नवकुलैसंभावनेत्यर्थः मतिवृत्तीनां च संगादिद्वारा कुशलनिमित्तत्वं भगवता गीतं। ध्यायतो विषयान्पुंसः संगस्तेषूपजायते॥ संगात्संजायते कामः कामात्क्रोधोभिजायते॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥१८॥ तत्तस्मात् अहं कृतविश्वासः सन्नत पश्विनां तापत्रयातुराणामस्माकं सुहृदो युष्मान्पृच्छामि तस्मिन्संसारे वर्तमानस्य केन हेतुना क्षेमः सुखं मोक्षइतियावत् अंजसा सुखेन भवेदितिपृष्टे॥१५॥ स्वभक्तानुग्रहीतुं भगवानेव भवाद्दृशरूपश्चरतीत्याह॥ व्यक्तमिति॥ आत्मवतां प्रशंसायां मतुप्‌ प्रशस्तचित्तानां ज्ञानिनामात्मानिरतिशयप्रीतिविषयः प्रीतिमान्स्वतयाहिगीतम्॥ प्रियोहि ज्ञानिनोत्यर्थमहं स च मम प्रियइति आत्मशब्देनात्मत्वप्रयुक्तं तद्बुभर्यं विवक्षितं आत्माहिनिरतिशयप्रीतिविषयः स्वशरीरे प्रीतिमान्स्व आत्मभावनः आत्मनः जीवान्भावयति स्वविषयज्ञानप्रदानादिना सत्तावतः करोतीत्यात्मभावनः स्वपरयाथात्म्यज्ञानविधुरा हि जीवाः स्थावरपर्यंतजन्मभिरसत्प्रायास्तानात्मवतः करोतीत्यर्थः सिद्धाः ज्ञानिनः तद्रूपः तथा च गीतं भगवता ज्ञानी त्वात्मैव मे मतमिति अजो भगवान्स्वानामनुग्रहाय स्वानुग्रहीतुमिमां पृथिवीं चरतीति व्यक्तं निश्चितम्॥१६॥

नरहं ह्यतविश्रंभः सुहृदो वृतपश्विनाम्॥ संपृष्टो भवतां तस्मिन्क्षेमः केनांजसा भवेत्॥१५॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः॥ स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः॥१६॥ ७

एवं पृथोः । सत्कं शोभनं वचनं सारं रम्यं मुष्टुं गंभीरार्थं मितं अल्पं मधुरं श्रोत्रप्रियं श्रुत्वा प्रीत्या स्मयमान इव कुमारः प्रत्युवाच ॥ १७ ॥ तत्र सत्संगत्या
दि प्रणाड्या त्वं तरोत्तरं नेहरहरभ्यासाधेयातिशयसाधनसत्त्वकानुग्रहीता प्रयाणां नुहत्त प्रीतिरूपापन्नाविच्छिन्नप्रत्यक्षतापन्नपरभक्तपरपर्या
यभगवद्भक्तियोग एव क्षेमहेतुरिति विवक्षन्त्सा वचसा मभिनंदति । साध्विति ॥ हे महाराज भवतां साधु सम्यक् पृष्टं कृपया भूतेन विदुषापि नत्वहितपुरुषार्थ
ज्ञानवतापि सर्वभूतहितात्मनां सर्वभूतहितकरणप्रवृत्तिबुद्धिमता । भूतहितार्थमेव त्वया पृष्टं कृतेन तु स्वयं वेत्तुं स्वत एव ज्ञात्वादित्यर्थः भूतहि
ताचरणमेव साधूनां स्वभाव इत्याह । साधूनां साधुर्वं तिपरकार्यमिति साधवः तेषां गतिप्रवृत्तिः ॥ १८ ॥ ईदृशभूतहिताचरणरूपा सत्संगति

मैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु । स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥ १७ ॥ सनत्कु
मार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना । भवता विदुषा चापि साधूनां गतिरीदृशी ॥ १८ ॥
संगमः खलु साधूनामुभयेषां च संमतः । यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शम् ॥ १९ ॥ ॥

स्वावन्मनकारणमित्याह ॥ संगम इति ॥ उभयेषां तु बुभुक्षूणां मुमुक्षूणां च स्वस्वसमाहितभोगमोक्षादेः प्रथमं साधूनां संगम एवेति संमतः
सत्संगमस्य भोगमोक्षसाधनत्वमुपपादयति । तेषां साधूनां संभाषणेन सहितः प्रश्नः संभाषणसंप्रश्नः प्राकपार्थिवादित्वादुत्तरपद
लोपि समासः यद्वा संभाषणावसरे संप्रश्नः सम्यक् प्रणिपातसेवापूर्वकः स्वर्गापवर्गसाधनप्रश्नः सर्वेषां उभयेषां स्वर्गापवर्गसु
खं वितनोति । सति संप्रश्ने साधुभिर्भोगमोक्षसाधनेऽउपदिश्यमाने इति साधुष्वति संप्रश्नः सम्यग्येत्तिं वितनोतीत्यर्थः ॥ १९ ॥ एवं सत्संग
स्य भोगमोक्षप्रथमकारणत्वमुक्तं तत्र भोगसाधनत्वमेवं प्रथमं सत्संगः ततः संभाषणं ततः प्रश्नः ततस्तत्साधनयोगाद्युपदेशात्ततः साधनोपसं

हरेर्णयागाद्यनुष्ठानं ततो भोग इति॥ इयं च प्राणाद्यनुवृत्त्याधिकृतस्य। कर्मणाम् अस्थिरफलत्वनिर्णयपूर्वकानंतास्थिरफलापातप्रतीतिः पुरुषस्य न
वकत्वेति तामस्नाहूत्य सत्संगानेमित्तसाधनत्वं प्राणाद्यपपादयिषुस्तावत्संगतिस्ततः संभाषणं ततः प्रश्नः ततो भगवद्गुणानुश्रवणं ततस्तत्रानुराग
इत्येतत्संघकं तावत्तपि सिद्धमेवेत्याह॥ अस्त्वेवेति हे राजन् मधुद्विषः पादारविंदयोः ये गुणाः तेषामनुवादने अनुश्रवणे सदा रतिर्भवतोऽस्त्येव
रतिरस्त्वेवेत्यनेन तत्पूर्वभाविसंगत्यादि चतुष्टयमप्यस्तीत्यर्थाद्युक्तं भवति॥ तेन विना रत्यसंभवात्॥ अस्तीति सिद्धवन्निर्देशेन रसं तं पेवकमव
श्यं मुमुक्षुणां प्रयत्नसंपादनीयमित्युक्तं भवति यतः रतिसिद्धानंतरं भक्त्युत्तरमुत्तरोत्तरसाध्यं सिद्धप्रायमेवेत्यभिप्रायेणाह॥ येति॥ यानैष्ठिकीर
अव्यभिचारिता भगवद्गुणानुवादने रतिः अंतरात्मनो मनसः मलरूपं कषायं धातुरागवद्दृढनिवर्त्यं पुण्यरूपं कर्म कामं भ्रंशं विधुनोति क्षपयय

शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यक्विमृशेषु हेतुः॥ असंग आत्मव्यतिरिक्त आत्मनि सा दृढादयं ब्रह्मणि निर्गुणे रतिः
२०॥ अस्त्येव राजन् भवतो मधुद्विषः पादारविंदस्य गुणानुवादने। रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमंतरात्मनः॥२१

तिः॥२०॥ इत्यनंतरभाविसाधनजातं विवक्षुः साक्षान्मोक्षसाधनभूता उक्तविधा भक्तिरेवेत्याह। शास्त्रेष्विति॥ नृणां मोक्षस्य क्षेमस्य समीचीनः साध
न विमर्शोयेषु तेषु शास्त्रेषु समाहान्निरपेक्षो हेतुः साधनं इयानेव सुनिश्चितः एवकारेण न मेवं विधानमन्यतरद् इह भवति नान्यः पंथा अयनाय विद्य
तेनमेवाविदित्वातिमृत्युमेतीत्युक्ताऽनन्तगोपायत्वं विवृणोति नम्॥ इत्यात्रिसुक्तः कोसौ तत्राह॥ निर्गुणे सत्वादित्रयगुणरहिते आत्मनि किं जीवेने
त्याह॥ ब्रह्मणि स्वरूपेणागुणेऽस्त्विहेति ब्रह्मणीत्यनेनैव गुणत्रयराहित्यपरत्वं निर्गुणशब्दस्य निश्चितम्। या दृढा रतिः यच्च आत्मव्यतिरिक्तेर
ष्वसंगः संगाभावश्चेतीयानेवेत्यर्थः॥ अत्र रतिशब्देनोक्तविधपरभक्तिजन्यभगवत्स्वरूपसाक्षात्कारलक्षणपरज्ञानजन्यभगवत्प्रीतिशायर
वापरमभक्तिर्विवक्षितानस्यादावुर्नाम चांचल्यराहित्यं चांचल्यं च मध्ये मध्ये विषयांतरानुचिंतनरूपं तच्च विषयांतराप्राप्तिजननद्वाराभक्ति

विरोधीनां च रूपकार्यं मपि निषिध्यते । असंग आत्मव्यतिरिक्त इति अत एवात्मव्यतिरिक्तासंगस्यापि पृथग्वा तस्य सहउपायत्वमनेन कार्यः ॥२१॥
एवं विजानीयस्य यानतरा व्यवहितप्रीमति शारूपा परमभक्तिः स्या ज्ञानक्षेमहेतुरित्युक्तं एवं भूतापरमभक्तिः कथं निष्पद्यत इति जिज्ञासायां तत्साधनो
न्युपदिशति । सेति । निर्गुणेत्र ब्रह्मणि यारतिम इ समस्तनात्मनि ॥ असंग एव श्रद्धादिभिः स्यात् इति चतुर्थेनान्वयः अत्र निर्गुण इत्यस्य पूर्ववदर्थः
अनात्मनि आत्मव्यतिरिक्ते शब्दादिविषयेतस्य सहस्तत्वं नाम संनिहितासंनिहितत्वं । यद्यप्यत्र श्रद्धादीनामवश्यसंपादनीयत्वाभिप्रायेण संभा
वितक्रमाणामपि क्रममनाहत्य ते कथिता । तथापि क्रममाश्रित्यैव व्याख्यायंते ॥ तत्र प्रथमं नित्यं योगेश्वरोपासनया योगीश्वरा योगिश्रेष्ठाः योगि
नामपि सर्वेषामजते नीतरात्मना ॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मत इत्युक्तविधया युक्ततमाः भागवतास्तेषामुपासना सेवा तद्दानुकूल्ये

सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाध्यात्मिकयोगनिष्ठया । योगेश्वरोपासनया नित्यं पुण्यश्रवःकथया पुण्यया च ॥२२॥

निवृत्तिः तया नतः पुण्यश्रवः कथया पुण्यश्रवसः भगवतः कथया भगवत्पुण्यश्रवणेनेत्यर्थः ॥ आश्रयतः स्वतश्च पुण्यरूपत्वख्यापनाय पु
ण्यश्रवः कथया पुण्ययेत्युक्तं ॥ ततः अर्थेंद्रियारामगोष्ठ्यत्रस्तया अर्थारामाः अर्थपरायणाः ते सह गोष्ठी तस्यां या अतृष्णा अनासक्तिस्तया तेषा
मर्थेंद्रियारामाणां सम्मता अर्थाः कामाश्च तेषामपरिग्रहेण भगवद्गुणानुश्रवणेन च भगवत एव पुरुषार्थरूपत्वमर्थकामयोस्तद्विपर्ययरूपत्वं
ज्ञात्वा तयोर्विरक्तः स्यादिति गुणानुश्रवणात् तस्यापोः पौर्वापर्यं युक्तं ततः जिज्ञासया तत्त्वहितपुरुषार्थविविक्तया ततः ॥ आचार्यवतये त्वर्यसि
ध्यमानाचार्यवानिति बहुसमाप्तत्वात् ॥ आचार्यवान् पुरुषो वेद आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदिति श्रुतेराचार्यवतया

भा० च०

१२६

अपि साधनत्वनिरूपणात् । अनेन परीक्षा लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्येतत् श्रुत्यर्थोऽनुसंहितः । ततः आध्यात्मिकयोगनिष्ठया आचार्योपदिष्टभगवद्रूपा सनोपयः आध्यात्मिको योगः तस्मिन्या निष्ठा मननात्मिका तया ततः श्रद्धया आध्यात्मिकयोगानुष्ठानविषयया त्वरया एवं पूर्वकालसाधनजातमुक्तम् । अथ समस्तकालसाधनजातमुच्यते । अत्र नैत्यिकाद्यपर्यं संमयसर्वेषामनुष्ठानविधानात्ततः भगवद्धर्मचर्यया भगवद्धर्मा भगवदाराधनैकवेषाः पंचमहायज्ञादयो नित्यनैमित्तिकानि तेषां चर्या आध्यात्मिकयोगांगत्वेनानुष्ठानं तया पारमहंस्याः पुरमहंसानां संबंधिनी या चर्या ब्रह्मात्मकत्वालयाद्यात्मानुभवरूपा तया । आध्यात्मिकयोगस्य ज्ञानकर्मयोगाभ्यां निवर्तत्वात् विविक्तरुच्या जात्याश्रयनिमित्तादुष्टान्नादिषु रुच्या आत्मना आत्मनि चयः परितोषस्तेन आत्मानुभवज

अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण च । विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात् ॥ २३ ॥

अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना । यमैरकामैर्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च ॥ २४ ॥

नितसंतोषमात्रेणैवं न तु तद्व्यतिरिक्तसंतोषेणेत्यर्थः तर्हि किं भगवद्गुणानुभवजनितसंतोषो विनिषिध्यते नेत्याह । हरेर्भगवतो गुणानुश्रवणस्मरणरूपं पीयूषममृतं तत्पानात् विना तदन्यविषयानुभवजातसंतोषाभावेनेत्यर्थः ॥ २३ ॥ अहिंसया भूतसुहृत्त्वेन । स्मृत्या भोजनाद्यपयुक्तदशास्वपि मुभाश्रयसंशीलनरूपस्मृत्या तथा भोजनोत्तरादिदशासु मुकुंदस्याचरितानि चेष्टितानि तान्येवाग्र्यं श्रेष्ठं सीधु अमृतं तच्चरितश्रवणश्रावणस्मरणरूपान्ननमुखेनेत्यर्थः यमैर्वाह्येंद्रियनिग्रहैः । अकामैरंतरिंद्रियनिग्रहैः प्रामैरित्यर्थः नियमैः शौचाचारादिभिः । अनिंदया द्दतरसाध्यसाधनानामनिंदया चित्तस्य तत्तावण्य प्रयुक्तचांचल्यं स्यादिति भावः निरीहया देहधारणाद्यनुपयुक्तचेष्टाराहित्येन द्वंद्वानां शीतोष्णाधिव्याधीनां तितिक्षा सहिष्णुतया ॥ २५ ॥

द्वि ३

रामः

१२६

हरेर्भगवतः तत्पराः भागवताः तेषां कर्णपूराः कर्णालंकारभूताः कर्णेषु प्रवाहरूपा वा ये गुणाः गुणशब्दस्य सापेक्षत्वेपि संबंधिशब्दत्वात्समासः तेषा
मभिधानेन विजृंभमाणया भक्त्या परभगवद्गुणश्रवणस्मरणादेरर्थकामवेत्स्यनत्वहितपुरुषार्थविविल्साजननद्वारा चार्योपसहितहेतु
त्वाभिप्रायेण पुण्यश्रवः कथया पुण्यया चेत्युक्तम् ॥ उपासनदशायामप्यानंदकरत्वाभिप्रायेण मुकुंदचरिताग्र्यसीधुनेत्युक्तं ॥ अथ नु आप्रयाणानु
वर्तमाना हरहरहर भूमसाध्येयातिशयदर्शनसमानाकारध्यानोपासनादिशब्दवाच्यपरभक्तेस्तज्ज्ञानितभगवत्स्वरूपसाक्षात्कारलक्षणपरज्ञानज
नभगवत्स्वीत्मनिशयरूपसमाधिपरमभक्त्याद्यपरपर्यायपरतिनिष्पादकत्वेनुग्राहकत्वाभिप्रायेण हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेनेत्युक्त
मितिनपौनरुक्त्यम् ॥ २४ ॥ एवं अडारिमहक्तुतपरभक्तिजन्यपरज्ञानजन्यसमाध्यपरपर्यायपरतेः ह्रेमसाधनत्वमुपपाद्य केन प्रकारेण

हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया ॥ भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणो ब्रह्मणि चांजसा रतिः
२५ ॥ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा । दहत्यवीजं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः
२६


तेः साधनत्वमितिविवित्साया माह ॥ यदेति ॥ यदा च ब्रह्मणि नैष्ठिकी दृढा रतिः तदा आचार्यवान् आचार्यानुग्रहविषयः पुरुषः ज्ञानविरागसहकृ
तरंस्मात्मकज्ञानवेगेन उद्रिक्तरमेसमर्थः ॥ हृदयं हृत्स्थानं प्राप्नुवन् जीवात्मा हृदिह्ययमात्मेति श्रुतेः पंचात्मकं पंचभूतात्मकं जीवकोशं सरीरं
अवीजं वीजरहितं भिन्नाज्ञानरूपमूलं यथा तथा यथाच्छिन्नपुण्यपापमूलं यथा दहति संतापयति ॥ अज्ञानकृतपुण्यपापमूलो हि देहसंबं
धः देहसंबंधनिमित्ताज्ञानमूलकपुण्यपापात्मकं कर्म निःशेषं दहतीति रतिः ह्रेमसाधनमित्यर्थः देहमाश्रित्य तिष्ठतो जीवस्य ज्ञानार्चिषः ॥ र
स्या अपदेहदाहे दृष्टांतमाह ॥ योनिमिवेति ॥ उत्थितः ॥ ज्वलितोऽग्निः योनिमरणीमिवेत्यर्थः दहत्यवीर्यमितिपाठेप्ययमेवार्थः देहस्यवीर्यं वलं

एवं देहसंबंधनिमित्तं पुण्यपापरूपं कर्मविशेषं दहंस्तस्मान्मुक्तस्स न पुनः पंचात्मकजीवकोशसंबंध इत्याह। दग्धाशय इति। एवं दग्धाशयः दग्धशरीरः
मुक्ताः समस्तास्तद्गुणा रागादयो येन सः॥ आत्मनः बहिर्भूतं शरीरं अंतः॥ अंतर्भूतं रागादि देहोपजातं च न विचष्टे न पश्यति न पुनर्देहादिसंबं-
धं प्राप्नोतीत्यर्थः। बहिरंतश्च विभिन्नदृष्टिनिदानं देहविनाशे पुरस्तात्संसृतिदशायां परात्मनोर्जीवपरयोर्यद्व्यवधानं व्यवधायकं संबंधज्ञान-
आपकं भवतीति च शरीरं तज्जन्यं रागद्वेषादिकं च न पश्यति परात्मनोर्यद्व्यवधानं पुरस्तादित्यनेन मुक्तजीवपरयोः संबंधः ज्ञानप्रभावो नेत्युक्तं भ-
वति स्वप्ने यथा देहं रागादिकं च पश्यति तथेत्यर्थः देहाद्यस्थिरत्वे स्वप्नस्य दृष्टत्वज्ञापनाय स्वप्नदृष्टांतः॥२७॥ कुतो न पश्यति तत्राह॥ आत्मानमि-

दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो वहिरंतर्विचष्टे॥ परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुष-
स्तद्विनाशे॥२७॥ आत्मानमिंद्रियार्थं च परं यदुभयोरपि॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा॥२८॥
निमित्ते सति सर्वत्र जलादावपि पूरुषः॥ आत्मनश्च परस्यापि भिदां पश्यति नान्यदा॥२९॥ हरिः शरणं

ति॥ आत्मानं देहं इंद्रियार्थं शब्दादिकं उभयोर्देहेंद्रियार्थयोः परमस्मत् भोगोपकरणभोगस्थानादिकं तत्सर्वमाशये वासनाख्ये उपाधौ सति
पुमान् पश्यति नान्यथेत्यर्थः वासनाकारणकलेवरभोग्यभोगस्थानभोगोपकरणादिषु प्रावरणेषु॥२८॥ एवमुक्तोऽउपाध्यभावाद्देहोपाधिकदेहा-
द्यसंबंधः स्वाभाविकज्ञानजीवसंबंधज्ञानमज्ञानवशोक्तः संसृतावुपाधिसद्भावाज्जीवपरसंबंधज्ञानाभावमाह॥ निमित्त इति॥ जडे शरी-
रे सर्वत्र जलादौ निमित्ते शरीराद्युपाधौ सति आत्मनः स्वस्य परस्य परमात्मनश्च भिदां संबंधविरहं पश्यति॥ अन्यथा उपाध्यभावे मुक्ता-
वित्यर्थः न पश्यति यदाभिदां वैशम्यं पश्यति नान्यया शरीराद्युपाधिविगमे परमसाम्याविर्भावान्न वैशम्यं पश्यतीत्यर्थः॥२९॥ ॥


॥ इदं पुस्तकं लिखितं चतुर्भुजरामानुजदासेन ॥ स्वार्थं परार्थम् ॥



॥श्रीमते रामानुजाय नमः॥ पूर्वस्मिन्स्कंधे षष्ठादशेऽध्याये हतपुत्रादितिशक्रप्राप्तिमग्राहे एवं विष्णुनेति विष्णोरिंद्रस्य पक्षपातित्वमुक्तं तत्र सर्वांतरात्मनः सर्वभूतसुहृदो
निरतिशयप्रियरूपस्याप्तकामस्य निरस्तनिखिलदोषस्य परमकारुणिकस्य भगवतः कथं प्राकृतवद्वैषम्यनैर्घृण्यादिकमिति पृच्छति राजा समइत्यादिना त्रिभिः य
द्यपि तत्र जीवकर्मकर्मगुणानुगुण्येनांतरात्मतया नियंतुर्न वैषम्यादिदोषप्रसक्तिरिति तत्र तत्र बहुवारमुक्तमिति न शंकावकाशस्तथापि तत्र तत्राप्रसंगादुक्तमेव
तद्द्रढयितुं किं गुणानां कर्मणां च प्रत्येकं सुखदुःखादिनिमित्तत्वमुत समुच्चितानामथवा कर्मणामेव निमित्तत्वं गुणानां तु तद्धेतुत्वमुत गुणानामेव तन्निमि
त्तत्वं कर्मणां तु गुणोपचयापचयादिनिमित्तत्वमित्यादिशंकापरिहारानुक्तौ तुं च प्रश्नः समइति हे ब्रह्मन्भगवान्मूर्त्ताषाड्गुण्यः निरस्तनिखिलदोषश्च अने
नाप्तकामत्वेन हृचितं ततएव स्वप्रयोजननिरपेक्षत्वं च समः निरस्तनिखिलदोषत्वादेव द्वेष्यप्रियविभागरहितः स हि रागद्वेषादिमूलकः तदभावात्समइ

श्रीमते रामानुजाय नमः॥ परीक्षितउवाच समः प्रियसुहृद्ब्रह्मन्भूतानां भगवान्स्वयं इंद्रस्यार्थे कथं दैत्यानवधी
द्विषमो यथा १ न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि २ इति
नः सुमहाभाग निर्गुणस्य गुणान्प्रति संशयः सुमहान्जातस्तद्भवान्छेत्तुमर्हति ३ ॥श्रीमते रामानुजाय न

तिभावः किं च सर्वभूतानां देवादीनां चासुरादीनां च सुहृद्धितैषी आत्मत्वादिति भावः न ह्यात्मनः किंचिच्छरीरं हितमन्यदहितमात्मत्वादेव च निरतिशय
प्रियः एवंभूतः स्वयं साक्षादेवेंद्रस्यार्थे प्रयोजनाय कथं दैत्यानवधीद्धतवानन्यथा विषमः रागद्वेषादिप्राकृतगुणयुक्तस्तद्वत् १ साक्षान्निःश्रेयसात्मनः पु
रुषार्थस्वरूपस्य निरतिशयानंदरूपस्येत्यर्थः अस्य भगवतः सुरगणैरिंद्रादिभिः न ह्यर्थः तदनुग्रहीतेंद्रादिभिः साध्यः कश्चित्पुरुषार्थो न तस्यास्ति स्वयमेव सा
क्षान्निःश्रेयसात्मत्वादिति भावः तथाऽसुरेभ्यः उद्वेगो भयं तेषु विद्वेषश्च नास्त्येव तत्र हेतुं वदन्तं विशिनष्टि अगुणस्येति हि यस्मादगुणस्य सत्वादिगुणातन्मू
लकरागद्वेषभयरहितस्य २ इतीत्थं हे महाभाग निर्गुणस्य श्रीनारायणस्य गुणान्प्रति गुणविषयको महान्संशयो जातः वर्त्तते तद्गुणास्तु समत्वादयश्चेष्टानु
गुणा न नु गुणैस्त्येतत संशयात्मकमज्ञानं छेत्तुमपोहितुं भवानेवार्हतीनान्य इत्यर्थः ३ ॥श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः॥श्रीरामचंद्राय नमो नमः॥ ॥ १

एवमापृष्टो मुनिस्तावद्राज्ञः प्रश्नमभिनंदति साध्विति हे महाराज अद्भुतं प्राकृतचेष्टासजातीयत्वेन चिंतयितुमशक्यं हरेश्चरितं प्रति साधु पृष्टं हरिचरित्रविषयकसं
शयोद्धारणरूपत्वात्तत्प्रश्नः साधीयानित्यर्थः साधुत्वमेव प्रश्नस्य स्पष्टयितुं चरित्रं विशिनष्टि यदिति यद्धरेश्चरितं भागवतानां माहात्म्यं यस्मिंस्तादृशं अस्त्वेवं ततः किं
तत्राह भगवद्भक्तिं वर्द्धयतीति भगवद्भक्तिवर्द्धनं भगवद्भक्तेर्वर्द्धनं वृद्धिर्यस्मादिति वा भागवतमाहात्म्येन भगवद्भक्तिवर्द्धकेन युक्तत्वाद्भगवच्चरित्रस्य तद्विषय
कः प्रश्नः साधुरिति भावः ४ अतस्तत्परमं पुण्यमतीव पुण्यतमं चरित्रं नारदादिभिर्ऋषिभिर्गीयते यतस्तत्प्रश्नः साधुस्ततोऽहं कृष्णाय व्यासाय मुनये नत्वा हरेः क
थां कथयिष्ये हरिगुणविषयकसंशयरूपत्वात्प्रश्नस्य तद्गुणवर्णनरूपकथाकथनेनैवोत्तरयिष्यामीत्यभिप्रायेण कथां कथयिष्य इत्युक्तं ५ एवं कथाकथ
नं प्रतिज्ञायाथ सत्वादिगुणोद्भवाभिभवादिना देवादीनां जयपराजयौ सत्वादिगुणाश्च तत्तज्जीवकर्मायत्तोद्भवाभिभववंतः प्रसिद्धाः कर्मवश्या गुणा ह्येते सत्वाद्याः

श्रीशुक उवाच साधु पृष्टं महाराज हरेश्चरितमद्भुतम् यद्भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनम् ४ गीयते परमं पुण्यं
ऋषिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ५ निर्गुणोपि ह्यजो व्यक्तो भगवान्प्रकृतेः परः
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ६

इत्थिवीयत इत्यादिभिरतः सत्वानां तत्तदवस्थाय तत्तज्जीवकर्मानुगुणं गुणानाश्रयन्नीश्वरस्य न वैषम्यादिकमिति परिहरति निर्गुण इति निर्गुणः हेयगुण
रहितः रागद्वेषादिरहित इत्यर्थः अव्यक्तः प्रमाणांतराणामगोचरः अनेन प्रत्यक्षादिप्रमाणगोचररागद्वेषादिहेयगुणयुक्तप्राकृतवैलक्षण्यमुक्तं अत एव ह्यजः
कर्मायत्तोत्पत्त्यादिरहितः भगवान् पूर्णषाड्गुण्यः प्रकृतेः परः भूमिरापो नलो वायुरपरे यमितस्त्वन्यामित्युक्तचिदचिदात्मकप्रकृतिद्वयविलक्षणः अपिशब्देनै
वंविधस्य वैषम्यायनर्हता सूच्यते यद्यप्येवंविधः तथापि स्वमायागुणमाविश्य स्वांशभूतां गुणविशिष्टां प्रकृतिमाविश्येत्यर्थः आविश्य प्रवेशात्र प्रेरणापर्य
तः अंतः प्रविष्टः शास्ता जनानामिति श्रुतेः ईरयतीति वक्ष्यमाणत्वाच्च बाध्यबाधकतां गतः बाध्यबाधकदेवासुरवर्गयोरंतरात्मतया तच्छरीरत्वेनावस्थित इ
त्यर्थः गुणाकर्मानुगुणप्रेर्यमाणशरीरभूतदेवासुरवर्गगतो बाध्यबाधकभावः न प्रकृतिद्वयविलक्षणतदात्मभूतपरमात्मनः यथा देहादिगतावस्था नात्म

एतदेव प्रपंचयितुं तावद्गुणानां प्रकृतेरेव संबंधित्वं तेषां तत्तज्जीवकर्मानुसारेण परिणामस्वभावत्वं चाह सत्वमिति सत्वादयः प्रकृतेरेव गुणाः नत्वात्मनः परमात्म
नः परमात्मशरीरभूतप्रकृतिस्वरूपगता नतु परमात्मस्वरूपगता इत्यर्थः तेषां सत्वादीनां सर्वेषां ह्रासोभिभवः उल्लासः उद्भवश्च युगपन्न भवति किंतु तत्तत्कर्मपरि
पाककालानुगुणं कदाचित्कस्यचिद्ध्रासः कदाचिदुल्लासश्च भवतीत्यर्थः ७ ततः कथं वैषम्यपरिहार इत्यत आह जयकाले त्विति सत्वस्य जयकाले उत्कर्षकाले
कर्मायत्तसत्वगुणोपचयकाल इत्यर्थः देवानृषीन्स्वा भजन्तदनुग्राहको भवति रजसः जयकाल इत्यनुषंगः असुरान्भजत्तमसो जयकाले तु यक्षान्रक्षांसि
च तत्कालानुगुणः तत्तत्कर्मविपाककालानुगुणो भजत् अयंभावः गुणप्रवाहपतितोभ्र तवर्गोविधियात्पयं कर्मवश्यानुगुणो ह्येते सत्वाद्याः पृथिवीपते इति
भागवत पराशरवचनात् सत्वादिगुणानां तत्तज्जीवकर्मविपाककालानुगुणं ह्रासोल्लासरूपपरिणामप्राचुर्यं च प्रसिद्धं आसंतिके न सत्वेन दिवं देवाः प्रपेदिरे ध
तेजः स्वभावे नेत्याद्युक्तरीत्या देवादीनां स्वस्वकर्मायत्तसत्वादिगुणप्राचुर्यं च सिद्धं सत्वादिगुणानामुल्लासः सुखदुःखमोहाद्यापादक इति भगवतागी

सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः न तेषां युगपद्राजन्ह्रास उल्लास एव च ७
जयकाले तु सत्वस्य देवर्षीन्रजसो सुरान् तमसो यक्षरक्षांसि तत्कालानुगुणो भजत् ८

तं ज्ञानं यदा तर्हि विद्याद्विवृद्धं सत्वमित्युत लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जायंते विवृद्धे कुरुनंदन अप्रकाशो प्रवृत्तिश्च प्रमादो मोह ए
व तमस्येतानि जायंते विवृद्धे पुरुषर्षभेति ईश्वरस्य तु सर्वांतरात्मत्वं बहुप्रमाणप्रतिपन्नं एवं सत्येतदुक्तं भवति सर्वांतरात्मतया वस्थितः ईश्वरः सर्वदा कस्य
चिदेव विजयं कस्यचित्सर्वदा पराजयं च न प्रतिदिशत्यपि तु तत्तद्देवादिकर्मपरिपाककालानुगुणं सत्वादिगुणोद्भवकालेषु देवादीन्विजयं प्रदिशत्यन्ये
षां तु पराजयं सत्वाद्युद्भवाभिभवयोश्च कर्माधीनत्वात्तदनुरूपप्रवृत्तेरीश्वरस्य न वैषम्यमिति ननु कर्मपरिपाककालानुगुणो ह्रासः सुखकरसत्वोपच
यदशायां तु गुणप्रचुराणां देवादीनां जयमावहतीति युक्तं इदं त्वयुक्तं रजस्तमसो रूपचयदशाया मसुरयक्षादीन्भजत इति तदुपचयस्य दुःखमोहादिफल
कत्वेन पराजयाद्यावहत्वात् उच्यते रजस्तमसोरुल्लासकालेऽसुरादीन्भजतीत्यस्य तेषां जयमावहतीत्यर्थः अपि तु रजस्तमसोरुल्लासफलभूतदुःखमो
हादिनिमित्तपराजयादिकमावहतीत्येवं च यदैवासुरादीनामपि स्वकर्मविशेषपरिपाकानुगुणं सत्वोल्लासस्तदा जयं प्रदिशत्यन्येषां तु पराजयं एवं देवादी
नामपि कर्मविशेषपरिपाकानुगुणं सत्वोद्रेकदशायां जयं तेषामेव पुनः कर्मविशेषपरिपाकानुगुणं रजस्तमसोर्जयः कदाचित्कः पराजयः असुरादीनां त्वपु

ऐयेन रजस्तमः प्रचुरत्वात्तस्यैव प्रायश उल्लासात् प्रायशः प
राजयः कादाचित्कोजय इति ८

स्वमायागुणमाविश्य बाध्यबाधकतांगत इत्यनेनतत्तत्स्वबाध्यबाधके षुदेवासुरादिवर्गेषु ईश्वरस्यानुप्रवेश उक्तः कथमनुप्रविष्टो विष्टो विज्ञायत इत्यपेक्षायां तत्तदनुप्रवेशात् प्रविष्टस्य विविच्य दृष्टस्य शक्यत्वेसम्यगुपायेन विवेचनीयत्वेन दृष्टांतमाह ज्योतिरिति काष्ठादिषु ज्योतिः प्रभृतिवस्तु यदनुप्रविष्टोप्याभाति न ज्ञातदोषास्पष्टः प्रकाशते अनभ्यस्तो अभिवाक शीति श्रुतेरितिभावः संघातात् काष्ठादिसंघातवद्देहेंद्रियभोक्तृवर्गरूपसंघातान्न विविच्यते प्रकृतिपुरुषेश्वरत्वयाथात्म्याविज्ञैः प्रकृति पुरुषाभ्यां विलक्षणत्वेन नज्ञायत इत्यर्थः कवयस्तत्वज्ञत्रययाथात्म्यविदस्त्वात्मस्थं जीवात्मनि स्थितं य आत्मनि तिष्ठन्योविज्ञाने तिष्ठन्निति श्रुतेः आत्मानं परमात्मानं मथित्वा विवेकपूर्वकं तद्भक्तियोगमभ्यस्येत्यर्थः अंततः अनेकजन्मावसाने विदंति साक्षात्कुर्वंति ९ स्वमायागुणमाविश्येत्यनेन प्रेरणपर्यंतानुप्रवेशोभिसंहितः तदेव गुणप्रेरकत्वं विवृणोति यदेति एषः परः पुरुषो भगवान्यदा स्वमाययास्वसंकल्परूपज्ञानेन प्रकृत्या वा आत्मनो जीवस्य जात्यभिप्रायमेकवचनं आत्मनामित्यर्थः पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छुस्तदा रजः सृजति प्रेरयतीत्यर्थः तमईरयत्यनेनैकार्थ्यात् यद्वा सृष्टानंतरं विचित्रासु पूर्षु देहेषु रिरंसुरंतर्भि

ज्योतिरादिरिवाभातिसंघातान्नविविच्यते विदंत्यात्मानमात्मस्थंमथित्वाकवयोंततः ९ यदासिसृक्षुःपुरआत्मनःपरोरजः सृजत्येषपृथक्स्वमायया सत्वंविचित्रासुरिरंसुरीश्वरःशयिष्यमाणस्तमईरयत्यसौ कालंचरंतंसृजतीशआश्रयंप्रधानपुंभ्यांनरदेवसत्यकृत् १० यएषराजन्नपिकालईशितासत्वंसुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः ११

क्षुः रिरक्षिषुरित्यर्थः सत्वं सृजति यदा चेश्वरः शयिष्यमाणउपसंजिहीर्षुस्तदासौ परमपुरुषस्तमईरयति अथ तत्कालानुगुणो भजतीति स्वचितं कालप्रेरकत्वं विवृणोति कालमिति हे नरदेव ईशः परमात्मा चरंतं प्रवर्तमानमाश्रयं स्वआप्यतयाशरीरभूतं कालं सृजति निमेषकाष्ठाद्यवस्थं करोति एवं कालं सृष्ट्वा प्रधानपुरुषाभ्यां चिदचित्समष्टिभ्यां सत्यकृत् सत्यं चित्सृष्टिः तमचित्सृष्टिः तदुभयं करोतीति तिर्यग्या सत्यशब्दयोः चिदचिद्रूपयोः प्रयोगः तदनुप्रविश्य सच्च त्यच्चाभवदित्यादि श्रुतौ प्रसिद्धः तथा सत्यशब्दयोस्तत्परत्वे श्रुतिः अथ यदिदं वेभ्य अत्तत्सत अथ यदिदं वाः प्राणा अत्तत्सं नदेकवाचा समभिव्याह्रियते सत्यमिति देवाः देवाधिष्ठितानींद्रियाणि तेभ्यः परस्तत्सं सदृष्टचेतनः सदिदं वा घविव्यष्टित्यं तदेतदुभयं सत्यं इत्येकया वाचा एकशब्देन समभिव्याहियते वो ध्यत इति तदर्थः १० एवमीश्वरस्य तत्तत्कर्मपरिपाकानुगुणकालप्रेरकत्वमुक्तं तच्चात्मत्वेनतत्प्रवेशपूर्वकमिति च ईश्वराधीनः कालो देवादीनां तत्तत्कर्मपरिपाकानुगुणसत्वादिगुणवृद्धिहेतुरिति वदन्सर्वांतरात्मतया देवादिकर्मानुगुणं गुणान्प्रेरयतो नेश्वरस्य वैषम्यमित्युक्तमुपसंहरति यइति हे राजन्नतः कर्मानुगुण्येनेश्वरस्य गुणकालप्रेरकत्वात् य एषः गुणप्रेरकः कालः कालशरीरकः तत्प्रेरकः ईशिता ईश्वरः सत्वं कर्मपरिपाकायत्तकालकृतगुणोन्मेषसत्वगुणप्रचुरं सुरानीकमेव वर्द्ध

भा॰स॰
७

प्रतितस्यैव जयमावहतीत्यर्थः तद्वत्प्रतिपक्षक्षयणपूर्वकत्वात्सुराणां प्रियः सन्न तत्प्रत्यनीकान्सुरानीकप्रतिपक्षरूपानरजस्तमःप्रचुरान्भिणोति विनाशय
ति उरुश्रवाः विपुलकीर्त्तिरसुरानीकविनाशनेनैव मम्यादिसंभावनया वा यकीर्त्तिमानीश्वरः किंतु विपुलतमकीर्त्तिमानित्यर्थः ११ एवं सर्वभूतसुहृदः सम
स्येश्वरस्य देवासुरादिजयाजयहेतुत्वेपि कर्मानुगुण्येन वैषम्याभाव उक्तः इदानीं तस्य सर्वभूतसुहृत्वे इतिहासं दर्शयति अत्रेति अत्रैव तस्य सर्वभूतसुहृत्वए
व हे राजन् महाक्रतौ राजसूये प्रीत्यात्यादरेण पृच्छतोऽजातशत्रवे युधिष्ठिराय सुरर्षिणा नारदेनेतिहास उदाहृतः १२ प्रश्नं तन्निमित्तं च विवृणोति दृष्ट्वेति राजसू
यारव्ये महाक्रतौ चेदिभूभुजः शिशुपालस्य भगवता भिन्नशिरसः वासुदेवे भगवति श्रीकृष्णे सायुज्यं संश्लेषं महाद्भुतं दृष्ट्वा विस्मितचित्तः पांडुसुतो राजा युधिष्ठि

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा प्रीत्या महाक्रतौ राजन् पृच्छतेजातशत्रवे १२ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ
वासुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं १४
युधिष्ठिर उवाच अहो अत्यद्भुतं ह्येतद्दुर्लभमेकांतिनामपि वासुदेवे भगवति प्राप्तिश्चैद्यस्य विद्विषः १५ एतद्वेदितुमिच्छामः स
र्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः १६ दमघोषसुतः पाप आरभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतव
क्त्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ ॥ ॥ ॥

रः तत्र क्रतौ यज्ञसभायामासीनं उपविष्टं सुरर्षिं नारदं मुनीनां शृण्वतां सतामिदं वक्ष्यमाणं यत्प्रश्नं पप्रच्छ १४ तदेवाह अहो इति षड्भिः अहो एतदद्भुतं तत्र हेतुः
एकांतिनामनन्यप्रयोजनानां भगवंतं भजतामपि दुर्लभं किं तत्परे तत्त्वे प्रकृतिपुरुषविलक्षणे ईश्वरतत्त्वे श्रीकृष्णे चैद्यस्य विद्विषः प्राप्तिरित्येतत् १५ हे मुने नारदे
तत्सर्वे वयं वेदितुमिच्छामः केनापि भावेन भगवंतं स्मरतां तत्प्राप्तिर्भवत्येव किमत्र चित्रं तत्राह भगवन्निति वेनः पृथोः पिता भगवन्निंदयैव निंदामात्रेणैव हेतु
ना तमसि नरके द्विजैः पातितः १६ दमघोषसुतश्चैद्यस्तु कलभाषणाद्बाल्यमधुरभाषणादारभ्य बाल्यादारभ्येत्यर्थः संप्रति एतत्कालपर्यंतं गोविंदे श्रीकृष्णे
मर्षी क्रोधयुक्तो यन्नितरां पापात्मा तथा दंतवक्त्रोपि दुरात्मा १७ अतयोः परब्रह्मस्वरूपं निर्विकारं श्रीकृष्णमसकृच्छपतोः शिशुपालदंतवक्त्रयोर्जिह्वायां श्वित्रः श्वेत

किंतु भगवंतमेव विविशतुः अतः सर्वलोकानां पश्यतां दुरवगाह्यधामनि दुःखगमज्योतिर्मयस्वरूपे भगवति अंजसाऽनायासेन तत्प्राप्तिसाधनानुष्ठानमंतरेणोत्प
र्यः कथं लयमीयतुः भगवत्सायुज्यं कथं प्रापतुरित्यर्थः १९ दीप्तं वायुना दीपशिखेव मम बुद्धिर्भ्राम्यति हे भगवन्नेतन्महदद्भुतमतोऽत्र कारणं ब्रूहीति २० इत्थ
मापृष्टो नारदः प्राहेत्याह मुनिः राज्ञो युधिष्ठिरस्य तत्प्रश्नरूपं वचः श्रुत्वा भगवान्नारदस्तुष्टः समीचीनप्रश्नेन हृष्टः सदसः सभायाः शृण्वत्याः सत्याः तं युधिष्ठि
रमाभाष्य स्ववचः श्रवणाभिमुखं कृत्वा प्रश्नपरिहाररूपां कथां प्राह २१ तामेवाह द्वाभिरध्यायैः अस्य प्रश्नस्य मुख्यमुत्तरं वक्तुं तावत्संसारिचेतनानां ना
भिवेश्वरस्य देहात्माभिमानप्रयुक्तस्तुतिनिंदाद्यभिमानित्वं नास्तीति चैद्यस्य मुक्तिं ददाविति किंचित्परिहारमाह निंदनेति हे राजन्निंदनं दोषकथनं स्त

कथं तस्मिन्भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा १९ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव
वायुना ब्रूह्येतदद्भुततमं भगवांस्त्वत्र कारणं २० शुक उवाच राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः तुष्टः प्राह
तमाभाष्य शृण्वत्यास्तत्सदः कथाः २१ नारद उवाच निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं प्रधानपरयो राजन्नविवेके
न कल्पितं २२ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा वैषम्यमिह भूतानां ममाहमिति पार्थिव २३ ॥ ॥श्री॥ ॥

वो गुणकथनं सत्कारश्चंदनलेपादिः न्यक्कारः पांसुक्षेपादिः एषामर्थो विषयः कलेवरं प्रधानशब्दो देहावस्थप्रधानवचनः परशब्दो देहान्तरजीववचनः मयोरवि
वेकज्ञानाभावेन देहात्माभिमानेनेति यावत् तेनाविवेकेन हेतुना कल्पितं कलेवरस्य निंदनादिविषयत्वमविवेककृतं न तु स्वतः जडत्वात् नहि काष्ठे चंद
नलेपादिरूपसत्कारादिकं मन्यत इति तावन्निर्वाह इत्यर्थः २२ एवं स्थिते हे पार्थिव यथेह संसारे भूतानां देहात्माभिमानिनां देवमनुष्यादीनां ममाहमिति वैष
म्यं ममेयं निंदा निंदितोऽहमित्यभिमानरूपं वैषम्यं तदभिमानेन ममेयं निंदेत्यभिमानेन दंडपारुष्ययोर्निमित्तयोर्हिंसा वस्मात् दंडस्ताडनं पारुष्यं निंदनं परेण दंड
पारुष्ययोः कृतयोः सतोस्तत्प्रयुक्तो ममेयं निंदितोऽहं ममायं दंडः दंडितोऽहमित्येवंरूपो नानाविधो विमानः तत्प्रयुक्तं परेषु निंदादिकारिषु हिंसाचरणं च यथा लोकानां ह

भा॰स॰
४

देहादिविषयमपि दंडपारुष्यादिकं परकृतं देहात्माभिमानेनात्मगतं मत्वा तदभिमानेन परेषु हिंसा स्यादित्यनेन यथा हिंसाकारिषु दंडपारुष्यादिकं देहगतमेव मत्वात्मगतं देहा
भिमानेऽविवेकेन त्वात्मगतं न मन्यन्त यथा हिंसमानेष्वपि हिंसा च देहगतैव मत्वात्मगता देहात्माभिमानानुहिंसितोऽहमित्यभिमान इति सूचितं तदेव स्पष्टमाह यन्निबद्ध इति अयमभि
मानोऽहं डितानां च लोकानां यथा दंडितोऽहमित्यभिमानः यन्निबंधः यद्धेतुकः देहहेतुक इत्यर्थः देहात्माभिमानस्य देहहेतुकत्वाद्देहात्माभिमानहेतुको दंडितोऽहमित्यभिमानो देहहे
तुक एवेत्यभिप्रायेण यन्निबंधोऽभिमानोऽयमित्युक्तं एवं तद्वधात्तन्मानेषु तस्य देहस्य वधादेव प्राणिनां देहात्माभिमानिनां वधः देहगत एव वधो नात्मगतः देहात्माभिमाना
नुहतोऽहमित्यभिमान इत्यर्थः एवं संसारिणां निंदनादि सर्वं देहात्माभिमानकृतमित्युक्तं अथोक्तार्थविपर्ययं ईश्वरे दर्शयति तथेति यथा संसारिणां देहात्माभिमा
नस्तत्कृतनिंदितोऽहमित्याद्यभिमानश्च यथास्येश्वरस्य नास्ति तस्याप्यभिमानप्रयुक्ता परेषु हिंसा केन हेतुना न कल्प्यते इत्यन्वयः अभिमानाभावे हेतुरखिलात्मनः
इति सकलजगदात्मत्वादभिमानो नास्तीत्यर्थः नन्वात्मत्वेऽपि तस्य जीववदभिमानः स्यादेव तत्राह कैवल्यादिति निरस्तनिखिलदोषत्वादित्यर्थः अनृतेन हि प्र

यन्निबद्धोऽभिमानोऽयं तद्वधात्प्राणिनां वधः तथा न यस्य कैवल्या
दभिमानोऽखिलात्मनः परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते २५

त्यूढा इति श्रुत्युक्तरीत्या जीवानामतोऽदि पुण्यपापात्मककर्ममूलको हि देहात्माभिमानः तस्य तु परमपुरुषस्य सर्वान्तरात्मनो निरस्तनिखिलकर्मवश्यत्वादिदोषत्वाद
भिमानाभाव इति भावः निंदितोऽहमित्याद्यभिमान एव नास्ति किं पुनः तत्प्रयुक्तं परेषु निंदकेषु हिंसादिकरणं नास्तीत्याह संहितेति अस्य निंदनादिनाप्रयुक्ताभिमानर
हितस्य हिंसा निंदककर्मिका केन कल्प्यते हिंसाहेतोरभिमानस्याभावाद्धेत्वंतरस्यादर्शनात्सा नास्त्येवेत्यर्थः ननु कथमुच्यतेऽभिमानस्तत्प्रयुक्ता हिंसा च तस्य ना
स्तीति यतोऽस्मदादिप्रत्यक्षमेव निंदकं चैद्यं हतवानित्याशंक्यानिग्रहं कुर्वन्नपि स्वं विशिनष्टि परस्य निंदकादेर्दमकर्तुः शिक्षाकर्तुः परस्य हितार्थमेव दंडं कुर्वत इ
त्यर्थः शिक्षया परस्मै हिताचरणं च चैद्यस्य निर्हीनामासुरीं योनिं परिहार्य निरतिशयपुरुषार्थस्वरूपस्वप्रापणेनेदानीमेवास्मदादिरितिरपरोक्षं दृष्टमिति भावः
एवं देहात्माभिमानाभावात्परमपुरुषस्य संसारिणां इव स्तुतिनिंदाद्यभिमानित्वराहित्यमुक्तं एवं च निरभिमानित्वाच्चैद्यस्य मुक्तिददोऽयमिति कश्चित्परिहारः २५

४

तन्न्वेवंभावन्निंदासुकस्य चिद्द्विषायं तस्मान्न च निंदात्वयुक्ताभिमानः हि तन्निंदयानितरांपापित्वप्रसंग इति वाच्यं तादृशस्यापि चैद्यस्य परमपुरुषप्राप्तिदर्शनेन तिरभि
मानिनो निंदायाः अपापरूपत्वादन्यथा तादृशो निरतिशयमुक्तिप्रतिबंधे पापे सति तस्य मुक्त्यसंभवात् किं चैवं भगवत्स्तोत्रादिषु पुण्यस्यापि तस्यातत्याच सर्वशास्त्रा
र्थविरोधप्रसंगः किंच मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयका तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु इति भगवद्वच
नविरोधश्च स्यात् भगवतः स्तुतिनिंदाभिमानित्वाभावकथनाद्धेन चैद्ययोर्वैषम्यं च न सिद्ध्यति अतो वेन चैद्ययोर्वैषम्यप्रश्नः किमुत्तरं इत्यपेक्षायां साक्षात्परिहारमा
ह तस्मादिति निंदादिभाक् संसारितुल्यत्वदोषप्रसंगनिराकरणार्थं संसारिचेतनानां इव देहस्तुतिनिंदाद्यभिमानित्वं भगवतो नास्तीति तत् केवलं तत्परमात्रामुक्तं निंदन
स्तवसत्कारैत्यादिभिः श्लोकैरितो वक्ष्यमाण एव साक्षात्परिहारो वेदितव्यः तस्मादीश्वरस्यैवंविधस्वभावत्वाद्वैरानुबंधनिर्वैरभयस्नेहकामानां येन केनाप्यतमे
नकेनचित् युज्यात् भगवति मनो युंजीतेत्यर्थः यथा भक्त्येश्वरे मन आवेश्य तु उत्तरग्रंथैकार्थ्यात् वैरानुबंधो वैराविच्छेदः निर्वैरेणेति निर्वैराभावो विवक्षित इति

तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् २५
यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः २६

तु भक्तिर्विवक्षिता उत्तरग्रंथे परिगणित हेतुषु पंचसु भक्तेरुक्तत्वात् स्नेहः सौहार्दं वात्सल्यादारभ्यैतत्पर्यंतम् अविच्छिन्नवैरेण भगवति मनो युंजत चैद्यस्य
भगवत्प्राप्तिः वेनस्य तत्तानाम स्य तमेनापि भगवत्ययुक्तमनसो न मुक्तिः प्रत्युत निरयप्राप्तिरिति वैषम्यमिति भावः मनोयोजनस्य काष्ठामाह कथंचिन्ने
क्षते पृथगिति पृथग्भागवतो यद्वस्तु किंचिदपि केनापि प्रकारेण नेक्षते न विषयीकरोति मनस्तथा तं युंजीत विजानीयात् प्रत्ययांतराव्यवहितचि
त्तवृत्तिर्भवेत् यथा तथेत्यर्थः २५ वस्तुतः प्रीतिपूर्वकानुध्यानात्मकभक्तियोगादपि वैरानुबंधानुध्यानमेव श्रेय इति मया निश्चितमित्याह यथेति
मर्त्यः संसारी जीवः भगवति यथा वैरानुबंधेनाशु तन्मयतां इयात् प्राप्नुयात् तथा भक्तियोगेनाशु नेयादिति मे मया मतिर्बुद्धिर्निश्चिता ममैवं बुद्धि
निश्चय इत्यर्थः तन्मयतां तच्चिंतनप्रचुरतामित्यर्थः विकारावयवार्थासंभवात् प्राचुर्यमेवात्र मयडर्थः पूर्वपूर्वचिंतानामुत्तरोत्तरचिंतनस्य
प्राचुर्यं तच्च प्रत्ययांतराव्यवहितत्वरूपं यद्वा तन्मयतां तद्धर्मप्राचुर्यं प्राप्नुयादित्यर्थः मुक्तानां प्राचुर्येण भगवद्धर्मसाम्यश्रवणात् २६ ॥०

यथा वैरानुबंधयोगः श्रेयानेवं भययोगोपि भक्तियोगाच्छ्रेयानिति वदत्वैरानुबंधभययोगयोर्भगवद्विषयकचिंतासंतानात्मकयोस्तत्साम्यापत्तिहेतोर्दृ
ष्टांतमाह कीट इति पेशस्कृता भ्रमरेण कुड्यायां निरुद्धः कीटो यथा तमेव पेशस्कृतं संरंभभययोगेन वैरानुबंधभययोगात्स्मरंस्तत्स्वरूपतां पेशस्कृ
तां साम्यं विंदते तथा संरंभभययोगिनो भगवत्स्वरूपतां विंदते इत्यर्थः तस्मेव स्वरूपं यस्य तत्तत्स्वरूपः तस्य भावस्तत्स्वरूपता तां तुल्यरूपतामित्यर्थः तत्वै
क्यं इत्यर्थः नहि पेशस्कृता रुद्धः कीटस्तेनैक्यं भवति उभयोरप्युपलभ्यमानत्वादतः साम्यमेव दृष्टांतात्सिध्यति २७ उक्तार्थं दार्ष्टांतिके दर्शयति एवमि
ति भगवति पूर्णषाड्गुण्ये मायामनुजे स्वसंकल्पोपात्तमनुजाकृतौ साक्षादीश्वरे श्रीकृष्णे विषये वैरेणानुचिंतया वैरपूर्वकानुध्यानेन पूतपाप्मानः नि
रस्तवैरादिदोषा तेकृष्णमापुः प्रापुः पूतपाप्मान इत्यस्यायमभिप्रायः यद्यपि यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनूं स्वां इति श्रुत्युक्तरीत्या निरतिश
यप्रीतिविषयाविच्छिन्नस्मृतिसंततिरूपाया भगवद्भक्तेरेव तत्प्राप्तिहेतुत्वं तथा चोक्तं भगवता पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया भक्त्यात्वनन्यया

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् संरंभभययोगेन विंदते तत्स्वरूपतां २७
एवं कृष्णे भगवति मायामनुज ईश्वरे वैरेण पूतपाप्मानस्तमीयुरनुचिंतया २८

शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते इति श्रुतिश्च त
मेवं विद्वानमृत इह भवति नान्यः पंथा विद्यतेऽयनायेत्यादिना भक्तिश्च प्रीतिपूर्वकमविच्छिन्नमनुध्यानं स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयत इति भक्तिलक्षणा
त् संरंभभययोगयोस्तु प्रीतिरूपत्वाभावात्प्रत्युत तद्विपरीतरूपत्वाच्च न भगवत्प्राप्तिहेतुत्वं तथाप्यत्र तत्संरंभकृतभावनाप्रकर्षेणास्वहेतुभूतसंरंभभययो
रपि विस्मरणात् भावनायाश्च निरतिशयानंदावहस्वभावस्य विषयत्वेन प्रीतिरूपायमन्नत्वात्तस्याश्च भगवत्प्राप्तिसाधनत्वमिति एवं च येषां भावनाप्रक
र्षेण स्वहेतुभूतवैरादिविस्मरणादिभावो वैरादीनां तेषां भगवन्निंदादिप्रयुक्तभगवद्विषयकभावनाप्रकर्षाभावेन तन्मूलकनिंदादिदोषाविस्मृतेर्भ
गवत्प्राप्त्यभावः प्रत्युत तन्निंदादिदोषेण निरयप्राप्तिश्चेति चेन्न चैद्यस्य वैषम्यमुक्तं भवति अत एव न स्तुतिनिंदयोः पुण्यापुण्यत्वप्रतिपादकशास्त्रविरोधो
पि भावनाप्रकर्षेण विस्मृतवैरादिदोषवत्पुरुषविषयत्वात्स्तुत्यपुण्यप्रतिपादकशास्त्राणाम् २८ श्रीदक्षिणामूर्तिगुरुभ्यो नमः॥श्रीरामजी॥

एवमुक्तार्थे दार्ढ्यार्थं तिके शिरदर्शपं वं के श्चित्तद्बहुभिरित्याह कामादिति यथा भक्तियोगेनेश्वरे मन आवेश्य भगवतो गतिं जग्मुः तथा कामादिभिरर्पितस्मिन्मनः आवेश्य तदघं तस्य आवेशनिमित्तं कामादिरूपमघं हित्वा ऽत्यंतभावनाप्रकर्षेण कामादिकं विस्मृत्येत्यर्थः बहवः तद्गतिं प्राप्ताः २९ एतदेवोदाहरणविशेषेषु दर्शयति गोप्य इति भगवति कामाद्गोप्यः तद्गतिं गता इत्यनुषंगः भयात्कंसस्तद्गतिं गत इति विभक्तिविपरिणामः यद्वा गोप्यादयः सर्वे प्रति नियतकामादिभि रुपायैस्तद्गतिं गता इति योगवद्येनन्वयः संबंधाद्वृष्णयः स्नेहाद्यूयं इति वृष्णयो यूयं च देहसंबंधकृतस्नेहादित्यर्थः अन्यथा पंचप्रकारांतर्भावायोगात् भक्त्या वयं नारदादयः तत्र स्नेहस्तुल्यसंनिकृष्टविषयः प्रेमा भक्तिरुत्कृष्टविषयेति भेदः ३० एवमुक्तेनार्थेन प्रसिद्धं वेनं चैद्ययोर्वैषम्यमाह कतम इति उक्तानां पंचानां कामुकद्वेषिविश्वस्तस्नेहवद्भक्तरूपाणां पंचानां मध्ये वेनस्ती श्वरं परमपुरुषं प्रति कोपि न भवति कामाद्यन्यतमो न भवत्यतस्तन्निंदया निरयप्राप्तिरिति भावः तस्मादुक्तानां पंचानां मध्ये केनाप्यन्यतमेनोपायेन भगवति श्रीकृष्णे मनो निवेशयेत् निवेशितेन मनसि मनो निवेशननिमित्तं कामादिकमपि विस्मृत्य तत्प्राप्नोतीति भावः अत एव हि श्रीविष्णुपुराणे अपगतद्वेषानुबंधो भगवंतमवाप्येति उक्तं ननु संरंभभययोगादीनामपि भक्तियोगवद्भगवत्प्राप्तिसाध

कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः २९ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ३० कतमोपि न वेनः स्यात्पंचानां पुरुषं प्रति तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ३१

नत्वेयथा रब्धविच्छिन्नभगवद्भक्तियोगः पुनर्जन्मांतरे पूर्वाभ्यासेन कौंतेयेत्यादिभगवदुक्तिरीत्या पूर्वाभ्यासेनोपसंहृतसंपूर्णभगवद्भक्तियोगो भगवंतं प्राप्नोत्येवमारब्धविच्छिन्नसंरंभभयादियोगोपि जन्मांतरे पूर्वाभ्यासेन परिपूर्णतद्योगो भगवंतं प्राप्नुयान्नत्वेवं युक्तमन्यथा विष्णुद्वेषिणां सर्वेषामपि मुक्तिप्रसंगः एवं च यः पुत्रपितरं द्वेष्टि तं विद्याद्दस्युरेतसं यो विष्णुं सततं द्वेष्टि तं विद्याद्दस्युरेतसं इत्यादि विष्णुदूषकनिंदावचनानवकाशप्रसंगः उच्यते संरंभयादीनां तस्मिन्नेव जन्मनि स्वविस्मारकभावनाप्रकर्षाद्वहूनां मुक्तिहेतुत्वं न तु विच्छिन्नानां जन्मांतरसंबंधिनामपि प्रत्युत तेषां निरयहेतुत्वमेव भक्तियोगस्य तु विच्छिन्नस्यापि पुनर्जन्मांतरे भावनाप्रकर्षावहद्वारा मुक्तिसाधनत्वमिति न चात्र मानाभावः धर्मियाहकमानस्य सत्वात् पार्थनैवेह नामुत्र विनाशस्तस्य विद्यते इत्यारभ्य तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनंदन पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः इत्यनेन भगवतैवारब्धस्यापि भक्तियोगस्य पुनः कालांतरे फलसाधनत्वोक्तत्वात् नत्वेवं संरंभभयादीनां सकृदारब्धानां पुनर्जन्मांतरे भगवत्प्राप्तिसाधनत्वप्रमाणं किंचिद्वचनं विद्यते प्रत्युत यो विष्णुमित्यादि विरोधः स इति अतश्च निंदाविकाराणामपि सर्वेषां द्वेषादिविस्मारकभावनाप्रकर्षः स्या

नाद्विस्माद्वेतेषां मुक्तिरिति न कोपि विरोधः ३१

एवं संरंभयोगादीनामपि भगवत्प्राप्तिसाधनत्वेन चैद्यदंतवक्त्रयोर्न्मुक्तौ विस्मयः कार्य इत्यभिधाय न केवलं तयोर्भगवद्विषयकभावनाप्रकर्षे तद्विषयकसंबं
ध एव हेतुरपि तु पूर्वसिद्धं भगवदानुकूल्यं चेति वक्तुं इतिहासं प्रस्तुत्युः प्रस्तावसरप्रदानाय तयोस्तावद्विष्णुपार्षदत्वं विप्रशापाद्भ्रंशं चाह मातृष्वस्रेय इति मातुःस्व
सा भगिनी तस्या अपत्यं पुमान्मातृष्वस्रेयः हे पांडव युधिष्ठिरस्य भवतो मातृष्वस्रेयः चैद्यो दंतवक्त्रश्च द्वाविमौ पूर्वं विष्णोः पार्षदप्रवरौ द्वारस्थितौ विप्रशापाद्धेतोः
पदात्स्थानाच्च्युतौ अभूतां एवं च तयोः प्राप्तात्यंतद्वेषातिशयात्प्राक्तनात्यंतभगवदानुकूल्याच्च शापांते भावनाप्रकर्षसिद्धा मुक्तिरिति भावः अंडांतर्वर्त्तिन्युपे
न्द्रादि विष्णुलोके कथंचिन्निवृत्ते दुर्घटवादरायणः संभवादिति न्यायेनोपेंद्राद्युपासनया तद्द्वारयताधिकारं गतौ कौचिदीवो स्थितौ पश्चाद्विप्रशापात्पदच्युतौ इति
नारदस्याशयः ३२ इममाशयमजानन्नेव प्रस्तावमात्रेदं पृच्छति युधिष्ठिरः कीदृश इति द्वाभ्यां कीदृशः शाप इति शापप्रकारप्रश्नः कस्य विशेषणं हरि

मातृष्वस्रेयो वश्चैद्यो दंतवक्त्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ ३२ युधिष्ठिर उवाच कीदृशः
कस्य वा शापो हरिदासाभिमर्शिनः अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ३३ देहेंद्रियासुहीनानां वैकुंठपुरवा
सिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४

दासाभिमर्शिन इति हरिदासौ विष्णुपार्षदावभिमृशति पराभवतीति हरिदासावभिमृशति पराभवतीति हरिदासाभिमर्शी तस्य अनेन तस्यानौचित्यं
सूचितं हरेरेकांतिनां निकटवर्त्तिनां भवः जन्म अश्रद्धेय इवासाद्य तदिवाभाति प्रतीयते अयं भावः एतं देवयानं पंथानमापन्नस्य पुनरावर्त्तते न च पुनरा
वर्त्तते इति श्रुत्युक्तरीत्या मुक्तानामेव पुनरावृत्तिर्न विद्यते किं पुनर्नित्यसिद्धानां भगवत्पार्षदानां भगवत्स्थानाद्भ्रंशाभाव इह जन्माभावश्चेति अत इदं
भगवत्पार्षदयोस्तदाद्भ्रंशयोरुच्यमानमिह जन्मानादरणीयं तज्जन्मप्रतिपादकं वाक्यं जर— वः कंवलयादुकाभ्यामित्यादि वाक्यवदसंगतार्थमिति ३३
तयोर्जन्मासंभवमेव विशदयन्नाह देहेंद्रियासुहीनानामिति कर्मायत्तप्राकृतदेहेंद्रियप्राणरहितानां वैकुंठपुरवासिनां नित्यसिद्धानामित्यर्थः अनेन
पूर्वमप्यभूतानामेव प्राकृतदेहेंद्रियप्राणसंबंधानामित्युक्तं एवंविधानां देहसंबंधः प्राकृतदेहसंबंधस्तदनुबंधिरागद्वेषादिसंबंधश्च तयोः समाहारः तदेतदघटमानं

एवमाशङ्क्यो भगवान्नारदः प्रश्नस्योत्तररूपमितिहासं वक्तुमुपक्रमते एकदेत्यादिना ब्रह्मणश्चतुर्मुखस्य पुत्राः सनंदनादयः आदिशब्देन सनत्कुमार सनत्सु-
जाता विवक्षिताः एते भुवनत्रयं चरंतः कदाचिद्यदृच्छया विष्णोर्लोकं जग्मुर्ययुः अयं विष्णुलोकशब्दो ब्रह्मांडांतर्गतविष्णुलोकविषयः ननु मुक्तप्राप्यपर
मविषयः वैकुंठः कल्पितो येन लोको लोकनमस्कृत इति वचनात् माहात्म्यात् मुक्तप्राप्ये च विशदिमा गतौ वगम्ये परमव्योमि योगिनामपि सनकादीनां गमनासंभ
वान्नित्यसिद्धानामिहोत्पत्त्यसंभवाच्च ३५ सनंदनादि विशिंषतीह पंचषड्हायना वत्सराये षांते ऽर्भान् अर्भकांस्तदाभास्तद्दवस्थितांस्तान् अर्भशब्दा
भिप्रेतं विवृणोति पूर्वेषां रुद्रादीनामपि पूर्वं जाता न दिग्वाससः दिगंबरानेवं मत्वा तांस्तान्सनंदनादीन् शिशुत्वेनालक्ष्य विष्णोर्हरिस्थितौ द्वारपौ प्रत्यषेधतां

नारद उवाच एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया सनंदनादयो जग्मुश्चरंतो भुवनत्रयं ३५ पंचषड्हायनार्भाभाः पूर्वेषाम
पि पूर्वजाः दिग्वाससः शिशून्मत्वा द्वाःस्थौ तान्प्रत्यषेधतां ३६ अशपन्कुपिता एवं युवां वासं न चार्हथः रजस्तमोभ्यां रहिते पा
दमूले मधुद्विषः पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ३७ एवं शप्तौ स्वभवनात्पतंतौ तौ कृपालुभिः प्रोक्तौ पुनर्जन्मभिर्वां
त्रिभिर्लोकाय कल्पतां ३८ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ३९

त्यवारयतां ३६ ताभ्यां प्रतिषिद्धास्ते कुपिताः संतः एवं वक्ष्यमाणरीत्याऽशपन् शापप्रकारमेवाह युवां इत्यादिना रागद्वेषादिरहिते भगवतः पादमूले वासं कर्तुं युवां ना
र्हथः अप्राकृतं भगवत्पदारविंदमूलमाश्रित्य अप्राकृतरागद्वेषादियुक्तौ युवां नार्हथः किंतु बालिशौ मूर्खौ युवामतो भगवतस्थानादाशु शीघ्रं पापि
ष्ठां रागद्वेषादिबहुलामासुरीं योनिं आसुरजन्म इत्यर्थः यातं प्राप्नुतं ३७ एवं इत्थं शप्तौ तौ पार्षदौ स्वस्थानात्कृपालुभिः तैः सनकादिभिः प्रोक्तौ तदेवाह पुनरिति ना
पुनर्युवयोस्त्रिभिर्जन्मभिर्लोकाय पुनरेतल्लोकप्राप्त्यै कल्पतां शापमोक्ष इति शेषः तावता कालेन शापः समाप्यतां इत्यर्थः ३८ तावेव पार्षदौ विप्रैः शप्तौ
इह लोके दितेः पुत्रौ जज्ञाते जातौ बभूवतुः तत्र हिरण्यकशिपुः ज्येष्ठः ततो हिरण्याक्षः तस्यानुजः ३९ ॥श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः॥ ॥

तत्रहिरण्यकशिपुर्नृसिंहरूपिणाभगवताहतः हिरण्याक्षस्तुधरोद्धारेभूम्युद्धारनिमित्तेसूकरंवाराहंवपुर्बिभ्रताभगवताहतः ४० हिरण्यकशिपुवृत्तांतप्रश्ना
वतरणायतद्वृत्तांतसंग्रहेणाह हिरण्यकशिपुरिति सकेशवस्यभगवतःनिरतिशयप्रियंप्रल्हादंपुत्रंजिघांसुर्हंतुमिच्छुःपुत्रमरणनिमित्तंनानाविधायातना
अकरोत् ४१ यातनाकुर्वाणोपिहिरण्यकशिपुःतंपुत्रंहंतुमुद्यमैःसर्वोपायैरपिनाशक्नोत् तत्रहेतुंवदंस्तंविशिनष्टि भगवतस्तेजसास्पृष्टंव्याप्तं
तत्रहेतुःप्रशांतमशनायापिपासादिरहितंप्रशांतःसमदर्शीभगवत्तेजः यद्वाऽतएवप्रशांतंतत्रहेतुःसमदर्शिनंसुखदुःखादिषुद्वंद्वेषुसमदृष्टिंयःसमस्तए
वहिप्रशांतइतिभावः यद्वाऽतएवसमदर्शिनंसर्वभूतानामात्माईश्वरस्तद्भूतंतत्प्रकारकतयातदात्मनामापन्नंशास्त्रदृष्ट्यात्तूपदेशोवामदेववदित्युक्त
रीत्यायथावामदेवस्तद्वैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेअहंमनुरभवंसूर्यश्चाहंकक्षीवानृषिरस्मिविप्रइतिसर्वभूतांतरात्मानंभगवंतंस्वशरीरकंधीमात्त्व
त्यसर्वप्रकारतयासएवास्मितदितिप्रकारभेदेपिप्रकार्यैक्यान्तदभिप्रायेणवामदेवोमन्वादिभिःसहात्मनोऽभेदमनुसंहितवानेवंप्रल्हादोप्यहंहरिः

इतोहिरण्यकशिपुर्हरिणासिंहरूपिणा हिरण्याक्षोधरोद्धारेबिभ्रतासौकरंवपुः ४० हिरण्यकशिपुःपुत्रंप्रल्हादंकेशवप्रियं
ना जिघांसुरकरोल्लोकेयातनामृत्युहेतवे ४१ तंसर्वभूतात्मभूतंप्रशांतंसमदर्शिनं भगवत्तेजसास्पृष्टंनाशक्नोद्धंतुमुद्यमैः ४२
ततस्तौराक्षसौजातौकेशिन्यांविश्रवःसुतौ रावणःकुंभकर्णश्चसर्वलोकोपतापनौ ४३ तत्रापिराघवोभूत्वान्यहनच्छा
पमुक्तये रामवीर्यंश्रोष्यसित्वंमार्कंडेयमुखात्प्रभो ४४ तावेवक्षत्रियौजातौमातृष्वस्रात्मजौतव अधुनाशापनिर्मु
क्तौकृष्णचक्रहतांहसौ ४५ सर्वनिरंजनाईनइतिप्रकार्यैक्याद्विशिष्टवस्त्वेकदेशत्वात्तस्मिन्नवनिष्ठत्वाभावमालक्ष्याहमेवसर्वभूतांतरात्माभगवा
नित्यनुसंहितवानित्याशयेनतस्यविशेषणंसर्वभूतात्मभूतंइत्युक्तं ४२ ततस्तावेवहिरण्यकशिपुहिरण्याक्षौदितीयेजन्मनिकेकश्यांभार्यायांविश्रवः
सुतौजातौ तत्रज्येष्ठोरावणोनुजस्तुकुंभकर्णउभौसर्वलोकानुपतापयतइतिसर्वलोकोपतापनौ ४३ तत्रापिजन्मनिभगवान्राघवोरामोभूत्वा
शापमुक्तयेतयोःशापोन्नारणायत्यहनद्धनेनंहितकारित्वंभगवतःसूचितं कोसौराघवःकीदृशंतद्वीर्यंकथंवाहतवानित्यत्राह रामवीर्यमितिवीर्ययह
णंतज्जन्मादीनामप्युपलक्षणंतदवतारतद्वीर्यादिकंसर्वंहेप्रभोमार्कंडेयमुखाच्छ्रोष्यस्यतोनात्रतन्मयाविस्तार्यतइतिभावः ४४ तौरावणकुंभकर्णावेवाद्य
अधुनातृतीयेजन्मनितवमातृष्वस्रात्मजौशिशुपालदंतवक्त्रौजातावधशापेननिर्मुक्तौकृष्णचक्रेणहतंअंहःपापमूलकंशरीरंययोस्तौ ४५ ॥ ❁ ॥

वैरानुबंधेनतीव्रमुत्कृष्टंयद्ध्यानंभगवद्विषयकंतेनाच्युतस्यभगवतःसात्मतासात्मनोभावःप्रकारः आत्मतासमाना आत्मतासात्मतातांसाधर्म्यमितिअर्थः नीतौप्रा
प्तौपुनर्विष्णुपार्षदौमहत्वाहरेःपार्श्वंजग्मतुः ४६ यदुक्तंहिरण्यकशिपुपुत्रंप्रल्हादंकेशवप्रियंजिघांसुरित्यादिनाप्रल्हादस्यकेशवप्रियत्वंहिरण्यकशिपोःप्रल्हादे
मारणोद्योगपर्यंतोद्वेषश्चेतितद्विस्तरेणाबुभुत्सुःपृच्छतियुधिष्ठिरः विद्वेषइति दयितेनितरांप्रीतिविषयेतत्रापिमहात्मनिसद्गुणाश्रयेहिरण्यकशिपोर्विद्वेषःकथ
मासीत्केनहेतुनासीत्तदेतत् याचयेनकारणेनप्रल्हादस्याच्युतात्मताऽच्युतेभगवत्यात्मामतिर्यस्यतस्यभावःतत्तातांचहेभगवन्मेमह्यंब्रूहि ४७ इतिसप्तमे

वैरानुबंधतीव्रेणध्यानेनाच्युतसात्मतां नीतौपुनर्हरेःपार्श्वंजग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिरउवाच विद्वेषोदयितेपुत्रेकथमा
सीन्महात्मनि ब्रूहिमेभगवन्येनप्रल्हादस्याच्युतात्मता ४७ इतिश्रीसप्तमस्कंधेप्रल्हादचरितेप्रथमोध्यायः १ श्रीनारदउवाच
भ्रातर्येवंविनिहतेहरिणाक्रोडमूर्तिना हिरण्यकशिपुराजन्पर्यतप्यद्रुषाशुचा १ आहचेदंरुषापूर्णःसंदष्टदशनच्छदः कोपोत्
ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरं २ करालदंष्ट्रोग्रदृष्ट्यादुःप्रेक्ष्यभ्रूकुटीमुखः शूलमुद्यम्यसदसिदानवानिदमब्रवीत् ३ हिर
ण्यकशिपुरुवाच भोभोदानवदैतेयाद्विमूर्धंस्त्र्यक्षशंबर शतबाहोहयग्रीवनमुचेपाकइल्वल ४ विप्रचित्तेममवचःपुलोमन्शकु
नादयः शृणुतानंतरंसर्वेक्रियतामाशुमाचिरं ५
प्रथमः १ एवंतयोःकेशवात्मत्वविद्वेषविस्तरंबुभुत्सुनापृष्टोभगवान्नारदःआह भ्रातरीति एवंदेवपक्षपातिनावराहमूर्तिनाभगवताभ्रातरिहिरण्याक्षेवि
निहतेसतिहेराजन्रोषेणशुचाशोकेनचार्पितोआन्तःपर्यतप्यत्परितापंचकार १ इदंवक्ष्यमाणमाहचकथंभूतआहतत्राह रुषापूर्णःअतएवसंदष्टदश
नच्छदःसंदष्टोष्ठोयेनकोपेनउद्दीप्तायेनज्वलद्भ्यांचक्षुर्भ्यांधूम्रमंबरमाकाशंकोपाग्निधूमेनैवधूम्रमंबरंनिरीक्षमाणः २ करालदंष्ट्राभिर्भयंकरदंष्ट्राभिर्यु
क्तयाउग्रयादृष्ट्यादुःप्रेक्ष्यंदुर्निरीक्ष्यंभ्रूकुटीयुक्तंमुखंयस्यसदसिसभायांशूलमुद्यम्यउद्धृत्यअनेनस्वसामर्थ्यंसूचितंदानवान्प्रतिइदमुवाच ३ तदेवाह
भोभोइति सामान्येनतावत्संबोधनंभोभोदानवदैतेयाश्चेति विशेषतःसंबोधनंद्विमूर्धन्नित्यादिना ४ एतेसर्वेयूयंप्रथमंममवचःशृणुततःश्रवणानंतरमेव

किंतत्राह सपत्नैरिति समेनदेवासुरवर्गयोः समेनापि उपधावनैरनुवर्तनैः पार्ष्णिग्राहेण पृष्ठतो योद्धृत्वेन देवानां सहायभूतेनेत्यर्थः हरिणा प्रयोजककर्त्रा यत्सपत्नैः प्र योजककर्तृभिः क्षुद्रैरल्पबलैर्देवैः प्रियः सुहृच्च मे भ्राता हिरण्याक्षः घातितः ६ तस्य हरेः कथंभूतस्य घृणेः सर्पवन्निर्मायावित्रस्य हस्ता विमायावनौकसः मायोपात्तवराह रूपस्यात एवसत्त्वः स्वभावो येन तस्य देवतारूपत्यागादिति भावः भजंतं स्वमनुवर्तमानं भजमानस्यानुवर्तमानस्य बालस्येवास्थिरात्मनो व्यवस्थितचित्तस्य ७ एवंभू तस्य हरेः मच्छूलेन भिन्ना ग्रीवा यस्य तस्य भूरिणा रुधिरेण रुधिरप्रियं मम भ्रातरं गतव्यथो हं यावत्तर्पयिष्ये तावद्यूयं भुवं यातेत्यन्वयः ८ ननु देवैस्तद्धवः कारि तोतस्तेकिं न हन्यंते तत्राह तस्मिन्निति अस्माकमहिते शत्रौ कूटे देवानामाश्रये तस्मिन्विष्णौ नष्टे सति यथा वनस्पतौ छिन्नमूले यस्य तस्मिन्सति शाखाः शुष्यंति तद्वद्विष्णुरेव प्राणो जीवनहेतुर्येषां ते दिवौकसो देवाः स्वयमेव नक्ष्यंते तन्नाशाय न पृथक्प्रयत्नः कार्य इति भावः ९ यावत्तर्पयिष्ये तावद्यूयं ब्रह्मक्षत्रकुला भ्यां समेधितां तद्बहुलां इत्यर्थः भुवं पृथ्वीं यात गत्वा किं कर्तव्यं तत्राह सूदयध्वमिति तपआदीनां द्वंद्वे तेनोमत्वर्थीय इति तपआदिभिर्युक्तान्सूदयध्वं घा

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ६ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः भजंतं भजमानस्य बालस्येवास्थिरात्मनः ७ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ८ त स्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ९ तावद्यात भुवं यूयं ब्रह्मक्षत्रसमेधिताम् सूदय ध्वं तपोयज्ञस्वाध्यायव्रतचारिणः १० विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणम् ११

तयध्वं १० ननु तैः किं भवतां तत्राह विष्णुरिति द्विजानां क्रियामूलो यज्ञः स एव धर्मतन्मयस्तदाकृतिः पुमान्विष्णुर्द्विजक्रियामूल इति भिन्नपदत्वे द्विजानां क्रिया यस्मात्तां मूलं यस्य श्रौतयज्ञरूपधर्ममयश्चेत्यर्थः पुमानश्रौतस्मार्तत्वशारीरक इत्यर्थः तदा देवर्षिपितृभूतानां धर्मः देवाद्युद्देश्यको योधर्म स्तस्य च परायणं परमत्राश्रयः निर्वाहकः देवाद्युद्देश्यको यो धर्मस्तदाश्रय इत्यर्थः द्विजेषु तत्कर्तृकयज्ञादिधर्मेषु विनाशितेषु शरीरविनाशेन विष्णु रपि विनाशितो भवति तद्विनाशे वाश्रयविनाशादाश्रिते धर्मे विनष्टे सति यत्तद्धर्मीयचरुपुरोडाशादिहविर्भागादिरूपजीविकायास्त्वभावाद्देवादयो विस्वय मेव विनष्टा भवंतीतिभावः ११

तस्माद्यत्र यत्र देशे ब्राह्मणादयो वर्त्तन्ते तं तं जनपदं देशं यात गच्छत संदीपयत दहत वृश्चत छिन्त १२ इतीत्थं भर्तुर्हिरण्यकशिपोर्निर्देशमाज्ञामादरयुक्ताः शिरसादृ
त्यङ्गीकृत कदनप्रियाः कदनं मर्दनं तत्रोहः तदुःखं वा तदेव प्रियं येषां ते दानवा दैतेयाः प्रजानां कदनं चक्रुः १३ कदनप्रियत्वमेव प्रपंचयति पुरेति तत्र पुरं हट्टादिमद्ग्रा
मस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेरारामोऽकृत्रिमं वनमाश्रमः मुनिस्थानमाकरो रत्नानां वासः खेटः कर्षकग्रामः खर्वटः गिरिगतग्रा
मः ग्रामः घोषः आभीराणां वासः पट्टनं राजधानी एतानि केचिद्ददहुरग्निप्रक्षेपेणादग्धवंतः १४ केचित् खनित्रैः खननसाधनैः सेत्वादीन् बिभिदुः तत्र सेतवो ज
लबंधनार्थं निर्मिताः स्तंभाः प्राकारादयः केचित्परशुः पाणौ येषां ते आजीव्यानुपजीव्यान् फलिनः वृक्षादीन् चिच्छिदुः अन्ये तु शरणान् गृहान् प्रादहन् अदग्ध

यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः तं तं जनपदं यात संदीपयत वृश्चत १२ नारद उवाच इति ते भर्तृनिर्देशमादाय शि
रसादृताः तथा प्रजानां कदनं विदधुः कदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्च ददहुः
पत्तनानि च १४ केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः प्रादहन् शरणान्येके
प्रजानां ज्वलितोल्मुकैः १५ एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः १६ हिरण्यकशिपुर्भ्रातुः
संपरेतस्य दुःखितः कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् १७ शकुनिं शंबरं धृष्टिं भूतसंतापनं वृकं कालनाभं महाना
भं हरिश्मश्रुमथोत्कचं १८ तन्मातरं रुषाभानुं दितिं च जननीं गिरा श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर १९ ॥ ❁ ॥

वंतः केचिदुल्मुकैः सांगारकाष्ठैः प्रजाः जनान् अजज्वलन् १५ एवं दैत्येंद्रस्य हिरण्यकशिपोरनुचरैर्मुहुर्लोके विप्रकृते उपद्रुते सति सर्वे देवाः स्वर्गं परित्यज्या
सुरैरलक्षितास्तत्र तत्र भुवि प्रदेशे विचेरुर्जग्मुः १६ ततो दुःखितो हिरण्यकशिपुः संपरेतस्य भ्रातुर्हिरण्याक्षस्य कटोदकादीनि प्रेतोद्देशेन करेण हस्तेन दे
यसलिलं जलं कटोदकं तत्प्रभृतीनि प्रेतोद्देशेन कर्तव्यानि कृत्वा भ्रातुर्हिरण्याक्षस्य पुत्रान् असांत्वयत् १७ भ्रातुः पुत्राननुदिशति शकुनिमिति १८ तथा दे
शकालाभिज्ञोऽसुरेश्वरो हिरण्यकशिपुस्तेषां शकुन्यादीनां मातरं रुषाभानुं स्वमातरं दितिं च श्लक्ष्णया मृदुवा निपुणया वा गिरा इदं वक्ष्यमाणमाह १९

तदेवाह अंबांबेत्यादिना यावदध्यायसमाप्ति अंबांबेति दितेः संबोधनं हे वधूरिति भ्रातुर्भार्यायाः पुत्रा इति तत्पुत्राणां वीरं हिरण्याक्षं प्रति शोचितुं नार्हथ कुत यतः रि
पोरभिमुखे शूराणां वधः श्लाघ्यः प्रशस्तः ईप्सितः प्रशस्तत्वेनाभिमत इत्यर्थः २० भवतु नाम तस्य वधः श्लाघ्यस्तथाप्यस्माकं तावद्बंधुर्गत एवेत्यत्राह भूतानामिति इह
संसारे भूतानां संवासः सहावस्था वस्थानं प्रपायामिव प्रविष्टानामिति प्रपा पांथानां पिपासूनां जलादिपानेन विश्रांत्यर्थं धार्मिकैः निर्मिता शाला तस्यां यथा पांथानां सहा
वस्थानमस्थिरं तद्वदिह भूतानामपीत्यर्थः अस्थिरत्वे हेतुं वदन्भूतानि विशिनष्टि स्वकर्मभिर्हेतुभिर्दैवेन तत्तज्जीवकर्मानुगुणं प्रवृत्तेश्वरेणेत्यर्थः एकत्र नीतानां
संयोजितानां पुनरन्यत्रोन्नीतानां वियोजितानां २१ ननु जीवनामेव संयोगो प्रपादिषु दृष्टो कथं पुनरजीवतो त्रैव दग्धस्य तत्र तत्र संयोगवियोगा इत्यत्राह नित्य
इति देहस्यास्थिरत्वेप्यात्मनः स्थिरत्वात्तत्तत्कर्मायत्तशरीरस्यागोयादात्म्यात्तैस्तैः संयोगवियोगा उपपन्ना इति भावः तदेतदुपपाद्यते आत्मा नित्यः तत्र हेतुरव्य

हिरण्यकशिपुरुवाच अंबांबहे वधूः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः २० भूतानामि
हसंवासः प्रपायामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानांच कर्मभिः २१ नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः
धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणान् २२

यः विनाशाद्यवस्थारहितः तत्कुतः शुद्धः प्रकृतिपरिणामानामाश्रयस्वरूपः प्रकृतिपरिणामो हि प्रकृतिगतः तत्कुतः परदेहाद्भिन्नः सर्वगः तत्कुतः सर्ववित् देहेंद्रि
यप्राणादीनां वित् तस्तेन विलक्षणा इति भावः कथं मेकदेशस्थस्य सर्वं वहि तत्राह सर्वगः स्वधर्मभूतज्ञानद्वारा कृत्स्नदेहादिव्यापीति भावः स्वत एवंभूतोप्यसावा
त्ममायया स्वसंबंधिविचित्रपुण्यपापात्मककर्मणा गुणान्सत्वादीन्विसृजन्कर्मानुरूपं क्षोभयन्नित्यर्थः आत्मनः स्वस्य कर्मफलभोगार्थं इति शेषः लिंगं श
रीरं धत्ते बिभर्ति गुणक्षोभस्य कर्मानुगुणत्वात्कर्मणः स्वात्मनः कर्तृत्वाद्गुणविसर्गेपि कर्तृत्वमुक्तं गुणान्विसृजन्निति उक्तविधोप्यनादिपुण्यपापात्मककर्म
फलभोगाय तदनुगुणपरिणामात्मकं देहं लभत इत्यर्थः तथा च तस्य तत्र तत्र कर्मायत्तदेहसोपलभ्यात्तस्य युक्तावेकस्यैव संयोगवियोगौ संभवत इति भावः २२

ननु नायमात्मा देहादिविलक्षणः किंतु स एव यतो देवोहं मनुष्योहं इति देहाद्यभेदेन प्रतीयते तत्राह यथेति देहोहमित्यादिप्रतीतिर्भ्रांतिरूपा न प्रमितिरूपेति।
भावः तदेवोपपादयति यथेति यथा प्रचलता भ[illegible]सा उदकेन उपाधिना तरवो वृक्षा अपि चलाः कंपमाना इव दृश्यंते यथा भ्राम्यमाणेन चक्षुषा भूमिरपि च
लतीव दृश्यते यथा तरुभूम्यादिचलनप्रतीतिर्भ्रांतिरूपेत्यर्थः २३ एवं तथाह भद्र गुणैः सत्वादिगुणैः परिणामात्मकैर्देहेंद्रियादिभिः सह मनसि भ्राम्यमाणे भ्रा
न्तवति यद्वा गुणैः शब्दादिविषयैस्तन्निमित्तदर्धमित्यर्थः मनसि भ्राम्यमाणे देहं विषयी कुर्वति सति पुमान् जीवः स्वयमविकलोपि निरवयवोपि देहादिभि
न्नोपीत्यर्थः तत्साम्यतां देहतुल्यतां याति देवोहं इत्यादिदेहरूपतामात्मानं प्रत्येतीत्यर्थः ततो यांतीत्यनुक्त्वा तत्साम्यतां यातीति वदतो यमभिप्रायः देवोहं इ
त्यादि देहाकारमात्मानं मन्यमानस्यापि कदाचिद्व्यतिरेकप्रतिपत्तिरस्त्येवेति तदेव विशदयति अलिंगो लिंगाच्छरीराद्भिन्नः आत्मा लिंगवानिवात्मानं प्रत्ये

यथांभसा प्रचलता तरवोऽपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः २३
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् याति तत्साम्यतां भद्र ह्यलिंगो लिंगवानिव २४
एष आत्मविपर्यासो ह्यलिंगे लिंगभावना एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः २५

ति ममेदं शरीरमित्येवंरूपेणालिंगं प्रति संबंधीवात्मा प्रत्येतीत्यर्थः ममेदं शरीरमिति शरीराद्व्यतिरिक्तत्वेनात्मनः प्रतीतावपि देहात्मभ्रांतिमतां तत्प्रतीतेरस्फुर
त्वद्योतनतायलिंगवानितीवशब्दः प्रयुक्तः अयंभावः यद्यात्मनो देहाकारत्वेन प्रतीतिः प्रमितिरूपास्यान्नहि तद्भिन्नत्वेन प्रतीतिरिति भ्रांतिरूपास्यात्तच्चायु
क्तं शरीरप्रतीतिभासदशांतदप्रतीतिदशायां च सुषुप्त्यादावहमर्थस्यात्मतोनुवृत्तत्वेन प्रतीयमानत्वादिति २४ एवं देहादिविलक्षणस्य नित्यस्यात्मनः
कर्मपरिपाकानुगुणसत्वादिगुणपरिणामरूपदेहसंबंधस्तदनुध्याननिमित्तस्तद्भिन्नत्वप्रत्ययस्य भ्रमरूप इत्युक्तं अथ यथा देहसंबंधस्तदनुध्याननि
मित्तस्तदभेदभ्रमस्य च यथा कर्ममूलकः एवं सुखदुःखादिकमपि सर्वं कर्ममूलकमेवेत्याह एष इति अलिंगे लिंगादस्मिन् शरीराद्भिन्ने आत्मनि लिंगभावना
देहत्वेनानुध्यानं देवोहं मनुष्योहं इत्यादिदेहाभेदप्रतीतिरित्येष आत्मनो विपर्ययः अन्यथा प्रतीतिः कर्मसंसृतिः कर्मकृतसंसारः भवतीत्यर्थः एवं प्रियाप्रियैरिष्टा

निष्टवस्तुभिर्योगो वियोगश्च सुखदुःखस्वरूप इत्यर्थः २५

१०

संभवउत्पत्तिर्विनाशो मरणं नानाविधः शोकः अविवेकः चिच्चिदीश्वरयाथात्म्याविवेचनं चिंताविषयानुष्ठानं विवेकस्यास्मृतिः क्वचिदाप्तोपदेशादिना ज्ञातस्यापि वि
वेकस्याननुसंधानं चेत्येवमादिभिः संसृतिरेव कर्मकृतसंसाररूपएव स्मृतः २६ अत्र शोकनिमित्तमंतरेणापि यः शोकः स व्यर्थ एवेत्यस्मिन्नर्थे इतिहासमप्युदाहरं
ति तत्त्वविद इति शेषः इतिहासं विशिनष्टि पुरातनं नत्वाधुनिककपोलपरिकल्पितं यमस्य प्रेतबंधूनां च संवादरूपं तमितिहासं निबोधनमत्तः शृणुतः २७ इतिहासमे
वाह उशीनरेष्वित्यादिना उशीनरेष्वभूद्राजा सुयज्ञ इति प्रसिद्धः कश्चिद्राजा बभूव स च सपत्नैः शत्रुभिर्युद्धे निहतः तं निहतं ज्ञातयः सपिंडाः उपासत परिवृत्य अनुपविविशुः
२८ कथंभूतं विशीर्णो रत्नमयः कवचो यस्य विभ्रष्टान्याभरणानि स्रक् च यस्मात् शरैर्निर्भिन्नं भिन्नं हृदयं यस्य असृङ्नारुधिरेण विलं व्याप्तं २९ प्रकीर्णाः केशा

संभवश्चविनाशश्चशोकश्चविविधःस्मृतः अविवेकश्चचिंताचविवेकास्मृतिरेवच २६ अत्राप्युदाहरंतीममितिहा
संपुरातनं यमस्यप्रेतबंधूनांसंवादस्तंनिबोधमे २७ उशीनरेष्वभूद्राजासुयज्ञइतिविश्रुतः सपत्नैर्निहतोयुद्धेज्ञात
यस्तमुपासत २८ विशीर्णरत्नकवचंविभ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयंशयानमसृगाविलं २९ प्रकीर्णकेशंध्व
स्ताक्षंरभसादष्टदच्छदं रजःकुंठमुखांभोजंछिन्नायुधभुजंमृधे ३० उशीनरेंद्रंविधिनातथाकृतंपतिंमहिष्यःप्रस
मीक्ष्यदुःखिताः हताःस्मनाथेतिकरैरुरोभृशंघ्नंत्योमुहुस्तत्पदयोरुपापतन्रुदंत्यउच्चैर्दयितांघ्रिपंकजंसिंचंत्यस्रैः
कुचकुंकुमारुणैः विस्रस्तकेशाभरणाःशुचोनृणांसृजंत्यआक्रंदनयाविलेपिरे ३२ ॥श्रीरामचंद्रायनमोनमः

ध्वस्ते निश्चले ऽक्षिणी यस्य तं रभसेण क्षोभेण दष्टो दष्टो दंतच्छदः ओष्ठो येन रजसा कुंठमावृतं मुखांभोजं यस्य मृधे युद्धे छिन्नमायुधं भुजश्च यस्य तं
३० विधिना दैवेनैवं कृतं उक्तदशां प्रापितं उशीनरेंद्रं पतिं महिष्यो राज्ञ्यः प्रसमीक्ष्य तत्र अतीव दुःखिताः हे नाथ वयं हताः स्मेति वदंत्यः करैः पाणिभिः भृशं नितरां
उरो मुहुर्मुहुः घ्नंत्यः तस्य भर्तुः पदयोश्चरणयोरुपापतन् समीपे समं न्यादयनन् ३१ मन उच्चैः स्वरेण रुदंत्यः कुचकुंकुमेनारुणैः कुचयोः पतित्वा ततः प्रस्र
वद्भिरिति भावः अस्रैः शोकजलबिंदुभिः दयितस्य पत्युरंघ्रिपंकजं सिंचंत्यः विभ्रष्टाः केशा आभरणानि च यासां ताः नृणामपि शुचं सृजंत्य उत्पादयंत्य आ
क्रंदनया रोदनेन महद्विलेपिरे विलापं चक्रुः ३२

१०

विलापमेवाह द्वाभ्यां अहोइति नोस्माकं प्रभो हे भर्त्तः अकरुणेन निःकृपेण विधात्रा ब्रह्मणा दृग्गगोचरां दशां भवान्नीतः गमितः दृशामगोचरामवस्थां प्रणीत इति वान्वयः येन विधात्रा पुरा उशीनराणां नहे प्रोक्तवानां जनानां वृत्तिदः जीवनप्रदः कृतो भवान धुनातेनैव विधात्रा शुचां शोकानां विवर्द्धनः कृतोसि ३३ हे महीपते सुहृत्तमेन कृतज्ञेन च त्वया विना तेन वसंबंधिन्यो वयं कथं स्याम कथं जीवेमेत्यर्थः अतस्त्वं यत्र यास्यसि तत्रैव हे वीर तव पादयोः शुश्रूषतीनां से वां कर्तुमिच्छतीनामस्माकमनुयानं सहगमनं दिशदेहि ३४ एवं मृतं पतिं परिगृह्य विलपतीनां निर्हारं दाहार्थं नयनमनिच्छतीनामर्कः सूर्योऽस्तं अस्ताचलं प्रतिसंन्यवर्तत संनिवृत्तो बभूव ३५ प्रेतस्य मृतस्य ये बांधवाः तेषां परिदेवितं रोदनमाश्रुत्य स्वपुर्यामेव श्रुत्वा भगवान्यमः स्वयमेव बालको भूत्वा तत्राक्रं

त्रिय ऊचुः ॥ अहो विधात्राऽकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशां उशीनराणामसि वृत्तिदः पुराकृतोऽधुना येन शुचां विवर्द्धनः ३३ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते तत्रानुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ३४ हिरण्यकशिपुरुवाच ॥ एवं विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ३५ तत्र ह प्रेतबंधूनामाश्रुत्य परिदेवितं आह तान्बालको भूत्वा यमः स्वयमुपागतः ३६ यम उवाच ॥ अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपार्थं ३७ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ३८ ॥ न ॥

दन्तस्थानि समुपागतः तानाह हेत्वाश्चर्ये ३६ तदेवाह अहो इत्यादिना अहो इत्याश्चर्ये किं तत् यद्वयसा मत्तः अधिकानामपि लोकविधिं जन्ममरणा दिलोकपरिपाटीं पश्यतामप्यमीषां प्रेतबंधूनां विशिष्टो मोह इत्येतत् विमोहमेवाह यत्र भुवि संभव उत्पत्तिस्तत्रैव गतं पुनस्तत्रैव लीनं मनुष्यं प्रति स्वयं सधर्माः मृतेन तुल्यजन्ममरणभाजोपि अपार्थं मुधा शोचंति ३७ नूनं वयस्का अपि वयं एवाहो धन्याः श्रेष्ठाः कुतः यतः पितृभ्यां मातापितृभ्यां त्यक्ता अपि न विचिंतयामः चिंतां न कुर्मः अबला दुर्बला अपि वाला अपीति वा वृकादिभिरभक्ष्यमाणा वयं न तत्र हेतुः यो हि गर्भे रक्षति जन्मनः पश्चादपि स एव हि ईश्वरो रक्षिता रक्षिष्यति ३८

१

को वैरक्षिता तत्राह यइति यईश्वरः स्वेछयैव न तु कर्मणेदं जगत्सृजति तर्हि सोप्यस्मदादिवत्किं जन्ममरणादिमानित्याह अव्ययोऽपक्षयादिविकाररहितः कर्म
यत्नप्राकृतदेहरहित इत्यर्थः यश्च स्वेन सृष्टं जगद्रक्षति यश्च स्वेन रक्षितं पुनरवलुंपते संहरति तस्यैवंविधईश्वरः कर्मवश्य इवेत्थं किमर्थं करोति तत्राह हे अव
लाः तस्यैवं जगदुत्पत्त्यादिकर्तुरीशितुरीश्वरस्यांतरात्मतयावस्थितस्य चराचरात्मकं इदं जगत्क्रीडनं क्रीडापरिकरं जगद्व्यापारस्तस्य क्रीडारूप इति भावः अ
तएव निग्रहानुग्रहयोः प्रभुः समर्थः ३९ प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति पथीति यथा पथि च्युतं स्वस्तमपि दिष्टेन दैवेनेश्वरेण रक्षितमनुगृहीतं संतिष्ठ
ति पुनर्लब्धं भवतीत्यर्थः गृहे स्थितमपि तेन दिष्टेन विहतं सद्विनश्यति एवमरण्येऽनाथः रक्षकांतररहितोपि तेन दिष्टेन रक्षितः जीवति तत्संकल्पेन जीवति गृ
हे गुप्तोप्यस्य हत अनेनोपेक्षितः न जीवति किंतु विनश्यत्येव ४० किं तर्हि यमीश्वरोपि विषमः नेत्याह भूतानीति सर्वाणि भूतानि देवमनुष्यादीनि तैस्तै

यइच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुंपते च यः तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं संग्रहनिग्रहे प्रभुः ३९
पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति जीवत्यनाथोपि तदीक्षितो वने गृहेपि गुप्तोस्य हतो न जीवति ४०
भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति लेन भवंति सर्वशः न तत्र हात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ४२
का

निजयोनिकर्मभिः स्वस्वजातिप्राप्तिनिमित्तकर्मभिः काले निजयोनिकर्मविपाककाले भवंति पुनस्तत्कर्मक्षयेन भवंति देवमनुष्यादिभूतानां भावाभावौ
तत्तत्कर्मानुगुणप्रवृत्तेश्वरायत्तौ इति न तस्य वैषम्यमिति भावः ननु मास्तु वैषम्यं तस्यापि त्वंतरात्मतयावस्थितः स्वानर्थरूपं संसारं स्वयमेवापादयत्किमय
ज्ञः नेत्याह नेति तत्र प्रकृतौ देवादिशरीरे जीवांतरात्मतयावस्थितोप्यात्मा परमात्मा न बध्यते न संसरतीत्यर्थः हंति विस्मये देहे स्थितस्याप्येकस्य न बंधः अन्यत
स्यानुबंधः इति विस्मयः इतरस्य बंधमेवाह तस्याः प्रकृतेर्गुणैर्देवोहं स्थूलोहं इत्यादिरूपप्रतीतिविषयैर्देहगतदेवत्वादिभिर्देहात्मभ्रमादिभिरित्यर्थः अन्य
तमो देहेंद्रियादीनामन्यतमो जीवः निबध्यते निबद्धो भवति संसरतीत्यर्थः यद्वा गुणैः शब्दादिभिर्विषयैर्हेतुभिस्तज्ज्ञो न हेतुना निबध्यत इत्यर्थः तद्योग एव हि
तस्य संसृतौ कारणं इति भावः तथा च श्रुतिः तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति ४१ ॥ श्रीरामकृष्णाय नमः ॥ श्रीरामचंद्राय नमो नमः

११

एवं सर्वभूतानामुत्पत्तिलयादेस्तत्कर्मानुगुणप्रवृत्तेश्वराधीनत्वान्न शोकः कार्य इत्यभिधायेदानीं देहस्य विनाशिस्वभावत्वादात्मनस्तु तद्विपरीतरूपत्वादुभावपि न शो
कविषयाविति वक्तुं तावद्देहात्मनोः परस्परवैलक्षण्यमाह द्वाभ्यां इदमिति इदं परिदृश्यमानं राजादिशरीरं पुरुषस्य जीवस्य मोहजं अविद्यासंचितकर्मकृतं पुरुष
स्य मोहजं इदं शरीरं इति प्रतिरिक्तनिर्देशेन देहात्मनोः परस्परभेदो दर्शितः तत्र देहस्यात्मत्वं दृष्टांतेनाह यथा गृहं गृहिणः पृथक् सिद्धं तथा भौतिकं भूतसंघातपरि
णामभिदं शरीरमपि पृथक् शरीरिणो भिन्नमीयते ऽवगम्यते इत्यर्थः यथा गृहस्य गृहिस्वरूपत्वमसंतासंभावितं तद्वद्देहस्य देहिस्वरूपत्वं इति दृष्टांताभिप्रायः
एवं गृहदृष्टांतेन जीवाद्देहभेदमुक्त्वा तेनैव दृष्टांतेन देहस्य विनाशिस्वभावत्वं चाह यथा मृत्काष्ठादिविकारात्मकं गृहं कालेन विनश्यति तथा उदकैः पार्थिवैस्तैजसै
श्चेदं वायवीयाकाशीयपंचभूतपरिणामं उदकादीनामंशैः कालेन तत्तद्देवादिजातिप्राप्तिनिमित्तकर्मफलपरिपाककाले तेतस्यर्थः जातो जनो देहः जन्मनः प
श्चादपि विकृतः बाल्ययौवनमध्यस्थविरत्वादिभिरवस्थाभिर्विकारं प्राप्तः पुनः स्वारंभककर्मविनाशकाले विनश्यति ४१ अथात्मनो देहाद्भेदं सदृष्टांतमाह यथे

इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहं यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ४१
यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक् स्थितः यथा नभः सर्वगतं न सज्जते तथा पुमान्सर्वगुणाश्रयः परः ४२
सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ यः श्रोता योनुवक्तेह स न दृश्येत कर्हिचित् ४३

ति यथानलोग्निर्दारुषु स्थितो भिन्न ईयते दारु
गतवक्रत्वदीर्घत्वकुटिलत्वादिधर्मैरहितत्वात्तेभ्यो भिन्न एव दृश्यते यथा च देहगतोप्यनिलस्ततः पृथगेव दृश्यते यथा नभः सर्वत्र व्याप्तमपि न सज्जते सर्वगत
धर्मैर्न संबध्यते तथा सर्वगुणाश्रयः सत्वादिसर्वगुणपरिणामरूपदेहेंद्रियाश्रयो विभुर्जीवः परः गुणेभ्यः देहाद्भिन्नः देहगतजन्मजरामरणादिभिर्विकृ
तस्तस्माद्भिलक्षणत्वेनावतिष्ठत इत्यर्थः अविभागेनावस्थितस्यापि तत्कृतधर्मास्पर्शे आद्यं निदर्शनं विजातीयस्यापि सहावस्थाने द्वितीयं तृतीयं तु तदव
स्थानेपि तत्कृतधर्मास्पर्श इति भेदः ४२ एवं देहात्मनोः परस्परविलक्षणस्वरूपयोरभिहितयोरप्यतीव देहात्मभ्रांत्यानुशोचतां शोकमपनेतुं कः शोकवि
षय इत्याशंक्य प्रतिक्षिपति सुयज्ञ इति हे मूढाः भवन्तो यमनुशोचथ सोयं सुयज्ञः शेते युष्माभिः शोच्यः सुयज्ञः शेते विद्यते एव किमर्थं शोक इति भावः
ननु भवत्य देहशयान एव हि सुयज्ञ इति शंकार्थः तत्प्रतिक्षिपति य इति यः श्रोता भवद्विलापश्रवणाक्षमः यश्चानुवक्ता वचनक्षमश्च स इह कर्हिचिद
पि चिरं सुरक्ष्यमाणोपि न दृश्यते शयानो देह एव सुयज्ञ इति भवद्विलपितं किमिति न शृणोति न च प्रतिवक्तीत्यर्थः ४३ श्रीरामचंद्राय नमः॥

मुखप्राणोपि श्रवणं प्रति वचनं च न क्षमोतस्मात्किं पुनर्देहो न क्षम इत्याह नेति मुख्योप्यसुः प्राणो वा न श्रोता नाभवद्विलपितस्य श्रोता ननाप्यनुवक्ता किं पुनर्देह इत्यर्थः ननु श्रोतारं वक्तारं प्रत्येवानुशोचाम इत्यत्राह यस्त्विंद्रियवांश्रवणं प्रति वचनादिसाधनश्रोत्रवागादींद्रिययुक्तः सत्वात्मेह शरीरे प्राणदेहाभ्यामन्य एवासीत्स तु तेभ्यो देहेभ्यो न्य एवास्तीत्यर्थः ४४ स्वयं तेजसा ज्ञानेनोपलक्षितः भूतैः पृथिव्यादिभिरिंद्रियैर्ज्ञानकर्मात्मकैरिंद्रियैर्मनसा च लिंग्यंते लक्ष्यंत इति लिंगांस्तानुत्कृष्टाय कृष्टान्देहानुत्सृजति निर्भजति भजति त्यजति च अपि हीत्यनुभवं प्रमाणयति इंद्रियवानात्मा देहत्यागतदुपादानशीलः श्यायानमिमं देहं त्यक्त्वागत इति सोपिइ दानीं नशोच्य इति भावः ४५ नन्वस्यात्मन उपभोग्यं इमं देहमंतरेण विहेतुं त्यक्त्वागत इत्यनुशोचामस्तत्राह यावन्निवंधनं देहसंबंधकारणं पुण्यापुण्यात्मकं कर्म वर्त्तते तावदृहीदेहेनान्वितो भवति आत्मा तत एव देहान्वयाद्देवहेतोर्विपर्ययः देहात्मभ्रांतिः ततः क्लेशः इत्येवंरूपो मायायोगः प्रकृतिसंवंधरूपः संसृति रनुवर्त्तते अयं भावः सति देहसंबंधनिमित्ते कर्मणि देहेनान्वयः तस्मिंश्च सति ममायं पतिरहमस्या भार्या इत्याध्यात्मिको देहात्मभ्रमः तस्मिंश्च सति क्लेशः तत्र

नश्रोता नानुवक्तायं मुख्योप्यत्र महानसुः यस्त्विहेंद्रियवानात्मा स चान्यः प्राणदेहयोः ४४ भूतेंद्रियमनोलिंगान्देहानुच्चावचान्वि
भुः भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ४५ यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिवंधनं ततो विपर्ययः क्लेशो मायायोगोनु
वर्त्तते ४६ वितथाभिनिवेशोयं यद्गुणेष्वर्थदृग्वचः यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ४७

निदानस्य कर्मण एव निवृत्तत्वान्नासा त्मनः पुनः श्यायानदेहसंबंधस्तेवाभावान्निर्हेतुको व्यर्थश्च शोकः ४६ देहसंबंधवत्कर्मनिवृत्तिरेव च देहोत्सर्गहेतुरिति देहस्योपभोग्यत्वं प्रतिक्षिपति वितथेति अयमभिनिवेशोऽभिमानो वितथो व्यर्थः देहादेरपुरुषार्थरूपत्वादिति भावः कोसावभिनिवेशः यद्गुणेषु सत्वादिगुणपरिणामात्मकेषु देहादिषु तदुपभोग्येषु शब्दादिषु चार्थदृग्वचः प्रयोजनत्वदर्शनवचने इत्येव देहादिषूपभोग्यत्वज्ञानं तद्व्यवहारश्चेत्यभिमानो व्यर्थ इत्यर्थः वै तथाभेव दृष्टांतमुखेन विषदयति यथा मनोरथरूपः स्वप्नदृष्टकमानुगुणमनोवृत्तिरूपसंकल्पविकल्पात्मकस्वप्नानुगुणतया प्रवृत्तस्पष्टपदार्थः स्पष्टाः निशः स्वप्नकालमात्रावस्थायी तथा सर्वमैंद्रियकं वाह्येंद्रियविषयः शब्दादिकमपि मृषाऽनित्यत्वादपुरुषार्थः स्वप्नद्रष्टुःकर्मानुभाव्यतत्कालमात्रावस्थायिपदार्थसृष्टिनिमित्तकर्मानुगुणईश्वर सृष्टस्वाप्नपदार्थप्रतीचजाग्रदवस्थानुभाव्यसर्वेंद्रियगम्यभोग्यभोक्तृदृष्टसमानकालिकपदार्थेषु तूपभोग्यत्वाद्यभिमानो व्यर्थोऽनित्यत्वेनापुरुषार्थरूपत्वा दिति भावः मृषाशब्दार्थस्यानित्यत्ववाचित्वमथ नित्यमनित्यत्वं चेत्यनंतरग्रंथादवगम्यते अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यत इति पराशरोक्तेश्च परमार्थोना

४७

एवंदेहात्मनोरुभयोरपिशोकाविषयत्वमुक्तं सहेतुकमुपसंहरति अथेति अथदेहवलानित्यमात्मानमनित्यंदेहंप्रत्यपितद्विदःदेहात्मयाथात्म्यविदोनशोचंतिकुतइ
तिशंकांदर्शयंति यस्मात्स्वभावः वस्तुनःस्वाभाविकोधर्मः शोचद्भिरप्यन्यथाकर्तुंनशक्यतेनह्यात्मनःस्वाभाविकं नित्यत्वमपनीयानित्यत्वंकेनविच्छोकाद्युपायेना
पादयितुंशक्यं नवादेहस्यानित्यत्वमनुपघ्ननित्यत्वंनहिवनेरोदनापनयेनशोचत्यभावादयितुंशक्यमितिभावः ४८ यदुक्तंस्वयंसधर्मात्रपिशोचंतीतितत्रदृष्टांतत
येतिहासंप्रस्तौति लुब्धकइति कश्चिल्लुब्धकोव्याधःपक्षिणामंतकःमत्युरीश्वरेणमृत्युत्वेननिर्मितःअतएवसततंवनेजालंवितत्यपक्षिणांप्रलोभनंवंचनंवि
दधेकृतवान् ४९ एवंलुब्धकेप्रलोभयतिसतितत्रसमीपेकुलिंगयोःपक्षिणोर्मिथुनंद्वंद्वंसंचरल्लुब्धकेनादृश्यत तयोःस्त्रीपुंसोःकुलिंगीस्त्रीसहसावंचनोपा
येनलुब्धकेनप्रलोभिताबभूव ५० सामहिषीकुलिंगभार्याकालवशासतीसिचस्तंत्वांजाले आसजुतासक्ताबभूव अथततस्तांसूत्रेसिचस्तंतौमासंजितां

अथानित्यमनित्यंवानेहशोचंतितद्विदः नान्यथाशक्यतेकर्तुंस्वभावःशोचतामिति ४८ लुब्धकोपिवनेकश्चित्पक्षिणांनिर्मितोंऽत
कः वितत्यजालंविदधेतत्रतत्रप्रलोभनं ४९ कुलिंगमिथुनंतत्रविचरत्समदृश्यत तयोःकुलिंगीसहसालुब्धकेनप्रलोभिता ४९
सासज्जतसिचस्तंत्वांमहिषीकालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः स्नेहादकल्पःकृपणःकरुणांपर्यदेवयत
कुलिंगउवाच॥ अहोअकरुणोदेवःस्त्रियाकरुणयाविभुः कृपणांमानुशोचंत्यादीनयाकिंकरिष्यति ५२ कामंनयतुमांदेवः
किमर्द्धेनात्मनोहिमे दीनेनजीवतादुःखमनेनविधुरायुषा ५३ महिषीभार्याकुलिंगीवीक्ष्यकुलिंगःपुमान्स्नेहादनीवदुःखितोऽकल्पःविमो
चनेऽदक्षोऽतएवकेवलं स्वयमप्यातुरःदीनःसन्कृपणांदीनं यथातथापर्यदेवयत्परितप्तोबभूव ५१ तदेवाह अहोइतित्रिभिः अहोदेवोविधाता
ऽकरुणःनिर्दयः अकरुणत्वमेवाविष्करोति स्त्रियाअकरुणायेतिछेदः आकरुणयासर्वतोनुकंप्यया स्त्रियामममार्ययानितरांकृपणांदिनंमांप्रत
नुशोचंत्यादीनयाकुलिंग्याविभुर्देवःकिंकरिष्यतिनकिमपितस्यप्रयोजनं किंतु मय्यकारुण्येनमांवियोज्यस्त्रियंनीतवानितिभावः ५२ यतोमय्य
करुणोदेवःततोमामपिकामंयथेष्टंनयतु आत्मनोर्द्धेनममकिंप्रयोजनंएकस्मिन्नप्यर्द्धेभार्याख्येनष्टमवशिष्टेनार्द्धेनकिमपिप्रयोजनमस्ती
त्यर्थः अर्द्धविशिनष्टिदीनेनदुःखयताऽनदुःखयथाभवति तथाजीवताप्राणान्धारयताविधुरायुषाविधुरंभार्यारहितमायुर्यस्यतेनभार्यात्रस्यजी
वितयुक्तेनेत्यर्थः अनेनेतिनिःस्पृहत्वमुक्तंकार्यापयोगित्वाभावादितिभावः ५३

किं चाज्ञातेप्यहो ये यां तात्मा त्राहीनात्वाल कान्कुयमहं विसर्गेमुत्स्यामि किंच मेममप्रजाः नीडे मातरं प्रतीक्षंते ५४ एवं प्रियायाविवियोगातुरं दुःखितमत
एवं विशेषेणाद्दीतमश्रुकंठमश्रुपूर्णकंठं तं कुलिंगमेवशाकुनीन्हंतीति शाकुनिकः लुब्धकः आरात्समीपे विलीनस्तिरोहितः सन्कर्मानुगुणेन प्रेरितः शरेण
ताडितवान् ५५ एवमितिहासं प्रस्तुत्य प्रकृतेोपयोगित्वेनोपसंहरति एवमिति एवं यथा कुलिंगस्तथा यूयमप्यात्मापायं स्वमृत्युमपश्यंतः अज्ञाताः च यत्र
अतएवाबुद्धयः द्विदिकेशस्त्या वर्षशतैरपि शोचंत एवं पतिं न प्राप्स्यथ ५६ एवं प्रेतवंधुयमसंवादरूपमितिहासं प्रस्तुत्योपसंहरति देत्यवालैरिति द्वाभ्यां ए
वं सर्वे वालाः प्रवदंति सति सर्वे ज्ञातयः सुयज्ञस्य सपिंडाः विस्मितचेतसो ये यांते ऽप्युत्थितमगुरुस्वार्थत्वेन प्रतीतं किंतु गुरुस्वार्थत्वेन विपरीतरूपेण प्रतीतं सर्वं
देहादिकमनित्यमस्थिरमगुरुस्वार्थरूपं मेनिरे इति निश्चितवंतः ५७ यमस्त्वेतद्दुःखमुपाख्यायकथयित्वा तत्रैवांतर्दधे ततो ज्ञातयः सुयज्ञस्य यत्कर्तव्यं

कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ५४ यम उवाच एवं कुलिंगं विलपंतमारात्प्रिय
वियोगातुरमश्रुकंठं स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ५५ एवं यूयमपश्यंत आत्मापायमबुद्धयः नैनं प्रा
प्स्यथ शोचंत्यः पतिं वर्षशतैरपि ५६ हिरण्यकशिपुरु० वाल एवं प्रवदति सर्वे विस्मितचेतसः ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं
५७ यम एतदुपाख्याय तत्रैवांतरधीयत ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ५८ ततः शोचत मा यूयं परं चात्मानमेव च क
आत्मा कः परो वात्र स्वीयः पारक्य एव वा स्वपराभिनिवेशेन विनाज्ञानेन देहिनां ५९ नारद उवाच इति दैत्यपतेर्वाक्यं दितिराक
र्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ६० इति श्रीमद्भागवते सप्तमस्कंधे द्वितीयोध्यायः २ ॥ श्रीरामाय नमः ।

सांपरायिकं प्रेतोद्देशेन कर्तव्यं कर्म तच्चक्रुः ५८ एवं इतिहासमुपसंहृत्य तत्फलितार्थमुपदिश्योपसंहरति तत इति यतो देहात्मनोरेवं विधः स्वभावोऽतः हिरण्याक्षादिरूपं प
रमात्मानं स्वं प्रति वा यूयं मा शोचत नाहो मां विहाय स गतः मे विहाय्याहं कथं जीवामीत्येवं स्वपरं प्रति वा मा शोचतेत्यर्थः स्वः परः इत्यभिनिवेशोभिमानो यस्मात्ते
नाज्ञानेनानाद्यज्ञानमूलकेन कर्मणा विनादेहिनां कः परः को वात्मा कश्च स्वीयः पारक्यो वा स्वीयपरकीयविभागः सर्वोप्यनाद्यविद्यामूलककर्मायत्तदेहसं
वंधप्रयुक्तदेहात्माभिमानप्रयुक्त उपाधिकः आत्मनां तु केनापि प्रकारेण स्वाभाविकसंबंधः शोकहेतुर्नोपपद्यतेऽतो मा शोचतेत्यभिप्रायः ५९ उपरीतनं दे
त्यवृत्तांतं वक्तुं तावत्तद्वाक्यमुपसंहरन्दितेर्विस्थितिप्रकारमाह नारद इति इत्थं दैत्यपतेः हिरण्यकशिपोर्वाक्यमाकर्ण्य सस्नुषा पुत्रभार्या हिरण्याक्षभार्यासहिता दितिर्हिरण्या

गैरपुत्रशोकं त्यक्त्वा तत्त्वे देहात्मयाथात्म्ये चित्तमधारयत्तत् ॥
चित्तनपरावमृष्टवैतसर्थः ६० इति सप्तमे द्वितीयः २ ॥

एवं तत्त्वोपदेशेन दित्यादीनां शोकं परिहृतवतो दैत्यस्योपरितनं वृत्तांतमाह भगवान्नारदः हिरण्यकशिपुरित्यादिना हे राजन् युधिष्ठिर हिरण्यकशिपुरात्मानं व्यधित्स
त विधातुमैच्छत कथंभूतमजेयं इतरैर्जेतुमशक्यं जरामरणाभ्यां रहितमप्रतिद्वंद्वं प्रतिपक्षरहितं एकः स्वयमेव राजा इत्येकराजस्तं एवंभूतमात्मानं साधयितुमैच्छदित्यर्थः
येन साधनेन स्वयमुक्तविधो भवेत्तादृशं साधनं कर्तुमैच्छदिति यावत् १ तत्साधनानुष्ठानप्रकारमेव प्रपंचयति स दैत्यः मंदरगिरेर्द्रोण्यामत्युग्रं तपस्तेपे कृतवा
न कथंभूतः सन् ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादांगुष्ठेनाश्रिताऽवनिर्भूमिर्येन २ एवं तपः कुर्वन् दैत्यः जटानां दीधितिभिः कांतिभिः रेजे अंशुभिः रश्मिभिः संवर्ति
कः प्रलयकालिकः सूर्य इव रेजे हे राजन् तस्मिन् दैत्ये एवं तपः कुर्वति सति ये देवाः पूर्वं दैत्यैः रक्षिताः संतो भुवि चेरुस्ते स्थानानि स्वस्थानानि भेजिरे प्रापुः प्रतिप

नारद उवाच॥ हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत १ स तेपे मंदरद्रोण्यां तपः परमदारुणं ऊ
र्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः २ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे
३ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ४ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल ७
भूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश॥५॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः धात्रे विज्ञापयामासुर्देवदेव जगत्प
ते दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ६ तस्य चोपशमं भूमन्विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यंति बलिहारास्तवाभि

दत्स्थानस्य तपः स्थितत्वादुपद्रवाभावादिति भावः ३ तस्य दैत्यस्य मूर्ध्नः सकाशात्समुद्भूतः निष्क्रांतः तपोमयस्तपसः आगतः तत आगते मयट् चेति मय
ट् तपःकार्यभूत इत्यर्थः धूमेन सहितोऽग्निः प्रवृद्धः तिर्यगूर्ध्वमधश्च सर्वतो लोकानभ्यतप्त तताप ४ नद्यः उदन्वंतः समुद्राश्च चुक्षुभुः द्वीपैरद्रिभिश्च सहिता
भूर्भूमिश्चचाल ग्रहैः सहितास्तारा नक्षत्राणि निपेतुः दशदिशो जज्वलुश्च ५ तेन तपोग्निना तप्ता देवाः दिवं स्वर्गं त्यक्त्वा ब्रह्मलोकं ययुः धात्रे ब्रह्मणे विज्ञा
पयामासुश्च विज्ञप्तिमेवाह हे देव देवदेवानामिंद्रादीनां देव जगत्पते दैत्येंद्रस्य तपसा तप्ता वयं दिवि द्युलोके स्थातुं न शक्नुमः ६ हे भूमन् यदि त्वं लो
कानां क्षेमं मन्यसे तर्हि हे अभिभो हे सर्वाभिभवक्षम तव बलिहाराः हविर्भागप्रदाः पूजाकारिणो वा सर्वे लोका यावन्न नक्ष्यंति नाशं न यास्यंति तावद्देव ततः पू
र्वमेव तस्य दैत्येंद्रस्य तपोऽग्नेरुपशमं वरप्रदानरूपोपायेन विधेहि कुरु ७

१४

दैत्यस्य रुद्रादिभिः प्रधिं ब्रह्मणस्तस्मिन् देवमनुत्पादयितुं विज्ञापयंत आहुः तस्येति दुश्चरमन्यैः कर्तुमशक्यं तपश्चरतः कुर्वतस्तस्य दैत्यस्यायं किं किल संकल्पः य
द्यपि सर्वज्ञस्य तव चाविदितं किंतु किमपि नास्ति तथाप्यस्माभिर्निवेदितं श्रूयतां त्वयेति शेषः ९ कोसौ संकल्पस्तत्राहुः सृष्ट्वेति सर्वधिष्ण्येभ्य इन्द्रादिस्थानेभ्यः प
रमे स्थाने तिष्ठतीति परमेष्ठी ब्रह्मा तपोयोगे यः समाधिः निष्ठा तेन चराचरात्मकमिदं सर्वं जगत्सृष्ट्वा यन्निजासनं सर्वोत्कृष्टं सत्यलोकमध्यास्ते एवं तदे
वासनमहमात्मनो मम वर्द्धमानेन तपोयोगसमाधिना साधयिष्येइति ननु ब्रह्मणो दीर्घायुष्वात्तपस्तत्वात्तत्साधितमन्यैः कथं तत्साधयेत तत्राहुः कालात्म
नोश्च नित्यत्वादिति यद्यप्यायुरनन्तं तथापि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिः साधयिष्य इत्यभिसंधिरित्यर्थः १० अभिसंध्यंतरमाहुः अन्यथेति तपो
बलेनाहमिदं जगदन्यथाऽन्यरीत्या अयथापूर्वं देवासुरादिव्यवस्थं चकरिष्ये कल्पान्ते कल्पावधिभिस्तत एव कालेन निर्धूतैर्विनाशितैर्वैष्णवादिभिः वैकुं

तस्यायं किल संकल्पश्चरतो दुश्चरं तपः श्रूयतां किं न विदितः तवाथापि निवेदितं ९ सृष्ट्वा चराचरमिदं तपोयोगसमाधिना अध्यास्ते
सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं एवं तदहं वर्द्धमानेन तपोयोगसमाधिना कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः १० अन्यथे
दं विधास्येहमयथापूर्वमोजसा किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ११ इति शुश्रुम निर्बंधं तपः परममास्थितः विधत्स्वानं
तरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो दे
वैर्भगवानात्मभूर्नृप परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमं १४ न ददर्श प्रतिछन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराची
र्णं मेदस्त्वङ्मांसशोणितं १५ तपंतं तपसा लोकान्यथाभ्रापिहितं रविं विलक्ष्य विस्मितः प्राह प्रहसन्हंसवाहनः १६ ॥ ः ॥

ठादिभिः किं प्रयोजनं न किमपीत्यर्थः अनेन सर्वार्थान्विपरीतांश्च बुद्धिः सापार्थता मसीत्युक्तिरीत्या तस्य निर्बंधमभिसंधिरूपं शुश्रुमस्तदर्थमेव परमं तप आश्रित
अतो हे त्रिभुवनेश्वरात्र कर्तुं यद्युक्तं तदनंतरमाश्वेव स्वयमेव विधत्स्व कुरु १२ हे जगत्पते तवेदं पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां गवां च भवाद्यर्थं
तवस्थाने अंशो द्विजानां गवां च न भवादिकमस्तीति भावः तत्र भव उत्पत्तिलाभः क्षेमं लब्धपालनं श्रेयः धर्मादि पुरुषार्थः भूतिरैश्वर्यं विजयउत्कर्षः॥
१३ इतीत्थं देवैर्विज्ञापितो भगवानात्मभूः परमात्मनो जातो ब्रह्मा भृगवाद्यैः परिवृत्तो दैत्येश्वरस्याश्रमं प्रति ययौ १४ वल्मीकादिभिः प्रतिछन्नं तं दैत्यं प्रथ
मं हंसवाहनो ब्रह्मा न ददर्श तत श्चाथ श्वासतः पंचिद्विलसविस्मितः प्रहसन्तं प्राहेति द्वयोरन्वयः कथंभूतं विलक्ष्य पिपीलिकाभिराचीर्णमासमंताद्भक्षितं

मेदस्त्वक्च मांसं च शोणितं च यस्य १५ तपसा तपोनिना
लोकान्संतपंतं कमिव विलसाभ्रैः पिहितं छन्नं रविं यथा स्व
र्यमिव १६

१४

उक्तिमेवाह उत्तिष्ठेति हे काश्यप उत्तिष्ठोत्तिष्ठ ते तव भद्रं कुशलमभीष्टमिति यावत् भविष्यति यतस्त्वं तपसासिद्धः फलपर्यंततपःसंपन्नः अतएव च व
रदस्त्वभीष्टदोऽहमनुप्राप्तः अतईप्सितइष्टो वरो व्रियतां याच्यतां १७ तेतवैतद्धृत्सारं धैर्यमहदद्भुतमद्राक्षं दृष्टवानस्मि हि यस्माद्दंशैर्भक्षितोदेहोय
स्य तस्य प्राणा अस्थिषु शेरतेऽस्थीनि भित्त्वा यंतस्तिष्ठंतीत्यर्थः १८ पूर्वऋषयो भृग्वादयोपि नैवंविधं तपश्चक्रुः अपरेऽर्वाचीना न करिष्यंति किं पुनर्वक्तव्यं
को वै पुमान् देवमानेन शतं समा वर्षाणि निरंबुसन्नोदकं यथा तथा प्राणान् धारयेन्न कोपीत्यर्थः १९ हे दितिनंदन मनस्विभिरपि दुष्करेण तेनानेन
व्यवसायेनैव तावज्जितोहं तपोनिष्ठेन भवता तु सुतरां जितः २० यतोहं जितस्ततस्ते तुभ्यं हे असुरश्रेष्ठ सर्वा आशिषः इष्टार्थान् ददामि मर्त्यस्य मर

ब्रह्मोवाच॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोसि काश्यप वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः १७ अद्राक्षमहमेतत्ते हृत्सारं
महदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैवं पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे निरंबुर्धारयेत्प्राणान्को वै दिव्यस
माः शतं १९ व्यवसायेन तेनेन दुष्करेण मनस्विभिः तपोनिष्ठेन भवता जितोहं दितिनंदन २० ततस्त आशिषः सर्वा ददाम्य
सुरपुंगव मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं नाफलं मम २१ नारद उवाच॥ इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः कमंडलुजले
नौक्षद्दिव्येनामोघराधसा २२ स तत्कीचकवल्मीकात्सह ओजोबलान्वितः सर्वावयवसंपन्नो वज्रसंहननो युवा उत्थितस्त
प्तहेमाभो विभावसुरिवैधसः २३ स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितं ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः २४ ॥ ❖ ॥

णाधर्मवतस्तेऽतवामर्त्यस्य मदुक्तिस्य मम दर्शनमफलं साधनं न भवति किंतु सफलमेवेत्यर्थः २१ इतीत्थमुक्त्वा आदिदेवो ब्रह्माऽमोघराधसाऽमोघ
प्रभावेन दिव्येन कमंडलुजलेन पिपीलिकैर्भक्षितमंगं यस्य तं दैत्यं प्रोक्षित्वा सिक्तवान् २२ ततः प्रोक्षणादनंतरं कीचकाछन्नवल्मीकादेधसः काष्ठ
निचयाद्विभावसुरग्निरिव उत्थितः वल्मीकं भित्त्वा बहिर्निर्गत इत्यर्थः कथंभूतः सहसा प्राणबलेन ओजसा इंद्रियबलेन देहबलेन चान्वितः तथा सर्वै
रवयवैः पाणिपादादिभिः संपन्नो युक्तः वज्रवत्संहननमंगदार्ढ्यं यस्य सः युवा यौवनयुक्तः तप्तस्य हेम्न इवाभा यस्य सः तप्तसुवर्णतुल्यकांतिरित्यर्थः
२३ एवंविध उत्थाय अम्बरे हंसवाहनमवस्थितमधिष्ठितं देवं ब्रह्माणं निरीक्ष्य दृष्ट्वा तस्य ब्रह्मणो दर्शनेन महानुत्सवः संतोषो यस्य तादृशः शिरसा भूमौ ननाम

तत उत्थाय प्रांजलिः प्रह्वः नम्रः दृशा चक्षुषा विभुं ब्रह्माणं ईक्षमाणः हर्षेणाश्रूणि पुलकोद्भेदो रोमांचश्च यस्य तादृशः गद्गदया गिरा अगृणात् अस्तौषीत्
२५ तदेवाह नवभिः कल्पांत इति तान्नमस्कृत्वा ब्रह्माणमेव सर्वकारणं सर्वेश्वरं च मत्वा स्तौति यद्वा परमेश्वरधर्मारोपेण स्तौति कल्पांत इति कल्पांते दैनं-
दिनकल्पांते कालेन निमित्तेन सृष्टेनांधेन तमसा आवृतं इदं जगत् स्वरूपेण स्वयंज्योतिः स्वप्रकाशरूपः स्वरोचिषा ऽभिव्यनक् अभिव्यक्तमकरोत् तस्मै नमः इत्युत्त-
रेणान्वयः २६ यस्त्रिवृता सत्त्वादिशक्तित्रयवता आत्मना स्वेनैव इदं सृजत्यवति रक्षति लुंपति हरति च तस्मै रजआदिगुणत्रयस्य धाम्ने आश्रया-
य पराय सर्वोत्कृष्टाय महते भूरिगुणाय तुभ्यं नमः २७ यत एवमतः आद्याय बीजाय कारणकारणाय ज्ञानविज्ञानमूर्तये शास्त्रविवेकोत्थज्ञानगम्य

उत्थाय प्रांजलिः प्राह ईक्षमाणो दृशा विभुं हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् २५ दैत्येंद्र उवाच कल्पांते कालसृष्टेन
यो ऽन्धेन तमसावृतं अभिव्यनग्जगदिदं स्वयंज्योतिः स्वरोचिषा २६ आत्मना त्रिवृता चेदं सृजत्यवति लुंपति रजःसत्वतमोधा-
म्ने पराय महते नमः २७ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमी-
शिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानां चित्तस्य चित्तैर्मनइंद्रियाणां पतिर्महान्भूतगुणाशयेशः २९

मूर्तये प्राणो ऽसवः इंद्रियैर्मनसा बुद्ध्या विकारैः पृथिव्यादिभूतैश्च व्यक्तिं कार्यरूपतां ईयुषे प्राप्नुवते तुभ्यं नमः २८ एवं कार्यकारणरूपेणावस्थित-
त्वमुक्त्वा सर्वांतरात्मत्वमाह त्वमिति जगतो जंगमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे अंतरात्मतया नियमनधारकत्वमाह प्राणेन मुख्येन प्रा-
णेनोपलक्षितस्त्वमेव मुख्यप्राणनिर्वाहकस्त्वमेवेत्यर्थः अत एव प्रजानां पतिः यत एवमतः पर्यंतसकलेंद्रियधारकमुख्यप्राणनिर्वाहकस्तत एव
चित्तस्य चित्तैर्बुद्धेर्मनसः इंद्रियाणां च पतिः निर्वाहकः न केवलं घटादेर्भूतत्वादिव धारकः किंतु महाभूतानां गुणानां शब्दादिगुणग्राहकाणां इं-
द्रियाणामाशयस्यांतःकरणस्येशो ऽन्तः प्रविश्य पतिः यंतांतः प्रविश्य प्रशासनेन धारक इत्यर्थः २९ ॥ ॥ ॥

श्रंतरात्मत्वमेवप्रपंचयति सप्ततंतून् सप्तविधान् तंतून् तन्यंते विस्तार्यंत इति तंतवः वैदिकाः क्रियाः पशुसोमेष्टिसत्राग्निहोत्रहोमेष्टिविदग्निरूपेणसप्तविधास्तान्
यद्वा सप्तभिस्तंतं इति मत्वा तान् अध्वर्युहोतृप्रस्तोतृप्रतिहर्त्रोद्गातृब्रह्मयजमानैः सप्तभिर्वितन्यते इति वा सप्ततंतवः स्तान् सप्तसंस्था वा वितनोषि अंतरात्मतया प्रवर्तय
सि कया त्रय्या वेदत्रयेण कथंभूतया चतुर्होत्रकविद्यया चतुर्होत्रादिसंज्ञकमंत्रविद्यायुक्तया अनेन यज्ञादिकर्तृकत्वमंतरात्मत्वयोक्तं अथोपासनात्मकज्ञा
नप्रवर्तकत्वमाह आत्मवतां प्रशस्तमनस्कानां योगिनां त्वमेक एवात्मा अंतरात्मतया योगप्रवर्तक इति भावः त्वमेव सत्यादिवाक्यप्रतिपाद्यस्वरूप इत्याह अ
नादीति अनादिः कालतः परिच्छेदरहितः अनंतपारः अंतो देशतः परिच्छेदः पारो वस्तुतः परिच्छेदः तदुभयं यस्य नास्ति सोऽनंतपारः अनेनानंतशब्दार्थ उक्तः
कविः सर्वज्ञः अनेन ज्ञानशब्दार्थ उक्तः अंतरात्मांतर्व्याप्यगतविकारास्पृष्टो नियंता त्वमेवानेन सत्यशब्दार्थ उक्तः ३१ अथ कालांतरात्मतयात्रियंतृत्वमा

त्वं सप्ततंतून्वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपारः कविरंतरात्मा ३१ त्वमेव कालोऽनि
मिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ३२ त्वत्तः परं नापरम
प्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ३३ ॥श्रीरामचंद्रायनमः॥

ह त्वमेवेति अनिमिषः कालः कालशरीरकस्त्वन्निमेषेताऽत एव लवाद्यैः कालावयवैस्त्वमेव जनानामायुर्जीवनं क्षिणोषि ह्रपयसि त्वमेव कूटस्थः निर्विका
र आत्मा परमात्मा परमेष्ठी निरतिशयस्थानवर्त्यजः कर्मायत्तजन्मादिरहितः महानजश्चात्मेति श्रुत्यर्थोऽभिसंहितः कृत्स्नस्य जीवलोकस्य जीवः जीवयिता आ
त्मा त्वमेव को ह्येवान्यात्कः प्राण्यादिति श्रुत्यर्थोऽभिसंहितः ३२ किंबहुना यत्किंचिदेतच्चरमनेजत्स्थावरं त्वत्तः परमुत्कृष्टमपरं तुल्यं च नास्ति तथा व्य
तिरिक्तमत्वदात्मकं च नास्ति त्वत्तो पृथग्भूतं त्वदात्मकं च सर्वं चराचरं जगदित्यर्थः एवंरूपस्य तदात्मकत्वमुक्तमतो नाम्नस्तदात्मकत्वमाह विद्याः वेदाः क
लाउपवेदादयः सर्वे शरीरात्मकाः ते तव तनवः शरीरभूताः हिरण्यगर्भोऽसि हिरण्यात्मकं ब्रह्मांडगर्भो यस्य तथाभूतोऽसि हिरण्यगर्भः समवर्तताग्र इत्याद्युक्त
वेदप्रतिपाद्यस्वरूपोऽसीत्यर्थः स्वरूपेण गुणैश्च बृहत् त्रयाणां लोकानां पृष्ठः बहिर्भूतः परमव्योमनिलय इत्यर्थः ३३ ॥ ॥ ॥ ॥

१६

यदुक्तं कृत्स्नस्य तच्छरीरत्वं तस्य सर्वांतरात्मत्वं च तदुपसंहारेण मस्फुटयति द्वाभ्यां व्यक्तमिति हे विभो स्थूलं चिदचिदात्मकं इदं जगत् तव व्यक्तं शरीरं स्थूलं शरी
रं इत्यर्थः तर्हि किं सूक्ष्मशरीरं इत्यत्राह अव्यक्तः प्राकृतैरिंद्रियैरगम्यः आत्मा सर्वांतरात्मा जगत्कारणं पुरुषः एवंविधस्त्वं येन शरीरेण चतुर्मुखशरीरेण पार
मेष्ठ्ये स्थाने स्थितः इंद्रियादीनां गुणान् विषयान् शब्दादीन् भुंक्ते तत्सूक्ष्ममिति शेषः येन शरीरेण जीवानां इंद्रियादीन् स्रष्टा तद्व्यापारान् लीलार्थेन भुंक्ते
अनुभवसि तत्सूक्ष्मं शरीरं इत्यर्थः ३३ अनंतं त्रिविधपरिच्छेदरहितम् अतींद्रियं यत्स्वरूपं तेन अनंताव्यक्तरूपं येन अनंताव्यक्तरूपेण इदमखिलं जगत् अंतरात्मत्व
या ततं व्याप्तं तस्मै चिदचिच्छक्तिभ्यां कार्याणि प्रयुक्ताय पृथक्सिद्धस्वविशेषणभूताभ्यां चेतनाचेतनाभ्यां युक्ताय तच्छरीरकायेत्यर्थः भगवते पूर्णषाड्
गुण्याय तुभ्यं नमः ३४ एवं परमात्मत्वाभिमानेन तद्भावेन तदुपयुक्तत्वेन परमात्मावेशावतारं स्वं प्रसाद्य स्तुत्वाथ वरान् वृणुते यदीति

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ३३ अनंताव्य
क्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ३४ यदि दास्यस्यभिमतान् वरान्मे वरदोत्तम भूतेभ्यस्त्वद्विसृ
ष्टेभ्यो मृत्युर्माभून्मम प्रभो ३५ नांतर्बहिर्दिवानक्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ३६ व्यसुभिर्वासुम
द्भिर्वा सुरासुरमहोरगैः अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां ३७ सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोगप्रभावानां
यन्न रिष्यति कर्हिचित् ३८ इति श्रीभागवते महापुराणे सप्तमस्कंधे तृतीयोऽध्यायः ॥३॥ ॥श्री॥ ॥

हे वरदश्रेष्ठ यदि ममाभिमतान् वरान् दास्यसि तर्हि त्वत्सृष्टेभ्यो भूतेभ्यः सकाशान्मम मृत्युर्मरणं माभूदेव मनुष्यहारणेत्यर्थः विष्णोरपि चतुर्मुख
सृष्टत्वाभिमानेन त्वद्विसृष्टेभ्य इत्युक्तं ३५ तथांतः गृहादीनामंतस्तेभ्यो बहिः दिवाह्नि नक्तं रात्रौ वान्यस्मात् त्वत्सृष्टव्यतिरिक्तात्ततो प्यायुधैरपि भूमौ पृथि
व्यामंबरे चाकाशे मृगैर्नरैश्च व्यसुभिरप्राणैरसुमद्भिः प्राणवद्भिश्च सुरैरसुरैर्महोरगैर्महासर्पैश्च मम मृत्युर्माभूदित्येको वरः वरांतरं च याचते अप्रति
द्वंद्वतामिति युद्धे प्रतिद्वंद्वतां ममाप्रतिपद्यतां नामयं द्वितीयः देहिनां प्रजानां एकपत्यं एकाधिपतित्वमयं तृतीयो वरः ३७ तथा आत्मनो मम सर्वेषां लोक
पालानां इंद्रादीनां महिमानमयं चतुर्थः किंच तपसा योगेन च प्रभावो येषां तेषां योगिनां यन्न रिष्यति न नश्यति अणिमाद्यैश्वर्यं तद्देहीति शेषः
पंचमो यं वरः ३८ इतिसप्तमस्कंधे तृतीयोः ॥३॥ ॥श्री॥ ॥

१६

एवं दैत्येनह त्रीनवरानददौ ब्रह्मेत्याह भगवान्नारदः एवं इति एवं इष्टं वृतो याचितः शतधृतिर्ब्रह्मा हिरण्यकशिपोस्तपसा तोषितः तस्य सुदुर्लभान्वरान्प्रादात् १ दत्तेदमाह ब्रह्मेत्याह हे तात ममम तः यान्वरान्वृणीषे ते इमे मे वराः पुंसो यद्यपि दुर्लभाः तथापि दुर्लभान पि तान्वरानेनं ग हे हिरण्यकशिपो तुभ्यं वितरामि दत्तवान्मानस्मा मीप्सितं दत्तवान्स्मि त्यर्थः २ एवमुक्त्वा ऽमोघः सत्योनुग्रहो यस्य स विभुर्भगवान्ब्रह्मा ऽसुरवर्येण पूजितः प्रजेश्वरैर्मरीच्यादिभिः स्तूयमानः स्वस्थानं जगाम ३ एवं लब्धवरो येन स दैत्यः हिरण्यवत्प्रकाशवहुलं देहं बिभ्राणो भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतं तस्मरन्भगवतं द्वेषम हितं भगवति द्वेषमकरोत् ४ तदेव प्रपंचयितुमुपोद्घातमाह स इत्यादिना स महासुरो हिरण्यकशिपुः त्रीन्लोकान्सर्वा दिशश्च विजित्य तथा देवादीन्सर्वसत्वपतीन्सर्वभूताध्यक्षांश्च जित्वा वशमानीय विश्वजिद्भव लोकपालानां तेजसा सह स्थानानि जहार अपहृतवान् ५ देवोद्यानं च जहारेत्यनुषंगः श्रिया सर्वसमृद्ध्या जुष्टं युक्तं त्रिविष्टपं स्वर्गं मध्यास्ते स्माधिष्ठितवान् अधिशिङ्स्थासां कर्मेति कर्मत्वं विश्वकर्मणा निर्मितत्रैलोक्यलक्ष्म्या आयतनमाश्रयं भोग्यभूतोपकरणादि सर्वसमृद्धिमन्महेंद्रस्य भवनं साक्षात्स्वयमध्युवास ८ महेंद्रभवनं विशिनष्टि यत्र भवने विद्रुममयाः सोपानाः भुवः स्थानि वेदिकादीन्महामरकताः इंद्रनीलमया यत्र भवने स्फटिकमया नि कुड्यानि भित्तयः यत्र वैडूर्यमणिमयस्तंभपंक्तयः संति ९ यत्र च वितानानि चित्रकाविस्ताराणि पद्मरागरत्नमयान्यासनानि च प

श्रीनारद उवाच एवं वृतः शतधृतिर्हिरण्यकशिपो रथः प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मोवाच॥ तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् २ नारद उवाच ततो जगाम भगवानमोघानुग्रहो विभुः पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा न्लोकांश्च त्रीन्महासुरः देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ६ सर्वसत्वपतीन्जित्वा वशमानीय विश्वजित् जहार लोकपालानां स्थानानि सह तेजसा ७ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्र विद्रुमसोपाना महामारकता भुवः यत्र स्फटिककुड्यानि वैडूर्यस्तंभपंक्तयः ९ यत्र चित्रवितानानि पद्मरागासनानि च पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः १०

सं॰ ७ हिरण्यकशिपोर्वरलाभः [illegible]

[illegible] १०

१०

यत्र चेदेव्यः देवानां संबंधिन्यः सुदत्यः स्त्रियः कूजद्भिर्ध्वनद्भिर्नूपुरैस्तत्र तत्र शब्दयंत्यः प्रांतं कुर्वंत्यः रत्नस्थलेषु सुंदरं स्वीयं मुखं पश्यंति ११ तस्मिन्ने
वं भूते महेंद्रस्य भवने धिवसन्नयावलः महामना महात्मा समर्थः कल्पः अत एव निर्जितः लोको येन स्वयमेक एव राजा जितमधिकं चंडं नाथं के शासनं यस्य
तः प्रतापितैः सुरादिभिर्वंद्यांघ्रियुग्मस्तादृशो रेमे १२ अंग हे युधिष्ठिर उरुगंधिना गंधेन मधुना सुरया मत्तं मत्त एव विवृत्ते विघूर्णिते ताम्रे ऽक्षिणी य
स्य त्रयो योगस्य बलस्य देहबलस्य ओजस इंद्रियबलस्य च परमाश्रयं तं दैत्यं त्रिभिर्विना ब्रह्मविष्णुशिव विना ऽन्ये सर्वे उपायनयज्ञाद्यं तद्युक्तपाणि
भिरुपासत उपासितवंतः १३ उपासनाप्रकारमेवाह चतुर्भिः जगुरिति ओजसा स्वबलेन महेंद्रस्यासनमास्थितमधिष्ठितं तं दैत्यं विश्वावसुस्तुंबरुश्च

कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं ११ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलो
क एकराट् रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्राक्षम
शेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदं १३ जगुर्महेंद्रासनमोजसा स्थितं विश्वाव
सुस्तुंबुरुरस्मदादयः गंधर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्च पांडव १४ स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षि
णैः ईजमानो हविर्भागानग्रहीत्स्वेन तेजसा १५ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही तथा कामदुघा द्यौस्तु नानाश्च
र्यपदं नभः १६ रत्नाकराश्च रत्नौघांस्तस्य स्यूहुः सहोर्मिभिः क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः १७ ॥ ॥ ॥

इत्यादयश्च जगुः गानं चक्रुः तद्गुणान् जगुरित्यर्थः गंधर्वाः सिद्धा ऋषयश्च विद्याधरा अप्सरसश्च मुहुर्मुहुरस्तुवन् हे पांडव १४ स एवासुरः वर्णाश्रमि
भिर्दत्ताभिर्दक्षिणाभिर्भूरिदक्षिणा येषु तैः क्रतुभिः इज्यमानो आराध्यमानः स्वबलेन हविर्भागानग्रहीत १५ तस्यासुरस्य संबंधिनी या सप्तद्वीप
युक्ता पृथ्वी अकृष्टपच्या कर्षणेन विना फलितस्याभवत् तथा द्यौः स्वर्गाभिमानिनी देवता यथाकर्म यथेष्टं दोग्धी यथा भूरयतीति तथाऽभवत् तथा न
भः अंतरिक्षाभिमानी देवता नानाश्चर्यमयं विविधविचित्रवस्तुप्रदमभवत् १६ रत्नाकराः समुद्रा नत्स्रोतो गंगादिनद्यश्च ऊर्मिभिस्तरंगैः रत्न
समूहान् ऊहुः आपयामासुः रत्नाकरानेवाह क्षारेति सिंधुसुराक्षौद्रमिक्षुरसः अमृतं शुद्धं क्षारादिमया समुदकानियें नाते क्रतो त्र न विवक्षितः

९

१७

शैलः पर्वतः ज्ञातमिप्रायेणैकवचनं द्रोणीभिः कंदरैर्द्रुमान्दधार कथंभूतान् सर्वर्त्तुषु वसंतादिषट्सु सर्वेष्वपि स्वे गुणाः फलपुष्पादयो येषां तानाक्रीडान्
क्रीडास्थानानि वपुः क्षमा सर्वर्त्तुषु सर्वान् रत्नादीन् समस्तपुष्पानेव दधारेत्यर्थः तदेव स्पष्टयति लोकपालानां तदाधिपत्यवेलायामित्यर्थः एको द्रुमः वसंतादिका-
ल नियमेन पृथक्पृथग्गुणान्फलपुष्पादीन्दधार तस्याधिपत्येऽनियतकालं सर्वान्गुणान्दधारेत्यर्थः यद्वा यमसुरादय एव सर्वेषां लोकपालानां पृथग्गुणा-
न्निति नियमान्गुणान्दधार सर्वेषामाधिपत्यमेक एव चकारेत्यर्थः १८ इत्थं निर्जिताः ककुभो दिशो येन स दैत्य एक एव राजा सम्यग्यथोपजोषं यथाप्रीति प्रि-
यानिष्टान्विषयाननुभवन्नपि नात्यतृप्यत् न तृप्तवान्यतोऽजितेंद्रियः १९ इत्थमैश्वर्येण मत्तस्यात एव दृप्तस्यात एव च उच्छास्त्रवर्तिनः वैदिकमा-
र्गाननुवर्तिनः उत एव प्रतिबंधस्येत्यर्थः ब्रह्मशापं सनकादीनां शापं उपेयुषः प्राप्तवतः महान्कालः बहुवर्षात्मकः कालः व्यतीयाय अतिक्रांतोऽभूत् ब्रह्म-
शापमुपेयुष इत्यनेन तज्जन्मावसानकालः प्राप्त इति सूच्यते २० तदेव तत्कृतनिमित्तं भावदाह तस्य दैत्यस्योग्रदंडेनोग्रशासनेन संविग्ना भी-

शैले द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः दधार लोकपालानामेक एव पृथग्गुणान् १८ स इत्थं निर्जितककुबेकराड्विषया-
न्प्रियान् यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः कालो महान्व्यतीयाय ब्रह्मशा-
पमुपेयुषः २० तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्मै नमोस्तु काष्ठायै यत्रा-
त्मा हरिरीश्वरः यद्गत्वा न निवर्तंते शांताः संन्यासिनोऽमलाः २२

ताः सपालकाः सर्वे लोका अन्यत्रालब्धं शरणं निवासस्थानं यैस्तेऽच्यु-
तं भगवंतं शरणं ययुः प्राप्ताः अन्यत्रालब्धशरणा इत्यस्यानन्यरक्षका इति वा येः पूर्वं दैत्यतपः पीडितास्तदुपशमनाय ब्रह्माणं शरणमुपगम्य वरप्रदा-
पनेनमस्यानिष्टमेव चक्रुः पुनरेतदनिष्टपरिहाराय ब्रह्मणाऽपि कर्तुमशक्य इत्यालोच्यानन्यशरणा भगवंतमेव शरणं ययुरित्यर्थः २१ शरणाचरणप्र-
कारमेवाह तस्मा इति तस्यै काष्ठायै दिशे नमः काष्ठां विशिनष्टि यत्र यस्यां काष्ठायामीश्वरः सर्वनियंता हरिराश्रितार्त्तिहरो भगवानास्ते शांता रागादिर-
हिता अत एव प्रहृताः कृतार्थाः संन्यासिनो मायविद्याविदः यतयो यां च काष्ठां गत्वा प्राप्य न निवर्तंते न पुनः संसरंति तस्यै नम इति यस्यां दिशि प्रणता-
र्त्तिहरो भगवानास्ते तद्दिगधीनोऽस्माकं रक्षणोपाय इत्यध्यवसायपूर्वकं भगवंतं शरणं ययुः काष्ठायै नम इति दिक्शरणावरणकथनेन देवानामपि
भगवतः स्वरूपं दुरवगाह्यमिति सूचितं २२ ॥ ॥श्री॥ ॥

इतीत्थं देवाः संयतात्मानः सर्वभगवान्नरहरिर्भविष्यतीति विस्रंभयुक्तमनसः समाहितधियः यद्वा संयतात्मान इति वा सेंद्रियजययुक्ताः समाहितधिय
इत्यनेनांतरिंद्रियजयः वायुभोजना इत्यनेन प्राणजयः विनिद्रा इत्यनेन कायजयः एवंविधा हृषीकेशं उपतस्थुः तुष्टुवुः वक्ष्यमाणमंत्रेणेत्युर्वी २३ भगव
ते षाड्गुण्यपूर्णाय पुरुषाय सर्वांतरात्मने महानुकंपायुक्त आत्मा मनो यस्य तस्मै विशुद्धज्ञानानुभवो ज्ञानमानंदः सुखं तयोः संदोहः पूरः तद्रूपाय यय
तो यस्मात्सामर्थ्यादाश्रितानामभयं तस्मै नमः २४ तेषां देवानामेवमुपतिष्ठतां वाणी प्रादुः आविरभूत् तैः श्रुतेत्यर्थः कथंभूता रूपाद्दृष्टवक्त्र
का मेघनिःस्वना मेघघोषतुल्या ककुभो दिशः संनादयंती प्रतिध्वनयंती साधूनामभयंकरी २५ वाणीमेवाह मैति हे विबुधश्रेष्ठाः यूयं माभैष्टभ
यमाकुरुत वो युष्माकं सर्वेषां भद्रं सुखमेवाऽस्तु हि यस्मान्मद्दर्शनं कटाक्षः भूतानां श्रेयसे उपपत्तये प्राप्तये भवति २६ दैतेयाधमस्य तस्याहि

इति ते संयतात्मानः समाहितधियोऽमलाः उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः २३ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने
विशुद्धज्ञानानुभवानंदसंदोहाय यतोऽभयं २४ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना संनादयंती ककुभः साधूनामभयंकरी २५ हरि
रुवाच माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये २६ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत्
तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत २७ यदि देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु विनश्यति
२८ निर्वैराय प्रशांताय स्वसुताय महात्मने प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितं २९ नारद उवाच इत्युक्ता लोकगुरुणा तं प्रण
म्य दिवौकसः न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतं ३०

हिरण्यकशिपोर्यद्दौरात्म्यं तन्मया ज्ञातं विदितमेव तस्य दैत्यस्य शांतिं वधं करिष्यामि तत्का
लं तावत्प्रतीक्षत किंचित्कालविलंबं सहध्वं इत्यर्थः २७ कोऽसौ तद्वधोचितः कालस्तत्राह यदेति यस्मिन्काले देवादिषु तस्य नितरां द्वेषस्तदा स
आशु विनश्यति २८ ननु देवादिषु विद्वेषिणस्तस्य नाशः ब्रह्मवरेणोर्जितत्वादित्यत्राह निर्वैरायेति यदा प्रह्लादाय द्रुह्येत्तदा वरैरूर्जितमपि हनिष्ये क
थंभूताय अहमेवात्मा यस्य समदात्मा मतिर्यस्य तस्मै निर्वैराय सर्वभूतसुहृदे प्रशांताय रागादिरहिताय स्वस्यात्मजाय तेऽतिशयप्रियाय यदा द्रोहं करिष्य
ति तदाशु हनिष्यामि मद्भक्तविषयापराधस्य ममातितरामसह्यत्वादिति भावः २९ इतीत्थं लोकगुरुणा भगवता उक्ता दिवौकसो देवा भगवंतं प्रणम्य गतो
द्वेगाः गतउद्वेगो भयं येषां तादृशाः संतो न्यवर्तंत भगवद्वचसि स्थिता इति शेषः असुरं हिरण्यकशिपुं हतप्रायं च मेनिरेऽमन्यंत ३० ॥श्रीरामायनमः॥

तस्य पूर्वमेव विप्रशापमुपेयुषः उचितं काले हरिण्यामीनाये वं विध भगवत्वं कस्य विषयस्य दैत्यपतेर्हिरण्यकशिपोः परमाद्भुताश्चत्वारः प्रल्हादानुल्हादसंल्हादल्हा
दाख्याः पुत्रास्तेषां मध्ये प्रल्हादो गुणैरन्यो भ्रातृभिर्महान्श्रेष्ठोऽभूत महात्मा वहैर्गुणैः तेषां विशिनष्टि महतां भागवतानां उपासकः भागवतभक्तिपर्यंतभगवद्भक्ति
निष्ठः इयमेव भगवद्भक्तेऽपराकाष्ठेति भावः ३१ ब्रह्मण्यादि ब्राह्मणानुकूलेषु साधुरनुकूलो ब्रह्मण्यः यद्वा ब्रह्मणि परस्मिन्निरतः साधुः शीलेन सुलभावसद्वृत्त
नकेन युक्तः सत्यसंधः सत्यप्रतिज्ञः जितानीन्द्रियाणि येन सर्वभूतानामात्मवत् आत्मवदेव एकस्याधारणः प्रियतमः सुहृत्तमः च प्रियसुहृ
त्तमः आत्मा यथा प्रियतमः स्वहितैषी च तद्वदयमपि सर्वभूतविषयकप्रीतियुक्तस्तद्धितैषीत्यर्थः ३२ दासवत्सम्यक्प्रतानमस्कृता आर्याणां महता
मंघ्रयो येन पितृवद्दीनेषु वात्सल्ययुक्तः भ्रातृवत्सदृशेषु समतुल्येषु स्निग्धोनुरागयुक्तः गुरुषु ईश्वरत्वेन भावना दृष्टिर्यस्य ३३ विद्यादिभिर्हेतुभि

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः प्रल्हादोऽभूत्महांस्तेषां गुणैर्महदुपासकः ३१ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेंद्रियः आत्म
वत्सर्वभूतानामेकः प्रियसुहृत्तमः ३२ दासवत्सन्नतार्यांघ्रिः पितृवद्दीनवत्सलः भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः विद्यार्थरू
पजन्माढ्यो मानस्तंभविवर्जितः ३३ नोद्विग्नचित्तो व्यसनेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् दांतेंद्रियप्राणशरीरधीः सदा प्रशांतका
मो रहितासुरोऽसुरः ३४ यस्मिन्महद्गुणा राजन गृह्यंते कविभिर्मुहुः नतेऽधुनापिधीयंते यथा भगवतीश्वरे ३५ ॥ ॥छ॥ ॥

र्यो भिमानो गर्वो दंभस्तंभस्ताभ्यां विवर्जितः तत्रार्थो वित्तं रूपं सौंदर्यं जन्माभिजात्यं आदिशब्दः प्रकारार्थः विद्यादिसदृशमन्यदपि मानादिनिमित्तं विवक्षितं ३४ व्यस
नेषु दुःखहेतुषु नोद्विग्नमप्रजितं चित्तं यस्य दृष्टेष्वैहिकेषु श्रुतेष्वामुष्मिकेषु च स्वर्गस्त्र्यादिषु गुणेषु विषयेष्ववस्तुदृक् अनित्यबुद्धियुक्तो नत एव तेषु स्पृहारहितः सदा
दांताः नियमनेन वशीकृता इंद्रियादयो यस्य प्रशांताः कामा यस्य निस्पृह इत्यनेन संनिहितेषु विषयेषु इच्छाराहित्यं उक्तं प्रशांतकाम इत्यनेन त्वसंनिहितेष्वपि सेता
नपेनरुक्तं असुरोपि आसुर्या आसुरभावरहितः ३५ हे राजन यस्मिन्प्रल्हादे गुणा उक्ता वक्ष्यमाणाश्च कविभिर्मुहुर्महद्यथा भवति तथा गृह्यंते वहु
मान्यंते इत्यर्थः महदिति क्रियाविशेषणं समानाधिकरणं हरिस्मात्वापतिः महतः प्रल्हादस्य गुणा इत्यर्थे यस्मिन्नित्यनेन यो नरूत्सा
पतिः महतां गुणा इति वा ते गुणा अद्यापि नापिधीयंते न तिरोहिता भवंति न विस्मृता भवंतीति यावत् यथा भगवतीश्वरे गुणाऽद्यः पुनः पुनः कविभिर्गृह्यं

देवस्य युधिष्ठिर साधुगाथासु प्रसंगावसरे सदसि सभायां रिपवः शत्रवोपि यं प्रल्हादं प्रतिमानं साधनत्वे दृष्टांतं कुर्वंति किं पुनर्भवादृशा अमे प्रतिमानं कुर्व
तीति ३० मया केवलमसंख्येयैर्गुणैस्तस्य महात्म्यं सूच्यते न साकल्येन तद्गुणा वर्णयितुं शक्या इति भावः अलमिति पावधिकं तस्य महात्म्यं सूच्यते म
यादि दृष्टमात्रं गुणप्रदर्शनेन महात्म्यं सूच्यते न त्वेतावत्तस्य महात्म्यं इत्युच्यते इत्यर्थः अपारमहात्म्ये हेतुं वदन्विशिनष्टि वासुदेव इति यस्य प्रल्हाद
स्य वासुदेवे भगवति नैसर्गिकी स्वाभाविकी उत्पत्तिसिद्धेत्यर्थः रतिः स्वभावतो वासुदेवे रतानां तस्येवानंतं महात्म्यं इति भावः ३८ नैसर्गिकलिंगानि
वदन्विशिनष्टि न्यस्तेत्यादि षड्भिः बाल एव बाल्यात्प्रभृतीत्यर्थः तन्मनस्कतया भगवद्गतहृदयत्वेन न्यस्तक्रीडनकस्त्यक्तबालक्रीडनकः श्री
कृष्ण एव ग्रहस्तेन गृहीत आत्मा मनो यस्य ग्रहगृहीतवदुन्मान इत्यर्थः अत एव जगदीदृशं न वेद बाह्यवस्तुविषयकचिंतारहित इत्यर्थः ३९

सं साधुगाथासदसि रिपवोपि सुरा नृप प्रतिमानं प्रकुर्वंति किमुतान्ये भवादृशाः ३७ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते वासु
देवे भगवति यस्य नैसर्गिकी रतिः ३८ न्यस्तक्रीडनको बालो जडवत्तन्मनस्कतया कृष्णग्रहगृहीतात्मा न वेद जगदीदृशं ३९ आसी
नः संविशन्नश्नन् शयानः प्रपिबन्ब्रुवन् नानुसंधत्त एतानि गोविंदपरिरंभितः ४० क्वचिद्रुदति वैकुंठचिंताशबलचेतनः क्वचिद्धस
ति तच्चिंताल्हाद उद्गायति क्वचित् ४१ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् क्वचित्तद्भावनायुक्तस्तन्मयोनुचकार ह ४२ क्व
चिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४३

एतदेव प्रपंचयति आसीन इति आसनाद्यव-
स्थावस्थितोप्येतान्यासनादीन्नानुसंधत्ते नानुसंहितवान् तत्र हेतुर्यतो गोविंदेन भगवता परिरंभितः संश्लिष्टः गोविंदानुसंधानतत्परिरंभविस्मृ
तदेहधर्म इत्यर्थः ४० क्वचिद्गोविंदानुसंधानविच्छेददशायां रुदति रोदिति आर्यत्वाद्वचनलुक् गोविंदचिंतया शबला व्याप्ता आक्षुभिता वा बुद्धिर्यस्य
सा दृशाः क्वचिद्धसति तच्चिंतया आल्हादो यस्य तादृशः उच्चैर्गायति गोविंदगुणानिति शेषः ४१ क्वचित्तच्चिंताल्हाद एव नदति ध्वनति क्वचिदुत्कंठः
कंठोपरि व्याप्तहर्षः विगतलज्जो नृत्यति उत्कंठामुत्क्रांतकंठः सन् ध्वनतीति वा क्वचित्तद्भावनया भगवदनुस्मृत्या युक्तस्तन्मयः तदात्मकः स्वात्मानं नर
हर्यादिरूपत्वेन दृश्यन्नपि तदपि तदनुसंधानेन विस्मरत्स्वतद्रूपताभिमानेनानुचकारानुकरोति भगवान् इव चेष्टत इत्यर्थः ४२ क्वचिच्च संस्पर्शेना
विच्छिन्नेनानुध्यानेन निर्वृतः सुखितः अस्पंदः स्थिरो यः प्रणयः स्नेहः तेन यः आनंदस्तेन यत्सलिलं तेनामीलिते ईषन्मीलिते ईक्षणे यस्य स उत्पुलकः उ
ग्म

सयत्नाद्दत्त्वाकिंचनसंगेनेति यावत्तत्केनेदंतेनलब्धयोत्तमश्लोकस्यभगवतःपदारविंदयोर्निषेवयामुहुर्मुहुरात्मनःस्वस्यपरांनिर्वृतिमानंदं वितन्वन्नेवमनइत्यार्थता
दुःसंगदीनंवघातकृतंवदं यद्वा ततएवसविशेषणमस्याविसमासःविषयासंगेनदीनस्यमनसःशममुपशांतिंरागादिराहित्यंव्यधाच्चक्रे दुःसंगदीनस्येतिविशेषणेनलोके
प्रसिद्धतिकृतंनतुतस्यकदाचिदपिविषयासक्तमनस्त्वमितिभावः ४४ हेराजन् तस्मिन्नेवंभूतेमहाभागवतश्रेष्ठेमहाविवेकिनिमहात्मस्युक्तविधमहात्मेत
आत्मजेहिरण्यकशिपुरघंद्रोहमकरोत् ४५ एवंविधस्यद्रोहानर्हस्यशंकयापृच्छति युधिष्ठिरः देवर्षइतिसार्द्धैस्त्रिभिः हेदेवर्षे एतद्वेदितुंज्ञातुंइच्छामः
किंतद्धेसुव्रत शुद्धायनिरवद्यायसाधवेमहाभागवतायतत्राप्यात्मजायअनेनद्रोहानर्हविषयत्वमुक्तं पितेत्यनेनद्रोग्धृत्वानर्हत्वं अघंद्रोहमधाच्चक्रे
इत्यनेदुक्तविशेषणात्मव्यर्थमेवविषदयति ४६ पुत्रेष्विति प्रतिकूलेषुपुत्रेषुविषयभूतेषुस्वपुत्रवत्सलाःपितरःशिक्षार्थंकेवलमुपालभंतेत्रा

स उत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनस्यमनःशमंव्यधात् ४४ तस्मिन्म
हाभागवतेमहाभागेमहात्मनि हिरण्यकशिपूराजन्नकरोदघमात्मजे ४५ युधिष्ठिरउवाच देवर्षएतदिच्छामोवेदितुंतवसुव्रत यदात्म
जायशुद्धायपिताऽदात्साधवेह्यघं ४६ पुत्रान्विप्रतिकूलान्स्वान्पितरःपुत्रवत्सलाः उपालभंतेशिक्षार्थंनैवाघमपरोयथा किमु
तानुवशान्साधूंस्तादृशान्गुरुदेवतान् ४७ एतत्कौतूहलंब्रह्मन्नस्माकंविधमप्रभोः पितुःपुत्रायविद्वेषोमरणायप्रयोजितः ४८ ॥७॥
इतिश्रीभा०सप्तमस्कंधेचतुर्थोध्यायः ४ श्रीनारदउवाच पौरोहित्यायभगवान्वृतःकाव्यःकिलासुरैः शंडामर्कौसुतौतस्यदैत्यराजगृहांति

क्षिपंति अपरेयथाशत्रवस्तद्वद्रोहंनैवकुर्वंतिप्रतिकूलानपिपुत्रान्केवलंशिक्षार्थंउपालभंतेनतेभ्योद्रुह्यंति किंपुनरनुकूलान्साधून्गुरुःपितेव
देवतंयेषांतानुपालभंतेभ्योद्रुह्यंतिभावः ४७ अतोहेब्रह्मन्नस्माकमेतत्कौतूहलंएततप्रश्नकौतूहलंमिविधमापनयहेप्रभो पुत्रायपितुर्द्वेषःम
रणायपितुर्मरणायप्रयोजितः प्रयोजकोभवेदितियदेतत्प्रश्नकौतूहलमित्यन्वयः पुत्रविषयकद्वेषःस्वस्यैवमरणप्रयोजकःकथमभूत
इत्येवंविधप्रश्नकौतूहलंविधमेत्यर्थः ४८ इतिसप्तमस्कंधेचतुर्थोध्यायः ४ एवमापृष्टस्तद्वेषनिमित्तंःतदुक्तंतावदुपोद्घातमाह देवर्षिःपौरोहित्याये
त्यादिना भगवान्काव्यःशुक्रःपौरोहित्यायपुरोहितकर्मकर्तुंमसुरैर्वृतःकिलेतिप्रसिद्धिद्योतनार्थः तस्यकाव्यस्यसुतौशंडामर्कौदैत्यराजस्यहिर
ण्यकशिपोर्गृहसमीपस्थावास्तांइतिशेषः १

तौ च शंडामर्कौ दैत्यराजेन नीतिशास्त्रपठनार्थं प्रल्हादमन्यांश्चासुरबालकांश्च पाठ्यान् दंडनीत्यादीन् पाठयामासतुः पठनं कारितवंतौ अत्र नयकोविदं इ-
ति त्रि...विशेषणं यथा नयकोविदा नीतिशास्त्रनिपुणा भवंति तथा पाठयामासतुरिति २ तत्रैवं स्थिते प्रल्हादो यद्गुरुणा प्रोक्तं तच्छुश्रुवे श्रुतवान् अनुपठि-
तवांश्च परं तु तत्प्रोक्तं मनसा साधु यथा न तथा न मेने तत्र हेतुं वदन् प्रोक्तं विशिनष्टि स्वपरासद्ग्रहाश्रयं यत्र स्वः स्वकीयो मित्रम् अयं परः शत्रुरित्येवं
रूपो योऽसद्ग्रहः दुष्टाग्रहरूपोऽभिमानस्तस्याश्रयं हेतुभूतं ३ एवं स्थिते हे पांडव कदाचिदसुरराट् पुत्रं प्रल्हादमंकमारोप्योत्संगे निधाय हे वत्स
पुत्र भवानाचार्येभ्यो लेभे यत्साधु मन्यते तत्कथ्यतामित्येवं पप्रच्छ ४ एवं दैत्येन पृष्टः प्रल्हादस्तमाह तदिति केन हे असुरवर्य दैत्यराज असद्ग्रहात्मा-
भिमानरूपतत्त्वाभिमानतन्मात्रलक्षणाद्वा विषयाभिनिवेशरूपादसद्ग्रहाद्धेतोः सदा नित्यं समुद्विग्ना नितरां भीता धीर्येषां देहिनां देहधारिणामात्मपा-

तौ राज्ञा प्रापितं बालं प्रल्हादं नयकोविदं पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेनुपपाठ च न साधु
मनसा मेने स्वपरासद्ग्रहाश्रयं ३ एकदाऽसुरराट् पुत्रमंकमारोप्य पांडव पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ४ प्रल्हाद उवाच
तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ५ नारद उवाच श्रुत्वा
पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ६ सम्यग् विधार्यतां बालो गुरुगेहे द्विजातिभिः विष्णुपक्षैः
प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ७

तं पतंत्यनेनेति पातः आत्मनः अधःपतनहेतुमंधकूपतुल्यं गृहं त्यक्त्वा वनमरण्यं प्रविष्टो हरिमाश्रितवें यद्धरं भ-
गवंतमाश्रयेतेति यत्तदेव साधु मन्ये इति हित्वेति पदेन हेयसंक्षेपः हरिमाश्रयेतेत्यनेन उपादेयत्वतदनुष्ठानसंक्षेपः वनं गत इति विविक्तदेशो-
पलक्षणं इति ५ एवमुक्तो दैत्यराजः किमाहेत्याह देवर्षिः श्रुत्वेति परपक्षसमाहितः परपक्षे विष्णौ समाहिताः परिनिष्ठिताः पुत्रस्य प्रल्हाद-
स्य गिरः श्रुत्वा दैत्यो जहास हासपूर्वकं नु वा चेत्यर्थः तदेवाह बालानां बुद्धिः परबुद्धिभिः परस्मिन् शत्रौ विष्णौ बुद्धिर्येषां तैर्भिद्यतेऽन्यथा क्रि-
यते विपरीता क्रियत इत्यर्थः ६ न त्वेनं गुरुगेहे प्रतिच्छन्नैर्विष्णुपक्षैः द्विजातिभिः ब्राह्मणैरयं बालः भिद्यते विपरीतबुद्धिः क्रियतेऽतोस्य बालस्य बु-
द्धिर्यथा न भिद्येत तथा सम्यग् विचार्यतां इति धार्यतां इत्यर्थः ७ ॥:॥ ॥

एवं स्वपरविभागहेतुभूतदेहात्माभिमानो भगवन्मायाहेतुकत्वकथनेन तद्धरणान्निवृत्तिकथनेन च भगवत एव ज्ञानप्रदत्वं तन्निवर्त्तकत्वं चोक्तं अथ ज्ञा
नप्रदातारमपि तमेवेत्याह स इति स उक्तविध एष आत्मा प्रकृतः परमात्मा स्वपरत्वबुद्धिः स्वपर इति बुद्धिरहितैः सर्वान्तरात्मतया सर्वत्र समत्वादित्यर्थः
दुरत्ययं दुरूहं अन्तरेण घटमानं अनुक्रमणं व्यापारो यस्य तादृशो निरूप्यते अन्वेषणे असर्वसर्वशक्तिलीलया करोतीत्यर्थः यस्य वर्त्मनि मार्गे यत्स्वरू
पे विमर्शेन वेदवादिनो ब्रह्मादयोऽपि मुह्यन्ति स एष एव परमात्मा मम मतिं बुद्धिं भिनत्ति इत्यर्थः स्वपरेत्यबुद्धिभिरिति अनेन देवासुरादिविभागमन्तरेण सर्वे
षां ज्ञानप्रदत्वमुक्तं दुरत्ययानुक्रमण इत्यनेन सर्वशक्तित्वं वैषम्यादिराहित्यं चोक्तं स्वपरेत्यबुद्धिभिरिति तृतीयं तमपि पाठान्तरं तत्र स्वः पर इति न
विद्यते बुद्धिर्येषां तैः स्वपरविभागात्मकविवेकरहितैरित्यर्थः तादृशैर्दुरत्ययानुक्रमणः अनितरसाधारणव्यापारो निरूप्यते ज्ञायत इत्यर्थः ननु प्रमा

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे
मतिं १३ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसंनिधौ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया १४ नारद उवाच
एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः तं निर्भर्त्स्याथ कुपितः सदीनो राजसेवकः १५ ॥ ॥श्री॥ ॥

दान्निवृत्ते देहात्माभिमानादिभिर्ज्ञानाज्ज्ञानप्रदत्वेन परमात्मा ज्ञायत इत्यर्थः १३ एवं ज्ञानप्रदत्वमुक्तमथ तस्यैव तत्प्रदानेन स्वस्य प्रवर्त्तकत्वमाह
यथेति आकर्षसंनिधौ अयस्कान्तसंनिधाने ऽयो लोहं स्वयमेव यथा भ्रमति भ्राम्यति चञ्चलं भवतीत्यर्थः तथा मम चेतोऽपि चक्रपाणेर्यस्तस्य
रः संनिधौ यदृच्छया हेत्वन्तरनिरपेक्षं भिद्यते तत्प्रसादाद्यतत् तत्सान्निध्यादेव मम मे वं विधा बुद्धिवृत्तिरभूदित्यर्थः अनेन बुद्धिभेदः परकृत उताहो
ऽस्वतोऽभवदिति प्रश्नस्योत्तरमुक्तं भवति १४ एवमुक्तो गुरुराहेत्याह मुनिः एतावदिति ब्राह्मणान्दैत्ययाजकान्प्रत्येवं एतावदेवोक्त्वा महामतिः
प्रह्लादः विरराम तूष्णीं बभूव ततो दीनः उपायान्तरेण तं स्ववशीकर्तुमशक्तः गुरुः संनिर्भर्त्स्य कुपितः सन् राजसेवक उवाचेति शेषः १५ ॥ ॥

तदेवाह आनीयतामिति द्वाभ्यां अरे इति हे राजभटेत्यर्थः वेत्रं प्रहरणसाधनयष्टिविशेषमानीयतामस्माकमयशः अपकीर्त्तिकरो इत्यर्थः यशस्कृन्न स्यात ए
वकुलस्य दैत्यकुलस्याङ्गारवन्नाशकस्य दुर्बुद्धेरिति: परं दमः शिक्षणोपायः चतुर्थ एवास्य दंड एवोपायः कर्त्तव्यो न सामादिरित्यर्थः चतुर्थोऽस्योदितो वधः इ
ति पाठे उदितः शास्त्रेषूक्तः चतुर्थो दंडोपाय एवास्य दमः दमनसाधनमित्यर्थः १५ कुलनाशकत्वं व्यनक्ति दैतेया एव चंदनद्रुमाः तेषां वनेऽयं कंटकद्रुमतुल्यो जा
तः तन्मूलेति तेषां दैतेयचंदनभवनानां यानि मूलानि तेषामुन्मूलने भेदने परशोः परशुस्थानीयस्य विष्णोरयमर्भकः नालायितः नालवदाचरितवान् यथा
परशोः छेदकत्वे कर्तृत्वं हि दंड एव निर्मितो दंडः सहकारीत्वं विना छेदनासंभवात् तथायं विष्णोर्दैत्यमूलस्य छेत्तुः सहकारी जात इत्यर्थः १६ इतीत्थं वदन्तर्ज
नादिभिर्नानोपायैः भीषयन् तं त्रिवर्गप्रतिपादनं धर्मार्थकामप्रतिपादकं शास्त्रं ग्राहयामास १७ ततो गुरुरेनं प्रह्लादं ज्ञातं ज्ञेयानामुपायानां सामा

गुरुरुवाच आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः १५ दैतेयचंदनवने जातोऽयं कंटकद्रुमः
तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः १६ नारद उवाच इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादं ग्राहयामास त्रिवर्गी
स्योपपादनं १७ तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतं १८ पादयोः पतितं बालं प्रतिनंद्याशिषासुरः
परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं १९ आरोप्यांकमवघ्राय मूर्द्धन्यश्रुकलांबुभिः आसिंचन् विकसद्वक्त्रमिदमाहासुरः सुतं २०
हिरण्यकशिपुरुवाच प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् २१ ॥ ॥श्री॥ ॥

दीनां चतुष्टयं यस्य तादृशं ज्ञात्वा ललनया मात्रा मृष्टं उद्वर्त्तितं स्नापितमलंकृतं च प्रह्लादं दैत्येंद्रं प्रतिदर्शयामास पितृसन्निधौ प्रापयामासेत्यर्थः १८ ततः पाद
योः प्रणमंतं बालमाशिषा आशीःपूर्वकं प्रतिनंद्यासुरो हिरण्यकशिपुः दोर्भ्यां भुजाभ्यां पुत्रस्य शिरः परिघ्राय परमां निर्वृतिमानंदं प्राप्नवान् १९ तत
उत्संगे निधाय मूर्द्धन्याघ्राय चाश्रुकलांबुभिर्हर्षाश्रुजलबिंदुभिरासिंचन् विकसद्वदनं यस्य तादृशो दैत्यः सुतं प्रतीतं वक्ष्यमाणमाह युधिष्ठिरेति पा
ठे संबोधनम् २० तदेवाह प्रह्लादेति हे आयुष्मन् तात पुत्र प्रह्लाद भवानेतावता कालेन गुरोः सकाशाद्यदुपशिक्षद् अधीतवांस्तन्मध्ये किंचि
दुत्तमं स्वधीतं सम्यगभ्यासगृहीतं तदेतात प्रह्लाद अनूच्यतां सम्यगनुक्रमेण व्याख्यातां २१ यदुक्तमुत्तमं मम धीतमध्ये किंचिदनूच्यतामिति तत्राह

श्रवणमिति यदुक्तं पूर्ववनंगतो यद्धरिमाश्रयेतेति तदेवाश्रयणं विवृणोति श्रवणमिति द्वाभ्यां पुंसां श्रवणादीनि नवलक्षणानि यस्याः सा भक्तिश्चेन्नवलक्षणा भक्तिप्रतिपादकशास्त्रमधीतं चेत्तदेवाधीत मुत्तमं मन्ये न त्वधुना गुरोः सकाशाद धीतं तत्तु गुरुभिर्नोध्यापितं इति भावः स्वधीनप्रश्नोत्तरविगमनंतु तमधीतमिति श्रवणमित्यादिना पूर्वोक्ताश्रयणविवरणपरं भगवत्यद्धा क्रियते चेदधीत विद्याप्रतिपाद्यातवलक्षणा भक्तिर्निष्कपटभावेन भगवति क्रियते इति यत्तन्नाविष्णभक्तिर्विष्णावर्पितेति यच्च तदेतदुत्तमं मन्ये न केवलं नवलक्षणभक्तिप्रतिपादकशास्त्राध्ययनमात्रमेवोत्तमम् वितु तदर्थानुष्ठानमनुष्ठितस्य श्रेयस्समर्पणं चेत्यधुनातमं मन्ये केवलाध्ययनमात्रस्य स्वार्थत्वादिति भावः अर्पिता विष्णौ इत्यनेन भक्तेरन्यप्रयोजनत्वेन कर्तव्यतोक्ता तत्र विष्णोः श्रवणं तत्स्वरूपरूपगुणविभूतिश्रवणं कीर्तनं नामोच्चारणाद्यात्मकं स्मरणं स्वरूपादिविषयकमेव पादसेवनार्चनवंदनदास्यसख्यानि तु तदीयपरित्यागानि वंदनं नमस्कारः पादसेवनं पादयोः सेवा इनंतच्चार्चाविग्रहे तदीयपादयोश्चेति वेदितव्यं परव्यूहविभवादेरतीन्द्रियत्वेन तत्पादसेवनासंभवात्

प्रह्लाद उवाच श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं २२ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमं २३ नारद उवाच निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः २४

त यद्वा भगवद्विषये मानसिकं तदीयविषये तु कायिकं विवक्षितं आत्मनिवेदनमो मित्यात्मानं युंजीतेति श्रुत्युक्तरीत्यात्मरक्षकत्वानुसंधानं यद्वा विभक्तिर्नाम ध्यानोपासनादिशब्दवाच्याहरहरभ्यासाधेयातिशयाप्रयाणादनुवर्तमाना विवेकादिसाधनसप्तकानुगृहीता तैलधारावदविच्छिन्नस्मृतिसंतानात्मिका प्रीत्यात्मिका प्रत्यहं तावत्ता ध्रुवानुस्मृतिः तत्तु श्रवणादिरूपेण नवलक्षणा तथा प्युक्तविधायाभक्तेः कर्मज्ञानयोगादिवच्छमदमादिवच्च श्रवणादीनामविलंबेन निवर्तकत्वमुच्यते यद्वा लक्ष्यतेऽभिरिति लक्षणानि चिन्हानि ज्ञापकानि भक्तियोगपरिपाकावस्थाज्ञापकानीति यावत उक्तविधभक्तियोगनिष्ठेन रागतएव श्रवणादीनि क्रियंते लोके हि यद्वस्तुविषया प्रीतिस्तद्विषयकश्रवणादीनि स्वतएव प्राप्तानीति नित्यत्वेन भवितव्यं अतः श्रवणादीनि प्रीत्यात्मकभक्तियोगकाष्ठावस्थाविशेषरूपाणि तन्निष्पत्तिसूचकानीति तात्पर्यं एवं प्रीतिकारित श्रवणादि विषयंतमक्तियोगानुष्ठानमेव वनंगतो यद्धरिमाश्रयेतेत्युक्तमाश्रयणमित्युक्तं भवति २३ एतदेवं विधं सुतस्य वचो निशम्य हिरण्यकशिपुः रुषा प्रस्फुरितः कंपमानोऽधरोष्ठो यस्य तादृश इदं वक्ष्यमाणं गुरुपुत्रं प्रत्युवाच २४ ॥ॐ॥ ॥

तदेवाह हे ब्रह्मबंधो ब्राह्मणाधम किमेतत्तेत्वया कृतमिति शेषः अनीचानुचितमेतत्कृतमित्यर्थः किं तद्यन्मामनादृत्य विपक्षं शत्रुपक्षमाश्रयताऽस
तवाऽसताऽहितकारिणा त्वया हे दुर्मते ऽसारं बालो ग्राहित इति एतत् २५ मित्रत्वेन वर्तमानस्यापि तव विरोधाचरणं नासंभावितमित्याह संतीति दुष्टं मैत्रं मि
त्रत्वं येषां ते ऽतएवासाधवः छद्मवेषिणः कपटवेषधारिणो भवादृशा अपि हि लोके संति तेषामघं द्रोहादिकमुचितं काले उचितकाले प्रकटो भवति
रोगः पातकिनामिव यथा ब्रह्महा क्षयरोगी स्यात् सुरापी श्यावदंतकः इति स्मृत्युक्तः पातकिनां रोगः अचिकाले उदेति तथा तेषां अघं द्रोहादिकमुचितं
काले उदेतीत्यर्थः २६ एवमुपालब्ध आह गुरुपुत्र नेति न मया पाठितं नापि परेण किंतु केवलमेष तव पुत्र एव वदत्येवं हे इंद्रशत्रो तव ब्राह्मणोऽप्यनुग्र
ह उचितोऽविषयत्वादिति भावः न मत्परप्रणीतं चेत् कुतोऽस्या इयं मतिस्तत्राह नैसर्गिकीति हे राजन् तस्य त्वत्पुत्रस्येयं मतिर्नैसर्गिकी स्वाभाविकी न तु परैरुत्पा
दिता ऽतो मन्युं क्रोधं नियच्छ उपसंहर नोऽस्मभ्यं कलुषितं दुःखमित्यर्थः मास्मादाः न देहीत्यर्थः माङ्योगेप्यडार्षः कददाःमानां न इति पाठांतरं तत्र कदन्नात्म

दैत्यराज उवाच॥ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता असारं ग्राहितो बालो मामनादृत्य दुर्मते २५ संति ह्यसाधवो लोके दुर्मैत्राश्छद्म
वेषिणः तेषामुदेत्यघं काले रोगः पातकिनामिव २६ गुरुपुत्र उवाच न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो नैसर्गिकीयं
मतिरस्य राजन्नियच्छ मन्युं कददाःस्म मा नः २७ नारद उवाच गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं नो चेद्गुरुमुखीयं ते कुतोऽभद्रा
सती मतिः २८ प्रल्हाद उवाच॥ मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां अदांतगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वित

नानां ममतु मद्विषयं क्रोधं नियच्छेत्यर्थः २७ इत्थं गुरुणा प्रत्युक्तो दैत्यः पुनराहेत्याह देवर्षिः गुरुणेति तदेवाह नचेदिति हे ऽभद्र दुष्ट इयं बुद्धिर्गुरुमुखी गु
रूपदेशजाता न चेत्तर्हि कुतस्तवासती मतिरभूत् २८ एवमुक्त आह प्रल्हादः त्रिभिः तत्र यत्त्वं पृच्छसि कुतस्तवेयं मतिरिति तत्र महतामनुग्रह एवेदृशी मतिहेतुरि
ति वक्तुं तावत् महद्भिरननुगृहीतानां भवादृशामीदृशी मतिर्दुर्लभेत्याह मतिरिति गार्हस्थ्यरतानां स्वतः परतो वा मिथो वा अन्योन्यस्माद्वा कृष्णे मतिर्भक्त्यात्मिका
नाभिपद्येत तत्र हेतुं वदन् गृहव्रतान्विशिनष्टि अदांतगोभिरिति अदांतैरजितैर्गोभिरिंद्रियैर्हेतुभिस्तमिस्रं निरयरूपं संसारं पुनः पुनर्विशतां चर्वितमनु
भुक्तं तस्यैव पुनश्चर्वणां उपभोगो येषां पूर्वपूर्वैर्भुक्तमेव विषयं भुंजानानां पूर्वं स्वभुक्तानेव वनितादीन् विषयान् पुनरपरे युर्भुंजानानामिति वा एवं विषयास
क्तचित्तानां त्वादृशां कृष्णे मतिर्दुर्लभा इत्युक्तं यद्वा चर्वितचर्वणं पशवः तत्तुल्यानां इति २९ मास्तु कृष्णे मतिः स्वस्ये योपि स्वयं न जानातीत्याह॥ ❖ ॥

नतइति स्वार्थस्य गतिः स्वार्थगतिस्तं स्वस्य पुरुषार्थभूतं तदुपायभूतं च विष्णुं गृहव्रता न विदुः तत्र हेतुं वदंस्तान्विशिनष्टि बहिः शब्दादिविषयेष्वर्थमानिनः पुरुषार्थाभिमानिनो ऽतस्ते ऽन्धैरुपनीयमाना अंधा यथा पंथानं न विदुः किंतु श्वभ्रे पतंति तथा ते पीशास्य तंत्यां वेदलक्षणायां स्थूलरज्ज्वां उरुदाम्नि वर्णाश्रमधर्मनामादिरूपनानाविधकंठरज्जुभिर्बद्धा भवंति वेदोक्तकेवलकाम्यकर्मासक्ताः प्रलोभितास्तत्रैवासक्ताः पुनःपुनः संसरंतो दुःखमेव प्राप्नुवंति न तु निरतिशयानंदरूपपुरुषार्थलक्षणं भगवंतं प्राप्नुवंतीत्यर्थः ३० तदेव व्यनक्ति नेति एषामुक्तविधानां विषयासक्तचित्तानां मतिर्बुद्धिरुरुक्रमस्य निरतिशयमहिमशालिनो भगवतः निरतिशयपुरुषार्थरूपमंघ्रिं न स्पृशति न विषयी करोति तदंघ्रिस्पर्शनं विशिनष्टि यदर्थः यस्योरुक्रमस्यांघ्रिस्पर्शस्यार्थः प्रयोजनं फलमनर्थापगमः दुःखनिरासरूपः कियत्पर्यंतं न स्पृशतीत्यत्राह यावन्निःकिंचनानामनन्यप्रयोजनानां महाभागवतानां पादरजःसेवां न वृणीत न

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमानास्तेपीशतंत्यामुरुदाम्नि बद्धाः ३० नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोऽभिषेकं निःकिंचनानां न वृणीत यावत् ३१ नारद उवाच इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ३२ आहामर्षरुषाविष्टः कषायीभूतलोचनः हिरण्यकशिपुरु० वध्यतामाश्वयं वध्यो निःसारयत नैरृताः ३३ अयं मे भ्रातृहा सोयं हित्वा स्वान्सुहृदोऽधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३४

वृणुयान्महत्सेवां न कुर्यात्तावन्न स्पृशतीत्यर्थः मम मातृगर्भावस्थायां नदशायामेव महीयसः नारदस्यानुग्रहादियं बुद्धिरुरुक्रमांघ्रिविषयाभूदिति गूढोभिप्रायः ३१ इतीत्थमुक्त्वोपरतं तूष्णीमासीनं पुत्रं रुषा क्रोधेनांधीकृत आत्मा विवेको यस्य स हिरण्यकशिपुः स्वस्योत्संगान्महीतले निरस्यपातयत् क्षिप्तवान् हचेत्युत्तरेणान्वयः निराकृत इति पाठेऽन्यपातयदित्यर्थः ३२ रुषाविष्टो व्याप्तः अत एव कषायीभूते आताम्रे लोचने यस्य स आह उक्तवान् किं तदेवाह वध्यतामिति हे नैरृता इतः एनं निःसारयत बहिर्गमयत अयं बालो वध्यो वधार्हः अतो वध्यतामाशु हन्यतां ३३ वध्यत्वे हेतुः यतो यं मे मम भ्रातुर्हन्ता कुतः यो यमधमः बालः स्वान्स्वकीयान्सुहृदोस्मान्हित्वापि तव्यस्य पितृभ्रातुर्हिरण्याक्षस्य हन्तुर्विष्णोः पादौ चरणौ दासवदर्चति तस्य हृयातीत्यर्थः अतः स एवायं दूत सन्वयः हित्वा स्वान्सुहृद इति पाठेऽयं मे भ्रातृहा कुतः यद्यस्मादधमो यं सुहृदः प्रियान् स्वजनान् हित्वा विष्णवे समर्थदासवत्तत्पादावर्चति अतो यमेव मन्दादामे भ्रातृहेत्यर्थः ३४ ॥ ॥श्री॥ ॥

सदृष्टांतेन विष्णोरस्मान्वा सममंजसो वानुकूलोऽसाधु करिष्यति किं न करिष्यत्येवं च अवस्थितचित्तत्वादिति भावः यतोसौ पंचहायनः पंचवर्षवयस्क एवास
न दुस्त्यजं त्यक्तुमशक्यं मातापित्रोः सौहृदमजहादत्याक्षीत् ३५ ननु तथाप्ययं पुत्रः कथं वध्यस्तत्राह परोपीति शत्रुपक्षप्रभवोपि यथौषधं तथा हितकारी चेत्
हितः स्वोऽपत्यं पुत्रः स्वदेहाज्जातोप्यामयवद्रोगवदहितः दुःखकृच्चेत्तर्हि आमयवत्परित्याज्यः आस्तां ममतास्पदस्य कथा हि यस्माद्यदंगं करचरणादिकम
पि सर्पदंशव्रणादिदूषितं सदात्मनोऽहितं दुःखकृच्चेत्तर्हि तदंगं छिंद्यादेव यस्य दुष्टांगस्य विवर्जनात्परिहाराच्छेषमवशिष्टं अंगं सुखं जीवति ३६ अतो
यं सुहृल्लिंगधरः पुत्रवेषधारी शत्रुर्यथा दुष्टमिंद्रियं मुनेः शत्रुस्तद्वत्तेमानः सर्वैर्गरलादिभिः मिश्रितसंभोजनादिभिरुपायैर्हंतव्यः ३७ एवं स्वभर्त्रा
दैत्येंद्रेणासमाज्ञप्तत्वात् नैर्ऋताः शूलपाणयः तीक्ष्णादंष्ट्रा येषां करालान्यास्यानि येषां ताम्राणि श्मश्रूणि शिरोरुहाणि च येषां ते तादृशाः ३८ भैरवान्

विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमंजसः सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३५ परोप्यपत्यं हितकृद्यथौषधं स्वदेहजोप्यामय
वत्सुतोहितः छिंद्यात्तदंगं यदिहात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ३६ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः
शत्रुर्मुनेर्दुष्टमिवेंद्रियं ३७ नारद उवाच नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः तिग्मदंष्ट्राः करालास्यास्ताम्रश्मश्रुशिरोरुहाः
३८ नदंतो भैरवान्नादांश्छिंधि भिंधीति वादिनः आसीनं चाहनन् शूलैः प्रल्हादं सर्वमर्मसु ३९ परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्म
नि युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ४०

भयंकरान्नादान्नदंतः कुर्वंतः छिंधि भिंधि छिंधीति च वदंतः उपविष्टं प्रल्हादं सर्वेषु मर्मस्थानेषु शू
लैरहनन्नहतवंतः ३९ अनिर्देश्ये चेतनाचेतनसजातीयत्वेन निर्देष्टुमशक्ये निहंतृहंतव्याद्यंतरात्मनि पूर्णषाड्गुण्ये परे ब्रह्मणि युक्तो नियुक्त आत्मा म
नो यस्य तस्मिन्प्रल्हादे नैर्ऋतैः कृताः अपि शूलघातादयः मारणोपायाः अफला व्यर्था बभूवुर्मरणहेतवो दुःखहेतवश्च न बभूवुरित्यर्थः यथाऽपु
ण्यस्य पापरतस्य कृता अपि सत्क्रियाः संध्योपासनादयोऽफलास्तद्वत् फलहेतुर्गर्भविशेषणं अखिलात्मनि युक्तात्मनीति अयं भावः कर्मायत्तदेहसंबंध
प्रयुक्तसुखदुःखभोक्तृत्वतदनुगुणपुण्यपापकार्यत्वानुगुणं जीवपर्यंतदेहेंद्रियादिप्रेरणरूपमखिलात्मत्वमत्र विवक्षितं तत्र हंत्रंतरात्मतया हंतव्य
दुःखजननानुगुणव्यापारानुगुणानि यमयन्नपि पुनर्हंतव्यस्य हंतृव्यापारजन्यदुःखाननुभवानुगुणतया नियमयतीति कथमेकस्यैवंविधं परस्परविरुद्धं
नियमनं दर्शितं कोऽनिराचिकीर्षयाऽनिर्देश्य इत्युक्तं लोकविलक्षणविविधविचित्रशक्तेरीदृशं नियंतृत्वमुपपन्नमिति अभिप्रायः ४० ॥ ॥श्री॥ ॥

२४ एवं शूलघातादिभिरमरणे प्रोग्रकृपेप्रयासेऽपहते तस्य चेतसि दैत्येंद्रो हिरण्यकशिपुः परिशंकितः किं मद्रोषं शूलघातादिभिरपि नाहन्यत किमस्मादेव मम मृत्युर्भविष्यतीत्याशंकितः हे युधिष्ठिर निर्बंधेन तस्य प्रह्लादस्य वधोपायं चक्रे ४० विविधोपायानेव प्रपंचयंस्तेषां स्वरूपं तत्त्वमाह दिग्गजैरिति दिग्गजाक्रमणैः दंदशूकैः सर्पश्रेष्ठदंशनैरभिचारैर्मारणाद्यैरवपातनैर्गिरिशृंगेभ्योऽधः पातनैर्मायाभिरकस्मादशनिपातनादिभिः संनिरोधैर्नैवरंध्रादिविधानैर्गरदानैर्विषप्रयोगैः अभोजनैरुपवासैः ४१ हिमादिभिर्यातनैः पर्वताक्रमणैः पर्वतानां तदुपरि निक्षेपैः एवंविधैरुपायैरसुरैः प्रयोज्यकर्तृभिर्यदा निरपराधं सुतं हंतुं न शशाक नाशक्नोत्तदा तत्कर्तुं तद्धननं कर्तुं नाभ्यपद्यत उपायांतरं न लेभे इत्यर्थः प्रत्युत दीर्घतमां चिंतां प्राप्तः ४२ चिंतामेव प्रपंचयति एष इति एष बालो मे मया वधे यथा भवति तथोक्तः तथा वधोपायाश्च निर्मिताः कारिताश्च मद्धर्मैरभिचारादिभिस्तैस्तैर्द्रोहैः शूलघातादिभिश्च मुक्तः अविहतः स्वेनैव तेजसा माहात्म्ये

प्रयासेऽपहते तस्मिन्दैत्येंद्रः परिशंकितः चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ४० दिग्गजैर्दंदशूकैश्चाभिचारावपातनैः मायाभिः संनिरोधैश्च गरदानैरभोजनैः ४१ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि न शशाक यदा हंतुमपापमसुरः सुतं चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ४२ हिरण्यकशिपुरु० एष मे बहु साधूक्तो वधोपायाश्च निर्मिताः तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४३ वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयं न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ४४ अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ४५ नारद उ० इति तं चिंतया किंचिन्म्लानश्रियमधोमुखं शंडामर्कावौशनसौ विविक्त इति होचतुः ४६ ॥ ॥श्री॥ ॥

न तु तत्रोपायेभ्यः विदूरे एव वर्तमानः बालोऽप्ययमजडाविकुंठा धीर्यस्य तादृशः मे मम मानार्यं द्रोहं न विस्मरति शुनः शेप इवेति यथा शुनः शेपाख्यः पितृभ्यां हरिश्चंद्राय विक्रीतः सन् तत्पोषकहारं विस्मरत् तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रांतरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टांतः शुनः शेपः पूर्वं इवेति प्रभुर्जितेंद्रियः ४४ अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्मात् एवामरः मरणरहितः एतस्य विरोधेन हेतुना न त्वं मम मेव मृत्युर्भवीता भविष्यति न वा भविता एतद्विरोधेन मम मृत्युर्भावेहेत्वंतरेण नैव भविष्यतीत्यर्थः ४५ इतीत्थं तच्चिंतयाविष्टं विषयकचिंतया म्लानश्रियं निस्तेजस्कं किंचिद्धः कृतमुखं तं हिरण्यकशिपुमौशनसौ उशनसः शुक्रस्य पुत्रौ शंडामर्काख्यौ विविक्ते निर्जने देशे तस्य प्रतिष्ठाभंगादिति भावः इति वत्समाणमूचे

५५
७
टि
२५

तदेवाह जितमिति तव भ्रुवोर्विजृंभणेन चलनमात्रेण त्रस्ता भीताः सर्वे धिष्ण्यपा लोकपाला यस्मिंस्तज्जगत्त्रयं त्वयैकेन असहायेन जितं एवंभूतस्य तव हे नाथ प्रभो चिं
तनीयं न चक्ष्महे न पश्यामः शिशूनां तु गुणदोषयोः पदं विषयो न चैव न भवतीत्यर्थः ४७ अत इमं बालं यावद्गुरुर्भगवान् भार्गवः शुक्र आगमिष्य
ति तावद्वरुणस्य पाशैर्बद्ध्वा निधेहि कुरु भीतो यं न पलायते तथा निधेहीत्यर्थः ततः किं तत्राह तु वयसा आर्याणां सेवया चास्य बुद्धिर्भविष्यति ४८ एवं गु
रुपुत्रोक्तं तथेत्यनुज्ञायांगीकृत्य दैत्येंद्र इदं वक्ष्यमाणमब्रवीत् तदेवाह धर्म इति अस्य बालस्य धर्म उपदेष्टव्याः के ते ये राज्ञां गृहस्थानां ते ४९ ए
वमुक्तौ गुरुपुत्रौ तथैवोपदिदेशतुरित्याह नारदः धर्ममिति धर्मार्थकामस्वरूपान् साधनान्नितरां सम्यगनुपूर्वशः हे राजन् प्रश्रयेण विनयेनावन
ताय नम्राय प्रह्लादाय ऊचतुरुपदिशतुः ५० तथापि त्रिवर्गमात्मने स्वस्मै उपशिक्षितमपि साधु न मेने नामन्यत तच्छिक्षां तत्कुतः द्वंद्वैः रागद्वेषादिभिर्वि

जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपं न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदं ४७ इमं तु पाशैर्वरुण
स्य बद्ध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ४८ तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्र
वीत् धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनां ४९ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू राजन्प्रश्रितावनताय च ५०
यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितं न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां ५१ यदाचार्यः परावृत्तो गृहमेधीयकर्मसु वयस्यैर्बाल
कैस्तत्र सोपहूतः कृतक्षणैः ५२ अथ तान् श्लक्ष्णया वाचा समाहूय महाबुधः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ५३ ते तु त
द्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बाला अदूषितधियो द्वंद्वारामेरितेहितैः ५४ पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः तानाह क
रुणो मैत्रो महाभागवतोऽसुरः ५५ इति श्रीभा० सप्तमस्कंधे पंचमोध्यायः॥५॥ वयेषु आरमणं येषां तैरुपवर्णितां ५१ किंच यदाचार्यः यदागृ
हस्थधर्मेषु परावृत्तः परोक्षं प्रवृत्तः व्यासंगांतरपर इत्यर्थः तदा कृतक्षणैर्लब्धावकाशैर्वयस्यैः समानवयस्कैर्बालैस्तत्रोपहूतः स प्रह्लादः ५२ महान्
बुधीर्विद्वान् श्लक्ष्णया मधुरया वाचा तान् बालकान् प्रत्याहूय संबोध्य कृपया प्रहसन्निव तन्निष्ठां ज्ञानमार्गनिष्ठां उवाच ५३ ते तु बालकाः सर्वे त
द्गौरवात्तद्गुरुगौरवात्त्यक्ताः क्रीडापरिच्छदाः क्रीडोपकरणानि यैर्द्वंद्वारामाणां मीरितैरीहितैश्च न दूषिता धीर्येषां ते ५४ हे राजेंद्र तस्मिन्प्रह्लादे ए
व न्यस्तं हृदयं मनः ईक्षणं च येषां ते तं प्रह्लादमेव पर्युपासत तमुपस्थाय पर्यवेष्ट्योपविविशुरित्यर्थः तान् पर्युपासीनान् कारुण्यमैत्र्ययुक्तो महाभागवतो

एवं दैत्यकुमारैः पर्युपासितो महाभागवतः प्रह्लादस्तेभ्यः करुणयानंतस्थिरफलब्रह्मानंदानुभवसाधनभागवतधर्माननुपदिदिक्षुरुपदेक्ष्यमाणधर्मप्रतिष्ठा
पनायतत्वे तु वैराग्यजननाय च वैषयिकसुखानामस्थिरत्वदुःखगर्भत्वमतएव हेयत्वमवलम्बनत्वं च विविक्षुस्तावन्मनुष्यजन्मन एव भागवतधर्मचर
णार्हत्वं तत्राप्यस्थिरत्वेन बाल्यात्प्रभृत्येव तद्धर्मानुष्ठानस्य कर्तव्यत्वं चाह कौमार इति इह मनुष्यजन्मन्येव प्राज्ञः हेयोपादेयविभागज्ञः पुमान् कौमा
रे बाल्य एव न तु प्रमत्तनीत्यर्थः भागवतान् भगवत्संबंधिनः भगवत्प्राप्तिसाधनान् धर्मानेवाचरेत् भगवच्छब्देन तेषां नितःकल्त्वं शंकाप्रयुक्तानुष्ठेय
त्वशंकाच्छुद्यते तथाहि षड्गुणैर्महाविभूत्याद्ये परब्रह्मणि शब्दोयं मैत्रेय भगवच्छब्दः सर्वकारणकारणे संभर्तेति तथा भर्ता भकारोर्थद्वयान्वितः
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा वसंति यत्र भूतानि भूतात्म
न्यखिलात्मनि स च भूतेष्वशेषेषु वकारार्थस्ततोव्ययः ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरित्यादिना श्री
मत्पराशरोक्तप्रवृत्तिहरसमुदायनिर्वचनाच्चगताः संभर्तृत्वभर्तृत्वनेतृत्वगमयितृत्वस्रष्टृत्वसर्वशरीरकत्वसर्वभूतांतरात्मत्वनिरस्तनिखिलदोषत्वषा

॥प्रह्लाद उवाच॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् १ ॥

ड्गुणपूर्णत्वादयोर्था अत्र विवक्षिताः तत्र संभरणं नामोपकरणसंविधानं तच्च प्रकृतिपुरुषकालानां कार्योत्पत्तियोग्यतापादनरूपं भर्तृत्वं निर
पाधिकस्वामित्वं नेतृत्वं गमयितृरूपं स्थितिकर्तृत्वं गमयितृत्वं संगमयितृत्वरूपं संहर्तृत्वं स्रष्टृत्वं उद्गमयितृत्वरूपं सृष्टिकर्तृत्वं यशोगुणवत्ताप्रथा
श्री भोग्यसंपत् वैराग्यं विरक्तिः सा च परिपूर्णत्वादन्यादरहरूपा एवं चानुष्ठितैर्धर्मैः प्राप्यस्य भगवतः एवंविधत्वात् तत्प्राप्तिप्रवृत्तिः श्रेयस्करूपत्वात् तत्प्राप्ति
साधनत्वं तादृशधर्माः परमपुरुषार्थार्थिभिरवश्यमनुष्ठेयास्ते च बाल्यादारभ्यैव कर्तव्या इत्यर्थः इह इत्यनेन मनुष्यजन्मन एव भगवद्धर्माचरणोप
युक्तत्वमन्यस्य तु तदननुगुणत्वं चाभिप्रेतं तत्रापि पुरोवर्तिपरामर्शिना इह शब्देन प्रकृतिभूतेन इदं शब्देनाधुना वर्तमानमनुष्यजन्मन्येव भगवद्धर्म
कर्तव्यताभिप्रेता नत्वन्यस्मिन्नपि मनुष्यजन्मनि तेषां कर्तुं शक्यत्वात् किं विशेषेणाधुनिक एव जन्मनि कर्तव्यतोच्यते इत्यत आह दुर्लभं मानुषं ज
न्मेति विविधविचित्रात्मकपुण्यपापात्मककर्मभिः देवतिर्यङ्मनुष्यस्थावरादिरूपेण संसरतो जीवस्य नियमेन प्रतिजन्म मानुषजन्मेवेति विश्वा
सहेतोरभावात् दुर्लभं मानुषं जन्म सुकृतपरिपाकविशेषोपलभ्यं इति तत्रैव भगवद्धर्मानाचरेदिति भावः ननु किं विशेषेण कौमार एवाचरेदित्युच्यते यद्यप्येष

विषयभोगानंतरं चतुर्थवयसि तेषां कर्तुं शक्यत्वादित्यत आह तदप्यध्रुवं इति चतुर्थवयः पर्यंतजीवने हेतोर्विश्वसनीयस्याभावात् कौमारात्प्रभृत्येवाचरेदिति भावः ननु चिरकालसाध्या भागवद्धर्माः कथमस्थिरेण मानुष्यजन्मना निर्वर्त्यंते कथं तरां निःश्रेयसप्राप्तिरत आह यदर्थदमिति यद्यप्यध्रुवं तथाप्यर्थदमित्यर्थः अयं भावः यद्यप्यध्रुवं तथापि चिरकालजीवननिमित्ते कर्मण्यपारब्धे भगवद्धर्मविरोधिकर्मसद्भावे च सति यथावत्कालपर्यंतभागवतधर्मोपसंहारद्वारा निःश्रेयसरूपविरतिशयपुरुषार्थदं चिरजीवनहेत्वभावे वा रब्धभगवद्धर्मविरोधिकर्मसद्भावे विघ्नेनाभिक्रमनाशोऽस्ति न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीत्यादि भगवदुक्तरीत्या जन्मांतरे यथावद्भगवद्धर्मोपसंहारद्वारा निःश्रेयसरूपार्थदं भवतीति अत्र सर्ववाक्यं साधारणं इति न्यायेनाचक्षो वायुर्भद्रं इत्यादिवत्कौमार एव भागवतान् धर्मानेवेहेत्येवमवधारणमभिप्रेतं १ तावद्भागवतानेव धर्मानाचरेदित्यवधारणं तावदुपपादयति यथा हीति तथा हीत्यर्थः यथाशब्दो योग्यताद्योतकः इह मनुष्यजन्मनि विष्णोः परमपुरुषस्य पादयोरुपसर्पणं भजनं यथायोग्यं तदेव युक्तं इत्यर्थः कुतः यद्यस्मादेष परमपुरु

यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् २
सुखमैंद्रियकं दैत्या देहयोगेन देहिनाम् सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ३

षः सर्वभूतानामात्मेश्वरोऽतः प्रविश्य प्रशासनपूर्वकं भर्ता शरीरस्यात्मानुवर्त्तनं युक्तं इति भावः नन्वात्माप्यपुरुषार्थरूपत्वान्नानुवर्त्तनीयोऽत आह प्रिय इति इष्टतमः निरतिशयानंदरूप इत्यर्थः आनंद एव ह्येष्टः स एव हि पुरुषार्थरूप इति भावः न त्वेवं भवतेनिष्कृपत्वादनुवर्त्तमानानाप्युपायेदित्यत आह सुहृदिति एष एव हि साधु कर्म कारयति तं यमुन्निनीषतीति श्रुत्युक्तरीत्या स्वानुवृत्त्युपक्रममात्रेणाधिभूतपरमकारुण्य एव युक्त उत्तरोत्तरं स्वानुवृत्तिप्रवर्त्तनारूपहितकारीत्यर्थः २ विष्णोः पादोपसर्पणमेव युक्तं इत्यनेन वैषयिकसुखसाधनयत्नो न युक्त इत्युक्तं तदेव सहेतुकं सदृष्टांतं चोपपादयति हे दैत्या अवधारणमप्युपपादयति सुखमिति हे दैत्या देहिनां देहयोगेन देहसंबंधमात्रेणेंद्रियसुखं सर्वत्र पश्वादिजन्मस्वप्याधुनिकयत्नमंतरेणापि दैवात्प्राचीनकर्मणैव लभ्यते तत्र दृष्टांतो यथा असुखमित्यसुखं दुःखं यथा यत्नमंतरेणापि दैवादेव लभ्यते तथा वैषयिकं सुखमित्यर्थः सर्वत्र लभ्यत इत्यनेन वैषयिकसुखलाभः सर्वजन्मसाधा

यतो वैषयिकं सुखं सर्वजन्मसाधारणं तच्च देवादेव सुलभमसुखवत्तत्प्रयासो वैषयिकसुखार्थप्रयासो न कर्त्तव्यः एवमविज्ञाय मता हृतो विप्रयासः केवलमायुर्व्यय
इत्याह अतइति वैषयिकसुखार्थात्प्रयासात्परं केवलमायुःक्षयएव नान्यत्किंचिदस्ति प्रयोजनमित्यर्थः ननु जन्मांतरे पुनरैंद्रियकसुखलाभाय कर्त्तव्यएव पन्ना
स्त्वाहस्त्रपेति यद्यपि कृतोपि तदर्थप्रयासो जन्मांतरीये वैषयिकसुखसाधनत्वधापि तथात्तद्वत्क्षेमं न प्राप्नोति कथंयथा मुकुंदचरणांबुजं भजन्निति प्रोक्षः निःशे
षदुःखनिवृत्तिपूर्वकं नित्यनिरुपाधिकनिरतिशयापरिच्छिन्नब्रह्मानंदानुभवरूपं क्षेमं प्राप्नोतितथा वैषयिकसुखार्थं यतमानस्तादृशं क्षेमं न विंदते किं तु दुःख
मित्यानित्यसोपाधिकाल्पमिदानीमनुभूयमानसजातीयं प्राप्नोतीत्यर्थः ४ ततः कारणाद्भवमनर्थावहं संसारमाश्रितः पुमान् कुशलः हेयोपादेयविभाग
कुशलः सन् क्षेमायैवउक्तविधक्षेमार्थमेव यतेत कौमारएवेत्युक्तमेव धारणं प्रतिपादयितुं तदवतारयति शारीरमितिपौरुषं पुरुषस्य जीवस्य संबंधिशरीरं
यावत्पुष्कलं पटुतरमस्ति न तु विपद्यते न विपन्नं न भवति तावदेव क्षेमाय यतेतेति पूर्वेणान्वयः बाल्यादारभ्यैव यतेतेति भावः ५ एतदेव प्रतिपादयन्ति वयासक्त

न तत्प्रयासो न कर्त्तव्यो यत आयुर्व्ययः परं न तथा विंदते क्षेमं मुकुंदचरणांबुजं ४
ततो यतेत कुशलः क्षेमाय भवमाश्रितः शरीरं पौरुषं यावन्न विपद्येत पुष्कलं ५
पुंसो वर्षशतं ह्यायुस्तदर्द्धं चाजितात्मनः निष्फलं यदसौ रात्र्यां शेतेंधं प्रापितस्तमः ६
मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ७

स्य केवलं व्यायुर्व्यय माह पुंसइति पुंसः मनुष्यस्य तावद्वर्षशतं ह्यायुर्जीवनयोग्यकालः शतवर्षपरिमितः तस्य शतवर्षपरिमितस्यायुषो पंचाशद्वर्षा
त्मकमजितेंद्रियस्य निष्फलमेव यातीत्युत्तरेणान्वयः नैष्फल्येन पातेहेतुं वदन्नमांसं विशिनष्टि॥ यत्तद्यस्मादसावजितात्मा पुमान् रात्र्यामंधंतमः निद्रात्मकं
प्रापितस्सन् शेते जितेंद्रियः कौमारएवारब्धभक्तियोगरूपभगवद्धर्मयोगस्तु रात्र्यामपि मध्यमं यामद्वयं निद्रार्थमुपयोज्यं पूर्वोत्तरयोर्यामयोरनियत
कालं भगवद्धर्मेनाचरतीति भावः ६ एवं बाल्ये मुग्धस्य मम ढस्य दशवर्षाणि कौमारे क्रीडतो दशवर्षाणि तेवं विंशति वर्षाणि याति जितेंद्रियः कुशलस्तु तस्ता
मपि विंशतौ भगवद्धर्ममनुतिष्ठतीति भावः एवमुत्तरत्रापूह्यं जरया ग्रस्तः देहो यस्मात्तएवाकल्पस्यासमर्थस्य स्वातधीनदेहस्य वर्षाणां विंशतिर्या
ति बाल्यादारभ्य भगवद्धर्मस्तु तदभ्यासपरिशिक्षितदेहत्वात्तस्यामपि विंशत्यां तदनुतिष्ठतीति भावः ७ ॥श्रीरामचंद्रायनमोनमः॥ ~ ॥ २६

एवमहमित्यात्मकार्दीयुषश्चत्वारिंशाद्वर्षाणि गतानि शेषमवशिष्टं दशवर्षात्मकमायुर्दुरापूरेण दुःखेः समंतादापूर्यमाणेन कामेन तदनुबंधिनावलीयसा मोहे
नवकारात्रोधेन च गृहेषु गृहात्मकेषु सक्तस्यातएव प्रमत्तस्य स्वहितमजानतो पयातीति जितेंद्रियस्तु कुशलः कामाद्युपशमेनैव तस्मिन्नपि दशवर्षात्मके वय
सि भागवतधर्ममनुतिष्ठतीति भावः ८ एवमजितेंद्रियस्य वैषयिकसुखरतस्यायुषो नैष्फल्यमनारब्धभक्तियोगस्य कुशलस्य जितेंद्रियस्य तु तैः श्रेयससाधनभगव
द्धर्मप्रसाधनोपयुक्तत्वेन साफल्यं भागवतधर्माणामेव निरतिशयश्रेयःसाधनत्वं तेषां च वर्तमानमनुष्यजन्मनैवानुष्ठेयत्वं चोक्तं अथ वैराग्यमंतरेण यदि
हि भागवतधर्मः प्रतिष्ठितो न भवतीति वैराग्येण तावदेषां भवितव्यं अंतरंगसत्संगादिति मंतरेण नम्येत्यतीति तयाभवितव्यं सा च विषयासक्तचित्तजनसंगपरिहारमंत
रेण दुर्लभेत्यभिप्रेत्य तत्परिहारश्च गृहवित्तकलत्रापत्यादिष्वनुरक्तचित्तस्य परस्य प्राक्तस्यापि उपायेन विकालमद्दुःसंगः परिहार्य इति वक्तुं तावद्गृहादि
ष्वनुरागस्य दुस्त्यजत्वं च मनसा वस्तत्वं चाह तावद्गृहानुरागस्य दुस्त्यजत्वमाह —ति कोगृहेष्विति गृहे आसक्तं ममेदं गृहे इत्यभिमानयुक्तं दृढैर्दुर्मोचनीयैः स्ने

दुरापूरेण कामेन मोहेन च वलीयसा शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ८ को गृहेषु पुमान्सक्तमात्मानमजितेंद्रियः स्नेहपाशैर्दृढै
र्बद्धमुत्सहेत विमोचितुं ९ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योपि य ईप्सितः यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० कथं
प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११ ॥ ❖ ॥

हपाशैर्बद्धमात्मानं विमोचितुमजितेंद्रियश्चेत्कः पुमानुत्सहेत कोप्युत्साहं न कुर्यादित्यर्थः जितेंद्रियस्तूत्सहेतैवेति भावः ९ अनेन हित्वात्मपातं
गृहं अंधकूपमिति पूर्वमुक्तं गृहाभिनिवेशत्याग एव भगवदाश्रयणे प्रथमं कारणं इत्युक्तं तदभिनिवेशत्यागश्च वित्तकलत्रापत्याद्यनुरागपूर्वकः सोप्यजितेंद्रि
यस्य दुःशक इत्याह कोन्विति अर्थतृष्णां वित्तस्पृहां जितेंद्रियश्चेत्कः पुमान्विसृजेत्त्यजेत् दुस्त्यजत्वे हेतुं च दर्शयंस्तां विशिनष्टि य इति यः अर्थः प्राणेभ्योपीप्सि
मिति प्राणास्तत्पविक्षया गरीयसी दृढं तयेत्यर्थः प्राणेभ्योपि गरीयस्त्वमेव दृष्टांतमुखेन दर्शयन्नर्थं विशिनष्टि यमिति यमर्थमसुभिः प्राणैस्तस्करश्चोरः
सेवकश्चाश्रयोपजीवी वणिक् नाविकश्च क्रीणाति प्राणहानिमंगीकृत्यापि तस्करादिर्यमर्थं साधयति तस्मिन्नर्थतृष्णां को नु विसृजेदित्यर्थः १० किं
चानुकंपितापायप्रायुक्तायाः प्रियायाः रहसि भवं संगं रुचिरान्मनोज्ञान् हितालापांश्च सुहृत्सु च संगं स्मरन् एकः प्रियादिसंगादीन्त्यजेदिति तृतीयेनान्व
यः कथंभूतः तत्स्नेहसितः तेषां प्रियादीनां स्नेहेन सितः बद्धः कलानि मधुराण्यक्षराणि येषां शिशूनां वसंगतिष्वनुषज्यते संगतेष्वनुरक्तं चित्तं यस्य सः

भा० स्कं० ७ ५८

२७ पुत्रानिति हृदय्याः मनोज्ञाः दुहितॄः श्वशुरगृहे स्थिताः तथा भ्रातॄन् स्वसॄर्भगिनीः स्वदीनौ मातापितरौ च गृहांश्च उरवः परिच्छदा भोगोपकरणानि येषु तन्मनोज्ञान् गृहांश्च कुल्याः कुलक्र-
मागताः वृत्तीर्जीविकाश्च पशुभृत्यवर्गांश्च कथं त्यजेत तेन कथं तरां विरज्येत न विरक्तः स्यात् १२ कथं भूतः कोशं कृत्कोष्ठकारी कीट इव कर्माणीहमनः यथा कोशगृह-
कृत् कोशान्तकं गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि ना पश्यति तथा स्वबंधकर्माणि कुर्वाण इत्यर्थः अवितृप्तः कामो यस्य तादृशः औपस्थ्यं जैह्वं च सु-
खं बहु अधिकं मन्यमानोऽतो दुरंतो मोहो यस्य १३ दुरंतमोहत्वं दर्शयन् विशिनष्टि कुटुंबपोषाय वियन् क्षीयमाणं निजायुः परिच्छिन्नायुर्यस्य तादृशो विशेषे-
णाहितमनुकूलमर्थं परमपुरुषार्थं न वेद विहतं इति पाठे विहतमपि स्वाभिप्रेतमर्थं न वेद दृष्टांतत्वेनानुसंधत्ते सर्वत्र देशे काले च तापत्रयेण दुःखितः
आत्मा मनो यस्य तादृशो न निर्विद्यते संसृतौ हेयत्वबुद्धिं न करोति ततः स्वकुटुंबे रागो रतिर्यस्य १४ प्रत्युताकार्यं करोतीत्याह वित्तेष्विति परद्रव्यापहा-

पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत को-
शस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औपस्थ्यं जैह्व्यं बहुमन्यमानः कथं विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न
बुध्यतेऽर्थं विहितं प्रमत्तः सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरागः १४ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तह-
र्तुः प्रेत्येह वाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै यः स्वीयपारक्यवि-
भिन्नभावस्तमः प्रपद्येत यथा विमूढः १६

र्तुः दोषं यः प्रेत्य मरणानंतरं नरकलक्षणः इह च लोके दंडरूपः तं विद्वान् जानन्नपि वित्ते नित्य-
मभिनिविष्टं चेतो यस्य स अजितेंद्रियोऽशांतकामः कुटुंबी च सन् तत्परस्य वित्तं हरति १५ एवं को गृहे स्थित्यादिभिः सप्तभिः श्लोकैः गृहादिष्वनुरागो
दुस्त्यज इत्युक्तं अथ तस्यानर्थावहत्वमाह विद्वानिति हे दनुजा इत्थं विद्वानप्युक्तविधं संसारं जानन्नपि कुटुंबं पुष्णन् बिभ्रत् स्वलोकाय आत्मयाथा-
त्म्यदर्शनाय न कल्पते न समर्थो भवति प्रकृतिपुरुषविवेकयाथात्म्यावमर्शनपरो न भवति किंचिदं स्वीयमिदं परकीयमित्येवं विभिन्नो भावो यस्य सर्वस्य
परमात्मशेषतामजानन्नित्यर्थः यथा वहिर्मूढः स तमो नरकमेव प्रपद्येत यद्वा तत्त्वविदपि कुटुंबभरणासक्तो देहात्माभिमानस्वतंत्रात्माभिमानयु-
क्तो मूढवन्नरकमेव प्रपद्येत न मुक्तिं पुनः केवलमूढ इत्याह विद्वान्प्रकृतिपुरुषविवेकयाथात्म्यविदपि यः पुनः स्वीयपारक्यविभिन्नभावः इत्थं कुटुंबं पुष्ण-
न् भवति स स्वलोकाय परमपदप्राप्तये न कल्पते किंतु नितरां मूढवत्तम एव प्रपद्येत विदुषामेवेयं गतिः किं पुनरविदुष इति भावः यथा विमूढ इति दृष्टां-

२७

एवं गृहाद्यासक्ते दुस्त्यजत्वमनर्थावहत्वं चोक्त्वा अथोक्तमुपसंहरन् दुस्त्यजगृहाद्यनुरागनिमित्तमसत्संगं परित्यज्य सत्संगादिप्रणाड्या भगवंतमाश्रयेतेत्याह यत इति यतः क
श्चिदपि पुमान् गृहाद्यभिनिविष्टः स्वेदात्मानं क्वचिदपि काले कुत्रचिद्देशे मोचितुमसमर्थस्तत इत्युत्तरेणान्वयः असामर्थ्ये हेतुरत्यंतमत्यर्थं दीन विषयलंपटः वामदृशां यो
षितां संविहारे क्रीडामृगः क्रीडार्थं संवर्द्धितशाखामृगादितुल्यः विहारं इति पाठे विहारस्थानमात्मानं इत्यन्वयः वामदृशां विहारक्रीडामृगत्वं विशिनष्टि यदिति यद्य
स्मात् वामदृशां क्रीडामृगत्वाद्धेतोः निगडरूपो विसर्गः संसारबंधो भवति अयमिति वा छेदः यः क्रीडामृग इत्येतदयमेव निगडरूपः संसार इत्यर्थः यदिति छेदपक्षे य
द्वेन वामदृशां चापरामर्शः यतया मुनिगडः शृंखलरूपो विसर्गः पुत्रादिरूपस्सर्ग इत्यर्थः अविसर्ग इति वा छेदः यद्यस्मात्क्रीडामृगत्वादविसर्गः अविमोचो नि
गडः शृंखलतुल्यः संसारबंधो भवतीत्यर्थः १७ ततः यतो गृहादिष्वासक्त आत्मानं मोचितुमसमर्थस्ततः विषयेषु शब्दादिष्वेत्यात्मा मनो येषां तेष्वसत्सु दैत्येषु संगं

यतोऽनकश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः विमोचितुं वामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः १७
ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु उपेत नारायणमादिदेवं स मुक्तसंगैरिषितोऽपवर्गः १८ ॥ ० ॥

दूरात्परिहृत्यादिदेवं जगदुदयस्थितिलयलीलं स्वतेजसा दीप्यमानं नारायणं जीवानां प्राप्यं प्रापकमाधारं च भगवंतमुपेत सत्संगादिप्रणाड्याशरणं व्रजत
यद्यप्यसत्संगतेकं दोषोक्तिर्नास्ति तथापि स्वस्यसत्संगतेरेव हेतोर्ज्ञानोदयस्यैवैव वक्ष्यमाणत्वात् सत्संगत्यैवतेः सत्संगतेः कृतप्रायत्वाच्च तदनुक्तावपिसा
भिप्रेतैव एवं गृहाद्यासंगस्य दुस्त्यजत्वदोषावहत्वादिकथनेनैव तेषां वैराग्यमुदेष्यतीति वैराग्यमपि संपादनीयमिति शब्दतो नोक्तं स्वस्यैव ज्ञानोपदेष्टृत्वा
दाचार्यत्वेन स्थितत्वाद्गुर्वभिगमनमपीह शब्दतः कर्त्तव्यत्वेनोक्तं किंतु श्रीप्रह्लाद तन्मात्रमेव कुरुतेति शब्देनोक्तम् धर्मान्भागवतानितिभगवच्छब्दे
नाभिप्रेतं निष्फलत्वशंकाव्युदासं व्यनक्ति स इति स उपेयो नारायणः अपवर्गः परमपुरुषार्थलक्षणापवर्गहेतुत्वेन मुक्तः संगो देहतदनुबंधिषु ये
स्तैरिषितः इष्टः स एवमुक्तसंगानामिष्टोपवर्गः फलरूप इत्यर्थः १८ एतदेव प्रतिपादयितुं तावत्तत्समाश्रयणस्य दुःशकत्वशंकां निराकुर्वन्नाह॥ ० ॥

नहीति हे ऽसुरात्मजाः अच्युतं सकृदाश्रयणादेवाश्रिताश्रयावयतीत्यच्युतस्तं प्रीणयतः पुंसो वर्द्धयसोऽनहि विद्यते देवतां नरश्रीत्युत्पादकसाधनानुष्ठान
वैङ्गण्यवत्सौतुत्पादकतद्धर्मानुष्ठाने नायासो विद्यते इत्यर्थः अनायासे हेतुरात्मत्वादिति सर्वभूतानामात्मत्वात्सर्वतः सिद्धत्वात्सुलभत्वात्सर्वत इति सार्ववि
भक्तिकस्तस्मिन्नित्यर्थः इह लोके सर्वतः सर्वेषां देवासुरादिस्त्रीपुंसवर्णाश्रमादिविभागमंतरेण सर्वेषां सिद्धत्वादित्यर्थः अयमभिप्रायः नहि सुलभस्य तत्त्वलो
कादेरन्वेषणाय विदूरगमनादिरूपः प्रयासोऽपेक्षितः सर्वत्र सर्वेषां सुलभत्वादेवं सर्वेषामात्मत्वेन सर्वत्र सुलभस्य प्रीणानेनातीवायास इति यद्वा सिद्धत्वा
दित्यस्य स्वर्गादिवत्साध्यः पुरुषार्थः अपि तु सिद्धरूपः साध्यपुरुषार्थसाधने हि यागाद्यनुष्ठानरूपप्रयासवाहुल्यं सिद्धस्य तु तल्लाभोपयुक्तप्रीणनो या
यतत्समाश्रयणमात्रमपेक्षितं इत्यर्थः यद्वा आत्मत्वादित्यनायासे पृथग्घेतुः आत्मा हि स्वशरीरे निरतिशयप्रीतियुक्तस्तद्वत्परशीलस्य लोके दृष्टः
एवं सर्वेषां जीवानां परमात्मानं प्रति शरीरत्वात्तद्विषयिकप्रीतेस्तस्य स्वतः सिद्धाया अपि विपुलापराधैरनभिव्यक्तायास्तदभिव्यक्तावहं किंचिदानुकूल्यादि

नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९ परावरेषु भूतेषु ब्रह्मांतस्था
वरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरोऽ

कमत्रमपेक्षितमिति भावः सिद्धत्वादिति नत्रैवान्यो हेतुः नहि स्ववस्य हिरण्यनिधेस्तत्परिज्ञानमंतरेण न लाभोपयुक्तोऽन्यः प्रयासोऽपेक्षितः एवं पर
मात्मनो निरतिशयपुरुषार्थरूपस्य हृदये स्थितत्वात्तल्लाभोपयुक्तः स्वामित्वशेषित्वादितथाध्यात्म्यज्ञानपूर्वकतत्समाश्रयणमात्रेण तस्य समाश्रि
तविषयकप्रीतिरुदेष्यतीति नातीवायासो विद्यते इत्यर्थः १९ आत्मत्वात्सर्वभूतानामित्येतदेव प्रपंचयति परावरेष्विति चतुर्भिः ब्रह्मा चतुर्मुखोऽ
तो येषां स्थावरान्तादिर्येषां तेषु परावरेषु ब्रह्मादिषु भूतेषु चराचरात्मकदेहभाक्षु चेतनेष्वित्यर्थः तथा भौतिकेषु पृथिव्यादिभूतपरिणामरूपेष्व
चेतनेषु घटपटादिषु महत्सु पृथिव्यादिमहाभूतेषु २० गुणेषु सत्त्वादिषु गुणानां सत्त्वादीनां साम्यं यस्मिंस्तस्मिन्प्रधाने मूलप्रकृतावित्यर्थः गुण
व्यतिकरे गुणवैषम्यवति महदहंकारादौ चेत्यर्थः २१

प्रत्यगात्मस्वरूपेण प्रत्यगात्मा जीवः स्वस्वासाधारणं रूपं शरीरं यस्य तेन प्रत्यगात्मशरीरकत्वेनेत्यर्थः दृश्यमचेतनं रूपं यस्य तेनाचेतनशरीरकत्वेन चेत्यर्थः
ण कः स्वसमानरहितः एवंभूत आत्मा परमात्मा तत्तत्सत्तातः प्रविश्य भर्ता ऽव्ययोऽस्पृष्टशरीरगतविकारः निरस्तनिखिलदोषः षाड्गुण्यपरिपूर्णः ईश्वरो जीवकर्मा
नुगुणं नियंता व्याप्यव्यापकनिर्देश्यः व्याप्येषु व्यापकतया निर्देष्टव्यः अविकल्पितः जातिगुणादिरहितः केवलोऽनुभवः दुःखप्रतिभटं ज्ञानं आनंदरूपं
तदेव स्वरूपं यस्य सः परमेश्वरः स्वव्यतिरिक्तेश्वरांतररहितः गुणसर्गया सत्त्वादिगुणं देहादिगुणान्सृजतीति तया मायया ऽन्तर्हितैश्वर्यः संसारिणामप्र
काशमानमहिमा ईयते सदाचार्योपदेशेन ज्ञायत इत्यर्थः उक्तविधतद्याथात्म्यज्ञानपूर्वकं तत्समाश्रयणमात्रमेव तत्प्राप्तिनिमित्तं तत्प्रीतिहेतुरूपा
य इति भावः अविकल्पितः केवलानुभवानंदस्वरूप इति पदद्वयेनास्थूलमनण्वह्रस्वं सत्यं ज्ञानमनंतं विज्ञानमानंदमिति श्रुत्यर्थः प्रत्यभिज्ञा
यते तेन प्राप्यब्रह्मस्वरूपमुक्तं अवशिष्टैरेकवत्यादिभिः प्रथमांतपदैः प्रत्यगात्मस्वरूपेण दृश्यरूपेण चेति पदद्वयेन च प्राप्यस्य गुणा उक्ताः पर
येषु भूतेषु प्रत्यगात्मस्वरूपेण च जीवस्य तत्संबंधतया परपर्यायतच्छरीरत्वकथनेन प्राप्तुः स्वरूपमुक्तं गुणसर्गया मायया ऽन्तर्हितैश्वर्य ईयत इत्यनेन प्राप्त्य

प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवानंदस्वरूपः परमेश्वरः माय
यांतर्हितैश्वर्य ईयते गुणसर्गया २३ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः २४ ॥ ६ ॥

पायकस्वतंत्रात्मकत्वादिरूपमोहादिप्रवृत्तगुण एव प्राप्तिविरोधिस्वरूपमप्युक्तं तत्प्राप्तिफलं तच्चरणैकैंकर्यादिरूपं संसारं जुषां चरणयोरि
ति वक्ष्यति एवमर्थपंचकमुपदिष्टं भवति पूर्वं मुपेतनारायणमिति तत्समाश्रयणं कर्तव्यत्वेन विहितं तस्य दुष्करत्वशंकापरिहाराय संगात्समाश्रय
णोपयुक्तार्थपंचकज्ञानं सदाचार्योपदेशात्संपाद्यमित्युक्तं एवमर्थपंचकज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्रसादजननद्वारा तत्प्राप्तिहे
तुरित्यभिप्रेतं तत्समाश्रयणं च तद्भक्तिप्रपत्त्यन्यतरात्मकमधिकारभेदेन व्यवस्थितमिति तात्पर्यं २२ २३ यदुक्तं न ह्यच्युतं प्रीणयतो बह्वा
यास इति न दुष्करं तत्प्रीतिनिमित्तं तत्संतोषजनकं वस्त्वंतरमाह तस्मादिति यस्मात्सर्वांतरात्मत्वादिप्राप्यब्रह्मस्वरूपादिज्ञानपूर्वक
तत्समाश्रयणमात्रमेव तत्प्राप्त्यावरतत्प्रीतिहेतुस्तस्माद्यूयं सर्वं आसुरं भावं परद्रोहशीलत्वादिरूपं उन्मुच्य समस्तं तत्प्रकारपरमात्म
शरीरेषु भूतेषु ब्रह्मादिस्तंबपर्यंतेषु यथोचितं दयां सौहृदं च कुरुत यया ऽधोक्षजो भगवांस्तुष्यति तादृशीं भूतेषु दयां कुरुतेत्यर्थः
२४ तुष्यत्यधोक्षज इत्युक्तं ततः किमत आह

तुष्ट इति तस्मिन्नाद्ये जगत्कारणात्मके तेनैतेन भगवति तुष्टे सत्यलभ्यं किं किमपि सर्वमखिलमपि तं सुलभमेवेत्यर्थः यद्यपि सुलभं तथापि निरतिशयपुरुषार्थरूपतच्चरणारविं दानुभवरूपसमस्ततमनुभवद्भिर्माहृशैर्धर्मार्थकामकैवल्यादिकमपि मत्तं पिवद्भिरूपरोदकं इव नेष्यते इत्यभिप्रायेणाह किं इति नोस्माकं गुणव्यतिकरात्कर्मा नुगुणत्वादिगुणापरिणामाद्देवस्य सिद्धा ये धर्मादयः तैर्धर्मार्थकामैः किंन्न किमपि प्रयोजनमित्यर्थः कांक्षितेनाभिलषितेनाऽगुणेनगुणत्रयरहितेन केव ल्येनमोक्षेण वा किं सोपि सपुरुषार्थ इत्यर्थः कथंभूतानां नो भगवच्चरणयोः सारमनुभवात्मकममृतं सारं जुषतां सेवमानानामुपगायतां तद्गुणान्स्तु वतां मनःसात्तच्चरणारविंदानुभवामृते त्रानुभवतां वा कुत्रवणात्तं तद्गुणाननुभवामृते चानुभवतामस्माकं धर्मादयः कूपरोदकप्रायाइत्यर्थः २५ ननु त्वदु क्त मेव सर्वज्ञानैर्नो व्यस्तमुक्तं वः त्रिवर्गमेव पुरुषार्थत्वेनोपदिदिशुः त्वं तु त्रिवर्गमनादृत्य भगवच्चरणारविंदाश्रयणमेव सारतमं मन्यसे किंच गुर्वनुशि ष्टिं ताची क्षिक्यादिशास्त्रेषु त्वदुक्तधर्मः कथं ततेनोपलभ्यते इतः किं तद्धर्मप्रमापकं तत्राह धर्मादीनां समाहारद्वंद्वः धर्मार्थ धर्मोर्थः कामश्चेति य त्रिवर्गोभिहितः आत्मदारायै भोगंधनादिमिति विशेषः यस्त्रिवर्गः पुरुषार्थत्वेनाचार्यैरुक्त इत्यर्थः यच्च तत्प्रतिपादिकेक्षादिरूपा विद्या च तदेतत्सर्वमहं मन्ये त

तुष्टेचतत्र किमलभ्यमनंतआद्ये किं तैर्गुणव्यतिकरादिति ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः २५ धर्मार्थकाम इति चाभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्व सु हृदः परमस्य पुंसः २६

ईक्षा आन्वीक्षिकी सत्तर्कविद्या त्रयी वेदपूर्वभागः नयदमौ दंडनीतिप्रतिपादके शास्त्रे विविधा वार्त्ता कृष्याद्याजीविका त न्नजनकं शास्त्रं एतत्सर्वमहं मन्ये जानाम्येव किंतु यत्स्वसुहृदः परमस्य पुंसः निरुपाधिकसुहृदे परमपुरुषायेत्यर्थः संप्रदाने षष्ठी स्वा त्मार्पणं भगवति स्वात्मसमर्पणं तदेतन्निगमस्य वेदोत्तरभागस्य प्रमेयमिति शेषः उपनिषज्ज्ञानस्य प्रतिपाद्यं सत्यं नित्यमक्षयि पुरुषार्थसाधनं मन्ये इत्यर्थः अस्य कुत्रमिर्णीतमयाहं जानामि नित्यानि श्रुतिरतिशयपुरुषार्थसाधनं भगवत्यात्मसमर्पणं वेदांतप्रतिपाद्यं त्वधिकं जानामीत्यर्थः गुरवस्तु नैतज्जानंतीत्यभि प्रायः आपातनो ज्ञानतो जानंतो वा मन्दतुषारहात्मावान्नानुष्ठानोपयोगितयानिः संप्राप्यं ज्ञानं नीतितात्पर्यं निगमस्य सत्यतेतास्मद्गुक्तार्थे वेदांतभागः प्रमाणं इ त्युक्तं सचतु नित्यात्मानं युंजीत मुमुक्षुर्वै शरणमहं प्रपद्ये इत्यादिरूपः स्वात्मार्पणमित्यत्र न चोपेतनारायणं हरिमाश्रयेते त्याद्युक्तमाश्रयणमात्मसमर्पणं रू पइति विदुत्तं भवति स्वात्मसमर्पणं नाम स्वात्मनो भगवच्छेषैतकस्वभावत्वानुसंधानपूर्वकं भगवति स्वात्मरक्षाभरसमर्पणं रूपं एवं नारायणोपायत्वं नाम तच्च रणाद्यतिरित्युक्तं भवति समनंतरं ध्यायेत्तदुपायनस्यतज्ञत्वात्मकत्वं वक्ष्यति एवं च यथाधिकारं भक्तिप्रपत्त्यन्यतरात्मकं भगवत्समाश्रयणं कर्तव्यमिति तात्प

२४ ७ ५ ३५

ननु गुरुभिरज्ञातमिदं मंतेरणापि सदुपदेशेन कथं त्वं ज्ञातवानित्याशंकायां भगवतो नारदस्यानुग्रहादेवेति वक्तुं तस्य सांप्रदायिकत्वमाह ज्ञानमिति तदेतदुरवापं दु
र्लभं ज्ञानं तस्य सखा भगवन्नारायणो वदरिकाश्रमवासी नारदायाह उपदिष्टवान् ननु यत्र नारदः श्रोता नारायणो वक्ता तस्मिन्नस्मादृशानां कथमधिकार इति
शंकां निराहत्य कांतिनामकिंचनानामनन्यप्रयोजनानां भगवतः पादारविंदरजसाप्लुतानां स्नातानां देहिनां भगवत्सेवासक्तानां सर्वेतज्ज्ञानं स्यादेव ननु त्वया ना
द्वेनेति नियमः २७ अतएव मयापि नारदाच्छ्रुतमित्याह श्रुतमिति विज्ञानेन विवेकादिजन्येन संयुतं ज्ञानं शास्त्रोत्थं विशुद्धं भगवत धर्मरूपं भगवद्व्याप्यात्मवेद
तो नारदाच्छ्रुतं श्रवणेन ज्ञातं भगवतो नारदस्य वचसां श्रवणान्मम ज्ञानविज्ञानसंपत्तिरभूदित्यर्थः २८ तत्र विस्मिताः पृच्छंति दैत्यकुमाराः प्रल्हादेति हे प्रल्हाद
त्वं वयं चाप्येताभ्यां गुरुपुत्राभ्यां मते विनाऽन्यं गुरुं न विद्महे एतदागमनात्पूर्वमेवाहं नारदपार्श्वगत इत्यत्राहुः वालानामपि स्त्रीणामपि सतामस्माकं एतावेव स्व

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात्
२७ श्रुतमेतन्मया पूर्वं ज्ञानविज्ञानसंयुतं धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् २८ दैत्यपुत्रा ऊचुः प्रल्हाद त्वं वयं चापि नर्तेऽन्यं
विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ २९ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः छिंधि नः संशयं सौम्य स्याच्चेद्विस्रंभ
कारणं ३० इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे षष्ठोऽध्यायः ६ नारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः उवाच स्म
यमानस्तान्स्मरन्मदनुभाषितं १ प्रल्हाद उवाच पितरि प्रस्थितेऽस्माकं तपसे मंदराचलं युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति २

रौ नियंतारौ अतस्तयोरन्यत्रागमनं न संभवतीति नः शंका वर्त्तत इत्यर्थः २९ नारद एवात्रागत इति न संभवतीत्याहुः वालस्येति अंतःपुरस्थस्य वालस्य न च म
हतो नारदस्य संगो दुरन्वयो दुर्घटः हे सौम्य प्रल्हाद नोऽस्माकं संशयं छिंधि अपमुद विस्रंभकारणं विश्वासहेतुः स्याच्चेत् असंभावितत्वेनास्माभिरविश्वसनी
यो नारदसंगमः तदुक्तः तत्र यद्यस्मद्विश्वासहेतुरस्ति चेदुपपादनपूर्वकं तत्संगतिविषयं संशयं छिंधीत्यर्थः ३० इति सप्तमे षष्ठः ॥६॥ दैत्यकुमारैरेवं पृष्टः प्र
ल्हादस्तत्संगतिहेतुमुपपादयन् नन्वत्र यथा आत्मोपदेशपूर्वकं सपरिकरं भगवद्भक्तियोगं उपदिष्टवानित्याह भगवान्नारदः एवमित्यं दैत्यसुतैः पृष्टो भागव
तोत्तमः प्रल्हादस्तान्दैत्यपुत्रान्प्रति स्मयमानः मयाऽनुभाषितं स्मरन्नुवाच १ किमुवाच तदेवाह पितरीत्यादिना नाधुनाप्यजहात्स्मृतिरित्यंतेन अस्माकं पि
तरि हिरण्यकशिपौ तपसे तपः कर्तुं मंदराचलं प्रति प्रस्थिते प्रयाते सति इंद्रादयो विबुधा देवा दानवान्प्रति युद्धोद्यमं चक्रुः २ ॥श्रीरामचंद्राय नमः ॥

कथंभूताः संतः लोकोपतापनः लोकानां दुःखकारी पापः पापात्मा स्वपापेनैव दैवात्पिपीलिकैरहिः सर्प इव भक्षित इति वादिनो वदंतः संतः वासव इंद्रप्रमुखा आदिर्येषां ते
युद्धोद्यमं चक्रुरिति पूर्वेणान्वयः ३ ततः किं जातं तत्राह तेषां वासवादीनां वा लोकाघोरं बलप्रयुक्तयुद्धोद्योगं निशम्य दृष्ट्वा सुरैर्वध्यमानाः अत एव भीताः सन्तो
ऽसुरयूथपाः सर्वे त्वरिताः सर्वतो दिशं दुद्रुवुः पलायितवंतः ४ कथंभूताः कलत्रादीन्नावेक्ष्यमाणाः तेषु त्यक्ता स्पृहा इत्यर्थः तत्र हेतुः सर्वे प्राणपरीप्सवः प्राण
मात्रपरित्राणोत्सवः तत्र परिच्छदाः भोगोपकरणानि ५ ततः जयशालिनो ऽमरा देवा राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुंपन् सर्वस्वापहारेणानाश्रितवंतः इंद्रस्तु

~~॥ नारद उवाच ॥ पर्यवस्थिते ऽस्माकं तपसे मंदराचलं युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति २~~ पिपीलिकैरहिरिव दिष्ट्या लोकोपताप
नः पापेन पापो ऽभक्षीति वादिनो वासवादयः ३ तेषामतिबलोद्योगं निशम्यासुरयूथपाः वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं ४
कलत्रपुत्रवित्ताप्तान् गृहान्पशुपरिच्छदान् नावेक्ष्यमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ५ व्यलुंपन् राजशिबिरममरा जयकांक्षि
णः इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ६ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ७ प्राह
चैनां सुरपते नेतुमर्हस्यनागसं मुंच मुंच महाभाग सतीं परपरिग्रहं ८ इंद्र उवाच ॥ आस्ते ऽस्या जठरे वीर्यमविषह्यं सुरद्विषः आस्पतां याव
त्प्रसवं मोक्षे ऽर्थपदवीं गतः ९ ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

राज्ञो हिरण्यकशिपोर्भार्यां मम मातरं च अग्रहीत् ६ तां चेंद्रेण नीयमानां अत एव भयोद्विग्नां कंपितां कुररीमिव चक्रंदंतीं रुदतीं देवर्षिर्नारदो यदृच्छयोपगतः पथि ददर्श ७
दृष्ट्वा चेंद्रं प्राह तदेवाह हे सुरपते ऽनागसं निरपराधामेनां नेतुं त्वं नार्हसि एतां हे महाभाग परेणान्येन हिरण्यकशिपुना परिगृहीतां परदारां इत्यर्थः मुंच मुंच इत्युक्त
आहेंद्रः ८ आस्त इति अस्या जठरे कुक्षौ च अविषह्यम् अस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोर्वीर्यं गर्भरूपेण वर्द्धमानमास्ते तिष्ठति अतो ऽनया प्रसवपर्यंत
मास्यतां मत्समीपे स्थीयतां ततः स्वार्थस्य पदवीमार्गं गतः सन् मोक्ष्ये जातं पुत्रं हत्वा एनां त्यजामीत्यर्थः ९ ॥ श्रीरामचंद्राय नमो नमः ॥ ॥श्री॥ ॥

एवमुक्तो देवर्षिराह सोयंशिशुस्त्वयाहं आसंस्थां मरणं न प्राप्स्यते तत्र हेतुं वदन् तमिमं विशिनष्टि निःकिल्विषः मरणनिमित्तप्राचीनकिल्विषरहितः तत्कुतः महा
भागवतः भगवद्भक्त्यैव ध्वस्तकिल्विष इति भावः महानगुणैः श्रेष्ठोऽनंतस्य भगवतोनुचरः बली महाबलसंपन्नः यद्यपि गर्भस्य दशायां स्वानुग्रहात्पूर्वं न भागवत
त्वादयो धर्मास्तथापि समनंतरमेव स्वेनानुग्रहीष्यमाणस्य पुत्रजन्मकाले जायमानं हि गुरुत्वं यं वक्ष्येदित्युक्तरीत्या भगवते क्षिप्यमाणस्य उक्तधर्मान्वयः इत्यभि
प्रायेण निःकिल्विषइत्यादीनि विशेषणान्युक्तानि ननु इंद्रेणमुक्तां प्रति स्वोपदेशो सति तद्गर्भस्थस्योक्तधर्मसंपत्तिः तस्य तद्धर्मसंपत्तौ हि तद्धेतुकस्ता गइनी
तरेतराश्रयत्वमिति कथं देवर्षिणैवमुक्तमिति चेन्नैवं गर्भस्थं नितरामीश्वरकटाक्षविषयमतएव स्वरस्य च सौहार्दं यदृच्छया सुकृतं तथा विष्णोः कटा
क्षत्रदेवत्वानुकूल्यं च सात्विकैः संभाषणं बहुनानिह्याचार्यप्राप्तिहेतवः इत्युक्तहेतुषट्कसंपन्नं देवज्ञो देवर्षिरालक्ष्य तव येतस्यामनुच्यमानायामप्यदं

नारद उवाच॥ अयंनिःकिल्विषःसाक्षान्महाभागवतोमहान् त्वयान प्राप्स्यतेसंस्थामनंतानुचरोबली १०

प्रल्हाद उवाच इत्युक्तस्तांविहायेंद्रोदेवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनांपरिक्रम्यदिवंययौ ११

ततोमेमातरमृषिः समानीयनिजाश्रमं आश्वास्याहोष्यतांवत्से यावत्तेभर्तुरागमः १२

ति तथेत्यवात्सीद्देवर्षेरंतिकेसाकुतोभया यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्तत १३

ऋषिंपर्यचरत्तत्रभक्त्यापरमयासती अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये १४

उक्तधर्मयुक्तं नन्वनंकरवाणपतो यं त्वया संस्थां न प्राप्स्यतीत्युक्तवानिति नेतरेतराश्रयाः १० इतीत्थमुक्त इंद्रो देवर्षेर्नारदस्य च वचो मानयन्
गौरवादनुपालयन् ताराजमहिषीं विहायानंतस्य भगवतः प्रियो यो हं तस्य मम भक्त्यैनां मम मातरं प्रदक्षिणीकृत्य दिवं प्रतिययौ ११ ततस्त्वृषि
र्नारदः मम मातरं स्वाश्रमं समानीय गौरवमपि स्वाश्वास्य सांत्वयित्वा हे वत्से बाले तव भर्तुर्यावदागमस्तावत्पर्यंतं त्वया इहास्मिन्ममाश्रमेनुष्यतां
स्थीयतामित्युवाचेति शेषः १२ ततस्तथेत्यंगीकृत्य सा मम माता देवर्षेरंतिके समीपे नास्ति कुतोपि भयं यस्याः सा तादृशी अवात्सीदुषितवती दैत्यप
तिरुग्रतपसो यावन्नन्यवर्तत तावत्सती मन्माता अंतर्वत्नी गर्भिणी स्वगर्भस्य क्षेमाय परत्राणाय इच्छया स्वभर्तुरागमनानंतरं प्रसूतये च पर
मया भक्त्या ऋषिं नारदं पर्यचरत् शुश्रूषितवती १४ ततस्तां देवर्षिरनुजग्रहे इत्याह॥ ॥श्री॥ ॥ॐ॥ ॥ ॥म॥ ॥ ॥

ऋषिभिरिति ईश्वरः समर्थः ऋषिः तस्याः परिचरंत्या मन्मातुर्मामप्युद्दिश्य निर्मलं धर्मस्य तत्वं ज्ञानं चेत्युभयं प्रदात् धर्मो भगवद्भक्तियोगलक्षणस्तस्य तत्वं याथात्म्यं तदंगभूतं ज्ञानं देहविविक्तप्रत्यगात्मयाथात्म्यज्ञानं चोपदिष्टवानित्यर्थः १५ तदुभयमुपदिष्टं तदुभयं मम मातुः स्त्रीत्वात्कालस्य दीर्घत्वाच्च तिरोदधे विस्मृतमभूदित्यर्थः ऋषिणा भगवता नारदेनानुगृहीतं मां तु सा स्मृतिः तदुपजनितं स्मृत्यात्मकं ज्ञानमधुनापि नाजहान्न तत्याज १६ नन्वेवं प्रह्लादस्य मित्यादिना यद्दैत्यकुमारैः पृष्टं तस्योत्तरमुक्तमथैतत्स्वसंप्रदायागतं धर्मस्वरूपं ज्ञानं जिघृक्षा वर्त्तते चेद्भवतां मदनुग्रहेण तदुभयं संपत्स्यत इत्याह भवतामिति यदि भवंतो मद्वचः श्रद्दधत्ते मदुक्तार्थग्रहणतद्दृढीकारविषये त्वरायुक्ताश्चेद्भवतामपि तदुभयं भूयात् श्रद्धामंतरेण उपदिष्टमपि तत्त्वं न प्रतिष्ठितं भवतीत्याह वैशारदीति वैशारदी निपुणतरा धीस्तत्त्वविषया बुद्धिः स्त्रीणां बालानां श्रद्धातः एव भूयान्ननु तां विनेत्यर्थः तत्र दृष्टांतः मे यथेति यथा श्रद्धावतो मम वैशारदी बुद्धिरभूत् श्रद्धारहिताया मन्मातुर्नाभूदेवं सर्वेषां बालानां स्त्रीणां च श्रद्धात एव

ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्य तत्वं ज्ञानं च मामप्युद्दिश्य निर्मलं १५ तत्तु कालस्य दीर्घत्वात्
ना स्त्रीत्वान्मातुस्तिरोदधे ऋषिणानुगृहीतं मां नाधुना जहात् स्मृतिः १६ भवतामपि भूयान्मे यदि श्रद्दधते वचः वैशार
दी धीः श्रद्धातः स्त्रीबालानां च मे यथा १७ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः फलानामिव वृक्षस्य कालेनेश्व

ज्ञानं प्रतिष्ठितं भवत्यन्यथा मन्मातुरिवाप्रतिष्ठितमित्यर्थः १७ नन्वेवं तेषां श्रद्धामुत्पाद्य श्रद्धायुक्तान्प्रत्युषून्न दैत्यकुमारानालस्य तेभ्यो भगवद्भक्तियोगमुपदिदिक्षुस्तावत्तदंगभूतप्रकृतियुक्तात्मयाथात्म्यज्ञानयोगमुपदिशति जन्माद्या इत्यादिना तावज्जीवात्मस्वरूपे देहाद्विलक्षणं विवक्षुर्देहधर्मानाह जन्माद्या इति ईश्वरी गुणपरिणामापादनसमर्था मूर्तिराकारो यस्य तेन कालेन निमित्तभूतेन जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवंरूपाः षडिमे षड्भावविकाराः दृष्टाः प्रत्यक्षमुपलभ्यमाना देहस्यैव धर्माः नात्मनः यथा वृक्षसंबंधफलानां जन्मादयो दृश्यंते न वृक्षस्य तद्वदात्मन एकरूपत्वेनैवस्थितेस्य देहस्य दृष्टेत्यर्थः आत्मव्यतिरिक्तस्यास्थिरस्यैकरूपस्य वस्तुनो भावात्कथंचित्तद्दर्शनार्थमस्थिरः षड्भावविकारवान्नपि वृक्ष आत्मस्थानत्वेन निदर्शितः १८ तदेवं देहधर्मैस्तैर्लक्षणैर्नात्मनो देहाद्भेदो दर्शितः अथ स्वधर्मैरेवात्मनो देहाद्भेदमाह ॥ ॥ ॥ श्रीमते रामानुजाय नमः ॥ ⁘ ॥ श्रीरामचंद्राय नमो नमः ॥ ⁘ ॥

आत्मेति आत्मेतिविशेष्यनिर्देशः आत्मा प्रत्यगात्मा नित्य उत्पत्तिविनाशरहितः अव्ययोऽपक्षयरहितोऽविक्रिये विशिष्टभावत्रयरहितः यद्यपि दृष्टा देहस्यात्मन ऽत्यन्ते ते व षड्भावविकाररहितत्वमुक्तं तथापि फलानामिव वृक्षस्येति दृष्टांतवलाद्य पाकलगतोत्पत्त्याद्यता प्रत्ययस्यापि वृद्धस्य स्वगतोत्पत्त्याद्याप्रयत्नमेवं देहगतोत्पत्त्याद्यत्वाभावेपि स्वगतोत्पत्त्याद्यंतराप्रयत्नं प्रसक्तं तदनेन निषिध्यते एवं वस्वतोन्यतो वा षड्भावविकाररहितइ तिफलितं शुद्धः प्राकृतरागादिगुणैरकलुषितस्वरूपः एकः ज्ञानेकाकारतया सर्वेषु देहेष्वेकरूपः एको व्रीहिरिति वज्जात्याभिप्रायक एकत्वव्यपदेशः ननु वत्तत्कत्वाभिप्रायकः आत्मव्यक्तिवहुत्वस्य वहुप्रमाणप्रतिपन्नत्वात् क्षेत्रज्ञः शरीरं जानातीति तथा ममेदं शरीरमिति जानीत्यर्थः अनेन ज्ञानाश्रयत्वमुक्तं स्वपश्यतीतिस्वदृक् स्वात्मभासमानः अनेन ज्ञानस्वरूपत्वमुक्तं आश्रयः देहेंद्रियादीनामाधारः हेतुर्देहेंद्रियव्यापारहेतुः व्यापकः धर्मभूतज्ञानेन व्यापकः स्वरूपस्याणुत्वात् असंगी जीवान्तरेणासंबंधरहितोऽनावृतः स्वरूपस्वभावतिरोधानरहितः इदमुक्तं भवत्यस्य स्वाभाविकं जी

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंगपनावृतः १९
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं यथा
ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं

वात्मस्वरूपं यथा ऽनावृतः स्वरूपतिरोधानरहितः बद्धदशायां धर्मभूतज्ञानस्येव कर्मणा तिरोहितत्वाद् देहस्त्वमितः अपवा नष्टुः देवमनुष्यादिरूपेणानानाविधः ज्ञानानाश्रयो ऽन्येषां यावत्सत्वमनाश्रयः परगहेतुर्व्याप्यः पितृपुत्रत्वादि संबंधवान् संकोचवांश्चेति भावः १९ अस्त्वेवं देहात्मनोर्वैधर्म्यं ततः किमत आह एतैरिति विद्वान्नित्यं देहात्मनोर्याथात्म्यविदेतैरुक्तैरात्मनो लक्षणैः परैरुत्कृष्टैरपादकैर्देहादावादिशब्देन देहानुबंधिपुत्रादि संग्रहः अहं ममेत्यसदभिमानं मोहजमज्ञानजं त्यजेत् देहात्माभिमानादिकं त्यक्त्वोक्तलक्षणलक्षितात्मस्वरूपावलोकनपरो भवेदिति भावः २० ततोपि किंमत आह स्वर्णमिति यथा हेमकारः तदभिज्ञः हेमप्रकृतीनां ग्राव्णामभिज्ञः प्रथमं क्षेत्रेषु हेमग्रावाणामुत्पत्तिभूमिषु योगैः खननादिभिरुपायैर आप्नुयाग्रावाण इति शेषः विभक्तिविपरिणामेनानुषंगो वा पश्चाद् दहनादिभिरुपायैर्ग्रावमुक्तं हेमाप्नुयादेवं देहरूपेषु क्षेत्रेष्वात्मयोगैर्देहविलक्षणात्मयाथात्म्यविवेचनसाधनैरुपायैरात्मविदुक्तविधात्मयाथात्म्यदर्शी यथावद्ब्रह्मणः स्वरूपे ताप्णुणे प्रविर्गति प्राप्य बृहतः पुरुषोत्तमस्य गतिमवगतिं तद्याथात्म्यविज्ञानं लभेत प्राप्नुयात् यथावस्थितं तत्साक्षात्कारं लभेतेतियावत् २१

एवं ज्ञानयोगस्य भगवत्साक्षात्कारावहभक्तियोगांगत्वमुक्तं एते द्वादशभिरित्यादिनोक्तास्तन्नावप्रकारं देत्रेषु देहेषु तथात्मयोगैरित्युक्तमेव देहविलक्ष
णात्मस्वरूपविमर्शनं च तत्प्रकारं वयमपि वचमि: अष्टाविति तावद्भूमिरापो नलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं च मे भिन्ना प्रकृतिरष्टधेत्यु
क्ता अष्टौ प्रकृतयः अत्र भूम्यादिशब्दैर्गन्धादितन्मात्रसहितानि पृथिव्यादीन्युच्यन्ते बुद्धिशब्देन महत्तत्वं त्रयः सत्वादयस्तद्गुणा एव प्रकृतिगुणा एव न त्वा
त्मनो गुणाः षोडश विकारा विकृतयः ते च कर्मज्ञानेन्द्रियाणि दश पंच प्राणाः बुद्धिश्चित्तं वा एकं संभूय षोडश आचार्यैः गीताचार्यादिभिः प्रोक्ताः पु
मानेकः एकस्मिन् शरीरे एकः पुमान् जीवः प्रोक्तः अतः समन्वयात् एवमेव हि प्रतिशरीरं नियमेन सुखदुःखप्रतिसंधानजीवेश्वरवद्भुक्तशिष्या
चार्यत्वादिव्यवस्थायाः सम्यगन्वयादुपपत्तेरित्यः सर्वशरीरेषु जीवैकत्वे उक्तविधाव्यवस्थादुर्घटा स्यादिति भावः २३ देहस्तु सर्वसंघातः प्र
कृतिविकृतिसंघातात्मकः स च जगज्जंगमं स्थास्नुः स्थावरश्चेति द्विविधः एवं वस्तुस्थितिरिति भावः अस्त्वेवं वस्तु तस्यात्मविवेचनस्य किमायातं
तत्राह अत्रैव देहे एव पुरुषः प्रत्यगात्मा मृग्य विवेचनीयः कथं किं कुर्वन्नेति नेतीति शब्दप्रत्यक्दृष्टप्रकारद्योतकः इति नेति न एवं एवंविधः एवं

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२ देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २४ अन्वयव्यतिरेकेण विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २५

विधो न भवति गंधवान् भवति रसवान् भवति रूपवान् भवतीत्येवं प्रकारेणेत्यर्थः अतदात्मव्यतिरिक्तं यत्पृथिव्यादिवस्तु तत्त्यजन् तस्मिन्नात्मबुद्धिमकुर्वन्नत
द्विलक्षण आत्माऽन्वेषणीय इत्यर्थः अनेनाहं ममेत्यसद्ग्राहं देहादौ मोहजं त्यजेदित्युक्तं विवृतं भवति २४ तथात्मयोगैरित्युक्तानात्मयोगान् विवृण्वन्नेतैर्मृ
ग्यत इत्याह अन्वयेति अन्वयव्यतिरेकेणान्वयेन व्यतिरेकेण चाहं जानामि पश्यामि द्रक्ष्यामीत्येवं बुद्ध्यादीनां ज्ञानरूपाणां ज्ञातृत्वेन अहमर्थ एवान्वयेन व्य
तिरेकेण सुषुप्तिः सर्वेषां व्यतिरेकप्रतीत्या चेत्येवं रूपेण विवेकेन नानात्मनो विभागेन तु शातानिर्मलेनात्मनाऽहमहमिति प्रतीयमा
नेनात्मनाऽहं प्रतीत्या चेत्यर्थः सर्गस्थानसमाम्नायैः सर्गस्थित्यादिपरवेदान्तवाक्यानुसंधानैः एतैरुपायैर्देहादिभ्यः परमात्मानं विमृशद्भिरसत्वरैरव्य
ग्रचित्तैः पुंभिरात्मा मृग्य इति पूर्वेणान्वयः सन्मूलाः सोम्येमाः सर्वाः प्रजाः इत्यादि सर्गस्थानादिसमाम्नायार्थानुसंधाने युक्ते प्योन्येप्यात्मविमर्शनोपायाः
परमात्मप्रदोमवतत्त्वविरत्वादयोऽवगता भवंतीत्यभिप्रायेण सर्गस्थानसमाम्नायैरित्युक्तं २५ अन्यानपि तद्विमर्शनोपायान् वदन्नेतैः प्रत्यगात्मस्वरूपं देह

बुद्धेरिति जागरणं स्वप्नः सुषुप्तिरित्येतास्तिस्रो बुद्धेर्वृत्तयः व्यापाराः ताः वृत्तयो येनैवानुभूयंते स एव परः देहेंद्रियबुद्ध्यादिभ्योऽन्यः अध्यक्षः देहादीनां द्रष्टा धारको वा पुरुषः प्रत्यगात्मा जागरणं नाम बाह्येंद्रियव्यापारानुविद्धा वृत्तिः स्वप्नः तदननुविद्धा सुषुप्तिर्बुद्धिवृत्त्युपरमः तदुपरमोऽपि तत्संबंधेनैवेति बुद्धेर्वृत्तय इत्युक्तं एतद्वृत्तित्रयज्ञानाश्रयत्वेन यः प्रतीयते स प्रत्यगात्मेति भावः २६ एतदेव सदृष्टांतं विशदयन्नेवमादिभिरुपायैरात्मस्वरूपं बुध्येदित्याह एभिरिति एभिस्त्रिवर्णैः त्रिविधैः सत्वादिगुणत्रयमूलकैर्वा पर्यस्तैर स्थिरैः क्रियोद्भवैः पुण्यपापात्मककर्मनिमित्तैर्बुद्धिभेदैर्बुद्धिवृत्तिभेदैर्जागरादिभिरुपलक्षितमात्मनः स्वरूपं विद्यात् यथा गंधैः कुसुमादिगतैरुपलक्षितं तदाश्रयं वायुं बुध्यति तद्वत् कुतः अन्वयात् जागरणाद्यवस्थात्रयेऽन्वयादनुवृत्तेः यथा पवनात्मककर्मणा तत्तत्संकजादिकुसुमादिगतं गंधमानीय तदाश्रयतया तदन्वितं प्रवहंतं वायुं ततः पृथग्भूतमुपलक्षते वार्धिवकुसुमादिगतस्य गंध

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः परः २६
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुद्ध्येद्गंधैर्वायुरिवान्वयात् २७

स्य न वायुगुणत्वं अयं तदन्वयाच्च वायोस्तदाश्रयत्वमप्येवं तदन्वयापायेकेवलस्पर्शगुणस्य वायोरुपलंभः ततः गंधात्पृथगेव वायुः स्वाभाविकस्पर्शगुणा इति तथैवोपलक्षते तथा बुद्धिभेदो न स्वभावतः आत्मगताः तेषां स्वाभाविकत्वे स्यात् तद्बुद्धिभेदत्यतमस्योपलंभप्रसंगः किंतु कर्मायत्तबुद्धिसंबंधप्रयुक्त तद्वृत्त्यन्वयात् तदनुभवोपलंभः स्वभावतस्त्वात्मा तद्वृत्त्यनन्वित एव ततः पृथग्भूत इत्येवं तं बुध्येदित्यर्थः २७ तदेवं देहादावसज्जावत्यागप्रकारो देहादिविलक्षणत्वेनात्मविमर्शनप्रकारश्चोक्तः अथैवंभूतस्य प्रत्यगात्मनः कुतस्तद्देहादिसंबंधरूपः संसारो यस्मिन्नसज्जावइत्याशंकायां त्रिवर्णैः क्रियोद्भवैरिति परिहारः सूचितः तमेव विशदयितुं स्वरूपयाथात्म्याज्ञानमूलकदेहात्मभ्रमादिरूपाज्ञानादिमोहनिमित्तगुणकर्मसंबंधप्रयुक्तः संसारस्तत एवात्मनः स्वरूपप्रयुक्तत्वाभावादयुक्तार्थो योपाधिकत्वाद्यावदुपाधिबुद्धिसंबंधद्वारानुवर्तत इत्याह ॥ ५ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

एतदिति एवबुद्धिसंबंधएवद्वारं यस्य सः संसारः स्वप्न इवास्थिरत्वात्स्वप्नतुल्यः अतएवापार्थः अबुरूपार्थोपि पुंसः प्रत्यगात्मनोऽर्प्यते प्राप्यते कर्तुः पुंसः शेषत्वविवक्षया षष्ठी पुंसां संसारः प्राप्यतइत्यर्थः बुद्धिसंबंधे हेतुं वदन् संसारं विशिनष्टि अज्ञानमूलइति अज्ञानं कारणं यस्य अज्ञानमूलः स्वपरयाथा थात्म्याज्ञानफलकबुद्धीन्द्रियसंबंधनिमित्तदेहतदनुबंधिरूपः संसारइत्यर्थः कथमुक्तविधस्यात्मनोऽज्ञानसंबंधइतिशंकांनिराकुर्वन् संसारमेव विशिन ष्टि गुणकर्मनिबंधनइति गुणकर्माधीनः सत्वादिगुणपरिणामानुगुणकर्मपरिपाकाधीनइत्यर्थः अयंभावः स्वभावतः सर्वेप्रत्यगात्मानः आत्मानि त्यो व्ययइत्याद्युक्तविधा अप्यनादिकर्मणा सत्वादिप्राकृतगुणसंसृष्टास्तत्र तत्तत्कर्मपरिपाकवशाद्गुणपरिणामः ततः स्वपरयाथात्म्याज्ञानं ततोगुण कर्मानुरूपं परमात्मस्वरूपबुद्धीन्द्रियसंबंधः ततोदेहतदनुबंधिसंबंधरूपः संसारस्ततोदेहात्माभिमानः ततः पुनः कर्म ततः पुनर्गुणपरिणामादिरित्येवं परिवृत्तिर्घटीयन्त्रवत्प्रवाहरूपेणानुवर्ततइति २८ अतोयमुक्तविधस्यात्मनोदेहात्माभिमानादिरूपाज्ञानमूलककर्मनिमित्तः संसारस्तस्मान्निवृत्तिः कर्मनिर्हरणोपा

एतद्द्वारेहि संसारोगुणकर्मनिबंधनः अज्ञानमूलोऽपार्थोपि पुंसः स्वप्नइवार्प्यते २८
तस्माद्भवद्भिः कर्तव्यः कर्मणां त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमोधियः २९
तत्रोपायसहस्राणामयं भगवतोदितः यदीश्वरे भगवति यथायैरंजसा रतिः ३०

योनुष्ठेयइत्याह तस्मादिति तस्मात्संसारस्याज्ञानमूलगुणकर्मायत्तत्वात्त्रिगुणात्मनां सत्वादिगुणत्रयपरिणामहेतूनां यद्बीजंमूलंदेहात्मभ्रमादि रूपंतस्यनिर्हरणं निर्हरणोपायात्मकोयोयोगोवक्ष्यमाणः सचधियः प्रवाहः शब्दादिविषयकं ज्ञानंतस्योपरइतिरूपोभवद्भिः कर्तव्यः २९ वक्ष्यमा णंभगवद्भक्तियोगरूपंबीजनिर्हरणोत्तमोपायत्वमाह तत्रेति तत्रावश्यंप्रवीजनिर्हरणोपायेकर्तव्येसतिउपायसहस्राणांमध्येऽयमेवोत्तमउपायः कथितोभगवताकोसौमेः साधनैर्भगवतीश्वरेऽनुरागः प्रीतिरंजसा सुखेन यथास्यादित्येषः स्वसाधनैरनुगृहीताभगवतिरतिरित्येष्वेवउत्तमउपाय इति नाहंवेदैर्नतपसानदानेननचेज्यया भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुनेति नमेभक्तः प्रणश्यतीत्यादिना तत्रतत्रभगवताप्रोक्तइत्यर्थः रति रित्यनेननिरतिशयप्रीतिरूपाभक्तिरुच्यते तस्याएवसाक्षाद्भगवत्प्राप्तिहेतुत्वंसंसारनिवर्तकत्वंचसूच्यते ३० साचकैः साधनैर्निष्पद्यतेइत्यपेक्षा यांसाधनानिवदन्नतैरयत्नकृतेनध्यानयोगेननिष्पद्यतइत्याह॥ श्री ॥रामकृष्णाभ्यांनमः श्रीरामचंद्रोजयतितरां॥ श्रीरामचंद्रायनमः॥

गुरुशुश्रूषयेत्यादिभिश्चतुर्भिः गुरुशुश्रूषया गुरूणां परिचर्यया गुरुभ्यस्तत्त्वश्रवणेच्छया वा भक्त्या गुरूणां भक्तोपासनेन सर्वेषां गुर्वपेक्षितानां मध्ये लब्धस्य तदिति लाभः स्वस्य सुलभं यत्तस्य समर्पणेन यथाशक्ति तदपेक्षितसमर्पणेनेत्यर्थः साधुर्यया भवति तया भगवद्भक्तानां संगेन साधवः क्रोधमात्सर्यलोभाशुभमतिशादिरहितस्वरूपसाधुलक्षिताः भक्ताः तेषां संगेन वा ईश्वराराधनेनार्चाविग्रहाराधनेन हृदयकमलस्थस्य समानेनोपचारेणाराधनेन वा अर्हणादिभिरित्यर्चाराधनस्य वक्ष्यमाणत्वात् ३१ तत्कथयामीश्वरकथायां श्रद्धया श्रवणेन सत्याईश्वरस्य गुणानां कर्मणां च कीर्त्तनैः तस्येश्वरस्य पादांबुजयोर्ध्यानात्तल्लिंगस्यार्चाविग्रहस्येक्षणार्हणादिभिर्दर्शनपूजादिभिरादिशब्देन प्रणामपरिक्रमादिसंग्रहः ३२ किंच भगानीश्वरः सर्वभूतेषु अंतरात्मतया वर्त्तते ऽतः सर्वाणि भूतानि भगवदात्मकानीति बुध्या यथाभक्ति यथायोग्यं तद्भूतान्यपेक्षितैः कामैः साधुमानयेत्संमानयेदित्यनेन च ३३ इत्येतैः साधनैर्जितैः षण्णां काम

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च संगेन साधुभक्तानामीश्वराराधनेन च ३१ श्रद्धया तत्कथायां च कीर्त्तनैर्गुणकर्मणां तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३२ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः इति भूतानि मनसा कामैस्तैः साधु मानयेत ३३ इति निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति यया संलभते रतिं ३४ निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ३५

क्रोधलोभमदमात्सर्याणां वर्गैर्भगवतीश्वरे भक्तिः क्रियते कर्त्तव्येत्यर्थः भक्तिरहरहर्ध्यानं एवमहरहः क्रियमाणया ध्यानात्मिकया भक्त्या प्रीत्यात्मिकां प्रकृष्टां भक्तिं लभत इत्याह वासुदेव इति यया ऽहरहः क्रियमाणया गुरुशुश्रूषादिसाधनानुगृहीतया अनुध्यानात्मिकया निरंतरसाक्षात्कारेछात्मिकया भक्तिपरंपर्यापया वासुदेवे भगवति रतिं परमभक्त्यापरंपर्यायभक्तां निरंतरानुवृत्त्यात्मिकां प्रीतिरूपां लभत इत्यर्थः ३४ एवंविधभक्तियोगनिष्पत्तिलिंगानि वदंस्तेन परिनिष्पन्नभगवद्भक्तियोगेन परमात्मानं प्राप्नोतीत्याह निशम्येति त्रिभिः यदा भगवतो गुणानतुल्यान् नितरसाधारणान् तथा लीलातनुभिः स्वेच्छोपात्ताप्राकृतदिव्यावतारविग्रहैः रामकृष्णादिभिः कृतानि कर्माणि चेष्टितानि निशाम्य श्रुत्वातिहर्षेण जाता उदंचिताः पुलका रोमाण्येपश्रुणि आनंदबाष्पविंदूनि चते गद्गदं यथा भवत्येवं प्रोत्कंठो मुक्तकंठश्च सन्नुदगायति उच्चैर्गायति रौति ध्वनति नृत्यति च ३५ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

३५ क्वचिद्यदा च ग्रहग्रस्त इव हसति क्वचिदाक्रंदते रोदिति क्वचिच्च ध्यायति क्वचिच्च जनं भगवदात्मकं वंदते नमस्करोति क्वचित्पुनः पुनः श्वसन् श्वासं
मुंचन् गतत्रपो निर्लज्जः हे नारायण जगत्पते हरे इतीत्थं वक्ति तदेत्युत्तरेणान्वयः इयमेव भक्तियोगस्य निष्पत्त्यवस्थेति भावः ३६ तदा एवं निष्पन्न
भक्तियोगावस्थायां पुमानुक्तभक्तियोगनिष्ठः महीयसा सर्वोत्तमेन भक्तियोगरूपेणोपायेन प्रारब्धावसाने मुक्तं समस्तं बंधनं भगवत्प्राप्तिविरो
धिपूर्वोक्तपुण्यपापात्मकाघरूपं यस्मात्तादृशः निर्दग्धः नितरां दग्धः बीजानुशयः संसृतिमूलभूतकर्मवासनात्मको यस्य तस्य भगवतो भावः
प्रकारः आकृतिरित्यर्थः तस्य भावो भावनानुध्यानं तेनानुकृतः आशयोंतःकरणमाकृतिर्विग्रहश्च यस्य भगवता समानरूप इत्यर्थः अधोक्षजं
भगवंतं उपेति प्राप्नोति ३७ उपेतु ततः किमत आह अधोक्षजेति इहलोके शुभात्मनस्तापत्रयदुःखितमनसः शरीरिणः संसृतिचक्रं चक्रवत्परि
वर्तमानाऽनिष्टरूपा संसृतिस्तस्याः शातनं निवर्तकमधोक्षजस्यालंभः स्पर्शः प्राप्तिरिति यावत् एवं भगवत्प्राप्तेरनिष्टनिवर्तकत्वमुक्तं अथेष्ट

यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ३६ तदा पु
मान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं ३७ अधो
क्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३८ ॥ ॥

प्रापकत्वमाह तदधोक्षजालंभनमेव ब्रह्मनिर्वाणसुखं ब्रह्मसंबंधी यो यन्निर्वाणं निर्वाणो मोक्षस्तद्दशायामनुभूयमानं इत्यर्थः तत्सुखं यस्मिं
स्तादृशं यद्वा निर्वाणं निरतिशयानंदः ब्रह्मरूपं यन्निर्वाणं तत्स्वसुखमनुभवरूपं यस्मिन् तादृशं बुधा ब्रह्मविदो विदुः जानंतीति वर्त्तते इष्टप्रा
पणत्वम् भगवत्प्राप्तिसाधनभूतस्तद्भक्तियोगस्ततो यूयं हृदये हृज्जते अवगतो हृदयस्थाने गते जीवे इत्यर्थः अनेन तमात्मस्थमनुपश्यंति धी
रास्तेषां शांतिः शाश्वती नेतरेषां इति श्रुत्यर्थः प्रत्यभिज्ञायते हृदि अयमात्मा प्रतिष्ठित इति श्रुतेः तस्मिन्नीश्वरं नियंतारं तत्र अवस्थितं हृदयपुंडरी
के भगवंतं भजध्वं ३८ तदेवं निरतिशयानंतस्थिरफलभगवत्प्राप्तिसाधनतद्धर्मानुष्ठानस्य दुःशकत्वाशंकानिरासनं श्रुतं प्रीणायते वक्ता यास
इत्युपक्रमात् तद्धर्मतदनुष्ठानप्रकारकथनेन तदाशंकां निरस्य अपि एव यस्मिन् सुकरे भगवद्धर्मानुष्ठाने न कोऽपि प्रयास इत्युपसंहरत् वैराग्यजननाय स्व
र्गस्वाराज्याद्यर्वाचीनपुरुषार्थस्य सातिशयत्वात् अस्थिरत्वं च वक्तुं तावद्दृष्टांतेन यावैषयिकस्यैहिकलौकिकसुखस्य तुच्छत्वमाह ॥ ॥श्री॥ ॥ ३५

कऽइति द्वाभ्यां हेऽसुरबालकाः स्वस्वकीये हृत्पद्मे छिद्रवदाकाशवत्सतः वर्त्तमानस्य सत्यकामत्वादिनित्याविर्भूतगुणाष्टकाश्रयस्यात्मनः परमात्मनो गृ
यदेहिनां समामन्यतः साधारणतया सख्युः द्वासुपर्णा इत्यादिश्रुत्युक्तसख्ययुक्तस्य हरेरुपासनेको वा ती व प्रयासः न को पीत्यर्थः विषयाणां शब्दादीनां उप
पादनैर जनेः किं न किमपि तेन तु छा इति भावः छिद्रवत्सतऽइत्यनेन यावान् वाऽयमाकाशस्तावानेषोंतर्हृदय आकाश इति दहरविद्योदितभूताकाशदृ
ष्टांतोभिमतः तत्र हि भूताकाशस्येवाग्निवायुसूर्याचंद्रमौ विद्युन्नक्षत्राणि दिक्कृत्स्नं जगदाधारत्वं हृत्पुंडरीकस्य दहराकाशस्य प्रतिपादितमुभावग्निश्च
सूर्याचंद्रमसौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति एवं हृत्पुंडरीके दहराकाशरूपेण वर्त्तमानस्यापहतपाप्मत्वादि
गुणाष्टकयुक्तस्य हरेरुपासनं सुशकमित्यभिप्रायः ३९ किं विषयोपपादनैरित्यनेन सूचितं विषयाणामल्पास्थिरत्वसातिशयत्वरूपं तुच्छत्वमुपपादयन्
निरायः धनानि सुतादयऽइत्यादिशब्देनान्येपि त्रादयो देहानुबंधिनो विवक्षिताः मही क्षेत्रमाजीविकारूपं विषयो वा कुंजरा गजाः तेषां कोशाः शालाः धनको

कोतिप्रयासोऽसुरबालका हरेरुपासने स्वहृदि छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनां समामन्यतः किं विषयोपपादनैः ३९ रायः क
लत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ४० एवं हि लोकाः क्र
तुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ४१ ॥श्रीरामचंद्रायनमः॥

शाः भूतयऽइत्यनेनोक्तत्वात्मृतयः भोग्यभोगोपकरणादिसमृद्धयः सर्वे चैतेर्थकामाः काम्यमाना अर्थाः क्षणेनाल्पकालेन भंगुरमायुः स्वस्यानंदयेषांतेऽतए
व चचलाः अस्थिराः मर्त्यस्य मरणशीलस्य पुंसः कियत्प्रियं सुखं कुर्वंति न किमपि सातिशयमस्थिरमल्पमेव सुखं जनयंति न तु निरतिशयमनंतं स्थिरं चेत्य
र्थः ४० अथैतदृष्टांतेन स्वर्गादेरपि सातिशयात्वास्थिरत्वाभ्याह एवं हीति यथाऽरैपभूतिजन्यानि सुखानि तुच्छान्येव क्रतुभिर्यागादिकर्मभिः कृताः संचि
ताऽअमी स्वर्गादयो लोका अपि क्षयिष्णवः नश्वराः सातिशयाः न निर्मलाः दुःखमिश्राश्चेत्यर्थः अत्र तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पु
ण्यचितो लोकः क्षीयते नवाघेतेऽहढायज्ञरूपा परीक्ष्य लोकान्कर्मचितानित्यादिश्रुत्यर्थोभिप्रेतः यत एवं तस्माददृष्टश्रुतदूषणं न विद्यते दृष्टश्रु
तवद्दूषणं यस्य श्रुतिस्मृतिस्यां समदूषितं किंतु प्रशस्तमित्यर्थः तं भक्त्यैकयोपायेनत्वं परमपुरुषमात्मलब्धये आत्मलाभायात्मनः सत्तायै भजत अत्र
सायामंस रतत्रात्मनो ततः स्वावरत्वादिप्राप्याऽसत्वायते वस्यादिति भावः ४१ किंचवैषयिकसुखलिप्सया कुर्वन्नपि न तत्प्राप्नोति किंतु तद्विपरीतं

यदर्थमिति विद्वांसमात्मानं मन्यत इति विद्वन्मानी केवलकर्ममीमांसोपचितबुद्धिरित्यर्थः नरः यदर्थं यद्वैषयिकसुखार्थमिहलोकेऽसकृद्वारंवारं कर्मा
णि यागादीनि करोति स ततोऽभिलषितसुखाद्विपरीतं फलं दुःखात्मकमेवामोघमवश्यं विंदते प्राप्नोति ४२ तदेव दर्शयति स चेति यः पुमाननीहायां निमि
त्तभूतायां वैषयिकसुखार्थं व्यापारारंभात्मिकां निर्व्यापाराद्धेतोः सुखावृतः सुखेन व्याप्त आसीत् स एवेहया आरंभेन व्यापारेण हेतुना दुःखमेवाप्नोति स्वर्गादि
सुखार्थं यागादिव्यापारेण दुःखमेवाप्नोतीत्यर्थः भगवत्प्राप्त्यर्थं भक्तियोगानुष्ठानदशायामपि निरतिशयानंदं भगवदनुभवरूपं सुखमेव प्राप्नोत्यतस्तु
नित्यनिरतिशयब्रह्मानंदमग्नो भवति स्वर्गाद्यर्थं यागादिकं कुर्वाणस्तु जीवद्दशायां वित्ताद्यर्जनेन तदनुष्ठानप्रयासरूपं दुःखं ततस्तु सातिशया
त्वादस्थिरफलरूपं स्वर्गादिकं तन्निमित्तपुण्यक्षये तु नरकमिति विषममभिप्रेतं ४३ किं चेहलोके पूरुषः यदर्थं यस्य देहस्य प्रयोजनाय काम्यंत इ
ति कामाः कर्माणि यज्ञाः तान् शब्दादीन् कामैः करणैः यज्ञकामोत्पत्तिसाधनैः कामयते इच्छति स एव तु देहः पारक्यः श्वशृगालादिभक्ष्यः भंगुरो नश्व

यदर्थमिह कर्माणि विद्वन्मान्यसकृन्नरः करोत्यतो विपर्यासममोघं विंदते फलं ४२ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ४३
कामान्कामयते कामैर्यदर्थमिह पुरुषः स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ४४ किमु व्यवहितापत्यदारागारधनादयः रा
ज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ४५ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४६

रः उपैति कदाचिद्देहिनमालिंगति कदाचिच्चायेति जहातीत्यर्थः ४४ देहस्यैवेयमवस्था किं पुनर्देहानुबंधिनां दारादीनामित्याह किमिति देहेनैव साक्षादात्म
नः संबंधः दारादिभिस्तु देहद्वारेति व्यवहितैस्तु किं व्यवहिता येदारादयः अगारं मंदिरं आदिशब्देन पशुपुत्रादयः कोशा वस्त्रादिपेटिका बलं चतुरंगयुक्तं
भृत्याः परिचारकाः एते सर्वे ममतास्पदाः ममेमे इत्याभिमानविषयाः उपयंति चेति किमु वक्तव्यं इत्यर्थः ४५ ननु न देहार्थो विषयार्थः व्यापारः किं त्वा
त्मार्थ इति चेत्तर्हि नित्यानंदसुखस्वरूपस्यात्मनः समुद्रस्य विप्रुडिव किमेतैर्वैषयिकं सुखमित्याह किमेतैरिति नित्यानंदः स एव रसः स एवोदकं तस्मा
द्धेः यस्यात्मन एतैर्देहेन साकं नश्वरैरत एव तुच्छैः स्वल्पैर्वस्तुतोऽनर्थैः पुरुषार्थलक्षणैरर्थसंकाशैः पुरुषार्थाभासैः कामैः किं प्रयोजनं तदनुभवजनि
तं सुखमतितुच्छमित्यर्थः ४६ किं चात्यायासेनार्जितमपि वैषयिकसुखमनुभूयमानं दुःखापेक्षयाल्पमेव तदनुभवावसराभावादित्याह॥ ॥श्री॥ ॥

निरूप्यतामिति हेऽसुरा इह संसारे कर्मभिः प्राचीनैः क्लिश्यमानस्य दुःखघ्नतः देहभृतो निषेकादिष्ववस्थासु स्त्रीसंभोगाद्यवस्थासु स्वार्थ उत्पन्न
आनंदः कियान् तन्निरूप्यतां दुःखापेक्षया सुखमल्पमिति भावः यद्वा निषेकादिष्ववस्थासु पितृरेतोधारामात्रयोनिप्रभृतिषु श्मशानांतास्ववस्था
सु प्राचीनैः कर्मभिः क्लिश्यमानस्यानेन दुःखप्राचुर्यमुक्तं ४८ ननु निषेकाद्यवस्थायाः कर्मभिर्भिन्नत्वान्निःशेषकर्मक्षये प्रभृतं सुखं स्यादित्याशंक्यानि
राकर्तुमंतरेणापरमात्मोपासनं न कदाचिदपि कर्माणि निवर्त्तंत इत्याह कर्माणीति देह्यात्मानुवर्त्तिना देहेन तावत्कर्माणि देहांतरारंभकाणि उपमापात्म
कानि कुरुते तैश्चारब्धैः कर्मभिर्निमित्तभूतैर्देहं तनुते बिभर्त्ति तेन पुनः कर्माणीति अपुनर्देहं इत्येवं बीजांकुरतुल्यापरिवृत्तिर्न निवर्त्तत इति न कदाचिदपि
निःशेषकर्मक्षय इति भावः कुतस्त्वियं परिवृत्तिस्तत्राह उभयं तु देहेन कर्माणि कर्मभिर्देह इत्येतद् उभयं न विवेकतः स्वात्म परमात्म याथात्म्याज्ञा
नादेव हेतोर्भवतीत्यर्थः ४९ एवं वैराग्यादयायैहिकामुष्मिकसुखस्याल्पास्थिरत्वादिदुःखमिश्रत्वानर्थावहत्वादिकमभिधायार्थं स्वरं भजतां

निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४७ कर्माण्यारभते देही देहेना
त्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४८ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः भजतानीहयात्मा
नमनीहं हरिमीश्वरम् ५०

यद्यपि सर्वे पुरुषार्थाः सुलभाः तथाप्यनन्यप्रयोजनत्वेनैव तद्भजनं श्रेय इत्याह तस्मादिति तस्माद्देह तस्माद्देहकर्मणोः परिवृत्तिरूपसंसार
स्य कदाप्यनिर्मोक्षाद्दैवयिकसुखस्याल्पत्वादस्थिरत्वात् दुःखमिश्रत्वात् तदुपरामाच्च तन्निवृत्तये ऽनिशं सदा हरिमाश्रितानां संसृतिं वंधहरमीश्वरम्
नीहया निष्कामेन भजतः हरिविशीनष्टि धर्माश्चार्थाश्च कामाश्च यदपाश्रयाः यस्त्रिवर्गस्यापि दातातमित्यर्थः तथा च श्रुतिः इष्टापूर्तं बहुधा जातं जा
यमानं विश्वं विभर्त्ति भुवनस्य नाभिरिति को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यादिति च य आत्मदा बलदा य एको बहूनां विदधाति
कामानिति च अर्थादयो यदपाश्रयास्तं हरिमनीहया भजेतेत्यनेन समस्तपुरुषार्थदोऽप्यनीहया भजतामतर्थहेतुसंसृतिवंधहरतीहया भजतां
त्वीहितमात्रमेव ददातीति सूचितं भवति ५० अथ दैत्यकुमारास्तांस्तर्वेषां मात्मनो भगवद्भजनेनधिकारशंकां निराकुर्वन्नितीहया भजनामेवानि
ष्टनिवृत्तिरिष्टप्राप्तिश्चेति स्वदृष्टांतेनाह सर्वेषामपीति द्वाभ्यां

स्वकृतैः स्वसृष्टैर्महद्भिर्भूतैः पृथिव्यादिभिः कृतानां सृष्टानां भूतानां देवादीनां सर्वेषां भगवान् बीजसंज्ञितः आदिकारणभूतः आत्मा अत एव निरतिश
यप्रियः ईश्वरोऽतः प्रविश्य नियंता नानावस्तुगत्या सर्वेषां साधारण इति भावः ५१ अतो देवादिजातिविभागमंतरेण यः कश्चिन्मुकुंदचरणं भजन् स्वस्तिमान्
स्त्वाविहः प्राप्तेष्टस्य स्यादेव यथा वयमिति यथा वयमसुरा अपि भगवंतं भजंतः स्वस्तिमंतोऽभूम तथैवेतरेऽपीत्यर्थः ५२ यथा वयमिति दृष्टांतस्वारस्याद्भगवतः
सर्वभूतसाधारणप्रतिपादनस्वारस्याच्च निरुपाधिको भक्तिविधानमित्यादि संबंधज्ञानपूर्वकमनन्यप्रयोजनेन भजंतः स्वस्तिमंतो भवेयुरसयत्तु समीहितमा
त्रं वृत्तं इति सूचितं तथा च स्मृतिः नान्यः पंथा अयनाय विद्यत इत्यादिकात्ते तदेव वादयति नालमिति द्वाभ्यां हे ऽसुरात्मजाः द्विजत्वादयो मुकुंदस्य
प्रीणनाय प्रीतिजननाय नालं न प्रभवः किं तु भक्त्याऽमलया अनन्यप्रयोजनया भक्त्यैव हरिः प्रीयते ऽन्यदुपायांतरं तु विडंबनं नटनमात्रं द्विजत्वमिति वर्णाधि
क्योपलक्षकं देवत्वं इति जात्याधिक्यस्य ऋषित्वमिति तपोधिक्यस्य वृत्तादिरूपज्ञानाधिक्योपलक्षणं बहुज्ञतेति तु शास्त्रज्ञानस्य ज्ञानाधिकस्य वृत्तेरपि

सर्वेषामपि भूतानां हरिरात्मा प्रियेश्वरः भूतैर्महद्भिः स्वकृतैः कृतानां बीजसंज्ञितः ५१ देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव
च भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ५२ नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञ
ता ५३ न दानं न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं ५४ ततो हरौ भगवति भक्तिं कुरुत दानवाः आ
त्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ५५ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां गताः

आदिपरंपरागतास्ववृत्तिः ५३ दानं पात्रे वित्तत्यागः तपः कृच्छ्रादि इज्या यागः शौचं स्नानादिकृतं शुचित्वं व्रतानि प्राजापत्यादीनि ५४ यतो भक्त्यैव भगवान्
प्रीयते नोपायांतरेणातो हे दानवाः यूयमाश्रितसंसारबंधहारिणि सर्वभूतानामंतरात्मनीश्वरे भगवति भक्तिमनन्यप्रयोजनां कुरुत कथंभूताः स
र्वत्रात्मौपम्येन स्वात्मतुल्यत्वदृष्ट्या स्वस्मिन्निवेश्वरशरीरभूतेषु सर्वभूतदययोपलक्षिता भगवद्भक्तिं कुरुतेत्यर्थः ५५ किमेवं भजंतः केऽपि मुक्ता बभूवु
रित्यपेक्षायां पापजातयोऽपि केचिद्भगवत्संबंधविशेषेण मुक्ताः किं पुनरेवं भजंतो मुच्यंत इति वक्तव्यं इत्याशयेनाह दैतेया इति रक्षांसि बककेश्यादयः
स्त्रियः पूतनादयः व्रजौकसो नंदादयः शूद्राः श्वपाकादयः खगा जटायुप्रभृतयः मृगा मायामृगादयः एवंविधाः पापजीवा अप्यच्युततां भग
वत्साधर्म्यं गताः प्राप्ताः संति हीति प्रसिद्धौ त्रिकालज्ञत्वात् भगवता प्रह्लादेनैवमुक्तं ५६ ॥ श्री ॥ ॥श्री॥ ॥

अध्यायद्वयोक्तार्थं निष्कृष्योपसंहरति एतावानिति अस्मिन्लोके पुंसां परं उत्कृष्टः स्वार्थः पुरुषार्थः एतावानेव कियानस्य गोविंदे भगवत्येकांतभक्तिः
तस्य प्रयोजनं भक्तिः यत्सर्वत्र भूतेषु तदीक्षणं गोविंदेक्षणं भगवदात्मकत्वदर्शनं इत्येतावानेव निरतिशयपुरुषार्थसाधनं भूतत्वादित्यर्थः ५५ इति सप्त
मस्य प्रथमः ॥ ७ ॥ एवं भगवता प्रह्लादेनोपदिष्टं तत्त्वत्रयं याथात्म्याह योपादेयं भगवद्धर्मं तदनुष्ठानोद्योगान्दैत्यकुमारान् लक्ष्याचार्यसुतो दैत्येंद्राय न्यवेद
यदित्याह देवर्षिः अथेति भगवद्धर्मोपदेशानंतरं तेन प्रह्लादेनानुवर्तितमाकर्ण्य निर्दिष्टत्वात् प्रह्लादोक्तमेव जगृहुर्दैत्यकुमारान् अनु गुर्वनुशिक्षितम
सुरोपाध्यायानुशिक्षितं जगृहुः १ अथ तेषां दैत्यपुत्राणां एकांतसंस्थितामव्यभिचारेण भगवद्धर्मविषयां बुद्धिमालक्ष्य लिंगैर्ज्ञात्वा भीतः त्वरितः संज्ञा
तत्वरः अध्यापकाज्ञे हिरण्यकशिपवे वेदयद्धि ज्ञापितवान् २ ततो दैत्यो हिरण्यकशिपुः गुरुणा कृत्तस्पात्मनीति स्वमार्गमनुवर्तनमत एव अप्रियं तच्छ्रु

एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ५५ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ श्रीनारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं १ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा २ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे ३ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणं आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ४ विनयावनतं दांतं बद्धांजलिमवस्थितं सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः ५ हिरण्यकशिपुरुवाच हे दुर्विनीत मंदात्मन् कुलभेदकराधम स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं ६ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः तस्य मेऽभीतवन्मूढ शासनं किं बलोऽ

त्यगाः कोपावेशेन कोपेन चलंति गात्राणि यस्य तथाभूतः प्रह्लादं हंतुं मनो दधे कृतवान् ३ कठोरया गिरा अस्मदर्हणं निरस्कारानर्हं प्रह्लादं
क्षिप्त्वा निरस्कृत्य क्रोधेन तिरश्चीनेन वक्रेण चक्षुषा वीक्षमाणः आह उवाच ४ कथंभूतं विनयेन नितरां नम्रं दांतं निरस्कारादिभिरसंजातक्रोधं बद्धांजलिं
नतमग्रपुरुषमीपस्थितं कथंभूतः पादेनाहतस्ताडितः सर्प इव श्वसन् श्वासं मुंचन् स्वभावेनैव क्रूरः ५ उक्तिमेवाह दुर्विनीतेति द्वाभ्यां हे दुर्विनीत मंदात्म
न्स्वबुद्धे मदाज्ञातिलंघितं त्वामधुना यमालयं नेष्यामि ६ यस्य मे क्रुद्धस्य सतः सपालास्त्रयो लोकाः परितः कंपंते तस्य मम शासनं अभीतवत् भयर
हितवन्तो भयरहितः को पिता स्तोत्यभिप्रायेणावृतिः प्रयुक्तः अत्यगास्त्यतिवर्तसे एवमतिवर्तते भवान् किं बलं यस्य न हशः ७ ॥ श्रीरामचंद्रायनमः॥

३१

एवमुक्तः आह भगवान् प्रह्लादः न केवलमिति चतुर्भिः तत्र यदुक्तं किं बल इति तत्रोत्तरमाह द्वाभ्यां नेति हे राजन् न केवलं ममैव बलं किंतु भवतो मेषां
च बलिनां बलं कोसौ येन ब्रह्मादयः चतुर्मुखप्रमुखास्तथा उच्चावचाः स्थावरचरात्मकाः सर्वे लोकाः वशं स्ववशं प्रणीताः प्रापिताः ८ कोसौ तस्य नामक
थयेत्यत्राह सेति स सर्वेषां बलाधायक ईश्वरः कोसावीश्वरः उरुक्रमः उरवः लोकत्रयसंग्राहकाः क्रमाः पादविक्षेपा यस्य स त्रिविक्रम इत्यर्थः
सर्वे हस्तिपदे मग्ना इतिन्यायेन पादत्रयेणैव लोकत्रयाक्रमणरूपमहामहिमशालिनस्तस्य सन्निधौ त्वद्बलं कियदेतदित्यभिप्रायः न केवलमु
रुक्रमः सर्वेषां बलाधायक एव किंतु सावोज आदीनामाश्रयो धारक इति यावत् ओजः इंद्रियशक्तिः सहः मनोबलं सत्वं धैर्यं बलं देहबलं
इंद्रियाणि च तेषामप्याश्रय इत्यर्थः किंच स एवोरुक्रमः परमः निःसमाभ्यधिकः स्वशक्तिभिः स्वांशभूताभिः प्रकृतिपुरुषकालात्मिकाभिः श
क्तिभिः कृत्स्नं विश्वं सृजति अवति रक्षति संहरति च स्वयं गुणत्रयेशः सत्वादीनां त्रयाणां गुणानां ईशो नियंता ऽगुण एव स्वतोऽकर्मवश्य इति

प्रह्लाद उवाच ॥ न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषां परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ८ स
ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्वबलेंद्रियात्मा स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ९ जह्यासु
रं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणं १० दस्यून्पु
रा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ११ ॥

भावः एतत्र शत्रुरसौ कथं मयापि बलं स्यादत आह जहीति त्वमिमम् आत्मनः स्वस्यासुरं भावं जहि त्यज समं मित्रामित्रानुसंधानरहितं यथा भव
ति तथा मनो धत्स्व धारय तथा मनःस्थिरे दृढे सत्यर्थः एवं चेत्ते पि विद्विषो न संति किं चात्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मन इत्युक्तरीत्यात्मैव रिपु
र्नेतदन्यः कोपि रिपुरस्तीत्याह ऋत इति अजितादविधेयादत एवोत्पथे दुर्विषये स्थितात् वर्तमानात् आत्मनोऽतःकरणात् ऋते न संति विद्विष इति
पूर्वेणान्वयः तद्धि मनसः साम्यमेव ह्यनंतस्य त्रिविधपरिच्छेदरहितस्य परमात्मनः समर्हणं सम्यगाराधनं १० किंच सर्वदिशां जयिनोप्यजितेंद्रि
यस्य भवादृशस्य केवलं जयशालित्वाभिमानमात्रमेव न च मुक्तो जयित्वमित्याह दस्यूनिति पुरा तावत्सुत्रपतः आत्मनो पहतपाप्मत्वादिगुणाष्ट
करूपेणैश्वर्यमपहरतः षडिंद्रियरूपान् दस्यून् दुष्टजंतुतुल्यानात्मशत्रून् अविजित्य अजित्वा एके त्वादृशाः दशादिशः स्वजिताः स्वेनैव जिता इति मन्यंते ऽभिमा
नमात्रमेतदित्यर्थः जितात्मनो जितेंद्रियस्य तु ज्ञस्य स्वात्मपरमात्मयाथात्म्यवेदिनः देहिनां समस्य सर्वाणि भूतानि परमात्मशरीरत्वेन पश्यतः सा

धोर्महाभागवतस्य स्वमोहप्रभवाः देहात्मभ्रमस्वतं
त्रात्मभ्रमतिभिन्नाः परे शत्रवः कुतो भवंति न संत्येवे
ति भावः ११

एवमुक्तवंतमाह हिरण्यकशिपुः व्यक्तमिति हे अल्पबुद्धे त्वं व्यक्तं नूनं मर्तुकामोऽसि मर्तुमिच्छसि यस्त्वमत्यंतं विकत्थसेऽन्यथैवं विकत्थनं तव
न स्यादिति भावः तथाहि मुमूर्षूणां मर्तुमिच्छतां विप्लवा अनन्विता वाचो ननु स्युर्भवेयुरेव १२ हे मंदभाग्य त्वया मत्तोऽन्यः जगत ईश्वर उक्तो
सौ क्वास्ते यदि सर्वत्र वदसि मत्तोऽन्यो जगदीश्वरः सर्वत्रांतरात्मतया वर्त्तते तर्हि कस्माद्धेतोः स्तंभे पुरो वर्त्तिनि न दृश्यते मदन्यो जगदीश्वरः क्वासौ
वर्त्तत इति दैत्यः प्राह ईशः सर्वत्रास्तीति प्रह्लादः ईशः यदि सर्वत्रास्ति तर्हि स्तंभे नास्तीति हिरण्यकशिपुः प्रह्लादः स्तंभेऽप्यस्त्येव नाहं न दृश्य
तेऽपि तु दृश्यत एवेति व्याख्यांतरं १३ सोऽहं सर्वेषामीश्वरत्वं वा विकत्थमानस्य ते तव देहाच्छिरो हरामि छिनद्मि यो हरिस्तव शरण्यो रक्षकः इष्य
तः स तु न त्वां गोपायेत स रक्षिता वेदधुना त्वां रक्षिष्यति अन्यथानुतदेवमिष्यति भावः १४ एवमित्थं रुषा क्रोधेन मुहुर्मुहुर्भगवंतं सु

हिरण्यकशिपुरुः॰ व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः १२ यस्त्वया मंदभाग्यो
क्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते १३ सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत ह
रिस्त्वाद्य यस्ते शरणमीप्सितं १४ नारद उ॰ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरास
नात्स्तंभं तताडातिबलः स्वमुष्टिना १५ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजा
दयः श्रुत्वा स्वधामात्ययमंग मेनिरे १६ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं अंतःसभायां न ददर्श तत्प
दं वितत्रसुर्येन सुरारियूथपाः १७ तं प्रह्लादमर्दयन्महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य वरासनात्सिंहासनादुत्पतित उत्थितोऽत्यंतं बलं य
स्य तेन स्वमुष्टिना स्तंभं तताड ताडितवान् बभंज १५ तदैव ताडनानंतरमेव तस्मिन्स्तंभेऽतिभीषणो निनदो ध्वनिर्बभूव तं निनदं विशिनष्टि येन निन
देनांडकटाहं ब्रह्मांडकटाहमस्फुटद्भिन्नमभूत् अंग हे युधिष्ठिर यं च निनदं श्रुत्वा स्वस्वस्थानगताः अजादयो ब्रह्मादयः स्वधिष्ण्यानामप्यंगनाशं मेनि
रे प्रलयकालं मन्यमाना इत्यर्थः १६ ततः किं जातं तदाह स विक्रमन्निति ऊर्जसा बलेन पुत्रवधेप्सुः पुत्रवधं कर्तुमिच्छुः तदर्थं विक्रमन्पराक्रमं कुर्व
न्सदेसं दूयं निर्ह्रादं ध्वनिमपूर्वं कदापि अश्रुतमत एवाद्भुतमाश्चर्यजनकं निशम्य श्रुत्वा तस्य निर्ह्रादस्य वक्तारमाश्रयं मंतःसभायां सभामध्ये न द
दर्श येन निर्ह्रादेन सुरारियूथपाः दानवश्रेष्ठा वितत्रसुर्विशेषेण त्रासं प्रापुरित्यर्थः १७

तदाभावान्निजभृत्यस्य प्रह्लादस्य भाषितं कृत्स्नं जगदेतदात्मव्याप्तिभावात्सर्वेषु चराचरात्मकेषु भूतेष्वात्मनः स्वस्य व्याप्तिं च सत्यं यथा भवति तथा कर्तुं भग
द्भुतरूपमुद्वहन्विश्वस्य सभायां मस्तंभस्तस्मिन्नदृश्यत नदृष्टोऽभूत् कथंभूतं रूपं न मृगं नापि मानुषं रूपं भयमिति नृमृगमिश्रमित्यर्थः निजभृत्यभाषितमि
त्यत्र बहुवचनांते न निजभृत्यप्रह्लादेन सम्मानसः तदयमर्थः तावत्प्रह्लादस्य निजभृत्यस्य भाषितं भौतिकेषु पृथ्व्यादिभावेषु भूतेषु च महत्स्वपि च भगवाना
त्मा इति तत्सत्यं कर्तुं तथान्यदद्भुतदेयच्छातकप्रतिघोरं रूपमुद्वहन्निति तथा निजभृत्यैः सनकादिभिर्यद्भाषितं त्रिभिर्जन्मभिः शापमोक्षो भवत्विति
तत्सत्यं कर्तुं तथा ब्रह्मणस्तपोवरदृष्टम् श्रुतं चान्यदद्भुतरूपमुद्वहन् सभायां मध्ये दृश्यमतः किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्मणो प्रातिप
द्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति तथा नांतर्बहिरिति न नरैर्न मृगैरिति च ब्रह्मणा निजभृत्येन यद्भाषितं तथास्त्विति तत
सर्वं सत्यं कर्तुं न च तत्र स्थरूपं न च नरो न मृगो वा न च सभायां मस्मात् ततः न च प्राणी गतो वहिः एवं तान्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपु

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभे सभायां न मृगं न मानुषं
१८ स सत्त्वमेनं परितो विपश्यन्स्तंभस्य मध्यादनुनिर्जिहानं नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपं १९
मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननं २०

न्नाभाषितं नतमेतद्धिरण्यकशिपुना मम तु मे भविनेति तथा अत्र कुत्रचिन्मयो नर इति यच्च नारदेन स्वभृत्येनेंद्रप्रति भाषितमयं महान्संस्थानप्राप्स्य
ते इति अनंतानुचर इत्यनेन स्वभक्तपदरूपातिलं च यद्भाषितं तच्च सत्यं कर्तुमदृश्यत वकारान्निजभाषितं च यत्कौंतेय प्रतिजानीहि न मे भक्तः
प्रणश्यतीति तेषां महत्समुद्धृतेति तच्च सत्यं कर्तुं अदृश्यतेति १८ स दैत्येंद्र एवं ध्वनिं श्रुत्वा तदा सर्वं प्राप्तिविशेषं सर्वतो विलोकयन्स्तंभस्य मध्ये
निर्गच्छंतं नायं मृगः नापि नरः किंतु नृमृगेंद्रयोः उभयोरपि रूपमहो किमेतदिति मीमांसितवानिति शेषः १९ मस्यैवमलं भयानकं तन्नृसिंह
रूपं मीमांसमानस्य दैत्येंद्रस्याग्रतः सन्नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति त्रिभिः प्रतप्तेति प्रतप्तं चामी
करं सुवर्णं तद्वत्पिशंगे चंडे उग्रे लोचने यस्मिन्स्फुरंत्यः सटाः केसराः स्कंधलोमानि चैर्जृंभितं साटोपमाननं मुखं यस्मिन् ॥२०॥ श्री ॥

करालाउग्रा दंष्ट्रा यस्मिन् करवालः खड्गः तद्वच्चंचला क्षुरांतवती च या जिह्वा यस्मिन् भ्रकुटीयुक्तेन मुखेनोल्बणं स्तब्धाउदंचिताच ऊर्ध्वौ कर्णौ य
स्मिन् गिरिकंदरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन भीषणं २१ दिविस्पृशन्कायो यस्मिन्नस्तु कस्तमास्मः
अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा उरु विशालं वक्षःस्थलं च यस्मिन् अल्पं मध्यम उदरं यस्मिन् चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तं विष्वं
च सर्वतः प्रसृता भुजास्तेषामनीकानि सेनास्तेषां शतानि यस्मिन् भुजा एवानीकं सेना तच्छतं यस्मिन्निति वा स्वेनानीकेन समद्धितमिति प्रयोगात्
नखा एवायुधानि यस्मिन् २२ दुरासदं प्राप्तुमशक्यं सर्वाणि निजानि चक्रादीनीतराणि वज्रादीनि तान्येवायुधप्रवेकाः शस्त्रश्रेष्ठास्तैर्विद्राविताः
दैत्या दानवाश्च येन तद्रूपं मीमांसमानस्याग्रतः समुत्थितमिति पूर्वेणान्वयः २३ तथापि विमृश्य प्रयोजनविमर्शनपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्त

करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं स्तब्धोर्द्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं २१
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं २२
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं २३ प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं एवं ब्रुवं
स्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः २४ अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तदा न तद्विचित्रं
खलु सत्त्वधामनि स्वतेजसा यो नु पुरापिबत्तमः २५ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया तं विक्रमंतं सगदं गदा
धरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् २६ भिः प्रायेणेति प्रायेण महामायाविना हरिणा मम मायं एवंभूतो वधः वधोपायः स्मृतश्चिंतितः तथाप्य
नेन समुद्यमेन किं न किंचित्स्यादित्येवं ब्रुवन् गदैवायुधं यस्य स दैत्य एव कुंजरो गजः नदन् गर्जन् नृसिंहं प्रत्यभ्ययत् अभिमुखमागतवान् २४ तदा सोऽ
सुरः नृसिंहस्यौजसि दीप्तौ पतितः सन् अलक्षितोऽदृष्टोऽभूत् यथा पतितः पतंगमः शलभः तद्वत्सत्त्वधाम्नि शुद्धसत्त्वाश्रये हरौ पतितं तमो स यत्स्यदेत्यस्या
दर्शनं यत्तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालिकं तमः स्वतेजसाऽपिबत् २५ ततो महासुरोऽभिपद्याभिमुखमागत्य रुषा क्रो
धेन उरुवेगया अभ्याहनत् आ समन्तात् गदया नृसिंहमभ्यहनत् ताडितुमुद्युक्त इत्यर्थः सगदमग्रहीदित्युत्तरस्यामन्वयो दितिभावः विक्रमंतं कथंचित्स्वहर्तुमुद्य
तं वंतं दैत्येन्द्रं गदाधरो नृसिंहः सगदमग्रहीत् तार्क्ष्यसुतः गरुत्मान् महासर्पं तद्वदित्यर्थः २६

३१९

सगृहीतो सुरस्तदा विक्रीडतः तस्य नरसिंहस्य हस्तादुत्कलितः विस्रष्टः यद्वद्यथा विक्रीडतो गरुत्मतो हिर्गलितो भवति तद्वत् भगवतस्तत्क्रीडनं तद्विसर्जनरू
पमज्ञात्वा लोकपालाः सर्वे इंद्रादयः सुराः हृतं दैत्येनाप हृतमोकः स्थानं येषां ते ऽत एव तद्भयेन घनच्छदा मेघेषु छन्नाः संतो ऽसाध्वमन्यंत हो भगव
तो ऽप्ययं बली यानेनैव तस्मात्किं स्यादिति नेवममन्यंतेत्यर्थः २६ यस्य हस्तात्स्वयं मुक्तस्तं नरहरिं स्ववीर्याच्छंकितं मन्यमानो ऽत एव महामना अहमेव ब
ली त्यभिमानयुक्तो ऽसुरः मृधे युद्धे जितश्रमः श्रमरहितः खड्गचर्मणी खड्गखेटे प्रगृह्य पुनस्तं नरसिंहं पुनरासजुताभवत २७ श्येनस्येव वेगो
यस्य शतचंद्रवर्त्मभिः शतचंद्रश्चर्म तस्य वर्त्मभिः खड्गचर्ममार्गैरछिद्रं यथा भवत्येवमुपर्यधश्च चरंतं दैत्यं हरिरट्टहासं कृत्वा खरेण कठिनेन निस्वने
नध्वनिनोल्वणो भीषणः महावेगः निमीलिते अट्टहासखरनिस्वनाभ्यां निमीलिते ऽक्षिणी यस्य तं जग्राह खरनिस्वनोल्वणमिति द्वितीयांतपाठे तु खरि

सतस्य हस्तोत्कलितस्तदा ऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः असाध्वमन्यंत हृतौकसो ऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः २६
तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः पुनस्तमासज्जुत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे २७ तं श्ये
नवेगं शतचंद्रवर्त्मभिश्चरंतमछिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरनिस्वनोल्वणं निमीलिताक्षं जगृहे महाजवः २८ विषक्
स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचं द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं २९ संरंभदु
ःप्रेक्ष्यकराललोचनो व्यात्ताननांतं विलिहन्स्वजिह्वया अस्रग्लवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्यया हरिः ३० ॥:॥

णनिस्वनेन महाशब्देनोल्वणं भयंकरम् अट्टहासं कृत्वा तद्भयेन हरेस्तेजसा च निमीलिताक्षम् गृहीतमित्यर्थः २८ ततः सर्वतः स्फुरंतं सर्वावयवान्प्रचाल
यंतं ग्रहणातुरं तेन नात्यातुरं विवशं इंद्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेनाप्यक्षता त्वग्यस्य तं दैत्यं द्वारि सभायां नांतर्बहिः ऊरावंके निपात्य नखै
र्न चांबरे नैव भुवि न व्यप्सु गिरिषु सद्मनि वा एवं दिवा न नक्तं विहाय संध्यायामिति द्रष्टव्यं लीलया क्रीडया ददार विदारितवान् तत्र ग्रहणे दृष्टांतः यथा व्या
लः सर्प आखुं मूषकं दारणे दृष्टांतः महाविषमहिं सर्पं गरुड इवेति २९ एवं दैत्यं द्रुतं वधमुक्त्वा तद्दशावस्थं नरसिंहमनुवर्ण्य तस्य तद्वधमाह संरं
भेति द्वाभ्यां अहितेष्वमर्षेण क्रोधेन दुष्प्रेक्ष्ये दुर्निरीक्ष्ये कराले लोचने यस्य व्यात्तं विकासितं यदाननं मुखं तस्यांतं स्वजिह्वया विलिहन् अस्रग्जोरक्तं
स्य लवैर्बिंदुभिरक्तौ लिप्तौ अत एवारुणाः केसराश्चाननं च यस्य अंत्रमालाधरः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा तद्वत ३० ॥:॥ ३१९

एवं सतो नखांकुरैः उत्पाटितं हृदयसरोजं यस्य तं दैत्यशरीरं विसृज्य तस्य दैत्येंद्रस्यानुचरान् पंच तान्नवगतायुधोनियेपांतमनुपंथा अनुवर्तिनो ये तान् दोर्दंडा
नां भुजदंडानां यूथानि येषां तैः नखा एव शस्त्राणि पाणयः तैः समस्तान्सहस्रशो अहन् हतवान् ३१ दैत्यवधव्यग्रस्य नरहरेराटोपमाह सटेति द्वाभ्यां सटाभिरवधूताः
प्रकंपिताः जलदा मेघाः परापतन् ग्रहाश्च तस्य नरहरेर्दृष्ट्या विमुष्टमपहृतं तेजो येषां तादृशा ग्रहाः सूर्यादयो अभवन् श्वासेन हताः पीडिताः अंभोधयः समु
द्राः चुक्षुभुः संचेलुः निर्ह्रादेन भीता दिगिभा दिग्गजाः मुदं हर्षं जहुः त्यक्तवंतः ३२ तस्य नरहरेः सटाभिरुत्क्षिप्तानि विमानानि तैः संकुला व्याप्ता द्यौः प्रोत्सर्पते
स्थानात् चलिते वा अस्य नरहरेः पद्भ्यामतीव पीडिता क्ष्मा भूमिरपि अत्र तत एव तस्यातिसंघे नरहरे रंहसा वेगेन बलेन वा शैलाः समुत्पेतुः उत्प्लुत्य पतितवंतः तस्य नरहरे

नखांकुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् अहन्समस्तान्नखशस्त्रपाणिभिर्दोर्दंडयूथोनुपथान्सहस्रशः
३१ सटावधूता जलदाः परापतन्ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः अंभोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा मुदं जहुः
३२ द्यौस्तत्सटोत्क्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ३३
ततः सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुं अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन ३४ निशम्य
लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ३५ तदावि
मानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां सुरानका दुंदुभयोथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ३६

स्तेजसा अवभासितं खं आकाशं ककुभो दिशश्च न रेजिरे ३३ ततो हमेव सर्वेश्वर इति लोकस्य प्रदर्शयितुं सभायामुत्तमे नृपासने उपविष्टं संभृतं संपूर्णं तेजो यस्य
अलक्षितं न लक्षितं द्वैरथं प्रतियोद्धा येन प्रचंडमुग्रं वक्त्रं यस्य तं विभुं नरसिंहं कश्चन कोपि न बभाज नासेवत कोपि समीपं गंतुं नाशकोदित्यर्थः ३४
लोकत्रयस्य मस्तकज्वरं शिरोव्यथावत् दुःसहं तमादिदैत्यं हिरण्यकशिपुं हरिणा श्रीनरसिंहेन युद्धे हतं निशम्य दृष्ट्वा प्रहर्षवेगेनोत्कलितानि विकसिता
न्याननानि यासां ताः सुराणां स्त्रियः पुष्पवर्षैः पुनःपुनर्नरहरिं ववृषुः ३५ तदा दिदृक्षतां द्रष्टुमिच्छतां दर्शनार्थमागतानामित्यर्थः नाकिनां देवानां वि
मानपंक्तिभिर्नभस्तलं संकुलं संमर्दवद्बभूव सुराणामानकाः पटहाः तैर्दुंदुभयो जघ्निरे ताडिताः गंधर्वश्रेष्ठा ननृतुः स्त्रियोप्सरसो जगुः ३६

ततोपव्रज्याकिंचित्समीपमागत्य ब्रह्मरुद्रप्रमुखयो विवादः हे तात मूर्ध्निबद्धांजलिपुटानि येषां ते आसीनमुपविष्टं तीव्रं दुःसहं तेजो यस्य तं श्रीनृसिंहं नाति
दूरचारिणः पृथगेकैकशः ईडिरे तुष्टुवुः ३७ ३८ ३९ तावदपारविविधविचित्रशक्तिवीर्यमकर्माय तन्नगदपारं जगत्कारणं स्तुवन्नमस्करोति ब्रह्मा
नतइति अनंताय स्वरूपतस्त्रिविधपरिच्छेदरहिताय दुरंतशक्तये ऽपारशक्तये चिंत्यशक्तये वा शक्तिः स्वेतरसर्वसामर्थ्यनिर्वाहिका जगत्प्रकृति
भावेमिथः साशक्तिरुदीरिताइत्यादिषूक्ता मद्वा यदसमेर्गात्मकत्वाद्घटितमिव विभातितत्घटनसामर्थ्यरूपा यतस्त्वमुक्तविधस्ततः शक्तिरनंत
शक्तिरत एव मद्धारेणसर्वतो घटितमरणं देत्यं हतवानसीति भावः यतस्त्वमनंतोऽत एवाचेतनेस्तंभेप्याविर्भूतो सीत्यभिप्रायः अनंतपदेनहिस
र्वव्यापित्वादेशपरिच्छेदरहितं सर्वकालवर्तित्वात्कालपरिच्छेदराहित्यं साक्षात्परंपरया सर्वप्रकारत्वेन सर्ववस्तुसामानाधिकरण्यात्वाद्वस्तु
परिच्छेदराहित्यं विवक्षितं येन केनापि प्राशस्त्येन सर्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिरधरीकृतत्वाभावरूपं वा वस्तुपरिच्छेदराहित्यं इति त्रिविधपरिच्छे

तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ३७ मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः यक्षाः
किंपुरुषास्तात वेतालास्सिद्धकिंनराः ३८ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः मूर्ध्निबद्धांजलिपुटाः आसीनं तीव्रतेजसं ईडिरे
नरशार्दूलं नातिदूरचराः पृथक् ३९ ब्रह्मोवाच॥ नतोऽस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय विचित्रकर्मणे विश्वस्य सर्गस्थि
तिसंयमान्गुणैः स्वलीलया संदधते ऽव्ययात्मने ४०

दराहित्यं इति त्रिविधपरिच्छेदराहित्यं विवक्षितं ननु त्वत्स्वरूपं कुत्र जगदुदयविभवल
यलीलस्य कियदेतदित्यत आह नमित्वमिप्रयत्नतावगुणात्कारणत्वप्रयुक्तविकारं निराह विचित्रवीर्यायेति वीर्यं नाम सर्वोपादानत्वे सर्वस्य धारणे सर्वनि
यमने विकाररहितत्वं यथाहुः विकारविरहो वीर्यं प्रकृतित्वेपि मंसदेत्यादि विचित्रशब्देन वंदिधस्य वीर्यस्यानितरसाधारणं मुच्यते पवित्रकर्मणेऽक
र्मीयतः जगदपारं अत एव तां दुरितनिवर्तकं क्षमम्यापारायेति वा गुणैः सर्वज्ञत्वसर्वशक्तित्वादिभिर्जगन्निमित्ततदुपादानत्वोपयुक्तैः स्वनियाम्यस
त्वादिप्राकृतगुणैर्वा कृत्स्नस्य विश्वस्य सर्गादीन् स्वलीलयैव न तु कर्मणा संदधते विदधते अव्ययात्मने एवमपि त्वमव्ययः विकाररहितः आत्मा स्वभावो य
स्य स भावतोपि विकाररहितायेत्यर्थः स्वरूपतोपि विकाररहितत्वस्योक्तत्वात ४० यद्ब्रह्मणोभिप्रेतं कुत्र जगत्सर्गादिकर्तुस्त्वं कियदेतदितितदेव
विशदयन्वात्मस्तत्स्य युक्तस्तोतिरुद्रः॥ ॥श्रीरामचंद्राय नमः ॥ ॥श्रीरामचंद्रो जयतितरां॥ ॥:::॥ ॥

कोपकाल इति तव कोपकालो युगांतः द्विपरार्द्धावसानं कोपकाल इत्यनेन मदं तर्यामितया मन्मुखेन संहर्तृत्वमेवेत्युक्तं भवति अयं तु कोपाविषय इत्या
ह अपमत्यकाल इत्यतः कोपनिवृत्त्याहे भक्तवत्सल तव भक्तं तत्सुतं तस्यैदेतं प्रह्लादमसुतं तु पश्यस्तं त्वस्मीयमागमिष्यंत पाहि ४० इंद्रस्तु खदुःखमावे
दयत्सर्वेश्वर कं सर्वांतरात्मानं सम्यक्पुरुषार्थदं स्तौति प्रत्यानीता इति हे परमसर्वात्मन् एनो स्मान त्रायता त्रात्रा भवदता दैत्येना क्रांताः प्रसह्य गृहीताः
स्वभागाः स्वकीयाय ज्ञीयभागा अस्मदादिमुखेन त्वमेव भो क्तेत्यभिप्रायेणास्वशब्दः प्रयुक्तः प्रत्याहृताः दैत्याक्रांतमिति द्वितीयांत पाठे तु दैत्यभया
कुलमिति हृदयविशेषणं एवं दैत्यवधेन स्वभागप्रत्यानयनेन त्वद्दत्तं तदा वासभूतमत एवामलमस्माकं हृदयं प्रत्यबोधि भयेन पूर्वं मुकुलितमि
दानीं तदपाकरणेन विकासितं भवतीत्यनुषंगः त्वां सेवतामस्माकं त्वन्नो लौकिकपुरुषार्थप्राप्तिरित्येतत्कियदित्याह हे नाथ स्वामिन् तेषु अप्सतां
पाचयोपरागादिदं लौकिकं पुरुषार्थजातं कालेन नंक्ष्यमाणं कियत्तच्छकिंचिदेतदित्यर्थः तदेवाह तेषां त्वां परिचरतां मुक्तिरपि न बहुमता त्वत्सेवा

इंद्र उवाच ॥ कोपकालो युगांतस्ते हतोऽयमसुरोऽल्पकः तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ४१ इंद्र उवाच ॥ प्रत्यानीताः परम
भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं तद्गृहं प्रत्यबोधि कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां
नहि बहुमता नारसिंहापरैः किं ४२ ऋषय ऊचुः त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज तद्वि
प्रलुप्तममुनाद्य शरणाय पालरक्षागृहीतवपुषा पुनरन्वमंस्थाः ४३

मुख्या मत्ता तेषां मुक्तिरपि न परमं प्रयोजनमतो हे नारसिंह अपरैरर्वाचीनैः पुरुषार्थैः किं न किमपि तेषां मतितुच्छमर्वाचीनपुरुषार्थजातमिति भावः
४२ ऋषयस्तु सर्वगुरुं साधुपरित्रातारं दुष्टहिंसकं चतुष्टुवुः त्वमिति परममुक्तृष्टं तपस्त्वमात्थ नः अस्माकं त्वमात्थ उपदिष्टवानसि तपो
विशिनष्टि यत्तप आत्मनस्तव तेजः प्रकाशकं तत्स्वरूपावेदकं इत्यर्थः येन च तपसा दिपुरुषस्त्वं चतुर्मुखरूपं इदं जगदात्मगतं परमात्मना त्वया गतं मं नरा
त्मनया व्याप्तं ससर्ज आदिपुरुषो त्मगतमित्यत्र गृहात्मानं प्रकाशात इतिव त्संधिरार्षः आदिपुरुषात्मेति पाठे आदिपुरुषेति लुप्तप्रथमांतमेव
कुर्वदं यद्वा हे आदिपुरुषेति संबोधनं ससर्जेत्यस्येति शेषः तत्तपोऽमुनादैत्येंद्रेण विप्रलुप्तं विशेषेण प्रलोपितमासीत्तदेवाधुना हे शरण्य शरणं
मर्हतीति तिव्याऽमतहेपालकरक्षागृहीतवपुषा साधुपरित्राणार्थं गृहीतेन नरसिंह शरीरेण पुनरन्वमंस्थाः अनुज्ञापितवान् वः शत्रुर्मे यावि ना

क्षितोऽतः पुरवासिभिर्यत्नं कुरु इति विज्ञापितवानस्मि
सर्गः ४३

४१

पितरस्तुस्वदुःखमावेदयंतोऽखिलधर्मगोप्तारं हितकारिणं स्तुवंतो नमस्कुर्वंति श्राद्धानीति अस्माकं तनूजैः पुत्रादिभिरस्मदुद्देशेन दत्तानि श्राद्धानि
श्राद्धसंबंधीन्यन्नादीनि योऽदैत्यः प्रसभं बलात्स्वयमधिबुभुजेऽनुभूतवान् तथा तीर्थसमयेऽपि तीर्थस्नानसमये स्म तनूजैर्दत्तं यत्तिलापस्तिलो
दकान्यपिबत्तस्मै तस्य उदरात् श्राद्धानीति तान् वुचयः पुनरर्छदाकृत्यास्माकं दत्तवान् कथंभूतादुदरान्नखैर्विदारितात् वपाय स्ततस्मात्
वपाविदारणाख्यं तत्र जातपिंडोद्धरणमेव वक्कलमिति भावः तस्मै सकलधर्मपालनं गोप्त्रे रक्षित्रे नृहरये ते नमः तिलांबु सम्यगित्यपि पाठः तदाऽसम्यगिति दै
त्येन दृष्टिशोषिततिलांबुतिलोदकं समस्तं सम्यगनर्हः यः दैत्यं स्वीयमधिबुभुजे पीतवानित्यर्थः ४४ सिद्धास्त्वेवं स्वयोगगतत्वव्यवहारकं दैत्यं द्रवधद्वारा स्वयोग
गत्या ध्यायके परमसुहृदं वर्णयंतो नेमुः य इति योऽसाधुर्दुरात्मा दैत्यो नोऽस्माकं योगसिद्धां गतिं शक्तिं योगप्राप्तां गतिमणिमादिरूपां स्वयोगेन तपो

पितर ऊचुः श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलांबु तस्योदरान्नखविदीर्णवपाद्य आर्छत्तस्मै
नमो नृहरयेऽखिलधर्मगोप्त्रे ४४ सिद्धा ऊचुः यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन नानादर्पं तं नखैर्विददार
तस्मै तुभ्यं प्रणताः स्मो नृसिंह ४५ विद्याधरा ऊचुः विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये
पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ४६ नागा ऊचुः येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः तद्वक्षःपाटनेनासां द
त्तानंद नमोऽस्तु ते ४७

बलेन हार्षीदपहृतवान् तं नानादर्पं नानानेके दर्पा यस्य तं तस्य वैर्यात् विददार विदारितवान् तस्मै तुभ्यं हे नृसिंह वयं प्रणताः स्मः नमस्कुर्मः ४५
विद्याधरास्त्वपि तेनापहृतविद्याप्रसादं अनेन हितकारिणं स्तुवंतो नमंति विद्यामिति धारणया मनोधारणयाऽनुराद्धां संसिद्धां विद्यामस्मत्स्वं
यद्विद्यामंतर्धानादिलक्षणां योऽज्ञः मूर्खो बलवीर्याभ्यां गर्वितः दैत्यः दृप्तः सन् न्यषेधन्निषेधितवान् बलं देहबलं वीर्यं पराभिभवसामर्थ्यं स दैत्यः येन सं
ख्ये युद्धे पशुवद्धतस्तं त्वां मायानृसिंहं मायात्मीयसंकल्पोपात्तनृसिंहतनुं नित्यं प्रणताः स्मः कर्त्तरि क्तः नमस्कृतवंतः स्म इत्यर्थः ४६ नागास्त्वेवं त
दपहृतरत्नप्रदानेनानंदकारं स्तुवंतो नेमुः येनेति येन पापात्मना नोऽस्माकं रत्नानि स्त्रीरत्नानि नागकन्यकारूपाणि रत्नानि चापहृतानि त
स्य वक्षोविदारणेनासां स्त्रीणां दत्त आनंदो येन तस्य संबोधनं ते तुभ्यं नमोऽस्तु ४७ तवाज्ञायां परिपालनरूपकैंकर्यविरोधिनिरसनेन कैंकर्या

मनव इति वयं तव निदेशकारिणः कैंकर्यकारिणो मनव इति प्रसिद्धास्ते वयमेतावंतं कालं येन दितिजेन दैत्येन परिभूताः परिहापितास्ते न वयस्तत्कृताः सेत
वः वर्णाश्रममर्यादा येषां ताहृशा वभूविम अधुना स खलो दितिजस्त्वयानुपसंहृतोहतः हे प्रभो निवृत्तकैंकर्याविरोधिनो वयं किं कैंकर्यं ते तुभ्यं करवा
मतथाकिंकरान्नोस्माननुशाधि विधिव्याज्ञापयस्वेत्यर्थः सद्वारक तद्वापारस्वरूपजगत्सर्गात्मककामव्यापारविरोधिनिरसनेन तदधिकारा धायकं सर्वेषां
शुभावायकमवर्त्तिं तुष्टुवुः प्रजापतयः हे परेश परेषां ब्रह्मादीनामपीशाने त्वयाभिसृष्टास्त्वष्टि सर्गार्थं त्वया सृष्टाः प्रजेशाः प्रजापतयः इति प्रसिद्धाः
ते वयमेतत्पर्यंतं येन दैत्येन्द्रेण निषिद्धाः संतः प्रजा न वै सृजामः एवं तः स एष दैत्यः त्वया भिन्नं विदीर्णं वक्षो यस्य तादृशो नु शेते ऽतः परं प्रजाः स्रक्ष्या
मः हृष्यतः आहुः हे सत्वमूर्ते ऽप्राकृतशुद्धसत्वविग्रह ते तवावतारो जगन्मंगलं जगतो मंगलावहः ४९ तत्सुखोल्लासार्थं नाट्यादिकैंकर्यविरोधि

मनवऊचुः मनवो वयं तव निदेशकारिणो दितिजेन ते न परिभूतसेतवः भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि
किंकरान् ४८ प्रजापतयऊचुः प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नवक्षा नु शेते ज
गन्मंगलं सत्वमूर्तेऽवतारः ४९ गंधर्वाऊचुः वयं प्रभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः स एष नीतो भवता
दशामिमां किमुत्पथस्थः कुशलाय कल्पते ५० चारणाऊचुः हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः वयं समापितस्त्वया स ए
षसाधुहृच्छयः ५१

निरसनेन तदाधायकं सुहृदं तुष्टुवुर्गंधर्वाः वयमिति हे विभो ते तव नटनाट्यगायकाः नटाः नर्तकाः नाट्यकर्मणि गायकाश्च वयं येन एतावत्पर्यं
तमात्मसात्कृताः स्वाधीनाः कृताः कथंभूतेन वीर्यशौर्यबलं शक्तिः ताभ्यामोजः प्रभावः यस्य तादृशेन स एष दैत्यो भवता निरतिशयकृपायु
क्तेन इमां दशां मरणं नीतमर्थः नीतः प्रापितः तथा हि उत्पथस्थः उत्पथे कुमार्गे पापकर्मणि तिष्ठतीति तथा कुशलाय क्षेमाय कल्पते किं क्षेमयु
क्तो भवति किं न कल्पत एवेत्यर्थः ५० तत्पादपंकजपरिचार्याविरोधिनिरसनेन तत्पुनस्तदाधायकं हितकरं तुष्टुवुश्चारणाः हरे इति हे हरे आश्रि
तान्निःसरभवापवर्गो येहिकामुष्मिकसुखहेतुं तवांघ्रिपंकजमाश्रिताः परिचरंतो वयमनेन निषिद्धा इति शेषः स एषोऽसुरः साधूनां त्वत्प्रपन्नानां
हृच्छयः हृदयरोगरूपः त्वया समापितः उपसंहृतः हतः इत्यर्थः ५१ ॥ ❁ ॥

स्वदुःखमावेदयंतस्तन्निवर्त्तकं सुखाधायकं वर्णयंति यक्षाः वयमिति मनोज्ञैः कर्मभिर्वयं तवानुचरश्रेष्ठास्ते वयं इह तावद्दितिजेन वाहकत्वं यानादिवाह
कत्वं भारवाहकत्वं वा प्रापिताः स्थिताः हे नरहरे तेन दितिजेन कृतं तद्वन तज्जनानां मन्तु जनानां वा परितापं जानता तेन त्वया पंचविंशः देते द्धारको जीवः पं
चतां उपनीतः प्रापितः विज्ञानघनएवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति वत्संचविंशस्य शरीरधारिकायं पंचता प्राप्तिरत्र विवक्षिता पंच
विंशेतिपाठे हे जीव शरीरके तिसंबोधनं स तु जनपरितापं इतिपाठे येन दितिसुतेन वाहकत्वं नीताः स तु पंचविंश इत्यन्वयः ५२ स्वनैच्यानुसंधानपूर्व
कमनितरसाधारणप्रभावं तुष्टुवुः किंपुरुषाः वयमिति वयं किंपुरुषाः कुत्सिताः पुरुषाः त्वं तु महापुरुषः अनितरसाधारणगुणपूर्णः ईश्वरः सर्वंतियन्ता
च अयं महानदैत्योहतस्त्वयेति किं न वार्यत इत्याशंक्य किं यदेतद्दित्याहुः अयमिति कापुरुषः ईषत्पुरुषः अस्मदपेक्षयावलीयांस्ततोऽधमइ

यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरह
र उपनीतः पंचतां पंचविंश ५२ किंपुरुषा ऊचुः वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः अयं कापुरुषो नष्टो धिक्कृतः साधुभि
र्यदा ५३ वैतालिका ऊचुः सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे यस्तामनैषीद्वशमेष दुर्जनो दि
ष्ट्या हतस्ते भगवन्यथामयः ५४ किन्नरा ऊचुः वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः भवता
हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ५५

तिभावः इषदर्थइतिसूत्रेण कुशब्दस्य कादेशः यदा साधुभिर्धिक्कृतः
तिरस्कृतः तदैव नष्टो नष्टप्रायः अतः किं यदेनत्वेति भावः ५३ अस्मत्संमाननावहनत्वद्गुणगानविरोधिनिरसनेन त्वयैव वयं बहुमता इत्याहुर्वै
तालिकाः सभास्विति तवामलं यशः सभासु सत्रेषु च गीत्वा वयं महतीं सपर्यां पूजां पूर्वं लभामहे तां नस्मान्योदुर्जनो दैत्यः स्ववशं यथाभवति त
थाऽनैषी त्स एव दुर्जनः हे भगवंस्ते त्वया हतः एतत् दिष्ट्या भद्रं जातं दिष्ट्यादेवेन त्वयेति वान्वयः यथामयः यथाशिरोव्यथारूपो रोगः पीडा
कारकः तद्वदयमासीदिति नितिरोभः ५४ स्वदुःखमावेदयंतः सर्वसुखाधायकं लोकान्निहरं तुष्टुवुः किन्नराः वयमिति हे ईश वयं किन्नरगणा
इति भ्रमितावास्तवानुगा अनुचरास्ते वयमेतावदमुना दितिजेन विष्टिं अनुकारिताः सत्परहितं कर्म विष्टिं तामनुनिरंतरं कारिता हे हरे ऽनुचरा
न्निहर स वृजिनः पापात्मा दैत्यः भवताऽवसादितः उपसंहृतः हे नरसिंह हे नाथ नोऽस्माकं विभवाय सुखसमृद्धये त्वं भव ५५ ॥ ❖ ॥

स्वामिन्नदृष्टपूर्वं रूपं दर्शितवानस्य अनुग्राहकं धृतवानसीत्याहुर्विष्णुपार्षदाः अद्येति नोस्माकं भक्तानां हे शरणद अद्य प्रदनिरतिशयपुरुषार्थसाधनम
तापायप्रदेतिवा सर्वेषां लोकानां शर्मसुखवहमेवदद्भुतं रूपमद्येव दृष्टं न तु पूर्वं हे ईश स्वामिन् सोयं दैत्यस्तव विधिकरः निदेशकारी किंकरः स च वि
प्रैः सनकादिभिः शप्तः मध्ये वैं कर्यविरोधो जात इति भावः तस्य दैत्यस्येदं निधनं त्वत्कृतमनुग्रहाय पुनः कैंकर्यलाभरूपत्वदनुग्रहार्थमेवेति वयं जा
नीमः ५६ इति सप्तमे अष्टमः ८ एवं प्रत्येकं ब्रह्मादिभिः संस्तुतमप्यशांतसंरंभं दुरासदं श्रीनृसिंहं चतुर्मुखप्रेषितः प्रल्हादः प्रसादयामासेत्याह देवर्षिः ए
वं प्रत्येकं इत्यस्तुवंतोपि ब्रह्मादयः सर्वे देवा मन्युना संरंभः क्रोधावेशो यस्यात एव दुरासदं दुःप्रापं भगवंतमुपैतुं समीपं गंतुं नाशक्नुवन्समर्था न बभूवुः १
विं पुनर्निरतिशयप्रियया साक्षात्स्वामि ह्या श्रीर्लक्ष्मीरपि देवैर्ब्रह्मादिभिः प्रेषिता पतिसमीपमेहीति प्रार्थिता प्यद्भुतं महान्नरसिंहरूपं दृष्ट्वा पूर्वमदृष्टमश्रु

विष्णुपार्षदा ऊचुः अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म सोयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्र
हाय विद्मः ५६ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे ऽष्टमोध्यायः ८ नारद उवाच एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः
नोपैतुमशकन्मन्युसंरंभं सुदुरासदं १ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता
२ प्रल्हादं प्रेषयामास ब्रह्मावस्थितमंतिके तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३ तथेति शनकै राजन्महाभागवतोऽर्भ
कः उपेत्य भुवि कायेन ननाम विधृतांजलिः ४ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः उत्थाप्य तच्छीर्ष्ण्य
दधात्करांबुजं कालाहिवित्रस्तधियां कृताभयं ५ तं च यन्नरदृष्टाश्रुतपूर्वं तस्य भावस्तत्त्वं तस्माद्धेतोः शंकिताः सती नोपेयाय न समीपमगा

न २ एवं स्थिते ब्रह्मा चतुर्मुखोऽतिके समीपेऽवस्थितं प्रल्हादं प्रेषयामास प्रेषणप्रकारमेवाह तातेत्यर्द्धेन तात हे वत्स स्वपित्रे कुपितं क्रुद्धं प्रभुं भगवंतं
प्रशमय प्रसन्नं कुरु उपेहि समीपं गच्छेति ३ हे राजन्युधिष्ठिर तथेत्यभ्युपगम्य भागवतश्रेष्ठोऽर्भकः प्रल्हादः शनकैः समीपमेत्य प्राप्य विधृतः बद्धोंऽज
लिर्येन स तादृशः भुवि देहेन दंडवन्ननाम नमस्कृतवान् ४ ततः स्वस्य पादयोर्मूले पतितं तमर्भकं प्रल्हादं विलोक्य देवः श्रीनृसिंहः कृपया परितः प्लुतो
व्याप्तः सन् उत्थाप्य तस्य प्रल्हादस्य शिरसि करांबुजमदधान्निहितवान् कथंभूतं कालएवाहिः सर्पस्तस्माद्वित्रस्ता भीता धीर्येषां तेषां कृतमभ
यमभयप्रदानं येन तादृशं स्मरति भीरूणां कृताभयप्रदानं इत्यर्थः ५

नयु

स प्रल्हादस्तस्य भगवतः करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य तादृशः सद्य एवाभिव्यक्तौ प्रत्यग्दृष्टौ परात्मानौ स्वात्मपरमात्मानौ तयोर्दर्शनं यथार्थात्म
साक्षात्कारात्मकं यस्य पूर्वं प्रत्यग्दृष्टावपन्नरूपभगवद्विषयज्ञानयुक्तस्तत्करस्पर्शेन तु ज्ञानं तु दृढं च तत्त्वेनेत्युक्तविधपरमात्मदर्शनयुक्त इत्यर्थः अत एव नि
र्वृतः सुखितोत एव हृष्यत्तनुरुदंचितरोमयुक्ततनुः क्लिन्नं प्रेम्णार्द्रं हृदयं यस्य अश्रूण्यानंदजानि लोचनयोर्यस्य तादृशस्तस्य भगवतः पादाब्जं हृदि दधौ धृ
तवान्निरतिशयसुखप्राप्तित्वेनानुसंहितवानित्यर्थः ६ ततः प्रेमगद्गदया वाचा एकाग्रमनसा भगवदेकविषयेण मनसा हरिमस्तौषीच्च कथंभूतः
सुसमाहितः सुसमाधिमेवाह तस्मिन्नेव न्यस्तं हृदयं ईक्षणं चक्षुर्येनेति हृदा मनो वा मनसामिन्न इति बुद्धिर्न बुद्धिवृत्तीनामेकविषयत्वाभिप्रायेण ।
एकाग्रमनसा न्यस्तहृदयेक्षण इति चोक्तं ७ स्तुतिमेवाह ब्रह्मादय इत्यादि द्विचत्वारिंशच्छ्लोकैः तावद्भगवत्स्तुतावात्मनो नधिकारमाशंकते ब्रह्माद

स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६
अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ प्रल्हाद उवाच ब्रह्मादयः सुरगणा मु
नयोऽथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ८

य इति चतुर्मुखप्रभृतयो देवगणाः सत्त्वैकतानमुनयः सत्त्वस्यैकताना मुख्याश्रया मतिर्येषां केवलसत्त्वप्रधानमतय इत्यर्थः अनेनात्र सत्त्वं निर्म
लत्वात्प्रकाशकमनामयमित्युक्तरीत्याऽतींद्रियार्थदर्शनयोग्यत्वं सूचितं एवंविधा अपि मुनयः सिद्धाश्च स्ववचसां प्रवाहैः स्तोमैस्तथा बहुमा
नैर्बहुभिर्गुणैश्च पिप्रमाराधितुं स्तुत्यादिरूपाराधनद्वारा यस्य तोषमुत्पादयितुमधुनापि न पिप्रुराराधितुं न पर्याप्ता न समर्था इत्यर्थः स हरिरुग्रा असु
री जातिर्यस्य तस्य मेऽनेन वक्ष्यमाणगुणवारि समुक्तं ईदृशस्य ते मम किं कथं तोष्टुं तोषं प्रापयितुमर्हति वाङ्मनसापरिच्छेद्यस्वरूपस्वभावो विपुल
बुद्धिभिर्ब्रह्मादिभिरपि स्तोतुमशक्यः कथमल्पबुद्धेरासुरस्वभावस्य मम स्तुत्या कथं तुष्यादित्यर्थः ८ एवमनधिकारमात्मन आशंक्य पुनरधिका
रं संभावयितुं तावद्भगवतो जातिगुणवृत्त्यादिनादरतम्यानादरेण भक्त्यैकतोष्यत्वमाह॥ ॥श्री॥ ॥श्रीरामचंद्राय नमो नमः॥ ॥

मन्ये इति द्वाभ्यां धनादयः परमपुरुषस्याराधनाय संतोषाय निमित्ताराधनाय न भवंति इति मन्ये किंतु भक्तिरेव भवतीति मन्य इत्यर्थः कुतः हि यस्माद्भगवान् ग
जयूथपाय धनादिरहिताय गजेंद्राय भक्त्यैव तुतोष तत्र धनं वित्तं अभिजनः सत्कुले जन्म रूपं सौंदर्यं तपः स्वधर्मः कृच्छ्रादिरूपं वाऽनशनरूपं वा श्रुतं पांडि
त्यं ओजः इंद्रियबलं तेजः कांतिः प्रभावः प्रतापः बलं शारीरं पौरुषं उद्यमः बुद्धिः प्रज्ञा योगः प्राणजयः ९ एवं धनाद्यभावेपि केवलभक्त्यैव भग
वतोषहेतुत्वं दर्शितं यतो भक्तेरेव भगवतोषहेतुत्वमत एतेभ्यो गुणसंपन्नविप्रापेक्षया भगवद्भक्तिसंपत्तिरेव श्रेयसीत्याह विप्रादिति द्विषड्गुणा द्वादशगुणा
णास्ते धर्मश्च सत्यं च दमः श्रुतं चामात्सर्यं ह्रीस्तितिक्षानसूया यज्ञानं यज्ञश्च धृतिः शमश्च महाव्रतानि वै द्वादश ब्राह्मणस्येति सनत्सुजातोक्ताः एतैर्युक्ता
दरविंदनाभस्य पादारविंदविमुखाद्ब्राह्मणान् श्वपचं श्वपाकं वरिष्ठं श्रेष्ठं मन्ये श्वपचं विशिनष्टि तदर्पितेति तस्मिन्नरविंदनाभेऽर्पिताः समर्पिताः
मनआदयो येन तं तत्रेहितं कर्म तस्य श्रेष्ठ्ये ततो विप्रस्यावमत्वे च हेतुमाह स एवंभूतः श्वपचः स्वकुलमपि पुनाति भूरिमानो गर्वो द्विषड्गु
णाद्युक्तो यस्य स तु विप्रः न त्वात्मानमपि पुनातीत्यर्थः यद्यप्युक्ता एव गुणा भगवद्भक्त्यनुग्राहकाः भक्तिश्च वेदांतविहितब्रह्मोपासनात्मिकात

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान्
गजयूथपाय ९ विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थप्राणं
पुनाति स कुलं न तु भूरिमानः १०

त्र चाधिकारस्त्रैवर्णिकस्यैव न तु शूद्रस्य एतच्च शारीरकापशूद्राधिकरणन्यायसिद्धं एवं च तत्र सुतरां श्व
पाकस्याधिकारो न संभवतीति उक्तगुणयुक्ताद्द्विजाद्भक्तियुक्तस्य श्वपाकस्य वरत्ववर्णनमनुचितं तथाप्यत्र प्रकरणे भक्तिशब्देन भक्तिप्रपत्तिश्चो
च्यते प्रपत्तौ सर्वेषामधिकारो बहुप्रमाणप्रतिपन्नः अत एव हि देवेयापक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां
गता इति स्त्रीशूद्रादीनामपि भगवति भक्त्यानन्यधर्मापत्तिरुक्ता प्रपत्ता भवति वनं गतो यद्धरिमाश्रयेत उपेतनारायणमादिदेवं मन्येत देतद
खिलं परमस्य पुंसः स्वात्मार्पणं स्वसुहृदः परमस्य पुंस इति प्रपत्तिरपि कर्तव्यत्वेन पूर्वमुक्ता चेत्यतो न विरोधः उपपादितं चैतत्पुरस्तान्मनआ
दीनां भगवति समर्पणं नाम न तद्व्यतिरिक्तं तदायत्तस्वसत्तादिमत्वेन चानुसंधानरूपा ध्रुवमायात्मकज्ञानं प्राणशब्दः प्राणाश्रयप्रत्यगात्मस्वरूप
स्याप्युपलक्षकः एवं चात्मात्मीयादिसमर्पणेन भगवति न्यस्तभरः श्वपाकोपि भगवतो वशकत्वादुक्तविधाद्विप्राच्छ्रेयानिति भावः तदुक्तं भगव
ता अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः इति प्रियो हि ज्ञानिनोऽत्यर्थमित्यादि च अपि वा ये [illegible]

नतुपरिपूर्णस्य भगवतो जातिगुणवित्तादिविहीनश्वपाकसमर्पितमन्त्रादिभिः किंप्रयोजनं कथंवा ततस्तस्य तोषः कथंचैतदेवंविधो विमामनन्यभो
वेनभजन्नितरां मत्प्रिय इति भगवतोक्तं तत्राह नैवेति प्रभुरीश्वरो निजलाभेन पूर्णः निजेनस्वाभाविकेन लाभेन समस्तकामावाप्त्यापूर्णः अतएव
मानं स्वाराधनरूपं कर्म नैव जनादेः आत्मने इत्यपकृष्यते आत्मने आत्मार्थं स्वप्रयोजनाय जनाद्वृणीतेत्यर्थः किंतु करुणो वृणीते करुणः करुणा
वान्गुणवचनेभ्यो मतुपो लुगवक्तव्य इति लुप्तमतुवंतं पदं लुकुलुकीति दावोलुकहेतुगर्भमिदं दयालुत्वाद्विदुषो वृणीते प्रभुरुद्धजनास्वाराधनविधा
नेनामीकरोतीत्यर्थः करुणयाराधनो जीवनार्थमेवाराधनं स्वीकरोतीति भावः तदेवविशदयति यद्यदाराधनं भगवते जनो विदधीत करोति तच्चा
त्मने स्वार्थमेव भवति यथास्तु वस्तुत्वेतामेतिवर्धमानस्वस्वचंघतां इतिन्याया यद्भगवत्पूजनेन स्वयमपि पूज्यो भवतीत्यर्थः कथमन्यस्य पूजनेतत
देवास्यांतदधीनसत्तादिभिनो वस्तुनस्तत्वकारणेन तत्साम्यापत्ते दृष्टांतमाह यथा मुखश्रीः प्रतिमुखस्येति यथा सा द्वादर्लकागादिजन्या मु

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमु
खस्य यथा मुखश्रीः ११ तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथा मनीषं नीचोऽजया गुणविस
र्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन १२

खस्य शोभा तदधीन छाया मुखस्य भवत्येवं भगवतः पूज्यता तदाराधनानां तथैव भ
वतीत्यर्थः तद्यथा तरुणावत्सं वत्सो वा मातरं छायासत्वमनुगच्छेत तथा प्रकार इति श्रुतिर्हि जीवस्य छायावदीश्वरपारतंत्र्यमवगमयति जना
दविदुष इति पाठे ऽविदुषः किंचिज्ज्ञादपि जनान्मानमात्मार्थं न वृणीत इत्यर्थः ११ एवं भगवतो भक्तैकतोष्यत्वं ततो बस्य भक्तो जीवनार्थत्वं चोक्तं
तदेवमस्याप्रज्ञातेरपि न दैत्यस्य ततो बकस्तुतावनधिकारः संभावितः यत एवं भक्तो हमतो यथामति स्तोष्यामीत्याह तस्मादिति यस्माद्भगवा
न भक्तैकतोष्यस्तस्मान्नीचोपि तद्भक्तियुक्तोहमत एव विगतविक्लव गतशंकः सन् सर्वात्मना करणत्रयेणेश्वरस्य भगवतः महि महिमानं य
थामति गृणामि स्तौमि किं ईश्वरस्तुत्या प्रयोजनं इति शंकां निराकुर्वन्स्तद्यद्यनुवर्णनं विशिनष्टि येते श्वरगुणानुवर्णितेन अनुवर्णितेनेति भावे
क्तः अजया प्रकृत्या गुणविसर्गं गुणकार्यं शरीरमनुप्रविष्टः पुमान् पूयेत शुध्येत तस्तु तावत तस्य कोप्यतिशयः किंतु स्तुवत एवात्मविशुद्धिरूपो
तिशय इति भावः १२ एवमात्मनः स्तुतावनधिकारं परिहृत्य न स्तुतिं प्रतिज्ञायतं तुष्टुवुस्तावत्कोपोपशमं प्रार्थयते द्वाभ्याम् ॥ ॥श्री॥ ॥

सर्वेहीति हेईश वयमिव यथा वयं तव विधिं करास्तथामी सर्वे ब्रह्मादयोपि सत्वधाम्नस्तव विधिकराः किंकरा एव अस्त्वेवं ततः किमत आह उद्विजं
तः त्वत्कोपादुद्विजंतस्तव तैनतो मन्युं यच्छेत्युत्तरेणान्वयः सत्वधाम्न इत्यनेन नमु हि सत्वैकतानस्य तव कोपः स्वाभाविको न भवति किंतु लोकरक्षणोपि
कृतस्य भवतश्च रामरूपक्रीडार्थं माहितमपि प्रतंतदेव व्यनक्ति क्षेमायेति अस्य जगतः क्षेमाय लब्धपरिरक्षणाय भूतये पोषणाय आत्मलाभायात्म
सुखाय ब्रह्मात्मकस्वात्मानंदानुभवजसुखाय च भगवतस्तव रुचिरैः सुंदरैरवतारैर्नृसिंहादिभिर्विक्रीडितं भावेनः विविधा क्रीडा इत्यर्थः इयं दुष्ट
विध्वंसको धादिरूपानवक्रीडा लोकक्षेमाय घर्थमिति भावः एवंविधक्रीडया हि दुष्कृतविनाशद्वारा स्थितिः वरिपालनं भवत्येव ततः प्राप्तिः अवतार
विना क्रीडामनुभवतो लोकस्य तिः प्राप्तवंधकर्मद्भयरूपमोक्षद्वारात्मसुखानुभवति अभवेदित्येतदर्थं तव विक्रीडितमिति भावः १३ यतस्तव
विक्रीडितं लोकक्षेमाद्यर्थं ततस्माद्धे नृसिंह मन्युं यच्छ उपसंहर इतः परं तमन्युनाप्रयोजनमस्तीत्याह अधुनाऽसुरोमत्तपिता त्वया हतः लोका

सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भग
वतो रुचिरावतारैः १३ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या लोकाश्च निर्वृतिमिताः प्रतियंति

स्मरंति

सर्वे रूपं नृसिंह विभयाय जनाः १४ नाहं बिभेम्यजित तेतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् आंत्रस्रजः क्षत
जकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ निर्वृतिं सुखं रताः प्राप्ताश्च तनु लोका निर्वृतिं यंतु नाम लोकांतर्गतः सा
धुजनस्तु मत्कृतां विप्रां च तद्धिंसां नानुमोदेतात आह साधुरपि लोकलोकोपद्रवकारि वृश्चिकसर्पादिहत्या मोदेत वृश्चिकसर्पादितुल्यस्य मनुहेत्या सा
धुजनो विप्रादेनेवत्यर्थः इतिशब्दः लिंतंतः सर्वे ब्रह्मादयो निर्भयाः प्रतियांतु स्वस्थानानि प्रतिगच्छंतु इतः परं इदं त्वद्रूपमभयाय जनाः स्मरंति १४
ननु ब्रह्मादय उद्विजंत इति विशेषणाद्ब्रह्मादीनामेव क्रोधयुक्तान्मद्रूपाद्भयं ब्रूषे त्वं तु न बिभेषि किमत आह नेति हेऽजित तव तस्माद्रूपादिति विशेष्या
ध्याहारः अहं न बिभेमि कथंभूतात् आस्यं च जिह्वा चार्कसदृशनेत्रे च भ्रुकुटी नां रभसः आटोपश्च उग्रा दंष्ट्राश्च तान्यतिभयानकानि यस्मिन्नात्रम
यः स्रजो यस्मिन् क्षतजा रुधिराक्ताः केसरा यस्मिंस्तत्क्षतजकेसरं शंकुकवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तच्छंकुकर्णं द्वयोर्द्वंद्वे घोः कर्मधारयः
निर्ह्रादेन भीता दिगिभा दिग्गजा यस्मात्तत्पूर्वेणापुनः कर्मधारयः क्षतजकेसरशंकुकर्णनिर्ह्रादभीतदिगिभं तस्मादरीन्भिंदंतीत्यरिभिदो नखा

तर्हि कुतो विभेषि इत्याशंक्यां तन्निमित्तमाह त्रस्तोस्मीति हे कृपणवत्सल दुःसहं यदुग्रं संसारचक्रे कदनं तस्मादहं त्रस्तः भीतोस्मि कथंभूतोहं ग्रसतां प्र
णीतः ग्रसतामिति कर्तरि षष्ठी ग्रसद्भिः त्वच्छेषभूतं यत्स्वरूपं तन्निरोधायकाङ्क्षैर्देहात्माभिमानस्वतन्त्रात्माभिमानममकारादिभिस्तत्र संसारे प्रणीतः प्रा
पितस्तत्र च तत्र भूतैः कर्मभिश्च बद्धः निगलितः हे उत्तम कमनीयतम अनुक्तविधं साप्रीतः मद्विषयनिरतिशयप्रीतियुक्तस्त्वं ते तवाङ्घ्रिमूलं प्रति
कथंभूतमङ्घ्रिमूलम् अपवर्गशरणम् अपवर्गोपायभूतं कदा नु ह्वयसे आह्वयसे कदा मां त्वदङ्घ्रिमूलं प्रापयिष्यसीति तावन्मनान्नुवर्तते भयमिति भावः
१६ ननु भयं चेत्तद्दुःखदर्शनजं किं न संसारचक्रे दुःखमित्यपेक्षायां न हृष्टो यत्नात्मानं विशिनष्टि तस्मादित्यर्द्धेन येन कर्मणाहं बद्धः तस्मात्कर्म
तो निमित्तात्प्रियैरप्रियैश्च विषये यथासंख्यं वियोगसंयोगौ ताभ्यां जन्म तु तत्तिर्यस्ते तेन शोकाग्निना सकलयोनिषु दह्यमानो नीव दुःखितो
हं भ्रमामीत्यन्वयः तर्हि दुःखनिमित्तकर्मनिहृत्युपायमनुतिष्ठत्यपेक्षायामं तरेण भवद्दास्यमन्यन्निःशेषदुःखनिहृत्युपायभूतं नास्त्येव कथं

त्रस्तोस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः बद्धः स्वकर्मभिरुशत्तम तेङ्घ्रिमूलं प्रीतोपवर्गशरणं ह्व
यसे कदा नु १६ यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः दुःखौषधं तदपि दुःखमतद्धि
याहं भूमन्भ्रमामि वद मे तव दास्ययोगं १७

चित्तद्यपि दुःखात्मकमेवेत्याह दुःखौषधमिति यद्दुःखस्यौषधं प्रतीकारात्मकं तदपि दुः
खं दुःखात्मकमित्यर्थः दुःखस्य प्रतीकारो हि दुःखनिमित्तदुरितनिरसनेन भवति निःशेषदुरितनिवर्तकेच्च न किंचिदस्मदादि प्रतिवदोक्त प्राय
श्चित्तात्मकं न निःशेषदुरितनिवर्तकं प्रत्युत दुःखात्मकं चेत्यर्थः अतोहे भूमन्नतद्धि तायत तु न हिता यन्न भवति अतद्धियेति पाठे देहात्मा
भिमानेन भ्रमामि अतस्तव दास्ययोगं दिश तव नित्यं दास्यसंबंधं देहि वदेति पाठे उपदिशेत्यर्थः प्रबुद्धत्वद्दास्यसंबंधवान्यथा भवेयं तथा माम
नुग्रहाणेत्यर्थः १७ एवं कोपोपशमः प्रार्थितः भगवद्दास्यमेव दुःखौषधमिति चोक्तं पूर्वं नयेन हि कुमाननुवर्त्तिनेनेति भगवद्दर्शन
मात्मविशुद्धिफलकमित्युक्तमथ त्वदनुग्रहेण प्रबुद्धनित्यभवद्दास्यसंबंधोहं यथामति त्वां स्तुवन्दुःखनिमित्तकर्मभिर्विमुक्तः सर्वाणि दुः
खानि यथा तरेयं तथानुग्रहाणेत्याह॥ ॥श्री॥ ॥ ॥श्री॥ ॥

सोहं त्वदनुग्रहेणाप्रबुद्ध इत्याह सोहमिति एवंभूतोहं सुहृदो हितैषिणः प्रियस्य ममातिशयप्रीतिविषयस्य परदेवतायास्तव ब्रह्मादिभिर्गीता लीला लीलारूपकथा
पारविषयाः कथाः अनुगृणन् गुणविप्रयुक्तः सत्वादिगुणमलकर्मवंधै रागादिभिर्वा विमुक्तः तेतव पदयुगलमेवालयं माश्रयो येषां ते भक्तास्त एव हंसाः
परिशुद्धा जनाः तैः संगो यस्य तादृशः अंजस्तितर्मि सुखेन तितर्मि अतितराम्यतिथ्यानुगृह्णाणेत्यभिप्रायः अत्रायं क्रमः तावत्त्वदनुग्रहेण सत्संगस्ततो भगव
द्गुणावर्णनं ततो विरागः ततस्त्वज्ज्ञानाद्दुःखनिमित्तकर्मक्षयद्वारा संसृतेस्तरणमिति १८ एतत्सर्वं त्वदनुग्रहेणैव भाव्यं न तूपायांतरेणेति कैमुत्यन्यायेन वक्तुं ता
वत्त्वदुपेक्षितानां न दुःखप्रतिक्रियास्तीत्याह बालस्येति हे नृसिंह इहलोके बालस्य त्वदुपेक्षितस्य पितरौ माता पितरौ न शरणं न रक्षकैः एवमार्तस्य रोगपी
डितस्य त्वदुपेक्षितस्यागदमौषधं न शरणं तथोदन्वति समुद्रे मज्जतस्त्वदुपेक्षितस्य नौर्न शरणं पित्रादिषु सत्स्वपि बालादीनां विनाशदर्शनादिति भावः अ

सोहं प्रियस्य सुहृदः परदेवतायाः लीलाकथास्तव नृसिंह विरिंचगीताः अंजस्तितर्म्यनुगृणन्गुणविप्रयुक्तो
दुर्गाणि ते पदयुगालयहंससंगः १८ बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः तप्त
स्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानां १९

अतो हे विभो नृसिंह इहलोके तप्तस्य दुःखितस्य तत्प्रतिविधिस्तापप्रतीकारो पायस्तावदप्रसिद्धः सत्वदुपेक्षितानां त्वामनाश्रितानां तनुभृतां शरीरमेवपो
षणपराणां किं मंजसेष्टः अपितु नेष्ट एव बालादिदुःखोपशमने एव पित्रादयः न प्रभवः किं पुनर्निःशेषदुःखोपशमने न प्रभवं इत्यतस्त्वदनुग्रहेणैव
निःशेषं दुःखात्मकसंसृतिनिवृत्तिरिति संसृतिचक्रादुत्तारकस्त्वमेवेति भावः १९ यतस्त्वमेवं भूतोऽतः संसृतिचक्रपतितं त्वत्प्रपन्नं मामुत्तारयेति वि
ज्ञापयिष्यन् त्वत्प्रपत्तिमंतरेण न कोप्यात्मानं तारयितुं प्रभुरिति वक्तुं तावदाचार्यादिशुखेन कारितमपि त्वच्चरणावरणं त्वत्कारितमेव यतस्त्वत्त
त्क्रियाश्रयकर्त्रादिकारकषट्कसंबंधिशरीरकत्वेन च कालशरीरकत्वेन त्वमेवावस्थित इत्याह॥ ⁘ ॥श्रीमते रामानुजाय नमः॥ ❖ ॥

४६ यस्मिन्निति यस्मिन्नित्यधिकरणकारकनिर्देशः यत इति हेतुत्वशक्त्याश्रयं निर्दिश्यते यर्हीत्यनेन कालः येनेति करणत्वशक्त्याश्रयं यस्येति संबंधाय
स्मादित्यपादानत्वशक्त्याश्रयं यस्मै इति संप्रदानशक्त्याश्रयं यथेत्यनेनोक्ताधिकरणादिगतः प्रकारः यदीति कर्मत्वशक्त्याश्रयं उताथि च य इत्यनेन प्रयो
जककर्तासंचोदित इत्यनेन प्रयोजककर्तातावेवापरः परस्माद्यद्वापर उत्कृष्टश्चापरोऽवमः भावः पदार्थः सप्रकारकषट्करूपः संबंधिरूपः कालरूपश्च
योऽयं पदार्थः पृथक्त्वभावः प्रविभक्तः स्वभावोऽयमस्य सः पृथक्त्वभावः कर्तृकर्मद्वारा तन्निष्ठक्रियाश्रयत्वमधिकरणत्वं द्रव्यगुणक्रियान्यतमनिरू
पितत्वेन कारणत्वे च सति सव्यापारनिर्व्यापारनिष्ठत्वं हेतुत्वं धात्वर्थव्यापारजन्यफलाव्यवहितपूर्वव्यापाराश्रयत्वं करणत्वं संबंधसामान्याश्र

यस्मिन्नुयतो यर्हि येन च यस्य यस्मात् यस्मै यथा यदुत यस्त्वपरः परो वा
भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपं २०

यत्वं संबंधित्वं प्रकृतिधात्वर्थव्यापाराजनाविष्टत्वे सति संयुक्तविभागाश्रयत्वमपादानत्वं दानस्य कर्मणा क्रियया वा संबध्यमानत्वं संप्रदानत्वं धात्व
र्थतव्यापारव्यधिकरणतज्जन्यफलाश्रयत्वं कर्तृत्वं प्रकृतधात्वर्थव्यापारानुकूलव्यापाराश्रयत्वं प्रयोजककर्तृत्वं धात्वर्थव्यापाराश्रयत्वं कर्तृ
त्वमित्येवं सप्तविभक्तस्वभावः कालस्य त्वात्मव्यतिरिक्तपरिच्छेदकत्वं स्वभावः एवं पृथक्स्वभावः उच्चावचरूपः करोति विनाशयत्युत्पादनाश्रयो
विनाशाश्रयो वा भवति तदखिलं कारकषट्कादिरूपवस्तु भवतः स्वाभाविकं रूपं शरीरमित्यर्थः एवं च सर्वभावात्मतया तत्तच्छरीरकतया व
स्थितस्य ते वैव सर्वे निग्रहानुग्रहादयः सद्व्यापारका व्यापारा इति भावः २० अथ तत्पदप्रतिपदनमंतरेण लोकः पुमानतितरेत्संसारचक्रं इत्याह मायेति ४६

त्वदन्यः त्वत्समाश्रयणाद्विमुखः कः पुमान्संसारचक्रमतितरेन्न कोपीत्यर्थः संसारश्चक्रं चक्रवत्परिवर्त्तमानं चक्रशब्देन तत्र पतितस्य दृढतरावलंबनमंतरेण न यथा ततो निष्क्रमणं संभवति तथा संसारे पतितस्यावलंबनभूतं भगवंतं अंतरेण न तस्मादुत्तितरणं संभवतीत्यभिप्रेतं संसारचक्रत्वेन रूपयन्तं विशिनष्टि यद्यस्मिन्मनसि नाभिरूपे हेतुः स्वः परमपुरुषस्य अजया भगवन्माययाहेतुभूतया अर्पिताः षोडश ज्ञानकर्मोभयेंद्रियव्यापारा दश प्राणापानादिरूपाः पंचप्राणवृत्तयः मनोवृत्तिश्चेति षोडश अराणि यस्य तत्र ज्ञानकर्मोभयेंद्रियव्यापाराणां मनोव्यापारानुविद्धत्वस्य भाव्यत्वेन व्यापारपूर्वकत्वाच्च तदायतत्वेन तदर्पितत्वं मनोवृत्तेस्तु साक्षात्स्मन साव्याश्रयत्वात्तदर्पितत्वं यद्यपि मनः पर्यंताद्विंद्रियाणां प्राणाय त्तस्थितित्वेन प्राणव्यापारपूर्वकत्वेन च प्राणवृत्तीनां साक्षात्परंपरया वा मनआश्रयं तथापि मनोव्यापाराभावदशायां विद्यमानापि प्राणवृत्तिरज्ञाताऽसत एवासत्प्रायेति तद्वृत्तिसत्ताज्ञानस्य मनोव्यापारपूर्वकत्वात्तस्यास्तदर्पितत्वमवगंतव्यं यद्वा ऽजयाहेतुभूतयाऽर्पिताः षोडशैकादशेंद्रियाणि पंचभूतानीति षोडशविकाराण्येवाराणि यस्य यदेतत्संसृतिचक्रमित्यन्वयः संसारस्य सर्वेंद्रियव्यापारपूर्वकत्वात्तदर्पितत्वमवगंतव्यं अस्मिन्पक्षे नाभित्वेन नकिंचिदपि रूपितं यद्वा ऽजया नाभिरूपया हेतुभूतया चार्पिताः षोडशैकादशेंद्रियपंचभूतात्मका

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः छंदोमयं यदजयार्पितषोडशारं संसारचक्रमज कोतितरेत्त्वदन्यः २१

निकृष्टा यस्येत्यर्थः संसारचक्रस्यार्पितषोडशारत्वेऽजायाहेतुत्वं उक्तं सा किं साक्षादेव हेतुः नेत्याह मायेति मनः सृष्टिद्वारा हेतुरिति भावः किं तर्हि तस्याः सहकारिकारणमत आह कालेनेति कालेन सह माया मनः सृजति कालसहकृता प्रकृतिर्मनः सृजतीत्यर्थः कालोपि न स्वरूपेणाप्रकृतेर्मनः सर्गे सहकारी अपि तु गुणक्षोभद्वारेति वदन्कालं विशिनष्टि चोदिताः कालेन क्षुभिताः सत्वादयो गुणा यस्तैरनुमतेन सह कृतेन स्वचोदितगुणत्रयसविधेन कालेन सहकृता भगवतो माया मनः सृजति संसारचक्रस्य दुस्तरत्वे भगवदभिमुख्यातु सुतरत्वं चापि कर्तुं मनो विनिष्टि कर्ममयमिति त्रिगुणात्मकप्रकृतिपरिणामरूपत्वेन स्वयमपि त्रिगुणात्मकत्वाद्रजोमयतया पुण्यापापरूपकर्मविषयप्रवृत्तिप्रचुरं बलीयः अनतिवर्त्यं दो छंदोमयं सत्वानुपाताच्छास्त्रावगति साधनत्वचुरमिच्छामयमित्यर्थस्त्वनुपपन्नः छंदःशब्द इच्छावाचीन तु छंदः शब्दः अनेन सत्वप्राचुर्येसति भगवदभिमुखत्वेन संसृतिचक्रं सुतार्यमित्यभिप्रेतं एवंभूतं मनः सृजतीत्यन्वयः तदेवं मनोदोषात्संसारापतितिवृत्तिस्त्वत्समाश्रयणविमुखस्य तु न भवति त्वदन्यः कः संसारचक्रमतितरेदित्यनेन त्वदन्यस्त्वतितरेदेवेति सूचितं २१ तदेवाधिकुर्वन्नत्वदन्यं मां संसारचक्रान्नि

४७ सत्वंहीति यस्मान्मायामनःसर्गद्वारा संसृतिचक्रे जीवलोकं पातयति सत्वमजया स्वकीयया मायया षोडशारे चक्रे संसारात्मके विसृष्टमत एव नि
जशरीरादुःखानमभुञ्जान्तं प्रपन्नं मां हे विभो ऽपकर्ष संसृतिचक्राद्बहिर्गमय यमेव बंधकः स एव मोचकः इति न्यायेन त्वं एव ततो निर्गमयितुं समर्थ इ
ति भावः स्वामर्थ्यमेव दर्शयन् तं विशिनष्टि नित्येत्यादिना आत्मगुणाः स्वशरीरभूतप्रकृतिगुणा नित्यं विजिता आत्मगुणा येन नित्यासंस्पृष्टदेहधर्मे
ण स्वधाम्ना स्वस्वरूपेणैव यद्वा विजितात्मगुणो यःस्व आत्मा तस्य धाम्ना प्रकाशेनैव वशीकृतविसृज्यविसर्गशक्तिः विविधं सृज्या विसृज्या जीवा
स्तेषां विसर्गे शक्तिर्यस्याः सा प्रकृतिः वशीकृता येन स तथोक्तः कालरूपशरीरश्च वशीकृतसंसृतिनिमित्तप्रकृतित्वान्मोचयितुं त्वमेव प्रभुरिति
भावः नित्यविजितात्मत्वादिनाविसृज्यजीववर्गाद्ब्रह्मादिस्तंबपर्यंताद्वैलक्षण्यमुक्तम् अतः संसारिजीववर्गे न कोपि तन्मोचने दक्षः नहि स्वयं काराग
हबद्धो ऽन्यं बद्धं मोचयितुं प्रभुरित्युक्तं भवति २२ ननु त्वं बालः सन्नेव किं संसारान्निर्विघ्नमेव भुंक्ष्व भोगानित्यत्राह त्रिभिः दृष्टा इति हे विभो ऽ

स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीड्यमान
मुपकर्ष विभो प्रपन्नं २२ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयम् येऽस्मत्पितुः कुपि
तहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः २३ तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैंद्रियमा
विरिंच्यात् नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं २४ यं संसारिजनो यानिच्छति कामयते तेऽखिल
धिष्ण्यपानां इंद्रादीनामायुरादयः मया दिवि दृष्टाः श्रियः भोग्यभोगोपकरणादिसमृद्धयः विभवस्त्रिलोकाधिपत्यरूपमैश्वर्यम् आयुरादयो ह
श्यत इति काकानुकूल्यमुक्तं तदेवाह ये इति येऽस्मत्पितुः कोपहासविकृतभ्रूभंगमात्रेण विलुलिता ध्वस्तास्स तु मत्पिता त्वया हतो निरस्तः २३ यस्मा
दायुरादयो मत्पितृदृष्टांतेन तुच्छत्वेन दृष्टाः तस्मात्तनुभृतां देहिनामभूरायुरादिरूपा आशिषः अज्ञः तत्परिपाकं विजानन् अज्ञ इति छेदे अज्ञः सन्नहं
ऐंद्रियं इंद्रियैरनुभाव्यमन्यदपि सुखम् आविरिंच्यात् ब्रह्मणोऽनुभाव्यमपि नेच्छामि आपाद्यपि तस्मात् कालात्मना कालरूपेण उरुविक्रमेण विपुलपराक्रमेण विपुलपा
दविपुलपादविक्षेपेण विलुलितान् विध्वस्तान् नहि मादृशान् पितेव छाम्यतो निजभृत्यानां स्वपार्षदानां पार्श्वं समीपमेव मां प्रापय २४ ॥श्रीरामाय॥ ४७

किं च श्रुतिः श्रवणं तदेव सुखं यासु ता अत एव मृगतृष्णिरूपाः मरीचिकावदवस्थिता आशिषः कुत्र पार्थ्याभासाः आशिषः क इत्यर्थः अशेषाणां रुजां रोगा
णां विरोहः उत्पत्तिस्थानं क्व चेदं कलेवरं दुर्घटमेतदिति भावः एवं चेत्सर्वो विज्ञः किमिति संसारान्न निर्विद्यते तत्राह निर्विद्यत इति यद्यपि किं सुखं इतीत्थं
मृगतृष्णिकातुल्यं विज्ञान् जानन्नपि न निर्विद्यते विद्वानपीत्यपि शब्देनाविदुषो निरंतरं निर्वेदाभावः सूचितः विदुषो ऽपि निर्वेदे हेतुं वदन् विरागं विशिन
ष्टि दुरापैर्दुःखेनापि तत्क्षणमप्राप्यैर्मधुलवैर्वैषयिकसुखलेशैः कामाग्निं वासनानलं तमुपशमयन्विषयासक्तः सन्विद्वानपि न निर्विद्यत इत्यर्थः विषयासक्त
स्य निर्वेदस्य का शंका नास्तीति भावः २५ एवं तत्प्राप्तये तदनुग्रहं संप्रार्थ्य स्वशिरसि दुर्लभेन तत्करपद्मस्पर्शविधानेनात्मनः कृतार्थतामाविष्करोति क्वाह
मिति हे ईश तमोधिके तमःप्रचुरे रजःप्रभवे रजसउत्पन्ने ऽस्मिन्नेव रजस्तमःकार्ये काममोहादिप्रचुरे सुरेतरकुले ऽसुरकुले जातो ऽहं क्व च तवानुकं

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः श
मयन्दुरापैः २५ क्वाहं रजःप्रभव ईश तमो ऽधिके ऽस्मिन्जातः सुरेतरकुले क्व तवानुकंपा न ब्रह्मणो न तु भवस्य न वै रमाया यन्मे ऽर्पि
तः शिरसि पद्मकरः प्रसादः २६ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्र
सादः सेवानुरूपमुदयो न परावरत्वम् २७

पा दुर्घटमेतदित्यर्थः किं तदित्यत आह ब्रह्मादीनां शिरस्यपि यो नैवार्पितः तेषामपि दुर्लभ इति भावः
स प्रसादः प्रसादरूपश्चक्रः पद्मवत्तापहरः करः मम शिरस्यर्पित इति यदेतत् दुर्घटमिति भावः अतो ऽहमनन्यलाभेन कृतार्थो ऽस्मीति तात्पर्यं २६ नैता
वता तव वैषम्यादिदोषप्रसंग इत्याह नैषेति यासौ जंतोः प्राकृतस्य परावरमतिः उत्कृष्टापकृष्टबुद्धिर्विषमा बुद्धिरिति यावत् सैषा बुद्धिर्भवतो नैव स्यान्न
तु तद्भावे हेतुं वदंस्तं विशिनष्टि जगत आत्मसुहृदः आत्मनो ऽंतरात्मनः सुहृदो हितैषिणश्च आत्मन इत्यनेन जगतः स्वशरीरत्वमवगम्यते नहि
कश्चित्स्वशरीरे आत्मनः प्रीतिरस्मिन्नप्रीतिरिति भावः सर्वस्य जगतः स्वाभाविकसुहृद इति वार्थः तर्हि सर्वेष्वेकरूपो भवत्प्रसादः किं नास्ती
त्यत्राह यद्यप्येवं तथापि वैषम्यं हि तस्यापि तव संसेवया प्रसादो भवति तत्र सेवानुरूपं तदपेक्षानुसारेण धर्मादिपुरुषार्थानामुदयो
भवति यथापेक्षानुरूपफलदत्वे दृष्टांतः सुरतरोः कल्पद्रुमस्य तत्सेवकापेक्षानुसारेण फलप्रदत्वं न च तावता तस्य वैषम्यं तद्वत्परावरत्वं सर्वेष्वे
करूपप्रसादाभावे परावरत्वे वैषम्यं न कारणमित्यर्थः २७

४८ एवमात्मवत्त्वत्प्रसादेन कृतार्थतामाविष्कृत्याधुना केवलमधुनैव त्वत्प्रसादविषयोऽहं जातः किंतु यदा मातृगर्भस्थं मामनुजिघृक्षता त्वया
सचोदितेन सुरर्षिणानुगृहीतः तदेव त्वदनुग्रहविषयोऽभवमतो जन्मन आरभ्य त्वयानुगृहीतोऽहं त्वद्भृत्यपार्श्वेन विसृजे इत्याह एवमिति हे भग
वन् यः सुरर्षिणा नारदेनात्मसात्कृत्वा दात्माधीनं कृत्वा तदधीनवचनेति सातिप्रत्ययः पूर्वं विषयपरवशत्वेन तदधीनं मां स्वाधीनं कृत्वेत्यर्थः यद्वा
ऽस्मिन् विषये सम्पदा चेति सातिः अस्मिन्विषये प्रवृत्तिं किंचिदप्यात्वपूर्वं भगवत्प्राप्तिरूपत्वेन स्थितं मां किंचित्तदनुकूलं कृत्वेत्यर्थः गृहीतस्तत्त्वत्रयोपदेशेना
नुगृहीतः सोऽहमिदानीं तव भृत्यसेवां दासानुदास्यं कथं नु विसृजे न कथंचिदपि त्यक्ष्यामीत्यर्थः कथंभूतोऽनुगृहीतोऽस्मि प्रभवः संसार एवाहिकूपः स
र्पयुक्तकूपः तस्मिन् कामाभिकामं कामं कामं तदिति कामा विषयाः शब्दादयः तान् कामं कामयमानं जनं निपतितमनु तत्संगान्निपतित

एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् कृत्वात्मसात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृ
जे तव भृत्यसेवां २८ मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं खड्गं प्रगृह्य यदवोचदसद्विधि
त्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि २९

जनस्य यः प्रकृष्टः संगः तस्माद्धेतोः प्रपतन्नहं विषयासक्तचित्तसंगात्प्रभवाहिकूपे पतन्नह
मित्यर्थः २८ यो नारदमुखेनापि कृतः स एव परमोऽनुग्रहः न चेदमपि तु छं मत्प्राणरक्षणादि रूपं न चेदं त्वया मदनुग्रहार्थं कृतं किं तु स्वार्थमित्याह म
त्प्राणरक्षणमिति हे ऽनंत यदेतन्मत्प्राणरक्षणं मत्पितुर्वधश्चेति तदुभयं स्वभृत्यस्य ऋषिवाक्यमृतं सत्यं यथा भवति तथा विधातुं कर्तुं कृतमित्य
हं मन्ये स्वभृत्यस्य ऋषिवाक्यमित्यत्र निजभृत्यभाषितमित्यत्रेवार्थो द्रष्टव्यः किंच यदस्मत्पितासद्विधित्सुर्मद्वधमिति शेषः मां जिघांसुरित्यर्थः खड्गं
प्रगृह्य मत्तोऽन्यश्चेदीश्वरः त्वद्रक्षकोऽस्ति तर्हि स त्वामिदानीमवतु रक्षतु तव कं शिरो हरामीति यदवोचदुक्तवान् तदीश्वरांशाहि मवचः स्व
सत्यं च विधातुं मत्प्राणरक्षणादिकं त्वया कृतमित्यहं मन्य इत्यर्थः २९ एवं कोपोपशमनप्रार्थनानुकूलोक्त्वा स्वाभिप्रेतं तद्दासयोगं संप्रार्थयन्नि
दानीं कृत्स्नं चिदचिदात्मकं जगदेतरात्मानं तच्छरीरकं तदुत्पत्तिस्थितिलयकारणं तदनन्यं स्तौति ॥ ॥ श्रीरामचंद्राभ्यां नमो नमः ॥ ॥ ४८

एकमिति एतत्प्रतिदृश्यमानं चिदचिदात्मकं कृत्स्नं जगदेकत्वमेव एतदित्यनेन विभक्तनामरूपं चिदचिदात्मकं जगन्निर्दिश्य तत्त्वंशब्दवाच्यब्रह्मणोऽनन्यत्वं साध्यते
तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र यथैक इत्यनेनाविभक्तनामरूपचिदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते यथैकमेवाद्वितीयं इत्यत्रैकशब्देन त
त्राहि वक्ष्यमाणनामरूपविभागनिबंधनबहुत्वप्रतिसंबंध्येकत्वं एकशब्दार्थः अत्राप्येतच्छब्देन प्रसिद्धपरामर्शिना यदभिप्रेतं नामरूपविभागप्रयुक्तं बहुत्वं त
त्प्रतिसंबंध्येकत्वं तद्विभागाभावनिबंधनमुच्यते तदयमर्थः यथा कारणावस्थायां घटशरावादिनामरूपविभागरहितएकत्वेनावस्थितो मृत्पिंडः पश्चाद्घटादिरू
पेणाभिन्ननामरूपविभागविभक्तोऽप्यनन्य एव एवं त्वमपि कारणावस्थायां नामरूपविभागानर्हचिदचिच्छरीरकं तयैकत्वेनावस्थितो देवादिनामरूपविभागा
र्हस्थूलचिदचिच्छरीरत्वेन परिणमंस्ततोऽभिन्न इति कार्यकारणयोरनन्यत्वात्त्वत्कार्यभूतजगदनन्यस्त्वं कार्यत्वकारणत्वयोः सतोऽवस्थावस्थाविशेष
रूपत्वेन सर्वावस्थास्वनुस्यूतं द्रव्यमेकमेवेति भावः तदेवसहेतुकमुपपादयति यद्यस्मात्त्वममुष्य जगतः आद्यंतयोरवस्थयोः पृथगवस्यस्यात्मानमिति शे
षः पृथग मध्यावस्थारहितमात्मानमवस्यसि पर्यवसितं करोषि जगत आदौ सृष्टेः पूर्वं तस्यान्ते प्रलये वात्मानं पर्यवशेषयसि ततो मध्यतः मध्यावस्थायां च त्वमे
व तथाहि कटकमुकुटादिकारणात्तथा कटकाद्यवस्थातः पूर्वमवस्थितः स्वर्णपिंडः कटकाद्यवस्थायाः पर्यवशेषितो मध्यतः कटकाद्यवस्थायां तदवस्थाव
तोऽद्रव्यान्न भिद्यते तद्वदिति भावः एवं जगतोऽभिन्नत्वोपपादनेन जगदुपादानत्वमुक्तमथ तन्निमित्तकारणत्वं वदन्नुपादानत्वप्रयुक्तं विकारित्वादिदोषपरिहारं

एकत्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यमस्य सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ३०
सच्च यत्कार्यावस्थायां नानात्वेनावस्थानं चाह सृष्ट्वेति गुणव्यतिकरं सत्त्वादिप्राकृतगुणपरिणामात्मकं इदं जगन्निजमायया आत्मीयसंकल्परूपज्ञानेन सृष्ट्वा त
त्सृष्टं जगदनुप्रविष्टोऽन्तरात्मतयानुप्रविष्टः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः कृत्स्नात्तावत्त्वानुप्रवेशेन च सृष्टं चिदचिदात्मकं पुनः संरक्षणोपयुक्तसंक
ल्परूपज्ञानद्वारान्तरात्मतयानुप्रविष्टस्तैः स्वशरीरभूतैश्चिदचिदात्मकैर्देवादिभिः शरीरैर्नानेव भिन्न इवावसितो प्रतीत अतो देवमनुष्यादिभेदभिन्नं जग
त्त्वमेवेति भावः सृष्ट्वानुप्रविष्ट इति सृष्ट्यनुप्रवेशयोरेककर्तृकत्वकथनेन तन्निमित्तकारणत्वं निर्दिष्टं विशेष्यांशभूतस्वरूपस्यैवेति च फलितं येनाकारे
णानुप्रवेशस्तेनैवाकारेण सृष्टत्वं हि ल्यप्प्रत्ययस्वारस्यादवगम्यतेऽनुप्रवेशश्च विशेष्याकारेणेति तेनैवाकारेण स्रष्टृत्वमपि एवं च विशिष्टाकारेणो
पादानत्वं विशेष्याकारेण तु निमित्तकारणत्वमित्युक्तं भवति अत एव चेदं सृष्ट्वेतीदंशब्दनिर्दिष्टसृष्टिं प्रति कर्मीभूतं जगच्चिदचिदुभयात्मकमेव साक्षादुत्प
त्त्याद्यवस्थाश्रयमित्यवगम्यते अनुप्रविष्ट इत्यनेन तत्तदवस्थानिर्वहणतयान्तरात्मतयाऽनुप्रवेशकथनेन स्वविशेषणीभूतचिदचिद्द्वारा तज्जतोत्पत्त्याद्यवस्था
श्रयत्वमवगम्यते अनुप्रविष्ट इत्यनेनात्मत्वकथनेन साक्षाद्देहगतविकारास्पर्शश्चोक्तः अत एवोपादानत्वप्रयुक्तविकारित्वादिदोषश्च परिहृतः जगतः शरी

४५

नन्वेतत्पित्रादयश्चतुर्मुखादिकमेवेश्वरं मन्यमानाः कृत्स्नं जगत्कारणकं तदनन्यमस्यदधते त्वं तु पदे एककारणकं मदभिन्नं च जगद्भवन्मते तदेतद्विरुद्धमिता
शंकायां देहात्मबुद्धिवज्जीवेश्वरबुद्धेर्भ्रांतिरूपतां वदन्नुक्तमेव कार्यकारणयोरनन्यत्वं दृष्टांतमुखेन दर्शयति त्वमिति हे ईश सदसदात्मकं चिदचिदात्मकं इदं
जगत्त्वमेव चिदचिदात्मजगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेव नान्य ईश्वर इत्यर्थः कुत इति संबोधनत्वात्स्वादिदश्रवणात् जगत्कारणभूतस्तदनन्यश्चेश्वर
त्वमेवेति आत्मनि जीवात्मनि परबुद्धिर्य ईश्वरबुद्धिरपार्था यथा स्वामायाऽविद्याकार्यभूताऽज्ञानमूला भ्रांतिमूलेति यावत् देहात्मवादवज्जीवेश्वरदोषममू
लक इत्यर्थः यद्यतः एवं तनवस्त्वज्ञातावाद स एव भवानीश्वरः कर्मवश्यस्य जीवस्यैवं विधजगन्निमित्तोपादानकारणत्वासंभवान्मुक्तस्य जगद्व्यापारवर्जना
च्चेति भावः आत्मद्विदचिदात्मकं जगत्त्वमेव न तु मत्कारणकत्वमात्रेणाकथ्यं मदनन्यं जगदित्याह यदिति जन्म उत्पत्तिर्निधनं नाशः स्थितिः पालनमीक्षणं प्र
काशः जन्मादिशब्दैस्तद्धेतुर्लक्ष्यते यस्योत्पत्तिस्थितिविनाशानां यद्धेतुभूतं तद्वै तदेव तत्कार्यं स्वोपादानकारणाद्व्यतिरिक्तं यद्वा यद्यतः यस्य जन्मादि
यः तत्तदेव तत्र दृष्टांतद्वयमाह वसुकालवदष्टितर्वोरिति वसुशब्दो वसुमतीं पृथ्वीं लक्षयति यथा भानुशब्दो भानुमंतं प्रतिपादयति तद्वत् उष्टिः प्रभातका

त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वैतदेव वसुकालवदष्टितर्वोः ४०

लः तरुर्वृक्षस्तयोर्जन्मादिहेतुभूतः कालवद्वसुमतीवदित्युक्तक्रमेणान्वयः यथा प्रभातादिकालावयवाः स्वोपादानभूतमहाकालादनतिरिक्ताः यथा च
वृक्षः पृथिव्या अनतिरिक्तस्तद्वदित्यर्थः खलु कालवदष्टितर्वोरिति पाठे सत्येवं योजना ईश्वरो जगदुपादानं निमित्तं चातस्तद्द्वंद्वं दृष्टांतः कालः प्रभातादिका
लावयवानां कालतत्त्वमुपादानं वृक्षादीनां तु निमित्तं यथा प्रभातादिः कालाव्यतिरिक्तः यथा च दृष्टो वृक्षोऽस्ति भविष्यतीति कालाविनाभूतः प्रतीयते तद्वत्
निमित्तोपादानभूतेश्वराज्जगदव्यतिरिक्तमित्यर्थः अष्टितर्वोरिति पाठः तत्रैवं व्याचक्षते अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालात्मकत्वं त
यमर्थः कालशब्देन नीलत्वादिसाधारणगुणयोगाल्लक्ष्यते वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथ्वीमयबीजपरिणामात्मकत्वेनत
तोऽभेदः तस्य च यथा भूतसूक्ष्मात्मकत्वमेवं सर्वजगतः परमकारणभूतपरमात्मवत्त्वमेवेति ४१ एवं जगतस्तदनन्यत्वे तदेकेश्वरत्वं तदेककारणकत्वं
चोक्तमथ चतुर्मुखस्य तत्कार्यत्वं तदाहितस्रष्टुपमुक्तज्ञानशक्त्यादिमत्त्वं च विविच्य तावद्दुर्ज्ञेयं विश्वस्यादितयोः पृथगवस्थानं तत्रांते पृथगव
स्थितिप्रकारमाह

४५

तस्येति इदं परिदृश्यमानं चिदचिदात्मकं जगदात्मनि तस्योपसंहृत्य शेषे शयानोऽसि शेषात्मनेति पाठे शेषस्य कारणात्मनावशिष्टस्य चिदचिद्रूप
स्यात्मनात्मना स्वरूपेणात्मनि स्वस्मिन्नेवस्थित इत्यन्वयः कथंभूतः स्वतः निरुपाधिकं निजसुखस्यानुभवो यस्य अत एव निरीहः निष्क्रिय योगेन निज
सुखानुभवरूपेण योगेन मीलितदृक् निवृत्तसंकल्परूपज्ञानः मीलितदृगंशेति पाठे मीलितदृशा योगेन निवृत्तसंकल्परूपज्ञानावस्था योगेन विशि
ष्ट इति शेषः मीलितदृगित्यनेन प्रसक्तं निद्राप्रसंगं निरस्यति वीतनिद्र इति आधारांतरनैरपेक्ष्यमाह आत्मनि स्थित इति कथंभूते तुर्ये जाग्रदाद्यवस्था
त्रयातीते अथ मांतपाठोऽपि दृश्यते तत्राप्ययमेवार्थः तमः सूक्ष्मावस्था प्रकृतिः अक्षरं तमसि लीयते आसीदिदं तमोभूतमिति श्रोतस्मात्तत्रयो
गात्तमस्तद्गुणान्सत्त्वादीन्न युंक्षे न सेवसे प्रकृतितद्गुणस्पर्शोऽभवसीत्यर्थः ३२ एवमुपसंहृतजगतः कारणतयावस्थितात्त्वत्तस्तत्प्र
कारप्रथमतः स्वदनुभवप्रदर्शनायाह तस्यैवेति तस्यैवंविधमवस्थितस्य तव नाभेर्वपुस्त्वच्छरीरभूतं जगदाकारं महाब्जमभूदुद्बभूव कथंभूतस्य

त्वमेदमात्मनि जगद्विलयांबुमध्ये शेषेऽऽत्मना निजसुखानुभवो निरीहः योगेन मीलितदृगात्मनि पीतनिद्रस्तुर्ये स्थितो न तु त
मो न गुणांश्च युंक्षे ३२ तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मिण आत्मगूढं अंभस्यनंतशयनाद्विरमत्समाधे
र्नाभेरभूत्स्वकणिकावटवन्महाब्जं ३३ तत्संभवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिंत्य नाविंददब्दशतम
प्सु निमज्जमानो जातेंऽकुरे कथमु होपलभेत बीजम् ३४

तव निजकालशक्त्याख्यां शक्तिभूतया कालाख्यया शक्त्या संचोदिता क्षुभितगुणा प्रकृति
रेव धर्मः अपृथक्सिद्धविशेषणं यस्य तस्य अंभस्यनंतशयनादिति विपर्यस्तात्पंचमी शेषपर्यंकादुत्थाय विरमत्समाधिः जगद्व्यापारवैमुख्यावस्थानरू
पात्समाधेरिति विकलितोऽर्थः एवंभूतस्य तव नाभेस्त्वच्छरीरभूतं जगदात्मकमात्मनि लीनं स्थितं सत् सूक्ष्मावस्थापन्नं महत्स्वकणिकात्स्वबीजाद्वटव
दभूदित्यर्थः ३३ तत्संभवस्तन्महाब्जसंभवः कविर्ब्रह्मा अतः पद्मादन्यदपश्यमानः त्वामात्मन्यंतरात्मतया ततं व्याप्तं बीजं पद्मस्य कारणभूतं त्वां स्वस्माद्ब
हिस्तथा अब्दशतं वर्षशतमप्सु निमज्जमानो विचिन्वन्नन्वेषयन्नाविंदत नोपलब्धवान् अहो तथाहि अंकुरे जाते बीजं कथमुपलभेत नोपलभेतैवेत्यर्थः
यथांकुरे जाते सति ततः पृथग्भूतं स्थितं बीजं नोपलभते लोकस्तथा मत्कार्यभूतं जगदात्मकं पद्मं मदभिन्नमिति दर्शयितुं भगवान्बहुधा विचिन्वतापि ब्र
ह्मणा नोपलब्ध इति भावः ३४ ततो भगवदुपासनया स्वस्मिन्नेव दृष्टवानित्याह ॥ ॥

सत्विति सतु विचिन्त्यात्मयोनिर्विस्मितोऽतिविस्मितः अस्पृशात पर्यन्तान्वेषणेनापि अन्तं वस्तु अप्रयुक्तविस्मययुक्तः परावृत्त्या जन्मास्थितः सन् तीव्रेण तपसा ध्यानेन प-
रिशुद्धभावः विशुद्धमना निरस्ततत्त्वदर्शनविरोधिकर्मा हे ईश त्वामात्मन्येव विततं व्याप्तं ददर्श कथंभूतं भुवि गंधं इवातिसूक्ष्मं स्वात्मनः पृथग्विभागानर्हं अ-
तिसूक्ष्मत्वे तस्मात्त्वा हे भुवि गंध इवात्मनि विततं ददर्श भुवि गंधमिदेन वस्थान मात्रे दृष्टांतः अतिसूक्ष्माणि विभागानर्हाणि कारणात्मतामापन्नानि भूतानि
आकाशादीनि इन्द्रियाणि आशयो अन्तःकरणं च तन्मयं तत्प्रचुरं तत्र भूतं ताव ददर्श ॥ ३५ ॥ ततः सहस्रपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धमत एव मायाम-
यम् आश्चर्यरूपं सदुपलक्षितः संनिवेशः सतात्मत्वेन नित्यत्वेनोपलक्षणीयः सन्निवेशः वदनाद्यवयवसंस्थानं यस्य तं सतात्मस्वरूपेण सत्त्वात्मरूपं चेनोप-
लक्षितः सन्निवेशो वदनादिविन्यासो यस्य तमिति वा एवंभूतं महापुरुषं दृष्ट्वा विरिंचो ब्रह्मा मुदं हर्षमाप प्राप्तवान् ३६ तदा च तं भगवाननुगृहीतवानित्याह त

त स त्वात्मयोनिरतिविस्मित आस्थितो त्वं कालेन तीव्रतपसा परिशुद्धभावः त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं भूतेंद्रियाशयमये
विततं ददर्श ३५ एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा म-
हापुरुषमाप मुदं विरिंचः ३६ तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ हत्वानयच्छ्रुतिगणांश्च रज-
स्तमश्च सत्त्वं तव प्रियतमां तनुमामनंति ३७ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् धर्मं म-
हापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वं ३८

तस्मा इति तस्मै तीव्रतपसा परिशुद्धभावाय उक्तविधं त्वां दृष्टवते विरिंचाय
भवान् हयशिरस्तनुं हयग्रीवरूपं बिभ्रत् श्रुतिगणान् अपहृत्य पातालं गतौ वेदद्रुहौ तौ वेदगणान् समर्पितवान् किं कृत्वा आनयत् रजस्तमोरूपौ वेदापहारिणौ अति-
बलौ मधुकैटभाख्यावतिबलावसुरौ हत्वा समर्पितवान् ननु एवं तव प्रियतमां शुद्धसत्त्वात्मिकां धर्मस्थापनायायातां तां तनुं शुद्धसत्त्वमयीमामनंति अवतार-
याथात्म्यविद इति शेषः ३७ एवं जगदुत्पत्तिप्रकार उक्तः अथ रक्षाप्रकारमाह इत्थमिति उचितकालेषु तैस्तैः स्वेच्छोपात्तैः शुद्धसत्त्वमयैर्नृतिर्यगृषिदेव-
झषावतारैः रामनृसिंहवराहपरशुरामादिभिः मत्स्याद्यवतारैः अवतारांतराणामपीदमुपलक्षणं लोकान् जगत्प्रतीपान् पालयसि विभावयसि जगद्विरोधि-
नो रावणादीन् हंसि हे महापुरुष कृतादियुगेषु अनुवृत्तं धर्मं वर्णाश्रममर्यादारूपं जगत्प्रतीपनिरसनेन पालयसि यस्मात् त्वं कलौ युगे छन्नः अभवः तस्मात्
यस्ततः त्रियुग इति शब्दप्रवृत्तिनिमित्तम् अयोनिसिद्धतत्रेताद्वापरेष्ववतारप्रकटनाविर्भावात् त्रियुग इत्यभिधीयते इत्यर्थः ३८ ॥ ॥ ॥

एवमखिलजगदुदयविभवलयैककारणं तं तत्रात्मानं तच्छरीरकं संस्तुत्य यथावत्तत्स्वरूपरूपादिविमर्शने मन्मनो न समर्थमिति वदन् किंचित्प्रार्थयते त्रिभिः नैतदिति हे विकुंठनाथ दुरितैर्दुष्टमत एवासाधु तीव्रं कामातुरं विषयप्रवणं हर्षेणाभिमतविषयलाभे हर्षे तद्विपरीतविषयलाभे तु शोके नैषणया पुत्रदार धनैषणया चार्तं मदीयं मनः तव कथासु नैव सम्यक् प्रीयते नाम नं भवतीत्यर्थः तस्मिन् मनस्येवं स्थिते सति दीनः पारवश्येन दुःखितोऽहं तव गतिं याथात्म्यं कं विमृशामि ३९ न केवलं मन एवं ममैवं जातं किंतु इंद्रियाण्यपीत्याह जिह्वेति हे ऽच्युत जिह्वा माविततृप्ता सती एकतो मधुरादिरसान् प्रति मां विकर्षति त थाशिश्नोऽप्यवितृप्तः स्त्रियादयश्च कुतश्चित् दिक् कर्षति तत्तद्विषयभोगाय निकर्षति चपलदृक् चपलाक्षिः क्व चाभिमतरूपदर्शनाय विकर्षति उदरश्रवः घ्राणो बलरहकः तथा कर्मशक्तिः क्रियाशक्तिः पाणिपादादिर्विविकर्षतीति विभिःस्पतिं गृहस्थं बह्व्यः सपत्न्य इव देहपतिं इंद्रियाणि लुनंति विकर्षंती तत्र

नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं कामातुरं हर्षशोकभयैषणार्तं तस्मिन् कथं तव गतिं विमृशामि दीनः ३९ जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४० एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं पश्यन् जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पिप्रुहि मूढमद्य ४१

४० न केवलं मम हे महेशि दशां प्राप्तः किंतु मदीयो जनोऽप्येवमेव वर्त्ते अतस्ततः सर्वं तं जनं संसारान्मोचयेति प्रार्थयते एवमिति भव एव वैतरणी यमलो कनदी तस्यां स्वकर्मभिः कृतपापात्मकैः पतितमन्योन्यं यानि जन्ममरणादीनि शत्रूणां पुत्रादिजन्मना स्वस्य भयं स्वस्य पुत्रादिजन्मना परेषां शत्रुभ्यः स्वस्य तु भयं स्वस्य मरणाच्छत्रूणां एवं परैः स्वद्रव्यभक्षणे स्वस्य भयं स्वेन परद्रव्यभक्षणे स्वस्मात्परेषां इति यथासंभवमूह्यं तेभ्यो जन्मजरामरणाशनेभ्यो भीतभी तं भीतादपि भीतं स्वेषां परेषां च विग्रहे युद्धे हेतु यथा यथं वैरं मैत्रं च यस्य तमेवं मद्यापि मूढमज्ञं जनं पश्यन् स्वहे पारचर भववैतरणीपारे चरतीति तत था तस्य संबोधनम् प्रीतिपिप्रुहि इत्यालनपूरणयोरिति धातुरिति पालयेत्यर्थः यद्वाऽतिपिप्रुहि भववैतरण्याऽतिपारय पारं नय संसारान्मोच येत्यर्थः ४१ ननु त्वदीयसर्वजनोद्धारणे मम महान् प्रयासो भवेन्नेत्याह॥ ॥श्री॥ ॥

कइति हे अखिलानां गुरो हितोपदेष्टः हे भगवन् तारकत्वादि त्वादृगुणपूर्णात्र अस्मिन्मदीयजनस्योत्तारणे न च कोपि प्रयासः न कोपीत्यर्थः प्रयासाभावे हेतुं वद
न्भगवंतं विशिनष्टि अस्य कृत्स्नस्य चिदचिदात्मकप्रपंचस्य भवसंभवलोपहेतोः सृष्टिस्थितिलयकारणस्य कृत्स्नगुणोदयविभवलयलीलस्य मदीयज
नोत्तारणेन कोपि प्रयास इति भावः युक्तं चैतत्तत्रैवेत्याह मूढेषु अज्ञेषु विशेषेण महतामनुग्रहो भवतीति ननु मन्ये वामंतरेणाहं नातिपारयामि अन्यथा सर्व
मुक्तिप्रसंगः तत्राह हे आर्तबंधो किं तेनार्तबंधुत्वेनेति यद्येन नोस्माकं किंत्वसेव्यासात्त्वदार्तबंधुत्वनिर्वाहार्थं त्वत्सेवायामप्यशक्तावयमार्तानुकंप्या
इति भावः सर्वमुक्तिप्रसंगं निराकुर्वंतात्मनो विशिनष्टि ते तव ये प्रिया भक्तजनास्ताननुसेवतां तद्दासानुदास्यं कुर्वतामस्माकमित्यर्थः तावन्मात्रमपेक्ष्य मम
जनोत्तारणे एव त्वन्निर्भरः सर्वमुक्तिप्रसंगाभावे इति भावः मामनुगृहीतवता त्वया मदीयजनस्य भवद्दासानुदास्यमपि संपाद्यमिति तात्पर्यम् ४२ इदमेवमयात्रा
र्थनीयमित्यभिप्रायेणाह भववैतरण्या बिभेमि किंतु तस्यां पतिष्यमाणानस्मज्जनानवलोक्य दुःखामीत्याह नैवेति दुरतिक्रमणीयो भवः संसारः स एव

कोन्वत्र तेखिलगुरो भगवन्प्रयास उत्तारणेस्य भवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्त्तबंधो किं तेन ते प्रियजनाननुसेव
तां नः ४२ नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय
भरमुद्वहतो विमूढान् ४३ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विपिने न परार्थनिष्ठाः नैतान्विहाय कृपणा
न्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोनुपश्ये ४४

वैतरणी ततो नैवाहमुद्विजे बिभेमि उद्वेगाभावे हेतुं वदन्नात्मानं विशिनष्टि
त्वद्वीर्यगायनं त्वद्वीर्यस्य त्वत्कगुणानामागायनमेव महदमृतं तस्मिन्मग्नं चित्तं यस्य सोहमतो न मदर्थं शोचे किंतु विशेषेण मूढान्मदीयानतिशोचे
तदर्थं शोचे इत्यर्थः तत्र हेतुं वदंस्तान्विशिनष्टि ततस्त्वद्वीर्यगायनाद्विमुखं चेतो येषां इंद्रियार्थाः शब्दादयो विषयास्तेषां माया सुखाय तदनुभवजन्या
कृतसुखाय तदर्थं भरं कुटुंबादिभारं दुर्वहंतीति तत्त्वाचान ४३ ननु यथा नारदानुग्रहात्त्वं मुमुक्षुस्तथा त्वदीयास्त्वपि महतामनुग्रहान्मुमुक्षवस्तेना
न्योपायविद्यास्यतस्त्वमेव मुक्तिमिच्छ तत्राह प्रायेणेति हे देव प्रायशो मुनयश्चात्मनामेव मुक्तिं कामयमाना विजने निर्जने अरण्यादिदेशे मौनं स्थुभा
श्रयणशीलत्वं कुर्वंति न तु परार्थनिष्ठाः परप्रयोजने निष्ठा येषां ते अतस्तदनुग्रहो मदीयजनस्य दुर्लभ इति भावः तत एतान् कृपणान्विहाय अहमे
को न मुमुक्षे न संसारस्तिर्यङ्मोक्तुं इच्छामि तर्हि स्वं कमपि प्रार्थय मामेव किमिति निवध्नासीति चेत्तत्राह भ्रमतः संसारे भ्राम्यतोस्य जनस्य त्वत्तो नान्यं शरण

वनुत्वदीवा ज्ञानानंदेत्यप्राज्ञाः किंतु विषयानुभवेनहृत्ताएवातस्तेषांदेहमानापादनेनत्वंकिमित्यंप्रार्थयसे तत्राह यदिति यन्मैथुनादिकं गृहमेधिनोगृहस्थ
स्यसुखंतत्करयोः पाण्यादृश्चिकयोर्हस्तयोः कंडूयनेनघर्षणेनेववनतुच्छदुःखवद्दुःखमनीवदुःखात्मकंदुःखादुपरिदुःखंदुःखोदर्कमितिवार्थः अतएवतु
च्छं तर्हिनप्रदुःखत्वादेवततोविर्विद्यमुमुक्षेयुस्तत्राह कृपणाः कामिनः बहुदुःखभाजोपीहगृहमेधिसुखेन तृप्यंतितलभितिनमन्यंते कंडूतिवत्कामसदुः
सहत्वानतत्सहस्वानर्थमेवनजानीतीतिभावः ननुकेचीत्कंडूतिमिवविसहंतेकामं चेत्तत्राह सततधीर स्थैत्वदनुग्रहाज्जितेंद्रियश्चेन्मनसिजं कामं सहेतनत्वा
जितेंद्रियइति भावः ४५ तर्हि केचिन्मौनादिभिरुपायैरिंद्रियाणिजयंत्विरपवर्गःसाध्यस्तत्राह मौनेति हे पुरुष परमपुरुष मौनादयश्चापवर्ग्याजिते
द्रियाणामपवर्गोपायाएवेतिसत्यमेवाजितेंद्रियाणां तुवार्त्ताःजीवनोपाया भवंत्ययंमौनादिसंपन्नस्ततोस्मैदेयमितिमन्यमानेभ्यः परेभ्यः लब्धवितो भवती

यन्मैथुनादिगृहमेधिसुखंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखं तृप्यंतिनेहकृपणाबहुदुःखभाजः कं
डूतिवन्मनसिजंविषहेतधीरः ४५ मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः
प्रायः परंपुरुषतेत्वजितेंद्रियाणांवार्त्ताभवंत्युतनवात्रतुदांभिकानां ४६

तिजीवनोपाया भवंति सतींद्रियजये मौनादयश्चापवर्ग्याः नतस्मिन्नसतिभगवदनुग्रहाच्चविषयवैतृष्ण्येनभवीतव्यमितिभावः अपवर्गार्थतयानु
ष्ठिताअपिमौनादयोऽजितेंद्रियाणां वार्त्ताएवनत्वापवर्ग्याः किंपुनर्दंभार्थकृताअपवर्ग्यानभवंतीत्याह उतेति दांभिकानांमौनादयोवार्त्ताअपिभवंतु
नत्ववाकिंपुनरपवर्ग्याभवंतीति दांभिकानांदांभिकत्वप्रकटेसतिजीवनहेतवोपिनभवंतीत्युतनवाशब्दार्थः तत्रमौनंवाङ्नियमः व्रतमनशना
दिरूपश्रुतमध्ययनंतपः कृच्छ्राद्यध्ययनमध्ययनंजपादिस्वधर्मः स्ववर्णाश्रमोचितोधर्मः व्याख्याध्यापनंरहोनिर्जनदेशावसतिर्जपोमंत्रजपः स
माधिर्ध्यानंमनसिजंविषहेत धीरइतींद्रियजयमूलकः कामजयइत्युक्तं तथाऽजितेंद्रियाणांवार्त्ताभवंतीत्यनेनजितेंद्रियाणांत्वापवर्ग्याभवंतीति
सूचितं ४६ तर्हींद्रियजयः कथंस्यादित्यपेक्षायांसर्वात्मकनिरतिशयानंदरूपब्रह्मोपासननिष्पत्यर्थादेवेंद्रियजयःस्यादितिवक्तुंतावत्तदुपासना

५२ रूपेइति इमे सदसती चिदचिद्रूपे बीजांकुराविव व्यवस्थिते ऽरूपकस्य कर्माधीनदेहरहितस्य तव वेददृष्टे वेदबोधिते रूपे शरीरे यत्रात्मनि तिष्ठन्नात्मनोंतरो
यमात्मा न वेद यस्यात्मा शरीरं यः पृथिव्यां तिष्ठन् पृथिवीमंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यस्याक्षरं शरीरं यस्याव्यक्तं शरीरमित्यादिवेदबोधितश
रीरइत्यर्थः बीजांकुरौ इत्यनेन कदाचित्कारणावस्थया कदाचित्कार्यावस्थया चोभयथावस्थिते उभे अपि चिदचिद्रूपे तव शरीरभूते इत्युक्तं भवति अ
रूपकस्य रूपे इत्यनेन तच्छरीरकत्वं न तत्र कर्माद्युपाधिप्रयुक्तमपि तु निरुपाधिकमित्युक्तं यत उभयावस्थावस्थितयोश्चिदचितोस्तच्छरीरत्वमत एव
न चास्मदस्मदत्वदात्मकं किंचिदपि वस्तु तास्त्वेवं उभयत्रान्वच्छरीरभूतयोश्चिदचितोस्त्वां योगेनोपासनात्मकेन युक्ताः संतो मुनयो विचक्षते पश्यंति
तत्र दृष्टांतः वह्निमिव दारुषु यथा दारुषु मथनाद्युपायेन वह्निं विचक्षते तद्वत् अन्यतो योगादन्यत उपायांतरान्नस्यात्साक्षात्कार इति शेषः उपायां
तरेण साक्षात्कारो न स्यादित्यर्थः ४७ न चास्मदित्यनेनात्वदात्मकं नास्तीत्युक्तं नान्यतः स्यादित्यनेनोपायांतराद्दृश्यत्वं च तदेतदुभयं प्रपंचयन् सर्वा
त्मकत्वं साक्षात्कारादेव निश्श्रेयससिद्धिश्चेत्याह त्वमिति द्वाभ्यां तावत्सर्वात्मकत्वं प्रपंचयति त्वमिति त्वमेव वाय्वादिरूपेणावस्थितः तच्छरीरक

रूपे इमे सदसती तव वेददृष्टे बीजांकुराविव न चास्मदरूपकस्य युक्ताः समक्षमुभयत्र विचक्षते त्वां योगेन वह्निमिव दारुषु नान्य
तः स्यात् ४७ त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यदस्त्व
पि मनोवचसा निरुक्तं ४८ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः आद्यंतवंत उरुगाय विदंति हि त्वा
मेवं विमृश्य सुधियो विरमंति शब्दात् ४९

त्वेनावस्थित इत्यर्थः पूर्वत्र रूपे इति व्यतिरेकनिर्देशादत्राभेदनिर्देशाच्चेदं तादात्म्यं शरीरात्म
भावनिबंधनमित्यवगम्यते तत्र मात्राः शब्दादयस्तन्मात्राः प्राणाश्चेंद्रियाणि च हृदयं मनः चिदनुग्रहः ज्ञानोत्पत्त्यनुग्राहकं हृदयविशेषणं चिदनुग्रह
श्चेति पाठे ज्ञानोत्पत्त्यनुग्राहको महान् बुद्धितत्वात्मक उच्यते किं बहुना सगुणः सत्वादिगुणयुक्तः प्रकृतिपरिणामात्मकः सर्वः पदार्थः विगुणः सत्वादि
गुणरहितः तदपरिणामात्मको जीववर्गश्च मनश्च वचश्च तयोः समाहारस्तेन निरुक्तं विषयीकृतं तदेतत्सर्वं त्वमेव त्वच्छरीरभूतमेव ४८ नेति गुणाः
सत्वादयः गुणिनः प्राकृतगुणपरिणामात्मका महदादयः आदिशब्देनाहंकारतन्मात्राकाशादिभूतानि विवक्षितानि सहदेवमर्त्या मर्त्यादिभिः सहिताः
मनःप्रभृतयः करणानि करणानि च ये इत्यर्थः ते सर्वे त्वां न विदंति गुणा न विदंति गुणिनो न विदंतीति प्रत्येकान्वयाभिप्रायेण नञ्द्वयोपादानं सकरणाः
सर्वे देवमनुष्यादयः स्वांतरात्मतया वर्त्तमानमपि न त्वामुपायांतरेण विदंतीत्यर्थः तत्र हेतुं वदंस्तान्विशिनष्टि आद्यंतवंत इति कर्माधीनोत्पत्तिविनाशिनः

एवमुपासनात्मभक्त्यैकवेद्यत्वं निश्चित्य तथानंदं हृत्पलतः स्वरूपविषयकभक्तियोगगतस्वार्थादेवशब्दादिविषयेभ्यो विरामश्चोक्तः साच भक्तिर्द्वसमागाषडं
गानेव मया विना दुर्लभेति वदन्नुपसंहरति तदिति हेऽर्हत्तमन वन्नमोन मस्कारः स्तुतिकर्म नमः क्रियानमस्कारः स्तुतिक्रिया च पूजार्घ्यपाद्यादिनिवेदनात्मिका
कर्मपरिचर्यात्मकं यद्वा प्रथमकर्मशब्देन पादसेवनादिपरिचर्यात्मकं कर्म उच्यते पूजाकर्म पूजात्मकं कर्म चरणयोः स्मृतिः स्मरणं कथायां विषयभूता
यां श्रवणं कथाविषयकश्रवणं चेतीत्थं षडंगया सेवया विना परमहंसानां प्राप्ये त्वयि भक्तिं जनो लभेत किं तयैव लभेतेत्यर्थः ५० एवं प्रल्हादेन संस्तुतो न
सिंहस्तमुवाचेत्याह देवर्षिः एतावदिति भक्तेन प्रल्हादेन भक्त्या एतावदेतावन्मात्रं वर्णिता गुणा यस्य एतावच्छब्देन गुणानामानंत्यं सूचयति निर्गुणः हेय

तत्तेऽर्हत्तमनमः स्तुतिकर्मपूजाकर्मस्मृतिश्चरणयोः श्रवणं कथायाः संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंस
गतौ लभेत ५० नारद उवाच एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः प्रल्हादं प्रणतं प्रीतो यतमन्युरभाषत ५१ श्रीनृसिं
ह उवाच॥ प्रल्हाद वत्स भद्रं ते प्रीतोहं तेसुरोत्तम वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणां ५२ मामप्रीणत आयुष्मन्दर्शनं
दुर्लभं हि मे दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ५३ प्रीणंति ह्यथ मां धीराः सर्वभावेन साधवः श्रेयस्कामा महाभागाः सर्वा
सामाशिषां पतिम् ५४ नारद उवाच॥ एवं प्रलोभ्यमानोपि वरैर्लोकप्रलोभनैः एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ५५

गुणरहितः श्रीनृसिंहः यतमन्युरुपसंहृतक्रोधः प्रीतः स्तुत्या हृष्टः स महात्मासु दुर्लभ इत्युक्तरीत्या दुर्लभस्वभक्तलाभेन प्रीतः प्रणतं तं प्रल्हादमभाषतोवा
च ५१ तदेवाह प्रह्लादेति त्रिभिः हे प्रल्हाद वत्स ते भद्रमनिष्टनिवृत्तिरिष्टप्राप्तिश्च भवेत् कुतः हेऽसुरोत्तम यतोहं ते त्वया प्रीतः प्रीतिं प्रापितः अतएव
वाभिमतमभिलषितं वरं वृणीष्व वरय अहं नृणामर्थिनां कामपूरः काम्यन्त इति कामा धर्मादयस्तान् पूरयतीदानीति तथाऽहमस्मि ५२ हे आयुष्मन् मामप्री
णतः प्रीतिमकुर्वतः पुंसो दुर्लभं हि मम दर्शनं दुर्लभं मां दृष्ट्वा जंतुर्देही पुनरात्मानं तप्तुमपूर्णकामत्वेन शोचितुं नार्हति ५३ अथातः धीरा जितेंद्रियाः
श्रेयस्कामयमानाः महाभागा विविक्तिनः साधवः सर्वासामाशिषां पुरुषार्थानां पतिं दातारं मां सर्वभावेन करणत्रयैक्येन प्रीणंति तोषयंति हिरवतु॥५४

एवं वराय चोदितोपि नैच्छदसुरोत्तम इत्याह नारदः ए
वमिति लोकानां विषयानुरागिणां प्रलोभनैर्विमोहकैर्वरै
रेवं इत्थं प्रलोभ्यमानोप्यसुरोत्तमः प्रल्हाद एकांतभक्ते

त्वादनन्यप्रयोजनभक्तवरुद्धिमुक्तत्वाद्धर्मादीन्वरान्नैच्छ
त्तेषां ५५

इति सप्तमे नवमः ॥ ९ ॥ दशमे निष्कामं हि तु वदन्ते विशिष्य भागवतं प्रह्लादः प्राहेत्याह देवर्षिः। भक्तियोगस्येति तद्भगवता चोदितं धर्मादिवरजातं सर्वमनन्त
रायो जन्मभक्तियोगस्यांतरायतया विघ्नरूपतया मन्यमानः स्मयमानोऽहो मदंभिप्रायज्ञो मदंतरात्मा सन्मामेवं प्रलोभयतीति स्मयमानः हृषीकेशं भगवं
तमुवाच ॥ १ ॥ तदेवाह द्वाभ्यां मेति। उत्पत्त्या स्वभावेनैव कामेषु सक्तमसक्तं मामिति वा छेदः। उत्पत्तिप्रभृति कामेष्वसक्तं मां तैः कामरूपैर्वरैर्मा प्रलुब्धं मा कुरु
यतोऽहं तत्संगेन कामासक्त्यानर्थावहया भीतस्तेषु कामेषु निर्विण्णः संसरति वंधामोक्षु मुमुक्षुस्त्वामुपाश्रितः शरणागतः ॥ २ ॥ वरं वृणीष्वेति वराय चोदय
तस्तव चोदनाद्वारा या च मानाय मह्यं वरप्रदाने मिप्रायः किंतु भृत्यस्य मम मनः परीक्षार्थमित्याह भृत्येति कामेषु भृत्यं मां चोदयन् भृत्यस्यानन्यप्र
योजनत्वरूपं लक्षणं जिज्ञासुः सर्वज्ञोऽपि भवान् मुखेन मन्मनः परि जिज्ञासुरेव भृत्यं मां मन्मनः परीक्षार्थमेव मां भृत्यं कामेषु भवान् चोदितवानित्यर्थः

इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे नवमोध्यायः ॥ ९ ॥ नारद उवाच भक्तियोगस्य तत्सर्वमंतरायतयाऽर्भकः मन्यमानो
हृषीकेशं स्मयमान उवाच ह ॥ १ ॥ प्रह्लाद उवाच ॥ मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वा
मुपाश्रितः ॥ २ ॥ भृत्यलक्षणजिज्ञासुर्भृत्यं कामेषु चोदयन् भवान् संसारबीजेषु हृदयग्रंथिषु प्रभुः ॥ ३ ॥ नान्यथा तेऽखिलगुरो
घटेत करुणात्मनः ॥ ४ ॥

अचोदयदिति पाठः सुगमः। अन्यथा वरयांचायै चोदना कारुण्यजलधेर्हितोपदेष्टुर्भक्तानुग्राहकस्यानर्थावहे
षु कामेषु भृत्यं प्रति चोदना न घटेत इत्याह अन्यथैवं चोदयतः न च भृत्यलक्षणजिज्ञासुत्वाभावेन च करुणात्मनः कारुण्यमत्तेरखिललोकहितो
पदेष्टुः रहितरूपेषु दुःखगर्भजन्मजरामरणादिरूपसंसारस्य बीजभूतेषु हृदयग्रंथिवद्दुर्मोच्येषु न घटेत चोदनेति शेषः। अतो भृत्यलक्षणजिज्ञा
सुः सन्नेव कामेषु मामचोदयदित्यर्थः। अत्र घटेत करुणात्मन इत्यस्यानंतरं क्वचिन्न ह्येष्टस्तमस्य धेत्वमेकः पारदृश्वा न इति पठ्यते तत्रायमर्थः
इतोपि न कामेषु चोदना भवतो घटते इत्याह न हीति। अंधे तमसि संसाराख्ये नरके नष्टदृष्टेः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्यांधतमस्त
रणोपायानभिज्ञस्य वा पुंसः त्वमेवैकः पारदृश्वा अंधतमसः पारभूतमात्मानं दर्शयतीति तादृशः यत एवंभूतस्त्वं ततस्तव न घटत इति ३ ४

नन्वाशिषः कामयमानोऽपि भृत्यो भवन्दृश्यत एवेत्यत आह यइति ते त्वत्तः निरतिशययुक्तार्थरूपाद्यः कुमानाशिषः कामानाशास्ते त्वत्सेवापूर्वकं प्रार्थयते स तव न
भृत्यः न भृत्यलक्षणलक्षितः किं तर्हि स तु वणिक् तुल्यः यथा वणिग्वस्तु प्रयोजनमन्यमनुवर्त्तते तद्वत्सोपाधिकानुवृत्तिमानित्यर्थः एवं भृत्यात्किंचित्प्रयोज
नमपेक्षमाणस्सकामानददतः स्वामित्वमपि निरुपाधिकं नास्तीत्याह आशासान इति आत्मनः स्वस्य स्वामिन्याशिषः कामानाशासानः कामयमानः नवै भृत्यः भृ
त्यो न भवति इदं दृष्टान्तार्थं आस्यार्थस्य पूर्वमुक्तत्वाद्व्याख्यायं भृत्यो न भवतीत्यर्थः ५ तथा भृत्यात्स्वाम्यं स्वामिनः प्रयोजनं स्वाम्यं तदिच्छन्कामयमानो यो भृ
त्यायाशिषो राति ददाति सोपि न स्वामी स्वामिप्रवृत्तवाच्य एव न भवति नित्यं निरुपाधिकं स्वमस्यास्तीति स्वामीति नित्ययोगार्थमत्वर्थीये प्रत्यये न स्वामी शब्दवा
च्य एव न भवति तस्य सोपाधिकस्वामित्वादिति भावः अत्र रातीत्याशिषइत्यस्यानंतरं सवैस्वामीसवैभृत्योगुणानुबंधीनकामुकाचित्ति क्वचित्पठ्यते तत्रा
यमर्थः कोनहि स्वामिभृत्योइत्यत आह सवाइति यो गुणानुबंधी परस्परानुरागजनकसद्गुणमात्रमाहितो न कामुको परस्परप्रयोजनांतरमनपेक्षमाणः

यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ५ न स्वामी भृत्यतः स्वाम्यमि
च्छन्यो राति चाशिषः ६ अहं त्वकामस्त्वद्भक्तस्त्वं तु स्वाम्यनपाश्रयः नान्यथेहावयोरर्थो राजसेवकयोरिव ७ यदि रासी
श मे कामान्वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ८

णावनुवर्त्तते स एव भृत्यः स एव स्वामीति ६ आवयोस्तु
भृत्यस्वामिभावः स्वाभाविक इत्याह अहमिति अहं तु कीदृशो वा भवत्लोके भृत्यः अहं त्वकामो नन्यप्रयोजनः त्वद्भृत्यः इति तु शब्दार्थः त्वमनपा
श्रयः स्वामीति त्वद्भक्तोऽहमकामोऽनन्यप्रयोजनः सत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थितं नान्यथा लक्षणं तेषां बंधे मोहे तथैव वचेत्युक्तरीत्या प्रबुद्ध
नित्यनिरुपाधिकत्वद्दासोऽहं त्वं तु निरुपाधिकः स्वामीत्यवसायपूर्वकं नित्यं स्वस्य स्वाम्यनुवर्त्तनं स्वस्वरूपानुबंधीत्यध्यवसायेन परिहृतान्यप्रयोजनत्व
इत्त्वोऽस्मीत्यर्थः अतोन्यथा प्रकारान्तरेणावयोरिह स्वस्वामिभावेऽर्थः प्रयोजनं नास्ति राजसेवकयोरिवेति व्यतिरेकदृष्टान्तः यथा राजसेवकयोः प्रयो
जनान्तरमूलकः स्वस्वामिभावः तथावयोरिति तेन सर्वं सर्वज्ञस्त्वं जानास्येवेति भावः ७ अहो सर्वज्ञस्यापि किमेवं दुराचार्यै चोदयतः सत्यसंकल्प
स्य मम वचसः प्रत्याख्यानं तव शोभते इति भगवदभिप्रायमभिप्रेत्य तादि भवतो मह्यं वरप्रदाने निर्बन्धस्तर्हि इदं वरयइत्याह यदीति हे ईश वरदश्रेष्ठ त्वं
मे मह्यं कामानभिष्टान्वरान्रासि ददासि तर्हि भवतस्त्वत्तोऽहं मद्हृदये कामानां कामांकुराणामसंरोहमनुत्पत्तिरूपं वरं वृणे धर्मादिपुरुषार्थेष्वनुदयरूपं

७

नन्वकामोऽत्यन्तो सत्यं को दोषस्तत्राह इंद्रियाणीति यस्य हृदि संजातकामांकुरस्य कामान्कामयमानस्येंद्रियादीनि जन्मना जन्मप्रवंशवयानश्यंति
कामिनो ततः स्थावरत्वप्राप्तौ इंद्रियमनःप्राणात्मानएवासत्ताया भवंति किंतु नष्टधर्मादयइतिभावः नहीतोऽन्यः कश्चिदनर्थो विद्यतइति तात्पर्यं तत्रा
त्मा प्रत्यगात्मा धर्मो वर्णाश्रमानुगुणो भगवदाराधनरूपः धृतिर्दैर्य्यं इंद्रियजयो दृढसहिष्णुता वा मतिः स्वात्मपरमात्मविषया ह्रीरनुचितकृत्यवि
षयात्मजुगुप्सा श्रीः ज्ञानसंपत्तिरैश्वर्यं वा तेजोऽन्यानभिभवनता स्मृतिर्हेयोपादेयाविस्मरणं क्षिकासत्यं भूतहिततत्त्वं सत्यवचनं वा ८ निष्कामस्तु त्वां भ
जेत् तस्याधर्म्मं प्राप्नोतीत्याह विमुंचतीति यदा मानवो मनुष्यः स्वहृदि स्थितान् कामान् विमुंचति त्यजति तदा स प्रयोजनेन त्वां भजतीति भावः हे पुंडरी
काक्ष तर्हि तदा स मानवः भगवत्त्वाय भगवतो भावः भगवत्त्वं तस्मै कल्पते अपहतपाप्मत्वादि धर्माविर्भावाय कल्पते आविर्भूतगुणाष्टकवत्त्वे

यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ७ इंद्रियाणि मनः प्राण आत्मा धर्मो धृति
र्मतिः ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ८ विमुंचति यदा कामान्मानवो मनसि स्थितान् तर्ह्येव पुंडरीका
क्ष भगवत्त्वाय कल्पते ९ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने १० श्रीभगवा
नुवाच॥ नैकांतिनो मे मयि जात्विहाशिषः आशासतेऽमुत्र च ये भवद्विधाः अथापि मन्वंतरमेतदत्र दैत्येश्वराणामनुभुंक्ष्व भोगान्

नभगवत्साधर्म्यमागतो मुक्तो भवतीति यावत् ९ मम हृदि कामानुदयरूपवरदानं वरं सर्वथा मा दातु इति प्रार्थनाभिप्रायेण भगवंतं नमस्करोति
ॐ नमइति भगवते पूर्णषाड्गुण्याय पुरुषाय सर्वांतरात्मने महात्मने केवलं भक्तानुग्रहैकस्वभावाय हरये आश्रितार्त्तिहराय अद्भुतसिंहाय मादृशा
साधुपरित्राणार्थमुपात्तनरसिंहरूपाय ब्रह्मणे स्वरूपेण गुणैश्च निरतिशय बृहते परमात्मने लोकत्रयस्यांतःप्रवेशेन भर्त्रे प्रणवप्रतिपाद्याय तु
भ्यं नमः १० एवं प्रत्याख्यातवरयाचं प्रल्हादमाह भगवान् श्रीनरसिंहश्चतुर्भिः नैतीति भवद्विधास्त्वादृशा मयि एकांतिनः एकांतभक्ता अनन्यप्र
योजनेन भजंतः मे मत्तः जातु कदाचिदपि इहामुत्र च लोके आशिषः कामान्नाशासते यद्यपि न प्रार्थयंते तथाप्येतन्मन्वंतरपर्यंतमत्रैव
लोके दैत्येश्वराणामधिपो भूत्वेतिशेषः भोगाननुभुंक्ष्व ११

तर्हि बद्धः स्यामित्यत आह कथेति मम निरतिशयप्रियस्त्वं मदीयाः कथा जुषमाणः सेवमानः प्रिया इति पाठे कथाविशेषणं मत्कथाः शृण्वंस्त्वं न बद्धः स्यादिति
भावः तर्हि नित्यं तमपि विना त्वां कामेषु किमर्थं योजयसीत्यत आह आत्मनि सर्वेषु भूतेषु चान्तरात्मतया संतमधियज्ञं यज्ञाधिपतिमीश्वरं मां मद्भक्तियो
गेन यजस्वाराधयस्व किं कुर्वन् कर्म मत्प्राप्तिविरोधि पुण्यपापात्मकं कर्म हिन्वन्न यद्वा मुमुक्षोरभ्युपगतमत्प्राप्तिविरोधि प्रारब्धफलस्य सुखदुःखा
त्मकस्यावश्यमनुभवनीयत्वादनिच्छन्तमपि त्वां कामेषु योजयामीति भावः १२ एतदेव व्यनक्ति भोगेनेति पुण्यमभ्युपगतप्रारब्धपुण्यकर्म तत्फलभोगेन
तत्कालपुण्यपापमभ्युपगतप्रारब्धमपापं च कुशलेन भोगेन हित्वा भोगकौशलेन हित्वेत्यर्थः पापफलभोगस्य दुःखरूपत्वान्मनोविकारः स्यादिति यथा
मनो न विक्रियते न तथा भोगकौशलेनेत्यर्थः दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः समदुःखसुखं धीरमित्याद्युक्तरीत्याऽनुद्वेगसमत्वादिभोग

कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन्
१२ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबंधः १३
य एतत्कीर्तयेन्नित्यं त्वया गीतमिदं नरः त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते १४

कौशलेनेति यावत् कुशलेनेतियावत्
कुशलेन पुण्येन यज्ञादिकर्मणा पापमभ्युपगतप्रारब्धमपुण्यं कर्म हित्वेति नार्थः अनुभवैकविनाश्यस्य पुण्यकर्मणो निवृत्त्यनुपपत्तेः न चात्र पाप
शब्दः संचितानभ्युपगतादिपापपरः तस्य भक्तियोगेनैव निवृत्तेः न च भक्तियोगप्रतिबंधकपापपरः परिपूर्णभक्तियोगनिष्ठत्वात्त्वत्साऽऽदस्य तन्निवृत्तेः
पूर्वमेव जातत्वात्तस्माद्यथोक्त एवार्थः कालजवेन कालवेगेन कलेवरं हित्वा कालवेगेन निमित्तेनानुभूतप्रारब्धावसाने कलेवरं हित्वेत्यर्थः सुर
लोके गीयमानां स्वीयां कीर्तिं विताय विस्तार्य मुक्तबंधः मद्भक्तियोगेन विनष्टाखिलदुष्पूर्वोत्तराघरूपमत्प्राप्तिप्रतिबंधको मामेष्यसि प्राप्स्यसी
त्यर्थः १३ किंच यः पुमान्स्त्वां च मां च स्मरन्निदं मह्यं त्वया गीतं मत्स्तुत्यात्मकं स्तोत्रं कीर्तयेत्सोऽपि पुमान्काले प्रारब्धावसानकाले कर्मबंधान्मत्प्रा
प्तिप्रतिबंधकात्पुण्यपापात्मककर्मरूपाद्बंधाद्विमुच्यते त्वत्कीर्तितकीर्तनसंजातमद्भक्तियोगनिरस्तमत्प्राप्तिप्रतिबंधकाकर्मबंधाद्विमुक्तो भवतीत्य

ईश्वराज्ञया प्राप्तदैत्याधिपत्यः स्वपितुर्निष्कृतिं प्रार्थयते त्रिभिः प्रह्लादः वरमिति हे महेश्वर वरदानां ब्रह्मादीनामपीश्वरात्ते त्वत्तोहमितद्वरं वृणे
किं तद्यन्मे पिता ईश्वरस्य तव संबंधि तेजः प्रभावमविद्वानजानन् १५ सर्वलोकहितोपदेष्टारं प्रभुं त्वामनिंदन्निंदितवान् कथंभूतः त्वं भ्रातृहेति
मृषादृष्टिर्दुरभिमानयुक्तो न एव इद्धामर्षाशयः मर्षो वृद्धो योमर्षः क्रोधः तद्युक्त आशयोंतःकरणं यस्य तादृशः इद्धेति पाठेप्ययमेवार्थः विद्धेति
पाठे विद्धोमर्षितः स चासावमर्षयुक्तोंतःकरणश्चेत्यर्थः एवंभूतस्त्वा सर्वलोकहितोपदेष्टारं प्रभुमनिंददित्यन्वयः यच्च त्वद्भक्ते मय्यघवान् द्रो
ही द्रोहं कृतवानिति १६ तस्माद्दुस्तरादघात्पापान्मे पिता पूयेत विशुद्धो भवेदिति एतद्वरं वृणे इत्यन्वयः यद्यपि ते तवापांगेन संदृष्टोत एव पूतः ममापि
तातस्तथापि हे कृपणवत्सल कार्पण्येन प्रार्थ्यय इत्यर्थः १७ एवं प्रह्लादेन प्रार्थितो भगवांस्तमाह षड्भिः त्रिसप्तभिरिति न केवलं तव पिता एव पूतः

प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं १५ इद्धामर्षाशयः साक्षात्सर्व
लोकगुरुं प्रभुं भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् १६ तस्मात्पिता मे पूयेत दुरंताद्दुस्तरादघात् पूतस्तेपांगसंदृ
ष्टस्तदा कृपणवत्सलः १७ श्रीनृसिंह उवाच ॥ त्रिसप्तभिः पिता पूतः पितृभिः सह तेनघ यत्साधोस्य गृहे जातो भवान्वै कु
लपावनः १८ यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः साधवः समुदाचारास्ते पूयंत्यपि कीकटाः १९ ॥ ६ ॥

अपि तु हे अनघ त्रिसप्तभिः पितृभिः सह तव पिता पूत इति त्रिवारमनुगृह्णामि इत्यर्थः त्रिसप्तभिरिति पाठे एकविंशतिपर्यंतैः पितृभिः सह पू
त इत्यर्थः कुतः यद्यस्मादस्य साधोर्महाभागवतकुलपावनो भवान् तस्य हिरण्यकशिपोर्गृहे जातः यद्यपि हिरण्यकशिपोः पितरः कश्यपो मरीचिर्ब्र
ह्मा चेति त्रय एव तथापि प्राक्कल्पगतपित्राद्यभिप्रायेण त्रिसप्तभिरित्युक्तं मद्भक्तस्य तव जननादेवेदं त्वत्कुलं पूतमित्यभिप्रायः १८ एतदेव स्वभ
क्तप्रभावदर्शितमुखेनाह यत्रेति समदर्शिनः कुतः त्वनगद्भूतात्मकत्वेन पश्यंतः प्रशांताः जितेंद्रियाः सम्यगुत्तम आचारो येषां ते साधवः परोपका
रशीलाः मद्भक्ताः यत्र यत्र देशे संति ते कीटा अपि कीकटकस्मान्म्लेच्छदेशा अपि प्रशस्तात्तत्प्रभावा अपि पूयंते शुद्धा भवंति १९ ननु त्वद्भक्तानां चेयं
प्रभाव इति न चित्रं नाहं तु तादृश इति चेत्तत्राह

सर्वात्मनेति हिंसां न कुर्वन्ति हे दैत्येन्द्र लोके ये मद्भक्ताः पुरुषास्तेषां मद्भक्तश्रेष्ठमनुव्रताः अनुवर्तमाना भवन्तीति त्वं यथा मद्भक्तश्रेष्ठस्तथा वयमपि भागवद्भक्ता भवेम इति त्वत्पदवीमनुवर्तमाना मद्भक्ता भवन्ति अतः सर्वेषां भक्तानां त्वं प्रतिरूपधृक् दृष्टान्तभूतः अतस्त्वं भागवतोत्तमोत्तम इति भावः तदनुवृत्तिप्रकारमाह उच्चावचेषु भूतग्रामेषु देवमनुष्यादिभूतसंघेषु सर्वात्मना करणत्रयेणापि न किंचिदपि हिंसन्ति मद्भक्ता विगतास्पृहा येषां मद्भावाश्रयवर्तिनिस्पृहा इति वा तो हृष्टा भवन्ति त्वद्दृष्टान्तेनैवात्मानं शिक्षयन्तीत्यर्थः २० २१ अतः सर्वव्यापूतस्य विशुद्धस्य तव पितुः प्रेतकार्याणि दाहादिकर्माणि कुरु अंग हे प्रह्लाद शोभनाः प्रजास्तव यस्य स त्वत्पिता मदंगस्पर्शनेन मच्छरीरसंस्पर्शनेन हेतुना उत्तमान्लोकान्यास्यति प्राप्स्यति पश्यतीति पाठे द्रक्ष्यतीत्यर्थः वर्त्तमा

सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः २० भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् २१ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः २२ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः २३ श्रीनारद उवाच प्रह्लादोऽपि तथा चक्रे पितुर्यत्सांपरायिकं यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः २४ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः २५ ॥ ✤ ॥

नसामीप्यं भविष्यतीत्यर्थः २२ पित्र्यं पितृसंबंधि पित्राधिष्ठितं महेन्द्रभवनं विहाय पित्र्यं स्थानं वाधिपत्यस्थानमधितिष्ठेत्यर्थः हे तात मयि मनः आवेश्य ब्रह्मवादिभिरुक्तमनतिक्रम्य कर्माणि मदाराधनरूपाणि मत्परः अहमेव परस्तेषां कर्मणां फलं यस्य तादृशः सन्कुरु ॥ २३ एवमुक्तः प्रह्लादो यथोक्तमकरोदित्याह नारदः प्रह्लादोऽपीति हे राजन् युधिष्ठिर यथा भगवानाह तथा प्रह्लादः पितुर्यत्सांपरायिकं प्रेतोद्देशेन कर्तव्यं तत्सर्वं चक्रे ततो द्विजोत्तमैरभिषिक्तः स्ववंशे वदान्यवादीनामाधिपत्यमकरोदित्यर्थः २४ ततः प्रसादाभिमुखं सुंदरमुखं यस्य तं नरहरिं श्रीनृसिंहरूपं हरिं स्वाश्रितार्तिहरं भगवन्तं दृष्ट्वा ब्रह्मा चतुर्मुखः देवादिभिः परिवृतः पवित्राभिर्वाग्भिः स्तुत्वा वाचो भगवद्गुणविषयकत्वेन लोकपाव

हेदेव देवानामपिदेव ननु त्वेइंद्रादिदेवानामपिदेवो नाहं तत्राह हेऽखिलाध्यक्ष ननुसोपित्वमेव तत्राह हे भूतभावन भूतानिभावयत्युत्पादयतीति
तथा ननुसोपित्वमेव तत्राह हे पूर्वज ममापि पूर्वंकारणत्वेनावस्थित लोकानां संतापनकरोतएव पापोयमसुरो दिष्ट्या दैवात्ते त्वया निहतः दिष्ट्याह
तइति तद्धरस्य दुष्करत्वं सूचितं २६ तदेवाह्निः कुर्वन्नसुरं विशिनष्टि योसाविति योसावसुरः मत्तः लब्धोवरोयेन तत्ताहशः ममसृष्टिभिर्मया सृष्टैर्भूतै
र्नवध्यः हंतुमशक्यः तपोयोगएवबलं तेनोन्नद्धः गर्वितः समस्तान्निगमान् धर्मान् अहन् विनाशितवान् स तु त्वया विनाशितः तद्दिष्ट्या जातं
इतिभावः २७ किंतद्दाह दिष्ट्या जातं किं अस्यासुरस्य जनयो महाभागवतोर्भकः प्रह्लादः त्वया मृत्योः सकाशाद्विमोचित इति स च त्वामतीव क्रोधा
विष्टमप्यगितः प्राप्तोधुना चेति चैतद्दपि दिष्ट्या जातमित्यर्थः २८ हे भगवंस्तवैतद्वपुः नृसिंहरूपं ध्यायतः प्रयतात्मनः समाहितमनसः पुंसः सर्वतः

ब्रह्मोवाच॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज दिष्ट्या ते निहतः पापो लोकसंतापनोसुरः २६ योसौ लब्धवरो मत्तो नवध्यो
ममसृष्टिभिः तपोयोगबलोन्नद्धः समस्तान्निगमानहन् २७ दिष्ट्यास्य तनयः साधुर्महाभागवतोर्भकः त्वया विमोचितो मृत्यो
र्दिष्ट्या त्वां समितोधुना २८ एतद्वपुस्ते भगवन् ध्यायतः प्रयतात्मनः सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः २९ नृसिंह
उवाच॥ मैवं वरोसुराणां ते प्रदेयः पद्मसंभव वरः क्रूरनिसर्गाणामहीनाममृतं यथा ३० नारद उवाच॥ इत्युक्त्वा भगवान् राजन्
स्ततश्चांतर्दधे हरिः अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ३१ ततः संपूज्य शिरसा ववंदे परमेष्ठिनं भवं प्रजापतीन् देवान् प्र
ह्लादो भगवत्कलाः ३२ ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ३३ ॥ टी॥

संत्रासात् भयात् गोप्तृ रक्षकं जिघांसतः हंतुमिच्छतः मृत्योरपि सकाशात् गोप्तृ एतच्च प्रह्लाददृष्टांतेनास्माभिरनुमितमिति भावः २९ एवमभिहितस्तमाह
भगवान्नेति हे पद्मसंभव नः प्रभृत एवंविधो वरोऽसुराणां ते त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषां तेषामहीनां सर्पाणाममृतं क्षीरं यथा क्षीरप्रदानं
नतदुर्द्धनं यथा लोकोपद्रवकारि तद्वदिदं तेषां वरप्रदानं इत्यर्थः ३० एवं ब्रह्माणमनुज्ञाप्यांतर्दधे हरिरित्याह नारदः इतीति हे राजन् ततः परमेष्ठि
नापूजितः सर्वभूतानामदृश्यः हरिरित्युक्त्वांतर्दधेऽदृश्यो भूत ३१ ततः प्रह्लादः परमेष्ठिनं ब्रह्माणं भवं रुद्रं प्रजापतीन्मरीच्यादीन्देवानिंद्रादीं
श्च भगवत्कलाः भगवदंशभूतान् संपूज्य शिरसा ववंदे ननाम ३२ ततो कमलासनो ब्रह्मा काव्यादिभिर्भृग्वादिभिः सहितः प्रह्लादं दैत्यानां दान
वानां च पतिमकरोत् ३३

हे राजन् ततो ब्रह्मादयः सर्वदेवाः प्रह्लादं प्रतिनंद्य तत्स्वभावो नितरसा धारणाद् इत्यभिनंद्य परमाः श्रेष्ठा आशिषः प्रयुज्य प्रह्लादेन प्रतिपूजिताः स्वधा
मानि स्वस्थानानि ययुः ३४ तदेवं शिशुपालदंतवक्त्रयोर्भगवंतं द्विषतोः कथं मुक्तिरिति युधिष्ठिरप्रश्नस्य तत्पूर्वजन्मादिमुखेनोक्तमुत्तरं उपसंहरति ॥
एवमिति सप्तभिः विष्णोः पार्षदौ स्थितौ विप्रशापेन सनकादीनां शापेन दितेः पुत्रत्वमेवं प्रापितौ वैरभावेन हेतुना हृदि स्थितेन हरिणा नरसिंहरूपं विभ्रता
हतौ ३५ पुनः कुंभकर्णरावणाख्यौ राक्षसौ बभूवतुः तौ च दाशरथेः रामस्य विक्रमैर्हतौ तावभिभूतावित्यर्थः ३६ तौ च रामस्य राघवस्य सायकैर्बाणैर्युधि
निर्भिन्नहृदयौ शयानौ तच्चित्तौ तस्मिन् श्रीरामे एव चित्तं ययोस्तौ यथा प्राक्तनजन्मनि तद्वद्देहं जहतुः सत्यजतुः ३७ तावेवेह शिशुपालकरूषकौ
करूषकजौ दंतवक्त्रः शिशुपालदंतवक्त्ररूपेण जातौ पुनः हरिणा हतौ वैरानुबंधेन हेतुना तेन च पश्यतः सतः समीयतुं सायुज्यं प्रापतुः ३८ न केवलं

प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ३४ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ
दितेः हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ३५ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः
३६ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ३७ ताविहाथ पुनर्जातौ शिशुपालक
रूषजौ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ३८ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः उजुहुस्ते तदात्मानः कीटः पेशस्कृ
तो यथा ३९ यथा यथा भगवतो भक्त्याऽनन्ययावतथा नृप नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ४० आख्यातं सर्वमेतत्ते यन्
मां त्वं परिपृष्टवान् दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ४१

शिशुपालकरूषजौ एव समीयतुः अपितु अन्येपि राजानः कृष्णवैरिणस्ते स
वैषियदेनः पापं पूर्वकृतं तज्जहुस्तत्यजुस्तदात्मानः कृष्णात्मान अभवन् यथा पेशस्कृतश्चिंत्यमानाद्धेतोः कीटः तदात्मा भवति तद्वत्तदात्मानस्तत्
त्यस्वभावा अभवन्नित्यर्थः आत्मशब्दः स्वभाववाचीतस्येवात्मा स्वभावो येषां ते इत्युपमानबहुव्रीहिः अन्यथा दृष्टांतवैयर्थ्यात् नहि कीटः पेशस्कृ
तात्मत्वं याति किं तु तस्य समाकारो भवत्यत एवाग्रे नंतरग्रंथे सात्म्यं ययुरित्युक्तं ३९ यथाऽनन्यया भक्त्या भागवतः साम्यं यांति तद्वदुक्तास्तथा चैद्यादयोपि
त्वयाः तस्य भगवतश्चिंतया संरंभपूर्वकचिंतया हरेः सात्म्यं ययुः हे नृप ॥ ४० त्वं मां यत्पृष्टवान् किं तद्द्विषतामपि दमघोषसुतादीनां शिशुपालादीनां हरेः
सात्म्यमिति यत्तत्सर्वं ते तुभ्यमाख्यातं मयेति शेषः ४१ तदेवं प्रश्नस्योत्तरमुपसंहृत्य तदेतदाख्यानं विशिंषन् तत्कीर्तनश्रवणादिफलमाह ॥ ⁂ ॥

५३

एवेति षड्भिः ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यस्य चासौ देवस्तस्य लोकत्रयमंतः प्रविश्य विभ्रतः कृष्णस्येयमवतारकथा पुण्या पुण्यावहा यत्र कथायामादि
दैत्ययोर्हिरण्यकशिपोर्वधः प्रतिपाद्यते ४२ तथा यत्र महाभागवतस्य प्रल्हादस्य चारित्रं भक्तिर्ज्ञानं विरक्तिश्च भक्तिशब्देन भक्तियोगानुष्ठानप्रकारो वि
वक्षितः विरक्तिशब्देन तद्व्यक्तिप्रकारः ज्ञानशब्देनात्मयाथात्म्यविवेचनपूर्वकं तदनुसंधानप्रकारः एतत्सर्वं यत्र कथायां प्रतिपाद्यत इत्यर्थः ४३
तथा जगत्सर्गस्थितिलयकारणस्य हरेर्याथात्म्यं तत्ववर्णनं तस्य गुणानां कर्मणां च वर्णनं परावरेषां देवासुरादीनां यानि स्थानानि तेषां कालेन
विनिवेन महानत्ययो विपर्यासश्च ४४ भागवान्येन गम्यते लभ्यते स भागवतानां धर्मश्च यत्राध्यात्मिकमात्मानमधिकृत्य वर्तमानं वस्तु चेति तदेत

एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ४२ प्रल्हादस्यानुचरितं महाभागवतस्य च
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ४३ सर्गस्थित्यप्ययेशस्य गुणकर्मानुकीर्तनं परावरेषां स्थानानां कालेन व्यत्ययो म
हान् ४४ धर्मो भागवतानां च भगवान्येन गम्यते आख्यानेस्मिन्समाम्नातमाध्यात्मिकमशेषतः ४५ य एतत्पुण्यमाख्यानं वि
ष्णोर्वीर्योपबृंहितं कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ४६ एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः प
ठेत दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वाऽनुभावमकुतोभयमेति लोकम् ४७

त्सर्वमस्मिन्नाख्याने सम्यगाख्यातं ४५ यः
पुमानेतद्विष्णोर्वीर्यैर्लीलापराक्रमादिगुणगानेनोपबृंहितं तत्प्रतिपादनेन विस्तीर्णमेतत् एव पुण्यमाख्यानं श्रद्धया श्रुत्वा कीर्तयेत्स पुमान्कर्मपाशैः
पुण्यपापात्मकैः कर्मभिरेव पाशैर्विमुच्यते ४६ किंच यः पुमानादिपुरुषस्य मृगेंद्रस्य सिंहस्येव या लीला दैत्येंद्रयूथपवधात्मिका प्रतिपाद्याय स्मि
न्नेतदेतदाख्यानं प्रयतः समाहितचित्तः सतां प्रवरस्य प्रल्हादस्य पुण्यं प्रभावं च श्रुत्वा पठेत सोऽकुतोभयं कुतश्चिद्भयरहितं लोकं वैकुंठाख्यं एति
प्राप्नोति पूर्वं कर्मपाशैर्विमुच्यते इत्युक्तमत्राकुतोभयं लोकमेतीत्युक्तं कर्मपाशविमोचनद्वाराऽकुतोभयं लोकमेतीत्यर्थः अतो न पौनरुक्त्यं
४७ अहो प्रल्हादस्य भाग्यं येन भगवान्दृष्टो वयं तु मंदभाग्या इति विषीदंतं युधिष्ठिरमाह ॥ त्रिभिः ॥ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

५७

यूयमिति लोके यूयं महो भूरिभागा वत वहुभाग्यवंतः तदेवत्वं उपपन्नतान्विशिनष्टि येषां युष्माकं गृहान् लोकं पुनाना मुनयोऽभियंति सर्वतः समायांति
ते कुतः मनुष्यलिंगं मनुष्यशरीरं परं ब्रह्म श्रीकृष्णरूपं गूढं प्रछन्नं सद्येषां युष्माकं गृहानावसतिनिहितो समायांति ४८ ननु श्रीकृष्णोस्माकं मातु
लेयः कथं परं ब्रह्मेत्युच्यते तत्राह सवा इति स वै सोयं श्रीकृष्णो ब्रह्मैव किं तद्ब्रह्मेत्यपेक्षायामित्याह श्रीकृष्णो वो युष्माकं न केवलं मातुलेयोऽपितु प्रियः सुहृत
चात्मा तथार्हणीयः पूज्यः विधिकृत्नियोगकारी गुरुर्हितोपदेष्टा चैवमनेकधा युष्माकं तत्संबंधिना भाग्यं किं यदिति वक्तव्यमिति भावः महद्वि
मृग्यमित्यनेन महतामपि तत्स्वरूपं यथावद्दुरवगममित्युक्तं प्रियः सुहृदित्यनेन तन्महद्विमृग्यं ब्रह्म स्वयमेव युष्माकं प्रसन्नमिति ४९ महन्मृग्यत्व
मेव प्रपंचयन्नत्तत्प्रसादं प्रार्थयते नेति यस्य भगवतो रूपं भवपद्मजादिभिः रुद्रब्रह्मादिभिः धिया स्वमनीषया वस्तुतया याथात्म्येनोपवर्णितं विषयी

यूयं नृलोके वत भूरिभागा लोकं पुनाना मुनयोऽभियंति येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं ४८
स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ४९
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ५०
स एष भगवान् राजन् व्यतनोद्विहतं यशः पुरा रुद्रस्य देवस्य मयेनानंतमायिना ५१ ॥ श्री ॥ ॥ ॥ ॥ श्री ॥

कृतं न भवति वाङ्मनसागोचरस्वरूपत्वभावत्वात्तैरेतावदित्युपवर्णितुमशक्यमित्यर्थः किंतु केवलं मौनेन मुभाषया संशीलनरूपेण भक्त्यो
पासनात्मिकया प्रीतिरूपया उपशमेनेंद्रियजयादिना च पूजित आराधितः स सात्वतां योगेश्वराणां पतिर्भगवान्मम मह्यं प्रसीदतां प्रसन्नो भवतु
५० एवं संप्रार्थ्य श्रीकृष्णस्य मनुष्यलिंगस्य परब्रह्मत्वस्य चर्चं इतिहासं प्रस्तौष्यन् तत्प्रश्नावसरप्रदानाय श्रीकृष्णं विशिनष्टि स इति हे राज
न् स एव भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्ययुक्तः श्रीकृष्णः पुरा अनंतमायिनाऽनंतावध्यो माया यस्य तेन मयेन निमित्तभूतेन रुद्रस्य
देवस्य विहतं यशः तद्व्यतनोत् तेनाने रुद्रादीनामपि यशआदिगुणावहत्वाधायकत्वकथनेन स्वयमवहतइतरेषां तथाधायकत्वायोगा
त्सामर्थ्यात्प्रसाधितं ब्रह्मेन च परब्रह्मत्वं सूचितम् ५१ तदेवं सप्रश्नावसरोऽत्र हृघशउपचयप्रकारं वुभुत्सुः पृच्छति ॥ ॥ ॥

कस्मिन्निति जगदीशितुः भगवदा मत्तजगदीशितुर्विलोकयमानसंकल्पंविमनस्कं वृषध्वज इत्यादिना भगवदायत्तसामर्थ्यस्यवक्ष्यमाणत्वाद्देवस्यरु
द्रस्यकीर्त्तिः कस्मिन्कर्मणियेनश्रीकृष्णेनकर्त्रीमयेननिमित्तेनोपचितावर्द्धितातत्कथ्यतां ५२ इति ४४ आह देवर्षिः निर्जिताइत्यादिना अनेनरु
द्रेणावर्द्धितैरहितबलैर्देवैर्निर्जिताअसुरामायिनां वरमाचार्यमाचार्यश्रेष्ठंमयाचार्यं मयंशरणंजग्मुः ५३ ततः सविभुः समर्थो मयः हे मनोवि
हृतिर्हेमी रूप्यमयरजतरूप्याऽयसोलोहस्यायसी त्रयाणामितरेतरयोगद्वंद्वः तातिस्रः पुरो निर्माया सुरेभ्योदादिति शेषः पुरो दृशिनष्टि दुर्ल
क्ष्यः दुर्ज्ञानाविधयः अपायः संयोगश्चयासांताइमाः पुरः आगताइतोगताश्चतिजनैर्लक्षिताइत्यर्थः तथादुर्वितर्क्याः सार्वजनीयसाधारणे
नतर्कितुमशक्याः परिच्छदाउपकरणानियासांताः ५४ ताभिर्विमानरूपाभिरपेक्षितदेशगमनक्षमाभिः पुरीभिरसुरसेनान्यः दैत्यसेनाना

युधिष्ठिर उवाच ॥ कस्मिन्कर्मणि देवस्य मयो हन्जगदीशितुः यथा चोपचिता कीर्त्तिः कृष्णेनानेन कथ्यतां ५२ नारद उ०
निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः मायिनां परमाचार्यं मयं शरणमाययुः ५३ स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः
दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ५४ ताभिस्ते सुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप स्मरंतो नाशयांचक्रुः पूर्ववैरमलं
हिताः ५५ ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभुं त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ५६ अथानुगृह्य भगवान्मा
भैष्टेति सुरान्विभुः शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ५७ ततोग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् यथा मयूखसंदोहा ना

यकाः हे नृप अलक्षिताः देवैरदृश्यमानाः पूर्ववैरं स्मरंतः सेश्वरान्सपालान्त्रीन्लोकान्नाशयांचक्रुः नाशयितुमारब्धवंतइत्यर्थः ५५ ततस्ते सेश्व
राइंद्रादिलोकपालैः सहिताः लोकाजनाईश्वरं रुद्रंउपासाद्यप्राप्यानताः संतः ऊचुः तदेवाह हे विभो त्रीणिपुराण्यालयानिस्थानानियेषांतैर्विनष्टान्
तावकान्त्वदीयानस्मान् हे देव रुद्र त्राहिपालयेति ५६ अथ तद्विज्ञापनानंतरं तान्सुरान्माभैष्टभयंमाकार्ष्टेत्यनुगृह्य भगवान्विभुः रुद्रः धनुषिश
रं बाणं संधायास्त्रं पाशुपतं तस्मिन्संयोज्येति शेषः पुरेषु व्यमुंचत ५७ ततः शराद्यथा सूर्यमंडलान्मयूखसंदोहा रश्मिसमूहास्तथाग्निवर्णाइषव
वो वाणा उत्पेतुः यतो येभ्यः इषुभ्यः पुरो नादृश्यंत जनैरिति शेषः तावद्भिरिषुभिः प्रच्छन्नाः अवगुंठिता इत्यर्थः ५८ ततः किमभूदत आह ॥ ॥श्री॥ ॥

तैरिषुभिः स्पृष्टास्ताडिताः त्रीणि पुराण्योकांसि येषां तन्निवेषां ते ऽसुराः सर्वे व्यसवः विगता असवः प्राणा येषां तादृशाः संतो निपेतुः पतितवंतः तान्
व्यसून् असुरानानीय महायोगी मयः कूपरसे स्वयंविनिर्मितकूपगतरसे ऽमृतरसे संजीवयितुं अक्षिपत् अपातयत् ५९ तेन सिद्धामृतरसेन स्पृष्टा असुराः
वज्रसारवद्दृढांगा महौजसो महाबलाः संतः मेघदलना मेघभेदका विद्युद्रूपा वह्नय इवोत्तस्थुः उत्थितवंतः ६० तथा भग्नः संकल्पो यस्य तमेव
विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्यायं भगवान् श्रीकृष्णरूपो विष्णुस्तत्र सिद्धामृतरसविनाशे उपायमकल्पयत् ६१ तदेवाह वत्स इ
ति अयं श्रीकृष्णरूपो विष्णुः स्वयं गौर्धेनुरूप आसीत् ब्रह्मा चतुर्मुखो वत्स आसीत् ततो गोरूपो ऽयं विष्णुः स वत्सस्त्रिपुरं त्रयाणां पुराणां समाहारस्त
त्प्रविश्य काले मध्याह्ने रसकूपामृतं रसरूपं कूपगतममृतं पपौ अपिबत् ६२ ते ऽसुराः पिबंतीं गां पश्यंतो ऽपि भगवन्मायया विमोहिताः न न्यषेध

तैः स्पृष्टा व्यसवः सर्वे निपेतुस्त्रिपुरौकसः तानानीय महायोगी मयः कूपरसे ऽक्षिपत् ५९ सिद्धामृतरसस्पृष्टा वज्रसारा मह
हौजसः उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ६० विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं तदायं भगवान् विष्णुस्तत्रोपा
यमकल्पयत् ६१ वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ६२ ते ऽसुरा ह्यपि पश्यं
तो न न्यषेधन् विमोहिताः तद्विज्ञाय महायोगी रसपालानिदं जगौ ६३ स्वयं विशोकः शोकार्त्तान् स्मरन् दैवगतिं च तां ६४ मय
उवाच देवो ऽसुरो नरो ऽन्यो वा नेश्वरो ऽस्तीह कश्चन आत्मनो ऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ६५ नारद उवाच अथासौ शक्ति
भिः स्वाभिः शंभोः प्राधानिकं व्यधात् ६६

न न्यवारयंत तत्सर्वं ज्ञात्वा महायोगी मयः रसं कूपामृतरसं पालयंतीति तथा तानसुरान् शोकार्त्तानितां दैवगतिं स्मरन्नत एव विगतशोकः स्वयं स्म
यन्निदं वक्ष्यमाणं जगौ उवाच ६३ ६४ तदेवाह देव इति आत्मनो ऽन्यस्य वा द्वयोरपि दैवेनेश्वरेण विष्टमुपकल्पितं सुखं वा ऽपोहितुं इह लोके दे
वादिष्वन्यः कश्चिद्देवादिर्नेश्वरः न प्रभुर्न समर्थः दैवमेव सुखदुःखादिहेतुरित्यर्थः ६५ अथ निःशेषकूपामृतरसपानानंतरं असौ श्रीकृष्णः
धर्मादिभिः स्वाभिः शक्तिभिः शंभो रुद्रस्य प्राधानिकं प्रधानं संग्रामः तत्साधनं यद्रथसूतादिरूपं तत्प्रधानकर्मणा धर्मादिस्वशक्तीरेव रथादिरू
पेणाकरोदित्यर्थः स्वप्रान्त्याहितशक्तिमकरोदिति यावत् ६६

तत्र शान्तिर्नाम स्वात्मस्थकृसिद्धविशेषमः तत्कार्योपयुक्ता सा च धर्मादिरूपेण बहुविधा तत्र धर्मशान्तिर्नाम साधुचरित्रासाधारणसामर्थ्यात्मिका ज्ञान
शान्तिरिह यः सर्वज्ञः सर्ववित् सर्वदृग्गी स्वाश्रितो नादिः सर्वेश्वरः सर्वदृगित्यादिभ्योवगतानां सर्वसाक्षात्कारसामर्थ्यात्मिका तथा चोक्तं श्रीमन्ना
म्प्रमुनिभिः यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः इति विरक्तिर्नाम सर्वमिदमस्मात्तो वाक्यनादर इति श्रुत्यवगता वाप्तसमस्तकामत्वे वितृष्णा
दशेणावस्थानसामर्थ्यात्मिका ऋद्धिर्नाम ऐश्वर्यं एष सर्वेश्वरः कृष्ण इत्यादिप्रमाणावगतं सर्वान्तरात्मत्वेन नियन्तृत्वसामर्थ्यं तपःशक्तिर्ना
म सत्यपोलक्षणत्वस्तपस्तप्त्वा इदं सर्वमसृजत इत्याद्यवगता जगद्रक्षणोपयुक्तसंकल्परूपज्ञानात्मिका विद्या नाम सत्यकामः सत्यसंकल्प इत्या
द्यवगता सत्यसंकल्पात्मिका सत्यसंकल्पत्वं च स्वाधावताद्यपूर्वभोग्यान्तरसृष्टौ जगद्व्यापारादिषु चामोघसंकल्पत्वं क्रिया नाम अघटितघटना
त्मिका स्वाभाविकी ज्ञानबलक्रिया चेत्याद्यवगता आदिष्टेन बलवीर्यतेजः आदयस्तत्र बलं श्रमप्रसंगरहितं सर्वधारणसामर्थ्यं एवमे

धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः रथं सूतं ध्वजं वाहान्धनुर्वर्मशरादि यत् ६७ सन्नद्धो रथमास्थाय शरं धनुरुपाद
दे शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ६८ ददाह तेजसा युक्तो हरोऽथ त्रिपुरं नृप दिवि दुन्दुभयो नेदुर्विमानशतसंकुलाः
६९ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ७० एवं दग्ध्वा पुरस्तिस्रो भगवान्पु
रहा नृप ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ७१

तुर्विधशरादीत्यादिभ्योवगतं वीर्यं नाम सर्वधारणेऽविकाररहितत्वं तेजः असहायीनसहकार्यनपेक्षत्वं रथमिति वाहानश्वान्वर्म कवचमादिश
ब्दे नपरगृहादिकं गृह्यते ६७ भगवद्धर्मशान्त्यात्मकं रथमारुह्य सन्नद्धः कवचितः ईश्वरो रुद्रः शरं धनुश्चोपाददे स्वीकृतवान् ततो धनुषि शरं
संधायाभिजिति मुहूर्ते दिवसस्याष्टमे मुहूर्ते ६८ भगवतः श्रीकृष्णस्य तेजसा युक्तो विष्णुयुक्तस्त्रिपुरं ददाह बाणप्रयुक्तदारेणादग्धवान् हे
नृप तदा दिवि दुन्दुभयो नेदुः दध्वनुः विमानशतानि संकुलानि येषां ते ६९ देवर्षादयः जयेति वदन्त इति शेषः उत्कर्षेणावर्तस्वेति वदन्तः कु
सुमोत्करैः पुष्पवर्षैः शंभुमवाकिरन् वव्रुः अप्सरसां गणाश्च जगुर्ननृतुश्च ७० हे नृप एवमित्थं तिस्रः पुरः पुरीर्दग्ध्वा पुरहा भगवान् रुद्रः
ब्रह्मादिभिः स्तूयमानः स्वस्थानं प्रत्यपद्यत प्राप्तवान् ७१ श्रीकृष्णस्य परब्रह्माभिन्नत्वसूचकप्रभावप्रतिपादनमुपसंहरन् प्रशान्तरावम

णवमिति आत्मनः स्वमायया विडंबमानस्य नरत्वेनानुकुर्वतो भावः नरलोकं विडंबमानस्यानुकुर्वतः तरसजातीयचेष्टां कुर्वतः इत्यर्थः हरेः शक्तिनान्निह
रस्य लोकस्य हितोपदेशस्य श्रीकृष्णस्य गुरुभिर्मुनिभिः सदा विनिर्मितान्येवंविधानि वीर्याणि लोकं पुनानानि वर्णितानि संतीति शेषः साकल्येन वक्तुमपि
वक्तुं न शक्यानीति भावः अतोऽन्यत्किं वदामि अन्यत् किंचित्त्वया पृष्टं न मन्ये चेत्तत्कथयामीत्यर्थः ७२ इतिसप्तमे दशमः॥१०॥ तदेवं श्रुत्वा प्रल्हादच
कः श्रुत्वेति उरुविक्रमस्य भगवतस्तात्मा मनो यस्य दैत्यपतेः प्रल्हादस्य साधुभिः सभाजितमनुसेवितं ईहितं चरितं श्रुत्वा हर्षेणान्वितो युक्तो युधि
ष्ठिरः पुनर्महत्तमानां मध्ये प्रथमतो गण्यस्य यमुवच्च स्नातः पुत्रं नारदं पप्रच्छ साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मन इति पाठांतरं तत्र महत्त
मानामग्रण्यः मुख्यस्य उरुक्रमे भगवति आत्मा मनो यस्य दैत्यपतेः प्रल्हादस्येहितं साधूनां सभायां सभाजितं सत्कृतं श्रुत्वेत्यर्थः १ धर्ममेवाह
एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नरलोकमात्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकं पुनानान्यपरं वदामि किं ७२
इतिश्रीमद्भागवते महापुराणे सप्तमस्कंधे दशमोऽध्यायः॥१०॥ श्रीशुक उवाच श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरु
क्रमात्मनः युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयंभुवः १ युधिष्ठिर उवाच॥ भगवन् श्रोतुमिच्छामि नृणां ध
र्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं २ भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः सुतानां संमतो ब्रह्मन् तपो
भिः भगवन्निति हे भगवन्नहं वर्णानामाश्रमाणां योगसमाधिभिः॥३॥ ॥दीनां आश्रमाणां ब्रह्मचर्यादीनां स्वाश्रमनिष्ठानां चाचारैर्युतं नृणां
सदा नमनादिपरं यस्मात्सनातनं वेदोक्तं परं पावित्र्यमिति वर्णाश्रमाचारयुतं सनातनं तथा प्रतिपन्नं जनाचारयुतं एवंविधाद्धर्माद्देवं परमात्मानं वि
दत इति भावः वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते नान्यः पंथास्तत्तोषकारकं इति स्मृतेः धर्मं श्रोतुमिच्छामि तच्छ्रवणेच्छा
मे हेतुं वदन्निति नहि यद्यस्मात्पुमान् धर्मात्परं परमपुरुषं विंदते भक्तियोगनिष्पत्तिद्वारा प्राप्नोतीत्यर्थः २ नन्वेवं धर्मविदो बहवः संति अतस्त प्रति
नाहं प्रष्टव्यस्तत्राह भवानिति त्वमिवान्ये धर्मगुह्यं न विदुस्तस्मात्त्वमेव ब्रूहीति भावः तदेवं अजयं स्तवि विशिनष्टि प्रजानां पत्युः परमेष्ठिनः साक्षा
द्भवानात्मजः पुत्रः सर्वोऽपि धर्मः परमेष्ठिमुखोपदिष्टः इतिततो गृहीतधर्मरहस्यस्त्वमेव तद्वक्तुं समर्थ इति भावः ननु परमेष्ठिनः सुता अपि व
हवः संतीत्यत्राह हे ब्रह्मन् सुतानां मध्ये भवान् परमेष्ठिनः संमतस्सुतः नितरां प्रीतिविषयः सुतोतो धर्मरहस्यं तेन तु भवद्युपदिष्टं भवेदिति भावः ३

६०

ननु यदि ह धर्मरहस्योऽयं तद्धि स्मृतवानस्थित्यमत्राह नत्वत्रादि त्रिभिः पाये नारायणपराः नारायणः पर उत्कृष्ट उपास्यो येषां ते तादृशा विप्रा यूयं
परं धर्मगुह्यं विदुः भगवद्भक्त्यात्वेन वर्णाश्रमादिधर्ममनुतिष्ठता युष्माकं न तद्विषया विस्मृतिरिति भावः ज्ञानंतो वयं रहस्यादेव न कथयामह
इति चेत्तत्राह करुणा इति करुणावंतः करुणावतां मम धर्मरहस्यज्ञानप्रयुक्तदुःखस्य निराचिकीर्षया युष्मद्वैवेति भावः ननु तच्छ्रवणे त्वमनधिका
रीति शंकां निराकुर्वन्विशिनष्टि शांता नारायणादिप्रयुक्तवैषम्यरहिताः किं तवैतद्रहस्योपदेशेन मम प्रयोजनं तत्राह साधवः स्वार्थनिरपेक्षप
रोपकारशीलाः एवंभूतास्त्वद्विधा एव न त्वपरे संतीत्यर्थः ४ एवमापृष्टो धर्मान्भगवान्नारदस्तान्विवक्षुः स्वस्य साक्षात्तदुपदेष्टारं श्रीमन्ना
रायणं नमस्कुर्वन्प्रतिज्ञायतं विशिनष्टि नत्वेति द्वाभ्यां अजाय कर्मायत्तोत्पत्तिरहिताय भगवते नारायणाय लोकानां यो धर्मस्तस्य हेतवे का
रणाय एवंविधाय नत्वा नारायणमुखाच्छ्रुतं सनातनं धर्मं वक्ष्ये ५ एवं प्रतिज्ञां कृत्वा यत्तन्मुखादात्मनः श्रवणं संभावयन्नं तं विशि
नष्टि य इति यो भगवानात्मनोंऽशेन नरेण सह दाक्षायण्यां दक्षदुहितरि मूर्तौ धर्मतो मूर्त्यां धर्मादवतीर्य लोकानां स्वस्तये बदरिका

नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शांतास्त्वद्विधा न तथापरे ४ नारद उवाच॥ नत्वा भगवतेऽजाय लो
कानां धर्मसेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ५ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः लोकानां स्वस्तये
ऽध्यास्ते तपो बदरिकाश्रमे ६ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ७ ॥ ॥

श्रमे ध्यायन्नास्ते ६ तावद्विवक्षितधर्मप्रमाणमाह धर्ममूलमिति धर्मस्य मूलं प्रमाणं धर्मप्रमापको भगवानेवेत्यर्थः ननु भगवतः प्रत्य
क्षादिप्रमाणांतरवेद्यत्वात्कथं तस्य धर्मप्रमापकत्वमिति शंकां निराकुर्वन्नं तं विशिनष्टि सर्ववेदमयः ऋग्यजुःसामादिसर्ववेदप्रचुरः
तथा साक्षाद्धर्मे भगवान्प्रमाणमपि तु साक्षात्प्रमाणभूतसर्ववेदाविष्कारद्वारेति भावः सदाविष्कारकारकत्वं च तस्य श्रूयते तस्य ह वा एतस्य म
हतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादि किंच हे राजन् तद्विदां वेदविदां स्मृतयः तद्धर्ममूलमित्यर्थः तद्विदामित्यनेन स्मृतीनां स्वमूल
श्रुत्यनुमापकद्वारा धर्मप्रमापकत्वमिति सूचितं तद्विदां स्मृतय इत्यनेनातद्विदनमूलकशाक्यादिस्मृतिव्यावृत्तिः स्मृतयश्चेति चशब्देन शिष्टा
चारादिसंग्रहः तदुक्तं मनुना वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति याज्ञवल्क्येनापि श्रुतिः स्मृतिः
सदाचारः स्वस्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति धर्मं विनष्टि येन धर्मेणाराधनमभूत्तेनात्मा परमात्मा प्रसीद

६०

एवं धर्मप्रमाणमभिधाय तावन्नृणां ये साधारणा धर्मास्तानाह पंचभिः सत्यमिति सत्यं भूतहितं दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वं तपः अनशनादिरूपं शौचं स्नानादि उचितत्वेऽपि तितिक्षा द्वौ तोह्यादि द्वंद्वसहिष्णुता ईक्षा हेयोपादेयविवेकः शमोंऽतरिंद्रियजयः दमो बाह्येंद्रियजयः अहिंसा करणत्रयेणापि परपीडानिवृत्तिः ब्रह्मचर्यमनुचितकाले स्त्रीसंगमराहित्यं त्यागो नामराहित्यं स्वाध्यायो यथोचितमंत्रजपः आर्जवं मनोवाक्कायानामेकरूपत्वं ८ संतोषो दैवाल्लब्धेनालंबुद्धिः समदृक्सेवाः समदृशां महतां सेवा ग्राम्येहा ग्राम्यः प्रवृत्तिकर्मभ्यः उपरमो निवृत्तिः नृणां विपर्ययेहेक्षा निष्फलचेष्टानिरूपणं मौनं मितभाषणं आत्मविमर्शनं देहविलक्षणात्मयाथात्म्यपरिशीलनं ९ भूतेभ्यो यथायोग्यमन्नाद्यमन्नमहरणं तस्यादेः संविभागः वि

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ८ संतोषः समदृक् सेवा ग्राम्येहोपरतिः शनैः नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनं ९ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव १० श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११ नृणामयं परो धर्मः सर्वेषां समुदाहृतः त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति १२ ॥ ॥श्री॥ ॥

भजनदानं तेषु भूतेष्वात्मदेवताबुद्धिः इष्टदेवताबुद्धिः हे पांडव नृषु मनुष्येषु तु सुतरामात्मदेवताबुद्धिरित्यर्थः १० महतां गतेः भक्तानां शरण्यस्य भगवतः श्रवणं गुणश्रवणं वक्तुरिति कीर्तनं गुणप्रतिपादकनामादिकीर्तनं स्मरणं स्वरूपस्वगुणविभूतिस्मरणं सेवा पादपीडनादिरूपा इज्या पूजा घाद्यादिनिवेदनरूपा अवनतिर्नमस्कृतिः प्रह्वीभावो वा सख्यं सर्वात्मना आनुकूल्यं आत्मसमर्पणं स्वात्मनस्तदनुवर्धिनस्तदाय त्तत्वाभिमत्वानुसंधानं चैतत्त्रिंशल्लक्षणवान् सर्वेषां नृणां साधारणः परः उत्कृष्टो धर्मः उदाहृतः प्रदर्शितः येन धर्मेण सर्वात्मा भगवा न्तुष्यति प्रसन्नो भवति सोऽयं त्रिंशल्लक्षणवानित्यर्थः ११ १२ एवं नृणां साधारणधर्ममभिधायाथ नरविशेषाणां ब्राह्मणादीनां वर्णानां त्रयाणा

सप्तमस्कंधे एकादशोऽध्यायः ॥

संस्कारा इति यद्यत्र संस्काराः गर्भाधानादयः षोडश अविच्छिन्नाः स द्विजः ननु पूर्वस्मादपि तदविच्छेदे द्विजत्वं स्यात् तत्राह अजो ब्रह्मा यमेवं सं-
स्कारयुक्तं जगाद श्रुतिस्मृतिमुखेन स द्विजः सकृत्तु न मंत्रवत्संस्कारयुक्तं जगाद न चोपनयनवंत मतो नासौ द्विजः तथा च स्मृतिः विवाहमात्र-
संस्कारं शूद्रोपि लभतां सदा न केनचित्समसृजच्छन्दसा तं प्रजापतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केन-
चिच्छूद्र इति अतोपि विवाहव्यतिरिक्तसंस्काराभावादुपनयनस्यानुनिषेधान्नास्य द्विजत्वमुच्यते इति भावः वस्तुतस्तु द्विजत्वादिकमदृ-
ष्टविशेषरूपं वेधरूपं न जातिरूपेन ब्राह्मणादेर्ब्राह्मणाद्युत्पत्तिमात्रे केवलसंस्कारमात्रवत्त्वं वा असत्यादिकाले ब्रह्मणो मुखबाहूरूपद्भ्यो
भवानां वसिष्ठादि विश्वामित्रप्रभृतीनां ब्राह्मण्याद्यभावप्रसंगात् संतानविशेषप्रसूतत्वादिकं च तादृगदृष्टविशेषवत्त्वस्य चकं संतानविशेषोत्पत्ते-
स्तत्स्थलकसंसारादेरप्रवृत्तादृष्टकार्यत्वादलौकिकविप्रकर्षविशेषकारणत्वाच्च एवं च कार्येण कारणानुमानमिति न्यायेन यत्र कार्य-

संस्कारा यदविच्छिन्नाः स द्विजोऽजो जगाद यं १३ इज्याऽध्ययनदानानि विहितानि द्विजन्मनां जन्मकर्मावदातानां क्रियाश्चाश्रम
चोदिताः १४

यतः संस्कारा अविच्छिन्नाः विच्छेदविरहवत्याऽविच्छिन्नाद्दृष्टाः स द्विजः इत्यर्थः संतानविशेषप्रभवत्वतत्स्थलकसंस्कारादिमत्त्वानुमितादृष्टसंबंधवि-
शेषवान्द्विज इति यावत् संस्काराश्च ब्राह्मणादेर्ब्राह्मणादिप्रसूतस्यैव कर्तव्यत्वेन प्रजापतिनाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिश्रुतिस्मृतिमुखे-
न गदिताः तथा च यत्संतानविशेषप्रभवं संस्कार्यमजो जगाद तत्संतानप्रभवद्वारानुमितादृष्टविशेषसंबंधवान्द्विज इति फलितोर्थः १३ त्रैवर्णि-
कानामावश्यकधर्मानाह इज्येति जन्मना कुलेन कर्मणा चावदातानां शुद्धानां द्विजानां त्रैवर्णिकानां इज्यादीनि स्वाश्रमचोदिता ब्रह्मचर्याद्याश्रमेषु वि-
हिताः क्रियाः चोदितानि विहितानि एषामकरणे प्रत्यवाय इति भावः तुर्याश्रमिणामनग्नित्वेनेज्याया अभावान्न दमिप्रायेण अविस्वाश्रमचोदिताः क्रि-
या इत्युक्तेः स्वाग्नित्वे इज्यादीनि निर्णीतानि स्वाश्रमचोदिताः क्रियाश्चेत्येतत्त्वं विहितानि अनग्नित्वेनाश्रमचोदिता क्रिया विहितेत्यर्थः अनाश्रमिणां विधुरा-
दीनां तु पूर्वोक्तविशेषाभावादेतावान् धर्म इति भावः १४ एवं त्रैवर्णिकानामावश्यकधर्मानभिधायाथ तत्र विप्रस्य जीविकाधर्मानाह॥ ॥श्री॥ ॥

विप्रस्याध्यापनादीनीति आदिशब्देन याजनप्रतिग्रहौ विवक्षितौ याजनाध्यापनप्रतिग्रहाज्जीविकाः धर्माः इज्याध्ययनदानानि त्वावश्यकाधर्मा इत्यर्थः एवं सर्वस्य विप्रस्य षट् धर्माः तथा चोक्तं मनुना षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविकाः याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अथ क्षत्रियस्य जीविकाधर्मानाह अन्यस्याप्रतिग्रह इति अत्रान्यस्य क्षत्रियस्याप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चानुजानाति वक्ष्यति चानंतरमेवस्व ते राजन्यमिति श्रूयते चाश्वपतिकैकयप्रभृतीनां उपदेष्टृत्वादि प्रजापालनेऽधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति याचक्षते तत्रित्वं प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यादिति द्वादशाध्यायान्त्याधिकरणे क्षत्रियादेर्याजनाध्यापनयोः प्रतिषिद्धत्वात् तत्र हि दर्शपूर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभिरार्त्विज्यं कारयितव्यमुत ब्राह्मणैरेवेति संशय्य तत्र त्रयोप्यार्त्विज्यमर्हति विद्वत्वादरलं पुनः पुरुषार्थो मन्त्रः कर्म वैगुण्यं नास्ति किं च न याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपायाः इति नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वंतौ नियमातिक्रमात्काममस्वधर्मात्प्रत्यवेयातां न क्रतोः कदाचिद्गुणहानिः तस्मात्त्रिभिरप्यार्त्विज्यं कारयितव्यमिति पूर्वपक्षं प्राप्य ब्राह्मणा द्विजोत्तमा नामार्त्विज्यं न तु क्षत्रियवैश्ययोर्ब्राह्मणस्यार्त्विज्यनियमः क्रत्वर्थेनापि विहितः यतः आस्य ब्राह्मणानामार्त्विज्यमिति यत्रस्र च कारः क्रत्वर्थेन स्मरंतीति सिद्धमेतत् तथा

विप्रस्याध्यापनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः १५॥ ॥
वैश्यस्तु वार्त्तावृत्तिः स्यान्नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १६

च भगवद्बादरायणोऽपि क्षत्रियो याजको यस्य चांडालस्य विशेषतः कथं सदसि भोक्तारो हविस्तस्य सुरर्षय इति सुरा देवता ऋषयश्च ऋत्विक् भक्ता इति देवता हविर्भागनिराकरणात् क्रतुवैगुण्यं तेवदर्शितं राजयाजकत्वस्य विनश्यति यथाहविरिति ब्राह्मणार्त्विज्यं हविर्विनाशः स्मृतः लिंगानि च दर्शितानि ब्राह्मणानामिहैव विधिरिवमादीनि तस्माद् ब्राह्मणानामेवार्त्विज्यं सिद्धमिति राद्धांतितः तस्मान्न राजन्यवैश्ययोर्याजनाध्यापनाधिकारः अश्वपतिकैकयप्रभृतीनां यदुहं तेनोपदेष्टृत्वमवगतं न तध्यापनरूपं किं तु सत्यादीनामिव ब्रह्मस्वरूपतदुपासनाद्युपदेष्टृत्वरूपं अध्यापनं नाम स्वोच्चारणानुच्चारणाय शिष्योद्देशेन भागवद्यास्य वेदराशेः सांगस्य स्वरवर्णाद्यनपभ्रंशपूर्वकमुच्चारणं तस्मादप्रतिग्रह इत्यस्यायमर्थः प्रजापालनाधिकृतस्तदनाधिकृतश्चेति तावद्राजन्यस्य वृत्तिरनेनोक्ता द्वितीयस्य तु स्वतास्र ताभ्यां इत्यनेन वक्ष्यति प्रजागोप्तुः प्रजापालनाधिकृतस्य राज्ञो राजन्यस्याविप्राद्विप्रेतरात्करादिभिर्वृत्तिः स्वामिग्राह्यभागः करः तदादिभिरादिशब्देन दंडशुल्कादिकं विवक्षितं वा शब्देन प्रजापालनानधिकृतस्य तु वृत्त्यंतरमेवेति सूचयति १५ अथ वैश्यस्याह वैश्य इति नित्यं ब्रह्मकुलमनुगच्छत्यनुवर्तत इति तादृशः सन् वार्त्तां कृषिवाणिज्यादिलक्षणां वृत्तिर्यस्य स भवेत अथ शूद्रस्यावश्यकं धर्मं वृत्तिरूपं

२ त्याय च्यते ३

एवं चतुर्णां वर्णानां आवश्यकानजीविकारूपांश्च धर्मानभिधायापदि तेषामुक्तवृत्त्यलाभे वृत्त्यंतराणि विवक्षुस्तावद्ब्राह्मणस्य मुख्यानुकल्पभेदे
न वृत्त्यंतराण्याह वार्त्तेति विचित्रा वार्त्ता कृष्यादिरूपा शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितमित्यर्थः शालीनकौपीने धृष्टाकार्ययोरिति निपातितः शा
लीनशब्दः इदं द्वितीयं यायावरं यायावरः प्रवासितस्य कर्म यायावर्यं प्रवासादिना याञ्चापूर्वकमर्जनं तृतीयं शिलोंछनं उंछः कणश आदानं कणि
काद्यर्जनं शिलं तदुभयमेकीकृत्य चतुर्द्धेयं विप्रस्य वृत्तिरित्युक्तं आसां चतसृणां वृत्तीनां पूर्वपूर्वापेक्षया उत्तरोत्तरा श्रेयसी ज्यायसी उत्तमेति यावत् यद्य
पि पूर्वं विप्रस्याध्ययनादीनि यदुक्तं तस्याप्रतिग्रह इति विप्रस्य प्रतिग्रहादिवृत्तेः कथितत्वात् तत्र शालीनं यायावर्यं इति च न कथनीयं तथापि स एव प्रतिग्र
हो याच्ञापूर्वकस्तदपूर्वकश्चेति द्विविध इति वक्तुं शालीनं यायावर्यं चेत्युक्तं १७ एवं विप्रस्य याजनाद्यलाभे वार्त्तादिरूपा वृत्तिस्तत्राप्युत्तरोत्तरमम

वार्त्ता विचित्रा शालीनयायावरशिलोंछनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा १७ जघन्यो नोत्तमां वृत्तिमनापदि भजे
न्नरः ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः १८ ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा सत्यानृताभ्यां जीवेत न श्ववृत्त्या क
थंचन १९ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितं मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतं सत्यानृतं तु वाणिज्यं श्ववृत्ति
र्नीचसेवनम् २०

त्वं चोक्तं अथोत्तरोत्तरवर्णस्य स्वस्ववृत्त्यलाभे पूर्वा यदि पूर्वपूर्ववर्णस्य चोत्तरोत्तरस्य चापद्याश्रयणीयां वक्तुं तावदनाप
दि तदाश्रयणं निषेधति जघन्य इति जघन्यवर्णो नरो नापदि स्वस्ववृत्त्यलाभरूपापदभावे उत्तमां पूर्ववर्णसंबंधिनीं वृत्तिं न भजेत् आपत्सु यदा य
स्तु तु राजन्यं विना राजन्यव्यतिरिक्तानां सर्वेषामपि यथालाभं सर्वा अपि वृत्तयः आश्रयणीया भवंति सर्वेषां सर्वश इत्येतावता तु तेषां राजन्य
स्य प्रजापालनप्रयुक्तकरादानरूपस्य वृत्त्यलाभरूपायदि याजनाध्ययनप्रतिग्रहादिरूपपूर्ववर्णवृत्त्याश्रयणं वा तां प्रत्युत्तरोत्त
रवर्णवृत्त्याश्रयणं प्रसक्तं ऋते राजन्यमिति निषिध्यते १८ अथ विप्रराजन्ययोः स्वस्ववृत्त्यलाभरूपायद्युपादेयां वृत्तिं निर्दि
श्य दर्शयन्नुत्तरोत्तरवर्णसेवारूपां वृत्तिं प्रतिषेधति ऋतामृताभ्यामिति ऋताद्यन्यतमेन जीवेत श्ववृत्त्या तु कथंचन न जीवेत सर्वथा श्ववृत्तिं
नाश्रयेदित्यर्थः १९ ऋतादिपदार्थानाह सार्द्धेन ऋतमिति स्पष्टोऽर्थः २० न कथंचनेति व्याचष्टे॥ ॥श्री॥ ॥श्री॥ ॥

मतिर्यस्यस

वर्ज्जयेदिति विप्रो राजन्यश्चातो नीचसेवांस्यो न्तरवर्णसेवां जुगुप्सितां निंदितां परिवर्ज्जयेत् जुगुप्सीतत्वमेववदन्ति प्रराजन्यो विशिनष्टि सर्ववे
दमयइति प्रादुर्भवयद्यूज्ययोः पूजकसेवा निंदितेति भावः २१ अथ वर्णानामभिव्यंजकान् धर्मानाह शमादिपदार्थानामर्थास्त्रिशब्दलक्षण
धर्मव्याख्यायामुक्ताः तत्र शांतिरक्रोधः अच्युतात्मत्वमच्युतप्रवणचित्तत्वं शमादिकं ब्रह्मलक्षणं ब्राह्मणकुलाभिव्यंजकं इत्यर्थः शौर्यं इति २२
शौर्यादिक्षत्रलक्षणं क्षत्रियत्वाभिव्यंजकं तत्र शौर्यं स्वगृहइव युद्धप्रवेशसामर्थ्यं वीर्यं परैरनभिभाव्यत्वं धृतिर्धैर्यमापद्यदुःखित्वं तेजः पराभिभ
वसामर्थ्यं त्यागः लोभराहित्यं दानशीलता आत्मजयो देहजयः देहधर्मैरनभिभाव्यत्वं क्षमा सहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादोऽनु
ग्रहः रक्षा प्रजापालनं २३ एवं देवादिभक्त्यादिकं वैश्यलक्षणं तत्र देवगुर्वाद्यंगो भक्तिः देवाश्च गुरवश्चार्याज्ञानवृद्धाश्च तेषां भक्तिः त्रिवर्गेण धर्मा
दिपुरुषार्थत्रयेणापरितोषणापरितुष्टिः आस्तिक्यं परलोकइत्यास्तिकस्तस्यभाव आस्तिक्यं नित्यमुद्यमः अर्थार्ज्जने प्रयत्नः तत्र नैपुणं २४ शूद्रस्य

वर्ज्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सितां सर्ववेदमयो विप्रः सर्वदेवमयो नृपः २१ शमो दमस्तपः शौचं संतोषः क्षांतिरार्ज्जवं
ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं २२ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमाः ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्र
लक्षणं २३ देवगुर्वच्युते भक्तिस्त्रिवर्गपरितोषणं आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं २४ शूद्रस्य सन्नतिः शौचं
सेवा स्वामिन्यमायया अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणं २५ स्त्रीणां तु पतिदेवानां तच्छुश्रूषानुकूलता तद्बंधुष्वनुवृत्ति
श्च नित्यं तद्व्रतधारणं २६ संमार्ज्जनोपलेपाभ्यां गृहमंडलवर्तनैः स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा २७ ॥ श्री ॥

सन्नत्यादिकं लक्षणमित्यनुषंगः सन्नतिः पूर्ववर्णविषये नम्रताः शौचं स्नानादिजं स्वस्वामिन्यमायया निष्कपटभावेन सेवाऽमंत्रयज्ञः नमस्कारेण
वयज्ञानुष्ठानं तथा च याज्ञवल्क्यः नमस्कारेण मंत्रेण पंचयज्ञान्समापयेदिति अस्तेयमचौर्यं सत्यमनृतावदनं गवां विप्राणां च रक्षणं २५ अ
थ स्त्रीणां धर्मानाह स्त्रीणामिति पतिरेव देवो दैवतं यासां तासां स्त्रीणां तस्य पत्युः शुश्रूषा परिचर्या तदनुकूलता च तस्य पत्युर्बंधुषु पित्रादिष्वनुवृ
त्तिः तस्य तु यद्व्रतं तदर्थं यो नियमस्तस्य धारणमेतच्चतुष्टयं पतिदेवतानां पतिव्रतानां स्त्रीणां लक्षणं धर्म इत्यर्थः २६ किंच संमार्ज्जनोपलेपाभ्यां गृ
हसंमार्ज्जनादिभिः पतिं रंजयेदित्युत्तरेणान्वयः सेकः जलसेकः मंडनं विविधैरलंकारैः वर्तनैर्नित्यं स्वगृहमेवा वस्त्राणां तैः स्वयं कथंभूता मंडितालंकृ
तापरिमृष्टा विशोधिताः परिच्छदाः पात्रवस्त्राभूषणादयो यया सा तादृशी २७

उच्चावचैर्नानाविधैः पत्युरपेक्षितैः कामैः प्रश्रयेण विनयेन दमेन उपशान्त्या सत्यैः प्रियैश्च वाक्यैः प्रेम्णा च काले उचितसमये तु उचितकामेषु संतुष्टा
यथालाभेन तुष्टा अलोलुपा दक्षाऽनलसा धर्मज्ञा भर्तृशुश्रूषणमेव परं धर्मं जानन्ती प्रिया सत्या च वाग्यस्याः सा वाक्यैः सत्यैरिति पाठे वि
शेषेण स्यात् तं प्रियसत्यवागित्यत्र न तदितरविशेषणत्वे तु न पौनरुक्त्यं २८ सर्वदाऽप्रमत्ताऽवहिता शुचिः परिशुद्धा स्निग्धाऽजेऽपतितं महा
पातकरहितं पतिं भजेत न तु महापातकेन पतितं न भजेदिति सूचितं यथाह याज्ञवल्क्यः आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति २९ एवंविधस्य भर्तुर्भ
जनस्य फलमाह येति श्रीर्लक्ष्मीर्हरिमिव या स्त्री हरिभावेन तत्परा स पतिरेव परो दैवतं यस्याः सा पतिं भजेत्सा हर्यात्मना हरिरूपेण हरिणा सह स्त्री
हरिलोके वैकुण्ठे लोके मोदते श्रीरिव तत्साम्यमुक्तो भवेदित्यर्थः ३० अथ संकरजातीनां वृत्तिमाह वृत्तिरिति संकरजातयः प्रतिलोमजाः अनुलो
मजाश्चेति द्विविधाः तत्रोत्तरवर्णात्पूर्ववर्णस्त्रियां जाताः प्रतिलोमजाः पूर्ववर्णादुत्तरवर्णस्त्रियां जातास्त्वनुलोमजाः तेषां तत्तत्कुलक्र

कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत्पतिं २८ संतुष्टालोलुपा दक्षा धर्मज्ञा प्रि
यसत्यवाक् अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् २९ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा हर्यात्मना हरेर्लोके पत्या
श्रीरिव मोदते ३० वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् अचौराणामपापानामंत्यजांतेवसायिनां ३१ प्रायः स्वभावविहि
तो नृणां धर्मो युगे युगे वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत् ३२

ता कुलपरंपराप्राप्ता वृत्तिर्भवेदिति कुलक्रमागतमपि चौर्य
हिंसादिकं निषेधयन्ताविशिनष्टि अचौराणामपापानां चेति तत्र प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह अंत्यजा अंत्यावसायिनश्चैतेषां सं
करजातीनां इत्यन्वयः तत्र रजकश्चर्मकारश्च नटो वरुड एव च कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजातयः अंतेवसायिनस्तु चंडालपुल्कसमातंगा
दयः तेषां परंपराप्राप्तैर्वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ३१ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति भगवदुक्तमर्थमाह प्राय इति द्वा
भ्यां हे राजन् नृणां ब्रह्मक्षत्रादिरूपाणां व्यवस्थितानां सर्वेषामपि प्रायशः स्वभावविहितः सात्विकादिस्वभावानुसारेण विहितः यद्वा भावः प्रका
रः वर्णाश्रमादिरूपः स्वस्य तत्तद्वर्णाश्रमादेर्भावो विहित इत्यर्थः इज्याध्ययनादिरूपः स एव धर्म इह लोके प्रेत्यामुत्र च लोके शर्मकृत्सुखकृद्वेददृग्
भिर्मन्वादिभिः स्मृतः कथितः ३२ एवं वृत्तिरपि प्राप्ति दिवकी ज्यायसीति वदन्नेव वर्तमानस्य फलमाह ॥ ॥ ॥श्री॥ ॥

वृत्त्येति स्वभावकृतया वार्त्ताश्रमादिस्वभावकृतया वृत्त्याऽध्यायनादिरूपया जीविकया स्वकर्माणि ज्यादिरूपे वर्त्तमानः स्वस्वकर्मानुतिष्ठन्स्वभावजं सात्विकादिस्व
भावकृतप्रयुक्तं प्राकृतसत्वादिगुणावश्यता प्रयुक्तं बंधकं कुत्सया पात्मकं कर्म हित्वा धर्मेणापापनुदत्यविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादि श्रुत्यर्थो त्रामिसंहितः शनैर्नि
र्गुणतां सत्वादिगुणराहित्यं प्रकृतिसंबंधराहित्यं मुक्तिमिति यावत् इयात्प्राप्नुयादिति शनैरित्यस्य भगवदुपासनेन निर्गुणत्वं चिरात्प्राप्नुयादित्यर्थः ३२ ननु स्व
भावकृतया वृत्त्या स्वकर्माणि वर्त्तमानस्य पुनः कामक्रोधादिवर्द्धकबंधककर्मसंभावनया कथं नैर्गुण्यप्राप्तिरिति शंकां निराकर्तुं गृहस्थस्य सज्ञानवैराग्य
वतः शास्त्राविरुद्धान्नपानादिसेवया रागवर्द्धकत्वाभावे तावदृष्टांतमाह उप्यमानमिति यथा मुहुर्मुहुरुप्यमानं क्षेत्रं निवार्यतामसारतां प्राप्नुया
त्पुनः फलैसस्यप्रसवाय न कल्पते नसमर्थमतएव तत्र उप्तं बीजं च नश्यति ३४ तथा कामानामाशयमाश्रयं चित्तं पुनः कामानामतीवसेवया विरज्ये
तन्नाग्निवदिति घृतविंदुभिरग्निरिव न वर्द्धते इत्यर्थः यथा प्रज्वलिताग्निर्घृतविंदुभिर्न शाम्यति किंतु महता घृतपूरेण तथा चित्तं कामलेशैर्न शा
वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत् हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ३३ उप्यमानं मुहुः क्षेत्रं स्वयं निर्वी
र्यतामियात् न कल्पते पुनः सूत्यै उप्तं बीजं विनश्यति ३४ एवं कामाशयं चित्तं कामानामतिसेवया विरज्येत यथा राजन्ना
ग्निवत्कामबिंदुभिः ३५ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ३६ इति श्री
मद्भागवते महापुराणे सप्तमस्कंधे एकादशोऽध्यायः ॥ ११ ॥ नारद उवाच ॥ ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितं आचरन्दा
सवन्नीचो गुरौ सुदृढसौहृदः १ म्यतिमहद्भिः कामैरित्यर्थः ३५ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह यस्येति य
स्य पुंसो यल्लक्षणं वर्णाभिव्यंजकं शमादमस्त पइत्यादिनोक्तं यद्यन्यत्रापि वर्णांतरेपि दृश्येत तर्हि तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव वर्णे
न निर्दिशेन्न जातिनिमित्तेनेत्यर्थः ३६ इति सप्तमे एकादशः ॥ ११ ॥ तदेवं चातुर्वर्ण्यादिधर्माननभिधायाथ चातुराश्रम्यधर्मान्विवक्षुस्तावद्ब्रह्मच
र्याश्रमधर्मानाह ब्रह्मचारीति ब्रह्मचर्यं द्विविधमाचकुर्वाणं नैष्ठिकं चेति तत्र गार्हस्थ्यादिचन्नैष्ठिकमप्युपकुर्वाणपूर्वकमेवेति दर्शयितुं ता
वदोपकुर्वाणब्रह्मचर्यधर्मा उच्यंते यो गुरुकुले वसन्नुपकुर्वन् ब्रह्मचारीत्यर्थः कथंभूतो वसन् दांत उपशांतः दासवन्नीचः स्वनेच्छ
मनुसंदधद्गुरोर्हितमाचरन् गुरौ सुदृढसौहार्दयस्य तादृशः १

किंच सायंप्रातश्च गुरु मग्निमर्कं सूर्यं सुरोत्तमं भगवंतं चोपासीत तु मे संध्ये प्रातः सायं च यतवाग्मौनी समाहितचित्तो ब्रह्म गायत्रीं जपन् गुर्वा
दीनुपासीतेत्यन्वयः २ आहूतश्चेत्सुयंत्रितः समाहितो गुरोः छंदांसि वेदान् धीतनित्यमध्ययनो पक्रमसमाप्तौ गुरोश्चरणौ शिरसा नमेत् ब्र
ह्मचारी विहितं मेखलादी त्रिविधं यज्ञोपवीतं धारणं तु केशप्रसाधनाभावमात्रं दर्भपवित्रं पाणौ यस्य ४ सायंप्रातश्च भैक्षं भिक्षाकर्म चरेत्कुर्यात्
तद्भिक्षयालब्धमन्नं गुरवे निवेदयेद्गुरोः पुरतो निदध्यात् ततो यदि गुरुणा अनुज्ञातः श्चेत्तदन्नं भुंजीत नो चेत्कदाचिदित्यनेनात्मनः परीक्षा
यै कदाचिद्गुरुर्नाज्ञापयेदिति सूच्यते ५ मितंभुक्त इति तथा सुशीलः सुस्वभावः सदाचारो वा दक्षोऽनलसः श्रद्दधानः गुरूपदिष्टार्थे बुद्धि
श्वासयुक्तो जितानींद्रियाणि येन स्त्रीषु स्त्रीभिर्निर्जितास्त्रीवश्यास्तेषु च यावदर्थं यावत्प्रयोजनं व्यवहरेन्नाधिकं नातिसक्तेश्च संभाषेत

सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् संध्ये उभे च यतवाग्जपन् ब्रह्म समाहितः २ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रि
तः उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ३ मेखलाजिनवासांसि जटादंडकमंडलून् बिभृयादुपवीतं च दर्भपाणिर्यथोदि
तं ४ सायंप्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ५ सुशीलो मितभुक् दक्षः
श्रद्दधानो जितेंद्रियः यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ६ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः इंद्रिया
णि प्रमाथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभिजनादिकं गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो
युवा ८ नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान् सुतामपि रहो जह्याद्न्यदा यावदर्थकृत् ९ ॥ ॥ ॥

त्यर्थः ६ प्रमदागाथां स्त्रीविषयवार्त्तां वर्जयेत् यतः स्वयमगृहस्थो बृहद्व्रतः ब्रह्मचर्यवान् स्त्रीसंगादिरहितः ननु तत्कथामात्रेण को दो
षस्तत्राह इंद्रियाणि प्रमाथीनि बलवंत्यतः संयतचित्तस्यापि मनः प्रमदाप्राप्त्याश्रवणादिना स्ववशं कुर्वंति अतस्तां परिवर्जयेदित्यर्थः ७ गु
रुस्त्रीभिर्गुरुपत्निभिरन्याभिश्च युवतिभिः केशप्रसाधनादिकं न कारयेत् ८ कस्तत्कारणो दोषस्तत्राह नन्विति अग्निः अग्निसदृशी
प्रमदा यथा च अतीव अग्निसहचरितं घृतकुंभं क्षरति तथा पुमानपि प्रमदासहचारी संमुह्येदित्यर्थः अतः सुतामपि पुत्रीमपि पुमान् रह
एकांते जह्यात् त्यजेत् अन्यथा केशप्रसाधनादिव्यतिरिक्तावसरे नैकांतावसरे वा यावदुक्तमर्थं प्रयोजनं तावन्मात्रं करोतीति ताद्दशो भवेत्

एवं ब्रह्मचारिणो धर्मानभिधाय यदुक्तं सुशीलो मितभुगित्यादि तद्गतिगृहस्थयोरपि ब्रह्मोपासननिष्ठयोरतिदिशन्तावद्यावच्छरीरावसानमेवं ध
र्मा अनुष्ठेया इत्याह कल्पयतीति ईश्वरो भगवान्यावदिदमात्मन आभासं द्वयं शरीरं कल्पयति प्रवृत्तिसमर्थं करोति तावत् द्वैतं देवत्वमनुष्यत्वब्राह्मण
त्वाद्यभिमानरूपं भेदज्ञानमनुवर्तत इति शेषः ननु नुवर्ततां ततः किं तत्राह अस्य पुंसस्ततो ध्यासादि विपर्ययः उत्तरोत्तरविपर्ययः देहात्मभ्रमः पुरुषार्थ
विघर्षयो वा भवति तस्माद्यावद्द्वैतानुवृत्तिः स्वधर्मेभ्यो न विरमेत् कल्पयित्वेति पाठे यावदिदमाभासं शरीरं तावदीश्वरः प्रभुः स्वधर्मानुष्ठानशक्त आ
त्मनः स्वस्य द्वैतमनुष्यत्वब्राह्मणत्वादिभेदं कल्पयित्वाभिमन्यत इति शेषः देहात्माभिमानयुक्त इत्यर्थः अत एव तावन्न विरमेद्धर्मादिनिषेधः विरामे
बाधकमाह हि यस्मादध्यासादिरामाद्यस्य विपर्ययः उत्तरोत्तरदेहात्मभ्रमः यद्वा यावदिदं शरीरमनुवर्तते तावदिदं द्वैतं मनुष्यादिकमात्मन आभा
समात्रे कल्पयित्वा द्वैतं देहाकारो नत्वात्माकार इति कल्पयित्वा देहविलक्षणमात्मानमनुसंधायेत्यर्थः ईश्वरः कर्तुं समर्थः न विरमेत स्वधर्मा
न्न विरमेदित्यर्थः १० उक्तं यतिगृहस्थयोरप्यतिदिशति एतदिति एतत्सुशीलइत्यादिनोक्तं सर्वं व्रतस्थस्य ब्रह्मोपासनरूपव्रतनिष्ठस्य यतेस्तु

कल्पयित्वात्मनो यावदाभासमिदमीश्वरः द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः १० एतत्सर्वं व्रतस्थस्य समाम्नातं यतेरपि ॥
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः

यांश्रमिणो विशदाह गृहस्थस्यापि समाम्नातं तत्र गृहस्थस्य किंचिद्विशेषमाह गुरुवृत्तिरिति गुर्वी वृत्तिर्महावृत्तिः स्त्रीसंगराहित्यादिरूपब्रह्मचर्य
वृत्तिः गृहस्थस्य तु कल्पेन कदाचिद्भवेत्कदाचिन्न स्यात् कदा न भवेदित्यपेक्षायां तत्कालं निर्दिशन्विकल्पे हेतुं च वदन् गृहस्थं विशिनष्टि
ऋतुगामिन इति ऋतुगामित्वाद्गुरुवृत्तिविकल्प इति भावः ऋतुकाले तु गुरुवृत्तिर्नास्तीति च भावः अस्या वृत्तेर्दुष्करत्वाभिप्रायेण गुर्वीति वि
शेषणं उपात्तं ११ किं च ये धृतव्रता गृहस्थास्ते अंजनादीन्त्यजेयुः अंजनाद्यभिधानानां द्वंद्वैक्यं तत्रांजनं शरीरस्य तैलागमभ्यंजनं शि
रसः यद्वांजनं शिरसोऽभ्यंजनमवशिष्टदेहस्य उन्मर्द उन्मर्दनं अवलेखा घृष्टादिषु स्त्रीप्रतिकृतिलेखनमामिषं मांसं मधु मद्यं इदं क्षत्रिया
द्यभिप्रायकं स्रक् च गंधलेपश्चालंकाराश्च तान् १२ एवं ब्रह्मचर्याश्रमधर्मानभिधायाप्याश्रमांतरधर्मान्विवक्षुस्तावदाश्रमांतराणां उ
क्तविधब्रह्मचर्याश्रमपूर्वकत्वमाह

उषित्वैवमिति द्वाभ्यां द्विजस्त्रैवर्णिकः एवमित्थं गुरुकुले उषित्वा सांगोपनिषदं सांगां सशिरस्कां त्रयीं यथा बुद्धिबलं यावत्स्वापेक्षितमधीत्यावबुध्य
तदर्थं ज्ञात्वा अभिवृत्तेति पाठस्तु चित्तः वेदमधीत्याभिसमावृत्य कुटुंबेषु चोदेशे इति श्रुत्यर्थस्यात्र प्रतमिन्नानादावृत्त्यत मावर्त्तनं कृत्वा ३३ यदी
श्वरः शक्तश्चेत्तर्हि गुरोः काममपेक्षितं वरं दत्वा गुरुणा मनुज्ञातः गृहं वनं वा प्रविशेत् गृहस्थाश्रमं संन्यासाश्रमं वा स्वीकुर्यादित्यर्थः वनशब्दः श्रु
विदेशोपलक्षकः कुटुंबेषु चोदेशे इवेति श्रुत्यनुरोधान्न तु वानप्रस्थाश्रमोपलक्षकः ब्रह्मचर्यानंतरं तत्परिग्रहानुपपत्तेः स हि गार्हस्थ्यानंत
रभावि ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वेति जाबालश्रुतेः गार्हस्थ्यानंतरं प्रव्र
जनमनु संन्यासाश्रमपरिग्रहो वानप्रस्थाश्रमपरिग्रहश्चेत्तु मयविधं विवक्षितं यद्येष्टं संन्यसेद्वनं वा प्रविशेदित्यर्थः तत्र वा वसेत्तत्रशब्देन ब्र
ह्मचर्यं गार्हस्थ्यं च विवक्षितं ब्रह्मचर्य एव निष्ठितो भवेद्गृहं प्रविश्य तत्रैव वा स्थितो भवेदित्यर्थः १४ एवं यथेष्टं परिगृहीतानां सर्वाश्रमा

उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च त्रयीं सांगोपनिषदं यावदर्थं यथाबलं १३ दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः
गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् १४ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्ट
वत् १५ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति १६ वानप्रस्थस्य वक्ष्यामि नियमान्
मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ न कृष्टपच्यमश्नीयादकृष्टं वाप्यकालतः अग्निपक्वमथामं वा
अर्कपक्वमुताहरेत् १८

एवमनुगतं धर्मं तत्फलं चाह द्वाभ्यां अग्नाविति आत्मनाविति सूर्याश्रमव्यतिरिक्ताश्रमाभिप्रायकं तस्यानग्नित्वात्
गुरावग्नावात्मनि स्वस्मिन् सर्वभूतेषु चांतःप्रविश्य धारकतया स्थितमिति शेषः अधोक्षजं भगवंतं पश्येत्पुनः स अधोक्षजो धामाधारो येषां तैर्भूतैरप्र
विष्टं पश्येद्व्याप्यवस्तुगततोषासंस्पृष्टं च पश्येत् तत्प्रविष्टवदुपपश्येदंतर्वहिश्च व्याप्य स्थितत्वादिति भावः १५ एवंविधदर्शी ब्रह्मचार्याद्यन्यतमः स्वरन्नाश्र
मधर्माननुतिष्ठन्विदितं ज्ञानं विज्ञेयं स्वात्मवरमात्माऽद्याप्यात्मा येनतादृशः परं ब्रह्माधिगच्छति प्राप्नोति १६ तावद्वानप्रस्थधर्मान्वक्तुं प्रतिजानीते
वानप्रस्थस्येति मुनीनां संमतान् वानप्रस्थस्य नियमान्धर्मान्वक्ष्यामि नियमानविशिनष्टि यान्नियमानिह लोकेऽनुतिष्ठन्मुनिरंजसा स्वर्गीयं लोकं
महर्लोकं प्राप्य भगवल्लोकं वा गच्छेत् १७ नियमानाह नेति कृष्टपच्यं कृष्ट्या ह्युपायैर्निष्पन्नं शाल्यन्नादिकं नाश्नीयाद्वनस्थ इति शेषः अकृष्टपच्य
मपि कालमकालादिकमकालजः पाककालात्पूर्वमेव परिपाकावस्थायाः पूर्वमेव तथाग्निपक्वमामं च नाश्नीयाद्गुताषि त्वर्कपक्वं सूर्यकिरणपक्वं फ

एवं वानप्रस्थधर्म उक्तः अथ यावत्स्वनियमानाह वन्यैरिति वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितान् नित्यान् निर्वपेत् नीवारादिनिष्पन्नैरे
व चरुपुरोडाशैर्वेदोदितधर्मान् कुर्यादित्यर्थः नवेन वेन तत्र नेन्नाद्येन लब्धेषु पुराणं पूर्वसंचितमन्नाद्यं परित्यजेत् १९ आत्मरक्षणार्थमग्नीनां रक्षणा
र्थमेव उटजं पर्णशालां त्वात्मनः शरणं गृहं कुर्यात् अथवाद्रिकंदरं पर्वतगुहां वाश्रयेत स्वयं तु हिमं च वायुश्चाग्निश्च वर्षं च सह यति वश्च तान् सहेत तर
तितिक्षवाद्याग्निवर्षार्कातपसाट् २० जटाः संतत्येति ताद्दशाः केशादीन् देहमलं चाद्यम ... धारयन् कमंडल्वादीश्च दधत् अग्निपरिच्छदान् स्रुक्
स्रुवाद्युपकरणानि च दधत् २१ इष्टवृत्तः केशाद्यावृद्धिर्न विपद्येत न क्षयात् द्वादश वा दश वा संवत्सरान् अष्टौ वा चतुरो वा द्वौ वा एकं वा चरेन्नियमानिति
शेषः २२ यदा द्वादशाद्यनंतरं व्याध्यादिभिः तज्जरया वा स्वक्रियायां स्वकीयधर्मचरणे आन्वीक्षिक्यामात्मविचाररूपायां तुरीयाश्रमध
र्मे वा शक्तः स्यात् तदा उत्तरवादिकमादिशाद् अनाग्न्यारोपणादिकं वक्ष्यमाणं विवक्षितं तत् कुर्यात् २३ तदेवाह आत्मनीति अग्नीनात्मनि समारोप्याहं

वन्यैश्चरुपुरोडाशान् कल्पयेत्कालचोदितान् लब्धे नवे न वेन्नाद्ये पुराणं तु परित्यजेत् १९ आत्मरक्षणार्थमेव शरणमुटजं वाद्रि
कंदरं सहेत हिमवाय्वग्निवर्षार्कातपमातुरः स्वयं २० केशरोमनखश्मश्रुमलानि जटिलो दधत् कमंडल्वजिने दंडवल्कलाग्नि
परिच्छदान् २१ चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रचित् २२ यदा कल्पः स्वक्रिया
यां व्याधिभिर्जरया ह्यथवा आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकं २३ आत्मन्यग्नीन् समारोप्य संन्यस्याहं ममात्मतां
कारणेषु न्यसेत्सम्यक् संघातं तु यथार्हतः २४ खे खानि वायौ निश्वासांस्तेजस्सूष्माणमात्मवान् अप्स्वसृक्श्लेष्मपूयानि

कारममकारौ संन्यस्य त्यक्त्वा यथायोग्यं स्वस्वकारणे संघातं भूतसंघातरूपं शरीरेन्द्रियादिकं सम्यक् न्यसेत् लीनमनुसंदधीत २४ एतदेव सविस्त
रमाह खे इत्यादिना खे आकाशे खानि शरीरगतछिद्राणि प्रलीनानि भावयेत् निश्वासान् देहगतान् उच्छ्वासादीन् प्राणान् वायौ तथा कुष्माणं तेजसि
समेत आत्मवान् धीमान् असृग्रुधिरं च श्लेष्मपूयं मूत्रादिकं च तान् अप्सु शेषमस्थिमांसादिकं क्षितौ शंद्विती इत्येवं यथा स्व यद्यत् उत्पन्नं तथा तद्
नतिक्रमेतास्वकारणे प्रलीनान् अनुसंदधीत २५ एवं भूतसंघातात्मकशरीरावयवानां यथायोग्यं स्वस्वकारणे लयानुसंधानमुक्त्वा अथ सवा
गादीनां वागादीन्द्रियाणां साधिदैवतेषु लयानुसंधानप्रकारमाह यद्यप्यधिदैवतेष्विन्द्रियाणामुत्पत्तिरिति तत्रैतेषां लयानुसंधानं कथ्यत
मसंगतं तथापि तेषां तत्प्रवर्तकत्वेन प्राधान्यात्तेष्वाव तत्स्वेपि अनुसंधानं तेषामपि स्वकारणेलयानुसंधानायकल्प्यते॥ ॥ ॥ ॥

६६

वाचमिति वक्तव्यमुक्तिः भाषणं तया सह वक्तव्यां सोक्तिकां वाचं वागिंद्रियमग्नावधिदैवते विनिर्दिशेदित्युत्तरेणान्वयः करौ शिल्पमादानादिरू
पं व्यापारं चैंद्रे तदधिदैवते २६ गत्या सह पादौ वयसि कालात्मके विष्णौ रत्या सहोपस्थं इंद्रियं प्रजापतावधिदैवते सोत्सर्गं पायुं विसर्गादिव्यापा
रसहितं पायुमिंद्रियं मृत्यावधिदैवते यथास्थानं यत यस्याधिदैवतरूपं स्थानं तदनतिक्रमेण निर्दिशेत् लीनं चिंतयन्ननुसंदधीत २७ एवं कर्मेंद्रि
याणि तदधिदैवतैः संबंधेनानुसंधानक्रममुक्त्वा अथ श्रोत्रादिज्ञानेंद्रियाणामाह दिक्ष्विति श्रोत्रमिंद्रियं नादेन शब्देन विषयभूतेन सह दि
क्ष्वधिदैवतासु त्वचमिंद्रियं स्पर्शेन विषयेण सहाध्यात्मनि वायावधिदैवते हे राजन् चक्षुरिंद्रियेण सह रूपाणि तद्विषयभूतानि ज्योतिषि सूर्ये
धिदैवते अभिनिवेशयेदभिनिविष्टं भावयेत् २८ जिह्वाख्यमिंद्रियमप्सु रसेन विषयभूतेन शुल्कप्रशब्दो रसोपलक्षकः प्रचेतसा वरुणेना

वाचमग्नौ सवक्तव्यामिंद्रे शिल्पं करावपि २६ पदानि गत्या वयसि रत्योपस्थं प्रजापतौ मृत्यौ पायुं विसर्गं च यथा
स्थानं विनिर्दिशेत् २७ दिक्षु श्रोत्रं सनादेन स्पर्शेनाध्यात्मनि त्वचं रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवे
शयेत् २८ अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् मनो मनोरथैश्चंद्रे बुद्धिं बोध्यैः कवौ परे २९ कर्माण्य
ध्यात्मना रुद्रे यदहं ममता क्रियाः सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ३० अप्सु क्षितिमपो ज्योतिष्यदो वायौ न
भस्यमुं कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ३१

धिदैवतेन सहाभिनिवेशयेदित्यनुषंगः त्रयाणां संश्लेषमात्रविवक्षया
प्रचेतसि प्रधाने तृतीया घ्रेयैर्गंधैर्विषयैः सह घ्राणमिंद्रियं क्षितौ क्षितिशब्दोपलक्षितयोरश्विनोर्न्यसेत् मनोरथैर्व्यापारैः सह मनइंद्रियं चं
द्रेधिदैवते बोध्यैर्विषयैः सह बुद्धिं परे श्रेष्ठे कवौ चतुर्मुखे २९ अध्यात्मना आत्मनि देहे वर्तमानेनाहंकारेण सह तत्कर्माणि देहाद्यभिमानादिरू
पाणि अहंकाराधिदैवते रुद्रे न्यसेत् अहंकारकर्माण्येव दर्शयति यद्यस्मादहंकारात् अहंममताक्रियाः देहेहंबुद्धिर्देहानुबंधिषु ममकारः तन्मू
लाः क्रियाः प्रवृत्तयश्च भवंति चित्तं चित्तावस्थमंतःकरणं सत्वेन सत्वगुणकार्यभूतस्वच्छत्वप्रकाशत्वादिरूपचिन्हवृत्त्या सह क्षेत्रज्ञे धिदैवते न्य
सेत् ततो वैकारिकं सात्विकाहंकारं गुणैः स्वकार्यभूतैरिंद्रियैः सह परे तत्कारणे महतत्वे न्यसेत् ३० एवं वैकारिकाहंकारस्य महति लयानुसंधानमुक्तं
पूर्वं वैश्वानरादिना तत्वकार्यप्रलयानुसंधानमुक्तमथ तत्वैः सह तत्कारणभूतस्य तामसाहंकारस्य महति लयानुसंधानप्रकारमाह अप्स्वि
ति तावत् क्षितिमप्सु आपो ज्योतिषि वायावमुं वायुं नभस्याकाशे तच्च कूटस्थे तामसाहंकारे तं च महति महत्तत्वेऽव्यक्ते चित्तमहिषि संसरहेऽचित्तम

छात्मिके कधानेतत्वाक्षेत्रपरमात्मके ऋीवेन मस मम ३१

आत एव मात्रावशेषितं प्रत्यगात्मानं मक्षरतया परमात्मशरीरात्मकत्वस्वाभाविकस्वरूपतया ज्ञात्वाऽद्वयः आत्मनि ज्ञातिगुणाद्यभिमानरहितः विरमेत
दग्धयोनिर्दग्धकाष्ठेन वह्निर्यथा विरमति तद्वत् मोनुष्ठानेऽशक्तो वानप्रस्थ एव एवमनुसंदधानो देहत्यागाया नशनव्रतं कुर्यादित्यर्थः ३२
इति सप्तमे द्वादशः॥१२॥ एवं स्वधर्मानुष्ठाने तुर्याश्रमधर्मे चाशक्तस्य वानप्रस्थस्यैवमनुसंधानपूर्वकानशनव्रतेन देहत्यागउक्तः अथ तच्छ
क्तस्य तुर्याश्रमपरिग्रहस्य [illegible] धर्मानाह त्रयोदशेनाध्यायेन कल्पइति आश्रमांतरधर्मानुष्ठानसमर्थश्चेदेवमनुसंदधत् परिव्रज्य संन्यस्य दे
हमात्रेणावशेषितः देहातिरिक्तं तदनुवंधि सर्वं परित्यज्येत्यर्थः ग्रामैकरात्रविधिना एकस्मिन् ग्रामे एकैकरात्रिं नयन् विधिना निरपेक्षो
महीं चरेत १ यद्यसौ परित्राट् त्यक्तदेहाद्यतिरिक्तं न किंचन बिभृयाच्चेत्तर्हि कौपीनमाच्छाद्यते येन तच्च वासः परं केवलं बिभृयात् दंडकमंडलुभ्या
इत्यक्षरतयात्मानं चिन्मात्रमवशेषितं ज्ञात्वाद्वयो यविरमे दग्धयोनिरिवानलः ३२ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे द्वा
दशोऽध्यायः॥१२॥ नारद उवाच॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं १ बिभृयाद्यद्यसौ
वासः कौपीनाच्छादनं परं त्यक्तं न लिंगाद्दंडादेरन्यत्किंचिदनापदि २ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः सर्वभूतसुहृच्छांतो
नारायणपरायणः ३ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ४ ॥श्रीरामचंद्राय नमः ॥

अन्यत् किंचिदप्यनापदि न बिभृयात् दंडपात्रग्रहणं उपवीत कटिसूत्रादेरप्युपलक्षणं अनापदीत्यनेन शीताद्यसहिष्णुत्वरूपा
पदि तु किंचित्तन्निवारकं वासोऽन्तरादि कम्प विभृयादिति सूचितं २ अनपाश्रयः परित्यक्तनियतनिवासः एकोऽसहायः भिक्षान्नोप
जीवी आत्मारामश्चरेत् सर्वेति सर्वेषु तेषु तरतमेषु तरतमेषु सुहृद्भावदालकत्वानुसंधानेन नितरामनुकूलः शांतः क्रोधरहितः ना
रायणः एव परायणं प्राप्यं प्रापकमाधारश्चेत्यध्यवसाययुक्तः इत्यर्थः ३ सदसतः चिदचिद्भ्यां परे विलक्षणे तत एवाव्यये स्वरूपतः स्वभा
वतश्च विकाररहिते आत्मनि परमात्मनि अदः इदं विश्वं पश्येत् तदायत्तसत्तास्थितिप्रवृत्तिमत्वेन तच्छरीरत्वेन च पश्येदित्यर्थः तथा परं ब्रह्मात्मा
नं प्रत्यगात्मानं सदसन्मये चिदचिदात्मके सर्वत्र जगति नियंतृतयात्मतया च स्थितं पश्येद् देव वासुदेवशब्दार्थानुसंधानमुक्तम् ४ ॥ ॥श्री॥ ॥

सुप्तेति सुप्तप्रबोधयोः संधौ सायं प्रातरित्यर्थः यद्वा तयोः संधिर्मध्यमावस्था स्वप्नावस्थायामित्यर्थः तदानीं शयानदेहादात्मनो व्यतिरेकः सुग्रहः
परमात्मनो विचित्रसृष्टियोगश्च न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान् रथयोगान्पथः सृजत इति श्रुतिः एवं च सुप्तप्रबोधयोः संधौ स्व
प्नावस्थायामात्मदृग्देहविलक्षणप्रत्यात्मस्वरूपविमर्शनपरः आत्मनः परमात्मनो गतिं विचित्ररथपथरथयोगादिसृष्टृत्वादिप्रकारं पश्येदनुसं
दधीत तथा बंधं मोक्षं च मायामात्रं न वस्तुत इति पश्येत् स बंधादिकमीश्वरसंकल्परूपमज्ञानाधीनं न त्वात्मस्वरूपमप्रयुक्तमिति पश्येदित्यर्थः
मायाशब्दश्चाज्ञानपर्यायः माया वयुनं ज्ञानमिति नैघंटुकाः बंधमोक्षयोश्च परमात्मसंकल्पाधीनत्वं सूचितं पराभिध्यानात्तु तिरोहितं तत
तो ह्यस्य बंधविपर्ययाविति बंधमोक्षयोः प्रकृतस्यान्वयव्यतिरेकरूपत्वात् समायामात्रत्वं ननु कथं मोक्षस्य स्वरूपं प्रयुक्तत्वाभावः बंधप्रति

सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः ५ नाभिनंदेद्ध्रुवं मृत्युमध्रुवं चास्य जीवितं कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं ६ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां अतिवादांस्त्यजेत्तर्कान्पक्षं कंच नं संश्रयेत ७ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ८ ॥ ॥श्री॥ ॥

योगित्वादिति भावः नह्यबद्धस्य मोक्षसंभवः ५ ध्रुवं निश्चितं मृत्युमध्रुवमस्थिरं जीवितं च नाभिनंदेत् मर्तुमिति दृष्टांतार्थं यथा मर्तुं ना
भिनंदति तथाऽध्रुवं जीवितमपि नाभिनंदेदिति तर्हि परं केवलं तु भूतानां प्रभवाप्ययो यस्मात्तमुत्पत्तिप्रलयहेतुं कालमेव प्रतीक्षेत कालगतिमे
वालोचयेदित्यर्थः ६ असच्छास्त्रेषु धनधात्वशास्त्रेषु न सज्जेत न सक्तो भवेत् जीविकां जीवनोपायं वृत्तिं नोपजीवेत अतिवादान् जल्पवितं
डादिनिष्ठान् तर्कान् त्यजेत् कमपि पक्षं माग्रहेणाश्रयेत ७ शिष्याननुबध्नीत तद्धितलोभाभावादिति भावः बहून् ग्रंथान्नैवाभ्यसे
न्नैव पठेत् व्याख्यां नोपयुंजीत न पाठयेदित्यर्थः चित्तस्यान्यपरत्वप्रसंगादिति भावः आरंभान् महापद्माद्यारंभान् क्वचिदपि नारभेत् न कु
र्यात् निग्रहानुग्रहादिवैषम्यप्रसंगादिति भावः यद्वा आरंभान् गृहाद्यारंभान् नारभेदित्यर्थः ८ शांतस्य यतचित्तस्य महात्मनो यतेराश्रमः श्र

[illegible] हर्षेणापूर्वश्लोकानेव पुनः पठति॥ यूयमिति॥ श्लोकाः पुनस्तादेव व्याख्याताः॥ कैवल्यनिर्वाणसुखानुभूतिः निर्दोषनिःदुःखसुखरूपविज्ञानमयः॥ विधिकृत्क्रियाणां कोऽपि वस्तुतया इदंतया॥ ७५॥ ७६॥ ७७॥ स्कंधादावुपक्रांतामत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणेति नारदयुधिष्ठिरसंवादमुपसंहरति भगवान् शुकः इतीति॥ इत्थं देवर्षिणा प्रोक्तं निशम्य कुरुपुंगव तर्षभो युधिष्ठिरः सुप्रीतः कृष्णं श्रवणावेलायां पार्श्वस्थितं च श्रद्धया देवर्षिं च प्रेम्णा विह्वलः पूजयामास ततः पूजितो देवर्षिः कृष्णपार्थावुपामंत्र्यानुज्ञाप्य ताभ्यामनुज्ञातः प्रययौ पार्थो युधिष्ठिरः कृष्णं परब्रह्माभिन्नं श्रुत्वा परमविस्मितः निरतिशयाश्चर्ययुक्तो बभूव॥ ७८॥ यद्वक्ष्यमाणतीयाध्यायादौ देवासुरनराणां सर्गो नागानां मृगपक्षिणामित्यादिना तस्योत्तरं ततः प्रभृत्येतावत्पर्यंते न उक्तमुत्तर[illegible]रावसरप्रदानायउप

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं॥ ७५॥ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः॥ प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च॥ ७६॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः॥ ७७॥ श्रीशुक उवाच॥ इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः॥ ७८॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ मुनिः॥ ७९॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः॥ देवासुरमनुष्याद्या लोका यत्र चराचराः॥ ८०॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे पंचदशोऽध्यायः॥ १५॥

संहरति॥ इतीति॥ इत्थं दाक्षायणीनां दित्यादीनां वंशाः पृथक् तत्तत्परंपरानुपूर्व्याः प्रकीर्तिताः कथंभूताः यत्र वंशेषु देवादयश्चराचरात्मका जाताः इति शेषः॥ यद्यपि दाक्षायणीवंशवर्णनोपसंहारः षष्ठांते एव कर्तव्यस्तत्रैव समाप्तत्वात् पितृद्वंशांते भर्तृद्वितिज प्रसंगानुप्रसक्तशंकापरिहारतदनुप्रसक्तवर्णनात्मकत्वादस्य स्कंधस्यैतदंते एव दाक्षायणीवंशवर्णनमुपसंहृतमित्यवगंतव्यं॥ ८०॥ इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तत्त्वरणाश्रयसेवाप्रसन्नतत्त्वकृतसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवीरराघवविदुषा लिखितायां सप्तमे पंचदशः॥ १५॥ श्री॥

मूल०॥ ९०५॥ टीका ४१००॥ समग्र ५०५५॥